This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

A. Or.
4737

Pandit

Digitized by Google

Digitized by Google

Digitized by Google

A. Or. 4737

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12.] December, 1893. [Vol. XV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1893.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

BIBLIOT
MONACENSIS

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. XV.

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO.

BENARES:

1893.

Digitized by Google

BIBLIOTHECA
REGIA
MONACENSIS

Digitized by Google

INDEX TO VOLUME XV. NEW SERIES.

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ,... 1, 57, 113, 169, 225, 281, 337, 393, 449, 505, 561, 617.

ŚRĪBHĀSHYA, ... 17, 89, 145, 201, 257, 313, 369, 425, 473, 537, 593, 649.

SAṀKARSHAKĀṆḌA, ... 73, 129, 185, 241, 297, 353.

VEDĀRTHA SAṀGRAHA, ... 489, 521, 577, 633.

COPPER-PLATE GRANT OF VAIDYADEVA, KING OF KĀMARŪPA, ... 33.

Supplement.

THREE COPPER-PLATE GRANTS OF GOVINDACHANDRA, OF KANAUJ, appended to No. 4.

THE HYMNS OF ATHARVA-VEDA, appended to Nos. 10, 11, 12.

Digitized by Google

Digitized by Google

शंसतीति ज्योतिष्टोमे मरुत्वतीये शस्त्रे विधानमेतत्, सामिधेनीग्रहणं प्रयोगविषयोपलक्षणार्थमिति भावः॥

"क्रतौ कुण्डपाय्यसंचाय्यौ"॥ ण्यति प्रकृते यत्प्रत्ययान्तः कुण्डपाय्यशब्दो निपात्यतइत्युक्तं तत्र प्रयोजनमाह। 'यतो नाव इतीति'। यदुत्तरपदस्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरेण स एव स्वरः सिद्धो भवतीत्यर्थः, ण्यति तु स्वरितत्वं स्यात्॥

"अग्नौ परिचाय्योपचाय्यसमूह्याः"॥ 'अग्नाविति'। न ज्वलने किं तर्हि तदर्थइष्टकाचयनविशेषे, तत्रैव रूढत्वात्, ईह संपूर्वादूह वितर्कइत्यस्मादनेकार्थत्वादुहेरर्थे वर्तमानादुलन्तत्वाद् ण्यति समूह्यमिति सिद्धं, तथा च समूह्यं चिन्वीत पशुकामः पशवो वै पुरुषः पशूनेवास्य तत्समूहतीति वह्यर्थेनोहिना ब्राह्मणे समूह्यशब्दो निरुक्तः॥

"चित्याग्निचित्ये च"॥ 'चित्योग्निरिति' कर्मणि यदपवादः क्यब् निपात्यते तेनाद्युदात्तत्वं भवति। 'भावे यकारप्रत्यय इति'। किमर्थं पुनरत्रापि क्यबेव न निपातितः, एवं हि तुङ् निपात्यो न भवति तत्राह। 'तेनान्तोदात्तत्वं भवतीति'। 'अग्नावित्येवेति'। तच्च चित्यशब्दस्यैव विशेषणार्थं नाग्निचित्याशब्दस्य, तस्य भावे निपातितत्वात् तदेतद्दर्शितं 'चेयमन्यदिति'॥

"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"॥ 'आदिशब्दः प्रत्येकमभिसंबध्यतइति'। गणपाठादिति भावः। 'अपोद्धृत्य ये पठ्यन्तइति'। ते गृह्यन्तइत्यन्वयः, अपोद्धृत्येति बुद्ध्या पृथक्कृत्येत्यर्थः। किमर्थं पुनरपोद्धृत्य प्रत्ययविधानं यावता नन्दनादीनां गणपाठादेव सिद्धं साधुत्वम्, उच्यते, असत्यस्मिन्नष्टाध्याय्यां क्वचिदप्यनुपयोगाद्गणत्रयपाठोऽनार्षोऽध्यवसीयेत। 'नन्दिवाशीत्यादि'। टुनदि समृद्धौ, वाश्र शब्दे, मदी हर्षे, दुष वैकृत्ये, राध साध संसिद्धौ, वृधु वृद्धौ, शुभ शुम्भ शोभार्थे, रुच दीप्तौ। 'दूषण इति'। 'दोषो णौ' वित्यूत्वम्। 'सहितपीत्यादि'। षह मर्षणे, तप सन्तापे, शमु दमु उपशमे। 'जल्पन इत्यादि'। जल्प जप व्यक्तायां वाचि। रमु क्रीडायाम्, दृप हर्षविमोचनयोः, क्रदि आह्वाने

Digitized by Google

रोदने च । कृष विलेखने, ऋषु अलीके, अर्द्द हिंसायाम्, जनमर्द्दयतीति जनार्दनः, कर्मण्यणि प्राप्ते, एवमुत्तरत्रापि कर्मण्युपपदे द्रष्टव्यम् । यु मिश्रणे, षूद क्षरणे, मधुनामाऽसुरस्तं सूदयतीति मधुसूदनः । ञिभी भये । णिचि 'भियो हेतुभये षुक्' । लूञ् छेदने, णश अदर्शने, दमु उपशमे, ण्यन्तौ, चित्तं नाशयतीति चित्तनाशनः, कुलं दमयतीति कुलदमनः । 'ग्राहीत्यादि' । ग्रह उपादाने, षह मर्षणे, तपु उपतापे, दसु च, भस भर्त्सनदीप्त्योः, तिष्ठतेरातो युक्, मन्त्रि गुप्तभाषणे चुरादिः, अर्द्द हिंसायाम् । 'रक्षेत्यादि' । रक्ष पालने, श्रु श्रवणे, डुवप् बीजसन्ताने, शो तनूकरणे, एषां निशब्दउपपदे णिनिः । 'याचीत्यादि' । टुयाचृ याञ्चायाम्, हृञ् हरणे, व्रज गतौ, वद व्यक्तायां वाचि, वस निवासे, एषां प्रतिषिद्धानां णिनिर्भवति, प्रतिषिद्धार्थानामित्यर्थः, प्रतिषिद्धार्थता च नञ्पूर्वाणां भवतीति दर्शयति । 'अयाचीत्यादि' । यद्यपि विशब्दोपि विगर्द्दभरथिरित्यादौ प्रतिषेधे दृष्टः, याच्यादीनां तु विपूर्वाणां णिनिर्न दृश्यतइति नञ्येव णिनिर्विज्ञायते । 'अचामित्यादि' । अजन्तानान्धातूनामचित्तकर्तृकाणां प्रतिषिद्धार्थानां णिनिर्भवति, न विद्यते चित्तमस्येत्यचित्तः स कर्त्ता येषान्ते तथोक्ताः । 'विशयी विषयीति' । शीङ् स्वप्ने, षिञ् बन्धने, वृद्ध्यभावो निपातनात् । 'अभिभावीभूत इति' । अभिभूतवानभिभावी । अपराधी अवरोधी, राध साध संसिद्धौ, रुधिर् आवरणे । 'परिभवी परिभावीति' । पक्षे वृद्ध्यभावः । 'पचेत्यादि' । डुपचष्पाके । वच परिभाषणे, डुवपिरुक्तार्थः, एवं वदिरपि । चल कम्पने, पत्लृ गतौ । 'नदडिति' । नद अव्यक्ते शब्दे । टकारो ङीबर्थः, एवमुत्तरत्रापि । भष भर्त्सने, प्लुङ् गतौ, चर गत्यर्थः, गॄ निगरणे । तॄ प्लवनतरणयोः, चुर स्तेये, दिवु क्रीडादौ, मूदिरुक्तार्थः, जॄष् वयोहानौ, मृङ् प्राणत्यागे, क्षमूष् सहने, षिवु तन्तुसन्ताने, मिष स्पर्द्धायाम्, कुप क्रोधे, मिधृ मेधाहिंसनयोः, व्रण गात्रचूर्णने चुरादिः, नृती गात्रविक्षेपे, दृशिर् प्रेक्षणे, सृप्लृ गतौ, डुभृञ् धारणपोषणयोः, जारं बिभर्त्तीति जारभरा, एवं श्वानं पचतीति श्वपचा, न्यङ्क्वादिषु श्वपाकशब्दस्य पाठा-

Digitized by Google

त्यद्वे कर्मण्यणपि भवति । 'पचादिराकृतिगण इति' । तत्सम्बन्धिन आदिशब्दस्य प्रकारवचनत्वात्, तथा च 'शिवशमरिष्टस्य कर' इति कृञोच् प्रत्ययः कृतः । घटेश्च 'कर्मणि घटोठजि' ति, तथा यङन्तानां 'यङोचि चे' ति यङोस्मिन्नचि लुगुक्तः, भाष्ये चाजपि सर्वधातुभ्यो वक्तव्य इत्युक्तं पचाद्यनुक्रमणन्तु नदडित्यादावनुबन्धासञ्जनार्थं कर्मोपपदानाम् इगुपधानां च बाधकबाधनार्थम्, देवडित्युभयार्थमन्येषां तु प्रपञ्चार्थं द्रष्टव्यम् ॥

"इगुपधज्ञाप्रीकिरः कः" ॥ इगुपधादीनां समाहारद्वन्द्वे नपुंसकत्वेन ह्रस्वप्रसङ्गादितरेतरयोगे द्वन्द्वो व्यत्ययेन भ्यसः पञ्चम्येकवचनं तत्र कृशब्दस्य धात्वनुकरणत्वात्प्रकृतिवदनुकरणं विभक्तावित्वम् । 'ज्ञ इति' । 'आतो लोप इटि च' । 'प्रिय इति' । प्रीञ् तर्पणे, इयङादेशः । 'किर इति' । कॄ विक्षेपे 'ऋत इद्धातोः' । 'पचादिषु द्रष्टव्या इति' । यद्यप्यजपि तृजादिवत्सर्वधातुभ्यो भवति तथाप्यपवादबाधनार्थमेते पचादिष्ववश्यं पाठ्या इत्यर्थः ॥

"पाघ्राध्माधेट्दृशः शः" ॥ पा पाने, घ्रा गन्धोपादाने, ध्मा शब्दाग्निसंयोगयोः, धेट् पाने, दृशिर् प्रेक्षणे, पा रक्षणइत्यस्य तु लुग्विकरणत्वादग्रहणम् । 'उत्पिब इत्यादि' । पाघ्रादिसूत्रेण यथायोगं पिब्रादय आदेशाः । 'व्याघ्र इति' । अत्रा 'तश्चोपसर्ग' इति क एव भवति, अत्र च व्याघ्रादिभिरिति वचनं लिङ्गम् ॥

"अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च" ॥ अनुपसर्गादिति व्यत्ययेनैकवचनमित्याह । 'अनुपसर्गभ्य इति' । लिप उपदेहे, विद्लृ लाभे, आगामिना नुमा सनुम्कयोर्ग्रहणं तेन विद्यन्तराणामग्रहणम्, धृञ् धारणे, धृञ् अवस्थाने, णयन्तयोर्द्वयोरपि ग्रहणम्, पार तीर कर्मसमाप्तौ, विद चेतनाख्यानादिषु चुरादिः, ज्ञानाद्यर्थानामन्यतमो वा हेतुमण्णयन्तः, एजृ कम्पने णयन्तः, चिती संज्ञाने चुरादिः, सातिर्हेतुमण्णयन्तः, षह मर्षणे चुरादिर्हेतुमण्णयन्तो वा । 'लिम्पः विन्द इति' । 'तुदादिभ्यः शः' 'शे मुचादीना' मिति नुम्, धारयादिषु शब्गुणायादेशाः । 'नो

Digitized by Google

लिम्पेरिति'। छन्दसि तु धर्त्ता च विधर्त्ता च विधारय इति दृश्यते। 'अरविन्द इति'। अराकाराणि दलान्यरशब्देनोच्यन्ते॥

"ददातिदधात्योर्विभाषा"॥ 'दद: दध इति'। शप: श्लु:। द्विर्वचनं 'श्नाभ्यस्तयोरात' इत्याकारलोप:, दद दाने, दध धारणइत्येताभ्यामचि कृते दद: दध इति सिद्धं दाधाभ्यामपि णे कृते दायो धाय इति, इदन्तु वचनं स्वरार्थम् अदद: अदध इति अचकावशक्तावित्यन्तोदात्तत्वम्मा भूत् नञ्स्वर एव यथा स्यादिति॥

"ज्वलिति कसन्तेभ्यो ण:"॥ 'इतिशब्द आद्यर्थ इति'। अनेकार्थत्वान्निपातानामुच्चावचेष्वर्थेषु निपतन्तीति निपाता इति निरुक्तकारो निपातशब्दं निराह, ज्वलितीत्यविभक्तिको निर्द्देश:, ज्वलादिभ्य इत्यर्थ:, कसिरन्ते येषां ते कसन्ता:, तत्र ये कसमधीत्य वृदिति पठन्ति तेषां मते कसन्तग्रहणं चिन्त्यप्रयोजनम्। ननु च ज्वल दीप्ताविति द्वि: पठ्यते घटादिषु परस्ताच्च तेषामसत्यस्मिन्विशेषणे सन्देह: स्यात् किं पूर्वो ज्वलिरादिरुत पर इति, अत: कस: समीपभूतेभ्यो ज्वलादिभ्य इति विशेषणमर्थवत्, नैतत्सष्ठूच्यते, यद्यन्तशब्द: समीपवचनो बहुव्रीहौ तत्पुरुषे च कसेर्ग्रहणं न प्राप्नोति, पूर्वत्र ज्वलतावादावभिप्रेते तदनन्तर एव धातुरुपादीयेत परोपदेशेनैव ज्वलतेर्ग्रहणसिद्धे:, घटादिपाठश्च मित्संज्ञायां चरितार्थ:, इतरस्त्वचरितार्थ इति स एवादिर्भविष्यति।' अचोपवाद इति'। तस्यापि सर्वधातुविषयत्वादिति भाव:। भ्रमु चलनइत्यस्य ज्वलादिपाठ: किमर्थ:, यावता पचाद्यचि भ्रम इति सिद्धं णेप्येतदेव रूपं नोदात्तोपदेशस्येति वृद्धिप्रतिषेधात्, इहाभ्रम इति अचकावशक्ताविति स्वरो मा भूदिति॥

"श्याद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिषश्वसश्च"। 'अनुपसर्गादिति निवृत्तमिति'। उत्तरसूत्रे पुनरनुपसर्गग्रहणात्। 'विभाषेति चेति'। निवृत्तमित्यपेक्ष्यते विभाषाग्रहणं ह्यनुपसर्गग्रहणेन सम्बद्धमतस्तन्निवृत्तावस्यापि निवृत्ति:। 'श्यैङ् इति'। श्यैङ्गतावित्यस्मात्, शी आत् श्यादिति शीङो यणादेशेन ग्रहणन्न भवति व्याख्यानात् झटिति प्रतीताव-

Digitized by Google

नारोहाच्च । 'आकारान्तेभ्य इति' । एतेन अत्तेरञ्चब्दान्तानां पतिप्रभृतीनामकारान्तानां च ग्रहणं न भवतीति दर्शयति, एतदपि व्याख्यानादेव । व्यध ताडने, स्रु गतौ आङ्पूर्वः संपूर्वश्च, इण् गतौ अतिपूर्वः, षोन्तकर्मणि, हृञ् हरणे अवपूर्वौ, लिह आस्वादने, श्लिष आलिङ्गने, श्वस प्राणने, येत्र सोपसर्गास्तेभ्यः सोपसर्गेभ्य एव भवति शेषेभ्यस्त्वविशेषेण । 'बाधकबाधनार्थमिति' । 'आतश्चोपसर्ग' इति विशेषविहितः कः सामान्यविहितस्य णस्य बाधकस्तद्बाधनार्थमिदम्, एतेनावस्यतेरुपादानं व्याख्यातम् । 'अवश्याय इति' । पूर्ववन्नुक् ॥

"दुन्योरनुपसर्गे" ॥ 'दाव इति' । वनवह्निः । कथन्तर्ह्येव दव इति, नयतिसाहचर्यात्सानुबन्धकस्य दुनोतेरिह ग्रहणं निरनुबन्धकाद्द्रवतेः पचाद्यचि भविष्यति, करणसाधनो वा 'ऋदोरबि'त्यबन्तः ॥

"विभाषा ग्रहः" ॥ 'व्यवस्थितविभाषा चेयमिति' । एतदेव स्पष्टयति । 'जलचरइति' । 'भव इति' । भवत्येव न तु कदा चिन्न भवतीति भवो देवः संसारश्च भावाः पदार्थाः ॥

"गेहे कः" ॥ 'गेहइति' । प्रत्ययार्थस्य कर्त्तुर्विशेषणं नोपपदं गृहपतिना संयुक्तइति निर्द्देशादित्याह । 'गेहे कर्त्तरीति' । 'तात्स्थ्याद्दाराश्चेति' । गेहमित्यपेक्ष्यते तेन गौणस्यापि गेहस्य ग्रहणमिति दर्शयति, तच्च तन्त्रावृत्त्योरन्यतराश्रयणेन लभ्यते तत्र वेश्मनि पुल्लिङ्गबहुवचनान्त एव गृहान्ह दाहुको भवति, गृहानुत्तरया संकाशयते, गृहान्गच्छ, गृहपत्नी गृहानहं सुमनसः प्रपद्यइति, नपुंसकलिङ्गाभिधेयवचनः, एवं दारेष्वपि, अन्ये तु गृहशब्दो वेश्मन्येव मुख्यः, दारेषु गौण इति वदन्ति, तथा न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यतइति वेश्मन्येव मुख्यतां दर्शयन्ति, यथा वृत्तिकारेणोक्तं तथा दारेष्वपि मुख्य एवेति लक्ष्यते ॥

"शिल्पिनि ष्वुन्" ॥ पूर्वेण साहचर्यात् शिल्पिनीत्यपि प्रत्ययार्थस्य विशेषणञ्चोपपदमित्याह । 'शिल्पिनि कर्त्तरीति' । क्रियासु कौशलं शिल्पं तद्यस्यास्तीति शिल्पी । 'नृतिखनीत्यादि' । एतद्वचनमेव, तेनाह्वाता आह्वायक इत्यादौ न भवति । 'रञ्जेरनुनासिकलोपश्चेति' । एतत्तु ज्ञापका-

त्सिद्धं यदयं 'जनीजृष्क्नसुरञ्जोमन्ताश्चे' ति मित्संज्ञां शास्ति तज्ज्ञापयति रञ्जेरकित्यप्यनुनासिकलोपो भवतीति ॥

"गस्थकन्" ॥ 'गायतेरिति'। कै गै शब्दे, गामादाग्रहणेष्वविशेष इति गाङ्कतावित्यस्यापि ग्रहणं प्राप्तम्, अनभिधानान्न भवति थकन्प्रत्ययो हि गायत्यर्थविषयमेव शिल्पिनमभिधातुं समर्थः ॥

"ण्युट् च" ॥ णकारो युगर्थः, टकारो ङीबर्थः। 'योगविभाग उत्तरार्थ इति'। उत्तरत्र ण्युट एवानुवृत्तिर्यथा स्यात् थकनो मा भूदिति ॥

"हश्च व्रीहिकालयोः" ॥ 'जहातेरिति'। ओहाक् त्यागे। 'जिहातेरिति'। ओहाङ्गतौ, प्रायेण जिहीतेरिति पाठः स त्वयुक्तस्तिपः पित्त्वादीत्वाभावात्, जहातेः ककारोऽत्र सामान्यग्रहणार्थः, अन्यथा एकानुबन्धकत्वादस्यैव स्यात्, अथ हाङ इत्युच्येत एवमपि तस्य ग्रहणं न स्यात् तस्माद् द्वयोरपि ग्रहणम्। व्रीहिकालयोरिति कर्त्तृविशेषणञ्चोपपदं त्रिचतुर्भ्यां हायनस्य 'दामहायनान्ताच्चे' ति वचनादिति मत्वाह। 'व्रीहौ काले च कर्त्तरीति'। 'जहत्युदकमिति कृत्वेति'। व्रीहौ हायनशब्दस्य प्रवृत्तिनिमित्तं दर्शितं, जाङ्गलदेशोद्भवाः केचिद् व्रीहयो हायना इत्याहुः। 'जिहीते भावानिति'। भावाः पदार्थास्तान् जिहीते गच्छति परिच्छेदकत्वेन व्याप्नोतीत्यर्थः ॥

"प्रसृल्वः समभिहारे वुन्" ॥ प्रसृल्व इति पञ्चम्याः स्थाने जस्, 'ओस्सुपी' ति यणादेशः। 'साधुकारित्वं लक्ष्यतइति'। प्रायः सहचरितत्वात् पुनःपुनरनुष्ठानं समभिहारः, यश्च यां क्रियां पुनःपुनरनुतिष्ठति तस्य तत्र प्रायेण कौशलमुपजायते ऽतः प्रायः साहचर्यात्साधुकारित्वं लक्ष्यते, लक्षणया तत्र वर्त्तत इत्यर्थः, तेन किं सिद्धं भवतीत्याह। 'सकृदपीति' ॥

"आशिषि च" ॥ 'आशिषि गम्यमानायामिति'। न वाच्यायां 'कर्त्तरि कृदि' ति कर्त्तुरेव वाच्यत्वात्। 'प्रार्थनाविशेष इति'। अप्राप्तस्याभिलषितस्य प्राप्तुमिच्छा प्रार्थना आशीः। 'स चेत्क्रियाविषय इति'। धातोरित्यधिकाराद् धातोश्च क्रियावचनत्वात्। 'अमुष्याः क्रियाया

Digitized by Google

इति’। जीवनादिकायाः, अनेन प्रयोक्तृधर्मत्वमाशिषो दर्शयति । ‘जीवतादिति’। आशिषि लोट्प्रयोगेणोदाहरणे आशिषं दर्शयति ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयस्याध्यायस्य प्रथमः पादः ॥

“कर्मण्यण्” ॥ कर्मणीति नेदं स्वरूपग्रहणमशब्दसञ्ज्ञेति प्रतिषेधात्, ननु चार्थस्येयं सञ्ज्ञा न शब्दस्य, अशब्दसञ्ज्ञेति नैवं विज्ञायते शब्दस्य सञ्ज्ञा शब्दसञ्ज्ञेति किन्तर्हि शब्दे सञ्ज्ञा शब्दसञ्ज्ञेति, शब्दशब्देन शब्दानामनुशासनं व्याकरणमुच्यते, असति च बाधे कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणं युक्तं तस्मात्पारिभाषिकस्य कर्मणो ग्रहणमङ्गीकृत्य तस्यावान्तरभेदमाह । ‘त्रिविधं कर्मेति’। ता एव तिस्रो विधा दर्शयति । ‘निर्वर्त्यं विकार्यं प्राप्यं चेति’। यदसज्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्यं, यथा कुम्भं करोति पुत्रं प्रसूतइति, यस्य तु सत एव कश्चिद्विकारः क्रियते तद्विकार्यं, स च विकारः क्व चित्प्रत्यक्षगम्यः, यथा काष्ठानि भस्म करोति, सुवर्णं कुण्डलङ्करोतीति, क्व चिच्छास्त्रगम्यो व्रीहीन् प्रोक्षतीति, अत्र प्रोक्षणेन व्रीहिषु कश्चिदतिशयो जन्यतइति शास्त्रादेव गम्यते, एतावता च भेदेन संस्कार्यमेतत्कर्मेति चातुर्विध्यं मीमांसका मन्यन्ते, क्रियाकृतविशेषाभावे तु प्राप्यं कर्म, यथा वेदमधीते चर्चां पारयतीति, ननु च कर्त्तुरीप्सिततममित्येतदेव कर्म त्रिविध, मन्यदप्यस्ति ‘तथायुक्तं चानीप्सित’ मिति तच्च द्विविधं द्वेष्यमितरच्च, तथा ‘अकथितं च’ एवं ‘दिवः कर्म च’ तथा ‘अधिशीङ्स्थासां कर्मेति’ तदेवमवान्तरभेदविवक्षायां सप्तविधं कर्म । उक्तं च

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तत्रेप्सिततमं कर्म चतुर्द्धान्यत्तु सञ्ज्ञितम् ॥
औदासीन्येन यत्प्राप्यं यच्च कर्त्तुरनीप्सितम् ।
सञ्ज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥

इति । तत्किमुच्यते त्रिविधं कर्मेति । के चिदाहुः कर्त्तुरीप्सिततममेवात्र कर्म गृह्यते ऽन्यत्राण् न भवतीति, अन्ये त्वाहुः । आदित्यं पश्यता-

Digitized by Google

त्यादौ मा भूदित्येवमर्थं कर्मणि निर्वर्त्यमाने विक्रियमाणइति वक्तव्यमित्याशङ्क्य वार्त्तिककारेणोक्तं कर्मणि निर्वर्त्त्यमाने विक्रियमाणइति चेद्दुदाध्यायानामुपसंख्यानमित्यादि तदनेन प्रदर्श्यते, त्रिविधमपि कर्म गृह्यते न पुनः प्राप्यं न गृह्यतइति न तु सूत्रान्तरोक्तं व्यावर्त्त्यते, तथा च 'दिवः कर्म चे' त्यत्र समावेशस्य प्रयोजनमुक्तं मनसा देव इत्यत्र कर्मत्वादण्करणत्वात्तृतीयेति, एवं च वृत्तावासः पर्वताधिवास इत्याद्यपि यथादर्शनं भवतीति । 'अनभिधानादिति' । तच्चानभिधानं यत्राप्तैरुक्तं तत्रैवान्यत्र तु यथालक्षणं भवत्येव, तथा च पठति यथालक्षणमप्रयुक्तइति । 'शीलिकामीत्यादि' । शील समाधौ, भक्ष अदने चुरादिः, कमु कान्तौ णिङन्तः, चर गत्यर्थ आङ्पूर्वः, णस्य णित्करणं चरेर्वृद्ध्यर्थम् । 'पूर्वपदप्रकृतिस्वरत्वं चेति'। कृदुत्तरपदप्रकृतिस्वरस्यापवादः । 'मांसशीलेति'। अत्राणि सति ङीप्स्यात्, णोपि क्व चिदणकृतं भवतीत्येतत्तु ताच्छीलिकएव णे भवति मनेर्दीर्घश्चेति सप्रत्ययान्तो मांसशब्दः, कल्याणशब्दो लघावन्ते द्वयोश्च बहुषो गुरुरिति मध्योदात्तः । अस्यायमर्थः, अन्ते लघौ परतो द्वयोश्चान्तयोर्लघ्वोः परतो बहुषः शब्दस्य यो गुरुः स उदात्तो भवति, बहुष इति बह्वच इत्यर्थः, अषित्यचः पूर्वाचार्यसञ्ज्ञा । 'ईक्षिक्षमिभ्यां चेति'। अत्रापि पूर्वपदप्रकृतिस्वरत्वं चेत्येव वाक्यभेदस्तु वैचित्र्यार्थः । इह यो मांसं भक्षयति मांसं तस्य भक्षो भवति तत्र भक्षयतेः कर्मण्यणन्तस्य बहुव्रीहिणा सिद्धम्, एवमन्यत्रापि, यः पुनरण्यन्तस्तस्य घञन्तस्य बहुव्रीहिर्नार्थ एतेन, ननु बहुभक्ष इत्यत्र बहोर्नञ्वदित्युत्तरपदान्तोदात्तत्वं प्राप्नोति एवं तर्हि भावेऽजन्तेन व्यधिकरणपदो बहुव्रीहिर्भविष्यति बहुः भक्षोस्य बहुभक्ष इति, तत्रोत्तरपदार्थस्य बहुत्वाभावाद्बहुस्वरो न भविष्यति, सत्यम्, अणबाधनार्थं तु वचनम् अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन । पचादिभ्योऽज् अनुपपदोकारस्तस्यावकाशः पचतीति पचः,कर्मोपपदस्यावकाशः काण्डलावः शरलावः, ओदनपाच इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति तेनोपधावृद्धिरुपपदसमासश्च नित्यो भवति अचि तु षष्ठीसमासो विकल्पितस्यात्, न च वाच्यं युगपद्विवक्षायां भवतु विप्रतिषेधः केवले

Digitized by Google

पच्यर्थे विवक्षिते ऽचि कृते पश्चादोदनसम्बन्धे विवक्षिते ओदनपच इत्यपि प्राप्नोति एकत्वात्प्रयोगस्य नहि तस्मिन्नेव प्रयोगे विवक्षितं चाविवक्षितं च कर्म भवति तस्मादोदनपच इत्यसाधुरेव, गङ्गाधरः श्रीधरः वज्रधरः भूधरः स्रग्धरेति तु सञ्ज्ञाशब्दाः, यदा त्वजपि सर्वधातुभ्य इति पक्षस्तदापवादत्वादेव तस्याण् बाधकः, तथा 'इगुपधज्ञाप्रीकिरः कः' अनुपपदस्तस्यावकाशः विक्षिपः विलिखः कर्मोपपदस्य स एव, काष्ठभेद इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति, तथा ऽनुपसर्गाल्लिम्पविन्देत्यनुपपदः शस्तस्यावकाशो लिम्पतीति लिम्पः कर्मोपपदस्य स एव, कुड्यलेप इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति 'आतश्चोपसर्ग' इति कोनुपपदस्तस्यावकाशः सुग्लः सुम्लः कर्मोपपदस्य स एव, गोसन्दाय इत्यत्रोभयप्रसङ्गे परत्वादयमेवाण् भवति ॥

"ह्वावामश्च" ॥ 'वेञ् तन्तुसन्तान इति'। वा गतिगन्धनयोरित्यस्य ग्रहणं न भवति अकर्मकत्वात् भ्रमणार्थो ह्यसौ, सर्वा दिश आवाति वात आवातु भेषजमिति सोपसर्गस्य तु सकर्मकत्वेप्यग्रहणं पूर्वेणैवाणः सिद्धत्वात्, वाता वान्ति दिशो दशेति प्रयोगश्चिन्त्यः, अथापि क्व चित्कथं चित्सकर्मकत्वं तथापि ह्वेञा साहचर्यात्सानुबन्धकस्यैव वेञो ग्रहणम् । 'माङ् मान इति'। ङितो माङ्रूपस्योपलक्षणमेतत्, तेन मेङ् प्रणिदान इत्यस्यापि ग्रहणं, मा मान इत्यस्य तु संभवनार्थस्याकर्मकत्वादग्रहणम् ।

"आतोनुपसर्गे कः" ॥ कविधौ सर्वत्र प्रसारणिभ्यो डो वक्तव्यः, संप्रसारणभाजः प्रसारणिनः, ज्या वयोहानौ, ब्रह्म जिनातीति ब्रह्मज्यः, सर्वत्रग्रहणान्नावश्यमिहैव 'आतश्चोपसर्गे' आह्वः प्रह्वः, के हि संप्रसारणप्रसङ्गः, आहु अ इति स्थिते संप्रसारणे पूर्वत्वे च कृते उवङादेशे आहुवः प्रहुव इति प्राप्नोति एवं ब्रह्मजिय इति प्रप्नोति, ननु संप्रसारणे कृते आतो लोपस्तस्य स्थानिवद्भावादियङुवङौ न भविष्यतः, लोपो न सिद्ध्यति अन्तरङ्गत्वात्पूर्वत्वं प्राप्नोति समानाश्रये च वार्णादाङ्गं बलीय इति एवन्तर्हि प्रागेव संप्रसारणादातो लोपो भविष्यति परत्वाद् नित्यं संप्रसारणं कृताकृतप्रसङ्गित्वात्, आतो लोपस्त्वनित्यः कृते संप्रसारणे

पूर्वत्वेन बाध्यते यस्य च निमित्तं लक्षणान्तरेण विहन्यते न तदनित्यं तदेवं परत्वादातो लोपस्ततः संप्रसारणं तत इयङुवङौ प्रसक्तावाल्लोपस्य स्थानिवत्त्वान्न भविष्यतः, ननु येनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भाव आदिष्टाच्चैषोचः पूर्वं इदानीमेव ह्युक्तं पूर्वमल्लोपः पश्चात्संप्रसारणमिति एवं तर्ह्याकारलोपस्यासिद्धत्वादुवङ् न भविष्यति, इहापि तर्हि जुहुवतुः जुहुवुः, आल्लोपस्यासिद्धत्वादुवङ् प्राप्नोति आभीयमसिद्धत्वमनित्यमित्यत्र न भविष्यति, अथ वा संप्रसारणाच्च एङः पदान्तादित्यत्र एङ इति योगविभागः संप्रसारणादेङि परतः पूर्वपरयोः पूर्वमेकादेशो भवतीति, किमर्थमिदं, न संप्रसारणाच्चेत्येव सिद्धं, ज्ञापनार्थं, यत्र संप्रसारणात्पर एङ् संभवति तत्रा 'देच उपदेशेशिती' त्यात्वं न भवतीति, यदि स्यात्पूर्वत्वेन तस्य निवृत्तिविधानमनुपपन्नं स्यात् तेन जुहुवतुरित्यत्रानैमित्तिकत्वेनान्तरङ्गमप्यात्वमकृत्वा एङ्भावादेव लिटि विहिते संप्रसारणे पूर्वत्वे न स्थानिवत्त्वं नासिद्धत्वमिति सिद्धमिष्टम्, आहुःप्रहुः ब्रस्नज्य इत्यत्र त्वाकारान्तलक्षणः प्रत्ययो नासत्यात्वे भवितुमर्हतीति पूर्वमात्वन्ततः प्रत्ययः, आल्लोपः संप्रसारणम्, असिद्धत्वादियङुवङोरभावः ॥

"सुपि स्थः" ॥ सुपीति न सप्तमीबहुवचनस्य ग्रहणं किन्तर्हि प्रत्याहारस्य 'सुप्तिङन्तं पदम्' 'सुप आत्मनः क्यच्' 'सुपो धातुप्रातिपदिकयोः' 'अव्ययादाप्सुप' इत्यादौ तस्यैव प्रसिद्धत्वात्। 'द्वाभ्यां पिबतीति'। ननु रूढिशब्दा द्विपादयस्ततश्चासन्तमप्यवयवार्थमाश्रित्य कर्मोपपदएव कः करिष्यते, नैतदेवं, द्वाभ्यां पिबतीत्यादेरवयवार्थस्य सम्भवतोपरित्यागेनैव व्युत्पत्तौ सम्भवत्यामस्याः कल्पनाया अयुक्तत्वात्, यत्र त्वत्यन्तमसम्भवो युक्ता तत्रैव सा कल्पना यथा तैलपायिकादौ। 'अनेन भावे यथा स्यादिति'। आरम्भसामर्थ्यात्तावदयं कर्त्तुरपकृष्यते न चान्योर्थो निर्द्दिश्यते, अनिर्द्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति स्वार्थश्च धातूनां भाव एव। ननु घञर्थे कविधानमिति भावे कः सिद्धः, सत्यं, नित्यसमासार्थन्तु वचनम् अन्यथा पाक्षिकः षष्ठीसमासः स्याद् नित्य एव तूपपदस-

मासो भवति तथा चाखूनामुत्थानमित्यस्वपदेन विग्रहः कृतः, घञर्थे कविधानमित्यत्र स्थग्रहणं कर्तृवर्जिते कारकेपि यथा स्यादिति ॥

"तुन्दशोकयोः परिमृजापनुदोः" ॥ 'तुन्दपरिमृज इति' । मृजेरजादौ संक्रमइत्यत्र यस्मिन्विधिस्तदादावित्येव सिद्धे आदिग्रहणं मुख्याजादिपरिग्रहार्थं तेन व्यपदेशिवद्भावेनाजादावत्र के वृद्धिर्न भवति । 'आलस्यइत्यादि'। आलस्ये गम्यमाने सुखोत्पादने च प्रत्यय इत्यर्थः, तत्र सामर्थ्यादलसे कर्त्तरि सुखस्य चाहर्त्तरि प्रत्ययो भवतीत्युक्तं भवति । 'शोकापनोद एवान्य इति' । यस्संसारानित्यताद्युपदेशेन शोकमेव केवलमपनुदति न तु सुखमुत्पादयति स शोकापनोदः । 'मूलविभुजादिभ्य इति'। तादर्थ्यएषा चतुर्थी मूलविभुजादिसिद्ध्यर्थमित्यर्थः, आकृतिगणश्चायन्तेन महीध्रकुध्रशिरोरुहादि सिद्धं भवति । 'काकगुहा इति' । काकेभ्यो गूहितव्या इति कर्मणि कप्रत्यय इष्यते, अतो घञर्थे कविधानमित्यत्रेदं द्रष्टव्यम् ॥

"प्रे दाज्ञः" ॥ 'ददातेरिति' । उपलक्षणमेतत्, गामादाग्रहणेष्वविशेष इति सर्वेषामेव दारूपाणां ग्रहणमिष्यते । 'जानातेश्चेति' । जनेस्त्वल्लोपेनायंनिर्देशो न भवति 'खनो घ च' 'हनश्च वध' इत्यादौ धातुनिर्देशे ऽल्लोपस्याकरणात् । 'प्रेणोपसृष्टादिति' । प्रशब्देनोपसर्गेण सम्बद्धादित्यर्थः, अनुपसर्गइति चानुवर्त्तते, तेन केवलेन प्रेणोपसृष्टादित्यर्थः, ततश्च गोसम्प्रदाय इत्यणेव भवति ॥

"गापोष्टक्" ॥ 'गायतेरिति' । गामादाग्रहणेष्वविशेष इति गाङो लुग्विकरणास्यापि ग्रहणं प्राप्तं पिबतिसाहचर्यात्तु न भवति । 'सामगीति'। टकः कित्त्वादातो लोपः, टित्त्वान् ङीप् । सुराशीध्वोः पिबतेरिति वक्तव्यमित्यत्र पिबतेरिति लुग्विकरणालुग्विकरणपरिभाषालभ्यस्यैवार्थस्य कथनमुपपदपरिगणनं तु वाचनिकमेव । 'क्षीरपेति' । स्त्रियामेव विशेषात् स्त्रीलिङ्गमुदाहृतम् ॥

"हरतेरनुद्यमनेऽच्" ॥ 'अच्प्रकरणइति' । लिङ्गविशिष्टपरिभाषयैव घटग्रहणेन घटीग्रहणेपि सिद्धे घटीग्रहणं परिभाषाया अनित्य-

Digitized by Google

त्वज्ञापनार्थम् । 'सूत्रग्राह एवान्य इति' । यस्सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव भवतीत्यर्थः ॥

"वयसि च" ॥ 'संभाव्यमानं वेति' । तेनासत्यपि कवचग्रहणे वयसि गम्यमाने कवचहर इति भवतीति भावः ॥

"आङि ताच्छील्ये" ॥ पुष्पाद्याहरणइत्यादिना ताच्छील्यमुदाहरणे दर्शयति । 'स्वाभाविकीति' । स्वभावे भवा स्वाभाविकी, अध्यात्मादिः । स्वशब्दो द्वारादिषु पठ्यते तदादिविधिश्च तत्रेष्यते भाष्यकारप्रयोगात्तु द्वारादिकार्याभावः स्वार्थिकस्वाभाविकशब्दौ भाष्ये प्रयुक्तौ अस्य विवरणं 'फलानपेक्षेति,' कथंपुनःफलमनपेक्ष्य तत्र प्रवर्त्तते न हि स्वभावः पर्यनुयोगमर्हति ॥

"स्तम्बकर्णयोरमिजपोः" ॥ 'रमेरकर्मकत्वादिति' । ननु 'व्याङ्परिभ्यो रमः' 'उपाच्चे' त्यत्रोदाहृतं देवदत्तमुपरमतीति, एवं मन्यते अनुपसर्गइति वर्त्तत इति । 'जपेश्च शब्दकर्मकत्वादिति' । मन्त्रं जपतीत्यादौ तत्रैव प्रयोगदर्शनात् । 'कर्म न संभवतीति' । केवलस्य रमेर्जपेश्च कर्णाद्यशब्दात्मकमिति भावः । सूचकः पिशुनः । 'स्तम्बेरम इति' । 'तत्पुरुषे कृति बहुल' मित्यलुक् । 'कर्णे जपिता मशक इति' । उपांशुशब्दायितेत्यर्थः ॥

"शमिधातोः संज्ञायाम्" । 'धातुमात्रादिति' । मात्रग्रहणेनापवादविषयेपि विधानं भवतीति दर्शयति । 'शङ्कर इति' । ऐहिकमामुष्मिकं मोक्षाख्यं च सुखं करोतीति शङ्करः । धातुग्रहणस्य प्रयोजनं दर्शयन्मात्रग्रहणप्रतिपादितमेवार्थं स्पष्टीकरोति । 'शमिसंज्ञायामिति' । अस्मिन्सूत्रइत्यर्थः । असति धातुग्रहणे शमिसंज्ञायामित्यस्यावकाशः शम्भवः, शम्वदइति कृञो हेतुताच्छील्यइत्यस्यावकाशः आढ्यकरइति, शङ्करा इत्यत्रोभयप्रसङ्गे परत्वाट्ट एव स्याद् धातुग्रहणसामर्थ्यादजेव भवति । कुणडखाडवस्त्वाचार्यो मन्यते गृणातेः शब्दकर्मण एतद्रूपं पृषोदरादित्वाद्गकारस्य ककारइति तन्मते धातुग्रहणं चिन्त्यप्रयोजनम् ॥

"अधिकरणे शेतेः" ॥ 'पार्श्वादिष्विति' । अनधिकरणार्थमिदं तद्विग्रहेण दर्शयति । 'पार्श्वाभ्यामिति' । 'दिग्धसहशयइति' । दिग्धेन सह शेतइत्यचि कृते मयूरव्यंसकादित्वात्समासः दिग्धसहशब्दो मयूरव्यंसकादिस्तस्योपपदसमासः । 'अवमूर्द्धशयइति' । अवनतो मूर्द्धा यस्य अवमूर्द्धा अधोमुखः शेतइत्यर्थः । 'गिरौ डश्छन्दसीति' । यदि छन्दसीत्युच्यते कथं गिरिशमुपचचार प्रत्यहं सा सुकेशी, आरोपितं यद्गिरिशेन पश्चादिति निरंकुशाः कवयः । अन्ये त्वाहुः, इह यो गिरौ शेते गिरिस्तस्यास्तीति लोमादिषु दर्शनाच्छप्रत्ययः तथा चात्रैव वार्त्तिकं तद्धितो वेति, न च लोमादिष्वपि छन्दोग्रहणमस्ति तेन भाषायामपि गिरिश इति भवति एवं च कृत्वा निघण्टुषु पाठोप्युपपन्नो भवति । 'गिरौ शेतइति' । गिरावास्तइत्यर्थः ॥

"भिक्षासेनादायेषु च" ॥ 'भिक्षाचर इति' । चरतिरत्र तत्पूर्वकेऽर्जने वर्त्तते चरणेन भिक्षामर्जयतीत्यर्थः । 'सेनाचरइति' । सेनां प्रविशन्नुच्यते । 'आदायचर इति' । आदाय गच्छतीत्यर्थः, भक्षयतीति वा । कथं सहचरः सहचरीति पचादिषु चरडिति पठ्यते सुप्सुपेति समासः ॥

"पुरोग्रतोग्रेषु सर्त्तेः" ॥ 'अग्रे इत्येतेष्विति' । एतेनाग्रशब्दस्यैकारान्तत्वं निपात्यतइति दर्शयति एतच्चाग्रेशब्दस्य परनिपातनादेव विज्ञायते ऽन्यथा ऽजाद्यदन्तमिति पूर्वनिपातः स्यात् किमर्थं पुनरेकारान्तत्वं निपात्यते यावता सप्तम्या अलुकाप्यग्रेसरइति सिद्धं यदा तर्ह्यग्रं सरति अग्रेण सरतीति वा विगृह्यते तदाप्यग्रेसर इत्येव यथा स्यात् । कथं यूथं तदग्रसरगर्वितकृष्णसारमिति, । 'कृत्यल्युटो बहुलमि' ति समर्थनीयम् ॥

"कृञो हेतुताच्छील्यानुलोम्येषु" ॥ 'करोतेर्द्धातोरिति' । प्रसिद्धतरत्वाद्द्व्यनुबन्धकस्याप्यस्यैव ग्रहणन्न तु कृञ् हिंसायामित्यस्येति भावः । 'आनुलोम्ये च गम्यमानइति' । एतेन हेत्वादीनि नोपपदानीति दर्शयति, एतच्च शमिधातोरित्यत्र धातुग्रहणात्कृञो हेत्वादिषु टप्रतिषेधार्थाद्विज्ञायते उपपदत्वे हि शम्युपपदे टप्रत्ययस्य प्राप्त्यभावादनर्थकं तत्स्याद् अतो नैषामुपपदत्वं नापि प्रत्ययार्थत्वं 'कर्त्तरि कृदि' त्यस्य बाधप्रस-

ङ्गात्, न चासति विरोधे बाधा युक्ता । 'हेतुरैकान्तिकं कारणमिति' । एकान्तशब्दो विनयादिषु द्रष्टव्यः, नियतमव्यभिचारीत्यर्थः, एतेन लौकिकस्य हेतोर्ग्रहणमिति दर्शयति, नहि केवले कृञि प्रयोजककर्त्ता सम्भवतीति भावः । ननु लौकिकेनापि हेतुना कर्त्तुर्विशेषणमयुक्तम्, अव्यभिचारात्, नहि कर्त्तुरनिमित्तत्वमस्ति सत्यं, पुनर्हेतुशब्दोपादानदैकान्तिकत्वमाश्रीयते ऽन्यथा निमित्तमात्रमुपादीयेत। अनुकूलता आराध्यचित्तानुवर्त्तनम् । 'यशस्करी विद्येति'। अतः कृकमीत्यादिना विसर्जनीयस्य सत्वम् ॥

"दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु" ॥ 'यथायोगमिति'। तत्र दिवाशब्दो ऽन्हीति सप्तम्यन्तस्यार्थे वर्त्ततइति तस्य कर्मत्वानुपपत्तेः सुपीत्यनेनाभिसम्बन्धः शेषाणां तु कर्मणीत्यनेन, यदि तु दोषामन्यमहर्दिवामन्या रात्रिरितिवद्वृत्तिविषये कर्मत्वमभ्युपगम्येत तदा दिवाशब्दस्यापि कर्मणीत्यनेन संबन्धः । 'सकारस्येति' । भास्करान्तेति भाशब्दस्य प्रत्ययसन्नियोगेन सकारो निपात्यते तस्माद्भास्कर इत्यत्र विसर्जनीयजिह्वामूलीयौ न भवतः, अथ वा सकारस्य विसर्जनीयजिह्वामूलीयौ न भवतः कुतः निपातनात् । भास्करान्तेति सूत्रे सकारोच्चारणमेव निपातनम् । 'कारकरइति'। कर एव कारः प्रज्ञादित्वात्स्वार्थेण्, 'अनन्तकरइति' । अन्तकरशब्देन नञ्समासेप्येतद्रूपं सम्भवति स्वरे हि दोषः स्यात सतिशिष्टोव्ययपूर्वपदप्रकृतिस्वरः प्रसज्येत इष्यते हि गतिकारकोपपदात्कृदितिकृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्। 'बहुकर इति'। बहुशब्दो वैपुल्यवचनः,संख्यावचनस्य तु संख्याग्रहणेनैव सिद्धम्,लिपिलिबिशब्दौ पर्यायौ। 'अहस्करइति'। अहन् रोसुपीति रेफः पूर्ववत्सत्वम्। 'धनुष्करः अरुष्करइति' । 'नित्यं समासेनुत्तरपदस्थस्ये' ति षत्वम्, क्रियत्तद्बहुषु कृञोज्विधानमिति वार्त्तिकेन सूत्रस्य बाधितत्वाट्टस्याभावाद्धेत्वादिष्वन्यत्र किंकरीत्यसाधुरित्याहुः । क्वचिद्भन्यः । अथ वा पचादिषु पाठः करिष्यतइति । तत्रायमर्थः इह किमादिग्रहणमपनीयपचादिष्वेव क्रियत्तद्बहुषु कृञ इति पठितव्यमिति ॥

Digitized by Google

"कर्मणि भृतौ" ॥ 'कर्मणीति' । 'स्वरूपग्रहणमिति' । अनुवृत्तेन कर्मणीत्यनेन विशेषणात् । 'कर्मनिर्वेश इति' । कर्म क्रिया तस्य निष्क्रयाय देयं भक्तादिद्रव्यमित्यर्थः ॥

"स्तम्बशकृतोरिन्" ॥ 'स्तम्बकरिरिति' । नित्त्वात्कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदमाद्युदात्तं भवति ॥

"हरतेर्दृतिनाथयोः पशौ" ॥ 'पशौ कर्त्तरीति' । एतेन प्रत्ययार्थस्य कर्त्तुः पशुर्विशेषणं न तु तस्य बाधक इति दर्शयति । धातोर्हि प्रत्ययविधानात्तदर्थस्य येन सम्बन्धस्तत्र वाच्ये प्रत्ययो भवितुमर्हति धात्वर्थस्य च क्रियायाः साधनेन संबन्धः पशुशब्दस्तु चतुष्पाज्जातीयं वस्तुस्वरूपेणाचष्टे न शक्तिमद्रूपेण नतरां शक्तिरूपेणेति न पश्वर्थः स्वरूपेण प्रत्ययार्थो भवितुमर्हतीति युक्तमुक्तं पशौ कर्त्तरीति, एवं सर्वत्र प्रत्ययार्थविशेषणं द्रष्टव्यम् ॥

"फलेग्रहिरात्मम्भरिश्च" ॥ 'उपपदस्यैकारान्तत्वमिति' । छन्दस्यकारान्तत्वमपि दृश्यते या वनस्पतीनां फलग्रहिरिति, स कुक्षिम्भरिवच्चकारेण समुच्चेतव्यः ॥

"छन्दसि वनसनरक्षिमथाम्" ॥ 'वनषणसंभक्ताविति' । गणेसहपठितयोर्भ्वादिकयोरेव ग्रहणं न तु वनु याचने षणु दाने इति तानादिकयोरिति भावः । अत्र साहचर्यमेव हेतुः, निरनुबन्धकत्वं च । 'ब्रह्मवनिमिति' । ब्रह्म वनति क्षत्रं वनतीति विवक्षायामिन् प्रत्ययस्तदन्ताद्द्वितीयैकवचनम् । 'गोसनिमिति' । गां सनतीति विग्रहः । 'पथिरक्षी इति' । पन्थानं रक्षते इति विग्रहः । हविर्मथ्नन्तीति हविर्मथयस्तेषांहविर्मथीनाम् ॥

"एजेः खश्" ॥ 'ण्यन्तादिति' । एजेस्त्वयमिकानिर्देशो न भवति खशः शित्करणात् तद्धि सार्वधातुकत्वे सति शब्यथा स्यादिति, न चैजेः प्रकृत्यन्तस्य शपि सत्यसति वा विशेषोस्ति न चैवमिहार्थत्वे सम्भवति केवलोत्तरार्थत्वं युक्तम् । 'खित्करणं मुमर्थमिति' । खित्कार्योपलक्षणमेतत् शुनिन्धयः नाडिन्धयः नासिकन्धयइति ह्रस्वत्वमपि प्रयोजनम् । 'शकारः

सार्वधातुकार्थं इति'। सार्वधातुकसंज्ञार्थं इत्यर्थः। 'वातशुनीत्यादि'। वातादिषु यथासंख्यमुपपदेषु अजादिभ्यो धातुभ्यः खश् प्रत्ययो भवति। 'शर्द्धंजहा इति'। ओहाक् त्यागे जुहोत्यादित्वाच्छपः श्लौ द्विर्वचने 'श्नाभ्यस्तयोरात' इत्याकारलोपः॥

"नासिकास्तनयोर्ध्माधेटोः"॥ 'नासिकन्धम इति'। पाघ्रादिसूत्रेण धमादेशः। तच्चैतदित्यादिना यथासंख्याभावे हेतुमाह, तच्चैतत् यथासंख्याभावलक्षणं कार्यम् एतेन च व्याख्यातॄणां मूलत्वेन सूत्रकारस्याप्यत्र किंचिदभिप्रेतमित्येतावत्प्रदर्श्यते तेनैतन्नचोदनीयमुत्तरसूत्रवत्प्रत्येकमभिसम्बन्धः कस्मान्न भवति विपर्ययो वा कस्माच्च भवतीति। 'स्तनन्धयतीति'। अत्रैव ङीब्भिष्यते नान्यत्रेत्याहुः॥

"नाडीमुष्ट्योश्च"॥ 'धटिन्धमः खरिन्धमइति'। धटी धटः खरीगर्द्दभी जातिलक्षणो ङीष्, खारीत्यन्ये पठन्ति स च परिमाणवचनः। वातशब्दो न दृष्टः॥

"उदि कूले रुजिवहोः"॥ यत्र प्रत्येकमुपपदत्वमिच्छति तत्र समुदायात्सप्तमीमुच्चारयति यथा नाडीमुष्ट्योरिति इह तु विपर्ययः कुतः तस्मादुदीति सत्सप्तमी कूलइति त्वर्थनिरपेक्षैवोपपदसंज्ञायां लिङ्गं तत्र च 'ते प्राग्धातो'रिति उच्छब्दस्य धातोः प्राक् प्रयोगः, ततः पूर्वः कूलशब्दः तदेतद्दर्शितमुत्पूर्वाभ्यां कूले कर्मण्युपपदइति॥

"परिमाणे पचः"॥ परिमाणशब्दः काष्ठादिनिर्मिते प्रस्थादौ वर्त्तते न तस्य विक्लेदवाचिना पचिना कर्मत्वेनान्वयः। अतो न स्वरूपग्रहणं किं तर्हि तद्विशेषाः प्रस्थादयो गृह्यन्ते ते च परिमाणे परिमेये व्रीह्यादौ च वर्त्तन्ते तत्र परिमाणनिष्ठानां न पचिनान्वय इति परिमेयनिष्ठेषु प्रत्ययः। न तर्हि परिमाणवाचित्वम्, न परिमाणाध्यारोपेण परिमेये प्रस्थादिशब्दस्य प्रवृत्तेः॥

"मितनखे च"॥ 'नखंपचेति'। पचिरत्रातापवचनः॥

"विध्वरुषोस्तुदः"॥ 'अरुन्तुद इति'। 'अरुर्द्विषदजन्तस्य मुमि'ति उकारात्परो मुम् संयोगान्तस्य लोपः॥

त्वं न सम्भवतीति साङ्ख्यस्मृत्यनुरोधेन कार्य्यसलक्षणं प्रधा-
नमेव कारणं भवितुमर्हति, अवश्यं च शास्त्रस्यानन्यापेक्ष-
स्यातीन्द्रियार्थगोचर[1]स्यापि तर्को ऽनुसरणीयः यतस्सर्वेषां
प्रमाणानां क्वचित् क्वचिद्विषये तर्कानुगृहीतानामेवार्थनि-
श्चयहेतुत्वं, तर्को हि नामार्थस्वभावविषयेण वा सामग्री-
विषयेण वा निरूपणेनार्थविशेषे प्रामा[2]ण्यं व्यवस्थापयत्त-
दितिकर्तव्यतारूपमूहापरपर्य्यायं ज्ञानं, तदपेक्षा च सर्वेषां

टी० ततः किमित्यत्राह "यद्धि यत्कार्य"मिति, अपौरुषेयस्य शास्त्रस्य मानान्तरागोचरार्थविषयत्वात् प्रत्यक्षादिदृष्टव्याप्तिमूलस्तर्कश्शास्त्रसिद्धमर्थन्न गोचरयतीत्यत्राह "अवश्यं चे"ति, अनन्यापेक्षस्य प्रमाणान्तरानपेक्षस्य प्रमाणान्तरनैरपेक्ष्येऽपि प्रमाणाङ्गभूतस्तर्कोऽनुसरणीय इत्यर्थः । कुत इत्यत्राह "यत" इति, क्वचित्क्वचिद्विषये स्वत एवास्पष्टार्थे प्रामाण्यस्य परानपेक्षत्वं नाम प्रमित्यन्तरनैरपेक्ष्यं न त्वितिकर्तव्यतानैरपेक्ष्यमित्यभिप्रायः । तर्केण प्रमाणस्य किञ्चित्कारं दर्शयति "तर्को हि नामे"ति, यन्नभसोनीरूपत्वादचाक्षुषत्वमुच्यते तदर्थस्वभावविषयनिरूपणेनार्थविशेषे प्रमाणव्यवस्थापनं वैधहिंसायाः श्रेयस्करत्वप्रमितिजनकवाक्यनिरूपणेन न हिंस्यादिति वाक्यस्य वैधहिंसाव्यतिरिक्तविषयत्वं यदुच्यते तत्सामग्रीविषयनिरूपणेनार्थविशेषे प्रमाणव्यवस्थापनं प्रत्यक्षस्य ज्वालैक्यविषयत्वं विना ज्वालोत्पत्तिनिरूपणेन तत्स्वरूपमात्रविषयत्वनिर्णयश्च । यद्वाऽर्थस्वभावविषयनिरूपणं नाम बाध्यत्वाबाध्यत्वनिरूपणं कारणदोषस्य बाधकप्रत्ययस्य वा भावाभावनिरूपणेन प्रमाणस्य विषयविशेषपरिच्छेदकत्वनिश्चयो विवक्षितः ।

१ अतिन्द्रियार्थगोचरत्वेऽपीति पा० ।
२ प्रमाणं व्यवस्थापयति पा० ।

सू० प्रमाणानां समाना, शास्त्रस्य तु विशेषेणाकाङ्क्षासन्निधियोग्यताज्ञानाऽधीनप्रमाणभावस्य सर्वत्रैव तर्कानुग्रहापेक्षा, उक्तं च मनुना "यस्तर्केणानुसंधत्ते स धर्म्मं वेद नेतर" इति, तदेवं हि तर्कानुगृहीतशास्त्रार्थप्रतिष्ठापनं श्रुत्या च मन्त्रस्य इत्युच्यते, अथोच्येत श्रुत्या च जगतो ब्रह्मैककारणत्वे निश्चिते सति तत्कार्यस्यापि जगतश्चैतन्यानुवृत्तिरभ्युपगम्यते, यथा चेतनस्य सुषुप्तिमूर्च्छादिषु चैतन्यानुपलम्भः तथा घटादिष्वपि सदेव चैतन्यमनुद्भूतम्, अत एव चेतनाचेतनविभाग इति, नैतदुपपद्यते यतो नित्यानुपलब्धिरसद्भावमेव साधयति, अत एव चैतन्यशक्तियोगोऽपि तेषु निरस्तः, यस्य हि क्वचित्कदाचिदपि तत्कार्यानुपलब्धिस्तस्य हि तत्कार्यशक्तिं ब्रुवाणो बन्ध्यासुतसमितिषु तज्जननीनां प्रजननशक्तिं ब्रूताम् ।

टी० शास्त्रस्य त्विति, तु-शब्दः साध्यवैषम्यं द्योतयति, विशेषेणे-ति शब्दः साधनवैषम्यमाकाङ्क्षासन्निधियोग्यतासापेक्षत्वं साधनवैषम्यं तेन सर्वत्र तर्कसापेक्षत्वं साध्यवैषम्यमित्यभिप्रायः । यादवप्रकाशमतेन चोद्यं शङ्कते "अथेति । चैतन्यानुपलम्भः कथमित्यत्राह "यथा चेतनस्ये"ति, वेदान्तिभिर्नित्यस्यात्मस्वरूपावभासरूपस्य चैतन्यस्य विद्यमानस्यापि सुषुप्तौ स्फुटतरोपलम्भाभावाभ्युपगमात्तं प्रतिवन्दीकृत्य परिहार उक्तः । सर्वत्र चैतन्यसद्भावे चेतनाचेतनव्यवस्था कथमित्यत्राह "अत एवे"ति, परिहरति "नैतदि"ति, इतरवादिभिः सुषुप्तौ चैतन्योत्पत्तिशक्तियोगस्याभ्युपगतत्वात् तत्प्रतिवन्दीकारेण घटादीनां च चैतन्यानुपलम्भेऽपि चैतन्यशक्तियोगात्कारणसालक्षण्यसिद्धिरित्याशङ्क्याह "अत एव चैतन्ये"ति ॥

सू० किञ्च वेदान्तैर्ज्जगतो ब्रह्मोपादानताप्रतिपादननिश्चये

Digitized by Google

सति घटादीनां चैतन्यशक्तेश्चैतन्यस्य चानुद्भूतस्य सद्भावनिश्चयस्तन्निश्चये सति वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चय इतीतरेतराश्रयत्वं, विलक्षणयोर्हि कार्य्यकारणभावः प्रतिपादयितुमेव न शक्यते । किं पुनः प्रकृतिविकारयोः सालक्षण्यमभिप्रेतं यदभावाज्जगतो ब्रह्मोपादानत्वप्रतिपादनासम्भवं ब्रूषे, न तावत्सर्वधर्मसारूप्यं कार्यकारणभावानुपपत्तेः, न हि मृत्पिण्डकार्य्येषु घटशरावादिषु पिण्डत्वाद्यनुवृत्तिर्दृश्यते । अथ येन केनचिद्धर्मेण सारूप्यं तज्जगद्ब्रह्मणोरपि सत्तादिलक्षणं सम्भवति ।

टी० वेदान्तप्रामाण्यमभ्युपगच्छता त्वयाऽप्येवमङ्गीकार्य्यमित्याशङ्क्याह "किञ्चे"ति, ब्रह्मोपादानताप्रतिपादनस्य कथं घटादिषु चैतन्यनिश्चयसापेक्षत्वमित्यत्राह "विलक्षणयोर्हि"ति, न ह्यादित्यो यूप इत्यादिवाक्यमयोग्यार्थप्रतिपादनक्षमं तस्माद्योग्यत्वनिश्चये सति ब्रह्मोपादानताप्रतिपादनसम्भव इत्यन्योन्याश्रय इत्यर्थः । सिद्धान्तिच्छायया चोदयति "किं पुनरि"ति,

भा० तदुच्यते येन स्वभावेन कारणभूतं वस्तु वस्त्वन्तराद् व्यावृत्तं तस्य स्वभावस्य तत्कार्य्येऽप्यनुवृत्तिः कार्य्यस्य कारणसालक्षण्यं, येन ह्याकारेण मृदादिभ्यो हिरण्यं व्यावर्तते तदाकारानुवृत्तिस्तत्कार्य्येषु कुण्डलादिषु दृश्यते, ब्रह्म च हेयप्रत्यनीकज्ञानानन्दैश्वर्य्यस्वभावं, जगच्च तत्प्रत्यनीकस्वभावमिति न तदुपादानम् । ननु च वैलक्षण्येऽपि कार्य्यकारणभावो दृश्यते, यथा चेतनात्पुरुषादचेतनानि केशनखदन्तलोमानि जायन्ते, यथा चाऽचेतनाद् गोमयाच्चेत-

नो वृश्चिको जायते, चेतनाच्चोर्णनाभेरचेतनस्तन्तुर्नैतदेवं यतस्तत्राप्यचेतनांश एव कार्य्यकारणभावः । अथ स्यात् अचेतनत्वेनाभिमतानामपि चैतन्ययोगः श्रुतिषु श्रूयते[1] "तं पृथिव्यब्रवीत्" "आपो वा आकामयन्त", "ते हेमे प्राणा अहं श्रेयसे विवदमाना ब्रह्माणं जग्मु"रिति नदीसमुद्रपर्वतादीनामपि चैतन्यं पौराणिका आतिष्ठन्ते, अतो न वैलक्षण्यमिति, अत उत्तरं पठति–

टी० सत्तादीत्यादिशब्देन द्रव्यत्वं विवक्षितम् । परिहरति "तदुच्यत" इति, सालक्षण्यमेवं स्यात्ततः किमित्यत्राह "ब्रह्म चे"ति ब्रह्मणोजगतश्च द्रव्यत्वावान्तरजातिविशेषः सालक्षण्यमिति फलितं तच्चात्र चेतनत्वं तेन च सालक्षण्यं नास्तीत्यर्थः । एवं वैलक्षण्यस्यासिद्विराशङ्क्य परिहृता । अथानैकान्त्यमाशङ्क्य परिहरति "ननु चे"ति, उत्तरसूत्रमवतारयति "अथ स्या"दिति,

सू० अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

भा० तु–शब्दश्चोदिताशङ्कानिवृत्त्यर्थः पृथिव्याद्यभिमानिन्यो देवतास्तं पृथिव्यब्रवीदित्यादिषु पृथिव्यादिशब्दैर्व्यपदिश्यन्ते, कुतः विशेषानुगतिभ्यां विशेषो–विशेषणं देवता–शब्देन विशेष्य पृथिव्यादयोऽभिधीयन्ते हन्ताहमिमास्तिस्रो देवता इति तेजोऽबन्नानि देवता–शब्देन विशेष्यन्ते "सर्वा ह वै देवता अहंश्रेयसे विवदमानास्ते देवाः प्राणे निश्रेयसं विदित्वे"ति च अनुगतिरनुप्रवेशः अग्नि-

[1] श्राव्यते पा० ।

Digitized by Google

र्वाग्भूत्वा मुखं प्राविशत् आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद् वायुः प्राणो भूत्वा नासिके प्राविशदि"त्यादिना वागाद्यभिमानित्वेनाग्न्यादीनामनुप्रवेशः श्रूयते, अतो जगतोऽचेतनत्वेन विलक्षणत्वाद्ब्रह्मकार्य्यत्वानुपपत्तेः तर्कागृहीतस्मृत्यनुरोधेन जगतः प्रधानोपादानत्वं वेदान्तैः प्रतिपाद्यत इत्येवं प्राप्तेऽभिधीयते—

टी० सू० अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्, तु-शब्दस्य पूर्वपक्षव्यावृत्त्यर्थता माऽभूदिति व्याचष्टे "तु-शब्द"इति हन्ताऽहमिमा इत्यादिवाक्ये पृथिव्यादीनामस्पष्टत्वादाह "तेजोऽबन्नानी"ति,

सू० दृश्यते तु ॥ ६ ॥

भा० तु-शब्दात्पक्षो विपरिवर्त्तते यदुक्तं जगतो ब्रह्मविलक्षणत्वेन ब्रह्मोपादानत्वं न सम्भवतीति तदयुक्तं विलक्षणयोरपि कार्यकारणभावदर्शनात्, दृश्यते हि माक्षिकादेर्विलक्षणस्य कृम्यादेस्तस्मादुत्पत्तिः । ननूक्तमचेतनांश एव कार्य्यकारणभावात्तच्च सालक्षण्यं, सत्यमुक्तं, न तावता कार्य्यकारणयोर्भवदभिमतसालक्षण्यसिद्धिः यथाकथञ्चित्सालक्षण्ये सर्वस्य सर्वसालक्षण्येन सर्वस्मात्सर्वोत्पत्तिप्रसङ्गभयाद्वस्तुनो वस्त्वन्तराद् व्यावृत्तिहेतुभूतस्याकारस्यानुवृत्तिस्सालक्षण्यं भवताऽभ्युपेतं, स तु नियमो माक्षिकादिभ्यः कृम्याद्युत्पत्तौ न दृश्यत इति ब्रह्मविलक्षणस्यापि जगतो ब्रह्मकार्य्यत्वं नानुपपन्नं, न हि मृद्धिरण्यघटमुकुटादिष्विव वस्त्वन्तरव्यावृत्तिहेतुभूतासाधारणाकारानुवृत्तिर्माक्षिकगोमयकृमिवृश्चिकादिषु दृश्यते

Digitized by Google

टी० सू॰ दृश्यते तु, किं येन केनचिदाकारेण कार्यकारणयोः सालक्षण्यं विवक्षितं तदस्मत्पक्षेऽप्यस्ति सर्वधर्मसादृश्यं चेन्मृद्घटादिष्वपि नास्ति द्रव्यत्वावान्तरचेतनत्वजात्यनुवृत्तिश्चेत् ब्रह्मकारणत्ववादिबहुश्रुतिस्मृतिविरोधात् बाह्यस्तर्क इति तर्काप्रतिष्ठानादिति सूत्रेण परिहरिष्यते चेतनत्वानुवृत्तिरप्यस्ति विशिष्टस्य कारणत्वात् कार्येऽचिदंशे अचेतनत्वानुवृत्तिवत् चिदंशे चेतनत्वानुवृत्तिरपि विद्यते इति साक्षात्परिहार उपरितनाधिकरणेषु वक्ष्यते, कारणं येनाकारेणावस्त्वन्तराद् व्यावृत्तं तेनाकारेण कार्य्यस्य सालक्षण्यं चेत्तस्य व्यभिचारोऽस्मिन् सूत्रे विवक्षितः माक्षिकस्य वस्त्वन्तराकाराद्व्यावर्तकारो माक्षिकत्वं, तत्तु कृम्यादौ नास्तीत्यर्थः । न दृश्यत इत्येतद्विवृणोति "न ही"ति, ॥

सू० असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

भा० यदि कार्य्यभूताज्जगतः कारणभूतं ब्रह्म विलक्षणं तर्हि कार्य्यकारणयोर्द्रव्यान्तरत्वेन कारणे परस्मिन् ब्रह्मणि कार्य्यं जगन्न विद्यत इत्यसत एव जगत उत्पत्तिः प्रसज्यते इति चेत्, नैतदेवं कार्य्यकारणयोः सालक्षण्यनियमप्रतिषेधमात्रमेव हि पूर्वसूत्रेऽभि[1]हितं न तु कारणात्कार्य्यस्य द्रव्यान्तरत्वं कारणभूतं ब्रह्मैव स्वस्माद्विलक्षणजगदाकारेण परिणमत इत्येतत्तु न परित्यक्तं कृमिमाक्षिकयोरपि हि, सति च वैलक्षण्ये कुण्डलहिरण्ययोरिव द्रव्यैक्यमस्त्येव । तत्र चोदयति—

टी० सू॰ असदिति चेन्न प्रतिषेधमात्रत्वात्, आरम्भणाधिकरणार्थः प्रसङ्गादनेन सूत्रेण स्मारितः, यदीति विलक्षणत्वकथनेन द्रव्यान्तरत्वमुक्तं भवति, ततोऽसत्कार्यवादः स्यादिति पूर्वपक्षिणोऽभिप्रायः, नैतदेवमि-

१ पूर्वं सूत्रेऽभिप्रेतमिति पा॰ ।

त्यादि कार्यकारणयोः सजातीयत्वमेवास्येदमिति प्रत्यभिज्ञानार्हावान्तरजात्या सालक्षण्यनियमः प्रतिषिद्धः न त्वेकद्रव्यत्वमित्यर्थः । उत्तरसूत्रमवतारयति "अत्रे"ति,

सू० अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

भू० अपीतावित्यपीतिपूर्वकसृष्ट्यादिप्रदर्शनार्थं सदेव सोम्येदमग्र आसीत् आत्मा वा इदमेक एव अग्र आसीदित्यादिष्वऽप्ययावस्थोपदेशपूर्वकत्वदर्शनात्सृष्ट्यादेः, यदि कार्य्यकारणयोर्द्रव्यैक्यमभ्युपेतं तदा कार्य्यस्य जगतो ब्रह्मण्यप्ययसृष्ट्यादिषु सत्सु ब्रह्मण एव तत्तदवस्थान्वय इति कार्य्यगतास्सर्वे एवापुरुषार्था ब्रह्मणि प्रसज्येरन् सुवर्णे इव कुण्डलगता विशेषाः, ततश्च वेदान्तवाक्यं सर्वमसमञ्जसं स्यात्, "यस्सर्वज्ञस्सर्ववित" "अपहतपाप्मा विजरो विमृत्युः" "न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते" "तयोरन्यः पिप्पलं स्वाद्वत्ति अनीशश्चात्मा बध्यते भोक्तृभावात् अनीशया शोचति मुह्यमानः" इत्येकस्मिन्नेव वस्तुन्येषां परस्परं विरुद्धानां प्रसक्तेः ।

टी० सू० अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्, सृष्ट्यादेरित्यादि–शब्देन स्थितिरुच्यते । अपीते सृष्ट्यादिप्रदर्शनार्थत्वं कथमित्यत्राह "सदेवे"ति, सुवर्णकुण्डलादिदृष्टान्तस्य बुद्धिस्थत्वात्तद्वदित्युक्तम् । यद्वा ब्रह्मणि जगद्वदपुरुषार्थादिप्रसङ्गादित्यर्थः । यद्वा तद्वदिति मत्वर्थीयप्रत्ययः गजद्गतापुरुषार्थादिमत्त्वप्रसङ्गादित्यर्थः । असमञ्जसत्वं दर्शयति यः सर्वज्ञ इत्यादिना, परस्परविरुद्धनां विरुद्धार्थानां वाक्यानामित्यर्थः ॥

Digitized by Google

भू० अथोच्येत चिदचिद्वस्तुशरीरकस्य परस्यैव ब्रह्मणः कार्य्यकारणभावाच्छरीरभूतचिदचिद्वस्तुगतत्वाच्च दोषाणां न शरीरिणि ब्रह्मणि कार्यावस्थे कारणावस्थे च प्रसङ्ग इति तदयुक्तं जगद्ब्रह्मणोः शरीरशरीरिभावस्यैवासम्भवात्, सम्भवे च ब्रह्मणि शरीरसम्बन्धनिबन्धनदोषाणामनिवार्य्यत्वात्, न हि चिदचिद्वस्तुनोर्ब्रह्मणः शरीरत्वं सम्भवति, शरीरं हि नाम कर्म्मफलरूपसुखदुःखोपभोगसाधनभूतेन्द्रियाश्रयः पञ्चवृत्तिप्राणाधीनधारणः पृथिव्यादिभूतसङ्घातविशेषः, तथाविधस्यैव लोकवेदयोः शरीरत्वप्रसिद्धेः, परमात्मनश्चापहतपाप्मा विजरः" "अनश्नन्नन्योऽभिचाकशीति अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः अप्राणो ह्यमना" इत्यादिभिः कर्म्मतत्फलभोगयोरभावादिन्द्रियाधीनभोगत्वाभावात्प्राणवत्त्वाभावाच्च न तं प्रति चेतनाचेतनयोश्शरीरत्वम् ।

टी० सिद्धान्ती शङ्कते "अथोच्येते"ति, शरीरसम्बन्धनिबन्धनदोषाणामिति रूमागतवस्त्वन्तराणां लवणत्वापत्तिर्दृश्यते तत्संयोगी च पञ्चम इत्युच्यते चेत्यभिप्रायः। शरीरत्वासम्भवमुपपादयितुं शरीरस्वभावमाह "शरीरं ही"ति, व्यापकनिवृत्त्या व्याप्यशरीरत्वनिवृत्तिं दर्शयितुं शरीरत्वव्यापकाकारं दर्शयति "कर्मफले"ति, अत्र परोक्तं लक्षणमप्यन्तर्गतं सुखदुःखेति भोगाश्रयत्वेन्द्रियाश्रयत्वोक्तिः कर्मफलभोगसाधनत्वं मुक्तेश्वर

शरीरस्येन्द्रियव्यावर्तकं पञ्चवृत्तीति चेष्टाश्रयत्वोक्तिः, ततः किमित्यपेक्षायां शरीरतयाऽभिमतपरमात्मस्वभावपर्यालोचनया शरीरत्वासम्भवमाह "परमात्मनश्चे"ति, कर्मसम्बन्धराहित्यमाह "अपहते"ति, तत्फलाभावमाह "अनश्नि"ति, इन्द्रियानपेक्षतामाह "अपाणी"ति, चेष्टाश्रयत्वाभावमाह "अप्राण"इति, शरीरतयाऽभिमतानां शरीरलक्षणविरुद्धस्वभावतां दर्शयति—

सू० न चाचेतनव्यष्टिरूपतृणकाष्ठादीनां समष्टिरूपस्य भूतसूक्ष्मस्य चेन्द्रियाश्रयत्वादि सम्भवति भूतसूक्ष्मस्य पृथिव्यादिसङ्घातत्वं च न विद्यते, चेतनस्य तु ज्ञानैकाकारस्य सर्वमेतन्न सम्भवतीति नि[1]तरां शरीरत्वसम्भवः । न च भोगायतनत्वं शरीरत्वमिति शरीरत्वसम्भवः, भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः, यच्च वर्तमानस्यैव सुखदुःखोपभोगस्तदेव भोगायतनमिति चेन्न परकायप्रवेशजन्मसुखदुःखोपभोगायतनस्य परकायस्य प्रविष्टशरीरत्वाप्रसिद्धेः, ईश्वरस्य तु स्वतः सिद्धनित्यनिरतिशयानन्दस्य भोगं प्रति चिदचितोरायतनत्वनियमो न सम्भवति, एतेन भोगसाधनमात्रस्य शरीरत्वं प्रत्युक्तम् ॥

टी० "न चाचेतने"ति, भोगायतनत्वं पृथग् दूषयति "न चे"ति, चेष्टाश्रयत्वेन्द्रियाश्रयत्वयोः पूर्वोक्तं दूषणमेव भोगायतनं भोगसाधनविशेषः, अत एव हि भोगसाधनमात्रस्येत्युक्तम् ।

सू० अथ मतं यदिच्छाधीनस्वरूपस्थितिप्रवृत्ति यत्तत्तस्य शरीरमिति सर्वस्येश्वरेच्छाधीनस्वरूपस्थितिप्रवृत्तित्वेनेश्वरशरीरत्वं सम्भवतीति, तदपि न साधनीयः शरीतया प्रसि-

[1] नतरामिति पा० ।

Digitized by Google

ष्वेषु तत्तच्चेतनेच्छायत्तस्वरूपत्वाभावात् रुग्णशरीरस्य तदिच्छाधीनप्रवृत्तित्वाभावात् मृतशरीरस्य तदायत्तप्रवृत्ति[1]त्वाभाच्च, सालभञ्जिकादिषु चेतनेच्छाधीनस्वरूपस्थितिप्रवृत्तिषु तच्छरीरत्वाप्रसिद्धेश्च, चेतनस्य नित्यस्येश्वरेच्छायत्तस्वरूपत्वाभावाच्च न तच्छरीरत्वसम्भवः, न च यद्यदेकनियाम्यं यदेकधार्य्यं यस्यैव[2]शेषभूतं तत्तस्य शरीरमिति वाच्यं क्रियादिषु व्यभिचारात्, अशरीरं शरीरेषु अपाणिपादो जवनो ग्रहीतेत्यादिभिश्चेश्वरस्य शरीराभावः प्रतिपाद्यते, अतो जगद्ब्रह्मणोः शरीरशरीरिभावस्यासम्भवात्तत्सम्भवे च ब्रह्मणि दोषप्रसङ्गाद्ब्रह्मकारणवादे वेदान्तवाक्यानामसामञ्जस्यमिति ।

टी० सिद्धान्त्यभिमतलक्षणं दूषयति "अथ मतमित्यादिना, अव्याप्तिमाह "शरीरतये"ति, अतिव्याप्तिमाह "सालभञ्जिकादिष्वि"ति, असम्भवमाह "चेतनस्ये"ति, न चेत्यादि, आदि-शब्देन गुणो विवक्षितः तद्वैविध्यात् बहुवचनम्, एवं परमात्मनश्चिदचितोश्च स्वभावालोचनया शरीरत्वं प्रतिक्षिप्तम् । अथ परस्य शरीरप्रतिषेधाच्च कस्य चित् तं प्रति शरीरत्वासम्भवमाह "अशरीरमि"ति, अपाणीत्यादिवाक्यमिन्द्रियाभावज्ञापनाय पूर्वमुपात्तमिदानीमिन्द्रियाधिष्ठानायवनिषेधमुखेन शरीराभाव ज्ञापनार्थम् ॥

भू० अत्रोत्तरम् ।

सू० न तु दृष्टान्तभावात् ॥ ९ ॥

टी० सू० न तु दृष्टान्तभावात् अत्तरार्थमाह "नैवमि"ति, नेति पदेनैव पूर्वपक्षे व्यावर्त्तितेऽपि तु-शब्दः शरीरशरीरिभावसंभवज्ञापनार्थः, तु-शब्दो-

१ तदायत्तस्थितित्वाभावाच्चेति पा० ।
२ यस्यैकशेषभूतमिति ।

ऽत्रेति शरीरात्मासंभवादित्यभिप्रायः हेयसंबन्धस्यासंभावनीयत्वे दृष्टान्तः क इत्यत्राह "एतदुक्त"मिति, अमुख्यत्वमाशङ्क्याह "अथ चे"ति, पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीत्ययामेव देवत्वादिधर्माः नपुरुषस्येत्यत्राह "भूतसूक्ष्मशरीरस्ये"ति, । यद्वा जीवस्य शरीरोत्पत्तेः प्रागप्यचित्सम्बन्धे सति हि ब्रह्मणः कार्यकारणोभयावस्थायामपि चिदचिद्विशिष्टस्य तद्गतदोषराहित्ये दृष्टान्तत्वमित्यत्राह "भूतसूक्ष्मे"ति, परोक्तं शरीरत्वासंभवमनुवदति "यत्तु न"रिति, सम्यङ्न्यायः प्रामाणानुगुणन्यायः, कुतर्कः प्रमाणविरुद्धस्तर्कः सर्वत्र व्याप्तं लक्षणं विवक्षुश्चिदचितोर्ब्रह्मशरीरत्वेन वेदे प्रयोगं दर्शयति "सर्व एव ही"ति, सोऽभिध्याय शरीरात्स्वादित्यत्र चिदचितोश्शरीरत्वमस्पष्टमिति तद् व्याचष्टे"भूतसूक्ष्मा"-दिति, आसीदिदं तमोभूतमिति प्रकृतमेव शरीरत्वेनोच्यत इत्यर्थः ।

सू० नैवमसामञ्जस्यम्, एकस्यैवावस्थाद्वयान्वयेऽपि गुणदोषव्यवस्थितेर्दृष्टान्तस्य विद्यमानत्वात्, तु—शब्दोऽच हेयसम्बन्धगन्धस्यासम्भावनीयतां द्योतयति, एतदुक्तं भवति चिदचिद्वस्तुशरीरतया तदात्मभूतस्य परस्य ब्रह्मणः सङ्कोचविकासात्मककार्य्यकारणभावावस्थाद्वयान्वयेऽपि न कश्चिद्विरोधः, यतः सङ्कोचविकासौ परब्रह्मशरीरभूतचिदचिद्वस्तुगतौ शरीरगतास्तु दोषा नात्मनि प्रसज्यन्ते आत्मगताश्च गुणा न शरीरे यथा देवमनुष्यादीनां सशरीराणां क्षेत्रज्ञानां शरीरगता बालत्वयुवत्वस्थविरत्वादयो नात्मनि सम्बध्यन्ते, आत्मगताश्च ज्ञानसुखादयो न शरीरे। अथ च देवोजातो मनुष्यो जातस्तथा स एव बालो युवा-स्थविरश्चेति व्यपदेशश्च मुख्यः, भूतसूक्ष्मशरीरस्यैव क्षेत्रज्ञस्य देवमनुष्यादिभाव इति तदन्तरप्रतिपत्ताविति वक्ष्यत

Digitized by Google

इति। यत्पुनरुक्तं चिदचिदात्मकस्य जगतः स्थूलस्य सूक्ष्मस्य च परमात्मानं प्रति शरीरभावो नोपपद्यत इति तदनाकलितसम्यङ्न्यायानुगृहीतवेदान्तवाक्यगणस्य स्वमतिपरिकल्पितकुतर्कविजृम्भितं, सर्वे एव हि वेदान्ताः स्थूलस्य सूक्ष्मस्य च चेतनस्याचेतनस्य समस्तस्य च परमात्मानं प्रति शरीरत्वं श्रावयन्ति, वाजसनेयके तावत्काण्वशाखायां, माध्यन्दिनशाखायां चान्तर्यामिब्राह्मणे "यः पृथिव्यां तिष्ठन् यस्य पृथिवी शरीर"मित्यारभ्य पृथिव्यादिसमस्तमचिद्वस्तु "यो विज्ञाने तिष्ठन् यस्य विज्ञानं शरीरं य आत्मनि तिष्ठन् यस्यात्मा शरीरमिति चेतनं च पृथक् पृथङ्निर्दिश्य तस्य तस्य परमात्मशरीरत्वमभिधीयते, सुबालोपनिषदि च "यः पृथिवीमन्तरे संचरन् यस्य पृथिवी शरीरमित्यारभ्य य आत्मानमन्तरे संचरन् यस्यात्मा शरीरमिति तद्वदेव चिदचितोस्सर्वावस्थयोः परमात्मशरीत्वमभिधाय "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति तस्य सर्वभूतानि प्रत्यात्मत्वमभिधीयते, स्मरन्ति च "जगत्सर्वं शरीरन्ते" "यदम्बु वैष्णवः कायः" "तत्सर्वं वै हरेस्तनुः" । "तानि सर्वाणि तद्वपुः" "सोऽभिध्याय शरीरात्स्वादित्यादि भूतसूक्ष्मात्स्वाच्छरीरादित्यर्थः, लोके च शरीर—शब्दो घटादिशब्दत एकाकारद्रव्यनियतवृत्तिमनासादितकृमिकीटपतङ्गसर्पनरपशुप्रभृतिष्वत्यन्तविलक्षणाकारेषु द्रव्येष्वत्यगौणः प्रयुज्यमानो

दृश्यते, तेन तस्य प्रवृत्तिनिमित्तव्यवस्थापनं सर्वप्रयोगानुगुण्येनैव कार्यं, त्वदुक्तं च कर्म्मफलभोगहेतुरित्यादिकं प्रवृत्तिनिमित्तलक्षणं न सर्वप्रयोगानुगुणं यथोक्तेष्वीश्वरशरीरतयाऽभिहितेषु पृथिव्यादिष्वव्याप्तेः । किञ्चेश्वरस्येच्छाविग्रहेषु मुक्तानां च स एकधा भवतीत्यादिवाक्यावगतेषु विग्रहेषु तल्लक्षणमव्याप्तं कर्म्मफलभोगनिमित्तत्वाभावात्तेषां परमपुरुषेच्छाविग्रहाश्च न पृथिव्यादिभूतसङ्घातविशेषाः "न भूतसङ्घसंस्थानो देहोऽस्य परमात्मन" इति स्मृतेः, अतो भूतसङ्घातरूपत्वं च शरीरस्याव्याप्तं पञ्चवृत्तिप्राणाधीनधारणत्वं च स्थावरशरीरेष्वव्याप्तं, स्थावरेषु हि प्राणसद्भावेऽपि तस्य पञ्चधाऽवस्थाय शरीरस्याधारकतयाऽवस्थानं नास्ति अहल्यादीनां कर्मनिमित्तशिलाकाष्ठादिशरीरेष्विन्द्रियाश्रयत्वं च सुखदुःखहेतुत्वं चाव्याप्तम् ।

टी० लोके चेत्यादि घटादिशब्दवत् यथा घटादिशब्दा एकाकारवस्तुषु मुख्याः प्रयुज्यन्ते न तथा शरीर–शब्दः, अपि त्वनेकारवस्तुषु मुख्यः प्रयुक्तः, अतोऽनुगतत्वाय हि कृमिकीटादिव्यापकं लक्षणमुक्तं तस्याप्यव्याप्तत्वात् सार्वत्रिकं लक्षणान्तरं स्वीकार्यमिति भावः । अगौणः प्रजुज्यमानो दृश्यत इत्यस्यायमभिप्रायः द्विपात्त्वं मनुष्यत्वं ब्राह्मणत्वं वा शरीरलक्षणत्वेन किमिति नोच्यते अन्यत्रापि मुख्यप्रयोगदर्शनादिति चेत्तर्हि लोकवेदयोर्यत्र यत्र प्रयोगो दृश्यते तदनुयायि लक्षणं वाच्यं न त्वननुयापि लक्षणमुक्त्वाऽन्यत्र गौणत्वं क[1]थनीयमिति । ततः किमित्यत्राह "तेन तस्ये"ति, अनुगुणं निमित्तं ह्युक्तमित्यत्राह "त्वदुक्तं चे"ति, प्रवृ-

१ कल्पनीयमिति पा० ।

त्तिनिमित्तलक्षणमिति प्रवृत्तिनिमित्तं समुदायशक्तिनिमित्तं वाच्यभूतं तच्च तल्लक्षणं तेन व्युत्पत्तिनिमित्तभूतस्योपलक्षणभूतस्य च लक्षणस्य व्यावृत्तिः, गो—शब्दस्य गमिधात्वर्थोव्युत्पत्तिनिमित्तं पृथिवीशब्दवाच्यस्य पृथिवीत्व-स्योपलक्षणभूतं गन्धवत्त्वं तदुभमपि न प्रवृत्तिनिमित्तम्, अयमर्थः शरीरदे-हादिव्युत्पत्तिनिमित्तभूता विशरणोपचयादयो नानुगता गन्धोपलक्ष्यपृथिवी त्ववच्छब्दप्रवृत्तिनिमित्तभूतमुपलक्षणान्तरोपलक्ष्यंजात्यादिकमपि न दृश्यते, अतो लक्षणतयाऽभिमतमिदमेव प्रवृत्तिनिमित्तमेष्टव्यं तच्चायुक्तम् अननुग-तत्वादिति पाणिपादादिमच्छरीरेषु अव्याप्तिमाह “किं चे”ति, तल्लक्षण-मिति प्रथमोपात्तं कर्मफलोपभोगहेतुत्वं विवक्षितं भूतसङ्घातरूपत्वस्या-व्याप्तिं दर्शयितुमाह “परमपुरुषेच्छे”ति, पञ्चवृत्तीति प्राणसद्भावमात्रवि-वक्षायां च चेतनेष्वव्यक्तादिषु चेश्वरशरीरभूतेष्वव्याप्तिरभिप्रेता अहल्यादी-नामिति इन्द्रियाश्रयत्वं—ज्ञानप्रवृत्तिजननपटुतरेन्द्रियाश्रयत्वम् इन्द्रियस-द्भावमात्रविवक्षयां पूर्ववदव्याप्तिरभिप्रेता, अत इति, अतः—अननुयायिनो लक्षणत्वात् त्वदुक्तस्य चाननुयायित्वादित्यर्थः । चेष्टेन्द्रियार्थाश्रयः शरीर-मिति न्यायसूत्रे शरीरस्य लक्षणत्रयमुक्तं चेष्टाभोगेन्द्रियाशय इति हि न्या-यविदः । अस्य लक्षणत्रयस्याव्याप्तत्वाद् व्यापिलक्षणत्रयमाह—

मू० अतो यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च तत्तस्य शरीरमिति शरीरलक्षणमास्थेयं रुग्णशरीरादिषु नियमनाद्यऽदर्शनं विद्यमानाया एव नियमनशक्तेः प्रतिबन्धकृतम्, अ-ग्न्यादेः शक्तिप्रतिबन्धादौष्ण्याद्यदर्शनवत्, मृतशरीरं च चेतनवियोगसमय एव विशरितुमारब्धं, क्षणान्तरे च विशी-र्यते पूर्वं शरीरतया परिक्लृप्तसङ्घातैकदेशत्वेन च तत्र शरीरत्वव्यवहारः, अतस्सर्वं परमपुरुषेण सर्वात्मना स्वार्थे

नियाम्यं धार्य्यं तच्छेषतैकस्वरूपमिति सर्वं चेतनाचेतनं तस्य शरीरम्, अशरीरं शरीरेष्वित्यादि च कर्म्मनिमित्तशरीरप्रतिषेधपरं यथोक्तसर्वशरीरत्वश्रवणात्, उपरितनाधिकरणेषु चैतदुपपादयिष्यते, अपीतौ तद्वत् प्रसङ्गादसमञ्जसं न तु दृष्टान्तभावादिति सूत्रद्वयेनेतरव्यपदेशादित्यधिकरणसिद्धोऽर्थः स्मारितः ॥

टी० यस्येत्यादिना, यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं शक्यं तत्तस्य शरीरं, यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे धारयितुं शक्यं तत्तस्य शरीरं, यस्य चेतनस्य यद्द्रव्यं शेषतैकस्वरूपं तत्तस्य शरीरमिति, लक्षणत्रयं तच्छेषतैकस्वरूपमित्यत्र एक-शब्दप्रयोगः सर्वात्मनेति पदस्य स्थाने द्रष्टव्यः, सर्वात्मनेति पदेन यावद्द्रव्यभावित्वं विवक्षितं तच्छेषतैकस्वरूपमिति पृथगुक्तिः स्वार्थशक्यशब्दप्रयोगानपेक्षणात् यस्येति पदेन शरीरस्य न घटपदादिवदप्रतियोगिपदार्थत्वमपि तु पुत्रपित्रादिवत् सप्रतियोगिकपदार्थत्वमिति दर्शितं, सप्रतियोगिकपित्रादीनां शरीरत्वव्यावृत्त्यर्थं नियाम्यमित्युक्तं, नियाम्यमित्युक्ते भृत्यादीनामपि शरीरत्वं स्यादिति तद्व्यावृत्त्यर्थं सर्वात्मनेति पदं, यावद्द्रव्यभावीत्यर्थः, क्रियागुणादिव्यावृत्त्यर्थं द्रव्यमित्युक्तम्, आकाशादिप्रदेशगमनादिषु अशक्येष्वर्थेषु शरीरस्य नियमनासम्भवात्तद्व्यावृत्त्यर्थं स्वार्थं इत्युक्तं, स्वविषय इत्यर्थः, "अर्थः स्याद्विषयेमोक्ष" इत्यभिधानविदस्स्वशब्दः शरीरपरः तत्तच्छरीरसम्पाद्येषु कार्येष्विति यावत्, रुग्णशरीरेषु व्यभिचारो माभूदिति शक्यमित्युक्तं, तत्र शक्तेः प्रतिबन्ध एव न तु शक्त्यभावः, अग्न्यादावौष्ण्यादिवत्तज्ज्ञानव्यावृत्त्यर्थं चेतनस्येत्युक्तं, न हि ज्ञानं ज्ञानविशिष्टेन नियाम्यम् अपि तु स्वाश्रयेण, तस्माच्चेतननियाम्यत्वाभावेन न तत्रानैकान्त्यम्, एवं लक्षणान्तरद्वयेऽपि व्यावर्त्यमुच्यते यस्य सर्वात्मना द्रव्यं शक्यमिति पदानां पूर्ववद्व्यावृत्तिः, चेतनस्येति पदेन प्रभाव्यावृत्तिः, शरीरित्वप्रयुक्तदोषादिशङ्काव्यावृत्त्यर्थमाह–

Digitized by Google

सू० स्वपक्षदोषाच्च ॥ १० ॥

मू० न केवलं ब्रह्मकारणवादस्य निर्दोषतयैतत्समाश्रयणं प्रधानकारणवादस्य दुष्टत्वाच्च तत्परित्यज्यैतदेव समाश्रयणीयं प्रधानकारणवादे हि जगत्प्रवृत्तिर्नोपपद्यते तच्च हि निर्विकारस्य चिन्मात्रैकरसस्य पुरुषस्य प्रकृतिसन्निधानेन प्रकृतिधर्म्माध्यासनिबन्धना जगत्प्रवृत्तिः निर्विकारस्य चिन्मात्ररूपस्य प्रकृतिधर्माध्यासहेतुभूतं प्रकृतिसन्निधानं किंरूपमिति विवेचनीयं किं प्रकृतेः सद्भाव एव? उत तद्गतः कश्चिद्विकारः?। अथ पुरुषगत एव कश्चिद्विकारः? न तावत्पुरुषगतः, अनभ्युपगमात्, नापि प्रकृतेर्विकारः, तस्याध्यासकार्य्यतयाऽभ्युपगतस्याध्यासहेतुत्वासम्भवात्, सद्भावमात्रस्य सन्निधानत्वे मुक्तस्याप्यध्यासप्रसङ्ग इति त्वत्पक्षे जगत्प्रवृत्तिर्नोपपद्यते। अयमर्थः साङ्ख्यपक्षप्रतिक्षेपसमये अभ्युपगमेऽप्यर्थाभावादित्यादिना प्रपञ्चयिष्यते, ॥

सू० तर्काप्रतिष्ठानादपि ॥ ११ ॥

मू० तर्कस्याप्रतिष्ठितत्वादपि श्रुतिमूलो ब्रह्मकारणवाद एव समाश्रयणीयो न प्रधानकारणवादः शाक्यौलूक्याक्षपादक्षपणककपिलपतञ्जलितर्काणामन्योऽन्यव्याघातात्तर्कस्याप्रतिष्ठितत्वं गम्यते ॥

टी० "उपरितनाधिकरणेष्वि"ति, सू॰ स्वपक्षदोषाच्च या तु परेण पूर्वं निर्दोषत्वजगदुपादानत्वादिव्याहतिरुक्ता सैव व्याहतिरनेन सूत्रेण

"असूर्यललाटयोर्दृशितपोः"॥ 'असूर्यंपश्या इति'। पाघ्रादिसूत्रेण पश्यादेशः। 'गुप्तिपरं चैतदिति'। यदुवचनम् असूर्यंपश्या राजदारा इति एतद्गुप्तिप्रधानं, तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुद्ध्यतइति भावः, गुप्तिपरत्वमेव प्रकटयति। 'एवं नामेति'॥

"उग्रंपश्येरम्मदपाणिन्धमाश्च"॥ 'उग्रं पश्यतीति'। क्रियाविशेषणमेतत्। 'इरम्मद इति'। मदी हर्षे दिवादित्वाच्छ्यनि प्राप्ते तदभावो निपातनात्, इरा उदकम्। 'पाणिन्धमाः पन्थान इति'। ते पुनर्येषु गच्छद्भिः सर्पाद्यपनोदनाय पाणयो ध्मायन्ते शब्द्यन्ते॥

"प्रियवशे वदः खच्"॥ 'चकारः 'खचि ह्रस्व' इति विशेषणार्थ इति'। खे ह्रस्व इत्युच्यमाने 'एजेः खश्' अङ्गमेजयः जनमेजयः, अत्रापि प्राप्नोति, एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येत्यत्र न भविष्यति, इह तर्हि 'कुलात्खः' कुलीनः, यस्येति लोपनिवृत्तये ह्रस्वः स्यात् तत्र धातुप्रत्ययस्य ग्रहणं तत्प्रकरणसाहचर्यादेव चिन्त्यप्रयोजनश्चकारः। 'प्रत्ययान्तरकरणमुत्तरार्थमिति'। द्विषन्तप इत्यत्र ह्रस्वणिलोपौ यथा स्यातां शप् च मा भूदिति। यद्येवमुत्तरत्रैव कर्त्तव्यइह करणे किं प्रयोजनम् अन्येभ्योऽपि भवतीति ज्ञापनार्थं, तेन गमेः सुप्युपसंख्यानमिति न वक्तव्यं भवति। 'मितद्रुम इति'। असंज्ञार्थमिदं संज्ञायां तु 'गमश्च' इति वक्ष्यमाणेनैव सिद्धम्॥

"द्विषत्परयोस्तापेः"॥ 'द्विषन्तप इति'। मुमि संयोगान्तलोपः। 'द्वितकारको निर्द्देश इति'। तत्रैकेन द्विषच्छब्दो विशेष्यते तकारान्तो यो द्विषच्छब्द इति, सौत्रत्वान्निर्द्देशस्य विशेषणस्य परनिपातः। 'तेन स्त्रियां न भवतीति'। अन्यथा लिङ्गविशिष्टपरिभाषया स्यादेव प्रसङ्ग इति भावः॥

"वाचि यमो व्रते"॥ 'शास्त्रित इति'। शास्त्रशब्दाद्विधाने धात्वर्थे णिच् तदन्तात्कर्मणि क्तः। शास्त्रे विहितः शास्त्रेण वा शास्त्रितः। 'नियम इति'। सङ्कल्पविशेषः। 'वाचंयम इति'। 'वाचंयमपुरंदरौ च' इति पूर्वपदस्यामन्तत्वं, तत एव तर्हि निपातनात्प्रत्ययो भविष्यति। व्रतादन्यत्रापि तर्हि प्राप्नोति, तत्रैव व्रतग्रहणं करिष्यते वाचंयमो

व्रते पुरन्दरश्चेति तदेतच्चिन्त्यप्रयोजनम्, एतेन पुरन्दरो व्याख्यातः। 'वाग्याम इति'। योऽशक्त्यादिना वाचं यच्छति तत्राणेव भवति॥

"पूःसर्वयोर्दारिसहोः"॥ दॄ विदारणइत्यस्य ग्रहणं न दॄ भये दृङ् आदरे इत्येतयोरित्युपदेशः, असंज्ञार्थं सहिग्रहणं संज्ञायां तु वक्ष्यति सर्वंसहो राजेति सर्वं संपादयितुं समर्थ इत्यर्थः॥

"मेघर्त्तिभयेषु कृञः"॥ 'करोतेरिति'। कृणोतेस्तु पूर्ववदेवाग्रहणम्, शिवंकर इत्यपि छन्दसि दृश्यते शिव एको ध्येयः शिवंकर इति॥

"आशिते भुवः करणभावयोः"॥ 'अत्र सुपीत्युपतिष्ठतइति'। न तु कर्मणीति भवतेरकर्मकत्वात्, सोपसर्गात्प्राप्त्यर्थाच्च खचा न भवितव्यमनभिधानादिति भावः। आशितशब्दोयमश भोजनइत्यस्मादाङ्पूर्वादविवक्षिते कर्मणि कर्त्तरि क्तप्रत्ययान्तो गृह्यते। 'आशितः कर्त्तेति'। यस्याद्युदात्तत्वं विधास्यते यस्तु ध्रौव्यगतिप्रत्यवसानार्थेभ्य इति भावकर्माधिकरणेषु क्तो न तदन्तो गृह्यते ऽनभिधानादित्याहुः। अन्ये त्वशेर्ण्यन्तात्प्रयोज्ये कर्मणि क्तप्रत्यये कृते य आशितशब्दः स गृह्यते, एवमाशितः कर्त्तेति यस्याद्युदात्तत्वं तत्रापि प्रयोज्यएव भूतपूर्वगत्या कर्त्तोच्यते गतिबुद्धिप्रत्यवसानार्थेति अणौ कर्त्तुर्णौ कर्मसंज्ञाविधानात्, तथा च कृषन्नित्फाल आशितं कृणोतीति आद्युदात्तस्याव्रग्रहो न दृश्यते, कर्तृग्रहणं तु तत्र भावनिवृत्त्यर्थमिति। 'आशितं भव ओदन इति'। यावतौदनेनातिथ्यादिराशितो भवति स एवमुच्यते॥

"संज्ञायां भृतॄवृजिधारिसहितपिदमः"॥ 'संज्ञावशादित्यादि'। शत्रुन्तप इत्यादौ यत्र कर्मार्थानुगमस्तत्र कर्मणीति सम्बध्यते यत्र तु न रथन्तरमित्यादौ तत्र सुपीति। 'अरिन्दम इति'। अन्तर्भावितण्यर्थो दमिः सकर्मको भवति॥

"गमश्च"॥ 'योगविभाग उत्तरार्थ इति'। उत्तरत्र गमेरेवानुवृत्तिर्यथा स्याद् भृतॄप्रभृतीनां मा भूत्॥

"अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः"॥ 'अनुबन्धकरणसामर्थ्यादिति'। 'श्रवणार्थस्तु डकारो न भवति, 'पादस्य पदाज्यातिगोपहते-

Digitized by Google

ष्वि' ति कृतटिलोपस्य डप्रत्ययान्तस्य निर्देशात् । अत्रात्यन्तानन्तग्रहण-मनर्थकम्, अन्तशब्दोऽत्र गृह्यते तेन कर्मणो विशेषणात्तदन्तविधिर्भविष्यति उपपदविधौ तु न सर्वत्र तदन्तविधिः, उपपदविधौ तदाद्यादिग्रहणमिति नियमात् । पन्नं पतितं यथा गच्छतीति पन्नगः, 'सुदुरोरधिकरणे' इति कर्मणि खलेव भवति । 'सुगमो दुर्गम इति' । 'अन्यत्रापि दृश्यत-इति' । एवं च सूत्रमपि प्रपञ्चार्थम् ॥

"आशिषि हनः" ॥ 'दाराविति' । दारुशब्दइत्यर्थः । शब्दा-पेक्षया पुल्लिङ्गः, टविधानार्थं वचनमण् 'कर्मण्यणि' त्येव सिद्धः, अन्त-ग्रहणं विस्पष्टार्थमलोन्त्यस्येत्येव सिद्धम् ॥

"कुमारशीर्षयोर्णिनिः" ॥ सुप्यजाताविति सिद्धे ऽताच्छील्यार्थ-मिदं वचनं शिरसः शीर्षभावार्थं च ॥

"लक्षणे जायापत्योष्टक्" ॥ 'लक्षणवतीति' । एतेनार्शआद्यच्-प्रत्ययान्तो लक्षणशब्द इति दर्शयति, एतच्च सूत्रारम्भादेवावसीयते, केवले हि लक्षणे उत्तरेणैव सिद्धः प्रत्ययः । 'जायाघ्नो ब्राह्मण इति' । यस्य तिलकालकादि जायामरणलिङ्गमस्ति स तां हन्तीति गौणो गदः, एतेन पतिघ्नी व्याख्याता, गमहनेत्युपधालोपः, टित्त्वान्ङीप् ॥

"अमनुष्यकर्तृके च" ॥ अमनुष्यशब्दो रक्षःपिशाचादिषु रूढ इति पूर्वमुक्तमिह तु मनुष्यादन्यः सर्व एव गृह्यते, ननु यथा पूर्वसूत्रे लक्षण-ग्रहणं प्रत्ययार्थस्य कर्तुर्विशेषणमेवमिहाप्यमनुष्यग्रहणं भविष्यतीति नार्थः कर्तृग्रहणेन, अमनुष्यइत्युच्यमाने उपपदत्वमपि विज्ञायेत तस्मा-त्कर्तृग्रहणम्, कृतघ्नशब्दो मूलविभुजादिषु द्रष्टव्यः ॥

"शक्तौ हस्तिकपाटयोः" ॥ 'विषेण हस्तिनं हन्तीति' । नन्वत्रा-प्यशक्तस्य कर्तृत्वानुपपत्तेरस्त्येव शक्तिः, सत्यं, शक्तिग्रहणसामर्थ्यात्प्रकर्ष-विज्ञानादन्यनिरपेक्षस्वबलेनैव हन्तुं या शक्तिः सा गृह्यते तद्दर्शयति । 'हस्तिनं हन्तुं समर्थो हस्तिघ्नो मनुष्य इति' । एवं च हस्तिनं हन्तु मा वा वधीत् सामर्थ्ययोगाद्धस्तिघ्न इत्युच्यते । 'कं पाटयति प्रविशतइति' ।

Digitized by Google

कपाटशब्दं व्युत्पादयति, कवाटमिति तु प्रसिद्धः, तत्राटतेः पचाद्यच् । 'कवङ् चोष्णइति' योगविभागात्कोः कवादेशः ॥

"आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्"॥ 'आढ्यादिष्विति'। अनेन आढ्यादीनामुपपदत्वं दर्शयति। करणे कारकइत्यनेनापि करणस्य प्रत्ययार्थत्वम्। अथैवं कस्मान्न विज्ञायते करणउपपदे आढ्यादिषु कर्तृष्विति, उच्यते, च्व्यर्थेष्वच्वाविति वचनाद् आढ्यादिशब्दाः स्वरूपप्रधानाः,न च शब्दानां कर्तृत्वमुपपद्यते, ननु च श्रवणेनकरोति सुखमाढ्यशब्द इत्यत्र शब्दस्यापि कर्तृत्वं सम्भवति, एवं तर्हि व्याख्यानात्तथा नाश्रीयते, अच्वाविति तत्पुरुषो बहुव्रीहिर्वा ऽच्व्यन्तइत्यर्थः। प्रत्येकं सम्बधात्त्वेकवचनं, कथं पुनश्च्व्यर्थाश्च भवन्त्यच्व्यन्ताश्च भवन्तीत्याह। 'च्वेर्विकल्पेन विधानादिति'। 'आढ्यङ्करणमिति'। ख्युनः खकारो मुमर्थः, लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गेष्वाढ्यादिषूपपदेषु ह्रस्वार्थश्च, नकारः स्वरार्थः, योरनादेशः। 'अभ्यञ्जयतीत्यर्थ इति'। अनेकार्थत्वाद्धातूनां, तेनात्र प्रागनाढ्यः सन्नाढ्यः क्रियतइति अभूततद्भावाभावो भवतु वा ऽभूततद्भावस्तथापि युक्तमेवेदं प्रत्युदाहरणमित्याह। 'प्रकृतेरविवक्षायामिति'। प्रकृतिरेव परिणामित्वेन यत्र विवक्ष्यते यथा तन्तवः पटो भवतीति तदा च्विप्रत्ययः, तथा च वार्त्तिकं प्रकृतिविवक्षा ग्रहणं चेति, प्रकृतिः कार्यस्य पूर्वावस्था 'अच्वाविति किमिति'। अस्य वक्ष्यमाणोभिप्रायः तमाविष्करोति। 'ननु चेति'। 'ल्युटात्र भवितव्यमिति'। 'करणाधिकरणयोश्चे' ति, न च ल्युटः ख्युनश्च विशेषो ऽस्तीति ल्युटि तावदाढ्यीकरणमिति रूपं स्वरोपि लित्स्वरेणोत्तरपदाद्युदात्तत्वं ख्युन्यपि नित्स्वरेणाद्युदात्तत्वं 'खित्यनव्ययस्य' 'अरुर्द्विषदजन्तस्य मुमि' ति ह्रस्वत्वं मुम् चानव्ययस्य विधीयते च्व्यन्ताश्चाव्ययम् 'ऊर्यादिच्विडाचश्चे' ति निपातत्वात्, स्त्रियामप्युभयत्र टिड्ढाणञित्यादिना ङीब् भवति, अतो रूपे स्वरे च नास्ति विशेषः। 'उत्तरार्थश्चेति'। उत्तरसूत्रे खिष्णुच्खुकञ्भ्यां मुक्ते वृजादिभिर्भवितव्यमित्यस्ति विशेषः, कथन्तर्हि पूर्वमुक्तं प्रतिषेधसामर्थ्यादिति, अस्मिन्सूत्रे प्रतिषेध-

Digitized by Google

सामर्थ्यादिति भावः, केवलोत्तरार्थत्वे हि तत्रैवाच्चाविन्यवक्ष्यत्, यथा वक्ष्यते इह किं चित्तपो इति, भाष्ये तूत्तरार्थमेव स्थितम् ॥

"कर्त्तरि भुवः खिष्णुच्खुकञौ" ॥ कर्तृग्रहणं करणनिवृत्त्यर्थमुत्तरार्थं च, खकारो मुमर्थः, चकारः स्वरार्थः, ञकारो वृद्ध्यर्थश्च, किमर्थं खिष्णुजिकारादिः क्रियते न खष्णुरित्येवोच्येत, तत्रायमप्यर्थः, स्वरार्थश्चकारो न कर्त्तव्यो भवति प्रत्ययस्वरेणैव सिद्धम्, केनेदानीमिकारादित्वं सिद्ध्यति तत्राह । 'उदात्तत्वादिति' । भवतिरयमुदात्तः, तस्योदात्तत्वादिड् भविष्यति । 'नञस्त्विति' । नञ इति पञ्चमी नञ उत्तरस्य खिष्णुजन्तस्य स्वरसिद्ध्यर्थमित्यर्थः । यद्ययमिकारादिर्न क्रियेत ततः सत्यपीटि कृत्योकेष्णुच्चार्वादयश्चेत्यस्य ग्रहणं न स्याद् अस्य चकाराभावात्, अथास्यापि चकारः क्रियेत एवमपि लाक्षणिकत्वात् षत्वणत्वयोश्चासिद्धत्वादिष्णुजितिरूपाभावाद्ग्रहणं न स्यादेव तत इकारादित्वं क्रियते, ननु च सत्यपीकारादित्वे तदनुबन्धकग्रहणे नातदनुबन्धकस्य, एकानुबन्धकग्रहणे न द्व्यनुबधकस्येति वालंकृञादीष्णुच एव ग्रहणेन भवितव्यं नास्य, इकारोच्चारणसामर्थ्यादस्यापि ग्रहणं भविष्यतीति मन्यते । यद्येवं खष्णुजयमस्तु तत्र षत्वणत्वयोश्चकारस्य च करणसामर्थ्यादिटि कृते ऽस्यापि ग्रहणं सिद्धमिति चिन्त्यप्रयोजनमिकारादित्वम् ॥

"स्पृशोनुदके क्विन्" ॥ 'ननु चेत्यादि' । 'सुपि स्थ' इत्यत्रोक्तं सकर्मकेषु कर्मणीत्युपतिष्ठते ऽन्यत्र सुपीति ततश्च सुबन्तउपपदे क्विन् प्रत्यय इत्युक्तमनुपपन्नमिति भावः । 'तत्कर्तृप्रचयार्थमिति' । 'कर्त्तरि कृदि' त्येव कर्त्तरि क्विनः सिद्धत्वात्कर्त्रनुवृत्तेर्नान्यत्प्रयोजनमस्तीति भावः । 'कर्तृप्रचयो लभ्यतइति' । कर्मण्युपपदएकः कर्त्ता करणादौ चापर इत्येवं प्रचयो भवति । 'घृतस्पृगिति' । 'क्विन्प्रत्ययस्य कु' रिति शकारस्य खकारः सोष्मत्वेनान्तरतम्यात्, 'झलां जशोन्ते' क्विनः ककारो गुणवृद्धिप्रतिषेधार्थं इकारो 'वेरपृक्तस्ये' ति विशेषणार्थः, नकारः किमर्थः एकाज्भ्यो ह्ययं विधीयते तत्र धातुस्वरेणैव सिद्धं यस्त्वयमनेकाज् दधृगिति वक्ष्यत्येतद्धृषेर्द्विर्वचनमन्तोदात्तत्वञ्चेति एवन्तर्हि 'क्विन्प्रत्ययस्य कु'-

Digitized by Google

रिति विशेषणार्थः, क्विप्रत्ययस्येत्युच्यमाने सन्देहः स्यात् क्वेः क्विपो वा निर्देश इति, क्वेरपि निर्देशे पकारस्यानचि चेति द्विर्वचम् ॥

"ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च" ॥ 'ऋतौ यजतीति'। वसन्तादिके। 'ऋतुं यजतीति'। यस्मिन्यागे ऋतुर्द्देवता यथा वसन्ताय कपिञ्जलानालभते पिशङ्गास्त्रयो वासन्ता इत्यृतुपशूनालभते ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षा इत्यादौ तदभिप्रायमेतत्। 'ऋतुप्रयुक्तो वेति।' वसन्ते वसन्ते ज्योतिषा यजेतेत्यादौ यत्कर्तृत्वं तदभिप्रायमेतत्। 'षत्वञ्चेति'। अन्यथा 'सात्पदाद्यो' रिति निषेधः स्यात्। 'सुबन्तमात्रइति'। अन्यथा सकर्मकत्वात्कर्मण्येव स्यात्। 'केवलादेवेति'। एतत्तु क्विन्विधानसामर्थ्यादपि लभ्यते नहि सोपपदाद्युजेः क्विनि क्विपि वा विशेषोस्ति कुत्वस्य 'चोः कु' रित्यनेनैव सिद्धत्वात्, अनुपपदे तु 'युजेरसमास' इति नुमि कृते नकारस्य कुत्वार्थं क्विनो विधानं भवति सार्थकं, यदि तु निपातनसाहचर्यात्सोपपदादनुपपदाच्च युजेः क्विन् भवतीत्युच्येत तदा सत्सूद्विषेत्यत्र युजिग्रहणं शक्यमकर्त्तुम्। 'नलोपः कस्मान्न भवतीति'। कुञ्च क्रुञ्च कौटिल्याल्पीभावयोरिति नोपधावेतौ धातू। तथा निकुचितिरिति नलोपो दृश्यते चुत्वेन तु ञकारस्य श्रवणं तस्यासिद्धत्वाच्चकारे परत 'श्चोः कु' रिति कुत्वं न भवति कुञ्चौ क्रुञ्च इत्यादौ ञकारोपधं तु पठतां स्यात् तत्र सङि झलीति वचनाच्च भवतीति वक्तव्यं, सङिति प्रत्याहारः सनः सशब्दादारभ्या महिङो ङकारात्, अन्ये तु कुञ्चिरेक एव धातुस्तस्य ककारात्परो रेफोपि क्विन्सन्नियोगेन निपात्यतइत्याहुः। तदेत् 'च्वोः कु' रित्यत्र वामनो वक्ष्यति ॥

"त्यदादिषु दृशोऽनालोचने कञ्च" ॥ पश्यार्थैश्चेत्यत्र वक्ष्यति आलोचनं चक्षुस्साधनं विज्ञानमिति, इह तु ज्ञानमात्रप्रतिषेधं मन्यते। 'यादृक् तादृगिति'। दृग्दृशवतुष्विति वर्त्तमाने 'आ सर्वनाम्न' इत्यात्वम्। 'ञकारो विशेषणार्थ इति'। आद्युदात्तत्वस्य नकारेणापि सिद्धत्वात् ञकारोपधस्य प्रयोजनं विशेषणमेवेत्यर्थः, न तु स्वरो न प्रयोजनमित्युच्यते तं पश्यति तद्दर्श इति चक्षुर्विज्ञानेऽणेव भवति, कथं पुनः प्रयुज्यमान-

स्यैव दृशेरनालोचनार्थत्वमित्याह । 'तादृशादयो रूढिशब्दा इति'। ततः किमित्याह । 'नैवात्रेति'। रूढिशब्दा ह्यसताप्यवयवार्थेन व्युत्पाद्यन्ते यथा तैलपायिकादयः, एतदर्थमेवानालोचनइत्युक्तं, दृश्यर्थाभावे ऽयं विधिः, सति तु दृश्यर्थेनैव भवतीति । भाष्ये तु कर्मकर्त्तरि व्युत्पत्तिर्दर्शिता तमिवेमं पश्यन्ति जनाः सोयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति, तत्र कर्मव्यापारमात्रे वा दृशेर्वृत्तिः, कृत्स्नधात्वर्थाध्यारोपो वा सौकर्यातिशयप्रतिपादनायेति द्रष्टव्यम् । 'समानान्ययोश्चेति'। समानस्य दृग्दृशवतुषु सभावविधानात्सिद्धम्, क्सश्चेति त्यदादिषु समानान्ययोश्च तादृक्षः सदृक्षः । 'अन्यादृक्ष इति'। दृक्षे चेति वक्तव्यमिति सभाव आत्वं च ॥

"सत्सूद्विषद्रुहदुहयुजविद्भिद्च्छिद्जिनीराजामुपसर्गेपि क्विप्" ॥ 'अतः प्रभृतीति'। भाष्यकारप्रयोगात्प्रभृतिशब्दयोगे पञ्चमी । 'वदः सुपि क्यप् चेति'। प्रयोजनदिगियं दर्शिता, अत्र ह्यनुपसर्गइति वर्त्तते तस्मात् 'स्पृशोनुदके क्विन्' त्यादौ प्रयोजनं द्रष्टव्यम् । 'सुवतेरिति'। न्यायस्य तुल्यत्वाद्दैवादिकस्याप्यग्रहणम् । 'शुचिषदिति'। छान्दसोयं प्रयोगो हंसः शुचिषदिति । पूर्वपदादिति षत्वं, शुचिसदिति पाठे लौकिकः प्रयोगः । 'कथमत्र णत्वमिति'। ग्रामणीविषयः प्रश्नः, प्रणीरित्यत्र तूपसर्गादसमासेपीति णत्वमस्त्येव । 'ज्ञापकादिति'। पूर्वपदस्यान्निमित्तादुत्तरस्य नयतिनकारस्यासञ्ज्ञायामपि णत्वं भवतीति सामान्येन ज्ञापकमित्यर्थः, तेनाग्रणीरित्यत्रापि भवति कर्मण्यणि तु न भवति नीरूपविषयत्वाज् ज्ञापनस्य, अन्ये त्वग्रग्रामाभ्यां नयतेरिति वक्तव्यमिति वचनाज्ज्ञापनमपि तद्विषयं तत्रापि नीरूपविषयमिति स्थिताः ॥

"छन्दसि सहः" ॥ तुरासाहं पुरोधाय पृतनाषाट् द्विषो योद्धुं पुरुहूतः, पृतनाषाडिति भाषायां प्रयोगाश्चिन्त्याः ॥

"जनसनखनक्रमगमो विट्" ॥ 'विशेषणार्थश्चेति'। विवनोरित्युच्यमाने हि क्विबादीनामपि ग्रहणं स्यात्, अथात्र निरनुबन्धकत्वादस्यैव ग्रहणं वेरपृक्तस्येत्यत्राप्यस्यैव ग्रहणं स्यात्, अथात्र क्विबादीनामपि ग्रहणं

Digitized by Google

स्याद्विड्वनोरनुनासिकस्यादित्यत्रापि स्यादिति समानं वच इति भावः । 'गोषा इति'। सनोतेरन इति षत्वम् 'अग्रेगा इति'। पूर्ववदलुक् ॥

"अदोनन्ने" ॥ 'अन्नाद इति'। भाषायामणेव भवति छन्दसि त्वकारादनुपपदादित्यणि प्राप्ते पचाद्यजिष्यते, तेनान्नाद इत्यत्र अद इत्यवग्रहो भवति ॥

"क्रव्ये च" ॥ 'वासरूपबाधनार्थमिति'। तथा च वार्तिकम् अदोनन्ने क्रव्यग्रहणं वासरूपनिवृत्त्यर्थमिति। 'कथन्तर्हीति'। यदि वासरूपविधिबाधनार्थमिति भावः । 'कृत्तविकृत्तेति'। कृत्तं छिन्नं तदेव पुनर्विशेषतः कृत्तमिति पूर्वकालेति समासः, तस्य पक्कशब्देन पुनः स एव समासः, ततो मांसशब्देन पुनर्विशेषणसमासः,। 'पृषोदरादित्वात्क्रव्यभाव इति'। यद्येवं क्रव्याद इत्यस्य रूपस्यावर्जनीयत्वादलं वासरूपबाधनार्थंनानेन वचनेन वार्त्तिकविरोधश्चैवं वदत इत्याशङ्क्याह । 'कृत्तविकृत्तेत्यादि'। अर्थभेदादुभयमपि नास्ति किलेत्ययमभिप्रायः ॥

"दुहः कप् घश्च" ॥ 'कामदुघेति'। काम्यन्तइति कामाः तान् दुग्धे कामदुघा, अर्घा मधुपर्कः ॥

"मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः" ॥ 'एतेभ्य इति'। श्वेतादिपूर्वेभ्यो वहादिभ्यो धातुभ्य इत्यर्थः । 'धातूपपदसमुदाया इति'। किमर्थमित्याह । 'अलाक्षणिकेति'। श्वेतवा इत्यादिषु अवयाः श्वेतवाः पुरोडाश्चेति निपातनादुत्वम् । 'उक्थशा इति'। नलोपे 'अत उपधाया' इति वृद्धिः, रुत्वम्, 'डस्पदस्येति'। प्रत्येकमभिसम्बद्ध्यते भाविपदत्वाश्रयेण चेदमुच्यते यत्र डसन्तस्य पदत्वं भविष्यति तत्र णिवनोपवादो डस्प्रत्ययो वक्तव्य इत्यर्थः, यद्येवमनेन डसि कृते सावत्वसन्तस्येति दीर्घे रुत्वे च श्वेतवा इत्यादि सिद्धं नार्थोवयाः श्वेतवा इति निपातनेन, एवन्तर्हि सम्बुद्ध्यर्थं निपातनं हे श्वेतवा इन्द्रेति अत्वसन्तस्येत्यत्र हि असम्बुद्धाविति वर्त्तते डसपि वक्तव्य उत्वार्थं श्वेतवोभ्यामुक्थशोभ्यामिति, एवं चोक्थशा इत्यपि सम्बुद्ध्यर्थं निपातनं कर्त्तव्यं यदि मन्त्रे दर्शनमस्ति ॥

"अवे यजः" ॥ 'अवया इति'। निपातनादुत्वम् । 'योगविभाग उत्तरार्थ इति'। पुरोडाशवयजो श्विनित्येकयोगे श्वेतवहादीनामप्युत्तरत्रानुवृत्तिः स्यात्, यजेश्चावपूर्वस्यैवानुवृत्तिः स्यात्केवलस्यैव चेष्यते तदर्थो योगविभाग इत्यर्थः ॥

"विजुपे छन्दसि" ॥ अथ छन्दोग्रहणं किमर्थं यावता मन्त्रइत्यनुवृत्तेरेव भाषायां न भविष्यति तत्राह। 'छन्दोग्रहणं ब्राह्मणार्थमिति'। मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणं यथोक्तं तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणशब्द इति । 'किमर्थं पुनरिदमिति'। उत्तरसूत्रएव विज्ग्रहणं छन्दोग्रहणं च क्रियतामिति प्रश्नः । 'नियमार्थमिति'। ननु दृशिग्रहणादेव भाषायां न भविष्यति, सत्यं, तस्यैव प्रपञ्चार्थमिदम् ॥

"आतो मनिन्क्वनिब्वनिपश्च" ॥ अश्व इव तिष्ठति अश्वत्थामा पृषोदरादित्वात्सकारस्य तकारः । 'सुधीवा सुपीवेति'। घुमास्थादिसूत्रेण ईत्वं, चकारो विचोनुकर्षणार्थः, यद्येवमुत्तरत्रानुवृत्तिर्न स्यात् एवन्तर्हि चकारोप्युत्तरत्रानुवर्त्तिष्यते ॥

"अन्येभ्योपि दृश्यते" ॥ 'अपिशब्दः सर्वविधिव्यभिचारार्थ इति'। विधीयतेनेनेति विधिः उपाधिः, सर्वोपाधिव्यभिचारार्थ इति युक्तः पाठः । 'दृशिग्रहणं प्रयोगानुसरणार्थमिति'। यथा प्रयोगे दृश्यन्ते तथैव भवन्तीति वचनव्यक्त्याश्रयेणेति भावः ॥

"क्विप् च" ॥ 'निरुपपदेभ्यश्चेति'। एतदपिशब्दस्य सर्वोपाधिव्यभिचारार्थस्यानुवृत्तेर्लभ्यते न तु सुपीत्यस्य निवृत्तिः उत्तरसूत्रे सुप्युपसर्गेपीति वर्त्ततइति वक्ष्यमाणत्वात् छन्दसि भाषायाञ्चेति पूर्वसूत्रएव छन्दसीत्यस्य निवृत्तत्वात् । 'उखास्रदिति'। स्रंसु ध्वंसु भ्रंसु अवस्रंसने अनिदितामित्युपधालोपः, वसुस्रंस्वित्यादिना दत्वम् । 'वहाभ्रडिति'। भ्रंशु अधःपतने व्रश्चादिना षत्वम्, 'अन्येषामपि दृश्यत' इति दीर्घः, उखायाः स्रंसते पर्णानि ध्वंसते वाहाद् भ्रश्यतीति विग्रहः, ध्वंसिरन्तर्भावितण्यर्थः सकर्मकः क्व चित्तु वृत्तावेव विग्रहवाक्यानि पठन्ते ॥

"स्थः क च" ॥ 'क्तेत्यविभक्तिको निर्द्देशः । 'अन्येभ्योपि दृश्यत-इति' । क्विबिति सिद्धएवेत्यपेक्षते, ननु तच्छीलादिग्रहणं तत्रानुवर्त्तते तस्मात् क्विप् चेति क्विप् सिद्ध एवेति वक्तव्यम् । यद्वा तच्छीलादिग्रहणं तत्र न सम्बन्धनीयमिति मन्यते, नन्वेवमपि सुपि स्थ इति विशेषवि-हितः कः सामान्यविहितं क्विपं बाधेत वासरूपविधिना सोपि भविष्यति। 'शमि धातोः संज्ञायामचं बाधतइति' । अन्यथा यथा कृञो हेत्वादिषु टं बाधते धातुग्रहणात्तथा तिष्ठतेरपि कक्विपौ बाधेत अतस्तमप्यचं बाधित्वा कक्विपावेव यथा स्यातामिति पुनर्वचनमित्यर्थः । 'शंस्था इति' । क्विपि लुप्ते प्रत्ययलक्षणेन घुमास्थादिसूत्रेणेत्वमत्र प्राप्नोति भाष्यकारप्रयोगात्तु न भवति, के चित्त्वीत्वमवकारादाविति वचनं पठन्ति तेषां सुपीवा सुधीवा अत्रापि न स्यात् ॥

"सुप्यजातौ णिनिस्ताच्छील्ये" ॥ 'ब्राह्मणानामन्त्रयितेति' । ताच्छील्यस्य विवक्षितत्वात्तन् प्रत्युदाहृतः, न लोकाव्ययेति षष्ठीप्रतिषेधः। 'उत्प्रतिभ्यामिति' । पुनः सुब्ग्रहणस्योपसर्गनिवृत्त्यर्थत्वादयमारम्भः । 'साधुकारिणि चेति' । अताच्छील्यार्थमिदं तच्चैतज्ज्ञापकात्सिद्धं यद-यमा क्विस्तच्छीले इत्यत्र तच्छीलेत्यभिधाय साधुकारिग्रहणं करोति तज्ज्ञा-पयति साधुकारिण्यताच्छील्येपि णिनिर्भवतीति । 'ब्रह्मणि वद इति'। ब्रह्म वेदः, इदमप्यताच्छील्यार्थम् ॥

"कर्त्तर्युपमाने" ॥ उपमानस्योपमेयापेक्षत्वात् कर्त्तरि च प्रत्य-यविधानात्तस्यै वोपपदकर्त्तोपमानं विज्ञायेत इत्याह । 'उपपदकर्त्तेति' । 'उष्ट्रक्रोशीति' । इवशब्दो गतार्थत्वाद्वृत्तौ नैव प्रयुज्यते समासउपमानानां शस्त्रीश्यामादिके यथा ॥

"व्रते" ॥ 'समुदायोपाधिश्चायमिति' । न प्रत्ययार्थविशेषणं तथा हि सति व्रतएव कर्त्तरि प्रत्ययः स्यान्न तद्वतीति भावः । समुदा-योपाधित्वमेव स्पष्टयति । 'धातूपपदेत्यादि' । कामचार इच्छाप्रवृत्तिः तत्प्राप्तौ सत्यां नियमः, स च द्विविधः सम्भवति स्थण्डिले शेतएव अश्राद्धं भुङ्क्तएवेत्येवं रूपो वा स्यात् स्थण्डिलएव शेते अश्राद्धमेव

Digitized by Google

भुङ्क्तइत्येवं रूपो वा, तत्र पूर्वके नियमे यदैवासावशक्त्यादिना ऽश्राद्धं न भुङ्क्ते तदैव व्रतलोपः प्राप्नोति न चैवंविधं शास्त्रमस्ति स्थण्डिले शयितव्यमेव अश्राद्धं भोक्तव्यमेवेति अस्ति तु स्थण्डिलएव शयितव्यम्, अश्राद्धमेव भोक्तव्यमिति, व्रतइति तु शास्त्रितो नियम इत्युक्तं तस्माद् द्वितीयो नियमो विज्ञायतइत्याह । 'सति शयनइत्यादि' ॥

"बहुलमाभीक्ष्ण्ये" ॥ 'आभीक्ष्ण्यं पौनःपुन्यमिति' । पुनः पुनर्भवितरि वर्त्तमानाभ्यामव्ययाभ्यां भावे ष्यञ्, अव्ययानां भमात्रे टिलोपः । 'ताच्छील्यादन्यदिति' । एतेन सुप्यजातावित्यनेनागतार्थत्वं दर्शयति फलानपेक्षा प्रवृत्तिस्ताच्छील्यं, गान्धारादयस्तु वातादिसाम्यार्थं देशाचारवशेन कषायादिपाने प्रवर्त्तन्ते उदाहरणेष्वातो युक् चिण्कृतोरिति युक् प्रातिपदिकान्तनुम्विभक्तिषु चेति णत्वम् ॥

"मनः" ॥ 'मन्यतेर्ग्रहणमिति' । मन ज्ञानइत्यस्य दैवादिकस्य मनुतेरिति मनु अवबोधनइत्यस्य तानादिकस्य तिपि गुणेन भवितव्यं यदि नेष्यते संज्ञापूर्वको विधिरनित्यः किं पुनः कारणं प्रयत्नेन मनोतेर्ग्रहणं निवार्यते यावता इह द्वयोरपि णिनिस्तदेव रूपं न चार्थभेद इत्याह । 'उत्तरसूत्रइति' ॥

"आत्ममाने खश्च" ॥ 'चकाराणिणिनिश्चेति' । वासरूपविधिना सिद्धोपि णिनिरविच्छेदाय समुच्चीयते, तेन करणे यज इत्यत्र णिनेरेवानुवृत्तिर्भवति नानन्तरस्य खशः, आत्मशब्दोयम्परव्यावृत्तिं कुर्वाणो यस्तत्प्रतियोगिनमर्थमाचष्टे स स्वशब्दपर्यायो गृह्यते न चेतनद्रव्यवचनः, मननं मानः भावे घञ् आत्मनो मान आत्ममानः कर्मणि षष्ठ्या समासः, तत्र कस्येत्यपेक्षायां प्रत्ययार्थस्य सन्निहितस्य मन्तुरेवात्मन इति गम्यते तदाह । 'प्रत्ययार्थश्च कर्त्तेति' । दर्शनीयत्वादिना धर्म्मेणेति विशिष्टमिति शेषः, कर्त्तरि षष्ठ्यास्तु समासो न भवति सर्वस्या एव मतेर्मन्तृकर्तृकत्वाव्यभिचाराद्, एवं चेतनद्रव्यवचनेप्यात्मशब्दे कर्त्तरि षष्ठ्यामव्यभिचारादविशेषणं कर्मणि षष्ठ्या न तु चेतनान्तरे कर्मणि प्रत्ययप्रसङ्गस्तस्मात्स्वशब्दपर्याय एवात्मशब्दः । 'दर्शनीयंमन्य इति' । शरीरधर्ममपि दर्शनीय-

Digitized by Google

त्वादिकमात्मधर्ममेव मन्यन्ते संसारिणः शरीरशरीरिणोरन्यप्रयोगोलकयोरिवाभेदं मन्यमानाः। 'पण्डितंमन्य इति'। एकस्याप्यात्मनस्स्वरूपेण कर्तृत्वम्पण्डितत्वादिविशिष्टरूपेण कर्मत्वं च युज्यतएव यथोक्तमाचार्यैः, अस्मत्प्रयोगसम्भिन्ना ज्ञानस्यैव च कर्त्तरि भवन्ती तत्र संवित्तिर्युज्येताप्यात्मकर्तृकेति, खशः खकारो मुमर्थः, दर्शनीयंमन्या कुमारीत्यादौ ह्रस्वार्थश्च, शकारस्सार्वधातुकसंज्ञार्थः दिवादित्वाच्छ्यन् स्वरस्तु सति शिष्टोपि विकरणस्वरस्सार्वधातुकस्वरञ्च बाधतइति खश एव भवति न नित्स्वरः। 'दर्शनीयमानी देवदत्तो यज्ञदत्तस्येति'। कर्मणि षष्ठी तदपेक्षयास्यापि दर्शनीयशब्दस्य गमकत्वात्समासः॥

"भूते"॥ यस्य सत्ता व्यपवृक्ता तत्सर्वं भूतशब्देनोच्यते तत्र न ज्ञायते कस्मिन् भूतइति किं साधने भूते किं वा धात्वर्थे तत्राह। 'धात्वधिकाराच्चेति'। चशब्दः पूर्वोक्तेनार्थेनास्य सङ्गतिन्द्योतयति। 'धात्वर्थभूत इति'। ननु धात्वधिकाराद्धातौ भूतइति युक्तं न तु धात्वर्थे भूतइति, उच्यते, प्रयोगे प्रत्ययस्य द्योत्यं भूतत्वमर्थस्यैव विशेषणं भवितुमर्हति विशेषणान्तरवत् न तु शब्दस्य तस्य स्वाभिधेयप्रतिपादने व्यग्रत्वाद्विशेषणसम्बन्धम्प्रत्ययोग्यत्वात्, किं च नित्यो धातुरनित्यत्वेपि भूतात्प्रत्ययविधिरनुपपन्नः, उच्चारितलक्षणे भूतत्वे विशेषणं व्यर्थन्तह्यनुच्चारितात्प्रत्ययविधिः सम्भवति नित्यश्चायं भूतशब्दोतिक्रान्तवाचीति निष्ठायामितरेतराश्रयत्वादप्रसिद्धिरित्यचोद्यम्॥

"करणे यजः"॥ 'णिनिरनुवर्त्तते न खशिति'। अत्रोक्तो हेतुः। 'अग्निष्टोमयाजीति'। ननु चाग्निष्टोमशब्दः कर्मनामधेयं तत्कथमग्निष्टोमस्य यजिं प्रति करणत्वं नहि तदेव तत्र करणं भवति, इदन्तु युक्तमुदाहरणं सोमेनेष्टवान् सोमयाजी सान्नाय्येनेष्टवान् सान्नाय्ययाजीति तत्राह। 'अग्निष्टोमः फलभावनायां करणं भवतीति'। सत्यं याग एवाग्निष्टोमो यागोपि फलभावनायां करणं फलस्य स्वर्गादेर्भवतो या भावना उत्पादना तस्यामित्यर्थः, ननु दीक्षणीयादिरुदवसानीयान्तो ज्योतिष्टोमाख्यो याग एव स्वर्गभावना न तदरिक्तः कश्चिद्व्यापारो

यजनस्यास्ति यत्र यागः कारणमश्नुते, उच्यते, द्विविधो यजमानव्यापारः सामान्यरूपो विशेषरूपश्चेति तत्र सामान्यरूपआभ्यन्तरश्चौदासीन्यप्रच्युतिरूपः कृतिप्रयत्नादिपदाभिलप्यः, बाह्यस्तु दीक्षणीयादिरुदवसानीयान्तः प्रसिद्ध एव, एवमोदनं पचतीत्यादिष्वप्यात्मगुणः प्रयत्नो बाह्यश्चाधिश्रयणादिर्द्रष्टव्यः, फलं हि प्रेप्सन् तदर्थं प्रयतते नोदास्ते यतोयमुपायं जिज्ञासते जानीते च ज्ञात्वा चोपायमनुतिष्ठति सैषा स्वर्गादिफलोद्देशेन प्रवृत्ता कृतिर्भावनेत्युच्यते सा च भाव्यं करणमितिकर्त्तव्यतां चेति त्रितयमपेक्षते इदमनेनेत्थं भावयेदिति। यथाह

भावनापेक्ष्यमाणा हि साधनं किं फलस्य मे।
साधनानुग्रहः को वेत्यनुस्यूतमपेक्षते॥

इति, सैषा सामान्यरूपा वृत्तिर्न शास्त्रकृटाक्षमपेक्षते विशेषरूपा त्वपेक्षते, तथाहि। फलार्थी तदुपायं जिज्ञासते, तदुपायं जिज्ञासमानः शृणोति ज्योतिष्टोमेन स्वर्गकामो यजेतेति तत्र च पुरुषप्रवर्त्तनारूपो विधिः श्रूयते न चापुरुषार्थे पुरुषः प्रवर्त्ततइति विद्धावरुद्धा भावना भाव्यापेक्षायां समानपदोपात्तमपि दुःखरूपं धात्वर्थमपहाय पदान्तरोपात्तमपि पुरुषोपसर्जनमपि सुखरूपं स्वर्गमेवावलम्बते ततः करणापेक्षायां समानपदोपात्तो धात्वर्थः करणं भवति पश्चात्सन्निधिसमाम्नातन्दीक्षणीयादीतिकर्त्तव्यतयान्वेतीत्येषा मीमांसकमर्यादा, यत्र तु न विद्धावरोधो भावनायास्तत्र धात्वर्थ एव भाव्यो भवति यथा पचति पाकं करोति गच्छति गमनं करोतीत्यादि निर्दिश्यते। ननु भावनया सम्पद्यमानस्य वाह्यव्यापारस्य कथन्तत्र करणत्वं को दोषः करणं खलु सर्वत्र कर्तृव्यापारगोचरः कुठारेण छिनत्तीत्यत्रापि उद्यमननिपातनरूपेण कर्तृव्यापारेणाप्यमानस्यैव कुठारस्य तत्र करणत्वं तदेव कथं द्विधाभवनरूपेण फलेनावच्छिन्नयोस्तयोश्छेदनरूपत्वं न स्वरूपत्वं न स्वरूपेण रजके दर्शनात् सोपि हि वस्त्रमुद्यच्छते निपातयति च, अथ च द्विधाभवनाभावान्न छिनत्तीत्युच्यते तदेवमुद्यमननिपातयोश्छेदरूपत्वं कुठारगोचरत्वनिबन्धनमिति तस्य तत्र करणत्वं तथेहापि भावनायां स्वर्गभावनारूपत्वमग्निष्टोमा-

ख्ययागगोचरत्वनिबन्धनमितितस्यतत्र करणत्वं तदिदमुक्तं फलभावनायां करणमिति, इयं हि फलं धात्वर्थं च सम्पादयति तत्र फलभावनारूपत्वे बाह्यो व्यापारः करणमित्यर्थः, नन्वेवमपि यज्यर्थं प्रति अग्निष्टोमः करणं न भवति, मा भूत्तत्र करणत्वं करणं तावत् सम्बन्धि च यजिना सामानाधिकरण्येन, अथ वा भावनापि धातोरेव वाच्या न प्रत्ययस्य तत्र धात्वर्थैकदेशएकदेशान्तरस्य करणम् अग्निष्टोमशब्दश्च तत्रैकदेशान्तरे वर्त्तत इति न किं चिदनुपपन्नम् ॥

"कर्मणि हनः" ॥ 'कुत्सितग्रहणमिति'। पितृव्यवधादिना यः कर्त्ता कुत्स्यते तत्रायम्प्रत्यय इति वक्तव्यमित्यर्थः ॥

"ब्रह्मभ्रूणवृत्रेषु क्विप्" ॥ 'चतुर्विधश्चात्रेति'। धातूपपदकालप्रत्ययविषयः, भाष्ये तूपपदविषयनियमद्वयं प्रदर्शितं तदुपलक्षणं न तु नियमान्तरव्यावृत्त्यर्थमिति गम्यते, ब्रह्मादिष्वेव हन्तेरिति धातुनियमः, अत्रापि नियमे भूतइत्याश्रयणात् कालान्तरे उपपदान्तरेपि भवत्येव पुरुषं हन्ति हनिष्यति वा पुरुषहेति, ब्रह्मादिषु हन्तेरेवेत्युपपदनियमः, अत्रापि भूतइत्याश्रयणात्कालान्तरे धात्वन्तरादपि भवत्येव वृत्रं जयति जेष्यति वा वृत्रजिदिति, भूतकाले क्विबेवेति कालनियमः। 'नान्यः प्रत्यय इति'। यथा कर्मणि हनः कर्मण्यणित्युपपदान्तरे तु भूतेपि प्रत्यान्तरं भवत्येव पितृव्यं हतवान्पितृव्यघातीति सोपपदश्च प्रत्ययो नियमेन व्यावर्त्त्यते निष्ठा तु भवत्येव वृत्रं हतवानिति, तथा भूत एवेति प्रत्ययनियमः, अत्रापि ब्रह्मादिषु हन्तेरित्याश्रयणादुपपदान्तरे धात्वन्तराच्च कालान्तरेपि भवत्येव, कथं पुनरेकस्मिन्नेव योगे चतुर्विधो नियमो लभ्यतइत्याह। 'तदेतदिति'। अगृह्यमाणविशेषत्वादेव चतुर्विधो नियमो लब्धुं शक्यते तत्रैव तूपेद्बलकमेतदुक्तं वेदितव्यम् ॥

"सुकर्मपापमन्त्रपुण्येषु कृञः" ॥ 'स्वादिष्विति'। सुशब्दं वर्जयित्वेत्यनन्तरमेवाभिधानादतद्गुणसंविज्ञानो बहुव्रीहिः, बाहुल्याश्रयणेनैवमुक्तम् आढ्यो ग्राम इतिवत्। 'त्रिविधश्चेति'। एतद्बहुलग्रहणानुवृत्तेरेव लभ्यते। 'कालोपपदप्रत्ययविषय इति'। तत्र कालनियमात्कर्म

छृतवान्कर्मकार इत्यण् न भवति, उपपदनियमात् मन्त्रमधीतवान्मन्त्राध्याय इत्यणेव भवति न तु क्विप्, प्रत्ययनियमात् मन्त्रं करोति करिष्यति वेति विवक्षायामणेव भवति न तु क्विप्। 'शास्त्रकृदिति'। क्विप् चेति क्विप्॥

"सोमे सुञः"॥ 'कालधातूपपदप्रत्ययविषय इति'। तत्र भूतकालस्य क्विपि नियतत्वात्सोमं सुतवान्सोमसाव इत्यण् न भवति, तथा धातोः सोमएवोपपदे नियतत्वात्सुरां सुतवान्सुरासाव इत्यणेव भवति, तथा सोमस्य सुनोतावेव धातौ नियतत्वात्सोमं क्रीतवान् सोमक्रीरिति क्विब् न भवति अणेव तु भवति, तथा क्विपो भूते नियतत्वात्सोमं सुनोति सोष्यति वेति विवक्षायां क्विब् न भवति अणेव तु भवति॥

"अग्नौ चेः"॥ 'अत्रापीत्यादि'। तत्र भूतकालस्य क्विपि नियतत्वादग्निं चितवानग्निचाय इत्यण् न भवति, धातोश्चाग्नावुपपदे नियतत्वादिष्टकाचिदिति न भवति, अग्नेश्चिनोतावेव नियतत्वादग्निभृदिति न भवति, क्विपश्च भूतएव नियतत्वादग्निं चिनोति चेष्यति वेत्यत्राभावः॥

"कर्मण्यग्न्याख्यायाम्"॥ कर्मणि हन इत्यतोऽनुवृत्तं कर्मग्रहणमुपपदम् इदं तु कर्मप्रत्ययार्थं इत्याह। 'कर्मण्येव कारकइति'। एवकारः पौनर्वचनिक उपपदन्तावत्कर्मप्रत्ययार्थोऽपि कर्मैवेति। 'आख्याग्रहणं, रूढिसंप्रत्ययार्थमिति'। अग्निशब्दो लोके ज्वलने रूढः, वेदे त्वग्न्यर्थेष्टकाचयेऽपि प्रचुरः प्रयोगो य एवं विद्वानग्निं चिनुते अग्निं चेष्यमाण इति स मुख्यो जघन्यो वा भवतु इह त्वसत्याख्याग्रहणे लोकप्रसिद्धिवशेन ज्वलन एव गृह्येत मा ग्राहि इष्टकाचय एव गृह्यतामित्याख्याग्रहणमित्यर्थः॥

"कर्मणीनिर्विक्रियः"॥ 'कर्मणीति वर्त्तमानइति'। कर्मणि हन इत्यतः कर्त्तुः कुत्सानिमित्ते कर्मणीति यत्कर्म क्रियासम्बद्धं कर्त्तुः कुत्सामावहति तत्रेत्यर्थः, सोमादीनां विक्रयः शास्त्रे निषिद्धः॥

"दृशेः क्वनिप्"॥ 'प्रत्ययान्तरनिवृत्त्यर्थमिति'। प्रत्ययान्तरं सह निर्दिष्टं मनिनादि, अणादि च सोपपदाद्विष्ठा तु भवत्येव परलोकं दृष्टवानिति।

"राजनि युधिकृञः" ॥ 'ननु च युधिरकर्मक इति'। तत्कथं राजन्शब्दे कर्मवाचिन्युपपदइत्युक्तमिति भावः । 'अन्तर्भावितण्यर्थ इति'। अनेकार्थत्वाद्धातूनां लक्षणया वा यदा ण्यर्थमपि युधिरेवान्तर्भावयति तदा प्रयोज्येन कर्मणा सकर्मको भवतीत्यर्थः ॥

"सहे च" ॥ 'असत्त्ववचनत्वान्नोपपदं कर्मणा विशेष्यतइति'। अतश्च कर्मणीति नानुवर्त्ततइति भावः । न पुनरनुवर्त्तमानस्यैवात्रासम्बन्धः, उत्तरत्राप्यनुपयोगात् ॥

"सप्तम्यां जनेर्डः" ॥ 'मन्दुरज इति'। वाजिशाला तु मन्दुरा ङ्यापोस्संज्ञाछन्दसोर्बहुलमिति ह्रस्वः ॥

"पञ्चम्यामजातौ" ॥ बुद्ध्यादय आत्मगुणाः खेदो रागः खेदात् स्त्रीषु प्रवृत्तिरिति दर्शनात् ॥

"उपसर्गे च संज्ञायाम्" ॥ 'प्रजेति'। प्राणिजातस्यैषा संज्ञा ॥

"अनौ कर्मणि" ॥ 'पुमांसमनुजात इति'। पुमांसमनुरुध्य जात इत्यर्थस्तेनास्य सकर्मकत्वम् । पुमनुज इति पुंसस्संयोगान्तलोपः ॥

"अन्येष्वपि दृश्यते" ॥ 'द्विजात इति'।

मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनम् ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥

"निष्ठा" ॥ 'क्तक्तवतू निष्ठेत्युक्तमिति'। ककारः कित्कार्यार्थ उकार उगित्कार्यार्थो ऽत्वसन्तस्येति विशेषणार्थश्च। 'निष्ठायामित्यादि'। अप्रसिद्धिरनिष्पत्तिः कस्य संज्ञायाः संज्ञिनो वा कथमित्याह । 'संज्ञयेति'। यदि द्विः क्तक्तवतूपग्रहणं क्रियेत इह च संज्ञाविधौ ततो न स्यादितरेतराश्रयत्वमिति संज्ञयेत्युक्तम् । 'सतोश्च तयोरिति'। लोके शास्त्रे वा न तावल्लोके सानुबन्धावेतौ स्तः शास्त्रेपि यद्यपि ञीतः क्तः नपुंसके भावे क्त इति क्तः स्वरूपेण विहितोस्ति भूते तु काले नास्ति क्तवतुस्तु न क्वाप्यस्तीति भावः । 'भाविनी संज्ञेति'। संज्ञिनो भावित्वात् संज्ञापि भाविनी सूत्रशाटकवत्,तद्यथास्य सूत्रस्य शाटकं वयेति तन्तुवाय उक्तः स

प्रकृतितो यूपैकादशिन्या एकयूपस्य च पक्षतः प्राप्तौ यद्येकयूपो नियम्यते तर्हि पाशुकजाघनीवाक्यन्यायेनैवेतरनिवृत्तिसिद्धेरैकादशिनप्रतिषेधो व्यर्थः स्यात् । अतः पशुनियोजनात्तिप्तकाष्ठसंमानस्यैकयूपमित्यनुवादः, अनुवादे च गौणी न दोषः । प्रतिषेधश्च यूपसामान्यस्यैव । अप्राकृतो वा यूपो विधीयत इति न यूपशरीरघटकातिरिक्ता धर्मा भवन्तीति प्राप्ते यदग्नावित्यंशेन निषेधस्येव यत्र मिनुयादित्यंशेन विधेरपि प्रतीतेर्भावाभावयोश्चैकस्मिन्प्रयोगेऽसम्भवात्तदुभयसमाधित्सयेव प्रवर्त्तमानो विधिस्तानेव यूपानुद्दिश्य संख्यामात्रं विकृतं विदधाति । एकां सामिधेनीमन्वाहेतिवत् । अत एव नैनमिति वाक्यद्वये नोभयसमाधिर्युज्यते ॥

सू० तेषाम् ॥ १९ ॥

ते चैकादश यूपाः औपवसथ्येऽहन्येव संमीयेरन् प्रकृतिवदिति प्राप्तेऽङ्गानां प्रधानकालत्वात्सद्यः सुत्यायामेव तेषां समानम् । प्रकृतौ पशुत्रयस्य तन्त्रभूतो यूपोऽग्नीषोमीयपश्वर्थत्वेन पूर्वद्युः संमितोऽप्यर्थवशेनान्ये यूपाः परेद्युरेव संमातव्याः । औपभृताष्टगृहीतस्य प्रकृतावेकपात्रत्वेऽपि पशावर्थवशेनैव पात्रविभागदर्शनात् । अत एवाग्निष्ठमेतदहरुच्छ्रयेयुरग्निष्ठे हि तदहरालप्स्यमानो भवतीत्यादिना मध्यस्ययूपस्यैवोच्छ्रयणो दैत्तपश्वालम्भं हेतूकृत्य तेन सहान्येषां दशानां कृतेऽप्युच्छ्रयणे तत्तत्संस्काराणां परेद्यवि प्रधानकाल एव करिष्यमाणतया तनुच्छ्रितानग्ना इव मुषित इवोत्तिष्ठेयुरिति निन्दाऽऽम्नानं सङ्गच्छते ॥

सू० सद्यः संमानम् ॥ २० ॥

सेयमेकादशिनी येषां पूर्वद्युरेव संमातव्यत्वेनाम्नाता तेषामहर्गणेऽन्यकालत्वात्तन्त्रणोपकारकत्वेऽपि सुत्याकालिकसंमानस्य प्रधानभेदात्प्रतीष्ट्याहवनीयसंमार्जनवदावृत्तिः स्यादिति प्राप्ते प्रकृतौ सर्वपशुसाधारणस्य छेदनादेरन्यकालत्वेन संमानस्यापि छेदनकाल एव प्राप्तौ वचनात्पशुकाले तावन्मात्रस्योत्कर्षेऽपि न तन्त्रता छेदनादेरिव विरुध्यते । विकृतावपि तथैवोत्कृष्टं संमानं तन्त्रमेव ॥

सू० एतेन सवनीय ॥ २१ ॥

अग्नीषोमीयरशनाया अन्यकालत्वादहर्गणे तन्त्रेणोपकारकत्वेऽपि सवनीयकालात् तु कर्मकालत्वात् प्रत्यहमावर्तेत यूपस्य सकृत् पशुकाले निखातस्य पुनर्निखननासम्भवेऽपि रशनाभिः प्रतिदिनमेकैकया परिव्याणसम्भवादिति प्राप्ते यूपाङ्गस्य परिव्याणस्यापि पूर्वाधिकरणन्यायेन छेदनकालिकस्य पशुकाल उत्कर्षेऽपि तन्त्रताऽनपायाच्च रशनाभेदे प्रमाणमस्ति । तेनाग्निष्ठरशने पत्नयूपरशनाश्च तन्त्रेणैवोपकुर्वन्ति ॥

सू० अग्रेण ॥ २२ ॥

अर्द्धमन्तर्वेद्यर्द्धं वहिर्वेदीति लक्षितस्य देशस्याग्निष्ठेन यूपेनाक्रान्तत्वादन्ये दश यूपा अनियमेन यत्र क्वापि निखेयाः । पुरस्तान्मिनोतीति वचनाद्वाऽग्निष्ठात्प्राग्देशे प्राक्संस्थक्रमेण संमातव्या इति प्राप्ते उदग्दक्षिणाविस्तृताया वेदेः प्रान्तेऽपि लक्षितदेशस्यानपायात्तिरश्चीर्मिनोतीत्याहत्य विधानाद्वाग्निष्ठोदग्दक्षिणपार्श्वयोरेव मातव्याः सर्वेषामपि वेदिप्राग्भागवर्त्तित्वात्पुरस्तान्मिनोतीत्यप्यविरुद्धम् ॥

सू० तेषामन्तराले ॥ २३ ॥

यूपानामन्तरालभागदशके समपरिमाणतायाः समं स्यादिति न्यायेन लाभेऽपि परिमाणविशेषे प्रमाणाभावादनियमे प्राप्ते रथाक्षेण विमिमीत इत्यस्यान्तरालपरतयैव सार्थक्याद्रथाक्षमात्राणि यूपान्तरालानि कार्याणीति ।

सू० तथा वेदिसंमिताम् ॥ २४ ॥

तुल्यन्यायेन वेदिसंमितां विमिनोतीति वचनान्तरस्याप्यन्तरालपरत्वावश्यम्भावादुभयोः परिमाणयोर्विकल्प इति प्राप्ते यूपोपराणां यावन्तस्तिर्यग्देशास्तावद्भागैर्वेदिरभिवर्धनीयेत्यभिप्रायेण वचनान्तरस्योपपत्तेर्विरोधाभावादविकल्पः ॥

Digitized by Google

सू० यथापूर्वम् ॥ २५ ॥

यूपेषूदगपवर्गत्वविधानादुद्देशाग्नेयकोणमारभ्यैशानान्ता यूपा अग्निष्ठेतरे दश संमातव्याः। यद्वा अग्निष्ठाधारदेशस्य मुख्यस्येतरेष्वसंभवेऽपि तत्समीपवर्त्तिदेशपरित्यागे मानाभावात्तदासन्नदेशस्य प्रधानपशुक्रमेणोपस्थितस्याविरोधाय द्वितीयं यूपमग्निष्ठाद्दक्षिणतो मीत्वा तृतीयमग्निष्ठादुत्तरतो मिनुयात्। एवं चतुर्थपञ्चमादियुगलानि दक्षिणोत्तरयोर्मातव्यानि। उदगपवर्गा यूपा भवन्तीति वचनस्यैवमप्युपपत्तेः। एतेन यदाग्नेयश्च वार्हस्पत्यश्च सौम्यमभितो भवत इति लिङ्गमप्युपपद्यते इति प्राप्ते दक्षिणापवर्गाः पशवो भवन्तीत्याहत्य विधानेनैशानाद्याग्नेयान्तक्रमेण पशुनियोजने सिद्धे तदङ्गेषु यूपेष्वपि प्रधानसन्निकर्षलाभेन तथैव सम्माने प्रसक्ते प्रवर्त्तमान उदगपवर्गत्वविधिः सम्भवत्सन्निकर्षाविरोधेनैव नेतव्यः। तथा च पशुक्रमेणैव नव यूपा नीत्वा दशमस्य स्थानमतिक्रम्य वेद्यग्निकोणे दशमं मीत्वा तदुदग्भागे एकादशं मिनुयात्। एवं सति द्वयोरेवोत्तमोपोत्तमयोः क्रमोपरोधः स्यादिति भाष्यकारः। यद्यपि यूपसम्मा[1]नोत्तरमेव पशुनियोजनप्रवृत्तेरुदगपवर्गतामाग्नेयादीशानान्तक्रमेणैव यूपेषु कृत्वा पशून् यूपक्रमेणैव नव नियुज्य दशमैकादशयोर्व्यत्यासेन नियोजनमपि सम्भवति तथाऽपि दशमोऽग्निष्ठादित्यादिलिङ्गदर्शनानुगुण्यात्तथोक्तम्। तदिदं लिङ्गदर्शनं न्यायोपोद्बलितमेतद्विरुद्धवचनाद्बलीयः सत्प्रकृतौ निविशते, इतरत्तु विकृत्यर्थम्,। आचार्यैस्तु वाचनिकत्वाविशेषाद्विकल्प एव प्रकृतौ स्वीकृतः ॥

सू० उपरसंमिताम् ॥ २६ ॥

उपरसंमितां मिनुयात्पितृलोककामस्य मध्येन समितां रशनसंमितां च मनुष्यलोककामस्य चषालसंमितामिन्द्रियकामस्येत्यादिभिर्वचनैः कामनाभेदेनैकादशानामुपरादीनां विधीयमानं साम्यं परस्परप्रायपाठादेकविधमेव स्यादिति प्राप्ते वचनसार्थक्याय प्रायपाठमनादृत्याऽप्यन्योन्यविलक्षणमेव स्वीकार्यं यूपपरिमाणतुर्यांशेन दैर्घ्यमुपरस्य विहितमस्ति।

१ यूपसमानोत्तरमेवेति पा०।

यूपस्य त्वेकादित्रयस्त्रिंशदरत्नयो विकल्पिताः। तेन तद्भेदेनोपराणां परिमाणवैषम्ये प्राप्ते दैर्घ्येण साम्यं फलाय विधीयते न तिर्यक्त्वेन। अवटान्तर्निखेयो यूपाधोभाग उपरम्। तस्य ह्यतृणमुपरं भवतीति तत्तृणनिषेधेन तदसम्भवात्। मध्यभागस्य त्रिव्यायामरशनावेष्टनपरिमितत्वेन दैर्घ्यतएव कॢप्यस्य सत्त्वादेव तस्य रशनया पृथुत्वेनैव साम्यविधिः। एवं चषालेऽपि॥

सू० व्यत्यस्तपशु॥ २७॥

आग्नेयसारस्वतसौम्यपौष्णवार्हस्पत्यवैश्वदेवेन्द्रमारुतैन्द्राग्नसावित्रवारुणानेकादश पशून्विधाय यामिमां प्रजा आपद्य चरन्ति सा वा एषैकादशिनीत्युक्त्वा ततो व्यत्यस्तपशूनुक्रम्याग्नेयमग्निष्ठेऽभित ऐन्द्रमैन्द्राग्नं सारस्वतं सावित्रं सौम्यं वैश्वदेवं पौष्णं मारुतं वार्हस्पत्यं वारुणं च विधाय श्रुतं तामेतां कापेया विदुस्तामेतामतिरात्रचरम आलभेतेति। अत्रातिरात्रचरमशब्दोऽहीनपरः। तस्यान्यतरतोऽतिरात्रत्वात्। न तूभयतोऽतिरात्रसत्रपरः। द्विविधामेकादशिनीं प्रकृत्य तामेतामित्याम्नानादुभयोरप्यहीन उत्कर्ष इति प्राप्ते यामिमामित्यनेन प्रकृतिगामितया बहुकर्तृकत्वेन पूर्वस्या निर्देशादुत्तरस्याश्च कापेयपदेन कतिपयसंमतत्वकथनेन तामेतामित्यनेनापि संनिहिताया एव परामर्शात्कापेय्या एवाहीनेषूत्कर्षः। यत्तु कल्पसूत्रमाग्नेयमभित ऐन्द्राविति तदैन्द्राग्नोभयस्य नामैकदेशमेलनेन निर्देशकमित्यविरुद्धम्॥

इति श्रीसंकर्षे भाट्टदीपिकायां त्रयोदशाध्यायस्य चतुर्थः पादः॥ ४॥
अयं च यूपपाद इत्युच्यते। त्रयोदशाध्यायश्च समाप्तः॥

अथ चतुर्दशाध्यायस्य प्रथमः पादः।

सू० इष्टकाभिः॥ १॥

अग्निचयनसाधनीभूता इष्टकाधातुमय्यो मृन्मय्यो वाऽनियमेनोपादेयाः। इष्टका-शब्दस्य घटादिपदवज्जातिवचनत्वे वा वेदिपदवदा-

कृतिवचनत्वे बोभयत्रापि प्रयोगदर्शनात् । प्रवृत्तिनिमित्तस्य धातुमयी-
ष्वप्यविशिष्टत्वादिति प्राप्ते यन्मृच्च पश्चाग्नेरनाग्नमथ कस्मान्मृदा चाद्भि-
श्चाग्निश्चीयत इति वाक्यशेषान्निर्मन्थ्येनेष्टकाः पचन्तीति विहितपाक-
स्यादृष्टार्थत्वापत्तेश्च मृन्मय्य एव । यत्तु मूले इष्टका–शब्दस्य जातिव-
चनत्वं निरस्याकृतिवचनत्वं तदर्थसंशयान्तरं प्रदर्श्य साधितं तत्रातीवो-
पयुक्तमयुक्तं चेत्युपेक्षितम् ॥

सू० अग्निमत्यः ॥ २ ॥

इष्टकात्वाविशेषात् प्रयोगप्राशुभावायानियतसंस्थानवत्त्वे तासां
प्राप्ते इष्टकानां चितिनिर्वृत्तिरूपकार्यप्रयुक्तत्वेन स्वरूपार्थत्वाभावादग्नि-
मन्तरेण तदयोगात्साग्निका एव भवेयुः । चतुरस्रा भवतीति त्वाचि-
प्ताश्युद्देशेन गुणमात्रविधिः ॥

सू० समचतुरस्राः ॥ ३ ॥

चतुष्ट्वसङ्ख्याविधेरविरोधाद्दीर्घचतुरस्रसमचतुरस्रयोर्विकल्पे प्राप्ते
दीर्घादिपदान्तरसमभिव्याहाराभावे समचतुरस्रस्यैव बोधादग्निपरिमाण-
चतुष्कस्य समं स्यादिति न्यायेन साम्यमेव ॥

सू० अमृन्मयीनाम् ॥ ४ ॥

पशुशीर्षाद्युपधाने यदन्तरालमुत्पद्यते तत्पूरणार्थमपि कतिपया
इष्टका निर्मातव्याः । इष्टकाभिरिति तृतीयाश्रुत्या चयनं प्रति निरपे-
क्षकारणत्वावगमात् । तासां परस्परसम्बन्धमन्तरेण नैरपेक्ष्यायोगादिति
प्राप्ते निरन्तरालेष्टकासम्बन्धस्यासम्भवात्सिकतापूरणविधिबलाच्चावर्ज-
नीयकिञ्चिदन्तरालस्यैव वाचनिकामृन्मयवस्तुकृतान्तरालस्यापि सोढ-
व्यतया मृत्पाषाणकाष्ठाद्यन्तरालसद्भावेऽपि चितः प्रासाद ति इति
प्रयोगदर्शनाच्च पशुशीर्षादिस्थले इष्टका निधेयाः ।

सू० वर्णपृथक्त्वम् ॥ ५ ॥

Digitized by Google

सर्वान्वर्णानिष्टकानां कुर्यादिति श्रुतौ वर्ण-शब्दः श्वेतादिरूपपर एव । अन्यसमवेतरूपाणामन्यत्र कर्त्तुमशक्यत्वादेव तादृशवर्णसमवायिसुधागैरिकादिद्रव्यलेप आक्षेपलभ्यः, न तु वर्णशब्द एव तत्परः शब्दसंयोगादिति सूत्रस्वरसात् । रेखासामान्ये वर्ण-शब्दस्य शक्तिनिरूढ्योरभावात् । वर्णं तु चाक्षर इति कोशेन नपुंसकत्वापत्तेश्चेति प्राप्ते, ऋजुरेखाः पश्चाच्च पुरस्ताच्च आलिखिता मध्य इत्यन्तेन नानारेखावतीनामिष्टकानां देशविशेषविधानोत्तरं सर्वान्वर्णानित्यस्य पाठेन सर्ववर्णशब्दस्य पूर्वप्रक्रान्तरविविधरेखापरत्वावसायात्सति तात्पर्यग्रहे तदनुपपत्त्या लक्षणाया अपि न्याय्यतया यावद्विशेषाणां विनियोगविधिभिरेव सर्वरेखाक्षेपे सति तदनुवादके वाक्ये तस्या अदोषत्वाच्चोक्तकोशे च-कारेण पुँल्लिङ्गपदस्याप्यनुकर्षाद्रेखापर एव ॥

सू० तासां पाके ॥ ६ ॥

आमपक्वसाधारण्येनेष्टकापदप्रयोगात् पक्वेष्टकचितः प्रासाद इत्यादि प्रयोगेषु पदान्तरसमभिव्याहारेणैव पक्वताप्रतीतेरनियमे नैर्ऋतीः कृष्णास्तुषपक्वा भवन्तीति कतिपयासु पाकविधानादितरा आमा एवेति वा प्राप्ते न कृष्णां न लक्ष्मणामुपदध्यादिति निषेधबलादेवोचीते सर्वासां पाके कतिपयानां पाके तुषाणां साधनत्वमात्रनियमविधिपरत्वे लाघवादग्निनेष्टकाः पचन्तीति शाखान्तरे श्रवणाच्च पक्वा एव ॥

सू० स वैहारिकः ॥ ७ ॥

तासां वैदिकेनाग्निनैव पाकः कर्त्तव्यः । प्रकरणान्तर्विहितेषु हविःश्रपणादिषु तस्यैव कर्माङ्गत्वेन करणत्वादिति प्राप्ते आहवनीये गार्हपत्ये वा हवींषि श्रपयतीत्याहत्य विधानेन वैहारिकस्य पाककरणत्वेऽपि प्रकृतेऽग्निनेति पदस्य लौकिकपरत्वमेव वाच्यम् अन्यथा तदुपादनवैयर्थ्यापत्तेः । विहाराद्बहिर्नयनस्य वचनमन्तरेण कृतौ लौकिकत्वावश्यम्भावाच्च तृणारणिमणिजन्यानामनियमेन प्राप्तौ शाखान्तरे निर्मन्थ्येनेष्टकाः पचन्तीति नियमार्थो विधिः ॥

Digitized by Google

सू० मृन्मयीनाम् ॥ ८ ॥

इष्टकासंस्काराणामिष्टकाकार्यार्थत्वेऽपि द्वारांशे नियमविधेराव-श्यकतया चमसाधिकरणन्यायेनेष्टकात्वस्याविवक्षाभावाद्दूर्वाघृतादिष्वा-कृतेरभावेनेष्टकात्वजातेरभावाच्च तेष्विष्टकाधर्मा इति प्राप्ते दूर्वेष्टका उपदधाति घृतेष्टका उपदधातीत्यादाविष्टका-शब्दप्रयोगस्य तद्धर्मप्राप्ति-कफलकत्वात् सहस्रेष्टकमग्निं चिनुत इति विहितसंख्याघटकत्वाच्च भवे-युरमृन्मयीष्वपीष्टकाधर्माः ॥

सू० सिकतातासु ॥ ९ ॥

सिकतानामपि स्थलनिर्वर्त्तकत्वाविशेषादिष्टका-शब्दप्रयोगाच्च संख्यान्तर्गत्यवश्यम्भावेन तया देवतयेति मन्त्रेणैवोपधानं भवेदिति प्राप्ते तासामपरिमिताभिः सिकताभिः पूरयतीत्यपरिमितविशेषणेन सहस्र-संख्यावहिर्भावाच्चतुर्धाकरणे दक्षिणाशब्दस्येव तास्विष्टकाशब्दप्रयोगस्य स्तुत्यर्थत्वान्न मन्त्रः ॥

सू० चरुसर्वौषधम् ॥ १० ॥

रौद्रं गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां निदध्यात्स-र्वौषधं वपतीति विहितयोश्चरुसर्वौषधयोरपि स्थलनिर्वर्तकत्वाविशेषा-दिष्टकाधर्माः कर्तव्या इति प्राप्तेऽनारब्ध एव स्थण्डिले सर्वौषधवपनस्य समाप्ते च चरुनिधानस्य क्रियमाणतया तत्कार्यापत्त्यभावान्न तद्धर्माः ॥

सू० नैर्ऋतेष्टके ॥ ११ ॥

नैर्ऋती रुक्मा उपदधातीति विहितोपधानार्थत्वेनेष्टकाधर्माणां नैर्ऋतेष्वपि प्रवृत्तिरिति प्राप्ते नैर्ऋतेष्टकासन्धावुख्याधारशिक्यप्रक्षेपवि-धानेन तत्प्रतिपत्तिमात्रार्थत्वेन स्थण्डिलनिर्वर्तकत्वाभावेनोपदधातेर्गौण-त्वेन न मुख्यधर्माणां तत्र प्रसक्तिः ॥

सू० सहस्रम् ॥ १२ ॥

Digitized by Google

सहस्रं चिन्वीत प्रथमं चिन्वान इत्यादिवाक्येषु सहस्रादिशब्दाः सहस्रदक्षिणक्रतुपराः सहस्रेण इजान इत्यादौ क्रतुषु सहस्रपदप्रयोगदर्शनादिति प्राप्ते सहस्रपदस्य चिनोतिधातुविशेषणत्वावगमात्सहस्रदक्षिणक्रतौ प्राथमिकं चयनं कुर्यादिति व्याख्याने लक्षणापत्तेर्जानुदघ्नं चिन्वीतेत्यादाविव स्थण्डिलस्यैव सहस्रत्वम् ॥

सू० दक्षिणाभिः ॥ १३ ॥

स्थण्डिलेऽपि यत्सहस्रत्वं तदपि चयनदक्षिणाद्वारेणैव । साक्षात्संख्यान्वये जानुदघ्नत्वविरोधात् उत्तरवेदिपरिमितस्थले स्थण्डिलबहुत्वस्यासम्भवाच्चेति प्राप्ते सहस्रस्तम्भघटितेऽपि सहस्रमण्डपपदप्रयोगादवयवावयविनोरभेदादद्रुपिप्पलीपदयोः सामानाधिकरण्यदर्शनात्सहस्रेष्टकैरेव सहस्रत्वम् ॥

सू० सहस्रे ॥ १४ ॥

सहस्रस्य प्रमा असीति मन्त्रस्य प्रकरणाद् द्वित्रिसहस्रेष्टकचितिष्वपि प्राप्तमङ्गत्वं मन्त्रलिङ्गेन सहस्रेष्टक एव सङ्कोच्यत इति नान्यत्र तत्प्रयोग इति प्राप्ते सहस्रपदस्य स्तुत्यर्थत्वेन गुणवादेनाप्यनेकपरतयोपपत्तेर्लिङ्गप्रकरणयोरविरोधात्सर्वचित्यङ्गं मन्त्रः ॥

सू० सहस्रेष्टकम् ॥ १५ ॥

लोकं पृण छिद्रं पृणेति मन्त्रमेव सहस्रवारमावर्त्य सर्वा इष्टका उपधेयाः । तदितरेषां नानाविधमन्त्राणां बाहुल्यादिति प्राप्ते सर्वैरेव मन्त्रैरुपधेयाः । ये त्वधिका मन्त्रास्ते प्रयोगान्तरे उपयोक्ष्यन्ते चतुर्दशभिर्वपतीत्यादिवत् ॥

सू० इष्टकाविवृद्धौ ॥ १६ ॥

यस्यां चितौ ये मन्त्राः प्रक्रान्तास्तैरेव मन्त्रैरावृत्तैः सा सा चितिः पूरणीयेति प्राप्ते यदेवास्योनं यच्छिद्रं तदेतया पूरयतीति वचनेन लोकम्पृणाया ऋच एव न्यूनपूरणे विनियोगात्प्रक्रान्तानियतसंख्याकमन्त्रसमा-

प्तावशिष्टा इष्टकालोकम्पृणामध्यैवैत्रोपधेयाः पुनःपुनरावर्त्यमानत्वादे-वायातयाम्नीलोकम्पृणेति स्तुतिरुपपद्यते ॥

सू० चितिशब्दः ॥ १७ ॥

पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहतीत्यत्र कर्मणि क्तिचन्तेन चितिशब्देनैकैकः प्रस्तार उच्यते । प्रासादादौ स्थपतीनामेका चितिरद्य निर्वृत्तेति व्यवहारदर्शनात् । अत एव न चयनक्रियोच्यते ।

सू० तस्या एकत्वाच्च ॥ १८ ॥

अग्निं चिनुत इति विधेरभ्यासाद्यभावात् । प्रस्तारपञ्चकविधानादेव पुष्करपर्णरुक्मपुरुषस्वयमातृणानां क्वचन निवेशे प्रसक्ते तेषां पूर्वपूर्वोपर्युत्तरोत्तरविधानं वाचनिकं सङ्गच्छत इति तैः सह नव प्रस्तारा इति प्राप्ते चयनक्रियाया एकत्वेऽपि पुरीषव्यवधानकृतभेदेन तदवयवानां पञ्चधा विभागसम्भवात्कर्मैकदेशपरश्चिति-शब्दः । अत एव स्वयमातृणां च विकर्णीम् चोत्तमे उपदधातीत्युक्त्वा नान्यामिष्टकामुत्तरामुपदध्यादित्यादिना सर्वोपरीष्टकान्तरनिधाननिषेधवैयर्थ्यापत्तेः, पुष्करपर्णादिचतुष्टयस्य त्वनियमेन निवेशे प्रसक्ते नियमविशेषार्थो विधिर्न विरुध्यते ॥

सू० गणेषु ॥ १९ ॥

प्राचीरुपदधाति प्रतीचीरुपदधातीत्यादौ यत्रेष्टकागणानुवादेन प्राङ्मुखत्वादिकं विधीयते तत्र चतुरस्रेष्टकासु मुखाभावात्प्राङ्मुखकर्त्रुपधेयत्वेनैवेष्टकानां प्राङ्मुखत्वाद्युपचार इति प्राप्ते एकैकस्या इष्टकाया मुखाद्यसम्भवेऽपि बहूनामिष्टकानामुपधाने प्राक्संस्थत्वादेरनियमेन प्राप्तौ प्रागपवर्गा एवेत्यादिनियमार्था विधयः । अत एव प्रतीचोऽनूयाजान् यजतीत्यस्य वाक्यशेषे प्राञ्चमुत्तमं संस्थापयत्युत्तमेनेत एव नु सम्भिनत्तीत्यत्र प्रत्यगपवर्गत्वे प्राप्ते प्राक्संस्था आहुतीर्विधाय चरमयेतरयोरनुसम्भेदेनैव प्रत्यक्त्वमुपपद्यते ॥

सू० पश्चात्प्राचीम् ॥ २० ॥

Digitized by Google

पश्चात्प्राचीमुत्तमामुपदधाति तस्मात्पश्चात्प्राची पत्न्युन्वास्त इत्यत्राप्युक्तन्यायेन रीतिवादे प्राप्ते गणेषु तथा सम्भवेऽप्येकस्यां तदयोगाद्वाक्यशेषे कर्तृगतत्वेनैव विवरणाच्च कर्त्तुरेवायं मुखवादः पुरस्तात्प्रत्यञ्चमिति कर्त्तुर्मुखवादः । पुरस्तात्प्रत्यञ्चमिति तु कर्ममुखवादः ॥

सू० पुरस्तात् ॥ २१ ॥

पुरस्तादन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीरित्यत्रापि कर्त्तुर्मुखवादः । पश्चात्प्राचीरिति पदस्य प्रपूर्वाधिकरणे निर्णीतार्थकत्वात् सन्निधानाच्चेति प्राप्ते बहुत्वादिष्टकानामपवर्गनियमार्थावेव विधी तस्मात्प्राचीनानि प्रतीचीनानि च नक्षत्राण्यावर्त्तन्त इति नक्षत्रमण्डलेनेष्टकाविन्यासस्तुतिदर्शनात् ॥

सू० चित्यां चित्याम् ॥ २२ ॥

वृषभमुपदधातीति श्रुतौ वृषभ-शब्दः पशुपरः कूर्मादिवत्तस्याप्युपधेयत्वसम्भवादिति प्राप्ते चित्यां चित्यां तदुपधानश्रवणेन पञ्चसु चितिषु तदुपधाने जानुदघ्नत्वविरोधात्त्वामग्ने वृषभमिति मन्त्रोपधेयेष्टकापरोऽयं वृषभशब्दः ॥

सू० एतेन मन्त्रलिङ्गाः ॥ २३ ॥

प्राणभृत उपदधातीत्यत्रापि जानुदघ्नत्वाद्यविरोधेन तद्रजीवानामुपधानसम्भव इति प्राप्ते तद्वानासामुपधानो मन्त्र इति स्मृत्या प्राणभृत्पदघटितमन्त्रकरणत्वेनोपपत्तौ न प्राणिहिंसानिषेधसङ्कोचो युक्त इति ॥

सु० तद्द्रव्याणि ॥ २४ ॥

घृतेष्टका उपदधातीत्यादावपि घृतं मिमिक्षिर इत्यादिमन्त्रैरुपधानं मृन्मयीनामेव प्राणभृन्न्यायेन विधीयत इति प्राप्ते घृतद्रव्यस्यैवोपधानं घटे पूरणेन तत्सम्भवात् । पुष्करपर्णस्येव तल्लिङ्गमन्त्राणां क्रमप्रकरणयोरभावात् । वृषभादिवद्विरोधाभावाच्च ॥

Digitized by Google

सू० षिकर्णी ॥ २५ ॥

पुष्करमण्डलेष्टका उपदधातीत्यादिना श्रुतामण्डलादीष्टकानाम्नोऽन्वर्थकत्वाय परिमण्डलाद्याकारा भवेयुरिति प्राप्ते चयनरूपकार्यार्थताविरोधाच्चतुरश्राणामेवैतानि नामानि ।

सू० मध्यमायाम् ॥ २६ ॥

चयनाधारभूमेरुत्तरवेदिधर्माः कार्या इति प्राप्ते प्रकृतौ मध्यमोपसदि विहिताया उत्तरवेदेः स्थाने एव विकृतावग्नेर्विधानेन तत्कार्यापत्तया शरेष्विवाग्नावेवोत्तरवेदिधर्मा न तदधोभुवो भवन्ति ॥

सू० अनुपसदम् ॥ २७ ॥

मन्त्रब्राह्मणयोर्दीक्षोत्तरमेव चयनपाठादुपसद्भ्यः पूर्वमेवाग्निश्चेतव्य इति प्राप्ते यदहरग्निं चेष्यमाणस्तदहरुभयं समस्येदित्यग्न्युपसदोरेकाहक्रियमाणत्वरूपसमासविधानादुपसद्दिन एवाग्निश्चेतव्यः ॥

सू० इष्टकाकर्मणि ॥ २८ ॥

इष्टकानां निर्माणे विशिष्य कालविधेरभावाद्याथाकाम्ये प्राप्ते दीक्षोत्तरकाल एव नियम्यते । इष्टकासूख्यभस्म स्पृश्यते तेन सर्वा अग्नयो भवन्तीति वचनेनोख्याग्निभस्मनो मृदश्च संसर्गविधानात् । तस्य च दीक्षातः पूर्वमसम्भवात् ॥

सू० तन्मासप्रभृति ॥ २९ ॥

मासादिदीक्षाकल्पस्यैवेष्टकानिर्माणपर्याप्तकालत्वात्साग्निचित्यक्रतावेकादिदीक्षापक्षा न प्रवर्त्तेरन्निति प्राप्ते न प्राजापत्येनानिष्ट्वाग्निं चिन्वीतेति...

सू० त्रिःपरार्ध्यः ॥ ३० ॥

त्रिवारमेवाग्निश्चेतव्यो नाधिकवारं नानुदग्घं चिन्वीतेत्यादिवाक्यैस्त्रिवारमाह्रियमाणानामेव स्थण्डिलपरिमाणेष्टकासंख्यानां विधानादिति प्राप्ते याथाकाम्येन बहुवारं प्राप्तस्य तदाहारस्य परिसंख्यार्थत्वे गौरवापत्तेः प्रथमाद्याहारनिमित्तकगुणमात्रविधानपरत्वेनापि तेषां विधीनामुपपत्तेरुत्तरमुत्तरं ज्यायांसमित्यस्य नास्य दग्घं चित्वाकनीयांसं चिन्वीतेत्यस्य वृहत्तममपरिमितं स्वर्गकामश्चिन्वीतेत्यस्य चार्थवत्त्वाय सन्ति चतुर्थाद्याहाराः ॥

सू० तस्येष्टकाः ॥ ३१ ॥

चतुर्थादिष्वाहारेषु पुनः प्रथमत्वादिविवक्षयैकद्वित्रिसाहस्रा एवेष्टका भवेयुः । कनीयसो निषेधाद्वा त्रिसाहस्रस्यैवाभ्यासः संख्यान्तरस्यानाम्नानादिति प्राप्ते प्रकृतानां संख्यानां नैमित्तिकत्वान्निमित्तमन्तरेण तदप्रवृत्तेः संख्यान्तरमेवाश्रयणीयम् ॥

सू० यद्दृषीणाम् ॥ ३२ ॥

यदृषीणामाग्नेयं तेन सम्वत्सरमग्निं चिन्वीतेति विहिता अग्निदृष्टा मन्त्राः सन्निहितत्वाद्याज्ञसेनीमन्त्रा एव भवन्ति न दाशतयीस्थाः । तेषां प्रकरणपाठाभावेनानङ्गत्वात् । एतद्वा ऋषीणामाग्नेयं छन्दो यद्याज्ञसेनीरिति वाक्यशेषेण विवरणाच्चेति प्राप्ते दाशतय्या अग्निमीळे मधुच्छन्दा इत्यादिनैदम्पर्येण ऋषीणां स्मरणात्तेषामेव वाक्यशेषेण विवरणात्त एवानेयाः । किञ्च सूक्तेनोपदधात्यसूक्तस्यावच्छेदायेति सूक्तस्यैव करणत्वेन विधानात्सूक्तप्रसिद्धेश्च दाशतयीतोऽन्यत्राभावान्न याज्ञसेन्यः करणानि ॥

सू० याज्ञसेनीः ॥ ३३ ॥

याज्ञसैनीनामप्येतद्वा ऋषीणामिति वाक्येनाग्न्यृषिकत्वविधानेन स्मृतितः प्राबल्यात्सन्निहितत्वाच्च करणत्वम् । न च मन्त्राल्पत्वं दण्डकलितवदावृत्तिसम्भवात् । कर्मभूयस्त्वाधिकरणन्यायेन स्वस्थानविवृद्धेर्वा आवृत्त्यापि यदा कर्मणामपूर्तिस्तदा तावन्मान्त्रार्थे दाशतयीत

Digitized by Google

आगम इति प्राप्ते त्रिवृदग्निष्टुदित्यादाविव प्राकृतस्य सर्वस्यापि निवृत्तेरवश्यम्भावात्सर्वसंख्यापर्याप्ताग्नेयलाभे तदपर्याप्तग्रहणायोगादुक्तवाक्यशेषस्य स्तावकत्वेन प्राबल्याभावाच्च न दाशतयीस्थानां याज्ञसेनीभिः समुच्चयः । मूले तु पूर्वाधिकरणपूर्वपक्षावस्थायामयं कृत्वाचिन्तया विचार इत्युक्तम् । तत्कारणस्य वा विकार इत्येतत्सिद्धान्तसूत्रस्वारस्यविरोधादुपेक्षितम् ॥

सू० दाशतयीभ्यः ॥ ३४ ॥

यावन्ति नानामन्त्राभ्युपधानानि तावत्संख्यानामेव दाशतयीत आनयनं नाधिकानां गायत्रीषु स्तुवत इत्यादौ स्तोमपरिमितानामेवर्चामागमनस्य दृष्टत्वात् । आगमनस्य कार्यार्थत्वेन कार्यसमाप्तावधिकानां प्रयोजनाभावादिति प्राप्ते सर्वेषामप्याग्नेयानां यद्रूपीणामित्युद्देश्यकोटौ निवेशेन विनियोगात्सर्वेषामेवाङ्गत्वं, सर्वं तु वेदसंयोगात्कारणादेकदेशस्येति न्यायात् ॥

सू० प्रतिसूक्तम् ॥ ३५ ॥

सर्वेषां मन्त्राणामागमे सति तावत्य इष्टका अप्यभिवर्धनीयाः सामिधेनीविवृद्धौ काष्ठाभिवृद्धिदर्शनात् । इष्टकाल्पत्वेऽपि मन्त्रभूयस्त्वन्यायेनैकार्थत्वाद्विकल्पसम्भव इति प्राप्ते सूक्तेन सूक्तेनोपदधातीति वचनेन प्रतिमन्त्रमुपधानस्यैवाभावाद्यावत्सूक्तमेवेष्टकाः । सूक्तेभ्योऽपीष्टकानामाधिक्ये तु लोकम्पृणाभिरेवोपधानम् ॥

सू० यद्रूपीणाम् ॥ ३६ ॥

त्रिसाहस्रापेक्षया किञ्चित्संख्याधिक्येऽपि वेष्टकानामेकविधाद्येकशतविधत्वान्तान्यतमपरिमाणाधिक्ये वा ज्यायस्त्वसम्भवात्सूक्तानां कतिपयानामभ्युपस्थाने विनियोगः कार्य इति प्राप्ते यद्रूपीणामिति वाक्ये तेन चिन्वीतेति चयनसंयोगाच्चयनातिरिक्ते न तेषामुपयोगः ॥

सू० गायत्रचितम् ॥ ३७ ॥

Digitized by Google

आगम्यमानानामृचामविशेषेण विनियोगे प्राप्ते गायत्रचितं चिन्वीत ब्रह्मवर्चसकामस्य त्रिष्टुप्चितं वीर्यकामस्य जागतीचितं पशुकामस्येत्यादीनां कामसंयोगात्तत्तत्कामुकानामेव तत्तच्छन्दस्का ऋचो ऽकामानां तदितरच्छन्दस्का एवेति व्यवस्था ॥

सू० शीर्षवान् ॥ ३८ ॥

सशिरस्क एवाग्निश्चेतव्यः । वयसां वा एष प्रतिमया चीयत इति पक्षितुल्यताश्रुतेः । अग्नेः शीर्ष्णा अग्नेः शिर उपदधामीति मन्त्रवर्णात् । पक्षयोः स्तुवते त्रिवृता शिरसि स्तुवत इत्यादिविधिदर्शनाच्चेति प्राप्ते इष्टकाविशेष एवात्र शिरः-शब्देनोच्यते । पक्षिप्रतिमतायाः किञ्चित्सादृश्येनाप्युपपत्तेः स्वयमातृण्णाहोमे एतद्वा अग्नेः शिर इत्यादिवद्गुणवादेनापि मन्त्रगतशिरःशब्दोपपत्तेः शिरसि स्तुवत इति वैधेऽपिपदे वास्तविकशिरसोऽभावादेव लाक्षणिकता ॥

सू० सुपर्णः ॥ ३९ ॥

पक्षिसामान्यतुल्यताया विशेषे पर्यवसानमन्तरेणानुष्ठातुमशक्यत्वात् दिव्यं सुपर्णं वयसा बृहन्तमिति मन्त्रवर्णेन बृहत्सुपर्णपरतया वयसां प्रतिमयेत्यस्योपसंहारान्मन्त्रस्य च नित्यवदङ्गत्वात्सुपर्णाकृतिर्नित्येति प्राप्ते सामान्यवाक्यस्य विशेषमन्त्रस्य च विधित्वाभावेनोपसंहार्योपसंहारकभावाभावाद्धिरण्यपक्षः शकुनोभुरण्युरितिवदुभयमपि स्तुतिमात्रम् ॥

सू० श्येनचितिः ॥ ४० ॥

दिव्यं सुपर्णमिति मन्त्रस्य विधायकत्वाभावेऽपि वयसां वा इति वाक्ये लेटः श्रवणात्तस्य च श्येनचितं चिन्वीत स्वर्गकाम इति विधिनोपसंहारसम्भवात् स्वर्गकामोपबन्धात् श्येनाकृतिर्नित्यकाम्या ऐन्द्रवायवाग्रतावदिति प्राप्ते श्येनकङ्काद्याकृतिविशेषाणां सामान्यतोऽनुवादमात्रेणाप्युपपत्तौ लेट्त्वकल्पने मानाभावात्केवलकाम्यैव श्येनचितिः । नित्यैवेति तु याज्ञिकानां परिभाषामात्रम् ॥

Digitized by Google

सू० लोकम्पृणा ॥ ४१ ॥

लोकम्पृण—सूददोहपदघटिते द्वे ऋचौ पठ्येते। ताभ्यामावृत्ताभ्यां द्वे द्वे इष्टके उपधातव्ये प्रत्येकं करणत्वात् । अष्टौ नानायजुषस्त्रयोदश लोकम्पृणा उपदधाति ता एकविंशतिः संपद्यन्त इति सङ्ख्याविरोधाद्वा मन्त्रयोर्निरपेक्षकरणत्वेन विकल्पः । वस्तुतस्तु लोकम्पृणेष्टकामात्रमेलनेन सङ्ख्योक्तेरविरोधात्सूददोहेष्टकानां पार्थक्येऽपि न दोषः । परन्त्वनुष्टुभानुचरतीति विधावनु-शब्दस्वारस्येन ता अस्य सूददोहस इत्यनुष्टुभोऽप्राधान्यावगमाद् द्वाभ्यामपि मन्त्राभ्यामेकैकेष्टकोपधातव्येति प्राप्तेऽनुचरतीति पदेनैवोपधानोत्तरकालमन्त्रपाठवगतेरुभयोः समुच्चित्य करणत्वे समप्राधान्येनानुचरत्वभङ्गापत्तेश्च लोकम्पृणयोपधाय सूददोहयाभिमर्शनं कर्तव्यम् । याज्ञिकास्तूभयोरेकमन्त्रत्वमिच्छन्ति ॥

इति श्री सांकर्षे भाट्टदीपिकायां चतुर्दशाध्यायस्य प्रथमः पादः ॥ १ ॥
अयमिष्टकापादः ।

अथ चतुर्दशाध्याये द्वितीयः पादः ।

सू० हृदयशूलम् ॥ १ ॥

तं नाग्नीषोमीये करोति न सवनीयेऽनुबन्ध्यायां तु करोतीति हृदयशूलं प्रकृत्य श्रूयते । तत्राग्नीषोमीये पूर्वं विधाय पुनः प्रतिषेधाद्धृदयःश्रपणे शूलस्य विकल्पः । सवनीये च पक्षतः प्राप्त एव तदभावो नियम्यते । अनूबन्ध्यायां तु सद्भावनियम इति प्राप्ते । त्रयाणामपि पशूनां शूलं तन्त्रमित्युक्तन्यायसिद्धार्थानुवादकत्वे सम्भवत्यष्टदोषदुष्टोविकल्पो न युक्तः, सर्वधात्वर्थानुस्यूतक्रियासामान्यवाची करोतिरिहोद्वासनक्रियापरः । तन्त्रत्वादेव सर्वान्त एवोद्वासनं न पूर्वयोरिति । यत्ते गात्रादग्निना पच्यमानादभिशूलं निहितस्याभिधावति । मा तद्भुम्यामाश्लिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्त्विति मन्त्रे हृदयशूलस्य भूसं-

Digitized by Google

श्लेषाभावकथनमप्यत्रैव लिङ्गम् । अन्यान्यपि लिङ्गदर्शनानीह भाष्यतोऽवगन्तव्यानि ॥

सू० समिधः ॥ २ ॥

वनस्पतियागे समिद्बर्हिः प्रयाजादिषु च या देवतास्ताः प्रत्यक्षा यूपसमिद्बर्हिरादय एव । यूपमेवैनं भागधेयं करोतीति वचनान्तरे यूपस्यैव वनस्पतीज्याभागित्वश्रवणात् । अप्रसिद्ध लौकिकार्थान्तरकल्पने मानाभावाच्चेति प्राप्ते नामसाम्यमात्रेण तत्प्रत्यक्षाणां देवतात्वम् । अलौकिकप्रमाणैकसमधिगम्याया अपूर्ववदलौकिकत्वावश्यम्भावात् । भावनायां करणत्वेनान्वयदशायामेव देवतोद्देश्यकत्वेन यागस्वरूपबोधात्पश्चात्कथंभावाकाङ्क्षयाऽन्वीयमानानामिध्मबर्हिरादीनां देवतास्वरूपघटकत्वायोगात् सरस्वतीति प्रसिद्धदेवतानामसाम्येनैका चैतत्सरस्वती नदीनामिति मन्त्रे नदीस्तवनवत्सोमलतायामुमासहायनामसाम्येन सोमः पवते जनिता मतीनामिति मन्त्रे द्यावापृथिव्यादिजनकत्वोक्तिवच्च स्तावकमात्रं यूपस्य हविर्भागित्ववादः । अत एव प्रयाजेषु देवताविप्रतिपत्तौ निर्णायिका स्मृतिः । आग्नेया इति तु स्थितिर्भक्तिमात्रमितरदिति । कौषीतकी श्रुतिरपि । यदुत्तमे प्रयाजे देवताः समावपति प्रयाजभाज एवैनास्तत्करोति तद्यथाग्निः सर्वेषु भागी भवत्येवं तदग्नेर्भागे देवताभागिनीः करोतीति पञ्चस्वपि प्रयाजेष्वग्नेर्भागित्वं सिद्धवत्कृत्याह ॥

सू० पार्वणेन ॥ ३ ॥

पार्वणौ जुहोतीति होमः कालाभीज्येति प्राप्ते कर्माभीज्यैव तेन विकृतिषु पौर्णमास्यमावास्यानामेकसमुदायाभावे न तत्संस्कारकहोमातिदेश इति नावमिकप्रयोजनम् ॥

सू० सोमे दर्शे ॥ ४ ॥

ज्योतिष्टोमे ये दर्शपूर्णमासविकारास्तेषु याजमानमन्त्राणां नातिदेशः । यज्ञो बभूवेति याजमानमन्त्राणां नातिदेशः यज्ञो बभूव स आबभूवेति याजमानमन्त्रस्य पुनर्विधानेन गृहमेधीयाज्यभागन्यायेन तद्वि-

Digitized by Google

परस्यापादिता अनभ्युपगमान्नित्यनिर्विकारत्वादिति भावः । सू॰ तर्काप्रतिष्ठानादपि, तर्कस्येति केवलतर्कस्येत्यर्थः ।

सू॰ अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥ १२ ॥

भू॰ इदानीं विद्यमानानां शाक्यादीनां तर्कान् उद्दूष्याऽन्यथाच प्रधानकारणवादमनिकान्लतदुपदर्शितदूषणं तेनानुम[1]न्यामह इति चेत एवमपि पुरुषबुद्धिमूलतर्कैकावलम्बनस्य तथैव देशान्तरकालान्तरेषु त्वदधिकतमतर्ककुशलपुरुषेोत्प्रेक्षिततर्कदूष्यत्वसम्भावनया तर्काप्रतिष्ठानदोषादनिर्मोक्षो दुर्वारः, अतोऽतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणं तदुपबृंहणायैव तर्क उपादेयः, तथा च चाह "आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" इति, वेदाख्यशास्त्राविरोधिनेत्यर्थः । अतो वेदविरोधित्वेन वेदार्थविशदीकरणरूपवेदोपबृंहणतर्कोपादानाय सांख्यस्मृतिरनादरणीया । विलक्षणत्वाधिकरणं समाप्तम् ॥

टी॰ सू॰ अन्यथाऽनुमेयमिति चेदवमप्यनिर्मोक्षप्रसङ्गः, तर्काप्रतिष्ठानादित्यादिकम् अनिर्मोक्षप्रसङ्ग इत्यन्तं नैकं सूत्रं सूत्रकारशैलीविरोधात् प्रयुक्तहेतुशैथिल्याशङ्कापरिहारो हि सूत्रान्तरकृतो दृष्टो, यथेक्षतेर्नाशब्दं गौणश्चेन्नात्मशब्दात्, आनन्दमयोऽभ्यासात्, विकारशब्दान्नेति चेन्न प्राचुर्यात्, ज्ञेयत्वावचनाच्च, वदतीति चेन्न प्राज्ञो हि प्रकरणादिति च । ननु भेदव्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्यय इत्यत्र कथं सूत्रैक्यम् उक्त-

[1] तेनानुमास्यामहे इति युक्तं पाठान्तरम् ।

Digitized by Google

हेतुदौःस्थ्यशङ्कापरिहारपरत्वाभावात्साध्याभावेऽनिष्टप्रसञ्जनमुखेन हेतुदार्ढ्यपरो हि न चेदित्यादिकः सूत्रांशः । न तूक्तहेतुदौःस्थ्यशङ्कापरिहारपरः इदानीमित्यादिभूततर्कस्य भूततर्कान्तरप्रतिहतिवत् भावितर्कस्यापि भावितर्कान्त[1]रप्रतिहतिः सम्भवतीत्यर्थः । वेदशास्त्राविरोधिनेत्यत्र वेदशास्त्रशब्दयोर्वैयधिकरण्ये साङ्ख्यशास्त्रस्याप्यनुरोधः स्यादिति तद्व्यावृत्त्यर्थं व्याचष्टे "वेदे"ति, यथा "पितृदेवमनुष्याणां वेदश्चक्षुस्सनातनम् । अतर्क्यं चाप्रमेयं च वेदशास्त्रमिति स्थिति"रिति अतर्क्य–बाधकागोचरभूतम्, अप्रमेयं–साधकाविषयभूतम्, अपीतावित्यादिसूत्रत्रयं परैस्त्वेवं व्याख्यातम्, अपीतौ लीयमानं कार्यं स्वाकारेण कारणं दूषयेत् लवणमिव मधुरोदकं, ततश्च स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वादिधर्मकत्वं ब्रह्मणः स्यात्समस्तस्य ब्रह्मण्यविभागे सति नियामकाभावात् पुनर्भोक्तृविभागस्तेषां भोग्यनियमश्चानुपपन्नः प्रलयेऽपि ब्रह्मणि विभक्तं चेदपीतिरेव न सम्भवति ब्रह्मणि प्रलीनानां पुनरुत्पत्तौ मुक्तानामप्युत्पत्तिप्रसङ्ग इत्यसामञ्जस्यपरमपीताविति सूत्रं तत्र दृष्टान्तेन परिहरति "न तु दृष्टान्ते"ति, घटशरावादय उच्चावचाः सन्तोऽपि स्वाकारप्रहाणेन प्रलीनत्वान्नोच्चावचाकारेण कारणं दूषयन्ति, एवं जगदपि स्थूलत्वाद्याकारप्रहाणेन लीनत्वादविभागदशायामपि न ब्रह्म दूषयति स्वप्नदर्शी च पुरुषः स्वमायया न स्पृश्यते सुप्तप्रबुद्धपुरुषाणामपि पुनर्विभागेन निष्क्रमणोपपत्तिः मिथ्याज्ञानस्यानपोदितत्वात् तस्यापोदितत्वादेव मुक्तानां न पुनरुत्पत्तिः जगतो ब्रह्मणि विभागेन स्थित्यंभावादप्ययोपपत्तिरिति शब्दादिहीनात् प्रधानात् तद्युक्तविलक्षणकार्योदयानुपपत्तिः सर्वविकारप्रलये पुनः सृष्टाविदमस्योपादानं न त्विदमिति नियामकाभावात्, भोक्तॄणां भोग्याव्यवस्थितिर्नियामकाभावेऽपि नियमाभ्युपगमे कारणाभावसाम्यान्मुक्तानां पुनर्बन्धप्रसङ्गः कतिपयविभागस्थितौ तेषां प्रधानकार्यत्वाभाव इति दोषसाधारण्यापादनं स्वपक्षदोषाच्चेति सूचितमिति तदिदमनुपपन्नं तथा हि स्थूलत्वह्रस्वत्वाद्याकारे परित्यक्तेऽपि जडत्वानृतत्व-

१ भावितर्कान्तरप्रतिहतिरिति पा० ।

परित्यागाभावात् अविद्याकर्मवासनाप्रहाणाभावाच्च ब्रह्मण्यविभक्तं जगत्तेनाकारेण ब्रह्म दूषयेत् यदि जडत्वानृतत्वकर्मवासनादिप्रहाणेन प्रपञ्चलयः तर्ह्यविद्यातत्कृतजीवभेदश्च निवृत्तः स्यात्, न हि जडत्वानृतत्वविरहे निःस्वभावाया अविद्याया अवस्थानमुपपद्यते सवासनकर्मप्रहाणात्तन्मूलाविद्यानिवृत्त्या च जीवा मुक्ताः स्युः, ततश्च पुनर्जगदुत्पत्तिर्न सम्भवेत् अविद्यान्तरेण सर्वसम्भवे तस्यास्तत्कल्पितजीवानां चादिमत्त्वं स्यात् वैषम्यनैर्घृण्यादि च प्रसजेत्, मोक्षोपायनिष्पादनवैयर्थ्यं च प्राकृतप्रलयादेवाविद्यानिवृत्तेस्तस्यास्मदादियत्ननिरपेक्षत्वाच्च अतोऽप्ययदशायामपि जडत्वानृतत्वादिप्रहाणाभावात्तेनाकारेण ब्रह्मणो दूष्यत्वं दुस्तरं जडत्वाद्याकारोऽपरमार्थ इति चेत्तर्ह्यपरमार्थत्वं ब्रह्मास्त्रं विहाय किमर्थं स्वाकारप्रहाणदुर्बलयष्टिग्रहणे प्रयस्यते, अपरमार्थत्वाश्रयणमपि विफलं मिथ्यात्वमपि हि प्रपञ्चाकारः, न हि मिथ्यात्वस्य मिथ्यात्वम् अतो न मिथ्यात्वप्रहाणमिति मिथ्याभूतं जगदविभक्तं स्वाकारेण मिथ्यात्वेन ब्रह्म दूषयत्येव मिथ्याभूतेनापि जडत्वाद्याकारेण च दूषयेत् । ननु न मिथ्यात्वेन मिथ्याभूतजडत्वादिना च दूषितत्वप्रसङ्गः, शुक्तिरूप्यस्य मिथ्यात्वेऽपि मिथ्यात्वेन मिथ्याभूतरजताकारेण च शुक्तेर्दूषितत्वाभावादिति चेच्च शुक्तेरपि त्वन्मते मिथ्यात्वात् पातकिसंसर्गेण पुरुषस्य, रूमासंसर्गेण तद्गतवस्तुनश्च मिथ्याभूतपातकित्वलवणत्वाकारापत्त्या दूषित[1]त्ववचनाच्च, पातकिरूमादयो हि पदार्थास्त्वन्मते मिथ्याभूताः, तेषां व्यावहारिकसत्यत्वाद्दूषकत्वमिति चेत्तर्हि जगतश्च व्यावहारिकसत्यत्वात् ब्रह्माविभक्तं जगत् दूषकं स्यात्प्रद्रष्टृपुरुषो मायया न स्पृश्यत इतीदमपि निरूपणीयम् अस्पर्शो न तावदज्ञानस्य पुरुषानाश्रितत्वमारोप्य ग्राहिपुरुषाश्रयत्वात् तत्कल्पकाज्ञानस्य, नाप्यकार्य्यकारित्वं हस्तिशस्त्रादिकार्य्यकल्पकत्वात् । नापि कार्य्यस्य देशविप्रकर्षः हस्तिशस्त्रादेरविप्रकर्षात्, नापि कार्यस्यापुरुषार्थत्वविरहः स्वप्ने भयशोकाद्यादर्शनात्, नापि दुःखस्यापरमार्थत्वं शस्त्रादिदुःखहेतोरिव दुःखस्य प्रबोधे बाधाभावात्

१ दूषितत्वदर्शनाच्चेति पा० ।

अपरमार्थभूतस्यापि तस्य निरसनीयतया पुरुषं प्रत्यवभासमानत्वात् जाग्रद्दशायामपि स्वगतत्वेन दुःखसाक्षात्कर्तृत्वमेव हि दुःखित्वम्, अवभासप्रतिसम्बन्धित्वमप्यपरमार्थ इति चेत् न, बाधकप्रत्ययाभावात् हस्तिशस्त्रादिविषयस्यैव प्रबोधे बाधः । न तु शस्त्रादिज्ञानस्य भयादेश्च भोक्तृभेदानियमप्रसङ्गस्य साङ्ख्यपक्षे तुल्यत्वापादानमप्ययुक्तम् आत्मनां स्वतो भिन्नत्वात् तत्पक्षे कृत्स्नविकारप्रलयेऽपि तेषां तत्कर्मानुगुणभोग्यविशेषे पुनरपि भोक्तृत्वव्यवस्थोपपत्तेः, त्वन्मते त्वात्मभेदस्यान्तःकरणभेदकल्पितत्वात् मनोबुद्ध्यहङ्काराणां प्रलयेऽप्ययश्रवणादात्मभेदाभावेन पुनः सृष्टावन्येनान्तःकरणेनोपहितस्यात्मन इदमदृष्टमिदं शरीरमिदं भोग्यमिति नियमानुपपत्तेश्च, प्रलयेऽप्यन्तःकरणस्थित्यभ्युपगमे तेषामन्तःकरणानामनादितया ब्रह्मकार्यत्वं न स्यात्, साङ्ख्यपक्षे तु तेषां न प्रधानकार्यत्वहानिः अन्तःकरणप्रलयेऽपि स्वत आत्मभेदसद्भावेनान्तःकरणस्थितेरनपेक्षितत्वादात्मभेदस्य तत्तत्कर्मविशेषाणां च सद्भावान्नियामकहेत्वभावसाम्यं दुर्वचं साङ्ख्यपक्षे मुक्तानां पुनर्बन्धप्रसङ्गोऽपि दुर्वचः, यस्य सम्यग्ज्ञानेन निश्शेषकर्मक्षयः यस्य हेत्वभावेन पुनः शरीरयोगाभावादक्षीणकर्मणां पुनर्बन्ध इति पुनर्देहसम्बन्धा[१]पत्तेश्च त्वन्मते मूलभूताविद्याया एकत्वादात्मन एकत्वादिदानीमपि बन्धानुवृत्तेश्चेतः पूर्वं न कश्चिन्मुक्तः सम्भवति, अस्ति चेत्स एवात्मा पुनरपि देहयोगमनुभवतीति मुक्तस्य पुनरुत्पत्तिप्रसङ्गो दुर्वारः, वर्तमानाविद्याया आदिमत्त्वं च भवेत्, जीवाज्ञानपक्षस्य भवद्भिरेव दूषितत्वात्, तदवष्टम्भेन बन्धमोक्षव्यवस्थोक्तिरयुक्ता तत्रापि मुक्तानां पुनरुत्पत्तिर्हि प्रसङ्गो दुष्परिहरः, अध्यस्तजीवभावनिवृत्त्या ब्रह्मैकतापत्तिर्हि मोक्षः, तत्रापि ध्वस्तजीवभावोऽयमंशो मुक्तः अध्यस्तजीवभावमंशान्तरं तु देहभाग् भवतीति न वक्तुं शक्यं ब्रह्मणः स्वतो निरंशत्वात् अतो ब्रह्मैकतापन्नानामेव पुनरुत्पत्तिः स्यात् उपहितांशभेदाभावात् । नन्वंशभेदस्यापि काल्पनिकत्वाभ्युपगमान्नोक्तदोष इति चेत् मुक्तौ निवृत्तजीवभावंशे स काल्पनिकभेदोऽस्ति वा न वा अस्ति चे-

१ देहसम्बन्धोपपत्तेश्चेति युक्तः पाठः ।

न्मुक्त एव न स्यात् न चेत्पूर्वोक्तदोषः स्यात् निवृत्तोपाधित्वमेव भेद इति चेत् उपाधिनिवृत्तिः स्वरूपातिरिक्ता न वा, न चेत्तत्स्वरूपमेव जीवभावेन पुनरपि संसरतीत्युक्तदोषस्थितिः, अतिरिक्तत्वे स निवृत्तिरूपविशेषः किं कृत्स्नब्रह्मवृत्तिः? उत ब्रह्मैकदेशवृत्तिः? आद्ये पूर्वोक्तदोषः, द्वितीये त्वेक-देशस्यांशान्तराद् भेदो वक्तव्यः, भेदकान्तरयोगेन चेत्तस्य भेदकोपाधेः पारमार्थ्ये ऽद्वैतहानिः, आपारमार्थ्ये मुक्तांशस्यैव बद्धत्वं स्यात्, अपरमार्थो-पाधिसबन्धो हि त्वन्मते बन्धः न भेदकान्तरयोगापेक्षा, अपि तूपाधि-विरह एव भेद इति चेत्स किं बाध्यः? उताबाध्यः? उपाधिविरहस्य बाध्यत्वे तदवच्छिन्नांशस्य पुनरुपाधिसम्बन्धान्मुक्तोत्पत्तिः स्यात्, अंशभे-दस्याबाध्यत्वे तस्य भेदस्याभेदवत् परमार्थत्वात् भेदाभेदपक्ष एवाङ्गीकृतः स्यात् । अथ तत्परिहाराय परमार्थतोऽंशभेदो नाभ्युपगतः तर्हि मुक्तस्य पुनरुत्पत्तिरवर्जनीया स्यात् । यत एवं शरावादीनां पृथिव्यामिव स्थूल-त्वादिस्वाकारप्रहाणेन ब्रह्मण्यविभागापन्नस्य जगतस्तद्रूपकत्वाभावः प्रतिक्षिप्तः, अत एव न तु दृष्टान्तभावादिति सूत्रस्य भास्करोक्तयोजना-ऽपि व्युदस्ता भवति । तस्यापरमार्थत्वानाश्रयणेन क्षणमात्रमप्यपसरणम-प्यशक्यमिति विशेषः । यादवमिश्रास्तु असदिति चेदिति सूत्रमेकमधि-करणान्तरं नासदासीदित्यादिविषयं वर्णयन्ति सत्त्वासत्त्वनिषेधौ न पर-स्परप्रतिपक्षविधिरूपौ व्याघातात्, अतोऽनुभयात्मकं निःस्वभावं शून्यं प्रतीयत इति पूर्वपक्षीकृत्य लोकतः प्राप्तस्य प्रतिषेध्यत्वाल्लोके च कार्या-वस्थायामेव घटसंस्थानादिव्याप्तिरूपसत्त्वन्तदभावरूपकपालत्वादिव्या-प्तिलक्षणमसत्त्वञ्चोपलभ्यत इति कारणदशायां तदुभयं निषिध्यते "आनीदवातमि"ति, वाक्यशेषविरोधाच्च अतो न स्वरूपसत्त्वनिषेधः अह्र-स्वमदीर्घं व्योमेतिवत्, न ह्यत्र परस्परप्रतिपक्षविधिः, नापि निःस्वभा-वत्वोक्तिः तद्वदिति सिद्धान्तितम्, अपीतावित्यादि चाधिकरणान्तरमाहुः। तत्र भावाभावरूपसर्वावस्थाप्रतिषेधोऽनुपपन्नः विनाशहेतुवैयर्थ्यप्रसङ्गात् विनाशहेतुना न कारणमेव निष्पाद्यं तस्य प्रागपि सत्त्वात्, नापि कार्यान्तरं

प्रलये सर्वकार्यविभागानुपपत्तिप्रसङ्गात्[1], अतोऽवस्थान्तरोत्पादः प्रलयः अतः पूर्वाधिकरणसिद्धान्तानुपपत्तेः शून्यं तत्त्वमित्याक्षिप्य घटत्वकपालत्वादिस्थानीयभावाभावरूपविकल्पशब्दवाच्यस्थूलावस्थानिषेधेऽपि शक्तिमात्रावशेषसूक्ष्माऽवस्थाभ्युपगमात्तत्र दृष्टान्ताभावाच्च तद्वत् प्रसङ्गादसामञ्जस्यमिति सिद्धान्तितं, दृष्टान्तश्च तप्तलोहसमावर्तितं जलं, तद्धि जलं जलरूपेणानुपलभ्यं सक्तुपिण्डशैथिल्यहेतुजलवत् खड्गधाराद्यशैथिल्यहेतुसूक्ष्मरूपेण पुनर्जलपरिणामशक्तियुक्तं लोहादन्यत्वबुद्ध्यविषयस्तिष्ठतीत्युक्तं, तत्र तावदसदिति चेदिति सूत्रव्याख्यानमयुक्तं सूत्राक्षरानुगुण्याभावात् सदसतोरन्यतरकोटिवाचकोऽसच्छब्दः कथं कोटिद्वयोत्तीर्णतामुपस्थापयेत्, अन्यतरकोटिसमर्पकतया हि सच्छब्दस्यानुभयात्मकत्वोपस्थापकत्वं निरूपणीयाभावात् च तदप्युक्तं नासदासीन्नो सदासीत्तदानीमित्यत्र प्रलयदशायां निषिध्यमानं सच्छब्दवाच्यं कार्यावस्थं किमपीति सिद्धं सहप्रयोगान्नञ्समाससामर्थ्याच्चासच्छब्दवाच्यमपि सद्व्यतिरिक्तमिति सर्वसम्मतं तदुभयं किमित्यपेक्षायां तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवदिति विज्ञानं चाविज्ञानं चेति वाक्येन चेतनमचेतनं चेति ज्ञायते, इदं च गतिसामान्यन्यायस्थानप्रमाणाभ्यां सिद्धमिति न पूर्वपक्षोत्थानम् । किञ्च यद्यर्थान्तरपरत्वं शङ्कनीयं तर्हि सदसदात्मकत्वं किन्न शङ्क्यते एकस्य तथात्वं विरुद्धमिति चेदेकस्यानुभयात्मकत्वमपि विरुद्धम् अदर्शनात्, अह्रस्वमदीर्घं व्योमेतिवदनुभयात्मकत्वमविरुद्धमिति चेत् दशाङ्गुलं चतुरङ्गुलापेक्षया ऽदीर्घं द्वादशाङ्गुलापेक्षया ह्रस्वमितिवदविरोधादुभयात्मकत्वमपि शङ्कनीयं सदसद्रूपेणोभयात्मकं विरुद्धमिति चेत्तदुभयवैलक्षण्यरूपमनुभयात्मकत्वमपि विरुद्धत्वान्न शङ्क्यम् आपाततः शङ्क्येत्यप्ययुक्तम् उभयात्मकत्वेऽप्यापाततः शङ्काया निवारकाभावात् । किञ्च उत्तरत्रासद्व्यपदेशान्नेति चेन्न धर्मान्तरेणेति शङ्कापरिहारयोरुत्थानायोगाच्च नैवमधिकरणद्वयं कल्पनीयं तत्र हि कार्यस्यासत्त्वात् कारणादभेदोऽनुपपन्न इत्याक्षिप्य भावविकारषट्कान्तर्गतनामरूपसंयोगलक्षणसत्यत्वादर्थान्तरेण शक्तिमात्रावशेषवस्तुमात्र-

१ सर्वकार्यविनाशानुपपत्तिप्रसङ्गादिति पा० ।

त्वरूपेण धर्मान्तरेणासद्व्यपदेशः न तु स्वरूपसत्त्वाभावेनेति भवद्भिर्व्याख्यास्यते, इह च विकल्पसंज्ञकभावाभावात्मकस्थूलरूपनामसंयोगलक्षणं सत्त्वं प्रलयदशायां निषेध्यं न तु स्वरूपसत्त्वमित्यधिकरण¹द्वयेर्निर्णीयते कथसद्व्यपदेशः स्वरूपासत्त्वशङ्कामङ्कुरयेत् । नन्वत्र सत्त्वासत्त्वयोरुभयोरपि प्रतिषेधो निरूपितः तत्र तु केवलासत्त्वविधिर्निरूप्यत इति चेन्न अपीतावित्यधिकरणे प्रलयदशायां निषेध्यं सत्त्वं स्थूलावस्थायोगलक्षणं शक्तिमात्रावशेषवस्तुमात्ररूपेण सत्त्वं तु न निषेध्यमिति शिक्षितत्वादसच्छब्दस्य सत्त्वप्रतिषेधकत्वात्तदभावस्य शक्तिमात्रावशेषसूक्ष्मदशारूपत्वादसच्छब्दस्य तदवस्थवस्तुमात्रोपस्थापकत्वसिद्धेरधिकाशङ्काभावाच्च परस्परप्रतिपक्षाकारद्वयनिषेधेन व्याकुलत्वाभाव एवासद्वा इदमिति वाक्यस्य वैषम्यं तत्कथं शिक्षितार्थशैथिल्यशङ्कां जनयेत्, तस्मात्सालक्षण्यनियमनिषेधानन्तरमसतः कार्यत्वशङ्कानिरासपरमसदिति चेदिति सूत्रं कार्यकारणयोरनन्यत्वे कारणस्य ब्रह्मणः परिणामादिदोषशङ्काव्युदासकमपीतावित्यादिसूत्रद्वयमित्येषां सूत्राणां परमप्रकृतसालक्षण्यनियमभङ्गानुबन्धित्वादेकाधिकरण्यं युक्तम् ॥ विलक्षणत्वाधिकरणं समाप्तम् ॥

शिष्टापरिग्रहाधिकरणम् ।

सू० एतेन शिष्टपरिग्रहा अपि व्याख्याताः ॥ १२ ॥

भू० शिष्टाः परिशिष्टाः न विद्यते वेदपरिग्रहो येषामित्यपरिग्रहाः शिष्टाश्चापरिग्रहाश्च शिष्टापरिग्रहाः, एतेन वेदापरिगृहीतसांख्यपक्षक्षपणेन परिशिष्टाश्च वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिता वेदितव्याः, परमाणुकारणवादेऽमीषां सर्वेषां संवादात्कारणवस्तुविषयस्य तर्कस्याप्रतिष्ठितत्वं न शक्यते वक्तुमित्यधिकाशङ्का तावन्मात्रसंवादेऽपि तर्कमूलत्वाविशेषात्परमा-

१ अधिकरणद्वयेन निर्णीयते इति पा० ।

णस्वरूपेऽपि शून्यात्मकत्वाशून्यात्मकत्वज्ञानात्मकत्वार्थात्मकत्वक्षणिकत्वनित्यत्वैकान्तत्वानेकान्तत्वसत्यासत्यात्मकत्वादिविसंवाददर्शनाच्चाऽप्रतिष्ठित्वमेवेति परिहारः ।

शिष्टापरिग्रहाधिकरणं समाप्तम् ॥

टी० सू० एतेन शिष्टापरिग्रहा अपि व्याख्याताः, किं ब्रह्मकारणत्वं विचाल्य? मुत ने? ति किं वेदान्तवाक्यानां कणादाक्षपादादितर्कविरोधोऽन्यपरत्वमापादयति ने? ति किं बहुवादिसम्मतपरमाणुकारणवादनिरसने तर्काप्रतिष्ठानहेतुः प्रभवति ने? ति, यदा न प्रभवति, तदा कणादाद्युक्ततर्कविरोधेन श्रुतीनामन्यपरत्वाद् ब्रह्मकारणत्वं विचाल्यं भवति, यदा तु प्रभवति तदा तदुक्तविरोधस्य श्रुतीनामन्यपरताहेतुत्वाभावाद् ब्रह्मकारणत्वमविचाल्यं भवति, शिष्ट—शब्दम् अपरिग्रह—शब्दं समासं च व्याचष्टे शिष्टा इत्यादिना, अनेन शिष्टैरपरिगृहीता इति परोक्तव्याख्यानव्यावृत्तिः, तथा हि सति प्रधानकारणवादस्यापि शिष्टैरपरिगृहीतत्वासिद्धिः । ननु कथं मोक्षधर्मादिषु परिगृहीतस्य साङ्ख्यस्य शिष्टापरिगृहीतत्वं कथं धर्मशास्त्रपरिगृहीतस्य न्यायवैशेषिकादिपक्षस्य शिष्टापरिगृहीतत्वं. स्मर्यते हि "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशे"ति "अङ्गानि चतुरो वेदा मीमांसान्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्द्दशे"ति पराशरः, तत्प्रणीता प्रमाणप्रमेयव्यवहारमर्यादा सर्वाङ्गीकार्या, वेदप्रामाण्यमीश्वरस्तदुपासनान्मोक्ष इत्यादि च तैरभ्युपेतं तत्कथं तस्यापरिग्रहः नैयायिको वैशेषिकश्चेति नातीव भेद इति कारणतत्त्वस्य प्रधानप्रतिपाद्यत्वात् परमाणुकारणवादस्यौपनिषदब्रह्मकारणत्वविरोधात् विरुद्धांशस्यापरिपरिगृहीतत्वात्तदभिप्रायो वैशेषिकादीनां शिष्टापरिग्रहव्यपदेश इति चेत् स्वतन्त्रप्रधानकारणवादस्यापि ब्रह्मकारणवादविरुद्धत्वादुपनिषद्विरुद्धे प्रधानप्रतिपाद्ये परिग्रहाभावाच्च साङ्ख्यपक्षस्यापि शिष्टापरिग्रहव्यपदेशस्तुल्यतया

Digitized by Google

ग्राह्यः[1] एकदेशाविरोधेऽपि प्रधानप्रतिपाद्यांशविरोधस्याविशिष्टत्वात् । सूत्राभिप्रेतार्थमाह परमाण्वित्यादिना, माध्यमिकमतं शून्यात्मकत्वं, योगाचारमतं ज्ञानात्मकत्वं, क्षणिकत्वं बौद्धत्रयाभिमतम्, एकान्तत्वमार्हतव्यतिरिक्तानामभिमतं सत्यत्वं वैशेषिकादिमतम् असत्यत्वं योगाचारमतम्, आदि–शब्देनैकविधत्वचतुर्विधत्वं विवक्षितम्,एकविधत्वमार्हतमते।परैस्तु वैशेषिकसौगतादीनां तर्ककुशलताप्रसिद्धेरधिका शङ्का तर्कमूलत्वाविशेषात्परिहार इत्युक्तं तर्कमूलत्वाविशेषेऽपि परमाणुकारणवादे सर्वसंवादात्प्रतिष्ठितत्वमिति शङ्का त्ववतिष्ठते अस्यां तु परिहृतायां तार्किकत्वप्रसिद्धिरकिञ्चित्करी, अतः प्रबलशङ्कापरिहारावेव सूत्राभिप्रेताविति युक्तम् ॥ शिष्टापरिग्रहाधिकरणं समाप्तम् ॥

भोक्त्रापत्त्यधिकरणम् ।

सू० भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १४ ॥

न्यू० पुनरपि साङ्ख्यः प्रत्यवतिष्ठते यदुक्तं स्थूलसूक्ष्मचिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणः कार्यकारणरूपत्वाज्जीवब्रह्मणोः स्वभावविभाग उपपद्यत इति स तु विभागो न सम्भवति, ब्रह्मणः सशरीरत्वे तस्य भोक्तृत्वापत्तेः सशरीरत्वे जीवस्येवेश्वरस्यापि सशरीरत्वप्रयुक्तसुखदुःखयोर्भोक्तृत्वस्यावर्ज्जनीयत्वात्।ननु च सम्भोगप्राप्तिरिति चेन्नवैशेष्यादित्यत्रेश्वरस्य भोगप्रसङ्गपरिहार उक्तः, नैवं तत्र ह्युपास्यतया हृदयायतने सन्निहितस्य शरीरान्तर्वर्तित्वमात्रेण भोगप्रसङ्गो न विद्यत इत्युक्तम्, इह तु जीववद्ब्रह्मणोऽपि सशरीरत्वं तद्वदेव सुखदुःखयोर्भोक्तृत्वप्रसङ्गो दुर्वार इत्युच्यते, दृश्यते हि सशरीराणां जीवानां शरीरगतबालत्व-

१ प्राप्त इति पा० ।

Digitized by Google

स्थविरत्वादिविकारासम्भवेऽपि शरीरधातुसाम्यवैषम्यनिमित्त सुखदुःखयोगः । श्रुतिश्च

टी० सू० भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् । सङ्गतिमाह "पुनरपी"ति, न तु दृष्टान्तभावादित्यत्र शरीरगतबालत्वयुवत्वादिधर्माणां शरीरिण्यप्रसङ्गं दृष्टान्तीकृत्य परमात्मनि शरीरभूतचिदचिद्गतदोषाप्रसक्तिरुक्ता अत्र शरीरसंसर्गप्रयुक्तभोक्तृत्वप्रसङ्गः परिह्रियते, पूर्ववदेव प्रथमो विचारः तदर्थं किं भोक्तृजीवशरीरकस्य ब्रह्मणस्स्वशरीरभूताज्जीवान्निरतिशयानन्दस्वभावतया विलक्षणत्वमस्ति ने?ति तदर्थं किं ब्रह्मणः सशरीरत्वे जीववत्सुखदुःखभोक्तृत्वं प्रसज्यते? उत ने?ति दुःखादिभोक्तृत्वं किं शरीरप्रयुक्त? मुतान्यप्रयुक्त?मिति

भू० "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति अतः सशरीरब्रह्मकारणवादे जीवेश्वरस्वभावविभागाभावात् केवलब्रह्मकारणवादेऽपि मृत्सुवर्णादिवज्जगद्गतापुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्गाच्च प्रधानकारणवाद एव ज्यायानिति चेत्, अत्रोत्तरं स्याल्लोकवदिति स्यादेव विभागो जीवेश्वरस्वभावयोः, न हि जीवस्य शरीरधातुसाम्यवैषम्यनिमित्तं सुखदुःखयोर्भोक्तृत्वं सशरीरत्वकृतम् अपि तु पुण्यपापरूपकर्मकृतं, न ह वै सशरीरस्येत्यपि कर्मारब्धदेहविषयं स एकधा भवति त्रिधा भवति स यदि पितृलोककामो भवति स तत्र पर्य्यति जक्षत् क्रीडन् रममाण इति कर्मसम्बन्धविनिर्मुक्तस्याविर्भूतस्वरूपस्य सशरीरस्यैवापुरुषार्थगन्धाभावात् । अपहतपाप्मनस्तु परमात्मनः स्थूलसू-

क्ष्मरूपकृत्स्नजगच्छरीरत्वेऽपि कर्मसम्बन्धगन्धोनास्तीति न तरामपुरुषार्थगन्धप्रसङ्गः, लोकवत्–यथा लोके राजशासनानुवर्तिनान्तदतिवर्तिनां च राजानुग्रहनिग्रहकृतसुखदुःखयोगोऽपि न

टी० न ह वै सशरीरस्येति श्रुतौ शरीर–शब्दः किं शरीरमात्रपरः? उत पुण्यापुण्यनिमित्तशरीरपर? इति, अत्र चरमो विचारः प्रस्तुतोपयोगेन बुद्धिस्थतया कृतः, न त्वसाधारणतया कर्त्तव्यत्वात्, यदा शरीरमात्रपरः तदा दुःखादिभोगस्य शरीरत्वप्रयुक्तत्वात् ब्रह्मणोऽपि तद्भोगप्रसङ्गेनं शरीरभूताज्जीवाद्विरतिशयानन्दतया विलक्षणत्वं नास्तीति स्यात्, यदा तस्मिन् वाक्ये शरीरशब्दः कर्मकृतशरीरपरः तदा दुःखादिभोगस्य शरीरत्वप्रयुक्तत्वाभावात् ब्रह्मणः स्तद्भोगाप्रसङ्गेन शरीरभूता ज्जीवाद्विरतिशयानन्दतया । वैलक्षण्यमस्तीति सिध्यति कथं शरीरित्वे भोक्तृत्वमिति शङ्कायां विवृणोति–

मू० सशरीरित्वमात्रेण शासके राजन्यपि शासनानुवृत्त्यतिवृत्तिनिमित्तसुखदुःखयोर्भोक्तृत्वप्रसङ्गः, यथाह द्रमिडभाष्यकारः "यथा लोके राजा प्रचुरदन्दशूके घोरेऽनर्थसंकटेऽपि प्रदेशे वर्त्तमानोऽपि व्यजनाद्यवधूतदेहो दोषैर्न स्पृश्यते अभिप्रेताँश्च लोकान् पुनरपि पालयिष्यति भोगाँश्च गन्धादीनविश्वजनोपभोग्यान् धारयति तथाऽसौ लोकेश्वरो भ्रमत्स्वसामर्थ्यचामरो दोषैर्न स्पृश्यते रक्षति च लोकादीन् ब्रह्मलोकादीन् भोगाँश्चाविश्वजनोपभोग्यान् धारयति"इति,

टी० "सशरीरत्व"इति, अधिकरणारम्भमाक्षिपति "ननु चे"ति, परिहरति "नैवमि"ति, शरीरान्तर्वर्तित्वमात्रेणेति मात्र–शब्देन शरीरं

Digitized by Google

प्रति स्वाम्यव्यावृत्तिः, जीववत्सशरीरत्व इत्यनेन शरीरस्वाम्यमभिप्रेतम्, एवं शङ्काया मुखभेदो दर्शितः यथा कार्यवशात्परगृहं प्रविष्टस्य गृहसन्निधिमात्रेण तद्गृहपतित्वप्रयुक्तानर्थाभ्युदयभाक्त्वं न भवति तथोपास्यत्वायहृदयस्थस्य शरीरसन्निधिमात्रेण सशरीरत्वप्रयुक्तभोक्तृत्वापत्तिः नास्तीति सम्भोगप्राप्तिरिति चेदित्यत्रोक्तम्, अत्र तु शरीरस्वामित्वप्रयुक्तभोक्तृत्वमाशङ्कामिति भेद इत्यर्थः, तथाऽपि परिहारैक्याच्छङ्कानुदयइति न च वाच्यम् अत्रैववक्तव्यं दुःखादेः सो[1]पाधिकत्वमुपजीव्य सन्निधिमात्रप्रसक्ताया भोक्तृत्वशङ्कायास्तत्र परिहृतत्वात्सूत्रभेदस्तु भोक्तृत्वशङ्कायास्तत्र परिहृतत्वात्सूत्रभेदस्तु भोक्तृत्वशङ्काद्वारभेदनिबन्धनः । असम्भवेऽपीत्यनेन न तु दृष्टान्तभावादित्यत्र परिहृतांश उक्तः । अपरिहृतांशमाह "अत"ति, परिहरति "अत्रोत्तरमि"ति अत्र व्युत्पाद्यन्यायं दर्शयति "अपि त्वि"ति, न ह वै सशरीरस्येत्यपीति मुक्तिपादे वक्ष्यमाणमर्थमुपजीव्यात्र निर्वाहः कृतः । नन्वत्रैव निर्बाध्यत्वाच्छ्रुतेः व्यञ्जनादीत्यादि–शब्देन तत्तदनिष्टनिवारणसाधनानि विवक्षितानि भ्रमतस्वसामर्थ्यचामर इत्यत्र चामरग्रहणमनिष्टनिवारणानुरूपवस्तूनामुपलक्षणं सशरीरब्रह्मकारणत्वे जीवेश्वरविभागाभावः परिहृतः केवलब्रह्मकारणवादे पूर्वोक्तजगद्गतापुरुषार्थादिप्रसङ्गमनभ्युपगमेन परिहरति–

सू॰ मृत्सुवर्णादिवत्, ब्रह्मस्वरूपपरिणामस्तु नैवाभ्युपगम्यते अविकारत्वनिर्दोषत्वादिश्रुतेः । यत्तु परैर्ब्रह्मकारणवादे भोक्तृभोग्यविभागाभावमाशङ्क्य समुद्रफेनतरङ्गदृष्टान्तेन विभागप्रतिपादनपरं सूत्रं व्याख्यातं तदयुक्तम् अन्तर्भावितशक्त्यविद्योपाधिकाद्ब्रह्मणस्सृष्टिमभ्युपगच्छतामेवमाक्षपपरिहारयोरसङ्गतत्वात्,कारणान्तर्गतशक्त्यविद्योपाध्युपहितस्य भोक्तृत्वादुपाधेश्च भोग्यत्वाद्विलक्षणयोस्तयोः परस्परभावापत्तिर्हि न सम्भवति, स्वरूपपरिणामस्तु तैर-

[1] कर्मासाधिकत्वमिति पा॰ ।

Digitized by Google

पि नाभ्युपेयते न कर्म्माविभागादिति चेन्नाऽनादित्वादिति क्षेत्रज्ञानां तद्गतकर्म्मणां चानादित्वप्रतिपादनानात्, स्वरूपपरिणामाभ्युपगमेऽपि भोक्तृभोग्यादिभागाशङ्का-कस्यचिदपि न जायते

टी० "मृत्सुवर्णादी"ति, अस्य सूत्रस्य परैः कृतमन्यथाव्याख्यानमनुवदति "यत्त्वि"ति, भोक्तृ-शब्दो भोक्तृत्वपर इति तैरप्युक्तं भोग्यस्य भोक्तृत्वापत्तिं भोक्तुर्भोग्यत्वापत्तिं चा शङ्क्य परैः परिहृतं तद्दूषयति "तद्युक्त"-मिति, आक्षेपपरिहारयोरसङ्गतत्वमुपपादति "कारणान्तर्गते"ति, उपाधेश्च भोग्यत्वादित्यत्रोपाधि-शब्दः शक्त्यविद्योपाधीनां त्रयाणामपिवाचकः, यथा वादशब्दः कथासामान्यवाची कथाविशेषवाची च तद्वत्। यद्वोपाधि-शब्देनाचिदंशो विवक्षितः उपहितब्रह्मणो भोक्तृत्वमुपाधेर्भोग्यत्वं चास्तु तथाऽपि तयोरुपाधिब्रह्मणोरविभाग आशङ्क्य परिह्रियत इत्यत्राह "विलक्षणयो"रिति, "स्वरूपस्यैव परिणामे शङ्कापरिहारावुपपद्येते इत्यत्राह "स्वरूपे"ति, कुत इत्यत्राह "न कर्मे"ति, क्षेत्रज्ञानादित्वाभ्युपगमे उपहितस्य ब्रह्मणः क्षेत्रज्ञत्वेनोपाधेश्च भोग्यत्वरूपेण नित्यत्वाभ्युपमान्नित्यत्वेनाभ्युपगतयोस्तयोरविभागाभावः सिद्ध एवेत्यर्थः । अभ्युपगम्य दूषणमाह "स्वरूपपरिणामाभ्युपगमेऽपी"ति,

सू० मृत्सुवर्णादिपरिणामरूपघटशरावकटकमुकुटादिविभागवद्भोक्तृभोग्यविभागोपपत्तेः, स्वरू[1]पपरिणामेऽपि ब्रह्मण एव भोक्तृभोग्यत्वापत्तिरिति पुनरप्यसामाञ्जस्यमेव ॥

भोक्त्रापत्त्यधिकरणं समाप्तम् ॥

टी० दृष्टान्तमाह "मृत्सुवर्णादी"ति, कटकमुकुटादीनां कालभेदेन अविभाग उपपद्यत इति चेत्तत्फेनतरङ्गदृष्टान्तेऽपि समानं, यस्तु विभागः फेनतरङ्गदृष्टान्तेन साध्यते स स्वरूपपरिणामाभ्युपमेऽपि

१ स्वरूपपरिणामे चेति पा· ।

Digitized by Google

स्वयमेव सिध्यतीति भावः । स्वरूपपरिणामाभ्युपगमेऽपीतो तद्दुत्प्रसङ्गादसमञ्जसं न तु दृष्टान्तभावादिति विकारापुरुषार्थोपातात् । निर्विकारत्वादिश्रुतीनामसामञ्जस्यमुक्तं परिहृतं तच्च दूषणमपरिहृतं स्यादित्याह "स्वरूपपरिणामे चे"ति, भोक्त्रापत्त्यधिकरणं समाप्तम् ॥

आरम्भणाधिकरणम् । **सू० तदन्यत्वमारम्भणशब्दादिभ्यः ॥ १५ ॥**

भू० असदिति चेन्न प्रतिषेधमात्रत्वादित्यादिषु कारणभूताद्ब्रह्मणः कार्य्यभूतस्य जगतोऽन्यत्वमभ्युपगम्य ब्रह्मणो जगत्कारणत्वमुपपादितम्, इदानीं तदेवानन्यत्वमाक्षिप्य समाधीयते ।

टी० सू० तदनन्यत्वमारम्भणशब्दादिभ्यः, सङ्गतिमाह "असदिती"ति, इत्यादिषुसूत्रेष्वित्यर्थः, ब्रह्मणो जगत्कारणत्वं सम्भवति ने?ति किं ब्रह्मणोज[१]गत्कारणत्वेजगतः श्रुतिसिद्धं ब्रह्मणोऽनन्यत्वं सम्भवति ने?ति किं वाचारम्भणमित्यादिवाक्यानि कारणस्यैवावस्थान्तरापत्त्या कार्यत्वं साधयितुं प्रभवन्ति ने?ति किं बुद्धिशब्दान्तरादयोऽवस्थाभेदनिबन्धना? उत द्रव्यभेदनिबन्धना? इति, यदा बुद्धिभेदादयः स्वरूपान्यत्वनिबन्धनाः तदा कार्यस्य कारणादन्यतया जगतो ब्रह्मान्यत्वापत्तेस्तदनन्यतया व्यपदिश्यमानं ब्रह्म न कारणं भवतीति स्यात्, यदा बुद्धिभेदादीनामवस्थान्तरनिबन्धनत्वं तदा कार्यस्य कारणादनन्यत्वेन जगतो ब्रह्मानन्यत्वसिद्धेस्तदनन्यतया व्यपदिश्यमानस्य ब्रह्मणो जगत्कारणत्वं सम्भवतीति सिध्यति । अत्र केचित्तदनन्यत्वं वर्णयन्ति तस्मात्कारणाद्ब्रह्मणः कार्यस्यानन्यत्वं परमार्थतो व्यतिरेकेणाभाव इति, जडाजडयोरेकत्वायोगादनन्यत्वं नाम नैक्यं किं तु भेदाभावः, भेदस्य प्रतीयमानत्वादसत्त्वस्य दुर्वचत्वात्, परमार्थतोव्यतिरेकेणाभाव इत्युक्तं तत्तावद्विरूप्यं यद्यनन्य-शब्दो बहुव्रीहिरभिमतः तदाऽन्यशून्यत्वमनन्यत्वं तेन कार्यधर्मिनिषेधात् प्रप-

१ किं ब्रह्मकार्यत्वे जगत इति ।

स्वमिथ्यात्वं सिध्यति, यथा निर्धनत्वमिति धनाभावः, तथा सति तस्यानन्यत्वमिति योजनीयं न तु तस्मादिति, पुरुषस्य निर्धनत्वमिति हि व्यपदेशः, न तु पुरुषान्निर्धनत्वमिति, तस्मात्कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यत इति हि तेषां योजना, अतस्तत्पुरुषसामर्थ्यादनन्यत्वमन्यत्वभावः स्यात्, ततश्चैक्यं विहितं स्यात्, न तु मिथ्यात्वं, यथा मनुष्यादनन्यत्वं ब्राह्मणस्य, वृक्षादनन्यत्वं पलाशस्येति, न हि ब्राह्मणपलाशयोर्मिथ्यात्वमुच्यते, अतोऽनन्यत्व-शब्देन न कार्यमिथ्यात्वसिद्धिः, परमार्थत इत्यध्याहारश्च तन्निरपेक्षार्थे सम्भवत्यनुपपन्नः । यदि परमार्थव्यतिरेकाभाव-शब्द ऐक्यपरो न भवेत्, तदा व्यतिरेक-शब्दवैयर्थ्यं च परमार्थतोऽभाव इत्येतावता कार्यमिथ्यात्वसिद्धेः, अतस्तदसत्त्वमिति सूत्रं शिक्षणीयं मृत्तिकेत्येवेति विषयवाक्यस्य इति-शब्दश्च वृथा स्यात् । ननु तत्पुरुषपक्षेऽपि चन्द्रादनन्योद्वितीयश्चन्द्र इत्यत्र द्वितीयचन्द्रस्येव कार्यस्य मिथ्यात्वसिद्धिरिति चेन्न तत्रापि द्वित्वस्यैव मिथ्यात्वाच्चन्द्रैकत्वसिद्धेः, रज्जोरनन्यः सर्प इत्यत्र सर्पमिथ्यात्ववत्कार्यमिथ्यात्वमिति चेत् न मातुरनन्या बन्ध्येतिवद्वाक्यस्य व्याहतार्थत्वात्, न व्याहतिः, सर्पमिथ्यात्वस्य विवक्षितत्वादिति चेन्न अशाब्दत्वात् मिथ्यात्वस्य, । ननु अग्निना सिञ्चेदित्यत्र सेचनवाचिशब्दस्य दाहवाचित्वाभावाद्धि व्याघातः, अत्र त्वमुख्यवृत्त्या व्याहतिपरिहार इति चेत् न, अनन्यसर्प-शब्दयोः कस्यामुख्यताऽभिमता यद्यनन्यशब्दस्यारोपितत्वमाश्रित्य सर्पो रज्ज्वारोपित इत्यर्थो विवक्षितः स्यात् तर्हि तद्वदेव तदनन्यत्वमिति सौत्रं पदमप्यारोपितपरं स्यात्, तदानीं सत्त्वाच्चापरस्येति सूत्रवैघट्यं स्यात्, तद्धि कारणदशायामपि कार्यस्य कारणे सत्त्वं ब्रूते, न ह्यारोपः पाश्चात्यः आरोपितवस्तु प्रागपि सदिति युज्यते, प्रागपि कारणात्मना सत्त्वं युक्तमिति चेन्न असतः कार्यस्य परमार्थभूतकारणात्मना सत्त्वायोगात् । यदि सर्प-शब्देनाधिष्ठानं लक्ष्यते एवमेव कार्यशब्दोपलक्षितस्य सन्मात्रस्य कारणादनन्यत्वं स्यात् तथा सति कार्यस्य कारणादनन्यत्वं न सिध्यति सन्मात्रस्यापरिणामिनो निर्दोषस्य कारणत्वाभावादविकारस्या-

Digitized by Google

कल्पितस्य कार्यत्वाभावाच्च । ननु सन्मात्रमेव कारणाविद्याशबलं कारणं कल्पिताकारोपहितं, घटस्सन् पटस्सन् इत्यवभासमानं तदेव कार्यमित्यनन्यत्वमिति चेत् अविद्याशबलत्वं नाम किमविद्योपलक्षितत्वम्? उताविद्याविशिष्टत्वं? प्रथमे ब्रह्मकारणत्वासिद्धिरेव, न हि शाखोपलक्षितस्य चन्द्रस्य पत्रपुष्पाद्युपादानत्वं, नापि सारसोपलक्षितकेदारस्य सारसगतगतिशब्दाद्युपादानत्वं, यदि कारणाविद्याविशिष्टं सन्मात्रमेव कल्पिताकारविशिष्टं कार्यमित्यनन्यत्वं, ततोऽपि कारणावस्थप्रकृतिशरीरकमेव ब्रह्म कार्यावस्थप्रकृतिशरीरकमित्यनन्यत्वोपपादनं वरं, यस्याव्यक्तं शरीरं यस्य पृथिवी शरीरमिति श्रुतानुगुणनिर्वाहे सम्भवत्यश्रुतकल्पनाऽनुपपत्तेः, सकलप्रमाणबाधाभावात् परमार्थत इत्यध्याहारनैरपेक्ष्यात्, श्रुताविति-शब्दवैयर्थ्याभावाच्च । यद्व्यतिरेकेण यस्य नोपलम्भसद्भावौ स तस्मादनतिरिक्तः यथा मृदोघट इत्यनुमानपरं "भावे चोपलब्धेरि"ति, सूत्रं व्याख्यातम्, उपलम्भसद्भावयोः समुच्चयात् धूमाग्न्योरालोकचाक्षुषरूपयोश्चानन्यत्वव्युदास इति । अत्रोच्यते न तावत्कार्यावस्थायाः कारणेनैकत्वं साध्यम्, अनुवृत्तसत्यानित्याजडस्य तस्य व्यावृत्तासत्यानित्यजडावस्थायाश्चैकत्वव्याघातात्जातिव्यक्त्योरनेकान्तत्वाच्च तत्राप्यभेदेऽभिमते गुणगुणिनोरनैकान्त्यं तत्राप्यभिन्नत्वं दुर्वचं जातिगुणयोरैक्यप्रसङ्गात्, जात्यभिन्नं हि वस्तु जातिरेव तस्यैव गुणादभिन्नत्वे जातिरेव गुणः स्यात्, अस्त्विति न वाच्यम् अयं नीलः पटः नायं नील इति जातिसद्भावेऽपि गुणाभावव्यवहारदर्शनात्, कार्य्यमिथ्यात्वे साध्ये दृष्टान्तः साध्यविकलः, मृत्कार्यस्य घटस्य बाधादर्शनात् शुक्तिरूप्यदृष्टान्तपरिग्रहेऽप्यनैकान्त्यं, हेतोर्घटेऽपि वृत्तेः प्रतिपन्नोपाधौ बाधितत्वेन सोपाधिकं च, कार्यग्राहिप्रमाणबाधितत्वं च, तृतीये च सूत्रे यस्य कारणे पूर्वं सत्त्वं नास्ति न तत्ततो जायते यथा सिकतासु तैलमित्यनन्यत्वे युक्तिरुक्ता, इयं च कार्यमिथ्यात्ववादिनोऽनुपपन्ना रज्जौ प्रागसतः काल्पनिकसर्पस्यारोपदर्शनात्, प्रागपि सोऽस्ति चेत् प्रतीयेत, काल्पनिकानामर्थानां प्रतीयमानतयैव हि सत्त्वम् । ननु कल्पिताकारोपहितमधिष्ठानं कार्यं तत्राधिष्ठानस्वरूपं प्राङ् नास्ति चेत् न तत्र

कार्यकल्पना भवतीति सूत्रार्थ इति चेत् तन्नु निरधिष्ठानभ्रमासम्भवनिराकरणेन दत्तोत्तरं भवति, यदुक्तं कारणस्य सत्त्वं प्रामाणिकं कार्यं च सदेवावभासते तत्र सत्त्वद्वयानुपलम्भात्सन्मात्रातिरिक्तः कार्याकारो मिथ्येति तदयुक्तं सामान्यरूपमुपाधिरूपमसद्व्यावृत्तिरूपं वा सत्त्वं विशेषणविशेष्ययोः साधारणं दृष्टमिति तावता विशेषणमिथ्यात्वासिद्धेः, न हि दण्डिनि स्पन्दमाने स्पन्दमानत्वमेकं दृष्टमिति दण्डदेवदत्तयोरनन्यत्वम् अतो मृषावादाभिमतमनन्यत्वमनुपपन्नम्॥ औपाधिकभेदाभेदवादेऽपि परिणामास्पदस्योपाधेश्च ब्रह्मणश्च भिन्नाभिन्नतयाऽनन्यत्वं वाच्यं तत्र खण्डगतशृङ्गलोमादीनां खण्डादनन्येन मुण्डेनानत्वग्रज्जगद्ब्रह्मणोरनन्यत्वममुख्यम् ननु न केवलं खण्डमुण्डयोरिव भिन्नाभिन्नत्वमात्रमचिद्ब्रह्मणोः किन्तु ब्रह्मणः शक्तिरूपत्वादुपाधेः, यथाऽग्नेरौष्ण्यादिः, अतः शक्तिशक्तिमद्रूपेणोपाधिब्रह्मणोर्भिन्नाभिन्नत्वाज्जगतो ब्रह्मानन्यत्वमिति । उच्यते शक्तिर्नाम किं सामर्थ्यपर्य्यायो ब्रह्मधर्मविशेष? उत सूक्ष्मावस्था प्रकृतिरेव? आद्ये ब्रह्मणोनिर्विकारत्वश्रुतिविरोधः, ब्रह्मणोमृत्पिण्डनिर्विशेषत्वात्, मृत्पिण्डो हि घटादिपरिणामशक्तियुक्तो विकारीत्युच्यते, द्वितीये तु खण्डकार्यस्य शृङ्गादेर्मुण्डादनन्यत्ववदमुख्यत्वम् अतस्तदनुपपन्नम् । यादवप्रकाशमतेऽपि भोक्तृभोग्यनियन्तृणां ब्रह्मांशत्वाभ्युपगमान्महदादिकार्याणां भोक्तृनियन्तृभ्यामनन्यत्वमयस्कार्यस्य रूपस्य सुवर्णरजताभ्यामिवानुपपन्नं, महदादीनां प्रकृतेरनन्यत्वे ब्रह्मकारणवादासिद्धिः, सन्मात्रब्रह्मणोऽनन्यत्वं सच्छब्दप्रवृत्तिनिमित्तविशेषनिरूपणाच्छिथिलीभवति, अबाध्यत्वादिकं हि प्रवृत्तिनिमित्तत्वेन वर्तते जगत्सतोऽनन्यदित्युक्ते जगदबाध्यमित्युक्तं भवति, ततश्च ब्रह्मानन्यत्वमनुक्तं स्याद्यस्य भाव एव यदुपलब्धिस्तत्तस्य कारणं तदवस्थतन्त्वादिभाव एव प्रावरणादिकार्यदर्शनात्तन्त्वादिकं प्रावरणादेः कारणम्, एवं तत्कारणभूते तन्तावपि न द्रव्यान्तरं कारणमिति द्रव्यान्तरकल्पकतया पराभिमतस्य कार्यभेदस्यान्यथासिद्धिपरं द्वितीयसूत्रं व्याख्यातं तदयुक्तं पूर्वपक्षयुक्तीनामन्यथासिद्धेराद्यसूत्र एव विवक्षितत्वात् तद्विषयभूते वाक्यैकदेश एव विकारनामधेययोर्वाक्पूर्वकसर्वव्यवहारास-

द्ध्यर्थतोपपादनात्, अतस्तत्रानन्यत्वहेत्वन्यथासिद्धावुक्तायामनन्यत्वनियामकहेतुपरत्वं द्वितीयस्य युक्तम् इदं सत् इदं सदिति कार्यस्य सर्वस्य सत्त्वविषयप्रतीतिः सर्वैरविभज्यमानं सन्मात्रमुपस्थापयति तदेव सन्मात्रं ब्रह्म अतो ब्रह्मानन्यत्वमिति प्रत्यक्षादेवानन्यत्वोपपादनपरं सत्त्वाच्चावरस्येति सूत्रं व्याख्यातं तदत्यन्तानुपपन्नं, "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः सहैव सन्तं न विजानन्ति देवाः, न संदृशे तिष्ठति रूपमस्य हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति क इत्था वेद यत्र सः, तं दुर्दर्शं गूढमनुप्रविष्टम् अध्यात्मयोगाधिगमेन देवं मत्वेत्यादिभिश्श्रुतिभिः प्रत्यक्षाद्यगोचरत्वाभिधानात्, योगैकदृश्यत्वाभिधानाच्चादृश्यत्वादिविषयं शास्त्रमीश्वरविषयं न तु सन्मात्रब्रह्मविषयमिति चेन्न यत्तदद्रेश्यमग्राह्यं यद्भूतयोनिं परिपश्यन्ति धीराः तपसा चीयते ब्रह्म ततोऽन्नमभिजायत इति कृत्स्नोपादानस्य ब्रह्मण एवादृश्यत्वाद्यभिधानादीश्वरातिरिक्तब्रह्मणोऽनिष्प्रमाणकत्वात्, कारणवाक्यानां च निर्विषयत्वप्रसङ्गाच्च, सद्द्रव्यं हि प्रत्यक्षसिद्धमवस्थाविशेषाच्च द्रव्यानन्यत्वं च अनन्यत्वसाधकयुक्तिभिः सिद्धं किमत्र वेदान्तकृत्यम्, अतः सूत्राणां वक्ष्यमाण एवार्थ उपपन्नः ॥

स्नू० तत्र काणादाः प्राहुः—न कारणात्कार्य्यस्यानन्यत्वं सम्भवति विलक्षणबुद्धिबोध्यत्वात्, न खलु तन्तुपटमृत्पिण्डघटादिषु कार्य्यकारणविषया बुद्धिरेकरूपा, शब्दभेदाच्च, न हि तन्तवः पट इत्युच्यन्ते, पटो वा तन्तव इति, कार्य्यभेदाच्च, न हि मृत्पिण्डेनोदकमाह्रियते घटेन वा कुड्यं निर्मीयते, कालभेदाच्च, पूर्वकालं च कारणम्, अपरकालं च कार्य्यम्, आकारभेदाच्च पिण्डाकारं कारणं, कार्य्यं च पृथुबुध्नोदराकारं, तथा सत्यामेव मृदि घटो नष्ट इति व्यवह्रियते, संख्याभेदश्च दृश्यते बहवस्तन्तवः एकश्च पटः, कारकव्या-

Digitized by Google

पारवैयर्थ्यं च, कारणमेव चेत्कार्य्यं किं कारकव्यापार-
साध्यं स्यात्,

टी० काणादा-वैशेषिकाः, विलक्षणबुद्धिबोध्यत्वं, शब्दभेदः, कार्य्य-
भेदः, कालभेदः, आकारभेद, परिमाणभेदः, भावाभावविरोधः, संख्याभेदः,
कारकव्यापारवैयर्थ्यं, नित्यानित्यविभागानुपपत्तिश्चेति हेतवः उच्यन्ते, न
कारणादित्यादिना, न खल्वित्यादिभिस्तत्तद्धेतुनिर्देशानन्तरभाष्यग्रन्थैर्हेत्व-
सिद्धिशङ्काव्यावृत्तिः क्रियते

सू० सत्यपि कार्य्ये कार्योपयोगितया कारकव्यापारेण भवि-
तव्यमिति चेत्, सर्वदा कारकव्यापारेण नोपरन्तव्यं सर्वस्य
सर्वदा सत्त्वेन नित्यानित्यविभागश्च न स्यात्, अथ कार्य्यं
सदेव पूर्वमनभिव्यक्तं कारकव्यापारेणाभिव्यज्यते अतः-
कारकव्यापारार्थवत्त्वं नित्यानित्यविभागश्चोच्यते तदसत्

टी० सत्यपीति कार्योपयोगितया-उदकाहरणादाकार्योपयोगित-
तयेत्यर्थः, कार्य्योपयोगः सामर्थ्योत्पादनद्वारेण वा ? साक्षाद्वा ? तत्र वैशे-
षिकैः शक्त्यनभ्युपगमात्साक्षादुपयोगः परिशेष्यत इति तत्र दूषणमुक्तं तद-
सदित्यादि ।

सू० अभिव्यक्तेरभिव्यक्त्यन्तरापेक्षत्वेऽनवस्थानात्, अनपेक्षत्वे
कार्य्यस्य नित्योपलब्धिप्रसङ्गात्, तदुत्पत्त्यभ्युपगमे चास-
त्कार्य्यवादप्रसङ्गात् । किञ्च कारकव्यापारस्याभिव्यञ्जकत्वे
घटार्थेन कारकव्यापारेण करकादेरप्यभिव्यक्तिः प्रस-
ज्यते, संप्रतिपन्नाभिव्यञ्जकभावेषु दीपादिषभिव्यङ्ग्यवि-
शेषनियमादर्शनात्, न हि घटार्थमारोपितः प्रदीपः कर-
कादीन्नाभिव्यनक्ति, अतोऽसतः कार्य्यस्योत्पत्तिहेतुत्वेनैव

Digitized by Google

कारकव्यापारार्थवत्त्वम्, अतश्च सत्कार्य्यवादासिद्धिः। न च नियतकारणोपादानं सत एव कार्य्यत्वं साधयति कारणशक्तिनियमादेव तदुपपत्तेः ।

टी० किमभिव्यक्तिरुत्पद्यते ? उताव्यज्यते ? उताभिव्यञ्जनपेक्षा नित्ये ? ति विकल्पाभिप्रायेण दूषयति अभिव्यक्तेरित्यादिना, दूषणान्तरमाह "किञ्चे"ति, न चेति मृत्पिण्डे घटो न विद्यते चेदसत्त्वाविशेषात्तन्तुरपि घटचिकीर्षुणोपादीयेत, न च तथा क्रियते, अतः कारणविशेषोपादाननियमानुपपत्त्या कार्यं सदेवेत्यर्थः। परिहरति "कारणे"ति, घटो मृत्पिण्ड एव वर्त्तते न तन्तुष्विति नियमः कथं तदेव तत्सद्भावयोग्यमिति चेत्तदुत्पादनयोग्यं तदेवेति तस्यैवोपादाननियमो युक्त इत्यर्थः। एवमुपादानकारणनियमानुपपत्तिरूपं चोद्यं परिहृतम् ॥ अथ कारकव्यापारानुपपत्तिमुखेन चोदयति "नन्वि"ति, परिहरति–

भू० नन्वसत्कार्य्यवादिनोऽपि कारकव्यापारो नोपपद्यते प्रागुत्पत्तेः कार्य्यस्यासत्त्वात्, कार्य्यादन्यच्च कारकव्यापारेण भवितव्यं तच्चाऽन्यत्वाविशेषात्तन्तुगतकारकव्यापारेण घटोत्पत्तिरपि प्रसज्येत, नैवं यत्कार्योपादानशक्तं यत्कारणं तद्गतकारणव्यापारेण तत्कार्य्योत्पत्तिसिद्धेः । अत्राहुः कारणादनन्यत्कार्य्यं, न हि परमार्थतः कारणव्यतिरिक्तं कार्य्यं नाम वस्त्वस्ति अविद्यानिबन्धनत्वात्सकलकार्यतद्व्यवहारयोः, अतो यथा कारणभूतात् मृद्द्रव्याद्घटादिषु विकारेषूपलभ्यमानाद् व्यतिरिक्तं घटशरावादिकार्यं व्यवहारमात्रालम्बनं मिथ्या कारणभूतंमृद्द्रव्यमेव सत्यं, तथा निर्विशेषसन्मात्रात् कारणभूताद्ब्रह्मणोऽन्योऽहङ्कारादित्य-

वहाराालम्बन: कृत्स्न: प्रपञ्चो मिथ्या कारणभूतं सन्मात्रं ब्रह्मैव सत्यं, तस्मात्कारणव्यतिरिक्तं कार्य्यं नास्तीति कारणादनन्यत्कार्य्यं, न च वाच्यं शुक्तिकारजतादीनामिव घटादिकार्य्याणामसत्यत्वाप्रसिद्धेर्दृष्टान्तानुपपत्तिरिति यतस्तत्रापि युक्त्या मृद्द्रव्यमात्रमेव सत्यतया व्यवस्थाप्यते तदतिरिक्तं तु युक्त्या बाध्यते, का पुनरत्र युक्तिः, मृद्द्रव्यमात्रस्यानुवर्त्तमानत्वं तदतिरिक्तस्य च व्यावर्तमानत्वं, रज्जुसर्पादिषु ह्यनुवर्तमानस्याधिष्ठानभूतस्य रज्ज्वादेस्सत्यता व्यावर्तमानस्य च सर्पभूदलनाम्बुधारादेरसत्यता दृष्टा तथादनुवर्तमानमधिष्ठानभूतं मृद्द्रव्यमेव सत्यं व्यावर्तमानास्तु घटशरावादयोऽसत्यभूता: । किञ्च सत आत्मनो विनाशाभावादसतश्च शशविषाणादेरुपलब्ध्यभावादुपलब्धिविनाशयोगि कार्य्यं सदसद्भ्यामनिर्वचनीयमिति गम्यते, अनिर्वचनीयं च शुक्तिकारजतादिवन्मृषैव

टी० "नैवमि"ति, अनन्यत्वश्रुतीनाममुख्यत्वमभिमतम् अस्मिन् पक्षे सिद्धान्त्येकदेशिमुखेनोत्तरमाह "अत्राहु"रिति, वाचारम्भणमित्यादिवाक्यस्यार्थमभिप्रेत्याह "अतो यथे"ति, विकारेषूपलभ्यमानादित्यनेनानुवर्त्तमानत्वहेतुर्विवक्षितः। एकमेवाद्वितीयमित्यस्यार्थमाह "तथे"ति, अहङ्कारादिव्यवहारालम्बनमहर्मिति प्रथमोऽध्यास इति हि तेषां ग्रन्थः, आदि-शब्देन ज्ञेयमुच्यते ब्रह्मव्यतिरिक्तपरमार्थभूतकार्याभावस्तदनन्यत्व-शब्दार्थ इति भाव: । दृष्टान्तस्य साध्यविकलतां शङ्कते न च वाच्यमित्यादिना, परिहरति "यत"इति, यथा ज्वालावत् क्षणिकमित्युक्ते ज्वालाभेदस्याप्रत्यक्षत्वेन न तत्र साध्यवैकल्यं तद्वदित्यर्थः । का पुनरित्यादि सदसद्विलक्षणत्वं नाम मिथ्यात्वे हेत्वन्तरमाह "किञ्चे"ति, कार्य्यस्य सदसद्विलक्षणत्वे व्य-

तिरेकिणं हेतुमाह "सत आत्मन" इति, सदसद्विलक्षणत्वं मिथ्यात्वेऽन्वयि हेतुरिति दर्शयति "अनिर्वचनीयं चे"ति, सपक्षस्य शुक्तिरजतादेरनिर्वचनीयत्वं दर्शयति—

सू॰ तस्य चानिर्वचनीयत्वं प्रतीतिबाधाभ्यां सिद्धम् । किञ्च कार्य्यमुत्पादयत् मृदादिकारणद्रव्यं किमविकृतमेव कार्यमुत्पादयति? उतकञ्चनविशेषमापन्नं? नतावदविकृतमुत्पादयति सर्वदोत्पादकत्वप्रसङ्गान्नापि विशेषान्तरमापन्नं विशेषान्तरापत्तेरपि विशेषान्तरापत्तिपूर्वत्वेन भवितव्यं तस्या अपि तथेत्यनवस्थानात्, अविकृतमेव देशकालनिमित्तविशेषसम्बद्धं कार्य्यमुत्पादयतीति चेन्न देशादिविशेषसम्बन्धोऽपि ह्यविकृतस्य विशेषान्तरमापन्नस्य च पूर्ववन्न सम्भवति, न च वाच्यं मृत्सुवर्णदुग्धादिभ्यो घटरुचकदध्यादीनामुत्पत्तिर्दृश्यते शुक्तिकारजतादिवत् देशकालादिप्रतिपन्नोपाधौ बाधश्च न दृश्यते, अतः प्रतीतिशरणानां कारणात्कार्य्योत्पत्तिरवश्याऽऽश्रयणीयेति विकल्पासहत्वात्, किं हेमादिमात्रमेवस्वस्तिकादेरारम्भकम्? उत रुचकादिः? । अथ रुचकाद्याश्रयो हेमादिः? न तावद्धेमादिमारम्भकं हेमव्यतिरिक्तस्य कार्यस्याभावात्, स्वात्मानं प्रत्यात्मन आरम्भकत्वासम्भवाच्च, हेमव्यतिरिक्तं स्वस्तिकं दृश्यत इति चेत् न, हेमव्यतिरिक्तं तत, हेमप्रत्यभिज्ञानात्तद्तिरिक्तवस्त्वन्तरानुपलब्धेश्च, बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरत्वं साधितमिति चेन्नानिरूपितवस्त्वऽवलम्बनानां

-बुद्धिशब्दान्तरादीनां शुक्तिकारज[1]तबुद्धिशब्दादिवत् भ्रान्तिमूलत्वेन वस्त्वन्तरसद्भावासाधकत्वात् ॥

टी० "तस्य चे"ति,व्यावर्तमानत्वहेतोरुपाधिशङ्कापरिहाराय कार्यस्य दुर्निरूपतामनुग्राहकतर्करूपेणाह "किञ्चे"ति, सत्यं चेत् सुनिरूपं स्यादित्यर्थः, नापीति विशेषान्तरापत्तिः किं विकृतस्य? उत न? नोचेत्सर्वदा विशेषान्तरापत्तिप्रसङ्गः, विशेषान्तरापत्तिपूर्वकत्वे तस्यापि विशेषान्तरापत्तिपूर्वकत्वं तस्यापि तथेत्यनवस्थेत्यर्थः, अविकृतमेवेत्यादि विशेष-शब्दो देशकालनिमित्तैः प्रत्येकं सम्बध्यते, अविकृतस्य चेत् सर्वदा देशकालादिसमवधानं स्यात्, विकृतस्य चेदनवस्थेत्यर्थः । उक्ततर्कस्य प्रत्यक्षविरोधमाशङ्काह "न च वाच्यमि"ति, परिहरति "विकल्पासहत्वादि"ति, किं द्रव्यमात्रं कारणं? गुणाकारमात्रं? गुणाकारविशिष्टं द्रव्य? मिति विकल्प्याह तेषु प्रथमे शिरो दूषयति न तावदित्यादिना, समवायिकारणांशविषयं प्रत्यभिज्ञानमित्याशङ्काह "तदतिरिक्ते"ति, तर्हि तत्र व्यक्तिद्वयमुपलभ्येत न तथोपलब्धिरित्यर्थः । द्वितीयं शिरो दूषयति-

मू० नापि रुचकादि स्वस्तिकादेरारम्भकं, स्वस्तिके हि रुचकं पट इव तन्तवो भवताऽपि नोपलभ्यन्ते, नापि रुचकाश्रयभूतं हेम, रुचकाश्रयाकारेण हेम्नः स्वस्तिकेऽनुपलब्धेः, अतो मृदादिकारणातिरिक्तस्य कार्यस्यासत्यत्वदर्शनाद्ब्रह्मव्यतिरिक्तं कृत्स्नं जगत्कार्य्यत्वेन मिथ्याभूतं, तदिदं ब्रह्म यतिरिक्तमिथ्यात्वसुखप्रतिपत्तये काल्पनिकमृदादिसत्यत्वमाश्रित्य कार्यस्यासत्यत्वं प्रतिपादितं, परमार्थतस्तु मृत्सुवर्णादिकारणमपि घटरुचकादिकार्य्यवन्मिथ्याभूतं ब्रह्मकार्य्यत्वाविशेषात्, "ऐतदात्म्यमिदं सर्वं" "तत्सत्यं"

[1] शुक्तिकारजतशब्दबुद्ध्यादिवत् इति पा० ।

Digitized by Google

"नेह नानास्ति किञ्चन" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" "इन्द्रो मायाभिः पुरुरूप ईयत" इत्येवमादिभिः श्रुतिभिश्च ब्रह्मव्यतिरिक्तस्य मिथ्यात्वमवगम्यते, न चागमावगतार्थस्य प्रत्यक्षविरोधः शङ्कनीयः, यथोक्तप्रकारेण कार्यस्य सर्वस्य मिथ्यात्वावगमात्, प्रत्यक्षस्य सन्मात्रविषयत्वाच्च

टी० "नापी"ति, कार्ये समवायिकारणानुवृत्त्या तदुपलब्धिः परेणाभ्युपगम्यते, तत्र पटे तन्तव इव स्वस्तिके रुचकमुपलभ्येतेत्यर्थः । तृतीयं शिरो दूषयति "नापी"ति, रुचकाकारविशिष्टं कारणं चेत् स्वस्तिके रुचकाकारविशिष्टहेमोपलम्भप्रसङ्ग इत्यर्थः । एवमत्र केवलप्रमाणात्तर्कानुगृहीतं प्रमाणं प्रबलमिति प्रत्यक्षविरोधपरिहार इत्युक्तं भवति, अत इति कारणातिरिक्तवस्त्वनुपलब्ध्या न प्रत्यक्षबाध इत्यर्थः, तत एव न सोपाधिकत्वं पक्षेऽपि साधिन्वेनोपाधितत्वाभावादिति भावः । ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वे मृत्तिकादीनां सत्यत्वं व्याहतमित्यत्राह "तदिदमि"ति, न मृत्तिकासत्यत्वे तात्पर्यमपि तु ब्रह्मव्यतिरिक्तमिथ्यात्व एव तात्पर्यमित्यर्थः न केवलं ब्रह्मकार्यत्वेन जगतो मिथ्यात्वं सिध्यति । कण्ठोक्तमपीत्याह "ऐतदात्म्यमि"ति, ऐतदात्म्यमिदं सर्वमिति बाधार्थे सामानाधिकरण्यमिति भावः । आदित्यो यूप इत्यादिषु प्रत्यक्षेण बाधमभिप्रेत्य इहापि तमाशङ्क्याह "न चागमावगते"ति, परिहरति "यथोक्ते"ति, आदित्यो यूप इत्यादिवाक्यमन्यपरम् अत्र तूपक्रमोपसंहारादिलिङ्गैस्तात्पर्यमस्त्येवेति न प्रत्यक्षेण बाध इत्यभिप्रायेणाह "यथोक्ते"ति, अविरोधमाह "प्रत्यक्षस्ये"ति, । यद्वा किं शब्दतः प्रतीत्यभावात् प्रत्यक्षविरोधाद्वाऽन्यपरत्वं शङ्क्यत इत्यभिप्रेत्य शब्दतः प्रतिपत्त्यभावं परिहरति "यथोक्ते"ति, प्रत्यक्षविरोधं परिहरति "प्रत्यक्षस्ये"ति, विरोधमभ्युपगम्याह–

पश्यति यदि शाटको न वातव्योऽथ वातव्यो न शाटकः शाटको वातव्यश्चेति विप्रतिषिद्धं, मन्ये स वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति । 'सामर्थ्यादिति'। 'क्तक्तवतू निष्ठे'ति वचनात् अन्यस्योत्पन्नस्य निष्ठेति संज्ञाया अभावस्सामर्थ्यम् । 'आदिकर्मणीति'। कर्मशब्दः क्रियावाची एक फलोद्देशप्रवृत्तक्षणसमूहरूपा क्रिया, तत्राद्ये क्रियाक्षणेऽपवृक्तेपि धात्वर्थरूपायाः क्रियाया अनपवृक्तत्वाद्वचनं न्याय्या त्वाद्यपवर्गात् न्याय्या त्वेषा भूतकालता कुतः आद्यपवर्गात् आदिभूतक्रियाक्षणोपरक्तः तस्मिन्नेव चावयवे समूहरूपो धात्वर्थः परिसमाप्तः, उक्तं च ।

समूहः स तथा भूतः प्रतिभेदं समूहिषु ।
समाप्यते ततो भेदे कालभेदस्य सम्भवः ॥

इति, तथा च प्राकार्षीत्कटं देवदत्त इति लुङपि प्रयुज्यते कटावयवे वा कटशब्दो द्रष्टव्यः, ततः केषां चित्कटावयवक्षणानामपरिसमाप्तेः प्रकरिष्यति कटं देवदत्त इति लृट्प्रयोगोप्यविरुद्धः । अपर आह। ज्ञापकात्सिद्धं यदय'मादिकर्मणि क्तः कर्त्तरि च' 'उदुपधाद्भावादिकर्मणोरन्यतरस्या'मिति चाह तज्ज्ञापयति भवत्यादिकर्मणि क्त इति, नैतदस्ति ज्ञापकं, 'ञीतः क्तः' इति योयं वर्त्तमाने क्तस्तद्विषयमेतत्स्यात्, यदि तद्विषयमेव स्याद्वर्त्तमानग्रहणमेव कुर्यात् ॥

"सुयजोर्ङ्वनिप्" ॥ 'सुनोतेरिति'। सु स्रु गतौ सु प्रसवैश्वर्ययोरित्यनयोरेव निरनुबन्धकयोर्ग्रहणं प्राप्तम् अनभिधानादुभयपदिना साहचर्याद्वा न भवति, ङकारः सुनोतेर्गुणप्रतिषेधार्थः, इकार उच्चारणार्थः, पकारः स्वरार्थस्तुगर्थश्च ॥

"छन्दसि लिट्" ॥ 'आततानेति'। 'णलुत्तमो वे'ति णित्त्वपक्षे वृद्धिः। 'धातुसंबन्धे स विधिरिति'। धातुसंबन्धे प्रत्यया इत्यधिकारात्, लिट इकारटकारौ विशेषणार्थौ, लिटः कानज्वा लिट्यभ्यासस्योभयेषामित्यादौ ल इत्युच्यमानेन्येषामपि लङादीनां ग्रहणं स्यात्, निरनुबन्धकत्वादस्यैव ग्रहणं भविष्यति, परोक्षे लिटोपि तर्हि न प्राप्नोति, टकारष्टेरेत्वार्थश्च ॥

"लिटः कानज्वा" ॥ 'चिक्यान इति'। चिञ् चयने विभाषा चेरिति कुत्वम्। एरनेकाच इति यणादेशः। 'न च भवतीति'। वावचनस्य प्रयोजनं दर्शयति, वासरूपविधिश्च लादेशेषु नास्ति हशश्वतोर्लङ् चेति वचनादित्युक्तम्। नन्वनन्तरसूत्रविहितस्य लिटो नित्यमादेशोऽस्तु यस्तु छन्दसि लुङ्लङ्लिट इति लिट् तत्र तिङां श्रवणं भविष्यति, न। तस्य धातुसम्बन्धविषयत्वादधातुसम्बन्धे तिङां श्रवणं न स्यात् लिण्मात्रस्य च ग्रहणमित्यनन्तरमेव वक्ष्यति। 'पूर्वस्यैवेत्यादि'। प्रत्ययान्तरं तु कानज् न भवति वावचनाद्वासरूपविधिनैव लुङादीनां सिद्धत्वादिति भावः। 'लिण्मात्रस्येति'। भाष्ये त्वनन्तरस्यैव लिटोऽयमादेशो लिड्ग्रहणं च प्रत्ययान्तरत्वं मा विज्ञायीति, वावचनं चोत्तरार्थमिति स्थितं कानचश्चित्करणं स्वरार्थं कित्करणं किमर्थं नासंयोगाल्लिट् किदित्येव सिद्धत्वेन ईजानस्तेपान इत्यादौ संप्रसारणैत्वाभ्यासादिलोपादिकार्यं भविष्यति संयोगान्तार्थं, बन्ध बन्धने वृत्तस्य यद्वद्धानस्य, त्वमर्णवान् बद्धाना अरम्णा अत्रानिदितामिति नलोपः छान्दसत्वादभ्यासधकारस्य हलादिशेषेण निवृत्त्यभावे झलां जश् झशीति जश्त्वं दकारः। ननु छान्दसः कानच् लिट् च छन्दसि सार्वधातुकमपि भवति छन्दस्युभयथेति वचनात् तत्र सार्वधातुकमपिदिति ङित्त्वं ङितीत्युपधालोपो भविष्यति, न च संयोगान्तेषु कित्त्वङित्त्वयोर्विशेषोऽस्ति, ऋकारान्तगुणप्रतिषेधार्थं तु, ऋच्छत्यृतामिति ऋकारान्तानां प्रतिषेधविषये गुण आरभ्यते स यथेह भवति परितस्तरे इति एवमिहापि स्यात् परितिस्तिराणा इति तस्मात्कित्करणं, कित्करणसामर्थ्याद्भाषायामपि कानजस्तीत्येतत्तु भाष्यविरोधादुपेक्ष्यम् ॥

"क्वसुश्च" ॥ क्वसोरुकार उगित्कार्यार्थः, जक्षिवानित्यादावुगिदचामिति नुम्, उपसेदुषीत्यादावुगितश्चेति ङीप्, वसोस्संप्रसारणमित्यत्र सामान्यग्रहणमप्युकारस्य प्रयोजनं, कित्करणं किमर्थं नासंयोगाल्लिट्किदित्येव सिद्धं संयोगान्तार्थम्। अञ्जेः आजिवान् उपधालोपो भवति छान्दसः क्वसुः लिट् छन्दसि सार्वधातुकमपि तत्र सार्वधातुकमपिदिति ङित्त्वं ङितीत्युपधालोपो भविष्यति, ऋकारान्तगुणप्रतिषेधार्थन्तु, ऋच्छत्यृ-

Digitized by Google

तामित्ययं गुणः प्रतिषेधआरभ्यते स यथेह भवति तेरतुस्तेरुरिति तथा तितीर्वानित्यत्रापि स्यात् कित्करणसामर्थ्याद्भाषायामपि क्वसुर्भवतीत्येत्तु भाष्यविरोधादुपेक्ष्यम्, उत्तरसूत्रानर्थक्यं च यदि भाषायामपि क्वसुर्भवति ॥

"भाषायां सदवसश्रुवः" ॥ 'आदेशविधानादेवेत्यादि'। यदि भाषायां सदादिभ्यो भूतसामान्ये लिण्न स्यात्ततस्ताद्रूशस्य लिट आदेशविधानमनुपपन्नं स्यादिति मन्यते, ननु च लिटः कानज्वेत्यत्र पुनर्लिड्ग्रहणस्य प्रयोजनमुक्तं योपि परोक्षे लिड्विहितस्तस्याप्ययमादेशो भवतीति तच्चेत्सत्यमिहापि यः परोक्षे लिट् स भाषायामपि सदादिभ्यः सम्भवतीति तस्यैवेदमादेशविधानं स्यात्, उच्यते, लङ्लिड्विषयेपि परस्तादनुवृत्तेर्भवतीति वक्ष्यति ततो नानेन परोक्षे लिट आदेशाभिधानं किन्तर्हि भूतसामान्ये ततश्चादेशविधानादेव लिडपि तद्विषयो ऽनुमातव्यः, यद्येवं तस्य पक्षे क्वस्वादेशः पक्षान्तरे तिङां श्रवणं प्राप्नोति, न वावचनेन क्वसुरभिसम्बध्यते क्वसुर्वा भवतीति किं तर्हि लडभिसम्बध्यते भाषायां सदादिभ्यो वा लिट् तस्य नित्यं क्वसुरादेशो भवतीति वृत्तिग्रन्थोप्यस्मिन्नेवार्थे योजनीयः। 'उपासददिति'। 'लृदित्त्वादङ्'। 'उपासीददिति'। 'पाघ्रादिसूत्रेण सीदादेशः। 'अनूषिवानिति'। यजादित्वात्सम्प्रसारणं शासिवसिघसीनां चेति षत्वम्। 'अन्ववात्सीदिति'। सस्यार्द्धधातुकेइति तत्वम्। 'अनूवासेति'। लिट्यभ्यासस्योभयेषामित्यभ्यासस्य सम्प्रसारणम्। 'लुङ्विषयेपि परस्तादनुवृत्तेर्भवतीति'। अन्यथा भूतसामान्ये लुङ्विहितस्तत्रैव धातुविशेषेनेनादेशविधानेनानुमितो लिडपवादः, तथा भूतविशेषे लङ्लिटो लुङ एवापवादो सदादिभ्यस्तु भूतविशेषे एतत्सूत्रविहितं च कार्यं प्राप्नोति लङ्लिटो च अपवादविप्रतिषेधाल्लङ्लिटावेव स्याताम् ॥

"उपेयिवाननाश्वाननूचानश्च" ॥ 'उपपूर्वादिणः क्वसुरिति'। निपात्यतइत्यर्थः। लिडादेशश्चायम्। अन्यथा द्विर्वचनाभ्यासदीर्घत्वे अपि निपातयितव्ये स्यातां तथा ग्राममुपेयिवानित्यत्र न लोकाव्ययेति षष्ठीप्रतिषेधो न स्यात्। 'द्विर्वचनमिति'। इडागमात्पूर्वं नित्यत्वात्क्रियतइत्यर्थः। 'अभ्यासदीर्घत्वमिति'। 'दीर्घइणः किती'त्यनेन। 'तत्सामर्थ्यादिति'।

यदि ह्ये आदेशः स्याद्दीर्घविधानमनर्थकं स्यादेकादेशेनैव दीर्घस्य सिद्धत्वात्, ननु चाभ्यासदीर्घत्वस्येयतुरित्यादिरवकाशः स्यात् अत्र हि इइ अतुस् इति स्थिते दीर्घत्वमेकादेशश्च प्राप्नोति इणो यणिति यणादेशश्च तत्र वार्णादाङ्गं बलीय इति बह्वाश्रयत्वेनैकादेशस्य बहिरङ्गत्वाद्वा यणेव भवति ततश्च दीर्घविधानमर्थवद्भवति, एवं मन्यते अत्रापि पूर्वपरविधिरेकादेशः पूर्वविधिरिति तत्र कर्त्तव्ये यणादेशस्य स्थानिवत्त्वात्स्याद्वैकादेशः तदेवमभ्यासदीर्घत्वमनवकाशत्वात्सवर्णदीर्घत्वं बाधतइति तस्मात्सूक्तं तत्सामर्थ्यादेकादेशप्रतिबन्ध इति। 'तत्रेति'। एवं सतीत्यर्थः। 'स निपात्यतइति'। निपातनाश्रयणमिडर्थम्। अन्यत्सर्वं पूर्वत्रैवेण्ग्रहणादेव सिद्धमित्यर्थः, यदि तर्हीडर्थमेतन्निपातनं संप्रसारणविषयेपि प्राप्नोति अत्र वलादेरिति विशेषानुपादानात् यथा वक्ष्यति नित्यश्चायं वल्निमित्तो विघातीति तत्राह। 'क्रादिनियमात्प्राप्तश्चेति'। चशब्दो हेतौ नात्रापूर्व इड्विधीयते किं तर्हि योयं वलादिलक्षण इट् क्रादिनियमेन प्राप्तो 'वस्वेकाजाद्घसा' मिति नियमेन प्रतिषिद्धः स एव प्रतिप्रसूयते प्रतिबन्धापनयनेन पुनः प्रवर्त्त्यते तेनाजादावतिप्रसङ्गो न भवतीत्यर्थः, अन्ये त्वभ्यासदीर्घत्वे कृते धात्विकारस्य व्यञ्जनं यणादेशन्निपातयन्ति ईय्वस् इति स्थिते वस्वेकाजाद्घसामित्येवेट् सिद्धः स च वलादिलक्षण इति नास्त्यतिप्रसङ्गः। अपर आह। पूर्वसूत्रएवेण्ग्रहणं कर्त्तव्यं नार्थो निपातनाश्रयणेन, अत्र यदुक्तमीयतुरित्यत्राभ्यासदीर्घत्वे कृते एकादेशात्पूर्वं वार्णादाङ्गं बलीय इति यणि कृतेपि तस्य स्थानिवत्त्वादेकादेशः प्राप्नोति, ततश्चावश्यमभ्यासदीर्घत्वेन बाधितव्य एकादेश इति तत्, नहि स्थानिवद्भावेन रूपमतिदिश्यते रूपाश्रयश्च पूर्वपरयोरेकादेशो न यकारस्य भवितुमर्हति, किञ्च यणादेशेन बाधितस्यैकादेशस्य पुनस्स्थानिवद्भावेनापि प्रवृत्त्यभावो बाधितत्वादेव किमतो यद्येवमिदं ततो भवति, इणः क्वसौ विहिते द्विर्वचनं च प्राप्नोति वस्वेकाजाद्घसामितीडागमश्च किमत्र कर्त्तव्यं परत्वादिट् नित्यं द्विर्वचनं कृतेपीटि प्राप्नोत्यकृतेपि प्राप्नोतीति, इडपि नित्यः कृते द्विर्वचने ऽभ्यासदीर्घत्वे एकादेशे च एकाच्त्वात्प्राप्नोति इदा-

नीमेव ह्युक्तमभ्यासदीर्घत्वेन न बाधितव्य एकादेश इति तदेवमुभयोर्नित्ययोः परत्वादिट् द्विर्वचनमभ्यासदीर्घत्वं परस्य यणादेशःईयतुरित्यादिवत्सिद्धमुपेयिवानिति, बिभिद्वानित्यादौ नित्यत्वात्पूर्वन्द्विर्वचनमेव भवति। 'न चात्रोपसर्गस्तन्त्रमिति'। एवमाचार्याणामुपदेश इति भावः। '[1]अनुपसर्गाच्चेति'। ईयिवांसमतिस्रिध इति हि छन्दसि दृश्यते। 'लुङादयो भवन्तीति'। लङ्लिड्विषयेपि परस्तादनुवृत्तेरयं विधिर्भवतीति दर्शयति। 'उपागादिति'। इणो गा लुङि गातिस्थाघुपाभूभ्य इति सिचो लुक्। 'उपैदिति'। अदादित्वाच्छपो लुक् आडजादीनामाटश्च। 'उपेयायेति'। तिपो णलि वृद्ध्यायादेशौ द्विर्वचनेचीति स्थानिवद्भावादिकारस्य द्विर्वचनम् अभ्यासस्यासवर्णे। 'अश्नातेरिति'। अश भोजने। 'नञ्पूर्वादिति'। तेनान्यपूर्वात्केवलाच्च न भवति। 'नाशीदिति'। तिपि सिचि नेटीति वृद्धिप्रतिषेधः आडजादीनामाटश्च नञा सह सवर्णदीर्घत्वम्। 'नाशेति'। तिपि णलि द्विर्वचने अत आदेरित्यभ्यासदीर्घः, नञा परेण च सवर्णदीर्घत्वम्। 'वचेरिति'। ब्रुवो वचिरित्यस्य तथा च लङ्यन्वब्रवीदित्युदाहरिष्यते, अन्ये तु वच परिभाषणइत्यस्यापि ग्रहणमिच्छन्ति। 'कर्त्तरीति'। न भावकर्मणोः। एतच्च निपातनाल्लभ्यम्। 'अन्ववोचदिति'। वच उम्। 'अन्वब्रवीदिति'। ब्रुव ईट्। 'अनूवाचेति'। पूर्ववदभ्याससंप्रसारणम्।

"लुङ्" ॥ इह भूतसामान्ये लुङ् विधीयते तस्य विशेषे ऽनद्यतने लङ्लिटावपवादौ तद्विषयेपि लुङ् दृश्यते, आगमामघोषात् अपामपयः अशेयिष्महि, पूतीकतृणेषु अभूत्पो विबुधसखः परन्तप इति चिरवृत्तं कथयतः प्रयुञ्जते, नैष दोषः, विशेषे सामान्यमस्ति तत्र विशेषाविवक्षायां सामान्याश्रयणेन वस्तुतोनद्यतनेपि लुङुपपद्यते तद्रूपविवक्षायामेव तु लङ्लिटौ, विवक्षोपारूढो ह्यर्थः शब्दप्रयोगनिमित्तं न वस्तुतः सन्निति गतमेतत्। 'वसेरिति'। वस निवासे रात्रेश्चतुर्थे यामे पृष्टो यदा वाक्यं प्रयुङ्क्ते तदा तस्यातिक्रान्तरात्रिप्रहरत्रयवसनमनद्यतनमिति लङ्प्रयोगे लुङ्वक्तव्यः, लङ्निवृत्तिपरं चैतत् लुङ् भूतसामान्यविवक्षया

[1] मुद्रितमूलपुस्तके निरुपसर्गाच्चेति पाठः।

Digitized by Google

सिद्धः । ‘जागरणसन्ततावित्ति’ । यदा प्रयोक्ता सकलमतिक्रान्तं रात्रिप्रहरत्रयं जागरितवान् तदा लुङ्प्रयोगः, यदा तु सुप्त्वा प्रबुद्धः प्रयुङ्क्ते तदा लङ्प्रत्यय एवेत्यर्थः ॥

“अनद्यतने लङ्” ॥ अनद्यतनइति तत्पुरुषपक्षे पर्युदासश्चेद्व्यामिश्रेपि प्राप्नोति अद्य श्वो वा भुक्ष्महि, भवति ह्यद्यतनानद्यतनसमुदायोऽद्यतनादन्यः, प्रसज्यप्रतिषेधे तु योत्राद्यतनस्तदाश्रयः प्रतिषेधो भवति किं तु भूतसमान्ये प्राप्नोति भूतविशेषे हि प्रतिषेधः, न च सामान्यं विशेषो भवति, पर्युदासेप्ययन्दोषो द्रष्टव्यः, बहुव्रीहौ न विद्यतेद्यतनो यस्मिन् सोनद्यतनो भूतो धात्वर्थः, तत्र वर्त्तमानाल्लङ् भवति ततश्चाद्यतनसमुदायेद्यतनस्यैकदेशस्य सम्भवान्न भवति प्रसङ्गः, भूतसामान्येपि न भवत्येव विद्यते हि सामान्ये विशेषः, अतो बहुव्रीहिरेवायं युक्त इत्याह । ‘अनद्यतनइति’ । ‘बहुव्रीहिनिर्द्देश इति’ । बहुव्रीहिणा विवक्षितार्थस्य प्रतिपादनं बहुव्रीहेर्वोच्चारणमित्यर्थः । यदि बहुव्रीहिनिर्द्देशः, एवं सत्यद्यतने प्राप्नोति नह्यद्यतने ऽद्यतनो विद्यते, अद्यतनेपि मुहूर्त्तादिरद्यतनो विद्यते मुहूर्त्तादावपि क्षणादिः कथं व्यपदेशिवद्भावेन यथा मुख्ये भेदे आधाराधेयभावो भवति तटे तिष्ठतीति तथेहापि समुदायावयवभेदाश्रयेण समुदायेद्यतने ऽवयवा अद्यतनाः सन्तीत्यनद्यतनो न भवतीत्युच्यते न तु तत्त्वतोवयवव्यतिरिक्तोत्र समुदाय आधारोस्ति, तदुक्तं हरिणा ।

कालस्याप्यपरं कालन्निर्द्दिशन्त्येव लौकिकाः ।
न च निर्द्देशमात्रेण व्यतिरेकोनुगम्यते ॥

इति । ‘अद्य ह्य इति’ ॥ अद्य च ह्यश्चेत्यर्थः, गामश्वं पुरुषञ्च यमान इतिवच्चशब्दस्याप्रयोगः । ‘अभुक्ष्महीति’ । भुजोनवनइत्यात्मनेपदं महिङि लिङ्सिचावात्मनेपदेष्विति सिचः कित्त्वाद्गुणाभावः । चोः कुरिति कुत्वं गकारः, खरि चेति चर्त्त्वं ककारः, सिचः सस्य षत्वम् । ‘परोक्षे चेत्यादि’ । परोक्षशब्दोयमतीन्द्रियार्थे वर्त्तते लोकविज्ञाते लोकप्रसिद्धे प्रयोक्तृदर्शनविषये लङन्तस्य शब्दरूपस्य यः प्रयोक्ता तस्य दर्शनविषये लङ् वक्तव्यः, ननु विप्रतिषिद्धमिदं यदि परोक्षः कथन्दर्शनविषयः, अथ दर्शनविषयः

कथं परोक्षः, शक्यदर्शनत्वाद्दर्शनविषयः क्वचिद्व्यासङ्गादननुभूतत्वात्परोक्ष इति विरोधाभावः । 'अरुणदिति' । रुधिर आवरणे रुधादित्वात् श्नम् तिपो हल्ङ्यादिना लोपः साकेतरोधस्तदानीं प्रयोक्तुर्दर्शनविषयः शक्यदर्शनत्वात् लोकप्रसिद्धश्च क्वचिद्व्यासङ्गादननुभूतत्वात्परोक्षश्च । परोक्ष इति किम् । उदगादादित्यः, इणो लुङ्गादेशादिकार्यम् । 'लोकविज्ञातइति' । किं चकार कटन्देवदत्तः । 'प्रयोक्तुर्दर्शनविषय इति' । किं जघान कंसं किल वासुदेवः हन्तेः परोक्षे लिट् द्विर्वचनम् अभ्यासाच्चेति कुत्वं हकारस्य घकारः कंसवधश्चिरकालान्तरवृत्तत्वादिदानीं प्रयोक्तुर्दर्शनविषयो न भवति यस्तु कंसवधेन तुल्यकालः प्रयोक्ता स लङमेव प्रयुक्तवान् आहत कंसं वासुदेव इति, मूलोदाहरणेपि प्रयोक्ता साकेतरोधेन तुल्यकालो वेदितव्यः, तस्यैव ह्यसौ दर्शनविषयो नान्यस्य ॥

"अभिज्ञावचने लृट्" ॥ 'वत्स्याम इति' । वसेर्लृट् मस्, स्यतासी लृलुटोरिति स्यप्रत्ययः, सस्यार्द्धधातुकइति सस्य तकारः, अतो दीर्घो यञीति दीर्घः । 'वचनग्रहणमित्यादि' । असति वचनग्रहणे ऽभिज्ञाशब्दएवोपपदे स्यात् तस्मिँस्तु सति यावन्तोभिज्ञानवचनास्तेषु भवति । 'बुद्ध्यसे चेतसइति' । अर्थप्रकरणादिना स्मृतिरूपे ज्ञाने यदानयोर्वृत्तिस्तदात्रापि भवतीति भावः ॥

"न यदि" ॥ यदीति सति सप्तमीयम्, अभिज्ञावचनं चानुवर्त्तते तेन यत्र यच्छब्दोस्ति तत्र यदभिज्ञावचनं तन्नियोगतो यच्छब्देन सहितं भवतीत्यभिप्रेत्याह । 'यच्छब्दसहित इत्यादि' । 'अवसामेति' । वसेर्लङ् मस् नित्यङ्कित इति सलोपः दीर्घः, वासमात्रमित्यादिनोत्तरसूत्रस्य नायं विषय इति दर्शयति, यदि तत्रापरं किञ्चिल्लक्ष्यमपेक्ष्येत तदोत्तरसूत्रेण पाक्षिको विधिस्स्यात् तच्च नेष्यते तस्मान्न तस्य विषयः ॥

"विभाषा साकाङ्क्षे" ॥ 'उभयत्र विभाषेयमिति' । प्राप्ते चाप्राप्ते च, असति यच्छब्दे ऽभिज्ञावचने लृडिति लृटि प्राप्ते सति यच्छब्दे प्रतिषेधे प्राप्ते, आकाङ्क्षणमाकाङ्क्षा आकाङ्क्षया सह वर्त्तते साकाङ्क्षः, आकाङ्क्षा च चेतनावतो धर्मः, तस्मात्साकाङ्क्ष इत्येतत्प्रयोक्तृविशेषणन्तेन

सकर्मक इत्यादिवत्समासः । 'साकाङ्क्षश्चेत्प्रयोक्तेति' । अङ्गयुक्तं तिङाकाङ्क्षमित्यत्र तु प्रयोक्तृगताकाङ्क्षा आरोपेण तिङन्तमाकाङ्क्षमिति वक्ष्यते, इह तु मुख्ये प्रयोक्तरि सम्भवति गौणकल्पनया धात्वर्थविशेषणमयुक्तमिति भावः । ईदृशे पुनर्विषये प्रयोक्ता साकाङ्क्षो भवतीत्याह । 'लक्ष्यलक्षणयोः संबन्ध इति' । यत्रैको धात्वर्थो लक्ष्योपरो लक्षणन्तत्र द्वयोर्लक्ष्यलक्षणभावेन संबन्धे सति प्रयोक्तुराकाङ्क्षा भवति तत्र न वाक्यमात्रं प्रतिपाद्य प्रयोक्ता चरितार्थो भवति किन्तु तेन प्रसिद्धेन भोजनादिकं स्मारयितुं प्रवर्त्तते ॥

"परोक्षे लिट्" ॥ परोक्षशब्दोयमतीन्द्रियवाची प्रसिद्धः, व्युत्पत्तिस्तु परमक्ष्णः परोक्षं, मयूरव्यंसकादित्वात्समासः, अच्प्रत्यन्ववपूर्वादित्यत्राजितियोगविभागादच् समासान्तः, वृत्तिविषये चाक्षिशब्दः सर्वेन्द्रियवचनो न चक्षुःपर्यायः, अन्यथेन्द्रियान्तरविज्ञातं वस्तु परोक्षमापद्येत, एवं च कृत्वा दर्शनपर्यायोक्षिशब्दो न भवतीत्यक्ष्णोदर्शनादित्येवाच् समासान्तोस्तु । अन्ये तु प्रतिपरसमनुभ्योक्ष्ण इति शरत्प्रभृतिषु पाठादच् समासान्त इत्याहुः । स च यद्यप्यव्ययीभावे विधीयते तथापि परशब्देनाव्ययीभावासम्भवात्समासान्तरे विज्ञायते, एवं तु क्रियायां परोक्षायामिति भाष्यप्रयोगे टिल्लक्षणो ङीप् प्राप्नोति, तस्मादजन्त एवायन्तत्र परतः परशब्दस्य परोभावोस्मादेव निर्देशाद्भवति परशब्दादुत्तरस्याक्षिश ब्दस्यादेरुत्वं वा । 'ननु चेत्यादि' । एकफलोद्देशेन प्रवृत्तत्वादैक्यमिवापन्नो विततरूपः क्षणप्रवाहो धात्वर्थः, स कार्त्स्न्येनैकस्मिन्क्षणे न सम्भवतीति सद्वस्तुविषयैरिन्द्रियैर्न गृह्यते ततश्चैकैकस्य क्रियाक्षणस्य प्रत्यक्षत्वेपि समूहरूपो धात्वर्थः सर्वः परोक्ष एव, ततश्चाव्यभिचारादविशेषणमिति भावः । 'सत्यमेतदिति' । अनन्तरोक्तं मन्यते, किमर्थन्तर्हि परोक्षग्रहणमित्याह । 'अपि त्विति' । यत्र साधनशक्त्याश्रयभूतं फूत्कारसीत्कारादिविशिष्टं संरम्भरूपं द्रव्यं प्रत्यक्षं तत्र धात्वर्थ एव प्रत्यक्षाभिमानो लौकिकानामभिमानो मिथ्याज्ञानन्तद्व्यावृत्तये परोक्षग्रहणं, यदि तर्हि यत्र साधनशक्त्याश्रयन्द्रव्यं परोक्षं तत्र लिड् भवति तर्ह्युत्तमो न प्राप्नोति, तत्र हि बुद्धीन्द्रियशरीरादिसंघातः कर्त्ता स चात्मनः प्रत्यक्ष एव, परस्मैपदानामिति तु णलादेशवचनं णलुत्तमो वेति च छन्दसि

लुङ्लङ्लिटः, अत्यन्तापह्नवइति चापरोक्षे यो लिट् तद्विषयं भविष्यतीत्यत आह । 'उत्तमविषयेपि चित्तव्याक्षेपादिति' । मदस्वप्रादिभिश्चित्ते व्याक्षिप्ते भवति वै कश्चित्स्वकृतमेव न जानाति पश्चादेव त्वया कृतमिति पार्श्वस्थेभ्यः श्रुत्वा प्रयुङ्क्ते सुप्तोहं किल विललापेति किलेत्यज्ञानं सूचयति । 'अत्यन्तापह्नवइति' । अपह्नवोपलापः, कलिङ्गो नाम जुगुप्सितो देशः तत्र प्रविश्य त्वया चिरकालं स्थितमिति कश्चिदुक्तस्सन्नाह नाहं कलिङ्गं जगामेति, न केवलमवस्थानमेव प्रतिषिध्यते किन्तर्हि तद्धेतुभूतगमनमपीति भवत्यत्यन्तापह्नवः, तथा दक्षिणापथं प्रविश्यायाज्ययाजनादिकं त्वया कृतमिति कश्चिदुक्तः सन्नाह नाहन्दक्षिणापथं प्रविवेशेति, अत्राप्ययाज्ययाजनादेर्हेतुभूतः प्रवेश एव प्रतिषिद्धइत्यत्यन्तापह्नवः, क्वचिद्दक्षिणापथं प्रविष्टोसीति वृत्तावेव पठ्यते तत्र प्रविश्येदं कृतवानित्यर्थः ॥

"प्रश्ने चासन्नकाले" ॥ 'भूतानद्यतनपरोक्षइति वर्त्तत इति' । अयमर्थोनुवर्त्तत इत्यर्थः, न पुनरेवं विधस्समासः प्रकृतोस्ति । 'प्रष्टव्यः प्रश्न इति' । कर्मसाधनं प्रश्नशब्दन्दर्शयति, करणसाधने तु प्रश्नक्रियासाधनभूते धातावासन्नकाल इत्यर्थस्स्यात् तत्रासन्नकाल इत्यनर्थकं, न ह्यनुच्चारितात्प्रत्ययविधानम् उच्चारितश्चासन्नकाल एव भावसाधनेप्यासन्नकाले प्रश्ने वर्त्तमानादित्यर्थस्स्यात् ततश्चार्थान्तरवाचिभ्यो लङ् न स्यादतः कर्मसाधनोयं प्रश्नशब्दः, तत्र पञ्चवर्षाभ्यन्तरमासन्नकालं पञ्चवर्षातीतन्तु विप्रकृष्टकालमिति वर्णयन्ति ॥

"लट् स्मे" ॥ 'नलेन स्म पुराधीयतइति' । अधिपूर्वादिङः कर्मणि लकारः, कर्माविवक्षायां वा भावे नलेनेति कर्त्तरि तृतीया, अथ वा ऽधीयतइति कर्त्तरि बहुवचनम्, आत्मनेपदेष्वनत इत्यदादेशः, नलेनेति सहयोगे तृतीया, अन्ये तु व्याचक्षते पुराकल्पे नलाख्यन्तृणविशेषं हस्ते गृहीत्वाधीयाना अधीयते स्मेति ॥

"अपरोक्षे च" ॥ पूर्वसूत्रेण परोक्षे विधानादपरोक्षे न प्राप्नोतीत्ययमारम्भः, पूर्वसूत्रएव परोक्षग्रहणन्निवर्त्तिष्यते, यद्येवं तत्सम्बन्धाद-

नद्यतनग्रहणमपि निवर्त्तेत मानिवृतदित्येवमर्थमिद,न्द्वयोर्हि प्रकृतयोरे-कनिवृत्तिर्यत्नेन क्रियमाणा इतरस्यानिवृत्तिमनुमापयति ॥

"ननौ पृष्टप्रतिवचने" ॥ पृष्टमिति कर्मणि क्तः, पृष्टस्य प्रति-वचनं पृष्टप्रतिवचनम्, वृत्तौ तु वस्तुमात्रं दर्शितम् । 'प्रश्नपूर्वके प्रतिवचन-इति'। उदाहरणे पूर्वांशः प्रश्न उत्तर उदाहार्यं, पृष्टग्रहणमर्थकं प्रश्नपूर्व-कमेव प्रतिवचनं, तत्र, विरुद्धमपि वचनं प्रतिवचनं वचनाभिमुखं प्रतिवचन-मित्यपि सम्भवात्, तस्मात् पृष्टग्रहणमत्यन्तासन्नकाले चायं विधिरिष्यते तत्र निर्वृत्तयामपि पाकादिक्रियायान्तत्कृतस्य श्रमादेरनुवृत्तिः, एवं च श्रमादिदर्शनेन सैव क्रिया वर्त्ततइति शक्यं वक्तुमिति । वर्त्तमाने लडि-त्येव सिद्धेः प्रत्याख्यातमिदम् । ननौ पृष्टप्रतिवचनइत्यशिष्यं क्रियासमा-प्तेरविवक्षितत्वादिति ॥

"पुरि लुङ् चास्मे" ॥ 'अनद्यतनग्रहणमित्यादि'। लुङ्ग्रहणं चात्र लिङ्गं यदि हि भूतमात्रेयं विधिः स्यात् विभाषा लटो विधानात्तेन मुक्ते लुङपि भविष्यति किं लुङ्ग्रहणेन, अनद्यतनग्रहणानुवृत्तौ तु लटा मुक्ते लङेव स्यादिति कर्त्तव्यं लुङ्ग्रहणम् । 'अन्येपीति'। लङ्लिटावभिज्ञावचने लृट् अभिजानासि देवदत्त वत्स्यन्तीह पुरा छात्रा इति ॥

"वर्त्तमाने लट्" ॥ 'प्रारब्धोपरिसमाप्तश्चेति'। अधिश्रयणादि-रधःश्रयणपर्यन्त ओदनफलावच्छिन्नो विततरूपो व्यापारनिचयः पचेरर्थः, एवं सर्वत्र, स यावता कालेन निवर्त्तते स कालो वर्त्तमानः, तद्योगाद्वर्त्त-मानो धात्वर्थ इत्यर्थः, तेन निष्पन्नस्यार्थस्य भूतत्वादनिष्पन्नस्य च भावि-त्वान्निष्पन्नानिष्पन्नव्यतिरेकेण राश्यन्तरस्याभावाद्वर्त्तमानाभाव इति चोद्यं परिहृत, मिहाध्ययने प्रवृत्ता यदा भोजनादिक्रियां कुर्वन्तो नाधीयते तदा धीयतइति प्रयोगो न प्राप्नोति, नैष दोषः, आ फलनिष्पत्तेरध्ययनमपरि-समाप्तमन्तरालवर्ति तु भोजनादिकं नान्तरीयकं तस्यैव वावयवक्रिया,य-मपि भवान्मुक्तसंशयं वर्त्तमानकालं न्याय्यं मन्यते भुङ्क्ते देवदत्त इति, अत्राप्यवश्यं भुञ्जानो हसति जल्पति पानीयं वा पिबति तत्र चेद्युक्ता वर्त्तमानकालता इहापि युक्ता दृश्यताम् । उक्तं च

Digitized by Google

व्यवधानमिवोपैति निवृत्त इव दृश्यते ।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः ॥
न च विच्छिन्नरूपोपि स विरामान्निवर्त्तते ।
सर्वत्र हि क्रियान्येन सङ्कीर्णेवोपलभ्यते ॥
तदन्तरालदृष्टा वा सर्वत्रावयक्रिया ।
सादृश्यात्सति भेदे तु तदङ्गत्वेन गृह्यते ॥

इति । एतदप्यनेनैवोक्तं प्रारब्धापरिसमाप्तश्च वर्त्तमान इति । इह तिष्ठन्ति पर्वताः स्रवन्ति सिन्धव इति पर्वतादिस्थित्यादेः सर्वदाभावाद् भूतभविष्यदभावात्तत्प्रतिद्वन्द्विरूपस्य वर्तमानस्याप्यभाव इति लण् न प्राप्नोति, नैष दोषः, कालत्रयवर्त्तिनां राज्ञां याः क्रियाः पालनादिका भूतादिभेदेन भिन्नास्ताः पर्वतस्थित्यादेर्भेदिकाः, ततश्च ये सम्प्रति राजानस्तत्क्रियाभेदेन भिन्नायाः पर्वतादिस्थितेर्वर्त्तमानत्वमेवं च कृत्वा भूतभविष्यत्काल-योगोप्युपपद्यते तस्थुः पर्वता नलदुःष्यन्तादिकाले, स्थास्यन्ति पर्वताः कल्किविष्णुकाले, लटष्टकारष्टेरेत्वार्थः ॥

"लटः शतृशानचावप्रथमासमानाधिकरणे" ॥ शकारः सार्वधातुकसंज्ञार्थः, ऋकार उगित्कार्यार्थः, चकारः स्वरार्थः, प्रथमाशब्दस्सुपामाद्ये त्रिके प्रसिद्धः प्रथमाया अन्या ऽप्रथमा द्वितीयादिस्तत्र प्रत्ययग्रहणपरिभाषया तदन्तविधिः, अप्रथमान्तन्द्वितीयाद्यन्तमित्यर्थः, अधिकरणमभिधेयं समानं साधारणमभिधेयं यस्य तत्समानाधिकरणम् अप्रथमान्तेन समानाधिकरणमप्रथमासमानाधिकरणम्, तृतीयेति योगविभागात्समासः, द्विपदो वा बहुव्रीहिः अप्रथमासमानाधिकरणं यस्येति, यस्य च भावेनेति सप्तमी, अप्रथमासमानाधिकरणे लटि सति तस्य लट इति षष्ठ्यर्थे सप्तमी एष पर्युदासपक्षो दर्शितः, प्रसज्यप्रतिषेधपक्षे तु नञो भवतिना संबन्धः प्रथमाशब्देन प्रथमान्तं गृह्यते शेषं समानं, तत्राद्ये पक्षे कुर्वतोऽपत्यं कौर्वतः पाचतः कुर्वतो भक्तिः कुर्वद्भक्तिः कुर्वाणभक्तिरिति प्रत्ययोत्तरपदयोः शतृशानचौ न स्यातां नह्यत्र द्वितीयाद्यन्तेन सामानाधिकरण्यं नहि कुर्वतो देवदत्तस्य भक्तिः कुर्वतो देवदत्तस्याऽपत्यमित्यत्र समासतद्धितौ भवतः सापे-

त्त्वात् पदान्तरनिरपेक्षत्वे प्रथमान्तेन सामानाधिकरण्याभावः प्रसज्यप्रतिषेधे तु प्रथमान्तेन सामानाधिकरण्याभावाददोषः, अस्तु तर्हि स एव एवमपि कुर्वतो भक्तिरस्य कुर्वद्भक्तिः कुर्वाणभक्तिरत्र न प्राप्नोति ये चान्येऽपि समानाधिकरणवृत्तयस्तद्धितास्तेषु न स्यात् कुर्वत्तरः कुर्वाणतरः कुर्वद्रूपः कुर्वत्कल्प इति, पर्युदासेप्येष दोषो द्रष्टव्यः, एवं तर्हि प्रत्ययोत्तरपदयोश्चेति लक्षणशेषः कर्त्तव्यः तत्र पृथगुत्तरपदग्रहणमन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधतइति समासार्थाया विभक्तेर्लुकि कृते प्रत्ययलक्षणप्रतिषेधात्प्रत्ययापरत्वार्थं, ननु च प्रत्ययोत्तरपदयोः सतोः शतृशानचौ भवतः तयोश्च कृत्त्वात्प्रातिपदिकत्वे सति विभक्त्युत्पत्तौ सत्यान्तद्धिताः समासश्च समासे च सत्युत्तरपदं तदितरेतराश्रयं भवति, नैष दोषः, ङ्याप्प्रातिपदिकात्तद्धिताः ते लकारस्य कृत्त्वाद्भविष्यन्ति उत्तरपदेपि विधानसामर्थ्यात्तिङादेशं बाधित्वा लान्तस्य प्रातिपदिकत्वमाश्रित्य सुबुत्पत्तौ समास इति सिद्धम्, एवमपि वीक्षमाणस्यापत्यं वैक्षमाणिरित्यकृते शानचि अकारान्तत्वाभावादत इञोप्रसङ्गः पचतितरामित्यत्र शतृशानचौ प्राप्नुतः तथा पचतिरूपमित्यादौ तिङश्चेत्येतत्तु लङादिविषयमेव स्यात् तदेवं सर्वत्र दोषसद्भावे समासोपि तावत्याप्यो भवतीति पर्युदासमाश्रित्याह। 'अप्रथमान्तेन चेदित्यादि'। 'तस्येति'। लटः कथं, पुनर्लटो द्वितीयाद्यन्तेन सामानाधिकरण्यं यावता लः कर्मणि चेत्यनेन कर्तृकर्मणोर्विधीयमानो लकारः क्रियां प्रति गुणभूते कर्तृकर्मणी प्रतिपादयति तथा च क्रियाप्रधानत्वादाख्यातस्य क्रियान्तरयोगाभावाच्छक्त्यन्तरावेशाभावः, नहि भवति पचत्योदनं देवदत्तं पश्य पच्यते ओदनेन तृप्तः अपचदोदनन्देवदत्तं पश्य पच्यते ओदनेन तृप्त इति यथान्येषु कृत्सु पाकं पश्य पाकेन तृप्त इति, सत्यं, तिङ्भाविनो लकारस्यायं स्वभावः यदुक्तगुणभूते कर्तृकर्मणी प्रतिपादयति शत्रादिविषयस्य क्रियोपसर्जनकर्त्राद्यभिधानं ततश्च क्रियान्तरयोगे सति तन्निमित्तं द्वितीयाद्यन्तसामानाधिकरण्यमुपपद्यते, यद्यपि केवलस्य लटः प्रयोगाभावादप्रथमान्तेन सामानाधिकरण्यं न क्व चिदुपलब्धं तथापि तदादेशयोः शतृशानचोर्दर्श-

नात् स्थानिनो लकारस्यापि तद्योग्यत्वमनुमीयते तेन लटः प्रक्रियार्थं विहितस्य काल्पनिकप्रथमान्तेन सामानाधिकरण्यमस्तीति दोषाभावः। अथ लड्ग्रहणं किमर्थमादेशौ यथा स्यातां प्रत्ययान्तरं मा भूतामिति, नैतदस्ति, पूर्वसूत्रत एव लड्ग्रहणं स्वरयिष्यते तस्येहानुवृत्तस्यार्थात् षष्ठ्या· विपरिणामे तस्यैवादेशौ भविष्यतो न प्रत्ययान्तरमत आह। 'लडिति वर्तमाने पुनर्लड्ग्रहणमिति'। 'क्वचित्प्रथमासामानाधिकरण्येपि भवत इति'। अप्रथमासमानाधिकरणत्वाभावोप लक्षणमिदं तेन कौर्वतः कुर्वद्भिरित्यादयोपि भवन्ति । 'सन्निति'। अस् भुवि श्नसोरल्लोपः। 'विद्यमान इति'। विद सत्तायां दिवादिरनुदात्तेत् । 'जुह्वदिति'। 'नाभ्यस्ताच्छतु'रिति नुमभावः। 'माङ्याक्रोश इति'। माङि लुङोपवादः, तथा पुनर्लड्ग्रहणाद्योपि भूते लट् 'ननौ पृष्टप्रतिवचन' इति तस्यापि भवतो ननु मां कुर्वन्तं पश्य ननु मां कुर्वाणम्पश्येति, एतच्च ननौ पृष्टप्रतिवचनइत्यत्र भाष्यकारेणोक्तम्। 'केचिदित्यादि' न चैवम्पचन्तम्पश्येत्यादावपि विकल्पप्रसङ्ग इत्यत आह। 'व्यवस्थितविभाषा चेयमिति'। 'यथादर्शनमिति'। प्रथमासमानाधिकरणे विकल्पः पचन्तं पश्येत्यादौ प्रत्ययोत्तरपदयोश्च नित्यम्पचतितरामित्यादौ नैव भवतः, अन्यथा तिङोपि स्थानिवद्भावात्स्यात्प्रसङ्गः, न तर्हीदानीमिदं वक्तव्यमप्रथमासमानाधिकरणइति वक्तव्यं च किं प्रयोजनमित्यार्थं, नन्वेतदपि विभाषयैव सिद्धं, सत्यं, स एवार्थो वचनेन स्पष्टीक्रियते, एतेन संबोधने च लक्षणहेत्वोरिति च व्याख्यातम् ॥

"सम्बोधने च" ॥ 'हे पचन्निति'। संयोगान्तलोपस्यासिद्धत्वान्नलोपाभावः, अत्र सम्बोधने प्रथमा, अयमादेशश्चेत्युभयं मिलितं सम्बोधनं द्योतयति ॥

"लक्षणहेत्वोः क्रियायाः" ॥ 'लक्ष्यते चिह्न्यते येनेति'। चिह्नयतिरवधारयत्यादिवच्चुरादिषु द्रष्टव्यः। 'धात्वर्थविशेषणं चैतदिति'। नोपपदं क्रियाया इति वचनात्, उपपदं हि धातोर्भवति स च क्रियावचन इति क्रियाग्रहणमनर्थकमुपपदत्वे स्यात् क्रियायाश्च लक्षणापेक्षया कर्मत्वं हेत्व-

पेक्षया तु शेषत्वं तत्रोभयानुग्रहाय कर्मणोपि शेषत्वविवक्षया शेषलक्षणैव षष्ठी, वृत्तौ तु वस्तुमात्रं प्रादर्शि। 'क्रियाविषयाविति'। 'शयाना भुञ्जत इति'। अत्र शयनं लक्षणं भोजनस्य। 'तिष्ठन्तोनुशासतीति'। अत्रापि स्थानमनुशासनस्य। 'आर्जयन्वसतीति'। अर्ज प्रतियत्ने चुरादिराङ्पूर्वः। 'लक्षणहेत्वोरिति कर्मिति'। क्रियासम्बन्धिन्यर्थे वर्त्तमानादिति विज्ञायमाने लक्षणहेत्वोरपि भविष्यत इति प्रश्नः, अतिप्रसङ्गेन तूत्तरम्। 'पचति च पठति चेति'। अत्र द्वयोः क्रिययोरेकस्मिन्साधने समुच्चयात्तद्द्वारेण परस्परसम्बन्धोप्यस्तीत्युभयत्रापि प्रसङ्गः, यः कम्पते सोश्वत्थ इति बहुषु वृक्षेषु तिष्ठत्सु कम्पनेनाश्वत्थो लक्षते, तच्च द्रव्यं यदुत्प्लवते तल्लघ्विति, अत्राप्युत्प्लवनेन लाघवं गुणो लक्ष्यते निषदनं निमज्जनं तेन गौरवं गुणो लक्ष्यते, इह तु योधीयान आस्ते स देवदत्त इति आसिक्रियाया एवाध्ययनक्रियालक्षणं न देवदत्तस्य आसिक्रिया तु तस्य लक्षणम्। एवं यस्तिष्ठन्मूत्रयति स ब्राह्मणब्रुव इति अत्रापि स्थितिक्रिया मूत्रणक्रियाया एव लक्षणं सैव तु देवदस्याशौचादेर्लक्षणञ्च स्थितिक्रियेति सूत्रेणैव सिद्ध आदेशः कथं शयाना वर्द्धते दूर्वा आसीनं वर्द्धते विषमिति नह्यासनशयने वृद्धेर्लक्षणं किन्तर्हि स्वभावमात्रकथनमेतत्, भवति वै स्वभावाख्यानमपि लक्षणं यथा चैतन्यलक्षणं पुरुष इति। 'पूर्वनिपातव्यभिचारलिङ्गमिति'। 'द्वन्द्वे घि' अल्पाच्तरमिति यौ पूर्वनिपातौ तयोर्व्यभिचारे लिङ्गमित्यर्थः, तेन धूमाग्नी मृदङ्गशङ्खपणवा इत्यादिप्रयोगोपपत्तिः॥

"तौ सत्"॥ तौग्रहणं किमर्थं, संज्ञाविधिर्यथा स्यात् सदित्यस्य प्रत्ययस्य विधिर्माभूदिति, नैतदस्ति प्रयोजनं, पूर्वसूत्रे शतृशानचौ स्वरयिष्येते तत्सामर्थ्यात्तयोरनुवृत्तयोः संज्ञैव भविष्यति तत्राह। 'तौग्रहणमुपाध्यसंसर्गार्थमिति'। लट्स्थानिकत्वाद् वर्त्तमानकालविहितत्वं चोपाधिस्तेनोपाधिना ऽसम्बन्धार्थन्तौग्रहणमित्यर्थः, किं सिद्धमित्याह। 'शतृशानज्मात्रस्येति'। असति तौग्रहणे यादृशौ शतृशानचौ प्रकृतौ लट्स्थानिकौ वर्त्तमानकालौ च तादृशयोरेव संज्ञा स्यात् ततश्च लृडादेशयोर्न स्यात्, लृटः स्सद्वेत्येतत्तु वचनं सत्संज्ञकप्रतिरूपयोर्विधानार्थं स्यात् यथा अमी पिष्ठ-

पिण्डाः सिद्धाः क्रियन्तामिति तदाकाराः क्रियन्ते विहितयोस्तूत्तरकालं संज्ञा न सिध्यति ततश्च ब्राह्मणस्य पचन् ब्राह्मणस्य पचमाण इति समासप्रतिषेधो न स्यात् तस्यान्दशायां सत्संज्ञाया अभावात्, एवं भूतकालयोरपि न स्यात् वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वचनात् भूतेपि शतृशानचौ भवतः, एवं तत्रापि वर्त्तमानवदित्यतिदेशेन विधानमेव तयोर्भूते सिद्ध्यति न तु संज्ञा प्रत्ययाधिकाराद्धि प्रत्यय एवातिदिश्यते न संज्ञा, तथा ननौ पृष्टप्रतिवचनइत्यपि, लटः शतृशानचौ भवत इत्युक्तं तयोरपि संज्ञा न भवेत् तौग्रहणे सति तयोरपि संज्ञा भवति, ननु मां ब्राह्मणस्य कुर्वन्तम्पश्य ननु मां ब्राह्मणस्य कुर्वाणम्पश्येति, अथ क्रियमाणेपि तौग्रहणे कथमिव कालान्तरविहितयोः संज्ञा सिद्ध्यति यावता प्रकृतस्यैव वस्तुनस्सर्वनाम्ना परामर्शः, सत्यं, तौग्रहणसामर्थ्यात्तु विशेषणांशपरित्यागेन शतृशानचौ रूपमात्रं परामृश्यते ॥

"पूङ्यजोः शानन्" ॥ इहैते शानन्नादयो यदि लटोऽनुवृत्तिमाश्रित्य तस्यैवादेशाः क्रियेरन् वेति वक्तव्यं पवमानः यजमानः पवते यजतइत्यपि यथा स्यात्, वासरूपविधिना तिङो भविष्यन्ति, न लादेशेषु वासरूपविधिरस्तीत्युक्तं साधनाभिधानं साधनस्य चाभिधानं प्राप्नोति लः कर्मणि च भावे चाकर्मकेभ्य इति भावकर्मणोरपि प्रसङ्गः, परस्वरश्च न सिद्ध्यति कतीह पवमानाः, अदुपदेशाल्लसार्वधातुकमित्यनुदात्तत्वं प्राप्नोति आत्मनेपदसंज्ञा तङानावात्मनेपदमित्यात्मनेपदसंज्ञा च प्राप्नोति ततश्च परस्मैपदिभ्यश्चानश् न स्यात् कतीह नन्दमानास्तस्मादशक्या एवैते लादेशा विज्ञातुमिति मत्वाह । 'शानच्प्रत्ययो भवतीति' । शकारस्सार्वधातुकसंज्ञार्थः, नकारस्स्वरार्थः ।'यदीत्यादि' । न लोकाव्ययेत्यत्र स्वरूपस्य ग्रहणम्मन्यमानस्य प्रश्नः । 'तृन्निति प्रत्याहारनिर्द्देशादिति' । षष्ठीप्रतिषेध इत्यनुषङ्गः । 'द्विषश्शतुर्वावचनमिति' । द्विषोमित्र इति योयं शतृप्रत्ययस्तस्य प्रयोगे वा षष्ठी भवति प्रत्याहारेन्तर्भावाच्चित्यं प्रतिषेधे प्राप्ते वचनं यस्यापि तृन्निति स्वरूपग्रहणं तेनाप्येतद्वक्तव्यं पक्षे षष्ठी यथा स्यादित्यम्माभूदिति, शेषविज्ञानात्सिद्धं, कर्मणि शेषत्वेन विवक्षिते षष्ठीकर्मरूपेण विवक्षिते द्वितीयेति ॥

"ताच्छील्यवयोवचनशक्तिषु चानश्" ॥ 'मण्डयमाना इत्यादि'। मडि भूषायां भूष लङ्कारे चुरादौ असु क्षेपणे। पर्यासस्सन्नहनं, शिखापर्यायः शिखण्डशब्दः, वचनग्रहणं विस्पष्टार्थम् ॥

"इङ्धार्योः शत्रकृच्छ्रिणि" ॥ 'अकृच्छ्रः सुखसाध्यो यस्य धात्वर्थ इति'। अस्तीति शेषः, अत इनिठनाविती निः, अपुत्रा भार्यादिवद् बहुव्रीहिणैव सिद्धे तत्पुरुषान्मत्वर्थीयः कृतः लघुत्वम्प्रति सर्वत्रानादरात्, इङ आत्मनेपदित्वाद्धारयतेश्च कर्त्रभिप्राये शता न सिद्ध्यति लसार्वधातुकानुदात्तत्वं च प्राप्नोतीत्ययमारम्भः ॥

"द्विषोऽमित्रे" ॥ असन्देहार्थं मित्रे द्विष इति सूत्रान्यासादकारप्रश्लेषो विज्ञायतइत्याह। 'अमित्रश्शत्रुरिति'। अमेर्द्विषतीति त्रच् प्रत्ययो न पुनरयं नञ्समासः परवल्लिङ्गप्रसङ्गात् लोकाश्रयत्वाल्लिङ्गस्य स्वरे दोषश्चित् स्वरो ह्येष्यते बह्वचास्तु मध्योदात्तममित्रशब्दमधीयते अमित्रस्य व्यथया मन्युमिन्द्रः. अमैरमित्रमर्दय, द्विषेस्स्वरितत्वात्कर्त्रभिप्राये शता न प्राप्नोतीत्ययमारम्भः ॥

"सुञो यज्ञसंयोगे" ॥ कर्मसाधनस्संयोगशब्द इत्याह। 'यज्ञसंयुक्ते भिषवइति'। 'सर्वे सुन्वन्त इति' 'प्रयोगस्तस्य विषयमाह'। 'सर्वे यजमानास्सत्रिण उच्यन्तइति'। सूत्रेषु हि ये यजमानास्ते ऋत्विज इति सर्वे प्रधानकर्त्तारः, इह सुञो यज्ञइत्येव सिद्धं यज्ञविषयश्चेत्सुनोत्यर्थो भवतीत्यर्थः, तत्किं संयोगग्रहणेन तत्राह। 'संयोगग्रहणमिति'। लटश्शतृशानचावित्यनेनाप्यप्रधाने कर्त्तरि न भवति संयोगग्रहणसामर्थ्यात्प्रधानकर्त्ताधिकारी ॥

"अर्हः प्रशंसायाम्"। 'अर्हति चोरो वधमिति'। लटः शतृशानचावित्यनेनापि न भवति प्रथमासमानाधिकरणत्वात् अस्तु वा ऽत्वदुपदेशाल्लसार्वधातुकमित्यनुदात्तः ॥

"आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु" ॥ 'तदित्यादि'। धातोरिति वर्त्तते धातुश्च शब्दो न तस्य शीलादिप्रतिविशेषणत्वमुपपद्यते तस्मात्तस्य योर्थः स शीलादीनां त्रयाणां विशेष्याणां विशेषणत्वेन त्रिभिस्त-

तरपरिसंख्यासिद्धिरिति प्राप्ते स्तुतशस्त्रानुमन्त्रणार्थत्वेन तस्य पुनर्विधानेऽप्याज्यभागयोरिव प्रकृतिकॢप्तोपकारार्थत्वेन तदभावाच्च परिसंख्यात्वम् ॥

सू० चतुरवत्तम् ॥ ५ ॥

चतुरवत्तं जुहोतीति विधौ जुहोतेर्विशेषणान्तरासहत्वात्तदभावाच्च होमत्वमेवोद्देश्यतावच्छेदकं तस्य च दर्विहोमेष्वप्यविशेषात्प्रवृत्तिरिति प्राप्ते होमचतुरवत्तयोरन्यतोलब्धयोरिह सम्बन्धमात्रविधानेन पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय चतुरवत्तं जुहोतीति श्रुत्यन्तरे पुरोऽनुवाक्यादिसम्बन्धिहोमस्यैवोपस्थितेर्दर्विहोमानामतथात्वाद्गृहीततात्पर्यकजुहोतिना होमविशेषस्यैवोपस्थापने बाधकाभावाद्दर्विहोमेष्वेव चतुरवत्तम् ॥

सू० पञ्चावत्तम् ॥ ६ ॥

जामदग्न्यानां पञ्चावत्तविधौ जामदग्न्यकर्तृकहोममात्रोपस्थितेर्दर्विहोमेषु स्यादेव पञ्चावत्तमिति प्राप्ते प्राप्तचतुरवत्तोद्देशेन निमित्ते पञ्चमावदानमात्रविधानेन दर्विहोमेषु चतुर्थस्यैवाभावात्पञ्चमाप्रवृत्तिः । जमदग्निर्वा इत्युपक्रम्य स एतं पञ्चममवदानमपश्यत्तं निरवपदिति वाक्यशेषात् ॥

सू० पञ्चावत्तमाज्यात् ॥ ७ ॥

तेषां यत्पञ्चममवदानं तस्य पदसामर्थ्यादेव चतुर्थोत्तरत्वोपस्थितेरभिघारणमेकमभिवर्धत इति प्राप्ते चतुर्थोत्तरत्वमात्रोपस्थितेर्यथाकथञ्चिदङ्गीकारेऽपि चतुर्थावदानकर्मीभूतमेवेह द्रव्यं विवक्षितमित्यंशे मानाभावात्प्रधानभूतादौषधद्रव्यादेवावदेयम् । वस्तुतः षष्ठो भ्राता न दृश्यत इत्यादौ मध्यमेऽपि षट्पूरकत्वव्यवहारादौषधतृतीयस्यापि पञ्चमत्वोपपत्तिः । पशुर्वा एष यत्पुरोडाश इत्यादिना पुरोडाश एव पशुत्वमुपचर्य मध्यपूर्वपश्चार्धावदानानां हृदयजिह्वागुदावदानत्वेन संस्तु*त्यैवं तत् पञ्चावत्तं पांशोर्व्याप्त्या इत्युपसंहारदर्शनाच्च ॥

---

* संस्तुत्यैवेति पा० ।

Digitized by Google

सू० अन्ततः ॥ ८ ॥

पूरणप्रत्ययेन लोकव्यवहारस्यैच्छिकत्वेऽप्यपौरुषेये तदयोगादुक्तलिङ्गदर्शनस्य क्रमानभिधायकत्वादागन्तूनामन्ते निवेश इति न्यायेनाभिघारणोत्तरं हविषः पश्चार्धादवदेयमिति प्राप्तेऽभिघारणस्य संस्कारकत्वादे । संस्कार्योत्तरं प्रवृत्तेरौषधस्य त्रीण्यवदानानि क्रमिकाण्येव ॥

सू० पश्चार्धात् ॥ ९ ॥

औषधाद्यत्तृतीयमवदानं तदुक्तं लिङ्गदर्शनवाक्ये एवं तत्पश्चार्धाद्यथा गुदस्येति गुदत्वेन पश्चार्धसंस्तवात्पुरोडाशस्य पश्चिमभागादेव भवेत् । तच्च पाठक्रमात्तृतीयमिति प्राप्ते मध्यादवद्यतीति विधाय यदुभयतोऽवद्येदित्यादिना पूर्वपश्चार्धयोरवदानं विनिन्द्योत्तरार्धाद्वेवोभे अवद्येदिति स्पष्टं विधानात्सौविष्टकृतावदानस्थलादेव द्विरवदानेन हविषस्त्रिरवदानसिद्धिरिति तु भाष्याभिप्रायः । वस्तुतस्तु आवापस्विष्टकृतोर्द्वितीयं पञ्चावत्तिन इति सूत्रे वा-शब्दादेरभावेन पूर्वपक्षनिरासे मानाभावादेकेषामित्यस्याभावेऽपि द्वावपि शाखाभेदेन सिद्धान्तावेव । पञ्च प्रयाजे अग्न आज्यस्य व्यन्त्विति हैक आहुर्न तथा कुर्यादित्यादिना शाखान्तरसिद्धमेव मन्त्रपाठं विनिन्द्याज्यस्य हविषो व्यन्त्वित्येव ब्रूयादिति कौषीतकिब्राह्मणे विधानेऽपि नहि निन्दान्यायेन विधेयस्तुतिमात्रार्थत्वेन द्वयोरपि यूपावसानाधिकरणसिद्धान्तसिद्धत्वात् । पशुयूपक्रमाधिकरणे न्यायोपोद्बलितवचनस्य न्यायविरुद्धवचनतः प्राबल्यस्य भाष्यकारैरेव वर्णनेन पश्चार्धात्तृतीयं पञ्चावत्तिनः क्रमसंयोगादिति सूत्रे न्यायोपन्यासेन तस्य प्रकृतावन्यस्य विकृतिषु निवेश इत्यपि सुवचम् ॥

सू० सकृदुपहृतेन ॥ १० ॥

वनस्पतीज्यां प्रकृत्य सकृदुपहृतेन यजतीति श्रुतेन सकृद्गृहीतेन तदीयोपस्तरणाभिघारणनिवृत्तिः । स्विष्टकृद्विकारत्वेनैव सकृद् गृहीतलाभादिति प्राप्ते संसर्गरूपकारस्याभावादेव तन्निवृत्तौ पञ्चावत्तिनां

हविर्द्विरवदानस्य प्राप्तौ तदर्थोऽयं निषेधः । पृषदाज्याच्चतुरिति शाखान्तरीयवचनात्तु हविष एव चतुर्गृहीतपक्षेऽपि संस्कारनिवृत्तिः ॥

सू० यदपरम् ॥ ११ ॥

पूर्वपूर्वाण्यवद्येज्येष्ठस्य ज्यैष्ठिने यस्यापरपूर्वाणि कनिष्ठस्य कानिष्ठिने यस्येति यदपरमवदानं तत्पूर्वमवदाय स्रुचौ निदध्यादित्यादिषु पूर्वापरशब्दाभ्यां देशः कालो वोच्यते । उभयत्रापि तयोर्निरूढत्वात् । अन्यतरस्य नियमने प्रमाणाभावादिति प्राप्तेऽवदानपदेन भावे घञन्तेन कर्मण एव कथनात्तत्समानाधिकरणे पूर्वापरपदे अपि कर्मपरे एवेति न विकल्पः । प्रथमद्वितीययोरवदानयोः समन्त्रकामन्त्रकत्वाभ्यामिह फलभेदः ॥

सू० षोडशानि ॥ १२ ॥

चतुर्जुह्वां गृह्णातीत्यादि विधाय षोडशान्याज्यानि भवन्तीति श्रुतानि षोडशगृहीतानि चतुर्गृहीतादिभिः सह विरोधाद्विकल्प्यन्त इति प्राप्ते स्रुक्त्रयगृहीतानां समस्यवादोऽयं चतुर्दशपौर्णमास्यामाहुतयो हूयन्त इतिवत् । विकल्पस्यान्याय्यत्वात् ॥

सू० सप्तदशानि ॥ १३ ॥

अग्निहोत्रप्रकरणे सप्तदशान्याज्यानि पशुकामस्य गृह्णीयादिति श्रुते समस्य वादासम्भवात्पयःप्रभृतिद्रव्याणां तदवदानसंख्यायाश्च पशुकामाग्निहोत्रप्रयोगे निरास इति प्राप्ते पशुकामस्य पञ्चगृहीतं ध्रुवायां यथा प्रकृतीतरयोरिति दर्शपूर्णमासप्रकरणस्थकल्पसूत्रानुमितश्रुत्यनुवादकत्वादयमपि समस्यवादः प्रकरणादुत्कृष्येत ॥

सू० तेषां पृथक् ॥ १४ ॥

इन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायाधिराजायेन्द्राय स्वराज इति प्रकृत्यैकं पुरोडाशमधिश्रपयतीति श्रुते वाचनिके

पुरोडाशैकत्वेऽपि हविर्भेदादवदानमपि त्रिर्भवेदिति प्राप्ते सर्वेषामभिगमयन्नवद्यत्यच्छंबट्कारमिति वचनादधिश्रपणवत्सहैवावदानं तैत्तिरीयशाखायां तु त्रयः पुरोडाशा उत्तरोत्तरे सूक्ता आम्नाताः । तत्पक्षेऽपि त्रैधातवीयायामिव सहैवावदानम् ॥

सू० नाना वा ॥ १५ ॥

त्रीण्यप्येतानि हवींष्यवदानैकत्वात्संप्रतिपन्नदेवताकत्वात्सहैव प्रदीयेरन्निति प्राप्ते विशेष्यस्यैकत्वेऽपि राजादिगुणभेदेन देवतापृथक्त्वादवदानादेर्वचनाद्यौगपद्येऽपि प्रदानानि भिद्येरन्नेव, एवं सति तिसृणामेवर्चां याज्यात्वमनुवाक्यात्वं च सङ्गच्छते ।

तदित्थं प्रथमामनूच्य मध्यमया यजेन्मध्यमामनूच्योत्तमया यजेदुत्तमामनूच्य प्रथमया यजेदेवं सर्वा अनुवाक्याः सर्वा याज्या भवन्तीति श्रुतेः ॥

सू० एककपाले ॥ १६ ॥

द्यावापृथिव्याद्येककपालेषु वैश्वानर्यां च वपायां च प्रकृतितः प्राप्तत्वादवदानसम्पद्भवेदेवेति प्राप्ते यजमानो वा एककपालेषु वैश्वानर्यां च वपायामित्यादिनाऽवदानेन यजमानस्य मरणमुक्त्वा सकृदेव होतव्यमिति विधानेनावदानप्रतिषेधः कल्प्यते । इतरयोरपि लिङ्गं भाष्ये द्रष्टव्यम् ॥

सू० त्र्यङ्गानाम् ॥ १७ ॥

प्रत्यभिघारयत्ययातयामत्वायेति श्रुतौ तादर्थ्यचतुर्थ्या प्रत्यभिघारणस्य यातयामतानिरासैकप्रयोजनकत्वावगतेस्तस्याश्चेज्याशेष एव प्रसक्त्या पशाविज्याशेषेषु सौविष्टकृतत्र्यङ्गेषु स्वत एवायातयामेषु न हविःप्रत्यभिघारणमिति प्राप्ते प्रत्यभिघारणस्य स्नेहनार्थताया दृष्टाया अर्थवादबलेन परित्यागस्यान्याय्यत्वात्प्रकृतितः प्राप्तत्वात्कर्तव्यमेव, अत एवोपस्तरणाभिघारणयोरप्यदनीयस्नेहनार्थत्वात्कपालेषु तन्निवृत्तिरुक्ता ॥

Digitized by Google

सू० पशोः प्रदानम् ॥ १८ ॥

प्रकृतितः प्राप्तत्वात्पशावपि दैवताऽवदानोत्तरमेव प्रदानमिति प्राप्ते दैवतान्यवदायाथोपभृत्यथ समवत्तधान्यामित्यनेन दैवतावदानसमनन्तरकाल एव सौविष्टकृताद्यवदानविधानात्तस्य प्रदानेन व्यवधानायोगान्न तावत्येव होतव्यमित्यनुवाददर्शनाच्च समानकालान्यवदानानि कृत्वा प्रदानम् ॥

इति सङ्क्षेपे भाट्टदीपिकायां चतुर्दशाध्यायस्य द्वितीयः पादः ॥ २ ॥

अवदानपादः ।

अथ चतुर्दशाध्याये तृतीयः पादः ।

सू० यजेति ॥ १ ॥

एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्त इति श्रुता आश्रावयेत्यादिशब्दा अदृष्टार्था एव पूर्वपूर्वपदार्थैरेवोत्तरपदार्थस्मरणेन दृष्टप्रयोजनान्तराभावात् । ऋत्विजां वरणस्य दृष्टार्थत्वेन परकर्तृकपदार्थोत्तरकालिकस्यापि स्वस्वपदार्थस्य तत्तत्कालेऽपि स्मृतिसम्भवात् । आश्रावयेति चतुरक्षरमित्यादिश्रुतौ चतुर्भिश्च चतुर्भिश्चेत्यादिस्मृतौ चाक्षरपरिगणनस्य चत्वार ईं बिभ्रति क्षेमयन्तः कामो योनिः कमलावज्रपाणिरित्यादिश्रुतिषु मन्त्रोद्धारस्यैवोद्ध्रियमाणानामदृष्टार्थत्व एव सामञ्जस्याच्चेति प्राप्ते प्रकृतिप्रत्ययार्थविभागेन पच पक्ष्यामीत्यादाविव प्रैषप्रतिवचनार्थत्वावगतेरनुभूयमानायाः परित्यागायोगान्मन्त्रोद्धारस्य नियमादृष्टार्थतया स्तुत्यर्थतया चाविरोधाद् दृष्टार्थ एव सप्तदशः । सूत्रभाष्ययो*र्यजये यजामह इत्यनयोरेवोदाहरणं तु लिङ्गदर्शनानुगुण्याय प्रैषप्रतिवचनार्थप्रतिपत्तृत्वेन तत्राध्वर्युहोत्रोरेव कीर्तनात् ॥

---

* यजये इत्यपि पा० ।

Digitized by Google

सू० प्रजापतिः ॥ २ ॥

अग्नयेऽनुब्रूहीत्यादाविवाग्निं यजये यजामहेऽग्निमिति तत्तद्दे-वतानाम्नां योगे सप्तदशाक्षरत्वभङ्गापत्तेर्नियमादृष्टविरोधादश्रुतकल्पने मानाभावादाकाङ्क्षितकर्मपदस्य छिनद्मीत्यादिवदर्थाध्याहारेणाप्युपपत्ते-रग्निपदस्याध्याहारेऽपि तस्य प्रैषादौ प्रतिवचनान्त एवेति नियमेऽपि मानाभावाद् द्व्यक्षरपञ्चाक्षरावेव तौ प्रयोज्याविति प्राप्ते सर्वदेवतापदसा-धारणांशमादायापि सप्तदशत्वोपपत्तेरर्थाध्याहारस्य निरस्तत्वाच्च देव-ताविशेषपदमन्तरेण यागविशेषप्रतिपत्तेरभावेनानन्तराधिकरणसिद्धदृष्टा-र्थत्वभङ्गापत्तेश्च देवतानाम्नामादेशः । अत एव, शाखान्तरेऽमुष्मा अनु-ब्रूह्यमुं यजेत्यादिवचनैर्देवतानामविशेषोपलक्षकोऽदः शब्दः श्रूयते । असा-वेहि अवधिष्मामुम् इदमहममुष्येत्या*दिवचनैर्देवतापदपौर्वापर्यनियमो-ऽप्येतद्बलादेव । यत्तु लिङ्गदर्शनमुक्तं मूले यत्तनूनपातं यजेडोयजेति ब्रूया-ज्जामि स्याद्यजेत्येव ब्रूयात् मारुतस्यावद्यन्मरुद्भ्योऽनुब्रूहीत्याश्राव्य मरुतो यजेति ब्रूयादित्यादि ज्ञापकादन्यत्रापि देवतापदप्राप्तिरिति । तच्छाखान्तरे तनूनपातं यजेत्येव पाठात्तन्निषेधार्थकत्वेन पूर्वस्येतरस्य तु विधिरूपत्वेनाप्युपपत्तेर्विपरीतसाधकमिति तत्रैवोक्तम् ॥

सू० प्रथमस्य ॥ ३ ॥

अनुयाजेषु देवान् यजेति प्रैष आम्नातः स च वर्हिर्यागविषयक-एव । नराशंसस्विष्टकृतोर्यज यजेति प्रैषान्तराम्नानात् । बहुवचनं त्वविव-क्षितार्थम् । उपरवमन्त्रेषु तथादर्शनात् । सर्वार्थत्वे सन्निपातिनोः प्रैषयोः समुच्चयायोगेन विकल्पापत्तेरिति प्राप्ते त्रितयसाधारण एवायं प्रैषः । उपरवमन्त्राणां करणत्वेन प्रत्युपरवमावृत्तेरेकैकस्मिन्नुपरवे बहुत्वासम्भ-वेनाविवक्षितार्थकत्वेऽपि प्रकृते सम्भवतो बहुवचनस्य तद्योगाल्लिङ्गेन क्रमबाधात् । तृणारणिमणिन्यायेन सन्निपातिनामपि समुच्चयस्याविरो-धात् । आवह देवान् यजमानायेति सामान्येनाभिधायाग्निमग्न आवहे-

* इदमहममुष्येत्यादिश्रुतिवत् पदपौर्वापर्यनियमोऽपीति पा० ।

त्यादिविशेषाभिधानमन्यस्य षोडशे वक्ष्यमाणत्वात् । अत एव ग्रन्थान्तरं देवान्यजेत्युक्त्वा ह छन्दांसि वै देवाः छन्दांस्येव तद्यजतियद्बर्हिर्यजति गायत्रीं तद्यजति यन्नराशंसं त्रिष्टुभं तद्यदग्निं स्विष्टकृतं जगतीं तदित्युपपद्यते । तेनापवर्हिषावनूयाजौ यजतीत्यत्रभृग्रेष्टौ बर्हिरनूयाजाभावेन देवौ यज यजेत्यूहसमुच्चयाभ्यां नराशंसे प्रैषः फलति ॥

सू० एकादश ॥ ४ ॥

एकादशानूयाजान्यजतीति प्रयोगगामिनी संख्येत्युक्तं तेष्वेकादशसु प्रत्येकं प्राकृतत्रितयधर्माणां विकल्पेन प्राप्तिः । आग्नेयविकारे तथा दर्शनादिति प्राप्ते समं स्यादिति न्यायेन विभज्य प्रकृतिविकारभावः । गणितशास्त्रे हि समविभागाभावे सैकीकृत्य निरेकीकृत्य वा यथोपपत्तिविभाग उक्तः । तदत्र निरेकपक्षेऽपि समत्रेधा विभागासंभवात्सैकीकरणेन चतुश्चतुर्धाविभागे चत्वारश्चत्वारो बर्हिर्नराशंसयोर्विकारा अवशिष्टाः स्विष्टकृतइति तत्तदनुमन्त्रणमन्त्राणामेव तत्र तत्रातिदेशः ॥

सू० दशमं बर्हिः ॥ ५ ॥

उक्तन्यायेन दशमानूयाजस्य स्विष्टकृद्विकारत्वे प्राप्ते देवतासामान्यस्योत्पत्तिसमसमयावगतस्य प्रयोगकालावगतक्रमाद्बलवत्त्वेन प्रथमविकारत्वमेव ॥

सू० चतुर्थोत्तमयोः ॥ ६ ॥

एकादशप्रयाजानामपि निरेकीकरणेन समपञ्चधा विभागेनान्त्यस्यान्त्यास्त्रयोविकारा अन्येषां द्वौ द्वाविति प्राप्ते प्रथमादीनां चतुर्णां देवतासामान्यात् क्रमेण चत्वारो विकाराः ॥

सू० एवमस्यान्त्यः ॥ ७ ॥

अन्त्योपान्त्यमध्ये ये तावदप्राकृताः षट् प्रयाजाः पठितास्तेषां देवतासामान्याभावात्समं स्यादिति न्यायेन चतुर्थपञ्चमयोस्त्रयस्त्रयो विकाराः क्रमेण भवन्ति ॥

Digitized by Google

सू० पश्चनूयाजेषु ॥ ८ ॥

पशावनूयाजेष्वेकादश प्रैषा मैत्रावरुणकर्तृकाः सन्ति । ते सर्वे प्राकृतयोर्यजेत्युत्तरानूयाजप्रैषयोर्विकाराः । तेषामध्वर्युप्रैषापेक्षया द्वितीयत्वात् । प्राकृतयोरपि द्वितीयत्वात् । तेनाध्वर्युर्देवान्यजेति प्रथमानूयाज एव सकृद् ब्रूयात् । प्रशास्ता तु पञ्चमानूयाजमारभ्य प्रैषानुब्रूयात् । अन्ये मन्त्रभूयस्त्वन्यायेन विकल्पेरन्निति प्राप्ते मन्त्रैयर्थ्यापत्तेरेव साधारणस्य प्रथमप्रैषस्य विकाराः । देवं बर्हिर्देवान्यजेति देवताशब्दसामान्याच्च । किञ्चित्साधर्म्यापेक्षयास्य साम्यस्यान्तरङ्गत्वात् । ततश्च देवान्यजेत्यस्यैव निवृत्तिः प्रत्यनूयाजमेकैकः प्रैषो मैत्रावरुणेन वाच्यः । पञ्चमादिषु तु यजेत्यप्यध्वर्युणा वाच्यम् । प्रकृतावुत्तरयोर्द्विद्विप्रैषत्वात् ॥

सू० उपप्रैष्य ॥ ९ ॥

पशावध्वर्युर्मैत्रावरुणं प्रेष्यति स चाजैदग्निरसनद्वाजन्नित्यादिनोपप्रैष्य होतर्हव्या देवेभ्य इत्यन्तेन मन्त्रेण होतारं प्रेष्यति सोऽपि दैव्याः शमितार आरभध्वमित्यादिना मन्त्रेण शमितॄन्प्रेष्यतीति स्थितिः । एवं सत्युपप्रैष्य होतर्हव्या देवेभ्य इत्यादिश्रुतेरुपप्रैषविषयकप्रैषविधौ तावन्मात्रस्य मन्त्रस्यादर्शनादजैदग्निरित्यास्यैवान्त्यप्रतीकोपादानेन विनियोगविधिः । प्रथमप्रतीक एवोपादेय इति नियमे मानाभावात् । षड्विंशतिरित्येव ब्रूयादिति मध्यमप्रतीकस्याप्युपादानादिति मृतमसि प्राणायत्वेत्यभिव्यनक्तीत्यत्रानःप्राण इतिमन्त्रान्त्यप्रतीकस्याप्युपादानादिति प्राप्ते एनामध्वर्युराहेति प्रकृत्योपप्रैष्येति विधेराम्नानादन्ते च सोऽन्वाहाजैदग्निरसनद्वाजन्नितीति श्रुतेश्चाध्वर्युप्रशास्त्रोः प्रैषकर्तृत्वतदर्थप्रतिपत्तृत्वयोरवगमात्तावन्मात्रस्य प्रत्येकमन्त्रत्वादेव प्रैष एव नोपप्रैषः ॥

सू० होतारम् ॥ १० ॥

तस्मिन्नेव प्रैषे होतरिति संबोधनाल्लिङ्गाद्धोतारं प्रत्येवायमुपप्रैषविषयकः प्रैषः । यदप्रतिरथं द्वितीयो होताऽन्वाहेत्यादाविव द्वितीया-

Digitized by Google

दिपदसामानाधिकरण्याभावे मुख्यहोतुरेवोपस्थितेर्व्युत्पन्नत्वादिति प्राप्तेऽजेदग्निरित्यस्य मैत्रावरुणवक्तृकत्वेन तत्रत्यस्य होतरुपप्रेष्येत्यस्योक्तन्यायेनैव स्वस्मिन्प्रैषासम्भवाच्च होतुरुद्देश्यकत्वस्यावश्यकतया प्रैषद्वयस्य वैयर्थ्यापत्त्याऽध्वर्यून्वृणीत इति निरूपपदानामपि गणेषु प्रयोगदर्शनाच्च मैत्रावरुणं प्रत्येवायं प्रैषः। अत एव यदध्वर्युर्होतारमुपप्रेष्येत्यथ कस्मान्मैत्रावरुण उपप्रैषं प्रतिपद्यत इति लिङ्गदर्शनमुपपद्यते॥

सू० उक्थशा यज ॥ ११ ॥

उक्थशा यज सोमस्येति स्तुतशस्त्रवतः सोमानाहेति विहितः प्रैषः स्तोत्रशस्त्रोभयवन्तो ये सोमयागाभ्यासास्तेष्वेव निविशते न केवलाज्यादिशस्त्रवत्सु सोमयागाभ्यासेषु द्वन्द्वात्रगतसाहित्यबलादिति प्राप्ते स्तोत्रवदस्तोत्रवदस्तोत्रवत्साधारण्येन शस्त्रवन्मात्रेऽस्य निवेशः। उक्थं शस्त्रं शंसतीत्युक्थशा इति मन्त्रलिङ्गात्। केवलखड्गधराणां केवलधनुर्धराणां च समवाये धनुःखड्गधरा इम इति प्रयोगदर्शनाच्च। आज्यादिशस्त्रेष्वपि स्तोत्रत्वेऽर्थवाददर्शनात्तदभिप्रायेण तेषामपि स्तुतशस्त्रवत्त्वोपपत्तेश्च॥

सू० बहुशब्दः ॥ १२ ॥

उक्थशा यज सोमानामिति स्तुतशस्त्रवतः सोमानाहेति बहुवचनान्तसोमपदघटितमन्त्रस्यापि उक्तन्यायेन शस्त्रवत्स्वेव निवेशाद्विकल्प इति प्राप्ते शस्त्रवत्स्वपि ये चमसैर्ग्रहैश्च युगपद्धूयन्ते सोमास्तेष्वेवायं मन्त्रः स्यात्। इत्यादि द्रव्याणां तदाधारपात्रसंख्यैवैकद्विबहुत्वादिव्यवहारदर्शनात्। एकवचनान्तमन्त्रस्तु केवलग्रहकरणकहोम एवेति लिङ्गाद्व्यवतिष्ठते॥

सू० तां पुरोऽध्वर्युः ॥ १३ ॥

ऋत्विग्भ्यो वाचं विभजति होतर्यज पोतर्यज नेष्टर्यज ब्रह्मन् यज अच्छावाक यजेति प्रैषरूपाया वाचो विभागं विधाय श्रूयते। तां पुरोऽध्व-

Digitized by Google

र्युर्विभजति मैत्रावरुणः पश्चादिति । अत्र पुरःपश्चाच्छब्दौ देशवादौ कालवादौ वा उभयत्रापि निरूढत्वात् । तेनैकस्मिन्नेव देशे स्थित्वाऽध्वर्युमैत्रावरुणौ पूर्वापरकालभेदेन प्रैषान्विभज्य ब्रूयातामेकस्मिन्वा काले प्राक्प्रत्यग्देशभेदेन स्थित्वेति विकल्पे प्राप्ते देशवाद एवायम् । आहवनीयं गच्छतीति प्रकृत्यैतदाम्नानात् । पाटलिपुत्रं गच्छतीत्यादौ तदधिकरणदेशस्योपस्थितत्वात् तेनोत्तरवेद्यामध्वर्युः सदसि मैत्रावरुणः प्रेष्यति ॥

सू० ऋतुगृहेषु ॥ १४ ॥

प्रातः सवने ह्यादौ प्रस्थितयाज्यास्तदुत्तरकाले ऋतुयाजाः । उत्तरसवनयोस्तु प्रस्थितयाज्या एव नर्तुयाजा इति स्थितिः । तत्र प्रस्थितयाज्यास्विवर्तुयाजेष्वपि प्रैषानध्वर्युर्विभज्य ब्रूयात् । प्रैषाणामाध्वर्यवसमाख्यानादिति प्राप्ते प्रैषकाण्डोक्तनिगदोद्देशेन मैत्रावरुणः प्रेष्यति चानु चाहेति वचनेन प्रशास्तृवक्तृकत्वविधिः, स च प्रस्थितयाज्यासु व्यवतिष्ठते । पुनरभ्युन्नीतविधानेन समाख्याबाधान्मैत्रावरुण एव विभजेत् । होतर्यज पोतर्यजेत्यादीनां तत्तन्निगदान्त्यप्रतीकत्वेन निगदानेवोद्दिश्य मैत्रावरुणः पश्चादिति देशमात्रोक्तिः । तां पुरोऽध्वर्युरित्यत्र तूपप्रेष्य होतरित्यस्यैव होतर्यजेत्यतावन्मात्ररूपाणां प्रैषाणामध्वर्युः सर्वैश्चमसैः सहाध्वर्युरादौ होतृयाज्यया हुत्वा ततस्तेषां मध्ये होत्रादीनां मध्यतः कांश्चिचमसानन्यत्र विनियुज्यावशिष्टचमसेषु सशेषेष्वेव पुनःसोममभ्युन्नीतैः क्रमेण मैत्रावरुणादिकतिपयहोत्रकयाज्याभिर्जुहोतीति स्थितिः । तत्र पुनरभ्युन्नीतहोमेष्वध्वर्युकर्तृकप्रैषगणमध्ये होतर्यज प्रशास्तर्यजेति श्रुतौ प्रैषौ तत्रत्यहोतृशब्देन मैत्रावरुण एवोच्यते । सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तहोत्राः प्राचीर्वषट्कुर्वन्तीति वचनेन तस्यापि याज्यायामधिकारात् । मुख्येन होत्रा प्रथमं वषट्कृतत्वाच्च प्रशास्तृशब्दस्यापि मैत्रावरुणवाचित्वात्तस्य प्रैषे द्वयोर्मन्त्रयोर्विकल्प इति कल्पसूत्रमतेन प्राप्ते सप्तहोतृप्रैषप्राये पठितयोर्होतृप्रशास्तृशब्दयोः प्रतिनियतनिर्देशादेव भिन्नार्थकत्वावसायान्म-

Digitized by Google

ध्यतः कारिचमसहोमीयमैत्रावरुणोक्तप्रैषान्त्यावयवे होतर्यजेत्यत्र होतुरेवोपस्थितत्वाच्च मुख्यहोतैवोच्यते ततश्चैकस्यां याज्यायां होतृप्रशास्त्रोर्वक्त्रोर्विकल्पः न त्वेकस्मिन्नेव प्रशास्तरि वक्तरि प्रैषयोर्विकल्पः । अथवा । मैत्रावरुणेनेवाध्वर्युणाऽपि होता प्रैषणीय इति न कोऽपि विकल्प इति ॥

सू० आश्रुतप्रत्याश्रुते ॥ १५ ॥

अनुवषट्कारयागेऽपि यज्ञे यज्ञेऽन्वायत्त इति वीप्सया आवणादयो भवेयुः । यस्तु शाखान्तरे नाश्रावयतीति प्रतिषेधः सोऽपि च प्राप्तिपूर्वक एवेति प्राप्ते नु-शब्दश्रुत्यैव विप्रकर्षाभावोक्तेर्निवृत्तानामाश्रावणादीनामनुवाद एव प्रतिषेधः ॥

इति संकर्षे भाट्टदीपिकायां चतुर्दशाध्यायस्य तृतीयः पादः ॥ ३ ॥

अयं प्रैषपादः ।

अथ चतुर्दशाध्याये चतुर्थः पादः ।

सू० देवतायोगेन ॥ १ ॥

आग्नेयोऽष्टाकपालो भवति वैश्वदेव्यामिक्षेत्यादौ द्रव्यदेवतासम्बन्धमात्रश्रवणेन जुहोतेरश्रवणादारण्योत्सर्गादाविव त्यागमात्रं कर्तव्यं नाहुतिरिति प्राप्ते यजतेर्देवपूजादानान्यतरवाचित्वेन देवता गन्धादिभिरिज्यते विप्राय दीयत इत्यादौ च त्यज्यमानद्रव्यस्य प्रक्षेपान्तप्रतीतेर्देवताविग्रहाद्यभावेन परस्वत्वमात्रस्यानुत्पत्तावप्यस्त्येव प्रक्षेपः । अत एव मध्येऽग्नेराज्याहुतीः पश्वाहुतीः पुरोडाशाहुतीश्च जुहोतीति श्रुतिरुपपद्यते ॥

सू० अदेवता ॥ २ ॥

श्रुतदेवताकेषु यागेषु देवतोद्देशमात्रसम्भवेऽप्यश्रुतदेवताकेषु तत्कल्पने मानाभावः । परस्वत्वोपादनांशस्येवोद्देशांशस्यापि विरहे स्वत्वत्या-

गमात्रेणापि यागत्वसम्भवात् । पूजादानशरीरकोटौ संप्रदानकारकस्यापि निवेशात्तदाक्षेपे त्वग्नित्वादिना तदनुपस्थितेराक्षेप्यतावच्छेदकदेवतात्वपुरस्कारेण वा देवताया इदं न ममेत्यादिरूपस्त्यागोऽस्त्विति प्राप्ते सामान्यस्य प्रवृत्तावनुपयोगात्तत्तद्विशेषधर्मैरेव संप्रदानस्य यागशरीरघटकत्वाद्विप्रसामान्याय दानस्याभावादग्न्यादिदेवतायाः शब्दद्वारैव यागोपकारकत्वेन तद्वाचकपदेष्वग्निपदस्य नियमन इव देवतापदस्यापि शब्दविशेषरूपत्वेन तदुच्चारणनियमनेऽपि प्रमाणान्तरावश्यम्भावात्प्रजापते न त्वदेतान्यन्य इति जुहुयादित्यादावपि मन्त्रप्रतिपाद्यस्य प्रजापत्यादेरेव देवतात्वम् । विशेषपर्यवसायकप्रमाणविधुरो देवतासामान्यघटितयागविधिस्तु नास्त्येव ॥

सू० सूक्तवाकः ॥ ३ ॥

इध्मः प्रथम आहुतीनां हूयत इति वचनेन सामिधेनीभिरिध्मप्रक्षेपस्यापि होमत्वावगमान्मान्त्रवर्णिकाग्नेर्देवतात्वं सूक्तवाक एव याज्या प्रस्तर एवाहुतिरिति श्रुतेः प्रस्तरप्रहरणेऽपि यागत्वस्वीकारात् । प्रस्तरस्योपयुक्तत्वेन तत्र प्रक्षेपांशस्य प्रतिपत्तित्वस्वीकारेऽपि प्रकृते समिधामतथात्वेन प्रयाजादिवदारादुपकारक एवैष यागः । तेन प्रकृतिमन्त्रान्तःपातिनिशीष्टौ प्रसङ्गादुपकारात्सामिधेनीलोप इति प्राप्ते यक्ष्यमाणयागोपयोगित्वेन पूर्वमग्निसमिन्धनरूपदृष्टप्रयोजनसम्भवेनादृष्टार्थकत्वकल्पनायोगात् । सामिधेनीषु ज्वलनस्यैव देवतात्वेन स्तवनसम्भवाचार्थवादमात्रेण होमत्वसिद्धिः । प्रस्तरप्रहरणे त्विष्टदेवताप्रत्यभिज्ञानात्तासां हविर्भक्षणसम्बन्धलिङ्गाच्च यागत्वसम्भवेऽपि प्रकृते ज्वलनसमिन्धनस्यैव प्रतिपादनान्निशीष्टावपि सन्निपातित्वात्सामिधेन्यो भवेयुः । भाष्ये तु प्रस्तरप्रहरणस्यापि केवलसन्निपातित्वमेव समर्थ्य पूर्वोक्तमारादुपकारकत्वं कृत्वाचिन्तयेत्युक्तम्, सूत्रे सूक्तवाक एव याज्येति श्रुतेर्ग्रहणं पूर्वपक्षे दृष्टान्तार्थत्वेन सुयोजम् ॥

सू० अज्यानि ॥ ४ ॥

अग्नौ श्रुतम् अज्यानिरेतानुपदधात्यायव्यं निरुप्यैता आहुतीर्जुहोतीति शतायुधायेति पञ्चमन्त्राः प्राणभृन्न्यायेनाज्यानयः । उपधानकरणतायास्तद्रूनासामिति स्मृत्यावगमेऽप्येता इति पदेनाहुतिकरणताया अप्रतीतेर्न मान्त्रवर्णिकदेवतासिद्धिः । होमे मन्त्रसम्बधस्तु क्रियमाणानुवादित्वादिनाऽप्युपपन्नः । देवता तु सामान्यपरिभाषानुसारेणान्यैव कल्प्यतामिति प्राप्ते एता इति पदेनेष्टकानां परामर्शेऽन्वादेश एना इत्यापत्त्याऽऽवश्यकेन ऋचां परामर्शेन तासामाहुतिपदसामानाधिकरण्येनान्वयानुपपत्तेरेवैताभिरिति विपरिणामावश्यम्भावादिन्द्राय एव देवताः । भाष्यकारैस्तु नेदमधिकरणमित्युक्तम् ॥

सू० चित्रया ॥ ५ ॥

चित्रेष्टौ अथैता आहुतीर्जुहोतीति विधायैता वै देवताः पुष्टिपतय इति श्रुतं तत्रानियमेन केचित्पुष्टिलिङ्गा उपादेया इति प्राप्तेऽग्ने गोभिर्न आगहीन्द्रपुष्ट्या जुषस्व न इत्यादिमन्त्राणामेव क्रमेणाङ्गत्वात्पुष्टिलिङ्गत्वाच्च नानियमः ॥

सू० दर्विहोमे ॥ ६ ॥

दर्विहोमेषु चतुर्गृहीतं जुहोतीत्यादि नियमानुपलम्भादनियतसंख्याकगृहीते प्राप्ते प्रथमं गृहीतेनापि होमसम्भवात्प्रथमोपस्थितन्यायेनैव संख्या नियम्यते । अत एव चतुरुन्नयति द्विर्जुहोतीति विधायाथ कथं द्वे आहुती भवत इत्यादिनोन्नयनचतुष्के होमचतुष्कस्यावश्यकता ध्वनितोपपद्यते ॥

सू० गणेषु ॥ ७ ॥

यत्र बहवो दर्विहोमाः क्रमेण क्रियन्ते तत्रापि गणारम्भे सकृद्गृहीतस्य सर्वोद्देश्यकतया पशुत्रयपूर्वनिष्पन्नयूपस्येव तन्त्रता । न च हविषोऽपरिपूर्त्तिः । ध्रौवस्येव पुनःपुनराप्यायनसम्भवादिति प्राप्ते प्रथमहोमाव्यवहितपूर्वकाले गृहीतस्य गृह्यमाणविशेषत्वात्तदर्थतैव । आप्यायनं तु न वचनमन्तरेणोपपद्यत इति प्रत्याहुतिसकृद्ग्रहणम् ॥

Digitized by Google

सू० समिदाधानम् ॥ ८ ॥

दर्विहोमेभ्यः पूर्वमग्निसमिन्धनस्यावश्यकत्वेऽपि न तत्र समित्प्रत्तेपनियमः । सामिधेनीष्विव नियामकाभावादिति प्राप्ते ऽग्निहोत्रप्रकरणे यदेकां समिधमाधाय द्वे आहुती जुहोतीति विधाय कस्यां समिधि द्वितीयामाहुतिं जुहोतीति प्रश्नरूपेण प्रत्याहुत्येकैकसमिदाधानस्यावश्यकताप्रापणान्नानियमः । अनियमेन प्राप्तस्यार्थस्यार्थवादादिना नियमनस्य बहुशो दृष्टत्वात् । अन्यथा स्रुवेणावद्यतीत्यादौ शेषिनियमो न स्यात् । अत एवैतस्याग्निहोत्रप्रकरणस्थत्वादर्थवादत्वाच्च न नियामकतेति केषाञ्चिन्मतम्भाष्य एव निरस्तम् ॥

सू० पाकयज्ञः ॥ ९ ॥

पाकयज्ञ-शब्दस्याहुत्यादिशब्दवत्स्मार्तश्रौतसाधारण्येन यागमात्रवचनत्वे प्राप्ते मनुर्वै पाकयज्ञीय आसीत्स इममितरं यज्ञमपश्यदित्यादिना वाक्यशेषेण कतिपयाहुतिष्वेव शक्तिग्रहान्नाहुतिपर्यायता ॥

सू० सर्वदर्वि ॥ १० ॥

पाकं निर्वर्त्य क्रियमाणो यज्ञ इति व्युत्पत्त्या सोमयागान्यनिखिलयागपरोऽयं शब्द इति प्राप्ते यद्वै चातुर्मास्यानां पाकयज्ञः सैव तदेषां पशव्यं गृहमेधीयो ह्येषां पाकयज्ञेनेध्मा बर्हिर्भवति न सामिधेनीरन्वाह न प्रयाजा इज्यन्त इत्यादिनेष्टिकाङ्गानामभावबोधनेन दर्विहोममात्रवाचकः ॥

सू० सर्वेषाम् ॥ ११ ॥

दर्विहोमत्वाविशेषाल्लौकिकवैदिकाग्निसाध्यानामखिलानां वाचक इति प्राप्ते लौकिकानामेव दर्विहोमानामेष वाचकः । शिबीनां पाकयज्ञ उशीनराणां पाकयज्ञ इत्यादेः स्मार्त्त एव व्यवहारस्य दर्शनात् । यदान्यस्य हविषः स्रुच्यवद्यति सर्वमेतदग्नौ जुहोतीति विधायाथ कस्माद् द्विर्जुहोतीत्यादिना तदस्य पाकयज्ञस्यैवेत्यनेन द्विर्होमादिनिर्लेहना-

न्तपदार्था: पाकयज्ञीया अत्र किमिति कियन्त इत्याक्षेपेण वैदिकानामेषां न पाकयज्ञतेति ध्वननाच्च ॥

सू० धर्मोपदेशः ॥ १२ ॥

पाकयज्ञकरणकभावनायाः कथं भावाकाङ्क्षायामातिपलब्धैः सन्निपातिभिरेवाङ्गानामिवाकांक्षानिवृत्तिरिति प्राप्ते द्विर्जुहोति द्विर्निमार्ष्टि द्विःप्राश्नात्युत्सृज्याचामति निर्लेढीति प्रकरणिनः शेषित्वेन विहिता अपि धर्माः पाकयज्ञेऽपि प्राप्नुयुः । यद्येतां नालभेत वायव्यस्यैव शिर उपदध्यादित्येकस्या एव श्रुतेः पशुशीर्षादिविकल्पवायव्यशीर्षोपधानोभयप्रापकत्वदर्शनात् ॥

सू० प्राचीनप्रवणे ॥ १३ ॥

वैश्वदेवपर्वणि प्राचीनप्रवणे यजेतेत्यधिकरणत्वेन विधानात्पदे जुहोतीत्यनेनाहवनीयनिवृत्तिरिति प्राप्ते पर्वतान्ते यजेतेत्यादाविव देशवाचकत्वात्तस्य च वैश्वदेवेनेति तृतीयया साङ्गप्रधानप्रयोगान्वयप्रतीतेः पदवाक्य इव जुहोतेरनुपादानाच्च न होमाधिकरणता किन्तु विहारदेशोपदेशः । अत एव यदेककपालमाहवनीये जुहोति यजमानमेव स्वर्गं लोकं गमयतीत्याहवनीयदर्शनमुपपद्नम् ॥

सू० पदे जुहोति ॥ १४ ॥

पदे जुहोति वर्त्मनि जुहोति वल्मीकवपायां जुहोतीत्यादिष्वपि पूर्वन्यायेन देशमात्रविधानत्राहवनीयमुपनिधायैव होतव्यमिति प्राप्ते उत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमायेत्यादाविव जुहोतिसंयोगेन होमाधिकरणत्वस्यैव विधानादाहवनीयनिवृत्तिः । अत एव चतुष्पथे जुहोतीति विधायैव वा अग्नीनां पड्वीशो नामाग्निवत्यैव जुहोतीत्यनेन चतुष्पथस्यैव प्रकारान्तरेणाग्निमत्वोपपादानं सङ्गच्छते षड्वीशः पादवन्धनरज्जुः ॥

सू० चतुष्पथे ॥ १५ ॥

चतुष्पथ एकोल्मुकमुपनिधाय जुहोतीत्यपि प्रकरणान्तरे श्रूयते। तत्र चतुष्पथस्यैवाग्निपद्धीशब्दरूपत्वेनाग्न्यन्तरानपेक्षत्वादेकोल्मुके वा केवलचतुष्पथे वा होम इति विकल्प प्राप्तेऽग्निवत्ये*वेति मतुपः प्रशंसार्थत्वेन वास्तविकाग्निमत्ताया अवोधनेन विहितस्योल्मुकस्य त्यागे प्रमाणाभावाच्च विकल्पः ॥

सू० प्रत्यञ्चः ॥ १६ ॥

प्रत्यञ्चोऽवभृथेन चरन्तीत्यत्र विहारस्यैव प्रत्यङ्मुखत्वविधानम्। कर्तॄणां तु सामान्यविधिप्राप्ते प्राङ्मुखत्वमेव। तेषामपि प्रत्यङ्मुखत्वविधाने वाक्यभेदादिति प्राप्ते कर्तृगर्भकविहारस्यैव प्रत्यङ्मुखत्वविधानेन गजविपरिवृत्त्या तत्सादिनामपि परिवृत्तेरिव कर्तॄणां प्रत्यङ्मुखतायाअर्थसिद्धत्वेनाविधानान्न वाक्यभेदः ॥

सू० पुरस्तादपि ॥ १७ ॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्यादौ मन्त्रान्ते पठ्यमान स्वाहाकाराणां प्रदानार्थत्वेऽपि स्वाहा वाचे स्वाहा वाचस्पतय इत्यादौ पुरस्तात्क्रूयमाणानां न तदर्थत्वं स्वस्थानप्रच्युतानां नखकुण्डलादीनां कण्डूयनालङ्करणादिकार्याक्षमत्वदर्शनात्। अतएवेशपदस्य गिरापदस्थान एव निवेशो द्विरावृत्तिश्च कल्प्यते। तस्मात्स्वाहा यज्ञं वातादारभ इत्यादाविव न होमार्थतेति प्राप्ते तत्र चतुर्थ्या अभावात्सम्प्रदानानिर्धारणेन होमार्थत्वाभावेऽपि वागादीनां चतुर्थ्यन्तत्वेन देवतात्वावगमादत्र क्वापि स्थितस्य दीपस्येव पदस्याप्यर्थप्रकाशकत्वानपायाद्ब्राह्मणाय देहि देहि ब्राह्मणायेति वाक्याभ्यामविशेषेण बोधानुभावाच्च प्रदानार्थतैव। अतएव पुरस्तात्स्वाहाकारा वा अन्ये देवा उपरिष्टात्स्वाहाकारा वा अन्य इति श्रुत्याभयोरपि प्रदानार्थत्वमनूद्यते ॥

सू० स्वाहाकृत्य ॥ १८ ॥

स्वाहाकृत्य ब्रह्मणा ते जुहोमि स्वाहाकृतमिन्द्राय ते जुहोमीत्यादावुक्तन्यायेन चतुर्थ्यन्तसमभिव्याहृतानां प्रदानार्थत्वे प्राप्ते प्रत्ययार्थे

* अग्निवत्येवेति पाठस्तु वैदिकः।

Digitized by Google

सू० विरोधे सत्यप्यसम्भावितदोषस्य चरमभाविनः स्वरूपस-द्भावादौ प्रत्यक्षाद्यपेक्षत्वेऽपि प्रमितौ निराकाङ्क्षस्य निरवकाशस्य शास्त्रस्य बलीयस्त्वादतः कारणभूताद्ब्रह्मणोऽन्यत्सर्वं मिथ्या, न च प्रपञ्चस्य मिथ्यात्वेन जीवमिथ्यात्वमाशङ्कनीयं, ब्रह्मण एव जीवभावाद्ब्रह्मैव हि सर्वशरीरेषु जीवभावमनुभवति, "अनेन जीवेनात्मनाऽनुप्रविश्य" "एको देवः सर्वभूतेषु गूढः" "एको देवो बहुधा सन्निविष्टः" "एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते" "नान्योऽतोऽस्ति द्रष्टेत्येवमादिभ्यः । नन्वेकमेव ब्रह्म सर्वशरीरेषु जीवभावमनुभवतीति चेत् पादे मे वेदना शिरसि सुखमितिवत्सर्वशरीरेषु सुखदुःखप्रतिसन्धानं स्यात् जीवेश्वरबद्धमुक्तशिष्याचार्यज्ञत्वाज्ञत्वादिव्यवस्था च न स्यात् । अत्र केचिदद्वितीयत्वं ब्रह्मणोऽभ्युपयन्त एवं समादधते एकस्यैव ब्रह्मणः प्रतिबिम्बभूतानां जीवानां सुखित्वदुःखित्वादय एकस्यैव मुखस्य प्रतिबिम्बानां मणिकृपाणदर्पणादिषूपलभ्यमानानामल्पत्वमहत्त्वमलिनत्वविमलत्वादिवत्तदुपाधिवशाद्व्यवस्थाप्यन्ते, ननु अनेन जीवेनात्मनाऽनुप्रविश्येत्यादिश्रुतेर्न जीवा ब्रह्मणो भिद्यन्त इत्युक्तं, सत्यं, परमार्थतः काल्पनिकं तु भेदमाश्रित्येयं व्यवस्थोच्यते कस्य पुनः कल्पना ? न तावद्ब्रह्मणः तस्य परिशुद्धज्ञानात्मनः कल्पनाशून्यत्वात् । नापि जीवानाम्

इतरेतराश्रयत्वप्रसङ्गात् कल्पनाधीनो हि जीवभावो जीवाश्रया च कल्पनेति,

टी० "विरोधे सत्यपी"ति, भेदवासनामूलत्वं—सम्भावितदोषत्वम्, अपच्छेदन्यायाभिप्रायेणाह "चरमभाविन"इति, स्वरूपेति आदि-शब्देन व्युत्पत्तिरभिप्रेता, प्रमितौ निराकाङ्क्षस्येति प्रमितौ—प्रमितिहेतुत्वे अर्थनिश्चायकत्वइत्यर्थः शास्त्रस्य शब्दस्वरूपग्रहणव्युत्पत्त्यादिषु प्रत्यक्षापेक्षाऽस्ति तथाऽपि शास्त्रज्ञानं स्मृतिज्ञानवत् स्वार्थविषयज्ञानान्तरानुभूतत्वेन न स्वविषयं दर्शयति, अपि तु अनन्यगोचरमेव दर्शयतीत्यर्थः। नन्वित्यादि पादे मे वेदना इत्यादिना जीवेश्वरेत्यादिना च लौकिकवैदिकव्यवस्थानुपपत्तिरुक्ता, एतद्व्यवस्थासिद्ध्यर्थं जीवाज्ञानपादपक्षमुपन्यस्यति "अत्र केचिदि"ति, नन्वित्यादि सत्यं, परमार्थतः—परमार्थतो न भिद्यन्ते इति सत्यं, वयं त्वौपाधिकभेदमाश्रित्य ब्रूम इत्यर्थः, कस्येत्यादि अत्रोक्तमितरेतराश्रयं परिहरति—

भू० नैतदेवम्, अविद्याजीवभावयोर्बीजाङ्कुरन्यायेनाऽनादित्वात् । किञ्च प्रासादनिगरणादिवदनुपपन्नैकवेषायामवस्तुभूतायामविद्यायां नेतरेतराश्रयादयो वस्तुदोषा अनवक्लृप्तिमावहन्ति वस्तुतो ब्रह्मव्यतिरिक्तानां जीवानां स्वतोविशुद्धत्वेऽपि कृपाणादिगतमुखप्रतिबिम्बश्यामतादिवदौपाधिकाशुद्धिसम्भवादविद्याश्रयत्वोपपत्तेः काल्पनिकत्वोपपत्तिः, प्रतिबिम्बगतश्यामतादिवज्जीवगताशुद्धिरपि भ्रान्तिरेव, अन्यथाऽनिर्म्मोक्षत्वप्रसङ्गात्, जीवानां भ्रमस्य प्रवाहानादित्वान्न तद्धेतुरन्वेषणीय इति, तदेतदविदितद्वैतयाथात्म्यानां भेदवादश्रद्धालुजनसबहुमानावलोकनलिप्साविजृम्भितं, तथा हि जीवस्याकल्पितस्वा-

भाविकरूपेणाविद्याश्रयत्वे ब्रह्मण एवाविद्याश्रयत्वमुक्तं स्यात्, तदतिरिक्तेन तस्मिन् कल्पितेनाकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् ।

टी० "नैतदेवमि"ति, मुखान्तरेणापि परिहरति "किञ्चे"ति, अवस्तुभूतायामपरमार्थभूतायाम्, अनवक्लृप्तिरसिद्धिः, यथा ब्रह्मणः स्वतःशुद्धत्वेन नाविद्याश्रयत्वं, तथा ब्रह्माव्यतिरिक्तस्यापि जीवस्य स्वतःशुद्धत्वेनाविद्याश्रयत्वानुपपत्त्या तत्कार्यजन्मजरामरणादिभ्रमानुपपत्तिरित्यत्राह "वस्तुतो ब्रह्मे"ति, यथौपाधिकाशुद्धिर्वस्तुतोमुखाव्यतिरिक्तत्वेऽपि मुखे[1] संभवति, तथा वस्तुतो ब्रह्माव्यतिरिक्तत्वेन स्वतः शुद्धत्वे सत्यप्यौपाधिकाशुद्धिसम्भवादविद्याश्रयत्वेन काल्पनिकत्वमित्यर्थः । अशुद्धिर्नाम-स्वतःशुद्धत्वप्रतियोग्याकारः अविद्यासम्बन्धयोग्यतेत्यर्थः काल्पनिकत्वोपपत्तिः—जन्मजरामरणादेः काल्पनिकत्वोपपत्तिरित्यर्थः । औपाधिकाशुद्धेरपि ज्ञानानिवर्त्यत्वं स्यादित्यत्राह "प्रतिबिम्बगते"ति, अशुद्धिविषयभ्रमेणोत्तरोत्तराविद्याश्रयत्वमविद्याश्रयत्वेनोत्तरोत्तराशुद्धिविषयभ्रम इत्यन्योन्याश्रयत्वमाशङ्क्याह "जीवानां भ्रमस्ये"ति, जीवाज्ञानपक्षसमाप्तिद्योतनार्थमिति-करणम् । दूषयति "तदेतदि"ति, अविदिताद्वैतयाथात्म्यानामद्वैतानिपुणानां, श्रद्धालु-शब्देन भेदवादेऽप्यकौशलं विवक्षितम्, उभयतोऽपि भ्रष्टैरेवमुक्तमिति भावः । किमकल्पितस्वाभाविकरूपेणाविद्याश्रयत्व?-मुत कल्पिताकारेण? । अथ कल्पिताकारविशिष्टरूपेणे? ति विकल्पत्रयमभिप्रेत्य प्रथमं शिरो दूषयति "जीवस्ये"ति, द्वितीयं दूषयति "तदतिरिक्तेने"ति, कथं जडस्याविद्याश्रयत्वमुक्तं स्याज्जीवो ह्यविद्याश्रय इत्यत्राह—

भू० न खल्वद्वैतवादिनस्तदुभयव्यतिरिक्तमाकारमभ्युपगच्छन्ति, कल्पिताकारविशिष्टेन स्वरूपेणैवाविद्याश्रयत्वमिति चेत्तन्न स्वरूपस्याखण्डैकरसस्याविद्यामन्तरेण विशि-

१ मुखप्रतिबिम्बे इति पा० ।

स्वरूपत्वासिद्धेः, अविद्याश्रयाकार एव हि निरूप्यते। किञ्च बन्धमोक्षादिव्यवस्थासिद्ध्यर्थं हि जीवाज्ञान[1]स्य समाश्रयणं सा तु व्यवस्था जीवाज्ञानपक्षेऽपि न सिध्यति, अविद्याविनाश एव हि मोक्षः, तत्रैकस्मिन् मुक्ते अविद्याविनाशादितरेऽपि मुच्येरन्, अन्यस्याऽमुक्तत्वादविद्या तिष्ठतीति चेत् तर्ह्येकस्याप्यमुक्तिः स्यात् अविद्याया अविनष्टत्वात्, प्रतिजीवमविद्याभेदः कल्प्यते तत्र यस्याऽविद्या नष्टा स मोक्ष्यते, यस्य त्वनष्टा स भन्त्स्यत इति चेन्न प्रतिजीवमिति जीवभेदमाश्रित्य ब्रूषे स जीवभेदः किं स्वाभाविकः? उताविद्याकल्पितः? न तावत्स्वाभाविकः, अनभ्युपगमात्, भेदसिद्ध्यर्थस्यास्य चाविद्याकल्पनस्य व्यर्थत्वात्। अथाविद्याकल्पितः, तत्रेयं जीवभेदकल्पिकाऽविद्या किं ब्रह्मणः? उत जीवानां? ब्रह्मण इति चेदागतोऽसि मदीयं मार्गम्। अथ जीवानां किमस्या जीवभेदक्लृप्तिसिद्ध्यर्थतां विस्मरसि

टी० "न खल्वि"ति, ब्रह्मचिद्रूपं कल्पितं तु जडं तदुभयातिरिक्तानभ्युपगमात् कल्पिताकारेण अविद्याश्रयत्वे जडस्यैवाविद्याश्रयत्वमुक्तं स्यादित्यर्थः। तृतीयं शिरः शङ्कते "कल्पिते"ति, दूषयति "तत्रे"ति, ततः किमित्यत्राह "अविद्याश्रयाकार" इति, अविद्याश्रयत्वे सति विशिष्टत्वं विशिष्टाकार एवाविद्याश्रय इत्यात्माश्रयणमित्यर्थः। किञ्चेत्यादि, अविद्या किमेका? उत बह्वी? ति विकल्पमभिप्रेत्य एकत्वपक्षे दूषणमाह "तत्रैकस्मिन्नि"ति, तत्रापि किमविद्या नश्यति? उत न नश्यती? ति विकल्पमभिप्रेत्य नाशपक्षे दूषणमुक्तं "तत्रे"ति। अविनाशपक्षं दूषयति "अन्य-

१ जीवाज्ञानवादाश्रयणमिति।

स्ये''ति, । अथाविद्याबहुत्वपक्षमनुवदति ''प्रतिजीवम्''इति, भण्यते बद्धो भविष्यतीत्यर्थः । दूषयति ''तत्रे''ति, अत्रापि विकल्पयति ''स जीवभेद'' इति, अनभ्युपगमात्—अद्वैतहानिप्रसङ्गेनानभ्युपगमात् । द्वितीयं शिरोविकल्पयति ''किमि''ति, प्रथमपक्षस्योत्तरमाह ''ब्रह्मण इति चेदि''ति, द्वितीयं शिरो दूषयति ''अथे''ति, किमस्या जीवभेदक्लृप्तिसिद्ध्यर्थतां विस्मरसीति जीवभेदकल्पकाविद्या जीवकल्पनात् प्रागेव न जीवानाश्रयितुं क्षमा जीवासिद्धेरित्यर्थः । या जीवभेदकल्पिका अविद्यास्ता एव जीवाश्रया बद्धमुक्तादिव्यवस्थाहेतव इति पक्षमनूद्य दूषयति—

मू० अथ प्रतिजीवं बद्धमुक्तव्यवस्थासिद्ध्यर्थं या अविद्याः कल्प्यन्ते ताभिरेव जीवभेदोऽपीति मनुषे जीवभेदसिद्धौ तासिद्ध्यन्ति तासु सिद्धासु जीवभेदसिद्धिरितीतरेतराश्रयत्वं, न चात्र बीजाङ्कुरन्यायः सिद्ध्यति बीजाङ्कुरेषु ह्यन्यदन्यद्बीजमन्यस्यान्यस्याङ्कुरस्योत्पादकम्, इह तु याभिरविद्याभिर्ये जीवाः कल्प्यन्ते तानेवाश्रित्य तासां सिद्धिरित्यश[1]ङ्कनीयता । अथ बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवकल्पनां मन्यसे तथा सति जीवानां भङ्गुरत्वमकृताभ्यागमकृतप्रणाशादिप्रसङ्गश्च, अत एव ब्रह्मणः पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवभावभावकल्पनमित्यपि निरस्तम्, अविद्याप्रवाहेऽभ्युपगम्यमाने तत्तत्कल्पितजीवभावस्यापि तद्वत्प्रवाहानादिता स्यात् न ध्रुवरूपता, आमोक्षं च जीवभावस्य ध्रुवत्वमिष्टं न सिद्ध्येत् । यच्चोक्तम् अविद्याया अवस्तुरूपत्वेनानुपपन्नतैकाविषायां नेतरेतराश्रयत्वादयोव-

1 अशकनीयता इति तु युक्तम् ।

स्तुदोषा अनवक्लृप्तिमावहन्तीति, तथा सति मुक्तान् परं च ब्रह्माश्रयेदविद्या

टी० "अथ प्रतिजीवमि"ति, बीजाङ्कुरन्यायेन परिहारस्यानुपपत्तिमाह "न चे"ति, बीजाङ्कुरेषूत्पादकबीजस्योत्पाद्याङ्कुरापेक्षा नास्ति उत्पादकाङ्कुरमन्यत् उत्पाद्यं चान्यत्, अत्र तु जीवभेदकल्पकाविद्यायाः कल्पनीयजीवाश्रयापेक्षाऽस्ति कल्पकाविद्याश्रयो जीवः स एव कल्प्यश्चेति वैषम्यम्, अशकनीयता-साधयितुमशक्यतेत्यर्थः, उत्पाद्योत्पादकाङ्कुरव्यक्तिभेदवत् कल्पकाविद्याश्रयकल्प्यजीवव्यक्तिभेदार्थं प्रवाहानादित्वाभ्युपगमे दूषणमाह "अथे"ति, अकृताभ्यागमकृतनाशः, श्रुत्यर्थापत्तिः, आदि-शब्देन जीवस्वरूपनित्यत्वादिश्रुतिविरोधो विवक्षितः । एवं जीवाख्यधर्मिणः प्रवाहानादित्वकल्पने दूषणमुक्तं, जीवत्वधर्मतत्कल्पकाविद्ययोः प्रवाहानादित्वेऽप्युक्तं दूषणमतिदिशति "अत एवे"ति, पूर्वपूर्वजीवाश्रयाविद्ययोत्तरोत्तरजीवभावकल्पनं तत्तदाश्रयाविद्यया तदुत्तरोत्तरजीवभावकल्पनमित्यर्थः । अस्य पक्षस्य निरस्ततां विवृणोति "अविद्याप्रवाह"इति, धर्मिधर्मकल्पनपक्षयोरुभयोरपि तुल्यं दूषणमाह "आमोक्षाच्चे"ति, जीवस्य-जीवभावविशिष्टस्येत्यर्थः । अविद्याया दुर्घटत्वेन परिहारं दूषयति "यच्चोक्तमि"ति, ।

मू० शुद्धविद्यास्वरूपत्वादशुद्धिरूपा न तत्र प्रसजतीति चेत्किमुपपत्त्यनुवर्तिन्यऽविद्या ? एवं तर्ह्युक्ताभिरुपपत्तिभिर्जीवानपि नाश्रयेत् । किञ्च जीवाश्रयाया अविद्यायास्तत्त्वज्ञानोदयान्नाशे सति जीवो नश्येद्वा ? न वा ? यदि नश्येत्स्वरूपोच्छित्तिलक्षणो मोक्षः स्यात्, नो चेदविद्यानाशेऽप्यनिर्मोक्षः, ब्रह्मस्वरूपव्यतिरिक्तजीवत्वावस्थानात् । यच्चोक्तं मणिकृपाणदर्पणादिषूपलभ्यमानमुखमलिनत्व-

विमलत्वादिवच्छुद्ध्यशुद्ध्यादिव्यवस्थोपपत्तिरिति तचेदं, विमर्शनीयम् अल्पत्वमलिनत्वादय औपाधिकाः दोषाः कदा नश्येयुरिति श्रवणाद्युपाध्यपगम इति चेत् किं तदल्पत्वाद्याश्रयः प्रति[1]विम्बः तिष्ठति न वा ? तिष्ठतीति चेत् तत्स्थानीयस्य जीवस्यापि स्थितत्वादनिर्मोक्षप्रसङ्गः नश्यति चेत् तद्वदेव जीवनाशात्स्वरूपोच्छित्तिलक्षणो मोक्षः स्यात् । किञ्च यस्य ह्यपुरुषार्थरूपदोषप्रतिभासः तस्य तदुच्छेदः पुरुषार्थः, तच्च किमौपाधिकदोषप्रतिभासो विम्बस्थानीयस्य ब्रह्मणः ? उत प्रतिविम्बस्थानीयस्य जीवस्य ? उतान्यस्य कस्यचित् ? आद्ययोः कल्पयोर्दृष्टान्तोऽयं न सङ्गच्छते मुखस्य मुखप्रतिविम्बस्य चाल्पत्वादिदोषप्रतिभासशून्यत्वात्, न हि मुखं तत्प्रतिविम्बं वा चेतयते ब्रह्मणो दोषप्रतिभासे ब्रह्मणोऽविद्याश्रयत्वप्रसङ्गश्च

टी० शुद्धविद्यास्वरूपत्वात्–शुद्धज्ञप्तिरूपत्वात्, उक्ताभिरुपपत्तिभिरन्योन्याश्रयादिभिः । मोक्षानुपपत्त्या दूषयति “किं चे”ति, नोचेदिति अविद्याकार्यस्य जीवत्वस्यावस्थानादनिर्मोक्ष इत्यर्थः । दार्ष्टान्तिकपर्यालोचनया दूषणमुक्तम् । अथ दृष्टान्तालोचनया दूषयति “यच्चोक्त”मिति, अपुरुषार्थप्रतिभासानुपपत्तिमुखेन दूषयिष्यन् दोषप्रतिभासस्यावश्यम्भाविताभाह “किञ्च यस्य ही”ति, अपुरुषार्थदोषप्रतिभासस्य निरसनीयत्वात्तन्निरासाय हि वेदान्तारम्भः विम्बप्रतिविम्बस्थानीययोर्जीवब्रह्मणोर्दोषप्रतिभासायोगात्तन्निरासार्थो वेदान्तोऽनारभ्य इति दूषणं दर्शयितुं यस्य हीत्याद्युक्तं, दृष्टान्ते मुखतत्प्रतिविम्बतद्व्यतिरिक्तचेतनसद्भावात्तदभिप्रायेण विकल्पयति “उतान्यस्य कस्यचिद”ति, न हि मुखं तत्प्रतिविम्बं वा चेत-

१ प्रतिविम्बमिति पा० ।

यत इति रूपवदचेतनविशेषस्यैव प्रतिबिम्बं दृष्टं, तस्माद् ब्रह्मजीवयोर्बिम्ब-प्रतिबिम्बभावाभ्युपगमे तयोरचेतनत्वमापततीति भावः । ब्रह्मणो दोष-प्रतिभासपक्षेऽधिकं दूषणमाह "ब्रह्मण" इति, अन्यस्येति पक्षं दूषयति—

सू० तृतीयोऽपि कल्पो न कल्पते, जीवब्रह्मव्यतिरिक्तस्य द्रष्टुरभावात । किञ्चाविद्याकल्प्यस्य जीवस्य कल्पकः क इति निरूपणीयं न तावदविद्या अचेतनत्वात्, नापि जीव आत्माश्रयदोषप्रसङ्गात्, शुक्तिकारजतादिवदविद्याकल्प्यत्वाच्च जीवभावस्य, ब्रह्मैव कल्पकमिति चेत् ब्रह्माऽज्ञानमेवायातम् । किञ्च ब्रह्माज्ञानानभ्युपगमे किं ब्रह्म जीवान्पश्यति ? न वा ? न पश्यति चेत् ईक्षापूर्विका विचित्रसृष्टिर्नामरूपव्याकरणमित्यादि ब्रह्मणो न स्यात् । अथ पश्यत्यखण्डैकरसं ब्रह्म नाविद्यामन्तरेण जीवान् पश्यतीति ब्रह्माज्ञानप्रसङ्गः, अत एव मायाविद्याप्रविभागवादोऽपि निरस्तः, अज्ञानमन्तरेण हि मायिनोऽपि ब्रह्मणो जीवदर्शित्वं न स्यात् । न च मायावी परान् दृष्ट्वा मोहयितुमलं, न च माया मायाविनो दर्शनसाधनं दृष्टेषु परेषु तन्मोहनसाधनमात्रत्वात्तस्याः । अथ ब्रह्मणो माया तस्य जीवदर्शित्वं कुर्वती जीवमोहनहेतुरिति मन्यसे

टी० "तृतीयोऽपी"ति, पूर्वमविद्याश्रयाऽनुपपत्तिरुक्ता, इदानीमविद्याकार्यभ्रमाश्रयो निरूप्यते "किं चे"ति, कः कल्पकः को भ्रमाश्रय इत्यर्थः, नापि जीव इति कल्पकत्वात्सिद्धिः कल्प्यत्वादसिद्धिश्चेति स्वसिद्धेः स्वापेक्षा, जीवविषयभ्रमाश्रये सिद्धे हि जीवक्लृप्तिः, जीवसिद्धेः स्वविषयभ्रमाश्रयभूतेन स्वेनैव सापेक्षत्वादात्माश्रयत्वमित्यर्थः । अनुपपत्त्यन्त-

रमाह "शुक्तिके"ति, कल्प[1]कत्वाच्च भ्रमाश्रयत्वमनुपपन्नं, न हि दोषकल्प्यं रजतमर्थान्तरविषयभ्रमाश्रय इत्यर्थः। किं चेत्यादि अथ पश्यतीति अपरमार्थजीवप्रतीतिरविद्यया विना न सम्भवतीत्यर्थः, अत एवेक्षापूर्वकसृष्ट्यादृश्ये ब्रह्मणोऽपरमार्थजीवदर्शनार्थं चाविद्यान्वयाऽभ्युपगमादेवेत्यर्थः माया परभ्रमहेतुरविद्या स्वभ्रमहेतुरिति हि तन्मतं, मायिनं तु महेश्वरमिति श्रुतिरेतद्विभागहेतुरपरमार्थजीवदर्शनमज्ञानेनैव सम्भवतीति एतदेवोपपादयति अज्ञानमित्यादिना, किमविद्यया विना जीवदर्शित्व? मुत जीवदर्शनेन विना तन्मोहन? मिति पक्षयोः प्रथमं दूषितम् "अज्ञान"मिति, अनन्तरं शिरो दूषयति "न चे"ति, मायैव जीवदर्शनहेतुरित्यत्राह "नापी"ति, न हि परमोहनहेतुरेव माया मोहयितुर्मोहनीयदर्शनहेतुः, अस्यास्तु मायाया अयं विशेष इत्याशङ्क्य "अथे"ति, प्रतिवदति—

सू॰ तर्हि परिशुद्धस्याखण्डैकरसस्वप्रकाशस्य ब्रह्मणः परदर्शनं कुर्वती माया मायाऽपरपर्य्यायाऽविद्यैव स्यात्। अथ मतं, विपरीतदर्शनहेतुरविद्या, माया तु मिथ्याभूतं ब्रह्म यतिरिक्तं मिथ्यात्वेनैव दर्शयन्ती न ब्रह्मणो विपरीतदर्शनहेतुः अतस्तस्या नाविद्यात्वमिति नैवं, चन्द्रैकत्वे ज्ञायमाने द्विचन्द्रज्ञानहेतोरप्यविद्यात्वात्। यदि च ब्रह्म मिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति न तर्हि तन्मोहयति। न ह्युन्मत्तो मिथ्यात्वेन जानान् मोहयितुमीहते। अथापुरुषार्थोऽपरमार्थदर्शनहेतुरविद्या, माया तु ब्रह्मणोनाऽपुरुषार्थदर्शनहेतुः, अतोऽस्या नाविद्यात्वमिति मतं, तन्न द्विचन्द्रज्ञानस्य दुःखहेतुत्वाभावेनापुरुषार्थत्वाभावेऽपि तद्धेतुरविद्यैव, तन्निरसने च प्रयस्यन्ती, यदि च नापुरुषा-

[1] कल्प्यत्वाच्चेति पा॰।

र्थदर्शनकरी माया तद्व्यनुच्छेद्यतया नित्या ब्रह्मस्वरूपानुबन्धिनी स्यात्, अस्तु को दोष इति चेत् द्वैतदर्शनमेव दोषः, यत्र हि द्वैतमिव भवति यत्र त्वस्य सर्वमात्मैवाऽभूत्तत्केन कं पश्येदित्याद्यऽद्वैतश्रुतयः प्रकुप्येयुः, परमार्थविषया अद्वैतश्रुतयः मायायास्त्वपरमार्थत्वादविरोध इति चेत्, अपरिच्छिन्नानन्दैकस्वरूपस्य ब्रह्मणोऽपरमार्थभूतमायादर्शनं तद्वत्ता वा ऽविद्यामन्तरेण नोपपद्यते । किञ्चापरमार्थभूतया नित्यया मायया किं प्रयोजनं ब्रह्मणो? जीवमोहनमिति चेत् अपुरुषार्थेन मोहनेन किं प्रयोजनं? क्रीडेति चेत् अपरिच्छिन्नानन्दस्य किं क्रीडया, परिपूर्णभोगानामेव क्रीडा पुरुषार्थत्वेन लोके दृष्टेति चेत नैवमिहोपपद्यते, न ह्यपरमार्थभूतैः क्रीडोपकरणैरपरमार्थतया प्रतिभासमानैर्निष्पन्नयाऽपरमार्थभूतया क्रीडयाऽपरमार्थभूतेन च तत्प्रतिभासेन तुन्मत्तानां क्रीडारसो निष्पद्यते ॥

टी० "तर्ही"ति, नामविवाद आवयोरित्यर्थः । शङ्कते "अथे"ति, परिहरति "नैव"मिति, न केवलं सत्यत्वेन दर्शनहेतुरेव दोषः, अपरमार्थप्रतिभासमात्रहेतुर्दोष इत्यभिप्रायेणाह "चन्द्रैकत्व"इति, अपुरुषार्थदर्शनहेतुत्वतदभावरूपं वैषम्यं शङ्कते "अथे"ति, परिहरति "तन्न"ति, अपरिच्छिन्नेति स्वरूपस्यैवापरिच्छिन्नानन्दत्वादिच्छया मायादर्शनमनुपपन्नं तस्याश्चापरमार्थत्वादविद्याकृतमेव तद्दर्शनमित्यर्थः,तद्वत्ता–तत्सम्बन्धः, किञ्चेति अपुरुषार्थत्वाभावेन निरसनीयत्वाभावाभिप्रायेणाह "नित्यये"ति, आश्रयविभागानुपपत्त्या निरसनीयत्वाभावानुपपत्त्या च मायाविद्याविभागानुपपत्तिमाह–

सू० मायाश्रयतयाऽभिमतब्रह्मव्यतिरेकेणाविद्याश्रयस्य जीवस्य कल्पनाऽसम्भवश्च पूर्ववदेव द्रष्टव्यः, अतो ब्रह्मैवानाद्यविद्याप्रबलं स्वगतनानात्वं पश्यतीत्यद्वितीयत्वं ब्रह्मणोऽभ्युपयद्भिरभ्युपेतव्यम् । यत्तु बन्धमोक्षव्यवस्था नोपपद्यत इति न तद्ब्रह्माज्ञानवादिनस्त्वयम् एकस्यैव ब्रह्मणोऽस्य स्वाज्ञाननिवृत्त्या मोक्ष्यमाणत्वात् बद्धमुक्तादिव्यवस्थाया एवाभावात्, व्यवह्रियमाणायाश्च बद्धमुक्तशिष्याचार्य्यादिव्यवस्थायाः कल्पनिकत्वात्स्वप्नदर्शिन इव चैकस्यैवाविद्यया सर्वकल्पनोपपत्तेः, स्वप्नदृशा ह्येकेन दृष्टाः शिष्याचार्य्यादयः तदविद्याकल्पिता एव, अत एव बह्वविद्याकल्पनमपि न युक्तिमत् पारमार्थिकी बन्धमोक्षव्यवस्था स्वपरव्यवस्था च जीवाज्ञानवादिनाऽपि नाभ्युपेयते। अपारमार्थिकी त्वेकस्यैवाविद्ययोपपद्यते, प्रयोगश्च—बन्धमोक्षव्यवस्थाः स्वपरव्यवस्थाश्च स्वाविद्याकल्पिता अपारमार्थिकत्वात्स्वप्नदृष्टव्यवस्थावदिति, शरीरान्तराण्यपि मय्येवात्मवन्ति शरीरत्वादेतच्छरीरवत्, शरीरान्तराण्यपि मदविद्याकल्पितानि शरीरत्वात् कार्य्यत्वात् जडत्वात्कल्पितत्वाद्वा एतच्छरीरवत्, विवादाध्यासितं चेतनजातमहमेव चेतनत्वात् यदनहं तदचेतनं दृष्टं यथा घटः,

टी० "मायाश्रयतये"ति, पूर्ववदेवेति अन्योन्याश्रयादिभिर्दूषणैरित्यर्थः, मायाविद्याविभागानुपपत्त्या ब्रह्मण एवाविद्याश्रयत्वमुपसंहरति "अत" इति, बन्धमोक्षादिव्यवस्थानुपपत्तिं जीवाज्ञानकल्पनहेतुभूतां पूर्वा-

कामनूद्य परिहरति "यत्त्वि"ति, नेदं चोद्यमनिष्टमित्यर्थः, तर्हि बद्ध-मुक्तादिव्यवहारः कथमित्यत्राह "व्यवह्रियमाणायाश्चे"ति, वक्ष्यमाणा-नुमानगर्भमाह "काल्पनिकत्वा"दिति, स्वप्नव्यवस्थाः काल्पनिकत्वा-दथैकाविद्ययोपपद्यन्ते तथा सर्वासां व्यवस्थानां काल्पनिकत्वादेका-विद्ययैव तत्कल्पनोपपत्तिरित्यर्थः, सर्वकल्पनोपपत्तेरिति अन्यथाऽनुपपन्नं हिकल्पकम् अन्यथोपपन्नत्वान्नाविद्याभेदक्लृप्तिर्न्याय्येत्यर्थः । दृष्टान्तं शिक्षयति "स्वप्नदृशा ही"ति, अत एवाश्रयैकत्वेऽपि सर्वव्यवस्थोपपत्ति-र्येन हेतुना सिद्धा तेनैव काल्पनिकत्वेन हेतुना अविद्याबहुत्वकल्पनमपि न युक्तमित्यर्थः, परमार्थकार्याणां हि बहुहेत्वपेक्षा, अपरमार्थानां त्वेकेनै-वालमित्यभिप्रायेणाह "पारमार्थिकी"ति, । ततः किमित्यत्राह "अपा-रमार्थिकी"त्विति, प्रयोगश्चेति जीवाज्ञानवादिनं प्रति प्रथमतृतीये अनु-माने उच्येते तं च-भेदवादिनं च प्रति प्रथमद्वितीयहेतुः प्रयुज्यते, तृतीयः प्रत्येकनिरपेक्षहेतुचतुष्टयगर्भः, तुरीयं व्यतिरेक्यनुमानं, व्यवस्थानुपप-त्तिपरिहारमुपसंहरति—

मू० अतस्स्वपरविभागोबद्धमुक्तशिष्याचार्यादिव्यवस्थाश्चैक-स्याविद्याकल्पिताः, द्वैतवादिनाऽपि बद्धमुक्तव्यवस्था दुरु-पपादा अतीतानां कल्पानामानन्त्यात् एकैकस्मिन्कल्पे एकैकमुक्तावपि सर्वेषां मोक्षसम्भवादमुक्तानुपपत्तेः, अन-न्तत्वादात्मनाममुक्ताश्च सन्तीति चेत् किमिदमनन्त-त्वम् असङ्ख्येयत्वमिति चेन्न भूयस्त्वादल्पज्ञैरसङ्ख्येयत्वे-ऽपीश्वरस्य सर्वज्ञस्य सङ्ख्येया एव तस्याप्यशक्यत्वे सर्व-ज्ञत्वं न स्यात्, आत्मनां निस्सङ्ख्येयत्वादीश्वरस्याविद्य-मानसङ्ख्यावेदनाभावो नासार्वज्ञ्यमावहतीति चेन्न भिन्नत्वे सङ्ख्याविधुरत्वं नोपपद्यते आत्मानः सङ्ख्यावन्तो भिन्न-त्वात् माषसर्षपघटपटादिवत् भिन्नत्वे चात्मनां घटा-

द्विवत् जडत्वमनात्मत्वं चयित्वं च प्रसज्यते ब्रह्मणश्चा-
नन्तत्वं न स्यात्, अनन्तत्वं नाम परिच्छेदरहितत्वं, भेद-
वादे च वस्त्वन्तराद्विलक्षणत्वेन ब्रह्मणो वस्तुतः परिच्छे-
दरहितत्वं न शक्यते वक्तुं वस्त्वन्तरभाव एव हि वस्तुतः
परिच्छेदः वस्तुतः परिच्छिन्नस्य देशतः कालतश्चापरि-
च्छिन्नत्वं न युज्यते वस्त्वन्तराद्विलक्षणत्वेन वस्तुतः परि-
च्छिन्ना एव हि घटादयो देशतः कालतश्च परिच्छिन्ना
दृष्टा तथा सर्वे चेतनाः, ब्रह्म च वस्तुतः परिच्छिन्नादेश-
कालाभ्यामपि परिच्छिद्यन्ते

टी० "अत"इति, काणादपक्षेऽपि स्वपक्षोक्तं दोषमापादयति "द्वै-
तवादिनाऽपी"त्यादि, असङ्ख्येयत्वमिति चेदिति देशकालाद्यपरिच्छेदस्या-
नन्त-शब्देन विवक्षितत्वव्यावृत्त्यर्थमसङ्ख्येयत्वमित्युक्तं भिन्नत्वेन सङ्ख्या-
वत्त्वं साधयति "आत्मान"इति, माषसर्षपघटपटादिवदिति सङ्ख्यावत्ता-
रतम्येऽपि संख्यावत्त्वमविशिष्टमिति भावः । भिन्नत्वे दूषणान्तरं चाह
"भिन्नत्वे चे"ति, अत्र व्यतिरेकित्रयं विवक्षितम् आत्मानोभिन्ना आत्मत्वात्
यद्भिन्नं न तदात्मा यथा घटादि, आत्मा न भिन्नः अजडत्वात् यद्भिन्नं न
तदजडं यथा घटादि, आत्मा न भिन्नः अक्षयत्वात् यद्भिन्नं न तदक्षयि
यथा घटादिरिति । दूषणान्तरमाह "ब्रह्मणश्चे"ति, अनन्तत्वं नाम किं
तस्य भेदविवादेऽनुपपन्नत्वं कथमित्यत्राह "अनन्तत्वं नामे"ति, वस्त्व-
न्तरभाव इति वस्त्वन्तरत्वं वस्तुतः परिच्छेद इत्यर्थः, वस्तुतः परिच्छे-
दव्याप्तं देशकालपरिच्छिन्नत्वमप्यापततीत्याह "वस्तुत"इति, व्याप्तिं
दर्शयति "वस्त्वन्तरादि"ति, अस्यार्थस्यानिष्टत्वं दर्शयति—

मू० एवं च सत्यं ज्ञानमनन्तमित्यादिभिस्सर्वप्रकारपरिच्छेद-
रहितत्वं वदद्भिर्विरोधः, उत्पत्तिविनाशादयश्च जीवानां

ब्रह्मणश्च प्रसज्येरन्, कालपरिच्छेद एव ह्युत्पत्तिविनाशभागित्वम्, अत एवास्यैवापरिच्छिन्नस्य ब्रह्मणोऽविद्याविजृम्भितं ब्रह्मादिस्तम्बपर्य्यन्तं कृत्स्नं जगत्सुखदुःखप्रतिसन्धानव्यवस्थादयोऽपि स्वाप्नव्यवस्थावदविद्यास्वाभाव्यादुपपद्यन्ते, तस्मादेकमेव नित्यमुक्तस्वप्रकाशस्वभावमनाद्यविद्यावशाज्जगदाकारेण विवर्त्तत इति परमार्थतो ब्रह्मव्यतिरिक्ताभावात्तदनन्यत्वं जगत इति, अत्रोच्यते निर्विशेषस्वप्रकाशमात्रं ब्रह्मानाद्यविद्यातिरोहितस्वस्वरूपं स्वगतनानात्वं पश्यतीत्येतत्प्रकाशस्वरूपस्य निरंशस्य प्रकाशनिवृत्तिरूपतिरोधाने स्वरूपनाशप्रसङ्गेन तिरोधानासम्भवादिभ्यः सकलप्रमाणविरुद्धं स्ववचनविरुद्धं चेति पूर्वमेवोक्तं, यत्पुनरुक्तं कारणव्यतिरिक्तं कार्य्यं युक्तिबाधितत्वेन शुक्तिकारजतादिवद् भ्रम इति तदयुक्तं युक्तेरभावात् ।

टी० "एवं चे"ति, निरुपपदमनन्तपदमसंकुचितवृत्ति त्रिविधपरिच्छेदराहित्यमाहेति भावः । एवमपरिच्छिन्नस्य परिच्छिन्नत्वप्रसङ्ग उक्तः । अथाविकारस्य सविकारत्वप्रसङ्गमाह "उत्पत्ती"ति, अविकारत्वश्रुतिविरोधश्चेत्यर्थः, एकस्याविद्यया सर्वस्य व्यवस्थोपपत्तिमुपसंहरति "अत"इति, ब्रह्माज्ञानवादपक्षमुपसंहरति "तस्मादि"ति, विवर्त्तते—अध्यासाधिष्ठानं भवति, न तु परिणमतीत्यर्थः, ब्रह्मव्यतिरिक्ताभावात्तदनन्यत्वं जगत इति ब्रह्मणः परमार्थभूतमन्यच्च जगदित्यर्थः, ब्रह्माज्ञानवादिनं वैशेषिकः प्रतिवदति "अत्रोच्यत"इति, तिरोधानेऽपि तद्रहितांशस्तिष्ठतीति न वक्तुं युक्तं निरंशत्वादित्यभिप्रायेण निरंशस्येत्युक्तं, स्वरूपनाशमात्रप्रसङ्गेनेति तिरोधानं नाम प्रकाशनिवृत्तिः तत्र जडस्य प्रकाशव्यतिरिक्त-

Digitized by Google

त्वात् प्रकाशनिवृत्तावपि तस्य स्थितिरुपपद्यते प्रकाशैकरूपस्य ब्रह्मणः प्रकाशनिवृत्तिरूपतिरोधानं नाम स्वरूपनिवृत्तिरेवेत्यर्थः, स्ववचनविरुद्धं चेतीति नित्यत्वादिसाधकवचनविरुद्धं निर्विशेषत्वं ज्ञप्तित्वविरुद्धमस्मत्प्रयगोचरत्वमित्यर्थः पूर्वमेवोक्तमस्मिन् प्रबन्धे सिद्धान्तिनोक्तमित्यर्थः ।

भू० यत्त्वनुवर्त्तमानस्य कारणमात्रस्य सत्यत्वं व्यावर्तमानानां घटशरादिकार्य्याणामसत्यत्वमिति तदप्यन्यत्र दृष्टस्यान्यत्र व्यावर्तमानता न बाधिकेत्यादिभिः पूर्वमेव परिहृतम् । यच्चोपलभ्यमानत्वविनाशित्वाभ्यां सदसदनिर्वचनीयत्वेन कार्य्यस्य मृषात्वमिति तदसत् उपलब्धिविनाशयोगो हि न मिथ्यात्वं साधयति, किं त्वनित्यत्वं यद्देशकालसम्बन्धितया यदुपलब्धं तद्देशकालसम्बन्धितया बाधितत्वमेव हि तस्य मिथ्यात्वे हेतुः देशान्तरकालान्तरसम्बन्धितयोपलब्धस्यान्यदेशकालसम्बन्धित्वेन बाधितत्वं देशान्तरकालान्तराव्याप्तिमात्रं साधयति न तु मिथ्यात्वं, प्रतिप्रयोगश्च घटादिकार्य्यं सत्यं देशकालादिप्रतिपन्नोपाधावबाधितत्वात् आत्मवत्, यच्चोक्तं कारणस्वरूपादविक्रतादिक्रताच्च कार्य्योत्पत्तिर्न सम्भवतीति सदसत् ।

टी० "यत्पुनरि"ति, सोपाधिकत्वकालात्ययापदिष्टत्वस्ववचनव्याहतिभिरनैकान्त्यादिभिश्चपूर्वमेव परिहृतमित्यर्थः, मिथ्यात्वानित्यत्वयोर्भेदं दर्शयति "यद्देशकाले"ति, यद्यनित्यत्वमेव मिथ्यात्वमुच्यते तर्हि सिद्धसाधनं मिथ्यात्वानुमानं, यद्यनित्यत्वविलक्षणं मिथ्यात्वं साध्यते तर्हि सोपाधिकत्वादीनि दूषणानि स्युरिति भावः । प्रत्यनुमानमाह "प्रतिप्रयोगश्चे"ति, ननु मिथ्यात्वानुमानं न सोपाधिकम् उपाधेरभावात् प्रति-

पक्षदेशकालोपाधौ बाधो न साध्यसमव्याप्तः देशकालभ्रमेषु प्रतिपन्नोपाधौ बाधाभावात्, न हि देशकालभ्रमस्य देशकालान्तरोपाधिप्रतिपत्तिः, तस्माच्च साध्यसमव्याप्तिः, यदि बाधमात्रमेव हेतुः तत्र पक्षेऽपि विद्यमानत्वात्, पक्षेष्वविद्यमानः सर्वसपक्षानुयायी ह्युपाधिः तस्माच्च सोपाधिकत्वमिति अत्रायं परिहारः देशकालभ्रमेष्वपि प्रतिपन्नोपाधौ बाधोऽस्ति, न हि देशकालावेव सर्वत्रोपाधिः तौ तु देशकालव्यतिरिक्तविषयभ्रमेषु देशकालविषयभ्रमेष्वन्ये पदार्था उपाधयः, यथा दुर्दिने सायङ्कालभ्रमान्वितः पुरुषः पश्चादादित्यदर्शनात् प्रबुद्ध एवं मन्यते यदाहं सन्ध्यामुपासितवांच तदा सायमिति यदाऽहं बुद्धः न तदानीं प्रभातमिति च, यत्राहं सुप्तः नायं सदेश इत्यादि किं च देशभ्रमे काल उपाधिः स्यात् कालभ्रमे देश उपाधिः स्यात्, न चान्योन्याश्रयः भ्रमव्यक्तिभेदात्, तस्मात्प्रतिपन्नोपाधौ बाधस्य साध्यसमव्याप्तिरस्त्येव इममर्थमभिप्रेत्य—

सू० देशकालादिसहकारिसमवधानात्कारणात्कार्य्योत्पत्तिसम्भवात्, तत्समवधानं च विकृतस्याविकृतस्य च न सम्भवतीति यदुक्तं तदप्ययुक्तं पूर्वमविकृतस्यैव कालादिसमवधानसम्भवादविकृतत्वाविशेषात्पूर्वमपि देशकालादिसमवधानं प्रसज्यत इति चेत न देशकालादिसमवधानस्य कारणान्तरायत्तस्यैतदायत्तत्वाभावात्, अतो देशकालादिसमवधानरूपविशेषमापन्नं कारणं कार्य्यमुत्पादयतीति न किञ्चिदवद्यं, कारणस्य च कार्य्यं प्रत्यारम्भकत्वमबाधितं दृश्यमानं न केनापि प्रकारेणापह्नोतुं शक्यते, । यत्तु हेमादिमात्रस्य रुचकादिकार्य्यस्य तदाश्रयस्य वा हेमादेरारम्भकत्वं न सम्भवतीति तदयुक्तं हेमादिमात्रस्यैव यथोक्तपरिकरयुक्तस्यारम्भकत्वसम्भवात्, न चार-

म्भकहेमव्यतिरिक्तं कार्यं न दृश्यते इति वक्तुं शक्यं हेमातिरिक्तस्य स्वस्तिकस्य दर्शनात्, बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरस्य साधितत्वाच्च न चायं शुक्तिकारजतादिवद्भ्रमः ।

टी० देशकालादिप्रतिपन्नोपाधावबाधितत्वादित्यत्रादि-शब्दः प्रयुक्तः, देशकालादिप्रतिपन्नोपाधौ बाधार्हत्वं मिथ्यात्वं तत्कार्यभूतः प्रतिपन्नोपाधौ बाधो मिथ्यात्वसाधकः यथाऽग्नेर्दाहार्हस्य दाहकार्यं दाहार्हत्वे लिङ्गं तद्वत्, अतः साध्याविशिष्टत्वचोद्यमपास्तं, समत्रहितात्-समन्वितात् कारणान्तरं कर्म ईश्वरसङ्कल्प इत्यादि एतदायत्तत्वाभावाद्धिकारायत्तत्वाभावात्, एवमनुग्राहकस्तर्क उक्तः।अथानुग्राह्यं प्रमाणमाह "कारणस्य चे"ति, पूर्वपक्षिणा कार्यकारणभावमिथ्यात्वग्राहिप्रमाणानुग्राहकत्वेन हि तर्क उक्तः तथाऽत्राऽप्यनुग्राहकतर्कपूर्वकं प्रमाणमुक्तं परोक्ततर्कश्च जात्युक्तिः स्वव्याघातात्, कार्यकारणभागभङ्गवाचिवाक्यं किं परस्य कार्यकारणभावभङ्गविषयप्रमितेः कारणं, तर्हि न कार्यकारणभावभङ्ग? उत न ततोऽपि न तद्भङ्गः सा प्रतीतिर्मिथ्या चेत्ततोऽपि न भङ्गः बाधबाधे पूर्वबाधितस्य सत्यत्वात्, एवं कार्यकारणभावस्य प्रामाणिकत्वात्तद्विरुद्धबाह्यतर्कानुदय एवेति स्थितं, यत्त्विति हेममात्रस्य रुचकादिकार्यमात्रस्य कार्याश्रितद्रव्यमात्रस्य चाऽऽरम्भकत्वं न सम्भवतीत्युक्तमित्यर्थः, यथोक्तपरिकरो देशकालादिः, अनिरूपितवस्त्ववलम्बनबुद्धिशब्दादीनामसाधकत्वं पूर्वपक्षिणोक्तं प्रतिक्षिपति "न चायमि"ति, ।

सू० उत्पत्तिविनाशयोरन्तराले उपलभ्यमानस्य तद्देशकालसम्बन्धितया बाधादर्शनात्, न चास्या उपलब्धेर्बाधिका काचिदपि युक्तिर्दृश्यते प्रागनुपलब्धस्वस्तिकोपलब्धिवेलायामपि हेमप्रत्यभिज्ञा स्वस्तिकाश्रयतया हेम्नोऽप्यनुवृत्तेरविरुद्धाश्रुतिभिस्तु प्रपञ्चमिथ्यात्वसाधनं पूर्वमेव निरस्तम् ।

यच्चान्यदुक्तं प्रत्यक्षाविरोधादि प्रतिवक्तव्यं तदपि सर्वं पूर्वमेव सूक्तम्। यच्चोक्तम् एकेनात्मना सर्वाणि शरीराण्यात्मवन्तीति तदसत् एकस्यैव सर्वशरीरप्रयुक्तसुखदुःखप्रतिसन्धानप्रसङ्गात्, सौभरिप्रभृतिषु ह्यात्मैकत्वेनाऽनेकशरीरप्रयुक्तसुखादिप्रतिसन्धानमेकस्य दृश्यते, न चाहमर्थस्य ज्ञातृत्वात्तद्भेदात्प्रतिसन्धानाभावो नात्मभेदादिति वक्तुं शक्यम् आत्मा ज्ञातैव स चाहमर्थ एव अन्तःकरणभूतस्त्वहङ्कारो जडत्वात्करणत्वाच्च शरीरेन्द्रियादिवन्न ज्ञातेत्युपपादितत्वात्,

टी० उत्पत्तिविनाशयोरन्तराले उपलभ्यमानस्येति अनित्यत्वे साध्ये सिद्धसाधनत्वं प्रतिपन्नोपाधौ बाधश्चेत्तदनुपलम्भादेव निरस्त इति भावः । हेमप्रत्यभिज्ञा कथं घटत? इत्यत्राह "प्रागि"ति, श्रुतिभिस्त्विति सिद्धान्तिना निरस्तमित्यर्थः, यच्चान्यदिति प्रत्यक्षं सन्मात्रग्राहि, विरोधे सत्यपि शास्त्रं बलीय इत्यादिकं त्वदुक्तं पूर्वमेवानेन ग्रन्थकारेण निरस्तमित्यर्थः । तदुक्तमनुमानगणं दूषयति "यच्चोक्तमि"ति, । व्याप्तिविरोधमाह "एकस्यैवे"ति, यत्संप्रतिपन्नैकात्मकं शरीरं तत्र हि सुखादिप्रतिसन्धानं दृष्टमिति भावः । प्रतिसन्धानाभावः शरीरभेदनिबन्धन इत्यत्राह "सौभरिप्रभृतिष्वि"ति, विलक्षणज्ञानानां केषाञ्चिच्छरीरभेदेऽपि पूर्वजन्मसुखादिप्रत्यभिज्ञानादिति प्रभृति-शब्दस्य भावः । किञ्च किमेकशरीरवर्त्यात्मन एकत्वं साध्यते? उतानेकशरीरवर्तिनः? प्रथमे कल्पे सिद्धसाधनत्वं, द्वितीये धर्मिग्राहकप्रमाणबाधः परशरीरे तच्चेष्टादिभिरात्मा ह्यनुमीयते तच्चानुमानं स्वस्मादन्यत्वेनैवैनं दर्शयति स्वात्मा ह्यहमित्यपरोक्षमवभासते न हि परशरीरगत आत्मा अपरोक्ष इति अन्तःकरणभेदात् प्रतिसन्धानाभाव इत्याशङ्क्य दूषयति 'न चे"ति, अन्तःकरणस्य ज्ञातृत्वेऽपिपूर्वेपूर्वकल्पेषूत्पन्नविनष्टान्तःकरणानामपि सनकादीनां तत्प्रतिसन्धानसम्भ-

Digitized by Google

वात् नान्तःकरण भेदः प्रतिसन्धाभावहेतुः । अन्तःकरणस्य ज्ञातृत्वमेव नास्ति तत्त्वात्मन इत्याह "आत्मा ज्ञातैवे"ति,

सू० यच्च शरीरत्वजडत्वकार्य्यत्वकल्पितत्वैस्सर्वशरीराणामेकस्याविद्याकल्पितत्वमुक्तं तदपि सर्वशरीराणामविद्याकल्पितत्वस्यैवाभावादयुक्तं तदभावश्चाबाधितस्य सत्यतोपपादनात् । यच्च चेतनादन्यस्य जडत्वदर्शनात्सर्वचेतनानामनन्यत्वमुक्तं तदपि सुखदुःखव्यवस्थया भेदोपपादनादेव निरस्तम् । यत्तु मय्येवात्मवन्ति मदविद्याकल्पितान्यहमेव सर्वं चेतनजातमित्यहमर्थस्यैक्यमुपपादितं तदज्ञानस्वसिद्धान्तस्य भ्रान्तिजल्पितम् अहन्त्वमाद्यर्थविलक्षणं चिन्मात्रं ह्यात्मा त्वन्मते, किञ्च निर्विशेषचिन्मात्रातिरेकि सर्वं मिथ्येति वदतोमोक्षार्थश्रवणादिप्रयत्नो निष्फलः । अविद्याकार्यत्वात् शुक्तिकारजतादिषु रजताद्युपादानादिप्रयत्नवन्मोक्षार्थप्रयत्नोऽपि व्यर्थः, कल्पिताचार्य्यायत्तज्ञानकार्य्यत्वात् शुकप्रह्लादवामदेवादिप्रयत्नवत्, तत्त्वमस्यादिवाक्यजन्यं ज्ञानं न बन्धनिवर्तकम् अविद्याकल्पितवाक्यजन्यत्वात्स्वयमविद्यात्मकत्वात्, अविद्याकल्पितज्ञात्राश्रयत्वात्, कल्पिताचार्यायत्तश्रवणजन्यत्वाद्वा स्वाप्नबन्धनिवर्त्तकवाक्यजन्यज्ञानवत् । किञ्च निर्विशेषचिन्मात्रं ब्रह्म मिथ्या अविद्याकार्य्यज्ञानगम्यत्वात् अविद्याकल्पितज्ञात्राश्रितज्ञानगम्यत्वात् अविद्याकल्पितज्ञानगम्यत्वाद्वा यदेवं तत्तथा, यथा स्वाप्नगन्धर्वनगरादिः ।

टी० "यच्चे"ति शरीराणामविद्याकल्पितत्वे सिद्धे ह्येकाविद्याकल्पितत्वसिद्धिः तदेव नास्तीति सपक्षभूतशरीरस्याविद्याकल्पितत्वाभावात् दृष्टान्तस्य साध्यविकलत्वमुक्तं भवति, कल्पितत्वहेतोरन्यतरासिद्धिश्च । कल्पितत्वाभावमुपपादयति "तदभावश्चे"ति, सर्वं चेतनजातमहमेव चेतनत्वादिति यद्व्यतिरेकिपूर्वमुक्तं तदर्थेन उदाहृतं भवति यच्चेति दूषयति "तदपी"ति, कालात्ययापदिष्टत्वं दूषणमुक्तं भवति। एष्वनुमानेषूक्तिदूषणमाह "यत्त्विति बद्धमुक्तादिव्यवस्थानामेकाविद्याकल्पितत्वं यदुक्तं तत्राप्यपारमार्थिकत्वहेतोरसिद्धिः सोपाधिकत्वं चानुसन्धेयं किञ्चेति अविद्याकार्यत्वादि हेतुगणैरनिष्टप्रसङ्गमाह "तत्त्वमस्यादी"ति, अविद्यामूलत्वाश्रयणे तत्त्वमस्यादिवाक्यजन्यज्ञानस्यानिवर्तकत्वप्रसङ्ग इत्यर्थः, यथा संवित्सिद्धौ "अभाविन्येव सा पश्चाद्भाविनीत्युपदिश्यताम् । सन्ति हि स्वप्नदृष्टानि दृष्टान्तवचनानि त" इति सा–मुक्तिः, मृषावादिनां द्विधा प्रक्रिया ब्रह्म न वेदान्तैः प्रतिपाद्यते अपि तु भेदनिषेध एव क्रियत इति स्वरूपपरवाक्यैः प्रतिपाद्यत इति च,

मू० न च निर्विशेषचिन्मात्रं ब्रह्म स्वयं प्रकाशते येन न प्रमाणान्तरमपेक्षते । यत्त्वात्मसाक्षिकं स्वयं प्रकाशज्ञानं दृश्यते तत्तु सविशेषसिद्धिरूपं ज्ञातृगतमेव दृश्यत इति पूर्वमेवोक्तं, यानि च तस्य निर्विशेषत्वसाधनानि[1] यौक्तिकानि ज्ञानान्युपन्यस्तानि तानि चानन्तरोक्तैरविद्याकार्यत्वादित्यादिभिरनुमानैर्निरस्तानि । न च निर्विशेषस्य चिन्मात्रस्याज्ञानसाक्षित्वमहङ्कारादिजगद्भ्रमस्योपपद्यते, साक्षित्वभ्रमादयोऽपि हि ज्ञातृविशेषगता दृष्टाः न ज्ञप्तिमात्रगताः । न च तस्य प्रकाशकत्वं स्वायत्तप्रकाशता वा सिध्यति, प्रकाशो हि नाम कस्यचित्पुरुषस्य

१ साधकानि इति पा० ।

कल्चनार्थविशेषं प्रति सिद्धिरूपो दृश्यते, तत एव हि तस्य स्वयंप्रकाशतोपपाद्यते भवद्भिरपि, न चातादृशस्य निर्विशेषस्य स्वप्रकाशता सम्भवति। यः पुनरस्वगोष्ठीषपरमार्थादपि परमार्थकार्य्यं दृश्यत इत्युद्घोषः सोऽपि तानि कार्य्याणि सर्वाण्यबाधितकल्पानि व्यावहारिकसत्यानि वस्तुतस्त्वविद्यात्मकान्येवेति स्वाभ्युपगमादेव निरस्तः।

टी० तत्र स्वरूपपरवाक्यप्रतिपाद्यत्वे स्वपक्षेऽनिष्टं प्रसञ्जयति "किञ्च निर्विशेषे"ति, न चेत्यादि ज्ञेयविशेषसिद्धिरूपं ज्ञेयविशेषव्यवहारानुरूपमित्यर्थः, यानि चेति अनुमानैस्तर्कैः, तर्कस्यानुमानशब्दवाच्यत्वं व्याप्तिसापेक्षत्वात् "ऊहस्तर्कोनुमानोक्ति"रिति हलायुधः, निरस्तानीति अविद्याकार्यत्वादिहेतुभिः स्वाभिमतार्थसाधकत्वं निरस्तमित्यर्थः, उपपाद्यते भवद्भिरिति स्वसम्बन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वादिति हेतोरित्यर्थः, न चेति अतादृशस्य निर्विशेषत्वात् कर्मकर्तृरहितस्येत्यर्थः, तादृशस्येति पाठेऽयमर्थः–तादृशस्य कर्मकर्त्तृसहितो यः प्रकाशते तस्य निर्विशेषत्वेऽभिमते सा न सिध्यतीति पूर्वमपरमार्थहेतोः शुक्तिरजताद्युपादानादिप्रयत्नवविष्फलत्वमुक्तं तत्र अपरमार्थादपि परमार्थोत्पत्तेरिति शङ्कते "यः पुनरि"ति, किमियं परमार्थात् परमार्थोत्पत्तिर्भवत्पक्षेणोच्यते? उतास्मत्पक्षेण? ति विकल्पमभिप्रेत्याद्यपक्षे तदसिद्धिमाह "सोऽपि तानी"ति, द्वितीयपक्षे दूषणमाह–

मू० अस्माभिरपि सर्वत्र परमार्थादेव कारणात्सर्वकार्य्योत्पत्तिमुपपादयद्भिः पूर्वमेव निरस्तः। न च त्वयैषामनुभूयमानानां[1] श्रुतिविरोधो वक्तुं शक्यते श्रुतेरप्यविद्याकार्य्यत्वेनाविद्यात्मकत्वेन चोक्तदृष्टान्तेभ्यो विशेषाभावात्। यत्तु ब्रह्मणोऽपारमार्थिकज्ञानगम्यत्वेऽपि पश्चात्तनबाधादर्श-

१ त्वयैषामनुमानम् इति पा०।

नाद्ब्रह्म सत्यमेवेति तदसत् दुष्टकारणजन्यज्ञानगम्यत्वे निश्चिते सति पश्चात्तनबाधादर्शनस्याकिञ्चित्करत्वात्, तथा शून्यमेव तत्त्वमिति वाक्यजन्यज्ञानस्य पश्चात्तनबाधादर्शनेऽपि दोषमूलत्वनिश्चयादेव तदर्थस्यासत्यत्वम् । किञ्च नेह नानाऽस्ति किञ्चन विज्ञानमानन्दं ब्रह्मेति विज्ञानमात्रातिरिक्तस्य कृत्स्नस्य वस्तुजातस्य निषेधकत्वेन सर्वस्मात् परत्वात्पश्चात्तनबाधादर्शनमुच्यते शून्यमेव तत्त्वमिति तस्याप्यभावं वदतस्तस्मात्परत्वेन पश्चात्तनबाधो दृश्यते सर्वशून्यतातिरेकिनिषेधासम्भवात्तस्यैव पश्चात्तनबाधादर्शनं, दोषमूलत्वं तु प्रत्यक्षादीनां वेदान्तजन्मनः सर्वशून्यज्ञानस्याप्यविशिष्टम्, अतः सर्वं विज्ञानजातं पारमार्थिकज्ञातृगतं स्वयं च परमार्थभूतमर्थविशेषसिद्धिरूपं तत्र किञ्चिद् ज्ञानं दोषमूलं दोषश्च परमार्थः, किञ्चिच्च निर्दोषं पारमार्थिकसामग्रीजन्यमिति यावन्नाभ्युपेयते न तावत्सत्यमिथ्यार्थव्यवस्था लोकव्यवहारश्च सेत्स्यति, लोकव्यवहारो हि पारमार्थिको भ्रान्तिरूपश्च पारमार्थिकज्ञातृगतार्थविशेषसिद्धिरूपप्रकाशपूर्वकः ।

टी० "अस्माभि"रिति, विशेषाभावात् प्रबलविरोधे हि दौर्बल्यमिति भावः । बाधादर्शनाभ्युपगमेन दूषयति "दुष्टकारणे"ति, । तदनभ्युपगमेन दूषयति "किञ्चे"ति, प्रत्यक्षादिप्रमाणां वेदेऽपि सविशेषपरवाक्यजातं च विहाय निषेधपरवाक्यप्राबल्यं हि त्वदुक्तं तत्र विधिरूपत्वात् पूर्वेषां दौर्बल्यं निषेधरूपत्वाच्च पश्चात्तनस्य प्राबल्यं, तच्च सर्वशून्यवादिन एवेत्यर्थः । अतस्सर्वमिति अत इत्यस्य न सेत्स्यतीत्यन्वयः लोक

व्यवहारस्यासिद्धिमुपपादयिष्यन्नाह "लोके"ति, तामुपपादयति "लोकव्यवहारो ही"ति, ततः किमित्यत्राह–

सू० निर्विशेषसन्मात्रस्य तु पारमार्थिकस्याऽपारमार्थिकस्य च प्रतिभासादेर्हेतुत्वासम्भवाल्लोकव्यवहारो न सम्भवति, यच्च तैर्निरधिष्ठानभ्रमासम्भवात् सर्वाध्यासाधिष्ठानस्य सन्मात्रस्य तु पारमार्थिकत्वमुक्तं तदपि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येऽपि पारमार्थिकस्य भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेर्निरस्तम् । अथाधिष्ठानापारमार्थ्ये न क्वचिद् भ्रमो दृष्ट इति सन्मात्रस्य पारमार्थिकत्वमवश्याश्रयणीयमिति मन्यसे हन्त तर्हि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येऽपि न क्वचिद्भ्रमो दृष्ट इति दर्शनानुगुण्येन तेषामपि पारमार्थ्यमवश्याश्रयणीयमिति न कश्चिद्विशेषोऽन्यत्र तत्संरम्भात् । यत्तु भेदपक्षेऽप्यतीतकल्पानामानन्त्यात्सर्वेषामात्मनां मुक्तत्वेन बद्धासम्भवाद्बद्धमुक्तव्यवस्था न सम्भवतीति तदात्मानन्त्येन परिहृतम् ।

टी० निर्विशेषे"ति, निर्विशेषज्ञानस्य ज्ञातृत्वाभावाच्च प्रतिभासहेतुत्वं, ज्ञातैव ह्याश्रयतया प्रतिभासहेतुर्दृष्टः ज्ञातृगतज्ञानत्वाभावाच्च न व्यवहारहेतुत्वं, ज्ञातृगतज्ञानं हि स्वपरव्यवहारहेतुतया दृष्टमित्यर्थः । यद्वा निर्विशेषज्ञानस्य ज्ञातृत्वाभावात् प्रतिभासस्याश्रयतया हेतुत्वं नास्ति निर्विशेषत्वादेव कारणतया हेतुत्वमपि नास्तीत्यर्थः । पारमार्थिकापारमार्थिक–शब्दौ परमार्थापरमार्थविषयत्वपरौ, प्रतिभासादेरित्यत्रादि–शब्दो व्यवहारपरः, यच्चेत्यादि न कश्चिद्विशेषोऽन्यत्र तत्संरम्भादिति अत्रायमभिप्रायः अधिष्ठानस्यापरमार्थ्ये तस्याप्यधिष्ठानान्तरापेक्षतयाऽनवस्थेति चेच्च दोषस्यापारमार्थ्ये तस्यापि दोषान्तरमित्यनवस्था स्यात्, तत्र

स्वरूपानादित्वेन परिहारस्तुल्यः प्रवाहानादित्वेन परिहारश्चेत् सोऽपि तुल्यः, दुर्घटत्वेन परिहारश्चेत् सोऽपि तुल्यः, परमार्थत्वप्रयुक्तोपपत्तिरपरमार्थत्वप्रयुक्तोपपत्तिरिति द्विविधा तत्र परमार्थत्वयुक्तोपपत्तिनिरपेक्षत्वं दुर्घटत्वम्, इयं चापरमार्थत्वप्रयुक्तोपपत्तिरधिष्ठानपारमार्थ्यापेक्षेति चेत् दोषपारमार्थ्यमप्यपरमार्थत्वप्रयुक्तोपपत्तिरित्यपि तुल्यमिति यत्त्वित्यादि तदात्मानन्त्येन परिहृतं यथा माषसर्षपादिष्वेकैकजातीया एवानन्ताः समुदिताश्चानन्ताः तथा बद्धाश्चानन्ता मुक्ताश्च अनन्ताः,

मू० यत्त्वात्मनां भिन्नत्वे माषसर्षपघटपटादिवत्सङ्ख्यावत्त्वमवर्जनीयमिति तच घटादीनामप्यनन्तत्वात् दृष्टान्तः साध्यविकलस्स्यात्, दश घटास्सहस्रं माषा इति सङ्ख्यावत्त्वं दृश्यत इति चेत् सत्यं, तत्तु न घटादिस्वरूपगतमपि तु देशकालाद्युपाधिमद्घटादिगतं, तादृशं तु सङ्ख्यावत्त्वमात्मनामप्यभ्युपगच्छामः । न च तावता सर्वमुक्तिप्रसङ्गः, आत्मस्वरूपानन्त्यात् । यत्त्वात्मनां भिन्नत्वे घटादिवज्जडत्वानात्मत्वचयित्वप्रसङ्ग इति तदयुक्तम् एकजातीयानां भेदस्य तज्जातीयानां जात्यन्तरीयत्वानापादनात् । न हि घटादीनां भेदस्तेषां पटत्वमापादयति, यत्तु भिन्नत्वे वस्तुनः परिच्छेदाद् देशकालाभ्यामपि परिच्छेदो ब्रह्मणः प्रसज्यत इत्यनन्तत्वं ब्रह्मणो न सिध्यति इति ।

टी० समुदिताश्च सर्वे चेतना अनन्ता इत्यर्थः, सर्वेषामात्मनाम् एकत्वसङ्ख्या प्रत्येकमस्त्येव अतो न सङ्ख्यावत्त्वमात्रं निषिध्यते, द्वित्वादिसङ्ख्याया अवधिरेव निषिध्यते अतीतकल्पानामानन्त्यादेकस्मिन् कल्प एकघटसद्भावेऽपि घटानामानन्त्यं सिद्धमिति साध्यविकलता दृष्टान्तस्य, किं देशकालकर्माद्युपाध्यवच्छिन्ना घटाः सपक्षीकृताः? उत कृत्स्न-

च्छब्दैर्निर्दिश्यते तत्र धात्वर्थं शीलं यस्य स धात्वर्थो धर्मो यस्य तस्य धात्वर्थस्य साधुकारीत्येवमित्यर्थः । 'तद्धर्मा तदाचार इति' । धर्मशब्दस्याचारे प्रसिद्धत्वात् । 'विनापि शीलेनेति' । तच्छीलाद्भेदं दर्शयति । 'यो धात्वर्थं साधु करोतीति' । विनापि शीलेनेत्यनुषङ्गः ॥

"तृन्"॥ 'मुण्डयितार इति' । श्राविष्ठायनानां गोत्रविशेषाणामेष कुलधर्मः । 'अपहर्त्तार इति' । अहुरदेशे भवा आहुरकाः, रोपधेतोः प्राचामिति वुञ्, तेषामेव देशधर्मः,'आहृ सिद्धे' निर्वृत्ते । 'उन्नेतार इति' । अयमपि कुलधर्मः । 'तृन्विधाविति' । अताच्छील्याद्यर्थ आरम्भः । 'तृजेव भवतीति' । तृन्तृचौ, शंसिक्षदादिभ्यः संज्ञायां चानिटाविन्यनेन । 'स्वरे विशेष इति' । तृनि तादौ च निति कृत्यतावित गतेः प्रकृतिस्वरस्स्यात् तृचि तु कृत्स्वरो भवति, तृन्तृचावित्यस्यैव विषयव्यवस्थार्थमिदम् अनुपसर्गेभ्यस्तृन् सोपसर्गेभ्यस्तृजिति प्रपञ्चार्थं वा, तथा च प्रशास्तेति तृच्यपीष्टनास्ति । 'नयतेः षुक् चेति' । गुणे कृते षुगवेदितव्यः,प्रकृत्यन्तरं वा नेषति नेषतुःनेषिष्येति दर्शनात् । 'अनिट्त्वं चेति' । त्विषः स्वत एवानिट्त्वादुक्तवक्ष्यमाणसर्वोपसंख्यानशेषभूतमिदं तेन पोता क्षत्तेत्यनिट्त्वं भवति । 'क्षदेरिति' । धातुष्वपठितोपि क्षदिरस्मादेव वचनादभ्युपगम्यते, आत्मनेपदी चायम् उक्षाणां वा वेहतं वाक्षदन्तइति बह्वृचब्राह्मणप्रयोगात् । 'क्व चिदधिकृत इति' । द्वाररक्षणे रथप्राजने च ॥

"अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्" ॥ कृञिति करोतेर्ग्रहणं प्रसिद्धेः न हिंसार्थस्य जनी प्रादुर्भावे डुपचष्पाके, पचि व्यक्तीकरणइत्यस्येदित्त्वान्नुमा भाव्यमिति नायं निर्देशः सम्भवति, शल हुल पत्ल गतौ उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ इति भट्टिकाव्ये प्रयोगः, पद गतावित्यन्ये पठन्ति, मदी हर्षे, मद तृप्तियोगइत्ययं तु चुरादिस्तस्योन्मदेति निर्देशो न सम्भवति, रुच दीप्तौ त्रपूष् लज्जायां वृतु वर्त्तने वृधु वृद्धौ षह मर्षणे चर गत्यर्थः, येत्र सोपपदा उपात्तास्तत्रोपात्तादेव रूपाद्भवति तत एतन्न नोदनीयम् उदः पचपतमद इति वक्तव्यं किं स्वरूपतः प्रत्येकमुत्पूर्वपाठेनेति तेन समुत्पति-

ष्णुरिति न भवतीत्याहुः, ये तु निरुपपदा उपात्तास्तेभ्यो यथादर्शनं भवति ॥

"ग्लेश्छन्दसि" ॥ 'पारयिष्णव इति'। अयामन्ताल्वाय्येत्न्विष्णुष्वित्ययादेशः ॥

"भुवश्च" ॥ छन्दसीत्युच्यते तत्कथं जगत्प्रभोरप्रभविष्णु वैष्णवं विष्णवे प्रभविष्णवइति निरङ्कुशाः कवयः। 'भ्राजिष्णुनेति'। नैतद्भाष्ये समाश्रितम् ॥

"ग्लाजिस्थश्चग्स्नुः" ॥ 'चर्त्वभूत इति'। चर्त्वं प्राप्तश्चर्त्वेन वा प्राप्त इत्यर्थः। 'श्र्युकः कितीत्यत्रापीति'। गकारोपि चर्त्वभूतो निर्दिश्यतइत्यनुषङ्गः। 'क्स्नोर्गित्त्वान्न स्थ ईकारः' स्थास्नुरित्यत्र ईकारो न भवति क्स्नोर्गित्त्वात्। 'क्ङितोरीत्त्वशासनात्'। ककारे ऽकार उच्चारणार्थः क्ङितोरीत्त्वमुच्यते ऽयं तु गित्, यद्येवं जिष्णुर्भूष्णुरित्यत्र गुणः प्राप्नोति 'गुणाभावस्त्रिषु स्मार्यः,' गित् किन्ङिदिति त्रिषु गुणाभावः स्मर्त्तव्यः क्ङिति चेत्यत्र गकारप्रश्लेषात्. इह तर्हि भूष्णुरिति श्र्युकः कितीतीट्प्रतिषेधो न प्राप्नोति 'श्र्युको ऽनिट्त्वं गकोरितोः' श्र्युकः परस्य यदनिट्त्वं तद्गकारककारयोर्द्वयोरपीतोर्भवति न केवलं ककारे तत्रापि गकारस्य चर्त्वभूतस्य निर्देशात्, यद्येवं चर्त्वस्यासिद्धत्वाद्धशि चेत्युत्वं प्राप्नोति सौत्रो निर्देशो ऽसंहितया वा निर्देशः करिष्यते छन्दसि। 'दंक्ष्णवः पशव इति'। क्स्नोर्गित्त्वादुपधालोपाभावः ॥

"त्रसिगृधिधृषिक्षिपेः क्नुः" ॥ 'त्रस्नुरिति'। नेड्वशि कृतीतीट्प्रतिषेधः ॥

"शमित्यष्टाभ्यो घिनुण्" ॥ 'इतिशब्द आद्यर्थे इति'। अनेकार्थत्वान्निपातानां तत्र शम् इति आदिर्येषामिति बहुव्रीहौ सुपो लुक्, शमु उपशमने, तमु काङ्क्षायां, दमु उपशमने, श्रमु तपसि खेदे च, भ्रमु अनवस्थाने, क्षमूष् सहने, क्लमु ग्लानौ, मदी हर्षे। 'उकार उच्चारणार्थ इति'। नानुबन्धः, अनुबन्धे हि सति शमिनौ शमिन इत्यत्रोगिदचामिति नुम् प्रसज्येत शमिनितराशमिनितमेत्यत्र नद्याः शेषस्यान्यतरस्याम् उगितश्चेत्यन्यत-

रस्यां ह्रस्वस्स्यात् घञ्रूपकल्पचेलडिति नित्यमिष्यते तस्माच्चायमनुबन्धः किं तूच्चारणार्थ इति व्याचक्षते। भाष्ये तूकार उगित्कार्यार्थोऽनुबन्ध एवेति स्थितं तत्र ह्रस्वत्वं विकल्पेनेष्यते न नित्यं, नुम् विधौ तु झल्ग्रहणमनुवर्त्तिष्यते ऽझजन्तत्वान्न भविष्यति। 'शमीति'। नोदात्तस्येति वृद्धिप्रतिषेधः। उन्मादीति'। ननु प्रमादीत्यत्र चरितार्थमेतत् उत्पूर्वात्त्वलंकृञादिसूत्रेण विशेषविहित इष्णुजेव प्राप्नोति वासरूपविधिना घिनुण् भविष्यति ताच्छीलिकेषु वासरूपविधिर्नास्तीत्येतत्तु प्रायिकमिति वक्ष्यते। 'असितेति'। असु क्षेपणे, तृन्नेव भवति॥

"संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च"॥ पृची संपर्के, रुधिर् आवरणे, अनो रुध कामइत्यस्य तु दैवादिकस्याग्रहणं पृचिना साहचर्यात्, अनुना सह पठितस्य दैवादिकस्य ग्रहणमित्यन्ये, यम उपरमे, यसु प्रयत्ने, सृ गतौ, सृज विसर्गे, देवृ देवने, ज्वर रोगे, क्षिप् प्रेरणे, रट परिभाषणे, वद व्यक्तायां वाचि, दह भस्मीकरणे, मुह वैचित्त्ये, दुष वैकृत्ये, द्विष अप्रीतौ, द्रुह जिघांसायां, दुह प्रपूरणे, युजिर् योगे, क्रीडृ विहारे, विचिर् पृथग्भावे, त्यज हानौ, रञ्ज रागे, भज सेवायाम्, चर गत्यर्थः, मुष स्तेये, हन हिंसागत्योः। 'परिदेविभ्वादिरिति'। गृह्यतइति संबन्धः, क्रीडार्थस्य तु णयन्तस्याग्रहणम् अण्यन्तैः साहचर्यात् प्रतिपदोक्तत्वाच्च, अत एव दिव परिकूजनइत्यस्य चौरादिकस्यापि न भवति। 'संपर्कीति'। चजोः कु घिण्ण्यतोरिति कुत्वं, येत्र संपूर्वाः तेषां द्वन्द्वं कृत्वा सम एतेभ्य इति वक्तव्यम्। एवमाङ्पूर्वेषु परिपूर्वेषु च, एवं सिद्धे यत्प्रतिपदं पठति तस्यैतत्प्रयोजनम् उपात्तादेव रूपाद्यथास्यादुपसर्गान्तरयुक्तान्मा भूदिति॥

"प्रे लपसृद्रुमथवदवसः"॥ रप लप व्यक्तायां वाचि, सृ गतौ, द्रु गतौ, मथे विलोडने॥

"निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञो वुञ्"॥ णिदि कुत्सायाम्, तृह हिसि हिंसायां, क्लिश विबाधने, खादृ

भक्षणे, णश अदर्शने, णयन्तः, भाविना णिलोपेन निर्देशः, अकारस्त्वागन्तुकः, केचित्तु विनाशीति णयन्तमेव पठन्ति, क्षिपि रटी उक्तार्थौ, वदिर्णयन्तः, भाष व्यक्तायां वाचि, असूयतिः कण्ड्वादियगन्तः, अथ किमर्थं निन्दादिभ्यो वुञ् विधीयते न ण्वुल्तृचाविति ण्वुलैव सिद्धं तदेव रूपं स्वरोऽप्यसूयतिमेकं वर्जयित्वान्यत्र स एव, असूयतेस्तु ण्वुलि प्रत्ययात्पूर्वमुदात्तं स्यात्, वुञि तु ञिनत्यादिरिति तस्माद्वैकस्माद् वुञ् विधेयो ऽन्येभ्यस्तु ण्वुलैव सिद्धं, योयं ताच्छीलादिषु तृन्विधीयते स बाधकः प्राप्नोति वासरूपविधिना ण्वुलपि भविष्यति तत्राह । 'ण्वुलैव सिद्धइति'। 'तृजादयो न भवन्तीति'। न केवलं ण्वुल्विषयमेव ज्ञापकं किं तर्हि प्रत्ययमात्रविषयमित्यर्थः ॥

"देविक्रुशोश्चोपसर्गे" ॥ 'देवयतेरिति' । दीव्यतेर्हेतुमण्णिजन्तस्य दिव कूजनइत्यस्य चुरादिणयन्तस्य च ॥

"चलनशब्दार्थादकर्मकाद्युच्" ॥ 'चोपन इति' । चुप मन्दायां गतौ । 'शब्दन इति' । शब्द शब्दने चुरादिः शब्दप्रातिपदिकाद्वा तत्करोतीति णिच् ॥

"अनुदात्तेतश्च हलादेः ॥ 'जुगुप्सन इति'। गुपादिष्वनुबन्धकरणमात्मनेपदार्थमित्युक्तत्वाद् अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति समुदायस्यानुदात्तेत्त्वं तत्रासत्यादिग्रहणे तदन्तविधिः स्यात् ततश्चात्र न स्यात् अतस्तदन्तविधिर्मा भूदित्येवमर्थमादिग्रहणम् ॥

"जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः" ॥ जु इति सौत्रो धातुः, गतिवचन इत्येके, वेगवचन इत्यन्ये, क्रमु पादविक्षेपे, द्रम हम्म मीमृ गतौ, सृ गतौ, गृधु अभिकांक्षायां, ज्वल दीप्तौ, शुच शोके, लष इच्छायाम्, शल हुल पत्लृ गतौ, पद गतौ, ननु चात्र चंक्रम्यप्रभृतयः केचिच्चलनार्थाः पदिस्त्वनुदात्तेत् तेभ्यो यथायोगं पूर्वसूत्राभ्यामेव युच् सिद्धः किमर्थमिह ग्रहणमित्यत्राह । 'चलनार्थानामित्यादि'। प्रपूर्वः पदिः सकर्मकः । 'ज्ञापकार्थमिति'। ज्ञापनं ज्ञापकं भाष्यकारप्रयोगाद्भावे ण्वुल् । 'अन्ये पदिग्रहणं वर्णयन्तीति'। भाष्यकारादयः, ते हि मन्यन्ते सकर्मकात्प-

Digitized by Google

देर्युचा न भवितव्यम् अनभिधानादिति, यथाह पदिग्रहणमनर्थकमनुदात्तेतश्च हलादेरिति सिद्धत्वात्। वासरूपनिवृत्त्यर्थं त्विति। ताच्छीलिके वासरूपविधिर्नास्तीति निन्दादिसूत्रे तच्छीलादिषु कर्तृषु वासरूपविधिना तृजादयो न भवन्तीति ज्ञापितम्, इह तु ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति ज्ञाप्यते। 'अलंकर्तेति'। एवमलंकृञादेस्तृन भवतीत्यर्थः, यथा तु पदिग्रहणं ज्ञापकं तथा दर्शयति। 'तथाहीति'। 'उकञा विशेषविहितेनेति'। लषपतपदेत्यादिना। 'प्रायिकं चैतदिति'। एतच्च सूददीपदीक्षश्चेत्यत्र वक्ष्यते। 'गन्तेति'। गमेर्लषपतपदाद्युकञ्विषये तृन् भवति। 'विकत्थन इति'। वौ कषलषेति घिनुण्विषयेऽनुदात्तेल्लक्षणो युज् भवति॥

"न यः"॥ अय पय नय तय गताविति नयतेरनुदात्तेत्वादेव युचः सिद्धत्वान्न तस्येदं ग्रहणं किं तर्हि प्रतिषेध एवेति मत्वाह। 'यकारान्तादिति'। 'पूर्वेणेति'। अनुदात्तेतश्चेत्यादिना। 'क्रूयिता क्ष्मायितेति'। क्रूयी शब्दे, क्ष्मायी विधूनने॥

"सूददीपदीक्षश्च"॥ षूद क्षरणे, दीपी दीप्तौ, दीक्ष मौण्ड्ये, ननु ताच्छीलिकेषु वासरूपविधिर्नास्तीति ज्ञापितं तत्कथं वासरूपेण युजिह प्राप्नोति तत्राह। 'ताच्छीलिकेष्विति'। प्रायिकत्वस्य चायमेव प्रतिषेधो लिङ्गं सर्वत्र वासरूपविधेरभावे विशेषविहितेन रप्रत्ययेन बाधितत्वादेव युज् न भविष्यतीति प्रतिषेधोयमनर्थकस्स्यात्, तथा चेत्यादिना प्रायिकत्वस्य प्रयोजनन्दर्शयति, नानेन प्रतिषेधेन युज्रयोरेव समावेशो ज्ञाप्यते यथा भाष्ये प्रतिभासः किं तर्हि ज्ञापकस्यैव प्रायिकत्वं तेन गन्ता खेटं विकत्थन इत्यपि भवति, एतच्च पूर्वमेवोक्तम्।'अथ वा नन्द्यादिष्विति'। योगविभागस्त्विदानीं वैचित्र्यार्थः॥

"लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्"॥'अपलाषुकमिति' अशोभनमित्यर्थः। नन्वत्र विशेषविहितत्वादपे च लष इति घिनुणा भाव्यम् अयं तु केवलेन्योपसर्गपूर्वे च लषौ चरितार्थः, वासरूपविधिनोकञ् भविष्यति ताच्छीलिकेषु वासरूपविधिर्नास्तीत्येतत्तु प्रायिकमित्युक्तम्।

Digitized by Google

'आघातुकं पाकलिकस्य मूत्रमिति'[1]। पाकलो नाम गजानां व्याधिविशेषः स यस्यास्ति स पाकलिकः, द्वन्द्वोपतापगर्ह्यादितीनिरेव प्राप्नोति व्रीह्यादिपाठाच्च भवति, पाकलिको गजस्तस्य मूत्रं स्पृष्टमाघ्रातं वान्यान् गजान्हन्ति एष तस्य स्वभावः। 'आगामुकं वाराणसीं रक्ष आहुरिति'। यः शापादिना रक्षोभूतः तं मोक्षार्थं वाराणसीं प्रत्यागमनशीलमाहुरित्यर्थः॥

"जल्पभिक्षकुट्टलुण्ठवृङः षाकन्"॥ जल्प जप व्यक्तायां वाचि, भिक्ष याच्ञायाम्, कुट्ट छेदने लुठ स्तेये चौरादिकौ, वृङ् सम्भक्तौ॥

"प्रजोरिनिः"॥ इनेरिकारो नकारस्येत्संज्ञा माभूदिति॥

"जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च"॥ जि जये जि अभिभवे द्वयोरपि ग्रहणं, दृङ् आदरे, श्रिञ् सेवायाम्, इण् गतौ, टुवम् उद्गमने, व्यथ भयचलनयोः नञ्पूर्वः, नञः कृतलोपस्य निर्देशः, निपातनाच्च नञो धातुना समासः, ततो नलोपः, ततः प्रत्ययः, अम रोगे, भू सत्तायाम्। 'द्वयोरपि ग्रहणमिति'। क्षिष हिंसायामित्यस्य तु सानुबन्धकत्वादग्रहणम्। 'षू प्रेरण इत्यस्य ग्रहणमिति'। षूङ् प्राणिगर्भविमोचने षूङ् प्राणिप्रसवइत्येतयोस्तु सानुबन्धकत्वादग्रहणं, प्रजोरप्यत्रैव ग्रहणं कर्तव्यम् एवं हि चकारो न वक्तव्यो भवति तथा तु न कृतमित्येव॥

"स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्"॥ 'चुरादावदन्ताः पठ्यन्तइति'। तेन णौ कृतस्यातो लोपस्य स्थानिवद्भावात्पतयतेरत उपधाया इति वृद्धिर्न भवति, स्पृहयति गृहयत्योश्च लघूपधगुणो न भवतीति भावः। 'अत्पूर्वो धाञिति'। धेटस्तु अत्पूर्वस्याप्रयोग एव। अथ किमर्थमालुज्विधीयते न लुजेवोच्येत का रूपसिद्धिः स्पृहयालुः शपि कृते अतो दीर्घो यञीति दीर्घो भविष्यति तत्र हि 'तुरुस्तुशम्यमः सार्वधातुक'इति सार्वधातुकग्रहणमनुवर्त्तते न तु तिङ्ग्रहणं लकारस्येत्संज्ञाप्रयोजनाभावाच्च भविष्यति यकारादित्वाद्वा, किं यकारो न श्रूयते लुप्तनिर्दिष्टो यकारः, एवमपि श्रद्धालुर्न सिद्ध्यति कथं शपः श्लुर्द्विर्वचनं श्नाभ्यस्तयो-

[1] मुद्रितमूलपुस्तके आघातुकं कापालिकस्य शूलमिति दृश्यते एतद्व्याख्यानात्तु आघातुकं पाकलिकस्य मूत्रमिति पाठोयुक्तः प्रतिभाति।

रात: श्रद्धालुरिति प्राप्नोति अथापि संज्ञापूर्वको विधिरनित्य इति द्विर्वचनं न प्रवर्तिष्यतइत्युच्येत एवमपि ज्ञापनार्थमालुज् विधीयते एतज् ज्ञापयति यत्रालुचैव रूपसिद्धिस्ततोऽयं भवतीति तेनालुचि शीङो ग्रहणमित्येतच्च वक्तव्यं भवति ॥

"दाधेट्सिशदसदो रुः" ॥ गामादाग्रहणेष्वविशेष इति दारूपाणां त्रयाणां यथाभिधानं ग्रहणं, धेट् पाने, षिञ् बन्धने, शद्लृ शातने, षद्लृ विशरणगत्यवसादनेषु ॥

"सृघस्यदः क्मरच्" ॥ घसिः प्रकृत्यन्तरमस्ति ॥

"भञ्जभासमिदो घुरच्" ॥ भञ्जो आमर्द्दने, भासृ दीप्तौ, ञिमिदा स्नेहने ॥

"विदिभिदिच्छिदेः कुरच्" ॥ 'न लाभार्थस्येति'। ज्ञानार्थस्येदमुपलक्षणं न लाभार्थस्येत्यर्थः, कुत इत्याह । 'स्वभावादिति'। तेन लुग्विकरणालुग्विकरणयोरित्येतदपि न प्रवर्त्ततइत्यर्थः, विदिभिदिच्छिदेर्ङिदिति प्रकृतस्यैव घुरचो ङित्त्वातिदेशेनैव सिद्धे प्रत्ययान्तरकरणमातिदेशिकं ङित्त्वमनित्यमिति ज्ञापनार्थं, तेन धू विधूनने कुटादिः, ततोर्त्तिलूधूइतीत्रप्रत्यये कृते ङित्कार्यं न भवति । केचित्तु धुवित्रमित्येवेच्छन्ति प्राणा वै धवित्राणीति छान्दसं तदनुसारेण कल्पसूत्रेषु प्रयोगः । 'कर्मकर्त्तरीति'। माघस्तु शुद्धे कर्त्तरि प्रयुङ्क्ते गुरुमत्सरच्छिदुरयादुरयाचितमङ्गना इति ॥

"इणनशिजिसर्त्तिभ्यः क्वरप्" ॥ क्वरपः पकारः स्वरार्थः तुगर्थश्च । 'इत्वरीति'। टिड्ढाणञित्यादिना ङीप् ॥

"यजजपदशां यङः" ॥ दंशेर्भाविना नलोपेन निर्द्देशः । 'यायजूक इति'। 'दीर्घोकित इत्यभ्यासस्य दीर्घत्वम् । 'जञ्जपूकः दन्दशूक इति'। जपजभदहदशेति नुक् ॥

"नमिकम्पिस्म्यजसकमहिंसदीपो रः" ॥ अजसेत्यकार आगन्तुकः । 'क्रियासातत्यइति'। क्रियाणामविच्छेदेन प्रवृत्तिः क्रियासा-

तत्यं, कथं तर्ह्यग्निषु प्रयोगः अजस्रानजुहूत इन्धीरन्निति आधानाद् द्वादशरात्रमजस्रा इति अत्राप्यजस्रजागरणादजस्राः ॥

"सनाशंसभिक्ष उः" ॥ 'न सनिर्धातुरिति'। षणु दाने वन षण संभक्ताविति च धातुर्न गृह्यते कुतः गर्गादिषु विजिगीषुशब्दस्य पाठात्। 'न शंसेः स्तुत्यर्थस्येति'। एतदाङा सह निर्देशाद्विज्ञायते इच्छार्थो हि स तेन सह पठ्यते न स्तुत्यर्थः ॥

"विन्दुरिच्छुः" ॥ 'विदेरिति'। ज्ञानार्थस्य ग्रहणं नेतरेषामनभिधानात् निपातनाद्वा बिन्दुशब्दस्तु पवर्गादिबिदि अवयवइत्यस्मादौणादिके मृगय्वादयश्चेत्युप्रत्यये भवति वकारस्यच्छन्दसि पक्षे भकार इष्यते वैश्वदेवा भिन्दव इति । 'इषेरिति'। इषु इच्छायामित्यस्य, इषु गतौ इष आभीक्ष्ण्ये इत्येतयोस्तु पूर्ववदग्रहणम् ॥

"क्याच्छन्दसि" ॥ 'क्य इति क्यच्क्यष्क्यङां सामान्येन निर्देश इति'। सूत्रे वृत्तौ च ककारानुबन्धवतो धातुसंज्ञानिमित्तस्य प्रत्ययस्योपलक्षणात् कण्ड्वादियकोऽपि ग्रहणं तेन भुरण्युः तुरण्यवोऽङ्गिरसो नक्षत्रसपर्येम सपर्यव इत्यादि भवति, भाषायां च सुयुशब्द उणादिषु मृगय्वादिषु पाठाद् द्रष्टव्यः 'मित्रयुरिति'। क्यचि चेतीत्वम् अकृत्सार्वधातुकयोरिति दीर्घत्वं च न भवति न छन्दस्यपुत्रस्येति निषेधात् ॥

"आदृगमहनजनः किकिनौ लिट् च" ॥ किकिनौ लिट् चापरार्थे प्रयुज्यमानाः शब्दा वतिमन्तरेणापि वत्यर्थं गमयन्ति गौर्वाहीक इतिवदित्याह । 'लिड्वच्च तौ भवत इति'। किकिनौ भवतो लिट् च प्रत्ययो भवतीत्ययं त्वर्थो न भवति तथा हि सति लिट् किकिन इत्येव ब्रूयात्, कार्यातिदेशश्चायं, यद्येवं लः परस्मैपदमिति परस्मैपदसंज्ञा किकिनोःस्यात् ततश्च देङ्दृङादिभ्य आत्मनेपदिभ्यो न स्यातां, न लकारस्य परस्मैपदसंज्ञा किं तर्हि तदादेशानां न चैतावादेशौ, एवमपि भावकर्मकर्तृषु त्रिष्वपि लिड्भावात्किकिनौ प्राप्नुतः, नैष दोषः, उत्पन्नयोर्लिट्कार्यमतिदेश्यम्। उत्पत्तिश्च तयोः कर्त्तर्येव भवति कर्त्तरि कृदित्यनेनास्यैकवाक्यत्वात् अनभिधानाद्वा भावकर्मणोर्न भविष्यतः, वर्त्तमानाधिकाराच्च वर्त्तमाने किकि

Digitized by Google

नोर्विधानमिति भूतकालतापि विरोधान्नातिदिश्यते, स्वरूपाबाधेन च कार्यातिदेशः प्रवर्त्तत इति तिबादीनां कानच्क्वस्वोश्चाभावः। 'आदिति दकारो मुखसुखार्थ इति'। आदित्ययं दकारः स च मुखसुखार्थ इत्यर्थः। 'नत्वयं तपर इति'। तश्चासौ परश्च तपरो नायमकारात्परस्तकारो जश्त्वेन निर्दिष्ट इत्यर्थः, किं कारणमित्याह। 'मा भूदिति'। तकारो मुखसुखार्थ इति पाठे तु आदित्ययं तकारः स मुखसुखार्थो न तु तपरकार्यसम्पादनार्थ इत्यर्थः। 'पपिः सोममिति'। न लोकाव्ययेति षष्ठीप्रतिषेधो लिटः कार्यमिति सोमशब्दाद् द्वितीया। 'ततुरिरिति'। वहुलं छन्दसीत्युत्वं द्विर्वचनेऽचीति स्थानिवद्भावात्तृइत्येतद् द्विरुच्यते। 'जग्निरिति'। गमहनेत्युपधालोपः, चुत्वम्। 'तद्बाधनार्थं कित्त्वमिति'। ऋत्तॄक्कारान्तानां च किकिनोर्गुणो माभूदित्येवमर्थमित्यर्थः। 'उत्सर्ग इति'। धातुमात्राद्विधानं कर्त्तव्यमित्यर्थः। कस्मादित्यत्राह। 'सदादिभ्यो दर्शनादिति'। 'सेदिर्नेमिरिति'। सदेर्नमेश्चैत्वाभ्यासलोपौ। 'सहिवहीत्यादि'। अत्र भाषायामित्यपेक्ष्यते। 'पापतिरिति'। 'नीग्वञ्चित्यादिना नीगागमः प्राप्तः सासहिवावहिचाचलिपापतीनां निपातनमिति वार्त्तिककारवचनाच भवति, इदं तु वृत्तौ पठितं वाक्यमपर आहेति भाष्ये पठितं तत्रापि भाष्यकारवचनान्नीगभावः, उक्तं हि तेन तान्येवोदाहरणानीति॥

"स्थेशभासपिसकसो वरच्"॥ 'ईश्वर इति'। नेड्वशि कृतीतीट्प्रतिषेधः, स्त्रियामीश्वरा, विन्यस्तमङ्गलमहौषधिमीश्वरायाः, ईश्वरीं सर्वभूतानामिति तु छान्दसः, औणादिको वरडित्यन्ये, पुंयोगादाख्यायामित्यन्ये, अन्येभ्योपि दृश्यन्त इति क्वनिपि वनो र चेति ङीब्रावित्यन्ये॥

"यश्च यङः"॥ 'यायावर इति'। पूर्ववदिटि प्रतिषिद्धेऽतो लोपः, लोपो व्योर्वलि, अल्लोपस्य स्थानिवत्त्वादाल्लोपः प्राप्तो वरे कृतस्य स्थानिवत्त्वनिषेधान्न भवति॥

"भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्"॥ भ्राज दीप्तौ, भासृ दीप्तौ, तुर्वी थुर्वी दुर्वी धुर्वी हिंसायां, द्युत दीप्तौ, ऊर्ज बलप्राण-

Digitized by Google

नयोः, पॄ पालनपूरणयोः, जु इति सौत्रो धातुः, ष्टुञ् स्तुतौ यावपूर्वः। 'जवतेर्दीर्घत्वं चेति'। केचिदाहुः सूत्रे जू इति दीर्घः पठितव्य इति, विद्यन्तरोपसंग्रहार्थं दृशिग्रहणमुत्तरसूत्रादपकृष्टव्यमित्यन्ये। 'यावस्तुदिति'। यावशब्दः सप्तमीनिर्द्देशाभावेप्युपपदसंज्ञ इष्यते, अन्ये तु सूत्रनिर्द्देशाद्धातुनैव समासे पश्चात्क्विपं कुर्वन्ति ॥

"अन्येभ्योपि दृश्यन्ते" ॥ 'विद्यन्तरोपसंग्रहार्थमिति'। दृशिग्रहणे सति यथा क्विबन्ता धातवो दृश्यन्ते तथैव तेऽनुगन्तव्या इत्यर्थो भवति, एवं च ते तथानुगता भवन्ति यदि यथायोगं द्विर्वचनादयो भवन्ति, विद्यन्तरमेव दर्शयति। 'क्वचिदिति'। 'तथा चाहेति'। वार्त्तिककारः, आयतं स्तौत्यायतस्तूः कटं प्रवते कटप्रूः। 'दिद्युदिति'। द्युतिस्वाप्योः सम्प्रसारणमित्यभ्यासस्य सम्प्रसारणम्, कथं पुनरभ्याससंज्ञा यावता प्रत्यासत्तेः षाष्ठिक एव द्विर्वचने सा विधीयते, अत एवाष्टमिके न भवति एवन्तर्हि दृशिग्रहणादेव सम्प्रसारणमभ्याससंज्ञा वा द्रष्टव्या। 'जगदिति'। गमः क्वाविति मलोपः, अत्रापि पूर्ववदेवाभ्यासकार्यं, द्वे चेति चकारेण दीर्घः समुच्चीयमानो दीर्घश्रुत्याऽचश्चेत्युपस्थानादचा च तदन्तविध्याश्रयणाज्जुहोतेरेवाजन्तस्य विज्ञायते न द्युतिगम्योरित्याह। 'जुहोतेर्दीर्घत्वं चेति'। 'जुहूरिति'। करणस्यात्र कर्तृत्वविवक्षा, धीरित्यत्रापि करणस्यैव कर्तृत्वविवक्षा, पुरुषो हि ध्यायति न धीः ॥

"भुवः संज्ञान्तरयोः" ॥ 'धनिकाधमर्णयोरिति'। यस्मै ऋणं धार्यते स धनिकः, यो धारयति सोऽधमर्णः, तयोरन्तरे मध्ये यस्तिष्ठति विश्वासार्थं स प्रतिभूरित्युच्यते ग्रामयोरन्तरे यस्तिष्ठति तत्र न भवति, एतच्च दृशिग्रहणानुवृत्तेर्लभ्यते, यद्येवं संज्ञेयं भवति तत्र संज्ञायामित्येव सिद्धम्, अत्राहुः। यावद्द्रव्यभाविन्यः संज्ञा भवन्ति प्रतिभूशब्दस्तु सत्येव तस्मिन्नृणप्रतिदाने निवर्त्तते ॥

"विप्रसंभ्यो ड्वसंज्ञायाम्" ॥ 'मितद्र्वादिभ्य इति'। मितादिपूर्वेभ्यो धातुभ्य इत्यर्थः। 'शम्भुरिति'। अन्तर्भावितण्यर्थोऽत्र भवतिः ॥

"धः कर्मणि ष्ट्रन्" ॥ 'कर्मणि कारकइति'। उपपदं तु कर्म न सम्भवति यदि स्यात्कर्मण्यणित्यस्मिन्नेव प्रकरणे ष्ट्रनं विदध्यात्। ननु चोत्तरसूत्रे पुनः ष्ट्रन्ग्रहणं कर्त्तव्यं स्यात् अस्तु लघीयो हि कर्मग्रहणात्ष्ट्रन्ग्रहणम्, न चेह वर्त्तमानकाले ष्ट्रन्प्रत्ययः धात्रीत्युक्ते क्रियाकारकसम्बन्धमात्रं गम्यते अतः कर्मणीति प्रत्ययार्थएव नोपपदम् ॥

"दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे" ॥ 'दाप् लवन इति'। दैप् शोधन इत्यस्य त्वग्रहणमनभिधानात्। 'युजिर् योगइति'। युज समाधावित्यस्य तु पूर्वत्रदेवाग्रहणम्। 'करणे कारकइति'। उपपदं तु करणं न भवति अजादिषु दंष्ट्राशब्दस्य पाठात्, अत एव च पाठात्सूत्रे ऽनुनासिकलोपेन निर्देशे ऽपि ष्ट्रनि न भवति ल्युट्येव तु भवति योत्र सेट् तत्रास्तितुत्रेत्यादिनेट्प्रतिषेधः ॥

"हलसूकरयोः पुवः" ॥ 'तच्चेत्करणं हलसूकरयोरवयवो भवतीति'। एतेन हलसूकरयोरभिधेयत्वमुपपदत्वं च निरस्यति। 'मुखमुच्यतइति'। नान्यः कर्णादिः, एतदपि स्वभावादेव लभ्यते ॥

"अर्त्तिलूधूसूखनसहचर इत्रः" ॥ इकारोपदेशस्तितुत्रेति एकाच इति च यथायोगमिट्प्रतिषेधो मा भूदिति स्वरार्थश्च, इटि हि सत्यागमानुदात्तत्वं स्यात् इका तु प्रत्ययाद्युदात्तत्वम् ॥

"पुवः संज्ञायाम्" ॥ 'बर्हिष्पवित्रमिति'। बर्हिषा कृतं बर्हिषः पवित्रं भवति तत्र षष्ठीसमासः नित्यं समासे ऽनुत्तरपदस्थस्येति षत्वं येनाज्यमुत्पूयते तत्पवित्रं अनामिकायाश्चाङ्गुलेर्वेष्टनं जपादिषु ॥

"कर्त्तरि चर्षिदेवतयोः" ॥ 'ऋषौ करणइति'। ऋषिर्वेदमन्त्रः तदुक्तमृषिणेतिदर्शनादित्याहुः ॥

"जीतः क्तः" ॥ 'भूते निष्ठाविहितेत्यादि'। तत्र येन नाप्राप्तिन्यायेन क्तस्यैव वर्त्तमानविषयतया भूतविषयता बाध्यते यथा वडवायां वृषे वाच्यइत्यत्र वक्ष्यते अपत्ये प्राप्तस्ततोपकृष्य वृषे विधीयतइति, एवमुत्तरसूत्रविहितस्यापि, ज्ञातमित्येतत्तु भूतेपि भवति तेनेत्यधिकारे उप-

Digitized by Google

ज्ञातइति तद्धितविधानात्, वर्त्तमाने हि क्तस्य च वर्त्तमानइति षष्ठ्या भाव्यम् एवं च पूजितो यः सुरैरपीत्यादीनां साधुत्वं चिन्त्यम् ॥

"मतिबुद्धिपूजार्थेभ्यश्च" ॥ 'मतिरिच्छेति'। बुद्धेः पृथगुपादानाद्बुद्धिर्न गृह्यते। 'मत इति'। अनुदात्तोपदेशेत्यनुनासिकलोपः। 'शीलित इत्यादि'। शील समाधौ रक्ष पालने क्षमूष् सहने क्रुश आह्वाने रोदने च जुषी प्रीतिसेवनयोः रुष रोषे हृञ् हरणे हृषु अलीके हृष् तुष्टाविति वा तुष तुष्टौ कमु कान्तौ यम उपरमे कष हिंसायां मृङ् प्राणत्यागे तत्राद्यौ सेटौ, ऊदितामुदितां च यस्य विभाषेतीट् प्रतिषेधः, ईदितः श्वीदितो निष्ठायामिति। 'हृष्ट इति'। हृषेर्लोमस्विति कषेः कृच्छ्रगहनयोः कष इति रुषेः रुष्यमत्वरसंघुषास्वनामिति विकल्पः। 'सुप्त इति'। सुपेर्ञीतः क्त इत्येव सिद्धे नञिङ्गा तच्छीलादिषु बाधा मा भूदिति समुच्चीयते क्वचित्तु सुप्त इति पठ्यते ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयस्याध्यायस्य द्वितीयः पादः ॥

"उणादयो बहुलम्" ॥ 'वर्त्तमाने इत्येवेति'। वर्त्तमाने लडित्यतो वर्त्तमानग्रहणानुवृत्तेरविच्छेदमेवकारेण दर्शयति। 'संज्ञायामिति चेति'। पुवः संज्ञायामित्यत उणादय इत्येव सूत्रमुणादीनां शास्त्रान्तरपरिपठितानां साधुत्वानुज्ञानार्थमस्तु किं बहुलग्रहणेन तत्राह। 'बाहुलकमिति'। ला आदाने बहूनर्थान् लाति बहुलं तस्य भावो बाहुलकं मनोज्ञादित्वाद्वुञ् तत्पुनर्बहूर्थादानं बहुलशब्दप्रवृत्तिनिमित्तं बहवः पुनरर्थाः क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिरिति वक्ष्यमाणलक्षणाः। 'प्रकृतेरिति'। ज्ञातात्रेऋवचनं तनुशब्दोत्र वृत्तिविषये गुणमात्रवचनः प्रकृतीनां तानवमल्पत्वं दृष्ट्वा तद्बाहुलकमुक्तं तेनापठिताभ्योपि प्रकृतिभ्य उणादयो भवन्ति यथा हृषेरुलजुक्तः शक्तेरपि भवति शङ्कुलेति तथा तेषामुणादीनां पञ्चपाद्यां प्रायेण समुच्चयनं कृतं न तु साकल्येन बहुलवचनात्त्वविहिता अपि भवन्ति यथार्त्तेः फिडफिड्डौ भवतः ऋफिडः ऋफिड्ड इति कार्यमशेषविधेश्च कार्याणि च सशेषाणि विहितानि न निःशेषाणि बहुलवचनात्त्वविहितान्यपि भवन्ति

षणु दाने अमन्ताड्डुः, धात्वादेः षः स इति सत्वं न भवति कृते वा सत्वे षत्वं भवति । स्यादेतत् यावत्यः प्रकृतयः पञ्चपाद्यामुपात्ता यावन्तश्च प्रत्यया यावन्ति च कार्याणि विहितानि तावन्त्येव भवन्तु मा भूदन्येषां बहुलग्रहणेन संग्रह इति तत्राह । 'नैगमरूढिभवं हि सुसाध्विति' । निगमश्छन्दस्तत्र भवा नैगमाः निगमशब्दस्याथादिस्वरेणान्तोदात्त इति बह्वचोन्तोदात्ताट्ठञिति ठञि प्राप्ते ऋगयनादिपाठादण् रूढिः प्रसिद्धिस्तत्र भवा रूढिभवाः संज्ञाशब्दाः तेषां साधुत्वमनुपात्तानां प्रकृत्यादीनां बहुलग्रहणेन संग्रहे सति भवति नान्यथा हिशब्दो हेतौ यस्मादेवं तस्माद्बाहुलकमुक्तमित्यर्थः, अन्यैरप्याचार्यैर्नैगमरूढिभवानां प्रकृत्यादिविभागेन व्युत्पादनं कृतमतोऽस्माभिरपि तत्कर्त्तव्यमेवेत्यभिप्रायेणाह । 'नाम चेति' । निरुक्तकारो हि यास्क आचार्यः स्वशास्त्रे निरुक्तैः सर्वमेव नामधातुजमाह तोकमित्यपत्यनाम शकटस्य तोकं शाकटायनः, यन्नेति पदमर्थः प्रयोजनमस्य व्युत्पाद्यत्वेनेति पदार्थः प्रकृत्यादिः पदार्थश्चासौ विशेषश्च पदार्थविशेषः तस्मात्समुत्थितं पदार्थविशेषसमुत्थं यदेवं विधं न भवति प्रकृत्यादिविशेषोपादानेनाव्युत्पादितमित्यर्थः, तद्धातुजत्वेनोह्यं, कथमूह्यं, 'प्रत्ययतः प्रकृतेश्च,' यत्र शब्दरूपे परभागः प्रत्ययत्वेन प्रसिद्धेन केन चित्सदृशः श्रुतः तत्र तं भागं प्रत्ययं कल्पयित्वा परिशिष्टो भागः प्रकृतित्वेनोह्यते हृषेरुलजिति प्रत्ययं दृष्ट्वा शङ्कुः प्रकृतिरूह्यते तेन सिद्धं शङ्कुलेत्यस्य धातुजत्वं यत्र तु पूर्वो भागो धातुत्वेन प्रसिद्धेन केन चित्सदृशस्तत्र तं भागं प्रकृतिं कल्पयित्वा परिशिष्टो भागः प्रत्ययत्वेनोह्यः यथा ऋफिडः ऋफिड्ड इति फिडफिड्डौ प्रत्ययौ स चायमूहोऽनादिप्रयुक्तास्वेव सञ्ज्ञासु न सर्वत्रेत्याह । 'संज्ञास्विति' । कार्याद्गुणप्रतिषेधादिकादनुबन्धं ककारादिकं विद्यात् तेन फिडफिड्डौ कितावूह्यौ एतदेवानन्तरोक्तमूहात्मकं शास्त्रमुणादिष्वनुक्तेषु ॥

"भूतेपि दृश्यन्ते" ॥ 'पूर्वत्र वर्तमानाधिकारादिति' । तत्रैव वर्त्तमानग्रहणं न निवर्त्तितं बाहुल्येन वर्त्तमाने भवन्ति क्व चिदेव भूते भवन्तीति किल विवेकप्रदर्शनायेति भावः, उदाहरणेषु ताभ्यामन्यत्रोणादय

इति संप्रदानापादानव्यतिरिक्ते कारके मनिन् प्रत्ययः नेड्वशि कृतीतीट्प्रतिषेधः ॥

"भविष्यति गम्यादयः" ॥ यथा स्यदो जव इत्युक्ते जवशब्दपर्यायः स्यदशब्दो भवति तथेहापि भविष्यच्छब्दपर्याया गम्यादयः प्राप्नुवन्तीत्याशङ्क्याह । 'प्रत्ययस्यैवेत्यादि'। प्रकृत्यर्थगता भविष्यत्कालता प्रत्ययस्यैव द्योत्यत्वेन विधीयते न पुनः प्रकृत्यर्थपरित्यागेन समुदायस्येत्यर्थः । 'न प्रकृतेरिति'। न प्रकृतेरपीत्यर्थः,गम्यादिषु केचिदुणादयः केचिदष्टाध्यायीगताः । 'गमी आगामीति'। गमेरिनिः आङि णिच्चेतीनिः । 'भावी प्रस्थायीति'। अस्मिन्नेवाधिकारे भुवश्च प्रात्स्थ इतीनिः णित्त्वाद्वृद्धिर्युक्च रुधियुधिबुधियातिभ्यः प्रतिपूर्वेभ्यो ग्रहादिनिः, अस्मादेव निपातनादित्यन्ये, सुप्यजातावित्यन्ये । 'प्रतियोगीति'। संपृचादिसूत्रेण घिनुणि चजोः कु घिण्यतोरिति कुत्वं णिनिप्रत्यय एव न्यङ्क्वादिपाठादस्मादेव निपातनाद्वा कुत्वमित्यन्ये । 'अनद्यतनउपसंख्यानमिति'। किं पुनः कारणं न सिद्ध्यति लटायं निर्देशः क्रियते लृट् चानद्यतने लुटा बाध्यते तेन लृट एव विषये एते स्युः, न वा वाक्यार्थत्वाद्गम्यादयः शब्दा विशेषे यत्सामान्यं तदाश्रयेण प्रवर्त्तन्ते अनद्यतनाख्यस्तु विशेषः श्वःशब्दमहिम्ना गम्यते विशेषविवक्षायां तु लुडेव भवति श्वो गन्ता ग्राममिति वासरूपविधिना च लृडपि भवति तेन भविष्यति गमिष्यतीत्यादयः प्रयोगा उपपद्यन्ते ॥

"यावत्पुरा निपातयोर्लट्" ॥ पुरेत्यविभक्तिको निर्देशः कर्मधारयो वा निपातनाद्विशेषणस्य परनिपातः निपातौ चैतौ निश्चयं द्योतयतः, एतयोश्च प्रयोगे वर्त्तमाने लगन भवति भविष्यत्कालतया वर्त्तमानकालताया बाधनात् । 'यावद्भास्यतीति'। यत्परिमाणमस्य यत्तदेतेभ्यः परिमाणे वतुप् आ सर्वनाम्न इत्यात्वम् । 'पुरा व्रजिष्यतीति'। पृ पालनपूरणयोः भ्राजभासेत्यादिना क्विप् उदोष्ठ्यपूर्वस्येत्युत्वमस्य, तृतीयान्तत्वं द्योतयितुं करणभूतयेत्युक्तं, प्रतिपदोक्तत्वादेव निपातयोर्ग्रहणे सिद्धे निपातग्रहणं लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थं तेनातां पुण्या-

Digitized by Google

वित्यत्रलाक्षणिकस्याप्याकारान्तस्य पुग्भवति क्रीङ्जीनां णौ क्रापयति ज्ञापयतीति॥

"विभाषा कदाकर्ह्योः"॥ अनद्यतने लुडित्यत्राप्ययं योगोनुवर्त्तनीयः तेन लुड्विषयेपि पक्षे लट् भवति, अत एव पक्षे लुडप्युदाहृतः एतच्च पूर्वयोगेपि द्रष्टव्यम्। 'कर्हि भोक्ष्यतइति'। ननु च कर्हिशब्दो ऽनद्यतनविषयः तत्प्रयोगे लुडेव भवितुमर्हति न लट् न वा वाक्यर्थत्वात्। भोक्ष्यतइति पदं भविष्यत्सामान्ये वर्त्तते अनद्यतनावगतिस्तु कर्हि शब्दाधीना न च वाक्यार्थः पदसंस्कारउपयुज्यते॥

"किंवृत्ते लिप्सायाम्"॥ 'किमो वृत्तं किंवृत्तमिति'। वर्त्ततेस्मिन्निति वृत्तं क्तोधिकरणे चेत्यधिकरणे क्तः अस्मादेव निपातनादधिकरणवाचिना चेति षष्ठीसमासप्रतिषेधाभावः शेषषष्ठ्या वा समासः यत्र किंशब्दोवयवत्वेन वर्त्तते तत्सर्वं किंवृत्तं ततश्च कीदृशः किमीयः किन्तरामित्यादावतिप्रसङ्गात्परिगणनम्। 'वृत्तग्रहणेनेति'। तदिति शब्दरूपापेक्षं नपुंसकत्वम्। 'डतरडतमौ चेति'। डतरडतमान्तं किंशब्दरूपमित्यर्थः। 'कं भवन्तो भोजयितार इति'। अस्याप्यनद्यतने लुडित्यत्रानुवृत्तिरिति भावः, एवमुत्तरेष्वपि योगेषु द्रष्टव्यम्॥

"लिप्स्यमानसिद्धौ च"॥ लिप्स्यमानसिद्धाविति षष्ठीसमासो वृत्तौ तु वस्तुमात्रमदर्शि। 'लिप्स्यमानात्सिद्धिरिति'। अस्मादेव निपातनाद्वा पञ्चमीसमासः लिप्स्यमानं भक्तादि तन्निमित्ता या स्वर्गादेः सिद्धिस्तस्यामित्यर्थः, ननु च यत्र लिप्स्यमानस्य सिद्धिर्गम्यते लिप्सापि तत्र भवति ततश्च पूर्वेणैव सिद्धं नार्थ एतेन तत्राह। 'अकिंवृत्तार्थोयमारम्भ इति'। पूर्वसूत्रे किंवृत्तग्रहणं लिप्स्यमानसिद्धिरहिते लिप्सामात्रे किंवृत्तएव यथा स्यादकिंवृत्ते मा भूदित्येवमर्थम्॥

"लोडर्थलक्षणे च"॥ 'अध्ययनप्रैषस्येति'। कर्तृकरणे कृता बहुलमित्यत्र साधनं कृतेति वा पादहारकाद्यर्थमितिवचनात्सप्तमीसमासः॥

"लिङ् चोर्ध्वमौहूर्त्तिके"॥ 'निपातनात्समास उत्तरपदवृद्धिश्चेति'। ठञ्प्रत्ययश्चाध्यात्मादित्वात् बह्वचोन्तोदात्तादित्यत्र तु व्याख्या-

तव्यनाम्न इति वर्त्तते। 'उपाध्यायश्चेदागन्तेति'। ऊर्ध्वमौहूर्त्तिकेनद्यतनत्वं सम्भवतीति चिन्त्यम् ॥

"तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"॥'भिक्षिष्य इत्यस्य जटा इति'। अत्र भिक्षार्थ क्रियार्थत्वं जटानां न तु क्रियात्वं द्रव्यत्वाज्जटानाम्। 'धावतस्ते पतिष्यति दण्ड इति'। अस्त्यत्र धावनक्रियोपपदं न त्वसौ दण्डपातनार्थं धावति किं तर्हि धावतोऽर्थात्पतिष्यति दण्डः उद्देशेन हि तादर्थ्यं विविच्यते न तु हेतुत्वमात्रेण तादर्थ्यम्। अथेत्यादिचोद्यं परिहरति। 'लृटा क्रियार्थोपपदेनेति'। तुमुना तु बाधो नाशङ्कनीयो भिन्नार्थत्वात् कर्त्तरि ण्वुल् तुमुन् पुनर्भावे, कथं तुमर्थे सेसेनित्यत्र तुमर्थग्रहणात् यदि हि कर्त्तरि कृदिति वचनात्कर्त्तरि तुमुन् स्यात्तद्वदेव सेसेन्प्रभृतयोऽपि कर्त्तरि भविष्यन्ति अतस्तुमर्थग्रहणात्कर्त्तृस्तावदयमपकृष्यते न चान्येऽर्थो निर्दिश्यते ऽनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति कश्च धातोः स्वार्थो भाव एव, लृट् तु यद्यपि भावकर्मणोश्चरितार्थस्तथापि क्रियायां क्रियार्थायामुपपदे भविष्यति काले च विधानाद्विशेषविहितः, ण्वुल् विधौ तु कर्त्तरीति न श्रूयते ऽतोसौ विशेषविहितेन लृटा बाध्यते अथ वा किं न एतेन विशेषविहित इति द्वयोः सावकाशत्वेऽपि परत्वाल्लृट् ण्वुलं बाधेत पुनश्चोदयति। 'वासरूपविधिनेति'। परिहरति। 'एवं तर्हीति'। नन्वसति प्रयोजने ज्ञापकं भवति अस्ति चात्र प्रयोजनं किमकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधो भविष्यदधिकारविहितस्याकस्य प्रयोगे यथा स्यात् वर्षशतस्य पूरकः पुत्रपौत्राणां दर्शक इत्यत्र मा भूदिति एवं मन्यते पदान्तरसन्निधानादत्र भविष्यत्कालत्वं गम्यते यदा हि बालविषयमेतत्प्रयुज्यते तदा तस्यामवस्थायां वर्षशतपूरणस्य पुत्रपौत्रदर्शनस्य चासम्भवात्तावन्तमसौ कालं जीविष्यतीत्यर्थाद्गम्यते न त्वत्र पदार्थो भविष्यत्कालत्वमिति स्थिते त्वस्मिन् ण्वुल्विधाने वर्षशतस्य पूरक इत्यादौ भविष्यत्कालस्य पदार्थत्वेऽपि न दोष इत्यभिप्रायेणाकेनोर्भविष्यदाधमर्ण्ययोरित्यत्रोक्तं भविष्यदधिकारविहितस्याकस्येदं ग्रहणं तेन वर्षशतस्य पूरकः पुत्रपौत्राणां दर्शक इत्यत्र न भवतीति ॥

उपसर्जनत्वेनान्वितानां स्वाहाकाराणां मुख्यविशेष्यत्वाभावाद्व्यस्तुतिद्वारैव वाक्यार्थसमवायाच्च प्रदानार्थता ॥

सू० वषट्[१] ॥ १९ ॥

वषट् ते विष्णवा स आकृणोमीत्यत्र पदान्तरैः स्वाहाकृतशब्दवत्समासाभावेन स्वतन्त्रतया प्रदानार्थत्वे प्राप्ते आकृणोमीत्यत्र तदन्वयेनास्वातन्त्र्याविशेषाच्च तथात्वम् ॥

सू० स्विष्टकृत् ॥ २० ॥

पशौ वनस्पतियागस्य स्विष्टकृद्विकारत्वाद्दार्शिकस्विष्टकृद्याज्यायामिष्टदेवतोपलक्षणनिगमानामुपलम्भाद्वानस्पत्ययाज्यायामपि ते स्युरिति प्राप्ते वानस्पत्यप्रैषनिगदे तासां सकृदुपलक्षितत्वेन पुनरुपलक्षणे मानाभावान्न स्युः । अत्रोपलक्षितत्वादेव च पाशुकस्विष्टकृद्याज्यायामपि नोपलक्षणीयाः । याजुषहौत्रकास्तु वनस्पतियाज्यायामपि पुनरुपलक्षणमभ्युपगच्छन्ति ॥

सू० स्वाहेत्या[२]लेखनम् ॥ २१ ॥

चित्तं च चित्तिश्चाकूतं चाकूतिश्चेत्यादयो जयाः । इह धृतिः स्वाहेह विधृतिः स्वाहेत्यादयो धृतिमन्त्राश्च । एषु प्रथमान्तशब्दा होमार्थं प्रयोगकाले चतुर्थ्यन्तत्वेन विपरिणमयितव्याः । स्वाहाकारेण वषट्कारेण वा देवेभ्योऽन्नं प्रदीयत इति श्रुत्या ऽनुपात्तस्वाहाकारेषु स्वाहाकारस्येव नमः स्वस्ति स्वाहेति स्मृत्या चतुर्थ्या अप्यध्याहरणीयत्वात् । अतएव चित्ताय स्वाहेत्यादिरेव शाखान्तरे पाठ इति प्राप्ते छिनद्मीत्यादेरिवाश्रुतपदस्य पल्लवत्वसम्भवेऽपि श्रुतविभक्त्याः परित्यागे आम्नायत्वस्यैव भङ्गापत्तेः छन्दसि बहुलस्मृतेश्च यथासमाम्नानमेव प्रयोगः । अतएव धृतिहोमेन प्रयुञ्ज्याद्गोनामसु तथाऽष्टसु चतुर्थीमिति सूत्रमेतदधिकरणन्यायसिद्धार्थनिबन्धनम् ॥

१ वषट्ते इति तु पुस्तकान्तरे सूत्रपाठः ।
२ स्वाहेत्यालेखनः इति तु पुस्तकान्तरे सौत्रपाठः ।

सू० चित्ताय ॥ २२ ॥

शाखान्तरीयमन्त्राणां विभक्तिभेदाच्चकाराभावाच्च भिन्नानुपूर्वीकतया मन्त्रभेदान्मन्त्रस्वरूपस्य यूपाहवनीयवदलौकिकत्वाददृष्टार्थानां समुच्चय इति प्राप्ते मन्त्राणामलौकिकशब्दत्वेऽपि जयात् जुहुयादित्यनेन होमकरणत्वेन विनियोगाद्दृष्टार्थतयैकार्थत्वाद्विकल्पः ॥

सू० भूतानाम् ॥ २३ ॥

राजसूये पृथिव्यै स्वाहेत्यादयो मन्त्राः पठिताः। अग्निप्रकरणे तु पृथिव्यसि जन्मना च साग्निना गर्भमाधत्तामित्यादयो मन्त्रा आम्नाताः। उभयेषामपि भूतेति समाख्या भूतानामेवेष्टय इत्याकारकस्तत एवैनमवयजतीत्यार्थवादिको व्यवहारश्च तुल्य एव। ततश्च भूतेष्टका उपदधातीत्यनारभ्य विधौ विनिगमनाविरहादुभयेऽपि समुच्चिता विकल्पेन वोपादेया इति प्राप्ते कौण्डपायिनामयनस्थे नैयमिके च कर्मण्यग्निहोत्रपदसाम्येऽप्युत्सन्नयज्ञो वा एष यदग्निरुत्सन्नयज्ञो वा एष यदग्निहोत्रमित्यर्थवादसाम्येऽपि परस्परवैजात्यदर्शनात्प्रकरणपठितानां चित्रिणीरुपदधातीत्यादिवद्विनियोगान्तरादर्शनेन साकाङ्क्षाणामेवोपधाने विनियोगः ॥

सू० मन्त्रागमे ॥ २४ ॥

यदि राजसूयस्थमन्त्राणामेव विनियोगः स्यात्तदा तत्रत्यस्वाहाकारानुन्मूल्यावशिष्टांशैरेवोपधानम्। तेषां प्रदाने सावकाशत्वात्। अश्रुतस्य स्वाहाकारस्य कार्यानुसारेण योजनवद्वियोजनस्यापि न्यायसिद्धत्वात्। लिङ्गेन पदैकवाक्यताया बाधादिति प्राप्ते मध्येचिन्ता ॥

सू० प्रैषेण ॥ २५ ॥

ऋतुग्रहे होता यक्षदिन्द्रं होत्रादित्यादीन् होतर्यजेत्यन्तान्प्रैषानाम्नाय प्रैषेण यजन्तीत्याम्नातम्। तत्रापि यथासमाम्नातस्यैव मन्त्रत्वेन प्रदानाङ्गयोर्यागयाज्ञामहेवषट्कारयोरङ्गाद्यन्तभागयोरिव योजनया प्रयोगे प्राप्ते होता यक्षद्धोतर्यजेत्यंशयोरनन्वितत्वेन तावुन्मूल्य तत्स्थाने तयोर्योगेन प्रयोगः ॥

Digitized by Google

सू० स्थितादुत्तरम् ॥ २६ ॥

स्वाहेरोरन्तरिक्षादित्यादि मन्त्रेष्विव स्वाहाकारस्य प्रदानार्थत्वाभावेन स्वानाजिहीत इत्याद्यर्थान्तरपरतया वा वाक्यार्थेऽन्वयसम्भवेन मन्त्रत्वरक्षणाय यथाम्नानमेवोपधानम् ॥

सू० ऋताषाट् ॥ २७ ॥

ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहेति मन्त्रे स्त्रीपुंसलिङ्गकपदानां व्यतिषक्तानां यथार्थं विनिष्कृष्य मन्त्रद्वयीकृत्य होमद्वये विनियोगः ॥ या ते अग्न इति मन्त्रत्रये तनूरित्याद्यंशस्य सकृदाम्नातस्याप्यावृत्त्या विनिष्कर्षदर्शनात् । नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवीति मन्त्रस्य होमे विनियोगे पृथिव्यन्तरिक्षद्युपदानामव्यवातवर्षपदैर्व्यतिषक्तानामपि विभजनदर्शनादिति प्राप्ते स्वाहापदस्य सकृदाम्नानानाम्नानाभ्यां मन्त्रान्तरयोराकाङ्क्षावशेन होमसंख्यावशेन च तत्र तत्र विनिष्कर्षेऽपि द्विराम्नातस्वाहाकृतया ताभ्यः स्वाहेति मन्त्रस्य निराकाङ्क्षतया च तावानेव भिन्नो मन्त्रः । तच्छब्दबलेन ता इदमित्यादेरपकर्षे तत्तच्छब्दवशेन सर्वांशस्यापकर्षापत्त्या तस्मै ताभ्यः स्वाहेति पाठेनैव तादृशमन्त्रद्वयसिद्धा स्वाहाकारान्तरवैयर्थ्यापत्त्यैव तावन्मात्रस्य भिन्नमन्त्रत्वानुमानात् ॥

सू० षड् जुहोति ॥ २८ ॥

आकूत्यै प्रयुजेऽग्नये स्वाहेत्यादय आकूतिमग्निं प्रयुजं स्वाहेत्यादयश्च होमलिङ्गाः षट् षण्मन्त्रा आम्नाताः । तत्र षड् जुहोतीति श्रूयमाणो विधिरन्यतरषट्कस्य होमेषु विनियोगार्थमाहुतिवाद एवेति प्राप्ते द्वयोर्द्वयोः सजातीययोरेकीकरणेन द्वादश जुहोतीति वचनान्तरविहितानामेव सावित्राणि जुहोतीतिवत्पर्यायवादः ।

सू० भुवनस्य ॥ २९ ॥

भुवनस्य पत इति रथमुखे दशाहुतीर्जुहोतीति विधावेव शाखान्तरे पञ्चाहुतीरिति पठ्यते, तत्र शाखाभेदाद्विकल्पे प्राप्ते भुवनस्य पते स नो भुवनस्य पत इत्यनयोर्द्वयोर्द्वयोरैकरूप्यादेकपर्यायीकृत्य पञ्चेति वादः । अथवा दशसु पञ्चानामवयुत्यवादो यदष्टाकपालो भवतीतिवत् । शाखान्तरीयस्याप्युपसंहारेणैकवाक्यतोपपत्तौ वाक्यभेदविकल्पयोरन्याय्यत्वात् ॥

सू० स्वाहाकारः ॥ ३० ॥

भूतं भव्यं भविष्यद्वषट् स्वाहा नम ऋग्य[1]जुःसामवषट् स्वाहा नम इत्यादौ वषट्कारस्वाहाकारनमस्काराः प्रदानार्थाः । भूतादित्रयेण यथाक्रममन्वयेन त्रिमन्त्रीत्वसम्भवादिति प्राप्ते सामान्यसंबन्धकारिप्रमाणाभावेन केवललिङ्गेन होमानां कल्पनायोगाद् भूताद्युद्देशेन वषडाद्यभेदकथनस्य स्तुत्यर्थत्वेनोपपत्तेश्च मुष्टिकरणमन्त्रस्थस्वाहाकारवदेतेऽपि न प्रदानार्थाः ॥

इति श्रीसंकर्षे भाट्टदीपिकायां चतुर्दशाध्यायस्य चतुर्थः पादः ॥ ४ ॥

चतुर्दशोऽध्यायश्च समाप्तः ॥

अयं च होमपाद इत्युच्यते ।

अथ पञ्चदशाध्याये प्रथमः पादः ॥

सू० विक्रमसन्निपातौ ॥ १ ॥

[2]यदा पौर्णमास्यमावास्या चाहन्येव खण्डा सती समाप्यते तदा तत्पूर्वेद्युरेव पर्वणोरहोरात्रव्याप्तिसत्त्वात्पौर्णमास्यमावास्याशब्दयोरहोरात्रव्याप्तकालवाचित्वात्पौर्णमास्यां पौर्णमास्या यजेतेत्यादिवचनेन तत्रैव दर्शपूर्णमासयोरनुष्ठानमिति प्राप्ते सूर्याचन्द्रमसोर्विप्रकर्षसन्निकर्षोभयस्यैव तत्तत्पदप्रवृत्तिनिमित्तत्वात्तस्य च परदिन एव लाभात्परेद्युरेवानुष्ठानम् । पूर्णो मासो यस्मिन्काले स पूर्णमासः; तत्पूर्तिश्च पौर्णमास्यन्त्यक्षणे। तदैव पुष्य-

---

१ नम ऋक्सामयजुर्वषट्स्वाहेति तु वैदिकपाठः ।
२ न पूर्वेद्युरिति पा० ।

Digitized by Google

वन्तयोरतीव विप्रकर्षः । अमा सह समीपे वा वसतस्तौ यस्मिन्काले सामावास्या । तत्सन्निकर्षोऽपि तदन्यतरा एवातिशयित इत्यसंकुचितवृत्तिकयोः पदयोस्तत्रैव प्रवृत्तिः । सोत्रं तत्संयोगादिति पदं यौगिकवृत्त्या तथैव प्रतीतेरित्येतत्परम् । संधौ यजेतेति श्रुत्यन्तरे तस्यैव कालस्य विनियोगेनोपसंहारादिति वार्थः । विक्रमः संनिपाततश्च यागकाल इति शिष्टाः स्मरन्तीति भाष्यं न शिष्टाचारस्मृत्यन्यतरपरम् । अपि त्वमावास्यादिपदनिर्वचनपरम् । तथैव निर्वचनस्य स्मृतिष्वप्युपलम्भादिति भावः ॥

सू० द्वाविज्या ॥ २ ॥

सन्धिकालस्याल्पत्वेन साङ्गप्रयोगभावनापर्याप्तत्वाभावेन तत्पर्याप्तये समं स्यादिति न्यायेन तत्पूर्वपरभागयोः समयोराक्षेपात्संधिमभितो यजेतेति श्रुतेश्च यदैव सन्धिरपराह्णे रात्रौ वा पतति ततःपूर्वं घटिकाद्वयमारभ्य तत्पश्चाद् घटिकाद्वय इष्टिं समापयेदिति प्राप्ते द्वाविज्याकालौ वचनाद्व्यवतिष्ठेते । पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्देवता यजत इति वचनेन प्रयोगस्य द्व्यहकालत्वावगमात् । पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यमुत्तरामुपवसेदिति कौषीतकं या पर्यस्तमयमुत्सर्पेदिति कौषीतकिब्राह्मणे सूर्यास्तमयं परित इत्यनेनावर्त्तनात्परतो रात्रौ वा यदि सन्धिः सोपवासार्होत्तरा पौर्णमासी तस्यामन्वाधानमित्युक्त्या ततः परेद्युर्याग इत्युक्तं भवति । आवर्त्तने ततः पूर्वं वा यदि सन्धिः सोत्तराऽपि नोपवासार्हा किंतु पूर्वैवेत्युक्त्या सन्धिदिन एव याग इत्यपि व्यवतिष्ठते । तेन संधिमभित इत्यस्य विप्रुड्वृष्टिमध्ये यथा सन्धिः पतति तथा तन्त्रं प्रक्रमेदित्यर्थः । आवर्त्तने यदा संधिः पर्वप्रतिपदोर्भवेदित्यादीनि प्रतिपत्प्रविष्टायां यदि चेष्टिः समाप्यत इत्यादीनि च गोभिलगार्ग्यादिवचनान्येतमेवार्थं विवृण्वन्ति ॥

सू० रात्रौ ॥ ३ ॥

परेद्युरपि रात्रावेव यागः कार्यः । तस्मात्सदृशीनां रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त इति श्रुतौ रात्रीणामिति निर्धा-

रणषष्ठ्या ब्राह्मणानां मध्ये यज्ञदत्तः सुरूप इति वाक्येन यज्ञदत्ते ब्राह्मणत्वस्येव पौर्णमास्यादे रात्रित्वस्यावगमात्। दर्शादृष्टेत्यनुवाके पौर्णमासीदर्शपदयो रात्रिनामत्वोक्तेश्चेति प्राप्ते दिवस एव यागः कर्त्तव्यः प्रातर्यजध्वमिति श्रुत्या पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः। यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति वृद्धशातातपविवृतया उत्तरमहरिति श्रुतेरुपसंहारात्। शुक्लप्रतिपद्रात्रिवाचिकस्य दर्शापदस्येहानुपयोगाच्च। तन्त्रप्रक्रमस्य रात्रावपि कदाचित्सम्भवाभिप्रायेण रात्रीणामिति श्रुतेरुपपत्तेः। रात्रिशब्दस्य द्वादशरात्रीर्दीक्षिता भृतिं वन्वीत दशरात्रमाशौचमित्यादावहोरात्रपरत्वदर्शनाच्च। यत्तु भाष्ये पुण्याहे दैवानि कर्माणि ते वा एते पूते मेध्ये अहनी यजनीये उत्तरमहर्देवता यजत इति श्रुतिष्वह्नामेव कीर्त्तनमिह हेतूकृतम्। तत्तन्त्रप्रक्रमाभिप्रायेणाहोरात्रपरत्वेन चान्यथासिद्धो रात्रिशब्द इति वदतः सूत्रकृतो विरुद्धम्। अहः-शब्देऽपि तदुभयसम्भवात्॥

सू० उदिते॥ ४॥

अन्वाधानमात्रस्य वचनादन्यकालत्वेऽपि तदितरतन्त्रप्रक्रमस्य कालभेदे मानाभावादङ्गानां प्रधानसमानदेशकालत्वनियमादहन्येव प्रक्रम इति प्राप्ते यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियादित्यभ्युदितेष्टेर्निमित्तत्वेन कीर्त्तनान्यथानुपपत्त्या दर्शेष्टेर्निश्यपि प्रक्रमस्य कल्पनावश्यम्भावात्पौर्णमास्यां च कल्पकाभावादुदित आदित्ये तन्त्रप्रक्रमः प्रागुदयादमावास्यायाः॥

सू० यजनीये वा॥ ५॥

उक्तरीत्यैवान्वाधानस्य तदितरतन्त्रप्रक्रमस्य च कालभेदे नित्यं प्राप्ते यजनीयेऽप्यहनि वैकल्पिकस्तत्प्रक्रमो भवेत्। तदेतत्स्मृतिष्वेव व्याख्यातम्। सन्धिश्चेत्सङ्गवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः। सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिरिति कातीयवचनात्। आवर्त्तनात्प्राग्यदि पर्वसन्धिः सत्र[१]स्तदा वा क्रियते समस्तमिति संग्रहादिषु द्रष्टव्यम्। भाष्ये त्वेतत्सूत्रं रात्रीज्याधिकरणगुणसूत्रत्वेन व्याख्यातम्। अहर्यजनीयः कालो न रात्रिरित्युक्तम्। तदहन्येव यजेतेति तच्चिन्त्यम्॥

१ सद्यस्तदा वेति पा०।

सू० एतेन सोमकालः ॥ ६ ॥

सोमयागे दीक्षादिदक्षिणान्ताङ्गानां कालभेदस्य वाचनिकत्वेऽपि सौत्याहतन्त्रस्य पर्वसन्धिदिवस एव वा दिनान्तरे वा करणमिति विकल्पे प्राप्ते सन्धिदिन एव सुत्या सर्वा स्यात् । सन्धिकालस्याल्पत्वेऽपि तदाक्षिप्तपूर्वापरकालयोः कर्मसंबन्धस्यावर्जनीयत्वात् । तद्बाधकवचनस्याप्यप्रत्यक्षत्वात् तदेतदाह विक्रमसन्निपातयोर्व्याप्त्या तत्संयोगाच्च ह्यन्यत्प्रत्यक्षं विद्यत इति । प्रत्युत कौषीतकीवचनं प्रत्यक्षमेवेत्युक्तं त्रिकाण्डमण्डने । खण्डपर्वणि सोमश्चेत्प्रतिपन्मिश्रपर्वणि । सोमसुत्या प्रयोप्रयोक्तव्येत्याह कौषीतकिश्रुतिरिति । भाष्यकृता तु द्वाविज्याकालाविति सूत्रेण यदहरेष पुरस्ताच्च पश्चाच्च दृश्यते तदहरुपवसेच्छ्वोभूते यजेत या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेत्यादि वचनैर्द्वावपि यागकालावेवेति पूर्वपक्षं प्रापय्यानेन सूत्रेण तेषां प्रत्यक्षतः कालद्वित्वबोधकताभावाद् द्वादश वै संवत्सरस्य पौर्णमास्य इत्यादिलिङ्गाच्चैकैक एव काल इति सिद्धान्तितम् ॥

सू० यदि मन्येत ॥ ७ ॥

नान्यद्धविरन्तरं निर्वपेत्पौर्णमासीमेव श्वोभूते यजेतेत्यनेनान्वाधानप्रधानयोर्मध्ये इष्ट्यन्तरनिषेधस्त्वविशेषात्सर्वेष्टीनामिति प्राप्ते न हि कर्मण्युपक्रान्ते तदसमाप्य कर्मान्तरमारब्धुं युक्तम् । अतो न प्राप्तमेव नित्यं काम्यं वा कर्म नैमित्तिक्य एव त्विष्टयो निमित्तानन्तरभावित्वात्प्रसक्तास्तास्वयं निषेधः, तास्वपि याः क्रत्वङ्गभूतास्ता भवेयुरेव पुरुषार्थभूतानां तु ह्यामेष्ट्यादीनां पर्वान्तरे करणमिति ॥

सू० न यवानाम् ॥ ८ ॥

तासामितरेणेति श्रुतौ ग्राम्यौषधीनां मध्ये व्रीहिधान्येनाग्रयणं विधाय संवत्सराद्यत्तदधिभवतीति श्रुतम् । तत्रेतरेणेत्येकवचनाद्व्रीहिधान्यकमेवाग्रयणमत एव संवत्सरोत्तरमेव पुनः करणश्रुतिरुपपद्यते वसन्ते यवैराग्रयणकरणे तु वत्सरमध्य एव तदावृत्तेस्तद्विरोधः । अतो नास्त्येव

Digitized by Google

यवाग्रयणमित्यौडुलोमिराचार्यो मन्यत इति प्राप्ते स्यादेव यवाग्रयणम् । उभाभ्यामाग्रयणेन यजेतेति श्रुतेः । न चेयं फालकृष्टाफालकृष्टविषया तस्मात्तासामुभाभ्यामग्निहोत्रं जुहोत्युभाभ्यां दर्शपूर्णमासाभ्यां यजत इत्यत्र व्रीहियवयोरेव प्रकृतत्वात् । अस्याश्च तत्प्राये पाठात् । व्रीहिसस्ये वा यवसस्ये वा गत इति स्पष्टं कौषीतकिश्रुतेश्च । संवत्सराद्धि तदिति तु व्रीह्याग्रयणपरत्वेनाप्युपपन्नम् । अत एव द्विर्वा एष आदित्यः संवत्सरादावर्त्तते तमेताभ्यामाग्रयणाभ्यामर्वाञ्चञ्च पराञ्चञ्चाभियजत इति श्रुतौ प्रत्ययनमाग्रयणोक्तिः । व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेत व्रीहिभ्य इत्यनेन तत्तदाग्रयणोत्तरभाविदर्शपूर्णमासयोर्द्रव्यनियमश्च । श्यामाकव्रीहियवानां प्राशने मन्त्रत्रयविधानं चेति संगच्छते ॥

सू० सर्वेषां प्राशन्यः ॥ ९ ॥

अग्निः प्रथमो भद्राव्रः श्रेय एतमुत्यमिति विहिता भक्षकरणत्वेन मन्त्राः सौमिकेषु भक्षेषु भक्ष हीति मन्त्रवत्प्राकृतेषु सर्वेषु भक्षेषु भवेयुरिति प्राप्ते सोमस्यापूर्वत्वेन मन्त्रविधेस्तदीयसर्वभक्षेष्वन्वयेऽपि प्रकृते चोदकतः समन्त्रकभक्षा ये प्राप्तस्तेषामेव मन्त्रशेषित्वेन हिरण्यगर्भमन्त्रस्यैन्द्राग्नार इव तेष्वेव मन्त्राणां प्राप्तिः ॥

सू० अनिष्टाग्रयणस्य ॥ १० ॥

तस्मान्नानिष्ट्वाऽग्रयणेन नवस्याशितव्यमिति निषेधः फालकृष्टारण्याशनस्यैव न व्रीहियवाशनस्य याः फालकृष्टास्तासामितरेणेति वाक्यशेषे फालकृष्टकीर्त्तनेन विशेषे व्यवस्थापनात् । तस्मात्फालकृष्टातिरिक्तानां ग्राम्याणां भक्षणं नि[1]यतमिति प्राप्ते ऽञ्जनस्य द्रव्यसामान्येन करणासंभवेन प्रवृत्तेर्विशेषैकविषयकत्वेन सामान्यस्य विशेषे पर्यवसानाय वाक्यशेषावश्यकत्वेऽपि निवृत्तेर्नवधान्यसामान्याशनविषयकत्वानुपपत्तेरभावे न

१ भक्षणमनियतमिति प्राप्ते इति पा० ।

Digitized by Google

विध्यायवानाकाङ्क्षितस्य वाक्यशेषेणासमर्पणात् फालकृष्टार्थवादः क्वचिव-ल्लक्षणया स्तावकमात्रमिति सर्वग्राम्याणामेव भक्षणप्रतिषेधः ॥

सू० शाकापक्वौषधीनाम् ॥ ११ ॥

सस्यं नाश्नीयादिति वचनान्तरेण शाकादीनामपि भक्षणनिषेधे प्राप्ते तेषां यागयोग्यत्वाभावेन देवा ओषधीषु पक्वास्वाजिमीयुस्तानीं-द्राग्नीप्रथममुदजयतामित्युपक्रम्य नवाशननिषेधेन देवेभ्यो दातुं योग्यानां धान्यानां पक्वानामेव तैस्तेभ्योऽनिष्ट्वा भक्षणस्य निन्दया पक्वशाकानां हरि-तयवादीनां भक्षणे याथाकाम्यम् ॥

सू० तेन शमी ॥ १२ ॥

मुद्गादिशमीधान्यानामपि पक्वौषधित्वाविशेषेण निषेधे प्राप्ते तेषा-मयागयोग्यत्वादेव न निषेधः ॥

सू० प्राशितयवः ॥ १३ ॥

वसन्ते नवान् पक्वयवान्प्राशितवता पश्चादग्न्याधाने कृतेऽपि यवाग्रयणं कर्त्तव्यम् । पूर्वमधिकाराभावेऽपि सम्प्रत्यधिकारसम्पत्त्या तत्प्रा-प्तेरिति प्राप्ते नवान्नप्रथमप्राशनस्यैवानिष्टाग्रयणं प्रति प्रतिषिद्धत्वात्तस्य च वृत्तत्वेन द्वितीयादिप्राशने निन्दाभावेन तादृशस्य न तत्राधिकारः ॥

अविद्यमानबुभुक्षः ॥ १४ ॥

नवान्नाशनस्य बुभुक्षातल्लाभोभयपूर्वकत्वेनान्यतराभावे दृष्टिपरि-मितनवान्नलाभेऽपि नैवाग्रयणेऽधिकारः । तस्यानिष्टाग्रयणत्वेऽपि प्रति-षेधातिक्रमाभावेन प्रत्यवायाभावादिति प्राप्ते नवान्नप्रथमाशनप्रागभाव-विशिष्टवसन्तादिकालजीवित्वस्यैवाधिकारितावच्छेदकत्वेन बुभुक्षादेस्त-द्घटकत्वेन मानाभावादप्रतिहतोऽधिकारः ।

सू० अत्राग्रयणाभ्यासः ॥ १५ ॥

व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्य इत्यनेन व्रीहिकालयव-कालान्तराले व्रीह्याग्रयणाभ्यासो विधीयते । यजि-शब्देन प्रकरणिन

Digitized by Google

एवोपस्थितेरिति प्राप्तेऽन्तरालकाले नित्यप्राप्तयोर्दर्शपूर्णमासयोर्द्रव्यनियमविधिपरत्वे सम्भवत्यत्यन्ताप्राप्ताभ्यासपरत्वमयुक्तं । व्रीहिभिरेवेत्येवकारेण यवनिरासप्रतीतेः ॥

सू० सविकल्पः स्यात् ॥ १६ ॥

आग्रयणेनान्नाद्यकामो यजेतेति विधाय वाक्यान्तरेण कालानां द्रव्याणां च विधानादग्निहोत्रद्रव्याणामिव विकल्पः स्यादिति प्राप्ते प्राप्तोद्देशेन कालद्रव्याद्यनेकगुणविधाने वाक्यभेदाद्विशिष्टविधित्वावश्यम्भावेन त्रयाणामप्याग्रयणानामभ्यासाद्भेदः । नैमित्तिकानामप्यन्नाद्यकामवाक्येन काम्यतापि । कौषीतकिब्राह्मणे तु श्यामाकाग्रयणं विधाय सप्तदशसामिधेन्यः सद्वन्तावाज्यभागावित्यादिना प्राकृताङ्गान्युद्दिश्य गुणविशेषान्विधाय यवाग्रयणादींस्ततो विधायैतत्तन्त्रमेवैतद्ब्राह्मणमिति वाचनिकातिदेशकथनात्स्पष्टः कर्मभेदः, अतो न द्रव्यविकल्पः । नापि कर्मविकल्पः, निमित्तभेदात् । द्विर्वा एष आदित्य इत्यादिनाऽयनभेदेनावृत्तिश्रुतेश्च ॥

सू० सस्यपक्तेर्वा ॥ १७ ॥

संवत्सराद्वै तदधिभवतीति श्रुतौ द्वादशमासाः संवत्सर इत्यादिश्रुत्यन्तरसिद्धत् चान्द्रादिसंवत्सरान्यतम एव विकल्पेन ग्राह्य इति प्राप्ते संवत्सरे सस्यानि पच्यन्त इत्यादिषु लोके परुत्सस्यपाकाद्यैषमः सस्यपाकावधिकालस्यापि संवत्सरत्वेन व्यवहारात्सस्यपाकनिमित्तकर्मसु तस्यैवोपस्थित्या नियमनसम्भवे विकल्पायोगाद् द्वादशमासन्यूनातिरेकयोरपि संवत्सरा दधीति वादः ॥

सू० पार्वणमासानि ॥ १८ ॥

फाल्गुन्यां पौर्णमास्यां प्रयुङ्क्त इत्यनेन चातुर्मास्यारम्भं विधाय चतुर्षु चतुर्षु मासेष्वन्यानि पर्वाणि विहितानि । तेषु मासानामपि चान्द्रादिभेदेनानेकविधत्वादन्यतमोपादाने यज्ञादौ सावनः स्मृत इति स्मृत्या त्रिंशद्वै रात्रयो मासा इति प्राकरणिकश्रुत्या च गवामयनादाविव

Digitized by Google

सावनमास एव वा प्राप्ते चान्द्र एव मासो ग्राह्यः । पञ्च सांवत्सरिकप्रयोगे त्रीनिष्ट्वा चतुर्थमुत्सृजेद् द्वौपराविष्ट्वा तृतीयमुत्सृजेदेष वै त्रयोदशो मासस्तमतियजत इत्येकमासत्यागस्योत्सृज्योभौ मासावित्यनेन मासद्वयत्यागस्य च विधानात् । मातुलातुलविमलसंख्याका हि सौरसावनपार्वणवत्सराणां दिवसाः । तेन षष्ट्या सौरैर्मासैरेकषष्टिः सावना द्विषष्टिः पार्वणमासा भवन्ति । सौराभिप्रायेण मासद्वयोत्सर्गस्य सावनाभिप्रायेणैकमासोत्सर्गस्य च कथनेन चान्द्रमासस्यैवोपादेयत्वमवसीयते अन्यथा विकल्पाद्यापत्तेः ॥

सू० मासो वा ॥ १९ ॥

त्रीनिष्ट्वेति वाक्ये संवत्सरत्रयं चातुर्मास्यैरिष्ट्वा चतुर्थत्यागविधानाच्चतुर्थपदेनैकः संवत्सर एवोपरमणीयत्वेन प्रतीयत इति प्राप्ते चतुर्थशब्दोऽत्र मासपर एव । एष वै त्रयोदशो मास इति श्रुत्यन्तरात् । चतुर्थमिति सप्तम्यर्थे द्वितीया । एवमेव द्वौ पराविष्ट्वेत्यत्रापि ज्ञेयम् ॥

सू० आदेर्वा ॥ २० ॥

षष्ठस्य कर्मण आरम्भप्रतिषेधोऽयं पञ्चभिर्वर्षैः कर्मापवर्गादिति प्राप्ते पञ्चसांवत्सरिकपक्षवद्यावज्जीवाभ्यासपक्षोऽपि विज्ञायते । स त्रिषु त्रिषु संवत्सरेषु मासं मासमुत्सृजेदिति वचनात् । पञ्चसांवत्सरिकातिरिक्तपक्षाभावे त्रिषु त्रिष्वित्याद्यभ्यासानुपपत्तेः ॥

सू० पञ्चवत्सरेषु ॥ २१ ॥

पञ्चसांवत्सरिकात्तिकप्रयोगारम्भे विहितानां वैश्वानरपार्जन्यपञ्चहोतृहोमानां षष्ठे संवत्सरे प्रयोगान्तरारम्भात्पुनः करणमिति प्राप्ते चातुर्मास्यान्यारभमाण इति श्रुत्या चातुर्मास्यविषयकप्रथमप्रवृत्तेरेव कर्तृविशेषणत्वेन कीर्त्तनात्प्रयोगान्तरारम्भस्य चातथात्वादारम्भणीयावत्सकृदेव ॥

सू० यदि वसन्ता ॥ २२ ॥

चातुर्मास्येष्वेव यदि वसन्ता यजेत द्विरुपस्तीर्य द्विरभिघारयेदित्याद्युपक्रम्य यदि प्रावृषि यजेत सकृदुपस्तीर्य द्विरभिघारयेदिति श्रुतं। तत्र वसन्तकाले क्रियमाणस्य वैश्वदेवपर्वण उपस्थितत्वाद्यदि प्रावृषीति वाक्येऽपि यजिना तदेवोच्यते। तस्यैव पशुकामप्रयोगे आपशुप्राप्तेरभ्यसनीयत्वेन वर्षास्वपि तत्प्रसक्तेरिति प्राप्ते प्रावृषि वरुणप्रघासैरिति विधिप्रतीतासाधारणलिङ्गेन वरुणप्रघासानामेवोपस्थितत्वादेष वादः। चातुर्मास्यत्वेन तेषामपि प्रकृतत्वात्। अप्रकृतत्वेऽपि वा जटिलम्भोजयेदित्यादौ जटाविशिष्टस्येव प्रतीतिसम्भवाच्च॥

सू० वैश्वदेवेन॥ २३॥

वैश्वदेवेन पशुकामो यजेत यस्मिन्नृतौ प्रभूतं गोषु पयः स्यादितिश्रुत्या वसन्तानादरप्रतीतेर्ऋत्वन्तरेऽपि स्वायां गवि पयोवृद्धौ सत्यां काम्यप्रयोगारम्भः स्यादिति प्राप्ते यस्मिन् काले बहुव्रीहिः स्यात्तदा यष्टव्यमित्युक्ते विहितकालत्यागस्याप्रतीतेर्यस्मिन्वर्षे वसन्ते प्रभूतं पयः स्यात्तस्मिन्नेव वसन्त इज्येत॥

सू० वैश्वदेवस्य॥ २४॥

तत्रैव पशुकामप्रयोगेन वरुणप्रघासैरित्यादिना पर्वत्रयनिषेधाः श्रूयन्ते। न स्वातन्त्र्येण फलार्थतया तैर्यजेत किं त्वङ्गत्वेनेति तदर्थः। अन्यथा प्रतिषेधे विकल्पस्य पर्युदासे वाक्यवैयर्थ्यस्यापातात्। तेनाङ्गानां प्रधानसमकालत्वाद्वसन्त एवेतराणि पर्वाणि कुर्यादिति प्राप्ते तत्तत्कालेष्वपि वैश्वदेवस्याभ्यासविधानार्थाः प्रतिषेधवादाः। आपशुलाभादभ्यस्य पश्चाद्यथाकालं तैरपि यजेत। यदा सहस्रं पशूनाप्नुयादथ वरुणप्रघासैर्यजेतेत्यादि श्रुतेः॥

सू० मासमग्निहोत्रम्॥ २५॥

मासं दर्शपूर्णमासाभ्यामित्यादिवाक्यविहितदर्शादेः प्रकृतिप्राप्तकालानुग्रहाय त्रिंशत्पर्वस्वनुष्ठानं चत्वारोऽभिप्लवा एकः पृष्ठ्यः समास

Digitized by Google

इत्यादौ त्रिंशत्कर्मस्वपि मासपदप्रयोगादिति प्राप्ते सासं त्रिवृतेत्यादि प्राये पाठादत्यन्तसंयोगद्वितीयया च सन्ततमेव याग इति ॥

इति संकर्षे भाट्टदीपिकायां पञ्चदशाध्यायस्य प्रथमः पादः ॥ १ ॥

अयं च कालपाद इत्युच्यते ॥

अथ पञ्चदशाध्याये द्वितीयः पादः ।

सू० तत्सर्वार्थम् ॥ १ ॥

आधाने ब्रह्मौदनिकेऽग्रावरणी सन्ताप्य तदुपोह्य भस्माग्निं मन्थति सैव साग्नेः सन्ततिरिति मथनमाम्नातम् । तच्च सर्वाग्न्य अविशेषात् ॥

तेन मथित्वा विभज्य सर्वेऽग्नय आधीयेरन्निति प्राप्ते ब्राह्मौदनिकाग्नौ गार्हपत्यत्वश्रवणात्तेन सम्वत्सरमासीतेति सम्वत्सरपर्यन्तमेकस्यैवाग्नेर्धारणश्रवणाच्च कृत्स्नेन निर्मन्थितेन गार्हपत्य एवाधेयः ॥

सू० लोकतः ॥ २ ॥

अन्येऽग्नयो व्रीह्यादिद्रव्यवल्लोकत एवाधीयेरन्निति प्राप्तेऽयं चापरो भूरसौ पूर्वो भुवस्तमपरमधात्त एष ह्येतस्य योनिरेतस्माद्धेषोऽधिप्रणीयत इति श्रवणाद्गार्हपत्यादेवाहवनीयाधानम् ॥

सू० आहवनीयात् ॥ ३ ॥

सभ्यावसथ्ययोराहवनीयादाधानं स्यात् ॥ भूर्भुवः सुवरित्युभावेतौ सहाधत्ते स हि तस्य योनिरिति श्रुतावुभाविति पदेन गार्हपत्याहवनीययोरुपादानोपादेययोः सहाधानाभावेन परामर्शायोगात्सभ्यावसथ्यपरत्वस्य वक्तव्यतया सहितस्येत्यस्य साहित्यवदुभयपरत्वेनाहवनीययोनिकत्वश्रवणात् । यदेव तृतीयं ज्योतिस्तदेव तेनाप्यत इत्याहवनीयं प्रकृत्य श्रुत्यन्तराच्चेति प्राप्ते तृतीयज्योतिःपदस्योत्तरवेदिकाग्निपरत्वात्सहितस्येत्येकवचनेन सहिताग्निद्वयपरत्वाल्लोकयोगेन सगार्हपत्यस्त-

स्याहवनीयस्य योनिरित्येव तदर्थकतया ऋत्विजामिव तयोर्लौकत एव प्रक्लृप्तिः ॥

सू० आम्नातत्वात् ॥ ४ ॥

दक्षिणाग्निशब्दस्यापि दिक्पदघटिततया दक्षिणदिशः सकाशा-दाहृतलौकिकाग्निपरत्वाल्लौकत एव क्लृप्तिरिति प्राप्ते निर्मन्थ्याद्दक्षि-णाग्निमादधीतेति शाखान्तरे श्रवणाद्गार्हपत्यस्यसर्वयोनित्वात्तत एवा-धानम् ॥

सू० व्याख्यातम् ॥ ५ ॥

सर्व एवाग्नयो निरन्तरं जागरणीयाः प्रतिदिवसं तेषां कर्मोपयो-गात् ॥ द्रव्यस्याकर्मकालनिष्पत्तेरिति न्यायात् । आहिताग्निमग्निभिर्द-हन्ति यज्ञपात्रैश्चेति प्रतिपत्तिविधानाद्यज्ञपात्रवदेवाग्नीनामपि प्राक्प्रति-पत्तेर्धारणमिति प्राप्ते कर्मापवर्गे दक्षिणाग्न्याहवनीयावनुगच्छेताम् । नान्तराग्नी वीयादिति निषिध्य कामंहुते सञ्चरेत्पश्चाद्धि स तर्हि गत इत्यनेन होमोत्तरमाहवनीयस्य दक्षिणाग्नेश्च गमनादग्निद्वयाभावेन मध्ये सञ्चाराभ्यनुज्ञानेन प्रातरुद्धरेदिति प्रतिकर्मोद्धरणविधानाच्च धार्यागत-श्रिय आहवनीय इत्यनेन गतश्रीकत्रितयस्यैवाजस्रमाहवनीयधारणविधा-नात्तदितरस्य नाहवनीयधारणम् ॥

सू० प्रत्यर्थम् ॥ ६ ॥

संस्कारस्यापि कर्मापवर्गेऽपवर्गादर्थप्रयुक्तत्वाच्च संमार्जनवत्प्रतिक-र्मकर्तव्यमाधानमिति प्राप्ते सकृदाहितस्य गार्हपत्यस्य जागरणमरणिर्वा यथा धारणोपायस्तथाऽजस्रपक्षे आहवनीयस्यापि । तेन न पुनः पुनरा-धानं । दक्षिणाग्नेस्तु पूर्वं गार्हपत्यादेवोद्धृतत्वात्ततः प्रतिकर्म प्रत्युद्धार-णमेव तदाधानम् । अगतश्रियां तु कर्मप्रादुष्करणमेवाहवनीयाधानम् ॥

सू० पूर्वं गार्हपत्यात् ॥ ७ ॥

प्रतिकर्मप्रादुष्करणमप्यग्न्योररणित एव न गार्हपत्यात् । कर्माप-वर्गे तयोः स्वोपादानकारणमरणिमप्रत्येवागतत्वात् । एकोपादानकार्याणां

घटशरावादीनामिव परस्परं विलयाधारत्वायोगात् । तस्मादरणित एव प्रतिकर्ममन्यनमिति प्राप्ते काष्ठस्याग्न्युपादानत्वायोगेन तत्र गमनासम्भवाच्छास्त्रैकसमधिगम्ये तु गमने गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरतीत्यग्निहोत्रप्रकरणस्थवचनेन गार्हपत्यएवेतराग्निलयध्वननात्तत एव प्रतिकर्मोद्धरणम् ॥

सू० अहोमार्थेषु ॥ ८ ॥

आहवनीये जुहोतीत्यादिविधिषु गार्हपत्याग्नावप्रक्षेपसिध्यर्थं तत आहवनीयस्यायतनभेदेन पृथक्करणस्यावश्यकत्वेप्याहवनीयमुपतिष्ठत इत्यादि विहितोपस्थापनादिकार्याणां गार्हपत्यान्तर्निलीनाहवनीयस्यापि तत्वानपायादनुद्धृतेऽपि सम्भव इति प्राप्ते आहवनीयादिशब्दानां तत्तदायतनस्थितसंस्कृताग्निवाचित्वेन होम इव तदितरकार्येष्वपि तादृशस्यैवावश्यकत्वात्तत उद्धृत्यैवोपस्थानम् ॥

सू० अपवृक्ते ॥ ९ ॥

कर्मापवर्गोत्तरमप्यग्नेदर्शनात्तस्य च गार्हपत्यादुद्धृतत्वेन सैव साग्नेः सन्ततिरिति न्यायेन वैदिकत्वानपायात्संस्कारलक्षणानां गुणानाम् गुणिनाशमन्तरेणानपायात्तज्जागरणस्याभावे कतिपयघटिकोत्तरं तन्नाशे सति स तर्हि गत इति श्रुतेरुद्धरणश्रुतेश्चोपपत्तेर्यावन्नाशमपवृक्तेऽपि कर्मणि दीक्षणीयापवर्ग इव विद्यमानं ज्योतिर्वैदिकमेवेति प्राप्तेऽरणिसमारोपणोत्तरं परिदृश्यमानस्यापि ज्वलनस्येव कर्मापवर्गेपि तथात्वोपपत्तेः संस्काराणां कार्यार्थत्वेन यावत्कार्यमेव तदवस्थानस्य शास्त्रादवगमात्स तर्हि गत इत्यनेन होमाव्यवहितोत्तरमेव गमनश्रुतेः, परिदृश्यमानोप्यायतनस्थोपि ज्वलनः । संस्कारापायादपवृक्ते कर्मणि लौकिकः सम्पद्यते । अत एव यस्योद्धृतोऽग्निरहुतेऽग्निहोत्र उद्वायेदित्यादिना तान्येवावक्षाणानि सन्निधाय मन्थेदित्यन्तेनाग्निहोत्रहोमापवर्गात्प्रागग्न्युद्वान एव पुनर्मथनमुक्तं तेन तदपवर्गे तदभावाल्लौकिकत्वं ध्वनितम् ॥

सू० एतेन सोमे ॥ १० ॥

सोमे दीक्षणीयापवर्गोत्तरं विद्यमानोप्याहवनीयादिरुक्तन्यायेन लौकिक एवेति प्राप्ते देवता एवोभयतः परिगृह्य यजमानोवहन्थ इति वचनेन सोमयागीयसकलदेवतापरिग्रहरूपसंस्कारस्याग्निनिवृत्तत्वात्तदपगमे तदपगमापत्तेर्दीक्षणीयाग्निरेवान्तं धार्येत। वस्तुतो दीक्षायाः सौमिकत्वेन तत्प्रणयनस्यापि तदर्थत्वात्सोमापवर्ग एव लौकिकता न दीक्षणीयासमाप्तौ। अत एव न वेदे पत्नीं वाचयति नैनं स्तृणात्यसंस्थित इव वा अत्र यज्ञोयत्सौम्योध्वर इति श्रुतिः सोमापवर्गाभावध्वननद्वारा ऽग्नेरलौकिकत्वमेव ध्वनयति। अकर्मकालेप्यपरेणाहवनीयं व्रतमत्याहृत्य प्रयच्छतीत्याहवनीयदर्शनञ्चोपपद्यते। प्राणीयादौ प्रसङ्गसिद्धेर्न पुनः प्रणयनम्॥

सू० तदुत्तरवेद्याम् ॥ ११ ॥

सोमे समाम्नातं प्राञ्चमग्निं प्रणयन्तीति प्रणयनमविशेषात्सर्वस्याहवनीयस्य औत्तरवेदिकस्यैवेत आरभ्याहवनीयत्वेन तस्यैव सर्वहोमाधिकरणत्वादिति प्राप्ते एतमाहवनीयमाहवनीयात्प्रणयतीति श्रुतावाहवनीयस्यापादानत्वश्रवणात्तस्यचान्यापाये ध्रुवत्वेनास्त्येवाग्निशेषः। अत एव पूर्वोयत्सन्नपरो भवासीति मन्त्रलिङ्गं पूर्वमग्निमभ्युद्धतीत्यादौ पूर्वापरशब्देन शालामुखीयाहवनीययोर्व्यवहारश्च सङ्गच्छन्ते॥

सू० आहवनीयविभागः ॥ १२ ॥

शालामुखीयोप्याहवनीय एव। आहवनीयादित्यपादानस्य व्यवहारात्। वरुणप्रघासेष्विव वेदिभेदेन विभागमात्रमिति प्राप्ते आहवनीयापादानकोत्तरवेद्यधिकरणकप्रणयनेनाहवनीयं कुर्यादिति विधौ प्रणयनाव्यवहितपूर्वक्षणेऽपादानस्याहवनीयत्वानपायेन तथा व्यवहारसम्भवेपि तज्जनकत्वेन तदुत्तरक्षणमारभ्य तस्य गार्हपत्यत्वमेव। अत एव संमार्ष्टि गार्हपत्याविति प्राजहितशालामुखीययोर्गार्हपत्यत्वेनैव व्यपदेशः श्रुत्यन्तर उपपन्नः। एषोत ऊर्ध्वं गार्हपत्यो भवतीति स्मृतिश्च यत्तु भाष्ये वर्णकान्तरं तदस्यैवाधिकरणस्य पुनरपि वाक्यान्तरेण वर्णनं सिद्धान्तसूत्रे पाठभेदप्रदर्शनैकफलकम्॥

घटाः? तत्रानन्तरपक्षे साध्यविकलता, आद्येऽपि देशाद्यवच्छेदप्रयुक्तत्वात् सोपाधिकत्वं सपक्षदर्शनानुगुण्येन पक्षेऽपि साध्यधर्मस्य वक्तव्यत्वादुपाध्यवच्छिन्नचेतनानां सङ्ख्यावत्त्वं साध्यं स्यात्तदा सिद्धसाध्यता, किमेतदण्डान्तर्वर्तिनां चेतनानामवधिमत्सङ्ख्यावत्त्वं साध्यम्? उत सर्वेषां? प्रथमे सिद्धसाध्यता, अन्यत्र धर्मिग्राहकप्रमाणबाधः, अतीताण्डानां तदन्तर्वर्तिनां च चेतनानां च सद्भावे प्रमाणं वक्तव्यं, नो चेदाश्रयैकदेशासिद्धिप्रसङ्गात्, प्रमाणं च शास्त्रं, तच्च ताननन्तत्वेन प्रतिपादयतीति तद्विरुद्धत्वात् कालात्ययापदिष्ट इत्यर्थः, विगीतः कालः सावधिः कालत्वान्माससंवत्सरादिवदिति वक्तुं शक्यत्वेऽप्यतीतकल्पानामानन्त्यं हि शास्त्रबलादभ्युपगतं, तथा सङ्ख्यावत्त्वसाधकहेतोः शास्त्रबाधाच्चेतनानन्त्यमभ्युपगन्तव्यमित्यर्थः दृष्टान्तस्य साध्यविकलत्वं कण्ठोक्तं विकल्पमुखेन सोपाधिकत्वकालात्ययापदेशसिद्धसाधनता अभिप्रेताः, घटसर्षपादिव्यक्तिबाहुल्यानां परस्परं सङ्ख्यावधिन्यूनाधिकभावे सत्यपि तथात्वेन तेषामानन्त्यं दर्शयितुं दश घटाः सहस्रं माषा इत्युक्तं, देशकालाद्युपाधिमदित्यत्रादि-शब्देन कर्ता विवक्षितः, एतत्कुलालनिर्मिता घटा दशेत्यपि वक्तुं शक्यत्वात् आत्मस्वरूपानन्त्यादिति देशाद्युपाधिराहित्ये आत्मस्वरूपमात्रस्यासङ्ख्येयत्वादित्यर्थः, यत्त्वित्यादिना भिन्नत्वेनानात्मत्वादिप्रसङ्गमनूदितं परिहरति—

मू॰ तदयुक्तं वस्तुनः परिच्छिन्नानामपि देशकालपरिच्छेदस्य न्यूनाधिकभावेनानियमदर्शनाद्देशकालसम्बन्धेयत्तायाः प्रमाणान्तरायत्तनिर्णयत्वेन ब्रह्मणः सर्वदेशकालसम्बन्धस्यापि प्रमाणान्तरादापततो विरोधाभावात्, वस्तुनः परिच्छेदमात्रादपि सर्वप्रकारपरिच्छेदराहित्याभावादानन्त्यासिद्धिरिति चेत्, तद्भवतोऽप्यविद्याविलक्षणत्वं ब्रह्मणोऽभ्युपयतः समानम् ।

टी० "तदयुक्त"मिति, न हीति, घटो न भिन्नः घटत्वात् यद्भिन्नं न तद् घटः यथा पट इत्युक्ते यथा कालात्ययापदिष्टत्वं तथा त्वदुक्तव्यतिरेकिणामपि कालात्ययापदिष्टत्वमित्यर्थः वस्तुतः "परिच्छिन्नत्वे देशकालपरिच्छेदप्रसङ्गं दूषयति "यत्त्वि"ति, भिन्नत्वे वस्तुतः परिच्छेदादिति इदमिदं न भवतीति सामानाधिकरण्यानर्हत्वं वस्तुतः परिच्छेद इति मृषावाद्यभिमतमिति ज्ञापितं सिद्धान्त्यभिमतः प्रकारान्तरेण वस्तुपरिच्छेदस्तु मृषावाद्यनभिमतः तद्विपरीतरूपस्यापरिच्छेदस्य निर्विशेषत्वविरोधात्, अतो मृषावादिना स्वाभिमतवस्तुपरिच्छेदस्य देशकालपरिच्छेदप्रयोजकत्वाभिमानेन देशकालपरिच्छेदौ प्रसञ्जितौ, तौ दूषयति "तदयुक्त"मिति, कुत इत्यपेक्षायामप्रयोजकत्वं वक्तुं तदुपयोगिनमर्थमाह "वस्तुत इति, ततः किमित्यत्राह "देशकाले"ति, प्रमाणान्तरायत्तनिर्णयत्वेनेति वस्तुपरिच्छेदोऽप्रयोजक इति भावः, प्रतिबन्द्यभिप्रायेणैवमुक्तम् अयमर्थः देशकालपरिच्छेदयोर्न्यूनाधिकभावो दृश्यते पराभिमतस्य वस्तुपरिच्छेदस्य तु स नास्ति, तथाऽपि परिच्छेदत्वात् सोऽपि न्यूनाधिकभाववानिति प्रसञ्जनस्य प्रमाणबाधितत्वेन परिच्छेदत्वं यथा न्यूनाधिकभाववत्त्वस्याप्रयोजकं तथा वस्तुतः परिच्छिन्नत्वमपि देशकालपरिच्छेदयोरप्रयोजकं प्रमाणबाधादिति । यद्वा यथा वस्तुतः परिच्छेदः मुहूर्तावधिककालपरिच्छेदविशेषे माषमात्रावधिकदेशपरिच्छेदविशेषे च प्रयोजक इत्यभ्युपगन्तुमयुक्तं तयोर्न्यूनाधिकभावग्राहिप्रमाणेन बाधात्, एवं देशकालपरिच्छेदावान्तरविशेषस्येव देशकालपरिच्छेदमात्रस्यापि प्रमाणबाधाद्वस्तुपरिच्छेदो न प्रयोजक इति भावः । अथवा प्रयोज्याकारतारतम्यं प्रयोजकाकारतारतम्यनिबन्धनं दृष्टं यथा पतनतारतम्यं गुरुत्वतारतम्यनिबन्धनं, यथा वा गतिशैघ्र्यतारतम्यं वेगतारतम्यनिबन्धनम्, अतस्तारतम्यवति प्रयोज्यधर्मे प्रयोजकधर्मेण तारतम्यवता भाव्यम्, अतोवस्तुपरिच्छेदस्य देशकालपरिच्छेदप्रयोजकत्वे सति न्यूनाधिकभाववत्त्वप्रसङ्गः, न च वस्तुपरिच्छेदो न्यूनाधिकभाववान् दृश्यते, तस्माद्देशकालपरिच्छेदप्रयोजकत्वं तस्यानुपपन्नम्, अतो वस्तुतः परिच्छिन्नस्यापि ब्रह्मणोदेशकालप-

Digitized by Google

रिच्छेदाभाव उपपन्न इत्यर्थः । भाष्ये न्यूनाधिक्याभावेनानियमदर्शनादिति प्रमाणान्तरायत्तनिर्णयत्वेन चेति निर्देशेनायमर्थो विवक्षित इति स्फुटमवगम्यते । अथानन्त्यश्रुतेः सङ्कोचं शङ्कते "वस्तुतः परिच्छेदमात्रादपी"ति, सङ्कोचस्य परपक्षेऽपि तुल्यतां दर्शयति तद्वतोऽपी"ति, ततः-

मू० अतस्सतोऽविद्याविलक्षणत्वाभ्युपगमाद्ब्रह्मणोऽपि भिन्नत्वेन भेदप्रयुक्ता दोषास्सर्वे तवापि प्रसज्येरन्, यद्यविद्याविलक्षणत्वं नाभ्युपेयते तर्ह्यविद्यात्मकत्वमेव ब्रह्मणः स्यात् सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्यमपि तत एवापार्थकं स्यात्, भेदतत्त्वानभ्युपगमे हि स्वपक्षपरपक्षसाधनदूषणादिविवेकाभावात्सर्वमसमञ्जसं स्यात्, आनन्त्यप्रसिद्धिश्च देशकालपरिच्छेदरहितत्वमात्रेण न वस्तुतोऽपि परिच्छेदरहितत्वेन तथाविधस्य शशविषाणायमानस्यानुपलब्धेः, ।

टी० किमित्यत्राह "अतः सतो विद्ये"ति, प्रसङ्गदार्ढ्याय प्रसञ्जकस्य विपर्ययेऽनिष्टमाह "यद्यविद्ये"ति, ततोऽपि किमित्यत्राह "सत्यं ज्ञानमि"ति, परमार्थादन्यत्वं वस्तुपरिच्छेदः, स तु ब्रह्मणो नास्तीति चेत्तदयुक्तं परमार्थादन्यत्वं हि मिथ्यात्वं तच्च बाध्यत्वं बाधफलं च कदाचिन्निवृत्तिरिति तस्य कालपरिच्छेदान्तर्भावात्, अतो विलक्षणत्वमात्रं वस्तुपरिच्छेद इति त्वया वक्तव्यम्, उक्तं च अतो विद्याविलक्षणब्रह्मणोवस्तुपरिच्छेदप्रसङ्गो दुर्वारः पूर्वस्मिन् ग्रन्थे अविद्याब्रह्मणोर्भेदानभ्युपगमे दूषणमुक्तम् । अथ सामान्येन भेदो नाम कश्चिदस्तीत्यनभ्युपगमे दूषणमाह "भेदतत्त्वे"ति, स्वपक्षो निर्दूषणः प्रबलः परपक्षः सदूषणो-दुर्बल इति भेदः किमस्ति वा न वा? अस्ति चेद्भेदाङ्गीकारः, न चेत्परपक्ष एव प्रबलः स्यात्स्वेनापि स एवाभ्युपगतः स्यात्स भेदोऽपरमार्थ इति चेत्तर्हि परपक्षप्राबल्यं स्यादित्यर्थः । ब्रह्माज्ञानपक्षं खण्डयन् वैशेषिकः

Digitized by Google

स्वाभिमतनिर्वाहमाह "आनन्त्यप्रसिद्धिश्चे"ति, साक्षात्सिद्धान्तिपक्षे वस्त्वपरिच्छेद उपपन्न इत्याह-

भा॰ भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणस्सर्वप्रकारत्वात्स्वतः परतोऽपि परिच्छेदो न विद्यते, तदेवं कारणाद्भिन्नस्य कार्य्यस्य सत्यत्वाद्ब्रह्मकार्यं कृत्स्नं जगद्ब्रह्मणोऽन्यदेवेति प्राप्ते प्रचक्ष्महे ।

सू॰ तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १५ ॥

तस्मात्परमकारणाद्ब्रह्मणोऽनन्यत्वं जगतः आरम्भण-शब्दादिभ्यः तदुपपादयद्भ्योऽवगम्यते

टी॰ "भेदवादिनस्त्वि"ति, ब्रह्मणः सर्वप्रकारत्वादित्यनेन सर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वपरिच्छेद इति भाष्यकाराभिप्राय इत्यवगम्यते, इदमिदं न भवतीति हि वस्तुपरिच्छेदः, इदमिदं भवतीति निर्देशयोग्यत्वं वस्त्वपरिच्छेदः, सर्ववस्तुसामानाधिकरण्यार्हत्वम् इत्यर्थः, अनेकविशेषणानाम् एकविशेष्यपर्य्यन्तताऽभिधानं हि सामानाधिकरण्यं कृत्यं तच्च वस्तुनस्तथाविधत्वात् । यद्वा वस्त्वपरिच्छेदो नाम वस्तुगतस्वभावविशेषो देशकालापरिच्छेदविलक्षणः, यथा देशकालपरिच्छेदसाम्येऽपि षड्वर्णस्वर्णस्य दशवर्णात् स्वर्णात् परिच्छेदो देशकालपरिच्छेदविलक्षणो दृश्यते, षड्वर्णतया परिच्छेदो दशवर्णस्य स्वर्णस्य नास्ति तथा ब्रह्मणोऽपि वस्त्वपरिच्छेदो नाम स्वभावतोऽपरिच्छेदः गुणानन्त्यमिति फलितम् । उक्तं प्रकारद्वयं साधीयः वस्त्वन्तराप्रतिहतिर्वस्त्वपरिच्छेद इति केचित् । आलोकादिर्हि सर्वदेशसम्बन्धयोग्योऽपि प्रतिहन्यते न तथेत्यर्थः । केचिदेवमाहुः-वस्तुपरिच्छेदो वस्तुनः परमितत्वं तदभावो वस्त्वपरिच्छेदः देशापरिच्छेदस्तत्कार्यः वस्तुनः परिमितत्वाभावाद्धि सकलदेशसम्बन्ध इति इतोऽपि पूर्वोक्तपक्षद्वयं वरं, स्वतः परतोऽपि परिच्छेदोन विद्यत इति स्वत इति घटादिव्यावृत्तिः, घटादयो हि स्वतः परिच्छिन्नाः परत इति धर्मभूत-

ज्ञानव्यावृत्तिः, तद्धि पराधीनसङ्कोचम्, एवं देशकालपरिच्छेदाभावः उक्तः। यद्वा स्वत इति स्वतःपरिमितत्वाभाव उक्तः, अयं वस्त्वपरिच्छेदः तत्कार्यपरिमितदेशकालसम्बन्धाभाव उक्तः परत इति। अथ वैशेषिकपक्षमुपसंहरन् सूत्रमवतारयति "तदेवमि"ति, तदनन्यत्वमारम्भणशब्दादिभ्यः कस्य कस्मादनन्यत्वमित्यत आह "तस्मादि"ति, पूर्ववाक्यखण्डानुपादानेनारम्भण-शब्दोपादनस्य हेतुमाह "तदुपपादयद्भ्य" इति, पूर्ववाक्ये एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तत्र दृष्टान्तश्चोक्तः प्रतिज्ञादृष्टान्तवाक्यद्वयं प्रकृत्यधिकरण उपात्तमुक्तदृष्टान्तेऽपि वैशेषिकमतेन कारणात् कार्यस्यान्यत्वादेकविज्ञानेन सर्वविज्ञानानुपपत्तिमाशङ्क्य तदुपपादयति—

सू० आरम्भण-शब्द आदिर्येषां वाक्यानां तान्यारम्भणशब्दादीनि वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत अनेन जीवेनात्मना ऽनुप्रविश्य सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्येतानि प्रकरणान्तरस्थान्यप्येवञ्जातीयकान्यत्राभिप्रेतानि, एतानि हि वाक्यानि चिदचिदात्मकस्य जगतः परस्माद्ब्रह्मणोऽनन्यत्वमुपपादयन्ति, तथा हि "स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कृत्स्नस्य जगतो ब्रह्मैककारणत्वं कारणात्कार्य्यस्यानन्यत्वं च हृदि निधाय कारणभूतब्रह्मविज्ञानेन कार्य्यभूतस्य सर्वस्य विज्ञाने प्रतिज्ञाते सति कृत्स्नस्य ब्रह्मैककारणतामजानता शिष्येण कथं नु भगवः स आदेश इत्यन्यज्ञानेनान्यज्ञातताऽसम्भवं चोदितो जगतो ब्रह्मै-

Digitized by Google

कक्कारणतामुपदेक्ष्यन् लौकिकप्रतीतिसिद्धं कारणात्कार्य्यस्यानन्यत्वं तावत् यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादिति दर्शयति यथैकमृत्पिण्डारब्धानां घटशरावादीनां तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञाततेत्यर्थः ॥

टी० वाचारम्भणमित्यादिवाक्यम् अतस्तदिदं वाक्यमनेन सूत्रेणोपात्तमित्यर्थः । तर्ह्यारम्भण–शब्दादिभ्य इति किमर्थमुक्तं न तु वाचादिभ्य इत्युच्यते–केचिद्वाचारम्भणमित्येकं पदं व्याचक्षते वागालम्बनमिति "यथा वाचा दिशा निशे"ति, वचनात्तद्व्यावृत्त्यर्थं वाचेति पदान्तरमारम्भणमित्यपि पदान्तरमिति दर्शयितुमारम्भण-शब्दादिभ्य इत्युक्तं, समासस्य षष्ठीतत्पुरुषत्वव्यावृत्त्यर्थं व्याचष्टे "आरम्भणे"ति, आदि–शब्दोपात्तानि वाक्यान्याह "सदेवे"ति, एतदभिप्रेतान्याह "प्रकरणान्तरे"ति, एषां वाक्यानामनन्यत्वबोधकतामुपपादयति "तथा ही"ति एकविज्ञानेन सर्वविज्ञानं प्रतिजानतोऽभिप्रायमाह "कृत्स्नस्ये"ति, दृष्टान्तवाक्यं व्याचष्ट "यथे"ति, मृन्मयमिति पदं व्याचष्टे मृत्पिण्डारब्धानामिति वाक्याभिप्रेतमर्थमाह "तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेने"ति, कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमित्यादिश्रुत्यन्तरानुगुण्याद् दृष्टान्तसामर्थ्याद् दार्ष्टान्तिकसामर्थ्याच्च तज्ज्ञानेनेति व्याख्यातं, न हि मृत्पिण्डसत्तया घटशरावादि ज्ञातं भवति, न हि परब्रह्मसद्भावात् सर्वं जगद्विज्ञातं च भवति। वाचारम्भणमित्यादिवाक्यस्य शङ्कामाह–

मू० अथ काणादवादेन कारणात्कार्य्यस्य द्रव्यान्तरत्वमाशङ्क्य लोकप्रतीत्यैव कारणात्कार्य्यस्यानन्यत्वमुपपादयति वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति आरभ्यते–आलभ्यते स्पृश्यत इत्यारम्भणं "ल्युटो

Digitized by Google

बहुल"मिति कर्मणि ल्युट्, वाचा वाक्पूर्वकेण व्यवहारेण हेतुनेत्यर्थः, घटेनोदकमाहरेत्यादिवाक्पूर्वको ह्युदकाहरणादिव्यवहारः, तस्य व्यवहारस्य सिद्धये तेनैव मृद्द्रव्येण पृथुबुध्नोदराकारत्वादिलक्षणो विकारः संस्थानविशेषस्तत्प्रयुक्तं च घट इत्यादि नामधेयं स्पृश्यते उदकाहरणादिव्यवहारविशेषसिध्यर्थं मृद्द्रव्यमेव संस्थानान्तरनामधेयान्तरभाग्भवति ।

टी० "अत्रे"ति, कार्यमिथ्यात्वपक्षे प्रतीतिमात्रेण सतः कार्यस्य वागारब्धत्वाभावद्वाचः पूर्वमपि प्रतीयमानत्वात् परिणामपक्षे च ब्रह्मकार्यस्य जगतः शब्दपरिणामत्वाभावाच्चारम्भण-शब्दस्योपादानार्थत्वमयुक्तम् आरभ्यते आलभ्यते स्पृश्यत इत्यारम्भणमिति आलम्भः स्पर्शहिंसयोरिति निघण्टुकाराः, नामधेयस्य मृदारब्धत्वाभावाद्विकारनामधेययोरुभयोरप्यारम्भण-शब्दवाच्यत्वसिद्धये स्पर्शार्थत्वेन व्याख्यातं विभ्राजमानः सरिरस्य मध्यादित्यत्र यथा सरिर-शब्देन सलिलमुच्यते तद्वदारभ्यत इत्यत्रापि रलयोरभेदो विवक्षित इति भावः । वाचेति तृतीयान्तपदम् अजहल्लक्षणेयं विकारनामधेययोरुभयोरपि हेतुत्वाय वाक्पूर्वकेण व्यवहारेण हेतुनेति व्याख्यातं, हेतुत्वं च प्रयोजनतया न तु साधनतया हेतुत्वमित्यर्थः । तदाह "तस्य व्यवहारस्य सिद्धय" इति, केन स्पृश्यत इत्यपेक्षायां पूर्ववाक्यप्रस्तुतेन मृद्द्रव्येणेत्याह "तेनैवे"ति, धर्मिपरत्वव्यावृत्त्यर्थं विकार-शब्दं व्याचष्टे "संस्थानविशेष"इति स्पर्श-शब्दार्थं विवृण्वन्नुक्तमर्थं संग्रहेणाह "उदकाहरणादी"ति, व्यवहारपूर्वकव्याहरसिद्ध्यर्थं कारणद्रव्यमेवावस्थान्तरनामान्तरभाग् भवतीत्युक्तम् आस्ते शेत इत्यादिष्ववस्थान्तरेणापि बुद्धिशब्दान्तरादयो दृश्यन्ते घटः पट इत्यादिषु वस्त्वन्तरत्वेनापि बुद्धिशब्दान्तरादयो दृश्यन्ते, अत्र त्ववस्थान्तरनिबन्धनत्वे किं निश्चायकमित्यपेक्षायां प्रत्यभिज्ञाप्रत्यक्षमिति श्रुतिराहेत्याह—

Digitized by Google

मू० अतो घटाद्यपि मृत्तिकेत्येव सत्यं मृत्तिका द्रव्यमित्येव सत्यं प्रमाणेनोपलभ्यत इत्यर्थः । न तु द्रव्यान्तरत्वेन, अतस्तस्यैव मृद्धिरण्यादेर्द्रव्यस्य संस्थानान्तरभाक्त्वमात्रेणैव बुद्धिशब्दान्तरादय एवोपपद्यन्ते, यथैकस्यैव देवदत्तस्यावस्थाविशेषैर्बालो युवा स्थविर इति बुद्धिशब्दान्तरादयः कार्य्यविशेषाश्च दृश्यन्ते, यदुक्तं सत्यामेव मृदि घटो नष्ट इति व्यवहारात्कारणादन्यत्कार्य्यमिति तदुत्पत्तिविनाशादीनां कारणभूतस्यैव द्रव्यस्यावस्थाविशेषत्वाभ्युपगमादेव परिहृतं, तत्तदवस्थस्यैकस्यैव तस्यैव द्रव्यस्य ते ते शब्दास्तानि तानि च कार्य्याणीति युक्तं द्रव्यस्य तत्तदवस्थत्वं कारकव्यापारायत्तमिति तस्यार्थवत्त्वम्, अभिव्यक्त्यनुबन्धीनि चोद्यानि तस्या अनभ्युपगमदेव परिहृतानि,

टी० अतो घटाद्यपीति, सत्य-शब्दं व्याचष्टे "प्रमाणेनोपलभ्यत"इति, एवकारं व्याचष्टे "न तु द्रव्यान्तरत्वेने"ति, विकारासत्यत्वं विवक्षितं चेद्दितिकरणवैयर्थ्यं स्यात्, द्रव्यान्तरत्वसाधकतया परोक्तानां बुद्धिशब्दान्तरादीनां सामान्येनान्यथासिद्धिमाह "अत"इति, दृष्टान्तमाह "यथैकस्ये"ति, बालयुवशरीराणामपि वस्त्वन्तरत्वं वैशेषिकैरुच्यत इति दृष्टान्तोऽपि विप्रतिपन्न इति चेन्न बालयुवादिशब्दाः शरीरद्वारा शरीरिणमभिदधते, तस्य च नश्वरत्वाभावाच्चेतनपर्य्यन्तबुद्धिशब्दान्तरादयोऽवस्थानिबन्धना एवेति । यद्वा आस्ते शेते तिष्ठति गच्छतीत्यादिवत् बुद्धिशब्दान्तरादीनामवस्थाभेदनिबन्धनत्वोपपत्तेर्बालयुवादिशरीरस्याबाधितप्रत्यभिज्ञागोचरस्याभङ्गुरत्वसिद्धिवत्कारेण दृष्टान्ततयोपन्यासः । भावाभावविरोधं पृथक् परिहरति "यदुक्तमि"ति, तस्य परिहृतत्वं दर्शयन्

Digitized by Google

कार्यभेदं परिहरति "तत्तदवस्थस्य तस्यैवे"ति, कारकव्यापारवैयर्थ्यं परिहरति "द्रव्यस्ये"ति, अभिव्यक्तिपक्षचोद्यान्यनभ्युपगमात् परिहरति "अभिव्यक्त्यनुबन्धिनी"ति, अभिव्यक्तिरनभ्युपेता चेत् उत्पत्तिः स्वीकृता स्यात्, तदानीमसत्कार्यवादः स्यादित्यत्राह–

सू० उत्पत्त्यभ्युपगमेऽपि सत्कार्य्यवादो न विरुध्यते सत एवोत्पत्तेः, विप्रतिषिद्धमिदमभिधीयते पूर्वमेव सत्तदुत्पद्यते चेति, अज्ञातोत्पत्तिविनाशयाथात्म्यस्येदं चोद्यं द्रव्यस्योत्तरोत्तरसंस्थानयोगः पूर्वपूर्वसंस्थानसंस्थितस्य विनाशः स्वावस्थस्य तूत्पत्तिः, अतः सर्वावस्थस्य द्रव्यस्य सत्त्वात्सत्कार्य्यवादो न विरुध्यते, संस्थानस्यासत उत्पत्तावसत्कार्य्यवादप्रसङ्ग इति चेत् असत्कार्य्यवादिनोऽप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्य्यवादप्रसङ्गः, उत्पत्तिमत्त्वे चानवस्था, अस्माकं त्ववस्थानां पृथक्प्रतिपत्तिकार्य्ययोगानर्हत्वादवस्थावत एवोत्पत्त्यादिकं सर्वमिति निरवद्यं, कपालत्वचूर्णत्वपिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावदेकत्वावस्थाप्रहाणेन बहुत्वावस्था, तत्प्रहाणेनैकत्वावस्था चेति न कश्चिद्विरोधः, तथा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सदेवेदम् इदानीम्

टी० "उत्पत्त्यभ्युपगम" इति, अनित्यधर्मोऽवस्था, चोद्यं शङ्कते "संस्थानस्ये"ति, परिहरति "असत्कार्ये"ति, अयमर्थः–यथोत्पत्तेरुत्पत्तिचोद्यं धर्मान्तरारोपणेन नित्यसमावज्जात्युक्तिर्हि भवति, तथाऽवस्थायामुत्पत्तिचोद्यमपि जात्युक्तिः । ननु तत्रोत्पत्तेरुत्पत्तिचोद्यं जात्युक्तिर्भवति न त्वत्रावस्थाया उत्पत्तिकथनं जात्युक्तिरिति चेन्न अवस्थैवोत्पत्तिरित्यभ्युपगमात्, अवस्थाया उत्पत्तिमत्त्वचोदनमुत्पत्तेरुत्पत्तिमत्त्वचोदनमेवेति जात्युक्तिरिति

Digitized by Google

तदेतदभिप्रेत्य प्रतिवन्दीमुखेनोक्तमुत्पत्तेरनुत्पत्तिमत्त्व इति, अस्माकं त्विति अपृथक्सिद्धधर्मतया पृथक्प्रतिपत्तिकार्यानर्हव्यतिरिक्तानाम् उत्पत्त्यादिकं पृथगपेक्षते पृथक्प्रतिपत्तिकार्यानर्हधर्माः पृथगुत्पत्तिनिरपेक्षाः, अत एव ह्युत्पत्तेरुत्पत्त्यादिनैरपेक्ष्यं, तस्मादपृथक्सिद्धधर्मास्तु स्वयं धर्मिण उत्पत्त्याद्यवस्थाभूता इत्यर्थः, अवस्थैव वस्तुन उत्पत्तिर्न त्ववस्थाया उत्पत्तिर्नामास्तीति स्वपक्षवैषम्यद्योतनार्थस्तु-शब्दः । संख्याभेदं परिहरति "कपालत्वे"ति, सद्वारकत्वादविरोधः कालभेदाच्चाविरोध इत्यर्थः । एवं वाचारम्भणमित्यादिवाक्यस्यार्थ उक्तः । अथ सूत्रस्यादि-शब्दोपात्तेषु वाक्येषु सदेवेत्यादिकं दार्ष्टान्तिकवाक्यं व्याचष्टे "तथे"ति, तथाऽनन्यत्वमेवोपपादितमित्यन्वयः, सच्छब्दः प्रमाणसम्बन्धार्हतां वदति । यद्वा ब्रह्म वदति अन्यतरार्थत्वेऽप्यनन्यपदार्थत्वं सिध्यति सदेवेत्यवधारणेन कदाचिदसत्त्वं व्यावर्तितम् एकमेवेति नामरूपविभागाभाव उक्तः । अद्वितीयपदेनाधिष्ठात्रन्तरनिषेध इत्यर्थः सदेवेत्यादिवाक्यस्थमिदं-शब्दं व्याचष्टे-

भू० विभक्तनामरूपत्वेन नानारूपं जगदेकम् अग्रे नामरूपविभागाभावेनैकमेवासीत्, सर्वशक्तित्वेनाधिष्ठात्रन्तरासद्भावतयाऽद्वितीयं चेत्यनन्यत्वमेवोपपादितं तथा तदैक्षत बहु स्यां प्रजायेयेति सूक्ष्ममाणतेजःप्रभृतिविविधविचित्रस्थिरचरस्वरूपजगत्त्वेनात्मनो बहुभवनं संकल्प्य जगत्सर्गाभिधानात् कार्य्यभूतस्य जगतः परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वमवसीयते सच्छब्दवाच्यस्य परस्य ब्रह्मणः सर्वज्ञस्य सत्यसंकल्पस्य निरवद्यस्यैव सदेवेदमिति निर्देशार्हजगत्त्वं सच्छब्दवाच्यस्य च जगतो-

टी० "विभक्तनामरूपत्वेने"ति, इदं जगत्सदेव चेत्कथं सृष्ट्याद्युपपत्तिरित्यत्राह "अग्रे"इति, अद्वितीयपदं व्याचष्टे "सर्वशक्तित्वेने"ति, एषां पादानामुक्तार्थपरत्वमेकविज्ञानेन सर्वज्ञानप्रतिज्ञोपपादनार्थत्वादे-

Digitized by Google

वावगम्यते, न हि सजातीयविजातीयादिव्यावृत्त्या प्रतिज्ञोपपादनोपयोगः, एषां पदानामुक्तार्थैकपरत्वमुपरितनवाक्यैरप्युपपादयति "तथा तदैक्षते"ति, तेजःप्रभृतीति संकल्पानन्तरं तेजःप्रभृतिसृष्टिप्रतिपादनाद्बहु स्यामिति बहु-शब्दस्तेजःप्रभृतिरूपेण बहुत्वपर इत्यर्थः, बहु-शब्दोक्तनामरूपविभागाभाव एक-शब्दोक्त इति गम्यते, ऐक्षतेत्यनेन अद्वितीयपदस्याधिष्ठात्रन्तरनिवारकत्वं ज्ञातं कथमसतस्सज्जायेतेत्यनेन सदेवेत्यवधारणस्य कदाचिदसत्त्वव्यावृत्तिपरत्वमवगतं कारणभूतस्यैव ब्रह्मणोबहुभवनसंकल्पाभिधानात्कार्यकारणयोरनन्यत्वं च लब्धमित्याह "तथा तदैक्षते"ति, व्यष्टिसृष्टिसंकल्पवाक्यस्य शङ्काविशेषव्युदासकत्वात्तद्व्युदसनीयां शङ्कामाह "सच्छब्दवाच्यस्ये"ति, सच्छब्दस्य ब्रह्मपरत्वे इदं-शब्दवाच्यजगत्सामानाधिकरण्यमनुपपन्नमित्यभिप्रायेणाह "सच्छब्दवाच्यस्ये"ति, सच्छब्दस्य जगत्परत्वे तदैक्षतेत्यादिभिर्विरोध इत्यभिप्रायेणाह "सच्छब्दवाच्यस्यैव जगत" इति, चेतनांशस्यैक्यानुपपत्तिमभिप्रेत्याह-

मू० नामरूपविभागाभावेनैकत्वमद्वितीयत्वमधिष्ठात्रन्तरानपेक्षत्वं पुनरपि तस्यैव विविधविचित्रस्थिरचरस्वरूपजगत्त्वेन बहुभवनसंकल्परूपेक्षणं यथासंकल्पं सर्गश्च कथमुपपद्यत इत्याशङ्क्याह सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति तासां त्रिवृतं त्रिवृतमित्यादि तिस्रो देवता इति कृत्स्नमचिद्वस्तु निर्दिश्य स्वात्मकजीवानुप्रवेशेनैतदचिद्वस्तु नामरूपभाक्करवाणीत्युक्तम्, अनेन जीवेनात्मना मदात्मकजीवेनात्मतया अनुप्रविश्यैतदचिन्नामरूपभाक्करवाणीत्यर्थः, स्वात्मनो जीवस्य चात्मतयाऽनुप्रवेशकृतं नामरूपभाक्त्वमित्युक्तं भवति, तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुत्यन्तरेण स्पष्टं सजीवं

जगत्परेण ब्रह्मणाऽऽत्मतयाऽनुप्रविष्टमिति तदेतत्कार्य्यावस्थस्य च कारणावस्थस्य च चिदचिद्वस्तुनः सकलस्य स्थूलस्य सूक्ष्मस्य च परब्रह्मशरीरत्वं, परस्य च ब्रह्मण आत्मत्वमन्तर्य्यामिब्राह्मणादिषु सिद्धं स्मारितम्, अनेन पूर्वोक्ता शङ्का निरस्ता, अचिद्वस्तुनि सजीवे ब्रह्मण्यात्मतयाऽवस्थिते नामरूपव्याकरणवचनाच्चिदचिद्वस्तुशरीरकं ब्रह्मैव जगच्छब्दवाच्यमिति सदेवेदमग्र एकमेवासीदित्यादि सर्वमुपपन्नतरं शरीरभूतचिदचिद्वस्तुगताः सर्वे विकाराश्चापुरुषार्थाश्चेति ब्रह्मणो निरवद्यत्वं कल्याणगुणाकरत्वं च सुस्थितम् ।

टी० "नामरूपविभागाभावेनैकत्वमि"ति, सेयमित्यादि उदाहृतवाक्यसमुदायस्यार्थोऽन्यत्रोक्तः, तत्र वाक्यैकदेशेनोक्तार्थविरोधशङ्कां परिहरिष्यन्नुदाहृतवाक्यसमुदायप्रतिपन्नमर्थं साधारण्येन वदति "तिस्र"इति, अस्मिन्वाक्ये स्वात्मकजीववाचिपदं दर्शयन्ननुप्रवेशवत् गगनादिव्यावृत्त्यर्थं नियन्तृतयाऽनुप्रवेशं च वदति[1] "अनेने"ति, स्वात्मकजीवेनेत्युक्ते मृदात्मक इतिवत्स्यादिति शङ्कायां विवक्षितार्थविशेषमाह "स्वात्मनो जीवस्य चे"ति, सिंहेन भूत्वा बहवो मया[2] हता इतिवज्जीवेनात्मनेत्यस्यार्थ इति भावः । तमर्थं[3] श्रुत्यन्तरेण स्पष्टयति "तत्सृष्ट्वे"ति, "आत्मतयाऽनुप्रविष्टमि"ति, श्रुत्यन्तरेण स्पष्टमित्यन्वयः, बहुत्वे सति ह्यनुप्रवेशः, स तु कारणावस्थाया एकत्वान्नोपपद्यत इत्यत्राह—

सू० तदेत "दधिकं तु भेदनिर्देशा"दित्यनन्तरमेव वक्ष्यति,तथा

१ दर्शयति इति पा० ।
२ मयात्ता इति पा० ।
३ इममर्थमिति ।

Digitized by Google

"ऐतदात्म्यमिदं सर्वं"मिति कृत्स्नस्य चेतनाचेतनस्य ब्रह्मतादात्म्यमुपदिशति, तदेव च तत्त्वमसीति निगमयति तथा प्रकरणान्तरस्थेष्वपि वाक्येषु सर्वं खल्विदं ब्रह्म आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्, इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमात्मैवेदं सर्वमित्यनन्यत्वं प्रतीयते, तथाऽन्यत्वं च निषिध्यते "सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद, नेह नानाऽस्ति किंचन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति, तथा "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये"दित्यविदुषो द्वैतदर्शनं विदुषश्चाद्वैतदर्शनं प्रतिपादयदनन्यत्वमेव तात्त्विकमिति प्रतिपादयति, तदेवमारम्भणशब्दादिभ्यो जगतः परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वमुपपाद्यते । अत्रेदं तत्त्वं चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव सर्वदा सर्व–शब्दाभिधेयं तत्कदाचित्स्वस्मात्स्वशरीरतयाऽपि पृथग्व्यपदेशानर्हसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तत्कारणावस्थं ब्रह्म कदाचिच्च विभक्तनामरूपव्यवहारार्हस्थूलदशापन्नचिदचिद्वस्तुशरीरं, तच्च कार्य्यावस्थमिति कारणात्परस्माद्ब्रह्मणः कार्य्यरूपं जगदनन्यत् शरीरभूतचिदचिद्वस्तुनः शरीरिणो ब्रह्मणश्च कारणावस्थायां कार्यावस्थायां च श्रुतिशतसिद्धया स्वभावव्यवस्थया गुणदोषव्यवस्था च "न तु दृष्टान्तभावा"दित्यत्रोक्ता ।

Digitized by Google

टी० "तदेतदि"ति, ततः किमित्यत्राह "अनेने"ति, पूर्वोक्ताशङ्का इदं-शब्दसामानाधिकरण्येन ब्रह्मणि जगद्गतदोषाशङ्केत्यर्थः । तदुपपादयति अचिद्वस्तुनीत्यादिनाऽनन्तरवाक्येन उपपन्नतरं-मुख्यमेवेति भावः । अथ प्रकरणान्तरस्थवाक्यानामप्येतत्सूत्राभिप्रेतत्वात्तैरनन्यत्वमुपपादयति "तथा प्रकरणान्तरस्थेष्वि"ति, द्वैतदर्शनस्यातात्त्विकत्वं कदाचिन्निवृत्तिवचनेनापि सिद्धमित्याह "यत्रत्वस्ये"ति, तदेवमित्यादि ब्रह्मणश्चिदचितोरुत्पत्तिप्रलयश्रवणात् कारणात्कार्यस्यानन्यत्वात्कारणावस्थायां बहुत्वाभावाच्छरीरशरीरिभावस्यानुपपन्नत्वेन स्वभावव्यवस्था न स्यादित्यत्राह । यद्वा भेदव्यपदेशादित्यादिभिः सूत्रैर्भेदोपपादनेनेदमनन्यत्वोपपादनं व्याहतमित्यत्राह "अत्रेदं तत्त्व"मिति, विशिष्टात्कारणाद्विशिष्टं कार्यं जायत इति शरीरशरीरिभावादिरुपपद्यत इत्यर्थः । ब्रह्माज्ञानवादिभिरस्य सूत्रस्योक्तमर्थं दूषयति-

मू० ये तु कार्य्यकारणयोरनन्यत्वं कार्य्यस्य मिथ्यात्वाश्रयणेन वर्णयन्ति न तेषां कार्य्यकारणयोरनन्यत्वं सिध्यति सत्यमिथ्यार्थयोरैक्यानुपपत्तेः, तथा सति ब्रह्मणो मिथ्यात्वं जगतः सत्यत्वं वा स्यात् । ये च कार्य्यमपि पारमार्थिकमभ्युपयन्त एव जीवब्रह्मणोरौपाधिकमन्यत्वं स्वाभाविकं चानन्यत्वम्, अचिद्ब्रह्मणोस्तु द्वयमपि स्वाभाविकमिति वदन्ति तेषामुपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावान्निरवयवस्याखण्डितस्य ब्रह्मण एवोपाधिसम्बन्धाद्ब्रह्मस्वरूपस्यैव हेयाकारपरिणामाच्च शक्तिपरिणामाभ्युपगमे शक्तिब्रह्मणोरनन्यत्वाच्च जीवब्रह्मणोः कर्म्मवश्यत्वापहतपाप्मत्वादिव्यवस्थावादिन्योऽचिद्ब्रह्मणोश्च परिणामापरिणामवादिन्यः श्रुतयो व्याकुप्येयुः । ये पुनर्निरस्तनिखिलभे-

Digitized by Google

क्तृत्वादिसमस्तविकल्पविरहं सर्वशक्तियुक्तं सन्मात्रद्रव्यमेव कारणं ब्रह्म तच्च प्रलयवेलायां शान्ताशेषसुखदुःखानुभवविशेषं स्वप्रकाशमपि सुषुप्तात्मवदचि[1]द्विलक्षणमवस्थितं सृष्टिवेलायां मृत्तिकाद्रव्यमिव घटशरावादिरूपं समुद्र इव च फेनतरङ्गबुद्बुदादिरूपो भोक्तृभोग्यनियन्तृरूपेणांशचयाऽवस्थमवतिष्ठते, अतो भोक्तृत्वभोग्यत्वनियन्तृत्वानि तत्प्रयुक्ताश्च गुणदोषाः शरावत्वघटत्वमणिकत्ववत्तद्गतकार्य्यभेदवच्च व्यवतिष्ठन्ते, भोक्तृभोग्यनियन्तृणां सदात्मनैकत्वं च घटशरावमणिकादीनां मृदात्मनैकत्ववदुपपद्यते, अतस्सन्मात्रमेव द्रव्यं सर्वावस्थावस्थितमिति ब्रह्मणोऽनन्यज्जगदातिष्ठन्ते, तेषां सकलश्रुतिस्मृतीतिहासपुराणन्यायविरोधः, सर्वा हि श्रुतयस्स्मृतीतिहासपुराणास्सर्वेश्वरेश्वरं सदैव सर्वज्ञं सर्वशक्तिं सत्यसंकल्पं निरवद्यं देशकालानवच्छिन्नानवधिकातिशयानन्दं परमकारणं ब्रह्म प्रतिपादयन्ति, न पुनरीश्वरादपि परमीश्वरांशि सन्मात्रं, तथा हि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति, ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न-व्यभवत् तच्छ्रेयोरूपमत्यसृजत् क्षत्रं यान्येतानि देवक्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति, आत्मा वा इदमेकमेवाग्र आसीत् नान्यत्किञ्चन

१ सुषुप्तात्मवदचिदविलक्षणमिति पा० ।

मिषत्स ऐक्षत लोकान्नु सृजा इति, एको ह वै नारायण आसीत् न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्य्यः स एकाकी न रमते तस्य ध्यानान्तस्थस्ये"त्यादिभिः परमकारणं सर्वेश्वरेश्वरो नारायण एवेत्यवगम्यते

टी० "ये त्वि"ति, भास्करमतं दूषयति "ये चे"ति, निरवयवत्वादिविशेषणं ब्रह्मणि दोषसम्बन्धज्ञापनाय, शक्तिपरिणामाभ्युपगम इति, शक्तेर्ब्रह्मानन्यत्वाभ्युपगमात्तेनापि व्याकुलमेवेत्यर्थः। यादवप्रकाशमतं निरस्यति "ये पुनरि"ति, विप्लवो–विकारः तेषामित्यादि सदैव सर्वज्ञमित्यनेन कारणावस्थायामपि सर्वज्ञत्वादिकं विवक्षितं, यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद् ब्रह्म नामरूपमन्नं च जायत इति हि श्रुतिः,

भू० सद्ब्रह्मात्मशब्दा हि तुल्यप्रकरणस्थास्तत्तुल्यप्रकरणस्थेन नारायण–शब्देन विशेषितास्तमेवावगमयन्ति, तमीश्वराणां परमं महेश्वरं तद्दैवतानां परमं च दैवतं, स कारणं करणाधिपाधिपो न तस्य कश्चिज्जनिता न चाधिप" इति· श्वरस्यैव कारणत्वं श्रूयते, स्मृतिरपि मानवी "ततः स्वयम्भूर्भगवानिति, प्रकृत्य "सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु वीर्य्यमवा[१]सृजदि"ति, इतिहासपुराणान्यपि पुरुषोत्तममेव परमकारणमभिदधति "नारायणो जगन्मूर्तिरनन्तात्मा सनातनः। स सिसृक्षुः सहस्रांशादसृजत्पुरुषान् द्विधा। विष्णोः स-

१ वीर्यमपासृजदिति पा· ।

काशादुद्भूतं जगत्तत्रैव च स्थित"मित्यादिषु, न चेश्वरः सन्मात्रमेति वक्तुं शक्यं तस्य तदंशत्वाभ्युपगमात्सविशेषत्वाच्च, न च तस्य ज्ञानानन्दाद्यनन्तकल्याणगुणयोगः कादाचित्क इति वक्तुं शक्यते, तेषां स्वाभाविकत्वेन सदातनत्वात्, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, यः सर्वज्ञः सर्वविदित्यादिभ्यः ज्ञानानन्दादिशक्तियोग एवास्य स्वाभाविक इति मा वोचः शक्तिसस्वाभाविकी ज्ञानबलक्रिया च स्वाभाविकीति पृथङ्निर्देशाल्लक्षणाप्रसङ्गाच्च ।

टी० महोपनिषद्येव नारायणकारणत्वं श्रूयते अन्यत्र तु सद्-ब्रह्मात्मादीनां तत्कथं सर्वोपनिषत्स्वीश्वरस्य कारणत्वं श्रूयत इत्यत्राह "सद्ब्रह्मे"ति, सद्ब्रह्म-शब्दौ दृष्टान्तार्थौ, यथा सद्-ब्रह्मशब्दौ सामान्यविशेषशब्दावेकार्थतया स्वीकृतौ तद्वदिति भावः । तमीश्वराणामित्यादि ईश्वरस्यैवेत्येवकारेण "न चास्य कश्चिदित्युक्तनिषेधो विवक्षितः, ततः स्वयंभूरित्यत्र भगवच्छब्द ईश्वरवाचीति भावः । न्यायविरोधमाह "न चे"ति, सविशेषत्वाच्च—नियन्तृत्वरूपविशेषवत्त्वात्, सन्मात्रं हि नियन्तृत्वादिविशेषरहितं शक्तिश्च स्वाभाविकीत्यादिशक्तिविशेषे अघटितघटनासामर्थ्यरूपे शक्ति-शब्दावर्तते ज्ञानादिकार्यकरत्वे च तत्रोभयमप्यसंकुचितंशक्ति-शब्देनोच्यते तत्सङ्कोचेन पृथङ्निर्देशावैयर्थ्यमाशङ्क्याह "लक्षणाप्रसङ्गाच्चे"ति, ज्ञानादिशब्दैस्तत्तच्छक्तिः प्रतिपाद्या चेल्लक्षणा शक्ति-शब्दस्य सङ्कोचोऽप्यस्वरसः, असङ्कोचे पृथङ्निर्देशवैयर्थ्यमित्यर्थः ।

सू० न च पाचकादिवत्सर्वज्ञ इत्यादिषु शक्तिमात्रे कृत्प्रत्यय इति वक्तुं शक्यं कृत्प्रत्ययमात्रस्य शक्तावस्मरणात्, "शक्तौ हस्तिकपाटयो"रित्यादिषु केषांचिदेव कृत्प्रत्ययानां

शक्तिविषयत्वस्मरणात्, पाचकादिषु त्वगत्या लक्षणा समाश्रीयते । किञ्चेश्वरस्य तदंशविशेषत्वात्तस्य चांशित्वे तरङ्गात्समुद्रस्येवांशादंशिनोऽधिकत्वात्,तमीश्वराणां परमं महेश्वरं, न तत्समश्चाभ्यधिकश्च दृश्यत इत्यादीनीश्वरविषयाणि परःशतानि वचांसि बाध्येरन् । किञ्च सन्मात्रस्य सर्वात्मकत्वेंऽशित्वे चेश्वरस्य तदंशविशेषत्वात्तस्य सर्वात्मकत्वांशित्वोपदेशा व्याहन्येरन्, न हि मणिकात्मकत्वं तदंशत्वं वा घटशरावादेः स्वांशेषु सर्वेषु सन्मात्रस्य पूर्णत्वेनेश्वरांशेऽपि तस्य पूर्णत्वात्तदात्मकानि तदंशाश्चेतराणि वस्तूनीति चेत् न घटेऽपि सन्मात्रस्य पूर्णत्वादीश्वरस्यापि घटात्मकत्वात्तदंशत्वप्रसङ्गात्,

टी० न लक्षणा शक्तिमात्रेऽपि प्रत्ययविधानादित्यत्राह "न चे"ति, "शक्तौ हस्तिक[1]पाटयोरि"त्यादिष्वित्यत्रादि-शब्देन शकि लिङ् चेत्यादिसूत्रं विवक्षितं, शकि लिङ् चेत्यत्र च-शब्दात् कृत्प्रत्ययान्तराणामपि शक्तौ विधानं सूचितं, तत्र विशेषविधानाभावेऽपि पाचकादिषु शक्तौ कृदन्तत्वेन प्रयोगदर्शनात् कतिपयविधानमुपलक्षणमिति चेन्न विशेषोपादानान्यथानुपपत्त्या कृन्मात्रस्य शक्त्यर्थत्वानुपपत्तेरित्यर्थः, शक्तिविषयप्रत्ययाभावेऽपि पाचकादिषु शक्त्यर्थत्वं दृश्यत इत्यत्राह "पाचकादिष्वि"ति,

मू० न च सन्मात्रस्य घटोऽस्ति पटोऽस्तीति वस्तुधर्मतयाऽवगतस्य द्रव्यत्वं कारणत्वं चोपपद्यते, व्यवहारयोग्यता हि सत्त्वं विरोधिव्यवहारयोग्यता तद्व्यवहारयोग्यस्यासत्त्वं द्रव्यमेव सदित्यभ्युपगमे क्रियादीनामसत्त्वप्रसङ्गः, क्रियादिषु काशकुशावलम्बनेऽपि सर्वत्रैकरूपा सत्ता दुरुपादा

१ हस्तिकवाटयोरिति तु द्राविडाः पठन्ति ।

सदात्मना च सर्वस्याभिन्नत्वे सर्वज्ञत्वेन सर्वस्वभावप्रतिसन्धानात्सर्वगुणदोषसंकरप्रसङ्गश्च पूर्वमेवोक्तः, अतो यथोक्तप्रकारमेवानन्यत्वम् । अथोच्येत एकस्यैवावस्थान्तरयोगेऽपि बुद्धिशब्दान्तरादयो बालत्वयुवत्वादिषु दृश्यन्ते मृद्दारुहिरण्यादिषु द्रव्यान्तरत्वेऽपि दृश्यन्ते न च मृद्घटादिषु कार्य्यकारणेषु बुद्धिशब्दान्तरादयोऽवस्थानिबन्धना एवेति कुतो निर्णीयत इति तत्रोत्तरम्—

सू० भावे चोपलब्धेः ॥ १६ ॥

कुण्डलादिकार्य्यसद्भावे च कारणभूतस्य हिरण्यस्योपलब्धेः, इदं कुण्डलं हिरण्यमिति हिरण्यत्वेन प्रत्यभिज्ञानादित्यर्थः, न चैवं हिरण्यादिषु द्रव्यान्तरेषु मृदादय उपलभ्यन्ते, अतो बालयुवादिवत्कारणभूतमेव द्रव्यमवस्थान्तरापन्नं कार्य्यमिति गीयते ।

टी० न च सन्मात्रस्येति अनुवर्त्तमानं सन्मात्रं किं वस्तुधर्मः? उत द्रव्यमिति विकल्पमभिप्रेत्य धर्मपक्षे दूषणमाह "न चे"ति, सत्त्वप्रसङ्गादसत्त्वं शिक्षयति "विरोधी"ति, द्रव्यपक्षे दूषणमाह "द्रव्यमेवे"ति, क्रियादिष्विति काशस्य कुशत्वेन कुशस्थानेऽवलम्बनं काशकुशावलम्बनम् अमुख्यमित्यर्थः द्रव्यसम्बन्धः क्रियादेः सत्त्वं चेदेकं प्रयोजकं न स्यादित्यर्थः स्वोक्तस्यैव सूत्रार्थत्वमुपसंहरति "अत" इति, मृत्तिकेत्येव सत्यमिति वाक्योक्तप्रत्यभिज्ञाप्रत्यक्षसिद्धानन्यत्वं वदत उत्तरसूत्रस्य शङ्कामाह "अथोच्यते इति सू० भावे चोपलब्धेः, कस्य भावे कस्योपलब्धेरित्यत्राह कुण्डलादी"ति, इदं कुण्डलं हिरण्यमिति सामानाधिकरण्येन प्रत्यभिज्ञानमत्राभिप्रेतं समवायिकारणानुवृत्तिं वदतोऽसत्कार्यवादिनोऽप्यभिमताया वैयधिकरण्येन प्रत्यभिज्ञायाः स्वपक्षासाधकत्वात् तथाऽपि बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरत्वं कल्प्यत इत्यत्राह—

सू॰ द्रव्यान्तरवादिनाऽप्यभ्युपेतेनावस्थान्तरयोगेन बुद्धिशब्दान्तरादिषूपपन्नेष्वनुपलब्धद्रव्यान्तरकल्पनानुपपत्तेश्च, न च जातिनिबन्धनेयं प्रत्यभिज्ञा जात्याश्रयभूतद्रव्यान्तरानुपलब्धेः, एकमेव हि हेमजातीयं द्रव्यं कार्य्यकारणोभयावस्थं दृश्यते, न च द्रव्यभेदे समवायिकारणानुवृत्त्या कार्ये प्रतिसन्धानमिति वक्तुं शक्यं द्रव्यान्तरत्वे सत्याश्रयानुवृत्तिमात्रेण तदाश्रिते द्रव्यान्तरे प्रतिसन्धानानुपलब्धेः, गोमयादिकार्य्ये वृश्चिकादौ गोमयादिप्रतिसन्धानं न दृश्यत इति चेन्न तत्राप्याद्यकारणभूतपृथिवीद्रव्यप्रत्यभिज्ञानात्, अग्निकार्य्ये धूमेऽग्निप्रत्यभिज्ञानं न दृश्यत इति चेद् भवतु न तत्र प्रत्यभिज्ञानं तथाऽपि न दोषः अग्नेर्निमित्तकारणमात्रत्वात् अग्निसंयुक्तादार्द्रेन्धनाद्धि धूमो जायते गन्धैक्याच्चार्द्रेन्धनकार्यमेव धूमः अतः कार्यभावे च तदेवेदमित्युपलब्धेर्बुद्धिशब्दान्तरादयोऽवस्थाभेदमात्रनिबन्धना इत्यवगम्यते

टी॰ "द्रव्यान्तरवादिने"ति, अभ्युपेतेन असमवायिकारणत्वेनाभ्युपेतेनेत्यर्थः, अनन्यथासिद्धं हि कल्पकं बुद्धिशब्दान्तरादीनामन्यथासिद्धत्वान्न कल्पकत्वमित्यर्थः, न चेति सोऽयं गौरित्यादिषु जातिनिबन्धनं प्रत्यभिज्ञानं दृष्टं तथाऽत्रापि जातिनिबन्धनमित्यर्थः। परिहरति "जात्याश्रये"ति, तत्र हि व्यक्तिद्वयोपलब्धिरस्ति अत्र तु न तथा व्यक्त्यन्तरमुपलभ्यत इत्यर्थः । कथमुपलभ्यत इत्यत्राह "एकमेवे"ति, पुनः शङ्कते "न चे"ति, परिहरति "एवमेवे"ति, पुनः शङ्कते "न चे"ति, परिहरति "द्रव्यान्तरत्वे सती"ति, न हि घटस्थे जले घटो जलमिति सामानाधिकरण्येन प्रत्यभिज्ञानं भवतीत्यर्थः । चोद्यं शङ्कते "गोमये"ति, परि-

हरति "ने"ति, अयमर्थः समवायिकारणानुवृत्तिं वदता त्वयाऽपि प्रति-सन्धानाभाववोद्यं परिहरणीयं तत्रादिकारणपृथिवीप्रत्यभिज्ञानमस्तीति वदसि चेत्तदस्माकमपि तुल्यमिति पुनरप्यापातप्रतीतिनिबन्धनं चोद्यं शङ्कते "अग्निकार्य"इति, परिहरति "भवत्वि"ति, निमित्तकारणप्रत्य-भिज्ञानं न दोषः उपादानमेव प्रत्यभिज्ञातव्यं, तच्च धूमे गन्धवत्त्वात् पृथि-वीत्वं प्रत्यभिज्ञायत इत्यर्थः । सूत्रार्थमुपसंहरति "अत"इति, अधिकरणा-र्थेन सूत्रस्यान्वितत्वमाह–"तस्मादि"ति,

सू० तस्मात्कारणादनन्यत्कार्यम्,

इतश्च

सू० सत्त्वाच्चापरस्य ॥ १७ ॥

अपरस्य–कार्यस्य कारणे सत्त्वाच्च कारणात्कार्यस्यानन्यत्वं लोकवेदयोर्हि कार्यमेव कारणतया व्यपदिश्यते यथा लोके सर्वमिदं घटशरावादिकं पूर्वाह्णे मृत्तिकैवासी-दिति, वेदे च सदेव सोम्येदमग्र आसीदिति ॥

टी० सू० सत्त्वाच्चापरस्य, कारणे सत्त्वात्कारणावस्थायां सत्त्वात्, केचिदनयोः सूत्रयोरिमां भिदामाहुः–सोऽयमिति ज्ञानं प्रत्यभिज्ञा, सा पूर्वोक्ता अयं स इति ज्ञानमभिज्ञा साऽत्रोच्यते अथवा पूर्वत्रैकद्रव्यता-विषयबुद्धिरुक्ता, अत्र तु तथा व्यपदेश उच्यत इति भिदा, अत एव ह्युत्तरसूत्रे असद्व्यपदेशान्नेति चेदित्युक्तम्, एतदभिप्रायेण भाष्येऽपि कार्यमेव कारण-तया व्यपदिश्यत इत्युक्तम्, श्रुतिसिद्धं प्रत्यभिज्ञानं पूर्वमुक्तं लोकवेदयोरुभ-यत्रापि व्यपदेशस्त्वत्रोक्तः, अत्र कार्ये कारणव्यपदेशेन कथितः कारणे कार्यव्यपदेश उक्तः, अत्र हेतुः सदेवेदमग्र एकमेवेति श्रुत्यनुसारः ॥ ननु मृदयं घट इति प्रत्यभिज्ञा ज्वालाप्रत्यभिज्ञानवत् भ्रान्तं स्यात् बुद्धि-शब्दान्तरादिभिर्वस्त्वन्तरस्य साधितत्वात्, नैवं ज्वालायां ह्यनन्यथासिद्ध-हेतुना भेदसिद्धेः प्रत्यभिज्ञानस्य भ्रान्तत्वनिर्णयः अत्र बुद्धिशब्दान्तरादयो-ऽन्यथासिद्धाः, ज्ञानं तु स्वतः प्रमाणमिति यथोक्त एवार्थः ।

Digitized by Google

सू० असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च ॥ १८ ॥

यदुक्तं कारणे कार्यस्य सत्त्वं लोकवेदाभ्यामवगम्यत इति तदयुक्तम्, असद्व्यपदेशात् असदेवेदमग्र आसीत् असद्वा इदमग्र आसीत् इदं वाऽग्रे नैव किंचनासीत् इति, लोके च सर्वं घटशरावादिकं पूर्वाह्णे नासीदिति अतोयथोक्तं नोपपद्यते इति चेत् तन्न धर्मान्तरेण तथा व्यपदेशात् स खल्वसद्व्यपदेशस्तस्यैव कार्यद्रव्यस्य पूर्वकाले धर्मान्तरेण संस्थानान्तरेण न भवदभिप्रेतेन तुच्छत्वेन सत्त्वासत्त्वे हि द्रव्यधर्मावित्युक्तं, तत्र सत्त्वधर्माद् धर्मान्तरमसत्त्वम् इदं-शब्दनिर्दिष्टस्य जगतः सत्त्वधर्मो नामरूपे असत्त्वधर्मस्तु तद्विरोधिनी सूक्ष्मावस्था अतो जगतो नामरूपयुक्तस्य तद्विरोधिसूक्ष्मदशापत्तिरसत्त्वं कथमिदमवगम्यते वाक्यशेषाद्युक्तेः शब्दान्तराच्च वाक्यशेषस्तावत् इदं वाऽग्रे नैव किंचन आसीत् इत्यत्र तदसदेव मनोऽकुरुत स्यामितीति अनेन वाक्यशेषगतेन मनस्कारलिङ्गेन असच्छब्दार्थे तुच्छातिरिक्ते निश्चिते तदैकार्थ्यात् असदेवेदमित्यादिष्वप्यसच्छब्दस्यायमेवार्थ इति निश्चीयते, युक्तेश्च असत्त्वस्य धर्मान्तरत्वमवगम्यते युक्तिर्हि सत्त्वासत्त्वे पदार्थधर्मावित्यवगमयति मृद्द्रव्यस्य पृथुबुध्नोदराकारयोगो घटोऽस्तीति व्यवहारहेतुः, तस्यैव तद्विरोध्यवस्थान्तरयोगो घटो नास्तीति व्यवहारहेतुः, तत्र

कपालाद्यवस्थायास्तद्विरोधित्वेन सैव घटावस्थस्य नास्तीति व्यवहारहेतुः । न च तद्व्यतिरिक्तो घटाभावो नाम कश्चिदुपलभ्यते, न च तत्कल्प्यते तावतैवाभावव्यवहारोपपत्तेः, तथा शब्दान्तराच्च पूर्वकाले धर्मान्तरयोग एवावगम्यते शब्दान्तरं च पूर्वपूर्वोदाहृतं सदेव सोम्येदमग्र आसीदित्यादिकं तच्च हि श्रुतस्तु खलु सोम्यैवं स्यादिति तुच्छत्वमाक्षिप्य सदेव सोम्येदमग्र आसीदिति व्यवस्थापितं तद्वेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियतेति सुस्पष्टमुक्तम्, इदानीं कार्यस्य कारणादनन्यत्वे निदर्शनद्वयं द्वाभ्यां सूत्राभ्यां दर्शयति—

टी० सू० असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद् युक्तेः शब्दान्तराच्च, यदुक्तमिति सत्त्वासत्त्वे हि द्रव्यधर्मावित्युक्तमिति व्यवहारयोग्यता सत्त्वं विरोधिव्यवहारयोग्यता तद्व्यवहारयोग्यस्य असत्त्वमित्युक्तमित्यर्थः, धर्मान्तरेणेति अत्र धर्मान्तर-शब्दस्यार्थमाह "तत्रे"ति, सत्त्वासत्त्वयोरापेक्षिकत्वमभिप्रेत्याह "इदं-शब्दनिर्दिष्टस्ये"ति, वाक्यशेषादिति असद्वा इदमग्र आसीदित्यत्र तदात्मानं स्वयमकुरुतेति वाक्यशेषः, अश्रुतवाक्यशेषेषु प्रदेशेषु निर्वाहमाह "तदेकार्थ्यादि"ति, युक्तेश्चेति पिण्डत्वकपालत्वावस्थयोः साधारणमाह ' तस्यैव तद्विरोध्यवस्थान्तरयोगो घटो नास्तीति व्यवहारहेतु"रिति, एतद्विवृणोति "तत्रे"ति, न च तद्व्यतिरिक्त इति, अभावान्तरवादिनाऽपि अभावाभावोभाव इत्यभ्युपगतः, अन्यथाऽनवस्थाप्रसङ्गात् तद्वत्सर्वत्राभावव्यवहारस्य विरोध्यवस्थान्तरेणैवोपपन्नत्वान्न तद्व्यतिरिक्तस्य कल्पनमित्यर्थः । पिण्डत्वकपालत्वे घटस्य प्राक्प्रध्वंसाभावौ घटत्वमेव पटादन्योन्याभावः, कालविशेषविशिष्टदेशविशेषत्वं संसर्गाभावः, यथा मध्याह्नविशेषितप्राङ्गणत्वं, यद्वा घटस्याल्पत्वविशेषितदेशान्तरसंसर्गपिण्डत्वकपालत्वेष्वन्यतमस्तद्देशापेक्षया संसर्गा-

भावः, उत्तरसूत्रद्वयकृत्यमाह "इदानीमि"ति, निदर्शनत्वेन वक्ष्यमाणस्य पटादेरपि विप्रतिपन्नत्वात् न दृष्टान्तत्वमुपपद्यत इति शङ्काव्युदासार्थम् इदानीमित्युक्तं, पूर्वसूत्रैरनन्यत्वे साधिते सतीत्यर्थः, निदर्शनद्वयमिति लौकिकं वैदिकमिति निदर्शनयोर्विभागः बहूनामेकावस्थत्वे एकस्य बहुत्वावस्थत्वे च दृष्टान्त इति वा विभागः ॥

सू० पटवच्च ॥ १९ ॥

भा० तथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपकार्यान्तरादिकं भजन्ते तद्वद् ब्रह्मापि

टी० सू० पटवच्च, इह बहूनामेकावस्थत्वे लौकिकदृष्टान्त उक्तः व्यतिषङ्गो—मिथः संसर्गः । ननु तन्तुबहुत्वाप्रहाणेन पटैत्वदर्शनात् द्रव्यभेदाभावाच्च एकस्मिन् एव द्रव्ये युगपद्बहुत्वैकत्वे वर्तते इति भिन्नाभिन्नत्वमभ्युपगतं स्यात् उच्यते— दूष्यभिन्नाभिन्नत्वाविवेकनिबन्धनमिदं परिचोदनं, न हि भिन्नाभिन्नशब्दवाच्यं सर्वं दूष्यमपि तु यत्र भावाभावविरोधः तदेव भिन्नाभिन्नत्वं दूष्यं तच्च धर्मधर्मिणोर्धर्मिद्वयस्य च मिथस्तादात्म्यतदभावलक्षणं यथा जातिर्व्यक्तिर्भवति न भवति चेति यथा खण्डो मुण्डो भवति न भवति चेति, न चैवं तन्तुपटेषु भावाभावविरोधः तन्तुभ्यः पटो ह्यभिन्न एवावगतः न तु भिन्नः तन्तवश्च मिथो भिन्ना एवाभ्युपगताः, न त्वभिन्नाः तेषां च पटादभिन्नत्वं नाम तस्य परस्परसंसृष्टेभ्यस्तेभ्योऽनन्यत्वं, न च तेषामन्योन्याभेदः, यद्यभेदो नाम एकस्य तन्तोस्तन्त्वन्तरानतिरेकः तर्हि द्वितीयतन्त्वनुपलम्भप्रसङ्गः परिमाणाधिक्यं च न स्यात् यदि संसर्ग एवाभेदः नास्ति विवादः स्याद्यद्येकत्वं सङ्ख्योत्पत्तिः सा तर्हीष्टा, पटत्वावस्थाप्राप्तावेव एकत्वोत्पत्त्यभ्युपगमात् तर्हि भेदाभेदाभ्युपगम इति चेन्न तस्य भेदप्रतिक्षेपकत्वाभावात्, यथा विशिष्टे वस्तुनि विशेष्यैक्यं न विशेषणभेदप्रतिक्षेपकं तद्वत् कथं तन्तुत्यत्वमुच्यते तन्तुषु तन्तुत्वस्येव पटत्वस्य प्रत्येकतन्तुपरिसमाप्तत्वाभावात् कृत्स्नतन्तुवृत्तिना पटत्वेन तन्तव एककार्यतां भजन्ते, पृथगवस्थान-

Digitized by Google

"भाववचनाश्च" ॥ वक्तीति वचनः, कृत्यल्युटो बहुलमिति कर्त्तरि ल्युट् करणएव वा, भाव उच्यते येन स भाववचनः, अत्र पुरुषाः कर्त्तारः, भावाधिकारविहिता एव भाववचना भवन्तीत्याह । 'भावइति प्रकृत्येति'। 'तुमुना बाद्धेरचिति'। ल्युट् तु भावकर्मकर्तृषु त्रिषु विधानादसमानार्थः, किं च धात्वर्थस्य सिद्धतायां घञादयः शुद्धे तु धात्वर्थे लकारोतोप्यसमानार्थत्वम् । इह भावइत्येतावदुक्तव्यम्, एवमपि ह्युच्यमाने भावे ये विहितास्ते क्रियायां क्रियार्थायामुपपदे भवन्तीत्यर्थो लभ्यतएव तदुपार्थकं वचनग्रहणमिति मत्वा पृच्छति । 'अथेति'। 'वाचका यथा स्युरिति'। वचनग्रहणे हि सति भाववचनाः सन्तो घञादयोस्मिन्विषये भवन्तीत्यर्थो भवति, भावस्य वाचकाः सन्तो भवन्तीत्यर्थः, एतदेव प्रश्नपूर्वकं विवृणोति । 'कथं चेति' 'याभ्यः प्रकृतिभ्य इति'। इवर्णान्तेभ्योच् ऋवर्णान्तेभ्य उवर्णान्तेभ्यश्चाबिति । एवं 'येन विशेषणेनेति'। हस्तादाने चेरस्तेये श्रिणीभुवोनुपसर्गइत्यादिना । असामञ्जस्यं व्यतिकरः, अन्योन्यविषयावगाहनमिति यावत् । पाकायेत्यादौ तुमर्थाच्च भाववचनादिति चतुर्थी ॥

"अण् कर्मणि च" ॥ 'चकारः सन्नियोगार्थ इति'। अन्यथा पर्यायेण स्यात् कदाचित्क्रियार्थायामेव क्रियायामुपपदे कदाचित्कर्मण्येव केवले, वचनं तु भविष्यति काले कादीनामपवादानां बाधनार्थं स्यात्, चकारात्तु सन्नियोगार्थात्समुदायस्यैव प्रत्ययोत्पत्तिं प्रति निमित्तत्व,मुपपदसंज्ञा तु प्रत्येकमेव भवति प्रत्येकं सप्तमीनिर्द्देशात्, तेन केवलस्यापि कर्मणः समासो भवति । 'काण्डलावो व्रजतीति'। 'सोपवादत्वात् ण्वुलं बाधतइति'। ण्वुल्विधाने च क्रियायां क्रियार्थायामुपपदे वासरूपेण तृजादयो न भवन्तीति ज्ञापितं न पुनरस्मिन् प्रकरणे वासरूपविधिर्नास्तीति तेन योयं तुमुन्ण्वुलाविति ण्वुल् सोस्याणो विषयेपि वासरूपविधिना भवत्येव एधानाहारको व्रजतीति, तथा चाकेनोर्भविष्यदाधमर्ण्ययोरिति भविष्यदधिकारविहितस्याकस्य भविष्यति प्रयोगे कर्मणि षष्ठी प्रतिषिद्ध्यते । 'परत्वाच्च कादीनिति'। ननु चापूर्वविधानात्प्रतिप्रसववचनस्य लाघवम-

Digitized by Google

स्मीति अणविषयएव णवुलं बाधित्वाण स्याचापवादविषये, एवं मन्यते। इह कर्मणीति न वक्तव्यं वचनग्रहणानुवृत्तेरेव यो वचने ऽण सोस्मिन्विषये भवतीति वचनव्यक्त्या कर्मण्येवोपपदेण सिद्धः, तत्र पुनः कर्मग्रहणं कर्ममात्रपरिग्रहार्थमित्यपवादविषयेपि भवतीति, एवं च परत्वादिति कोर्थः उत्कृष्टत्वादाधिक्यादित्यर्थः। अन्ये तु विप्रतिषेधमेव व्याचक्षते॥

"लृट् शेषे च"॥ 'शेषः क्रियार्थोपपदादन्य उच्यतइति'। क्रिया क्रियार्थोपपदं यस्मिन् भविष्यति काले ततोन्यो भविष्यन्नित्यर्थः। 'चकारादिति'। यदि तर्हि शेषे चाशेषे च भवति लृडित्येवास्तु क्रियायां क्रियार्थायामिति निवर्त्तिष्यते तेन सर्वत्र भविष्यति, एवमपि शेषएव स्यादशेषे तु तुमुन्ण्वुलौ बाधकौ स्यातां वासरूपविधिना लृडपि भविष्यति तदेतच्छेषे चेति वचनं चिन्त्यप्रयोजनम्। 'करिष्यामीति व्रजतीति'। इतिशब्दः परस्परसम्बन्धज्ञापनार्थः॥

"लृटः सद्वा"॥ लृट इति वचनं स्थानिनिर्द्देशार्थम्। अन्यथा सत्संज्ञकौ प्रत्ययौ स्वतन्त्रौ स्यातां न त्वादेशौ। 'अप्रथमासमानाधिकरणादिष्विति'। आदिशब्देन सम्बोधने च लक्षणहेत्वोः क्रियाया इत्यस्मिन्विषये तथा प्रत्ययोत्तरपदयोश्च करिष्यतापत्यं कारिष्यतः कारिष्यमाणिः करिष्यतोभक्तिः करिष्यद्भक्तिः करिष्यमाणभक्तिः करिष्यन्ती भक्तिरस्य करिष्यद्भक्तिः करिष्यमाणा भक्तिरस्य करिष्यमाणभक्तिः करिष्यत्तरः करिष्यमाणतरः करिष्यमाणतमः करिष्यद्रूपः करिष्यमाणरूपः करिष्यत्कल्पः करिष्यमाणकल्पः, कथं श्वोग्नीनाधास्यमानेनेत्यनद्यतने शतृशानचौ भवतः, उक्तोत्र परिहारो व्यत्ययो बहुलमिति कालव्यत्ययेन लृट्, अथ वोत्तरत्रानद्यतनइति योगविभागः लृटः सद्वेत्येव अनद्यतने यो लृट् तस्यापि सत्संज्ञकौ भवतः, केन पुनरनद्यतने लृट् भवति एतदेव ज्ञापयति भवत्यनद्यतने लृडिति यदयमनद्यतने लृटः सत्संज्ञकौ शास्ति॥

"अनद्यतने लुट्"॥ 'अनद्यतनइति बहुव्रीहिनिर्द्देश इति'। अनद्यतने लङित्यत्रैवैतद्व्याख्यातं तत एवावधार्यम्। 'परिदेवनइति'।

Digitized by Google

परिदेवनमनुशोचनम् । 'श्वस्तीनीति' । लुटः पूर्वाचार्यसंज्ञा । 'भविष्यत्यर्थेइति' । भविष्यन्तीति लृटः संज्ञा तस्या अर्थे भविष्यत्सामान्यइत्यर्थः । भविष्यदर्थेइति वा पाठः, भविष्यत्सामान्यरूपेर्थेइत्यर्थः । 'यैवमिति' । विलम्बितम् । अनभियुक्तः परिचयरहितः ॥

"पदरुजविशस्पृशो घञ्" ॥ 'पद्यतेसाविति' । करणस्यात्र कर्तृत्वेन विवक्षा पद्मित्येतत्तु खनो घ चेत्यत्र साधयिष्यते । 'रोग इति' । चजोः कु घिण्ण्यतोरिति कुत्वम् । 'स्पृश उपतापइति' । उपतापो रोगः ॥

"सृ स्थिरे" ॥ सृ इत्यविभक्तिको निर्द्देशः । 'सर्त्तेरिति' । सृ गतौ च सृ गताविति द्वयोरपि ग्रहणम् । 'स्थिरे कर्त्तरीति' । एतेन स्थिरग्रहणं प्रत्ययार्थस्य कर्त्तुर्विशेषणं नोपपदमिति दर्शयति, एतच्चार्द्धर्चादिषु सारशब्दपाठाद्विज्ञायते । ननु स्थिरशब्दस्तिष्ठतेर्गतिनिवृत्तिवाचिन उणादिषु किरच्प्रत्ययान्तो निपातितः सर्त्तिस्तु गतिवचनः तत्कथं सरणस्य स्थिरकर्त्ता युज्यतइत्याह । 'स्थिर इति कालान्तरस्थायीत्यादि' । यतः कालान्तरगमनं सम्भवति ततश्च सर्त्तेर्द्धातोरर्थस्य कर्त्ता युज्यतइत्यर्थः । तिष्ठचिति च हेतौ शतृप्रत्ययः । 'खदिरसार इति' । खदिरास्थि तत् दृढत्वात् स्थिरम् । 'अतीसारो व्याधिरिति' । शरीरान्तरावस्थितं रुधिरादिद्रव्यमतिशयेन सारयतीति कृत्वा, अन्तर्भावितण्यर्थोत्र सरतिः । 'उपसर्गस्य घञ्यमनुष्ये बहुल' मिति दीर्घः । 'विसारो मत्स्यइति' । विविधं सरतीति कृत्वा । 'सारो बलमिति' । सारयति चेष्टयतीति कृत्वा, अत्राप्यन्तर्भावितण्यर्थः सरतिः, बलवान्हि चेष्टते, सारशब्द उत्कर्षे पुल्लिङ्गो न्यायादनपेते नपुंसकलिङ्ग इति च दृश्यते ॥

"भावे" ॥

नित्यानामेव शब्दानां साङ्कर्यस्य निवृत्तये ।
अन्वाख्यानाद्भावशब्दे घञि नान्योन्यसंश्रयः ॥

'राग इति' । रञ्जेश्च घञि च भावकरणयोरिति नलोपः, कथं पुनः पाकादिरुदाहरणं भवति यावता भवतिनार्थनिर्द्देशः क्रियमाणोऽस्तिभवतिविद्यतिविषय एव कृतो भवति न पचादिविषयस्तत्राह ।

'क्रियासामान्यवाची भवतिरिति'। सत्ताख्यं सामान्यमपि भवतिना साध्यत्वेनाभिधीयतइति क्रियासामान्यवाची भवतिर्भवति। 'तेनार्थनिर्द्देशः क्रियमाण इति'। हेतौ शानच्, यस्मात्सामान्यवाचिनार्थनिर्द्देशः क्रियते न विशेषवाचिना पचादिना तस्मात्सर्वधातुविषयः कृतो भवति सामान्यस्य सर्वेष्वेव विशेषेषु भावात् षण्डादिषु गोत्ववत् विशेषरूपाश्रयनिषेधस्याभावाच्च, इह भावो धात्वर्थः स च पूर्वापरीभूतोऽपरिनिष्पन्नः, तस्य घञ्वाच्यस्य कथं लिङ्गसङ्ख्यायोग इत्याह। 'धात्वर्थश्चेति'। यथा पचति पाचक इत्यादौ प्रकृतिभागेन क्रियोच्यते प्रत्ययभागेन तु तदीयं साधनं तथा पाकादिषु प्रकृतिभागः साध्यरूपमर्थमाह प्रत्ययभागस्तु तस्यैव सिद्धरूपतां द्रव्यधर्मैर्लिङ्गसङ्ख्याकारकशक्तिभिः सम्बन्धयोग्यमाकारमाहेत्यर्थः। उक्तं च

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥
साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सत्त्वभावस्तु यस्तस्याः स घञादिनिबन्धनः॥

इति बहुवक्तव्योऽयमर्थः, इह भावइति पुंल्लिङ्गेनायं निर्द्देशः क्रियते एकवचनेन च तत्र पुंल्लिङ्गएव भावे एकवचनएव च प्रत्ययाः स्युर्न लिङ्गान्तरे न च सङ्ख्यान्तरे ततश्च स्त्रियां क्तिचित्यत्र स्त्रियां भावइति सामानाधिकरण्येन संबन्धासम्भवात् स्त्रियामकर्त्तरि कारके क्तिन् प्रत्ययः स्यात् भावे तु पुंसीव नपुंसके भावे क्त इत्यत्राकर्त्तरि च कारकइत्यस्य निवृत्तत्वान्नपुंसके कर्त्तरि क्तः स्याद्भावे तु पुंसि द्वित्वबहुत्वयोश्च पाकौ पाका इत्यादौ प्रत्यया न स्युरित्यत आह। 'पुंल्लिङ्गमेकवचनं चातन्त्रमिति'।

न विना लिङ्गसङ्ख्याभ्यां सत्त्वभूतोऽर्थ उच्यते।
इत्यतन्त्रमुपादानं तयोर्न तु विवक्षितम्॥
धान्यार्थिनामुपादानं पलालादेर्यथा मतम्।
शब्दसंस्कारमात्रं तु तन्निर्द्देशप्रयोजनम्॥

"अकर्तरि च कारके सञ्ज्ञायाम्"॥ प्रासः कुन्तः प्रसेवः सूच्या प्रसेवनेन निष्पाद्य आवपनविशेषः। 'मधुराहार इति'। कर्मधारयः षष्ठी-

समासो वा । 'मेष इति' । पचादिषु पाठमनपेक्ष्यैतदुदाहृतं तथा चेगुपधज्ञेत्यत्रोक्तं देवसेवमेषादयः पचादिषु द्रष्टव्या इति नहि पाठे सति द्रष्टव्यत्ववचनमुपपद्यते, अथ वा प्रत्युदाहरणादिगियं दर्शिता इदं तु प्रत्युदाहरणं विभक्त्यसौ भवतीति । 'चकार इत्यादि' । चकारोयं भिन्नक्रमः संज्ञायां चेति तेनासंज्ञायामपि घञ् भवति, यद्येवं मा भूत्संज्ञायामिति मा च भूच्चकारोऽकर्तरि कारकइत्येवास्तु, सत्यम् । बाहुल्येन संज्ञायां भवति क्व चिदेवासंज्ञायामिति सूचयितुं संज्ञाग्रहणं कृतम् । 'दाय इति'। दीयमानं सर्वमुच्यतइति नेयं संज्ञा, एवं लाभ इत्यत्रापि, उभयत्र कर्मणि घञ्। 'कारकग्रहणमित्यादि'। पर्युदासे हि नञिवयुक्तन्यायेन कर्तुरन्यस्मिंस्तत्सदृशे कारकएव प्रतीतिर्भवति यथाऽब्राह्मण इति क्षत्रियादौ तस्मात्पर्युदासे कारकग्रहणं न कर्तव्यं प्रसज्यप्रतिषेधे तु वाक्यभेदेन संज्ञायां घञ् भवति कर्तरि तु न भवतीत्येषोर्थो भवति तत्र प्रथमे वाक्येर्थनिर्देशाभावादनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वार्थएव स्यात् । ननु च विहितः स्वार्थे पूर्वेणैव, नेत्याह, धात्वर्थस्य हि सिद्धताख्ये धर्मे घञादयो भवन्तीत्युक्तमिह तु साध्यरूपे शुद्धे प्रकृत्यर्थे स्यात्, ननु च कर्तरि प्रतिषेधसामर्थ्यादनिर्दिष्टार्थोपि घञ् धात्वर्थसम्बन्धिनि कारकएव विज्ञास्यते, नैतदस्ति, असति हि प्रतिषेधे कर्तरि कृदिति वचनान्नायमनिर्दिष्टार्थः स्याद् अतः प्रसज्यप्रतिषेधार्थं कारकग्रहणं पर्युदासे तु न कर्तव्यं, यद्येवं स एवाश्रयिष्यते किं कारकग्रहणेन तत्राह । 'तत्क्रियतइति'। किं पुनः कारणं प्रसज्यप्रतिषेधे प्रयत्नलभ्यः समासः, असामर्थ्यात्तत्र हि नञः क्रियया सम्बन्धः, कर्तरि न भवतीति न कर्तृशब्देन । 'आदेच उपदेशेऽशितीति'। अत्र यद्यशितीति पर्युदासः स्यात् तदा शितोन्यत्र तृजादौ प्रत्यये परत आत्वेन भवितव्यं ततश्च सुग्लः सुम्न इत्यत्रातश्चोपसर्गे इति को न स्यात् प्राक् प्रत्ययोत्पत्तेरनाकारान्तत्वात् प्रतिषेधे त्वनैमित्तिकमात्वं शिति तु प्रतिषेध इति सिद्धमिष्टम् ॥

"परिमाणाख्यायां सर्वेभ्यः" ॥ 'परिमाणाख्यायामिति'। भावसाधनः परिमाणशब्दः, आख्यानमाख्या उक्तिः, परिच्छित्तेरुक्तौ सत्याम-

त्यर्थः, कस्य पुनः परिच्छित्तिः प्रत्ययार्थस्य भावस्य कर्तृवर्जितस्य कारकस्य च, परिमाणाख्यायां गम्यमानायामिति वृत्तेरप्ययमेवार्थः, । तण्डुलनिचाय इति' । निचीयते राशीक्रियतइति निचायो राशिः तण्डुलानां निचाय इति षष्ठीसमासः, अत्र राश्यैकत्वेन परिच्छित्तिर्गम्यते अत्रेरचि प्राप्ते घञ्, प्रायेण तु निश्चाय इति पाठस्तत्राप्यर्थः स एव, ग्रहवृदृनिश्चिगमश्चेत्यपि प्राप्ते घञ् । 'शूर्पनिष्पावाविति' । निष्पूयते शोध्यते तुषाद्यपनयनेन यस्तण्डुलादिः शूर्पेण निष्पावः शूर्पनिष्पाव इति कर्तृकरणे कृता बहुलमिति समासः, अत्र शूर्पसङ्ख्यया परिच्छित्तिः, यद्यप्यत्र निरभ्योः पूल्वोरिति घञ् सिद्ध्यति तथापि सर्वापवादार्थसर्वग्रहणोपादानादनेनैव घञ् भवतुमर्हतीत्यस्योपन्यासः।'काराविति'। कृ विक्षेपे कर्मणि घञ्, विक्षिप्तो धान्यादिः कारः, अत्रापि सङ्ख्यया परिच्छित्तिः, ननु च धातोरिति सामान्याधिकारादन्तरेणापि सर्वग्रहणं धातुमात्राद् घञ् भविष्यति नार्थः सर्वग्रहणेन तत्राह। 'सर्वग्रहणमिति'। किं पुनः कारणमपो बाधनं यत्नसाध्यमित्यत आह। 'पुरस्तादिति' 'निश्चय इति'। अत्र न केन चिदियत्ता गम्यते, ननु च परिमाणशब्दस्य प्रस्थादिषु रूढत्वात्प्रस्थस्तण्डुलनिश्चाय इत्यादावेव युक्तं भवितुं न तु द्वौ शूर्पनिष्पावावित्यत्रेत्यत आह । 'आख्याग्रहणं रूढिनिरासार्थमिति' । प्रस्थादिषु जिघृक्षितेषु परिमाणइत्येव वक्तव्यं किमाख्याग्रहणेन, आख्याग्रहणात्तु मात्रचो लोपो विज्ञायते परिमाणमात्रस्याख्यायामुक्तौ सत्यामिति तेन परिमाणशब्दः क्रियाशब्द उपजायते परिमितिः परिमाणं परिच्छित्तिरिति सङ्ख्ययापि परिच्छित्तिर्भवति, एवञ्चोन्मानादावपि यथाभिधानं घञ् भवति, यदि तर्हि सर्वग्रहणात्परमप्ययं घञपं बाधते स्त्रीप्रत्ययानपि बाधेत तत्राह । 'घञनुक्रमणमजपोर्विषय इति' । एतच्च सर्वेभ्य इति पञ्चमीनिर्देशाल्लभ्यते पञ्चम्यन्तो हि सर्वशब्दो धातुशब्देन समानाधिकरणो भवति तेन प्रकृत्याश्रय एवापवादो बाध्यते नार्थाश्रयः।'तिलोच्छित्तिरिति'। कर्मणि भावे वा क्तिन्, उर्ध्वीकृतो राशिः । 'णिलुक्चेति'। णिलोपे सति तस्य स्थानिवद्भावाद् घञाश्रया वृद्धिर्न स्यादिति लुग्विधीयते तस्य परनिमित्तकत्वात्क्लिलुगुपधात्वे।

Digitized by Google

प्रतिषेधाद्वा स्थानिवत्त्वाभावाज्जारशब्दः सिद्ध्यति। 'जरयन्तीति'। जनीजृष्क्नसुरञ्जोऽमन्ताश्चेति मित्त्वाद् ह्रस्वत्वं, जारः प्रच्छन्नपतिः॥

"इङश्च"॥ 'उपाध्याय इति'। उपेत्यस्मादधीयतइति अपादाने घञ् अध्याय इत्यत्र कर्मणि घञ्। 'अपादाने स्त्रियामिति'। घञनुक्रमणमजपोर्विषयइति वचनात् स्त्रियामप्राप्तो घञ् विधीयते। 'उपाध्याया उपाध्यायीति'। या स्वयमध्यापयति तस्यामेतद्रूपं पुंयोगेतु नित्यमेव ङीष् भवति, अत्र चोपाध्यायमातुलाभ्यां वेति वचनात्पक्षे आनुगागमः, उपाध्यायी उपाध्यायानी। 'शृवायुवर्णनिवृत्तेष्विति'। शृइत्यविभक्तिको निर्द्देशः। 'शारो वायुरिति'। करणे घञ्। 'शारो वर्ण इति'। चित्रीकरणमत्र धात्वर्थः, चित्रीक्रियते ऽनेनाश्रय इति, अत्रापि करणे घञ्, वर्णान्तरसंपृक्तश्चेद् वर्णः शारः, निव्रियते आव्रियतेनेन शरीरमिति निवृतमावरणमुच्यते कृत्यल्युटो बहुलमिति करणे क्तः। 'नीशार इति'। 'पूर्ववद्दीर्घः'। 'अक्कतनीशार इति'। अक्कतप्रावरण इत्यर्थः। प्रदक्षिणप्रसव्यगामिनां शाराणामिति वार्त्तिककारप्रयोगादक्षेष्वपि शार इति भवति॥

"समि युद्रुदुवः"॥ संयावः पिष्टविकारोऽपूपविशेषः सम्यूयते मिश्रीक्रियते गुडक्षीरकादिभिरिति कृत्वा॥

"अवोदोर्नियः"॥ अधो नयनमवनायः ऊर्ध्वं नयनमुन्नायः, उन्नयस्तूत्प्रेक्षा॥

"निरभ्योः पूल्वोः"॥ निष्पावः कोशी धान्यविशेषः निष्पूयते शूर्पादिभिरिति कृत्वा॥

"उन्न्योर्ग्रः"॥ उद्गारोतिप्रवृद्धः शब्दः, निगारो भक्षणम्॥

"कॄ धान्ये"॥ धान्यमिह प्रकृत्यर्थो वा स्यात्प्रत्ययार्थस्य वा कारकस्योपाधिः, प्रकृत्यर्थस्तावन्नोपपद्यते धान्यस्य द्रव्यत्वात् धातोश्च क्रियावाचित्वात् प्रत्ययार्थोपाधित्वे तु प्रत्ययेनाभिहितत्वादुत्कारो धान्यस्येति धान्यशब्दस्य प्रयोगो न प्राप्नोति, अथापि विस्पष्टप्रतिपत्त्यर्थं प्रयोगः स्यादेवमपि प्रत्ययार्थेन्तर्भूतत्वाद्धान्ये षष्ठी न स्यात्, इतिहरिः पशुरि-

तिवत्सामानाधिकरण्यमेव तु स्यात् तस्मान्नायं प्रत्ययार्थस्योपाधिः नापि प्रकृत्यर्थः किं तु प्रत्ययार्थस्य विषयत्वेन विशेषणमित्याह। 'धान्यविषय- श्चेदिति'। उपपदत्वमपि न भवति व्याख्यानात्। 'अनभिधानादिति'। शब्दशक्तिस्वाभाव्यात्। उत्कारनिकारशब्दाभ्यां धान्यविषयो विक्षेप एवा- भिधीयते न हिंसा सापि धान्यस्य कीदृशीति चिन्त्यम्॥

"यज्ञे समि स्तुवः"॥ 'समेत्य स्तुवन्ति यस्मिन्देशइति'। अधिकरणे ल्युटोपवादो घञिति दर्शयति। संस्तवः परिचयः॥

"प्रे स्त्रो ऽयज्ञे"॥ यज्ञइति प्रकृतत्वादयज्ञइति पदच्छेदः शङ्खा- दिषु प्रस्तारो विस्तारः, बर्हिष्प्रस्तर इति प्रस्तरो मुष्टिविशेषः बर्हिर्विकारः प्रस्तरो बर्हिष्प्रस्तरः ऋदोरबित्यप्, इदुदुपधस्य चेति षत्वम्॥

"प्रथने वावशब्दे"॥ विस्तारस्तिर्यगायतिः॥

"छन्दोनाम्नि च"॥ अक्षराणामियत्ताविशिष्टो विन्यासविशेषो वृत्तम्। 'यस्य गायत्र्यादय इति'। प्रसिद्धत्वादेवमुक्तम्। 'न मन्त्र- ब्राह्मणमिति'। बहुलं छन्दसीत्यादौ, यद्यपि तेषामेव ग्रहणं प्रसिद्धं तथा- पीह तेषां ग्रहणं न भवति कुत इत्याह। 'नामग्रहणादिति'। 'विष्टारप- ङ्क्तिरिति'। विस्तीर्यन्तेस्मिन्नक्षराणीत्यधिकरणे घञ्, ततः कर्मधारयः, छ- न्दोनाम्नि चेति षत्वं, यद्यप्यत्र प्रथनं गम्यते तथापि शब्दविषयत्वात्पूर्वेण न सिद्ध्यति। के चित्तु वाविति नानुवर्त्तयन्ति तेन प्रस्तारपङ्क्तिरास्तारपङ्क्तिः संस्तारपङ्क्तिरित्यपि भवतीत्याहुः। कर्मण्यग्न्याख्यायामित्यादौ यथा प्रत्य- यान्तश्चेदाख्या भवतीत्ययमर्थो भवति एवमिहापि प्रत्ययान्तश्चेच्छन्दो- नाम भवतीत्यर्थः स्याद् इति शङ्कमानं प्रत्याह। 'विष्टारपङ्क्तिशब्दोत्र छन्दो- नामेति'। 'अवयवत्वेन वर्त्ततइति'। घञन्तशब्दरूपमित्यनुषङ्गः, क्व चित्तु तद्वर्त्ततइति तच्छब्दः पठ्यते तत्र नानुषङ्गः, कथं तर्हि छन्दोनाम्नी- त्यस्य निर्वाह इत्याह। 'छन्दोनाम्नीत्यधिकरणसप्तम्येषेति'। प्रत्ययान्त- स्याधिकरणं छन्दोनाम अवयवाश्चावयविनि वर्त्तन्तइति लौकिका मन्यन्ते तेन न का चिदनुपपत्तिरिति भावः॥

"उदि ग्रहः" ॥ 'अपवाद इति'। ग्रहवृदृनिश्चिगमश्चेति प्राप्तस्य । 'छन्दसि नीत्यादि'। अवयवसन्निवेशविशिष्टा यज्ञपात्रविशेषाः स्रुच इह तु जुहूपभृतोर्ग्रहणम् । 'उद्ग्राभं चेति जुहूमुद्गच्छति निग्राभं चेत्युपभृतं नियच्छतीति वचनात्, हृग्रहोर्भश्छन्दसीति भत्वम् ॥

"समि मुष्टौ" ॥ 'मुष्टिविषयश्चेद्धात्वर्थो भवतीति'। क्व धान्यइत्यत्र धान्यविषयश्चेद्धात्वर्थो भवतीति एतदनुसारेणायं ग्रन्थो योज्यः, मुष्टिशब्दोयमस्त्येव परिमाणे चतुरो मुष्टीन्निर्वपतीति, अङ्गुलीनां रचनाविशेषवचनोप्यस्ति मुष्टिना हन्तीति तत्र पूर्वस्य ग्रहणे परिमाणाख्यायामित्येव सिद्धत्वाद् द्वितीयस्य ग्रहणमित्याह । 'मुष्टिरङ्गुलिसन्निवेश इति'। अहोशब्द आश्चर्ये मुष्टौ कुशलो मुष्टिक आकर्षादिपाठात्कन् ॥

"परिन्योर्नीणोर्द्यूताभ्रेषयोः" ॥ अक्षादिभिः क्रीडनं द्यूतं भ्रेष चलने भ्रेषणं भ्रेषः चलनमभ्रेषो ऽचलनम् । 'भ्रेषविषयश्चेदिति'। अयमपि ग्रन्थः पूर्वानुसारेण योज्यः। 'अनपचार इति'। कुत्सितश्चारोपचारः तस्मादन्यः प्रशस्तः चारोनपचार एतदेव स्पष्टयति । 'यथाप्राप्तस्येति'। यथा येन प्रकारेण प्राप्तिर्यस्येति बहुव्रीहिः, अव्ययीभावे त्वम्भावः प्राप्नोति, क्वचित्तु यथाप्रकरणमिति पठ्यते । 'परिणायेनेनेति'। उपसर्गादसमासेपीति णत्वम् । हन्तीति बाधते । 'समन्तान्नयनेनेति'। परिणायेनेत्यस्येदमर्थकथनम् । 'एषोत्र न्याय इति'। एतदत्र यथाप्राप्तमित्यर्थः । परिणयो विवाहः, न्याये नाशः ॥

"परावनुपात्ययइणः" ॥ इह द्विः परिग्रहणं द्विश्चेण्ग्रहणं क्रियते सकृदेव तु कर्त्तव्यम् एवं वक्ष्यामि परौ नियो द्यूते इणोनुपात्यये नावभ्रेषइति, सत्यं तथा तु न कृतमित्येव ॥

"व्युपयोः शेतेः पर्याये" ॥ पूर्वसूत्रेणानुपात्यये पर्यायशब्दो व्युत्पादितः, ततश्चानुपात्ययइत्यधिकारेणैव सिद्धे पर्यायग्रहणं पुनर्विधानार्थं तेनाभिविधिविवक्षायां परमपीनुणं बाधित्वायमेव घञ् भवति । 'राजानमुपशयितुं पर्याय इत्यर्थ इति'। कालसमयवेलासु तुमुन्नित्यत्र

Digitized by Google

कालेत्यर्थग्रहणं पर्यायोपादनं तु प्रपञ्चार्थं यथा निमित्तकारणहेतुषु सर्वा- सां प्रायदर्शनमिति तेन पर्यायशब्दयोगेपि तुमुन् भवति तथा चावसरो भोक्तुम् अवकाशोभोक्तुमित्यादावपि दृश्यते । विशयः संशयः, उपशयः समीपशयनम् ॥

"हस्तादाने चेरस्तेये" ॥ 'हस्तादानग्रहणेनेत्यादि' । यत्रोपा- यान्तरनिरपेक्षेण हस्तेनैवादेयमादीयते तत्रावश्यमादेयस्य ग्राह्यस्य प्रत्या- सत्तिर्भवति अतः साहचर्यं लक्षणाहेतुः । 'वृक्षशिखर इति' । वृक्षाग्रे यानि फलानि तेषां यष्ट्यादिना प्रचयं करोतीत्यर्थः, यद्वारुह्य हस्तेनादानेप्यादे- यस्य प्रत्यासत्त्यभावाद् घञभावः ॥

"निवासचितिशरीरोपसमाधानेष्वादेश्च कः" ॥ 'एतेष्वर्थेष्वि- ति' । अत्रोपसमाधानं धात्वर्थोऽन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः । 'चिखल्लिनिकाय इति' । चिखल्लिर्जनपदविशेषः, तत्सम्बन्धी ग्रामादि- र्निवासदेश इत्यर्थः । 'आकायमिति' । आचीयतेस्मिन्निष्टका इत्यधिकरणे घञ् । 'काय इति' । चीयन्ते स्मिन्नस्थ्यादीनि अधिकरणएव घञ् । 'गोमयनिकाय इति' । प्रकीर्णानां गोमयानामेकत्र राशीकरणमित्यर्थः । 'बहुत्वमत्र गम्यतइति' । तत्रतत्र विक्षिप्तानामेव काष्ठानामित्यर्थः । चः क इति वक्तव्ये आदेरिति वचनं यङ्लुगन्तेप्यादेरेव यथा स्यादनन्त्य- स्याभ्यासस्य चोभयोर्मा भूदिति गोमयानां निकेचायः गोमयानां पुनः पुना राशीकरणमित्यर्थः ॥

"सङ्घे चानौत्तराधर्ये" ॥ 'प्राणिनां समुदायः सङ्घ इति' । सङ्घो- द्घौ गणप्रशंसयोरिति गणमात्रे निपातितोपि सङ्घशब्दः प्राणिनामेव समुदाये रूढ इति भावः । 'एकधर्मसमावेशेनेति' । एकधर्मानुगतः । 'औत्तराधर्येणेति' । उत्तरे चाधरे चोत्तराधराः तेषां भाव औत्तराधर्यम् । 'सूकरनिचय इति' । स्तनपानाय यदोत्तराधरभावेन शेरते तदेदं प्रत्यु- दाहरणं यदा तु भिक्षुवत्पृथक्पृथगेव तिष्ठन्ति तदेदमुदाहरणमेव भवति ॥

"कर्मव्यतिहारे णच् स्त्रियाम्" ॥ धातुरिति वर्तते तस्य विशेषणं कर्मव्यतिहारग्रहणं कर्मव्यतिहारे वर्तमानादित्यर्थः, धातोश्च क्रियावा-

चित्वं न तस्य साधनकर्मव्यतिहारे वृत्तिः सम्भवति अतो लौकिकस्य क्रियाकर्मणो ग्रहणमित्याह । 'कर्मव्यतिहारः क्रियाव्यतिहार इति' । 'स्त्रीलिङ्गे' 'भावइति '। कर्तृवर्जिते तु कारके न स भवति अनभिधानादिति भावः। 'चकारो विशेषणार्थ इति' । न स्वरार्थः, प्रत्ययस्वरेणैव सिद्धत्वात्, अस्य चाकारो न क्वापि श्रूयते णजन्ताच्च नित्यमञ् विधीयते तत्र सति शिष्टत्वाञ्जित्स्वरेणैव भवितव्यं, णचः स्त्रियामित्यत्र णास्त्रियामित्युच्यमाने ज्वलितिकसन्तेभ्यो ण इत्यस्यापि ग्रहणं स्यात् । 'व्यावक्रोशीत्यादि' । क्रुश आह्वाने लिख अक्षरविन्यासे हसे हसने णजन्तादञ् स च कृद्ग्रहणपरिभाषया सोपसर्गादपि भवति, तद्धितत्वादादिवृद्धिः, न य्वाभ्यामित्ययं तु विधिर्न भवति न कर्मव्यतिहारइतिप्रतिषेधात्, स्त्रियां क्तिन्नित्यत्र प्रकरणएतच्चोक्तं वासरूपविधिर्यथा स्यात्तेन व्यावक्रुष्टिरिति क्तिन्नपि भवति, व्यावचोरीत्यत्र ण्यासश्रन्थो युजिति युच् प्राप्नोति क्तिनोऽपवादः तथाऽयमपि णच् येन नाप्राप्तिन्यायेन क्तिन एवापवादस्तत्रापवादविप्रतिषेधाद्युचि प्राप्तेऽयमेव णजिष्यते । 'व्यतीक्षा व्यतीहेति' । अत्र क्तिनपवादो गुरोश्च हल इत्यकार एवेष्यते । 'व्यात्युक्षीति' । उक्ष सेचने अत्राकारविषयेप्ययमेवेष्यते । 'तदेतद्वैचित्र्यं कथं भवतीति' । न कथं चिदिति भावः । 'कृत्यल्युटो बहुलमिति' । एवंविधं वैचित्र्यं कर्तुं बहुलग्रहणमेव भवतीति भावः ॥

"अभिविधौ भावइनुण्" ॥ 'क्रियागुणाभ्यामिति' । अभिविधिस्वरूपकथनमेतत्, इह तु धातोः प्रत्ययविधानात्क्रियाविषय एवाभिविधिर्गृह्यते । 'सांकूटिनमिति' । कूट दाहे दीर्घोपधादिनुण् अणिनुण इतीनुणन्तात्स्वार्थिकोऽण् प्रत्ययः स च पूर्ववत्सगतिकारकाद्भवति इनण्यनपत्यइति प्रकृतिभावाच्चस्तद्धितइति टिलोपाभावः, समन्ताद्दाह इत्यर्थः, संशब्दोभिविधिद्योतकः । 'सांराविणमिति' । उपसर्गे रुव इति घञ् उपसर्गान्तरेणभिविधौ चरितार्थः । 'संराव इति' । अत्र संशब्दः पूजायां क्वचित्सन्द्रावइति प्रत्युदाहरणं पठ्यते तदयुक्तं समि युद्रुदुव इत्यस्यानवकाशात् । ननु च भावे कारकइति द्वयेपि प्रकृते शब्दशक्ति-

Digitized by Google

स्वाभाव्यात्पूर्ववत्कारके न भविष्यति तत् किं भावग्रहणेन तत्राह । 'भावइति वर्त्तमानइति' । तेन घञ् नपुंसके भावे क्त इति क्तश्च न भवति । 'ल्युटा त्वित्यादि' । गतार्थं स्वभावतश्चेदमित्नुणन्तं नपुंसकलिङ्गम् ॥

"आक्रोशेऽवन्योर्ग्रहः" ॥ ग्रहवृदृनिश्चिगमश्चेत्यपि प्राप्येयमारम्भः । 'दृष्टानुवृत्तिसामर्थ्यादिति' । दृष्टमनुवृत्तिसामर्थ्यं यस्येति बहुव्रीहौ द्विकयोरितिवद्भावप्रत्ययमन्तरेणापि भावप्रधानो निर्देशो दृष्टानुवृत्तिसामर्थ्यत्वादित्यर्थः । यद्वाऽनुवृत्तौ सामर्थ्यमनुवृत्तिसामर्थ्यं ततोदृष्टशब्देन कर्मधारयः । 'आक्रोशः शपनमिति' । न क्षेपः स्वभावतो घञन्तस्य शपनविषयत्वात् शपनमनिष्टाशंसनम् अवग्रहोऽभिभवः निग्रहो बाधः, हन्तशब्दः कोपं द्योतयति, अवग्रहः पदस्य छेद, निग्रहो निरोधः ॥

"प्रे लिप्सायाम्" ॥ लब्धुमिच्छा लिप्सा । 'पात्रप्रग्राहेण चरतीति' । भिक्षापात्रोपादानेन गृहीतपात्र इति यावत् । स्रुवग्रहणं तु दक्षिणार्थिनो लिङ्गं दाक्षिणहोमस्य स्रुवसाधनत्वात् । 'प्रग्रहो देवदत्तस्येति' । प्रग्रहो मदः प्रकृष्टो वाभिनिवेशः ॥

"परौ यज्ञे" ॥ 'उत्तरपरिग्राह इति' । भावे घञ् वेदेः स्फ्येन स्वीकरणं परिग्राहः, ततः कर्मधारयः क्वचिदुत्तरः परिग्राह इत्यसमास एव पठ्यते ॥

"नौ वृ धान्ये" ॥ 'नीवारा नाम व्रीहय इति' । धान्यसामान्योक्तावपि धान्यविशेषरूपव्रीहिविशेषे स्वभावतो घञन्तस्य वृत्तिरिति दर्शयति, अत्र कर्मणि घञ् पूर्ववदुपसर्गस्य दीर्घः । 'निवरा कन्येति' । ग्रहवृदृनिश्चिगमश्चेत्यप् कर्मण्येव, ननु च क्तिना स्त्रियां भवितव्यम् अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति वचनात्, सत्यं, कृत्यल्युटो बहुलमिति बहुलवचनात्क्वचित् क्तिनादिविषयेप्यच् भवति प्रवरा सेना प्रवरा गौरितिवत्, एवं च घञजबन्ताः पुंसीति प्रायिकं द्रष्टव्यम् ॥

"उदि श्रयतियौतिपुद्रुवः" ॥ 'वक्ष्यमाणमिति' । एवं च यौतिप्रभृतिभ्यो विकल्पः प्राप्नोति यदि नेष्यते कृत्यल्युटो बहुलमिति न भवि-

Digitized by Google

ष्यति । अन्ये तु भाष्येनुक्तत्वादसाधुरेवायं प्रयोगः । प्रदर्शितस्तु भारत-प्रयोग आर्षत्वेन निर्वाह्य इत्याहुः ॥

"अवे ग्रहो वर्षप्रतिबन्धे" ॥ 'कुतश्चिन्निमित्तादिति' । सत्त्वकर्मा-पराधादेरनावृष्टिर्भवेन्नृणाम् । सत्त्वशब्दः प्राणिवचनः कर्मापराधः कर्मवि-षयो दोषः, विहितानाचरणप्रतिषिद्धाचरणनिमित्तं पापं सत्त्वकर्मापराधः, आदिशब्देन तयोर्मध्यगतो भानुः समुद्रमपि शोषयेदित्यादेर्ग्रहणम् । 'अवग्राहो देवस्येति' । देवकर्तृको वर्षाभाव इत्यर्थः ॥

"प्रे वणिजाम्" ॥ पणन्ते व्यवहरन्तीति वणिजः पणेरिज्यादे-श्च वः, पण व्यवहारइत्यस्मादिजिप्रत्ययो भवत्यादेश्च वकारः । 'वणि-क्सम्बन्धेनेति' । तुलासूत्रं हि प्रायेण वणिजां भवतीति साहचर्यं लक्षणाहेतुः । 'अन्यो वेति' । न तु वणिजस्तन्त्रमित्यस्येदं प्रयोजनम् ॥

"रश्मौ च" ॥ 'रथादियुक्तानामिति' । आदिशब्देन शकटस्य ग्रह-णम् । 'अश्वादेरिति' । अनडुदादेरप्युपलक्षणमेतत्, संयमनं नियमनम् । 'सा रश्मिरिह गृह्यतइति' । रश्मिशब्दः पुल्लिङ्गः सेति रज्जुपरामर्शात्स्त्री-लिङ्गता । चन्द्रादिसम्बन्धिनां तु रश्मीनामग्रहणमनभिधानात् । इह तु बहुकृत्वो ग्रहिरुपादीयते सकृदेव तु कर्त्तुं शक्यं कथमेवं वक्ष्यामि उदि ग्रहः समि मुष्टौ आक्राेशेऽवन्योः प्रे लिप्सायां परौ यज्ञेऽवे वर्षप्रतिबन्धे विभाषा प्रे वणिजामित्यादि परौ भुवोऽवज्ञानइत्यस्यानन्तरमाङि रुप्लु-वोरिति, तथा तु न कृतमित्येव ॥

"वृणोतेराच्छादने" ॥ अत्राप्याच्छादनइति सामान्येनोक्तावपि पूर्ववद्विशेषप्रतिपत्तिरित्याह । 'प्रत्ययान्तेन चेदिति' 'प्रावार इति' । 'पूर्ववद्दीर्घः' । 'प्रवरा गैारिति । प्रशस्तेत्यर्थः ॥

"ऋदोरप्" ॥ 'चकारो विशेषणार्थ इति' । विना हि तेन याथा-दिसूत्रेऽप्रत्ययादित्यस्यापि ग्रहणं स्यात् । 'वर्षमिति' । वृषभो वर्षणादिति भाष्यकारप्रयोगाद्वर्षणमित्यपि भवति । 'जवसवाविति' । अपि प्राप्तेऽज् विधीयते स्वरे विशेषः, एरजण्यन्तानामिति तु नास्ति वचनं कल्प्या-

दिभ्यः प्रतिषेधवचनमित्येतदेवास्ति । कल्प्यतइति कल्पः अर्घ्यतइत्यर्घः मन्त्र्यतइति मन्त्रः, अचि प्रतिषिद्धे घञेव भवति ॥

"ऋदोरप्" ॥ 'लव इति'। न च तादपि परस्तपर इति उकारस्य तपरत्वाचात्रापा भवितव्यं तत्राह । 'दकारो मुखसुखार्थ इति'। नायं तकारः किं तर्हि दकारः, एतच्च निरभ्योः पूल्वोरित्याद्यारम्भाद्विज्ञायते मुखशब्देन ताल्वादिस्थानमुच्यते तस्य सुखमनायासः, अचोर्हि हल्व्यवहितयोरुच्चारणे मुखस्य लाघवं भवति, असन्देहो यस्यानुषङ्गिकं प्रयोजनम् ॥

"ग्रहवृदृनिश्चिगमश्च" ॥ 'निश्चिनोतेस्त्ववोपवाद इति'। एरजिति प्राप्तस्य, यस्तु हस्तादाने चेरस्तेय इति घञ् स निपूर्वादपि पूर्वविप्रतिषेधेनेष्यते यथोक्तमस्तेयार्थमिति चेवानिष्टत्वादिति । कः पुनर्निश्चय इत्यत्राजपोर्विशेषः, यावता तदेव रूपं स एव स्वरोपि थाथादिसूत्रेणोभयत्रान्तोदात्तत्वविधानादित्यत आह । 'निश्चिग्रहणं स्वरार्थमिति'। निश्चिग्रहणसामर्थ्यात् थाथादिस्वरोत्र न प्रवर्त्तते कृत्स्वरेण तु मध्योदात्तत्वमेव भवतीति भावः । 'वशिरण्योरिति'। घञि प्राप्ते वचनं वशनं वशः रणन्ति शब्दायन्तेस्मिन्निति रणः संग्रामः । 'घञर्थइति'। भावः कर्तृवर्जितं च कारकं घञर्थः । प्रस्थः सानुः प्रखः कटाहः प्रपा पानीयशाला सर्वत्रातो लोप इटि चेत्याकारलोपः । 'आविधमिति'। ग्रहिज्यादिसूत्रेण सम्प्रसारणम् आयुधशब्दपर्यायोयम् ॥

"उपसर्गेऽदः" ॥ 'अदेर्धातोरिति'। दारूपाणां धातूनामयं निर्द्देशो न भवति घञपोश्चेत्यपि परतो देर्घस्लादेशविधानात् । व्यद्यतइति विघसो वैश्वदेवशिष्टमन्नम् । घासस्तु चतुष्पदां भक्ष्यम् । घसिः प्रकृत्यन्तरमस्ति तस्मादेवाब्विधेयः, एवं ह्यदेरपि घस्लृभावो न वक्तव्यो भवति उत्तरार्थं त्वदेर्ग्रहणं नौ णच अदेर्यथा स्याद् घसेर्मा भूदिति ॥

"व्यधजपोरनुपसर्गे" ॥ व्यधजपोरिति पञ्चम्यर्थे षष्ठी अनुपसर्गइति प्रसज्यप्रतिषेधः उपसर्गे सति न भवतीति तेन केवलाभ्यामेव

Digitized by Google

भवति न तूपसर्गव्यतिरिक्तेऽन्यस्मिन्नुपपदे, वृत्तिग्रन्थोप्यस्मिन्नेवार्थे व्याख्येयः, उपजापो मन्त्रभेदः॥

"क्वणो वीणायां च"॥ 'सोपसर्गार्थमिदं वीणाग्रहणमिति'। निव्यतिरिक्तोपसर्गार्थमिदं द्रष्टव्यं निपूर्वादनुपसर्गाच्च सामान्येन विधानात्, कल्याणप्रक्वाणेति बहुव्रीहिः॥

"मदोऽनुपसर्गे"॥ 'विद्यामद इत्यादि'। कर्तृकरणइत्यादिना समासः क्वणो वीणायां चेत्यस्यानन्तरं नित्यं मदः प्रमदसंमदौ हर्षे पणः परिमाणइति यदि सूत्रन्यासः क्रियेत अत्रानुपसर्गग्रहणं शक्यमकर्त्तुम् अनुवृत्तेरेव सिद्धत्वात् सत्यम्, एवं विन्यासे हि क्रियमाणे पणः परिमाणइत्यत्राप्यनुपसर्गइत्यस्यानुवृत्तिः शङ्क्येत यथा न्यासे तूत्तरत्राप्यनुपसर्गइति वचनान्नित्यं पणः परिमाणइत्यत्रानुपसर्गइति न संबद्ध्यतइति विज्ञायते तेनोपसर्गेपि भवति यदि परिमाणाभिधानमस्ति। अपर आह मदोनुपसर्गइति सूत्रप्रणयनमस्य विधेरनित्यत्वज्ञापनार्थं तेन माद इति सिद्धं भवतीति नात्राप्तभाषितमस्ति॥

"प्रमदसंमदौ हर्षे"॥ 'निपातनं रूढ्यर्थमिति'। उपात्तस्यैव रूढिरूपस्य साधुत्वं यथा स्यादित्यर्थः। प्रसंभ्यामित्युच्यमाने प्रसंमदः संप्रमदः विप्रमद इत्यादावपि प्राप्नोतीति मन्यते॥

"अक्षेषु ग्लहः"॥ अक्षस्य ग्लह इति भावेऽपु,अक्षस्य ग्रहणमित्यर्थः। अन्ये त्वाहुरक्षशब्देनात्र तत्साधनं देवनं लक्ष्यते, अक्षकर्मणि देवनविषये यत्पणरूपेण ग्राह्यं तद् ग्लहशब्देनोच्यते तथा च माघो व्यात्युक्षीमभिसरणग्लहामदीव्यन्निति, वृत्तावप्यक्षस्य ग्लह इत्यक्षसाधनस्य देवनस्य पणबन्ध इत्यर्थः॥

"प्रजने सर्तेः"॥ प्रजननं प्रजनः भावे घञ्, जनिवद्ध्योश्चेति वृद्धिप्रतिषेधः ण्यन्ताद्वेरच् प्रशब्दो धात्वर्थं विपरीतयति यथा प्रतिष्ठतइत्यत्र प्रादुर्भावस्य च वैपरीत्यं गर्भग्रहणं तदाह। 'प्रजनः प्रथमं गर्भग्रहणमिति'। कथमवसरः प्रसर इत्यधिकरणे पुंसि संज्ञायां घः प्रायेण॥

Digitized by Google

"ह्वः सम्प्रसारणं च न्यभ्युपविषु" ॥ निवहइत्यादि रूपं तु जुहोतेरेव सिद्धमनेकार्थत्वाद्धातूनामर्थभेदोप्यकिञ्चित्करः, इदं तु वचनं ह्वयतेर्घञि निह्वाय इति रूपं मा भूदिति ॥

"निपानमाहावः" ॥ आहाव इति रूपं तु जुहोतेरेव सिद्धम् अनेकार्थत्वाद्धातूनामर्थभेदोप्यकिञ्चित्करः, इदं तु वचनं ह्वयतेर्घञि आह्वाय इति रूपं मा भूदिति, आहाव इत्यधिकरणे निपातनमित्याह । 'तत्र हीति' ॥

"भावेनुपसर्गस्य" ॥ 'भावग्रहणमित्यादि' । ननु च द्वयेप्यधिकृते लक्ष्यदर्शनवशाद्भावएवार्थे विधिर्भविष्यति यथा कर्मव्यतिहारे णच् स्त्रियामित्यत्र सत्यमेष एवार्थो भावग्रहणेनाख्यायते । अथ यथाभिविधौ भावइनुणित्यत्र वासरूपनिवृत्त्यर्थं भावग्रहणं तथेहापि कस्मान्न भवति असरूपस्य बाधनीयस्याभावात्, घञ् तावत्सरूपः क्तल्युट्क्तिनस्तु नास्योत्सर्गो नहि तेषु नाप्राप्तेष्वस्यारम्भः, दृश्यन्ते च ते हूतं ह्वानं हूतिरिति ॥

"हनश्च वधः" ॥ 'स चान्तोदात्त इति' । सूत्रे तथैवोच्चारणात् । किमर्थं पुनरकारान्तत्वं किमर्थं चान्तोदात्तत्वं यावता नायमकारः क्वचिच्छ्रूयतेऽतो लोपोस्य भवति तत्राह । 'तत्रेति' । अन्तोदात्तत्वे सतीत्यर्थः । 'उदात्तनिवृत्तिस्वरेणेति' । अनुदात्तस्य च यत्रोदात्तलोप इत्येव उदात्तनिवृत्तिनिमित्तत्वादुदात्तनिवृत्तिस्वरः । 'घात इति' । अत्र कर्मादौ कारके घञ् । 'किं तर्हि प्रकृतेन प्रत्ययेनेति' । अथ धातोरनन्तरं श्रुतः प्रकृतेन धातुना कस्मान्न सम्बध्यते हनश्च वधादेशो भवति ह्वयतेश्चेति, पूर्वसूत्रे सम्प्रसारणविधानसामर्थ्यात् ॥

"मूर्तौ घनः" ॥ 'अभ्रघन इति' । अभ्रस्य काठिन्यमित्यर्थः । 'धर्मशब्देनेति' । शुक्लादिवदिति भावः । यद्येवं गुणेनेति प्रतिषेधात्समासो न प्राप्नोति तत्स्थैश्च गुणैरित्येतदपि नास्ति इदानीमेव ह्युक्तं धर्मशब्देन धर्मी भण्यतइति वक्तव्योत्र समासः ॥

अन्तर्घनो देशे ॥ 'तदपि ग्राह्यमेवेति' । उभयथाप्याचार्येण शिष्याणां प्रतिपादितत्वात् ॥

सू० सर्वेषाम् ॥ १३ ॥

यानि च गार्हपत्यकार्याणि द्वाभ्यां गार्हपत्ये जुहोतीत्यादि सौमिकाङ्गानि यानि चैष्टिकानि पत्नीसंयाजादीनि तानि सर्वाण्यपि विकल्पेनोभयत्र क्रियेरन्नविशेषादिति प्राप्ते प्राञ्चमग्निं प्रणयन्तीत्यादिना तर्हि तस्य पशुश्रपणं हरेत्तेनैवैनं भागिनं करोतीत्यन्तेन प्राजहितस्य पशुश्रपणैककार्यकत्वश्रवणात्तदितराणि शालामुखीय एव भवन्ति ॥

सू० आहवनीयात् ॥ १४ ॥

आग्नीध्रीयाग्नेरपि यज्ञतन्वादिहोमाधिकरणत्वेनाहवनीयत्वावश्यम्भावादौत्तरवेदिकादेव तस्य प्रणयनमिति प्राप्ते शालामुखीयादेव प्रणयनम् । अग्निप्रथमाः प्राञ्चोऽभिप्रव्रजन्ति सोमप्रथमा वेति श्रुतौ प्राञ्च इति प्रागभिमुख्येन गमनविधानादग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीत्यत्र द्वन्द्वावगतस्याग्निप्रणयनसोमराजप्रणयनयोः साहित्यस्य चानुरोधेन शालामुखीयसमीपवर्त्तिसोमलताया इव तदन्तर्वर्त्तिन एवाग्नेः प्रणयनं गार्हपत्यापादानकत्वादेवाग्नीध्रीयस्याप्याहवनीयैकदेशत्वमेवेति न तस्य होमाधिकरणत्वभङ्गः । औत्तरवेदिकाग्निप्रणयनोत्तरमप्याग्नीध्रीयप्रणयनपर्यन्तमाहवनीयांशस्येह सत्त्वादेवाहवनीयादित्यपादानत्वेनोक्तिः । एषोऽत ऊर्ध्वमिति स्मृतिरप्याग्नीध्रीयप्रणयनोत्तरकालपरेति तु भाष्यम् ॥

सू० आहवनीयाद्धिष्ण्यान् ॥ १५ ॥

अङ्गारैर्द्वे सवने विहरन्तीत्यादिना विहितन्धिष्ण्यानां विहरणमौत्तरवेदिकादेव स्यात् । तदग्नीनामपि होमार्थत्वादिति प्राप्ते आग्नीध्राद्धिष्ण्यान्विहरतीति नियमनादाग्नीध्रीयस्याप्याहवनीयैकदेशत्वेन होमसंयोगोपपत्तेस्तत एव विहरणम् ॥

सू० अनुसवनम् ॥ १६ ॥

धिष्ण्यानां सवनभेदेन त्रीणि विहरणानि । तान्युद्दिश्याङ्गारैर्द्वे सवने विहरन्ति शलाकाभिस्तृतीयमिति गुणविधयः चतुर्थस्य गुणविधेर-

Digitized by Google

भावान्नास्ति चतुर्थं विहरणमिति प्राप्तेऽग्निष्टोमसाममप्रकृत्य धिष्ण्याञ्ज्योतिष्मतीः कुर्यादिति विधेश्चतुर्थविहरणसिद्धिः। नचाग्नीन् ज्योतिष्मतः कुरुतेति प्रैषोत्तरमिव तृतीयसवने विहृतानामेवाग्नीनां भस्मापनयनेन समिन्धनरूपमेव ज्योतिष्मत्त्वमिति वाच्यं। धिष्ण्याग्नीनां महाग्नीनामिव जागरणाभावेन तदनुपपत्तेः। अत एवैतावती वा अग्नेस्तनूरित्यादिना त्रिचत्वारिंशत्तनुसंख्याकथनं सङ्गच्छते। चतुर्थविहरणाभावे सप्तन्यूनतापत्तेः। तच्चेत्थम्। षड्धिष्ण्यानां मार्जालीयस्य च चतुर्वारं विहरणादष्टाविंशतिः। शामित्रा औपयजाश्च पशुभेदात् त्रयस्त्रयः। निर्मन्थ्याश्चत्वारः। आग्नीध्रीयेण सह महाग्नयः पञ्चेति॥

सू० तृतीयसवने॥ १७॥

धिष्ण्यान् व्याघारयतीति विधाय तृतीय आज्येनेति विधिनोपसंहारात्तृतीयसवन एव व्याघारणमिति प्राप्ते सामान्यविधिनाऽनुसवनंव्याघारणं विहितं। तत्र तातीयमेव तृतीय इत्यनूद्याज्यलक्षणगुणमात्रविधिः। कालद्रव्योभयनियमे वाक्यभेदापत्तेः॥

सू० तस्मात्तेषु॥ १८॥

तेषां येनेष्टं पर्यविशन्त सोमपीथं प्राप्नुवन्नाहवनीयआग्नीध्रीयो होत्रीयोमार्जालीय इति प्रकृत्य तस्मात्तेषु जुह्वतीति विधानात्तेषामेव सोमेन व्याघारणमन्येषां त्वाज्येनेति प्राप्तेऽतिहाय वषट्करोति विच्छेते सोमपीथेनार्ध्यन्ते इति निन्दार्थवादेन सोमनिषेधस्याप्युन्नयनादाज्येन सह विकल्पः। तृतीयसवने त्वाज्यविधिर्नियमार्थः॥

सू० तेषां वायव्यम्॥ १९॥

शूर्पेण जुहोतीत्यत्र प्रकृतशूर्पस्येव धिष्ण्यानां व्याघारणेऽपि प्रकृतत्वाद्ग्रहचमसान्यतरस्मित्करणत्वेन प्राप्ते द्रोणकलशात्परिप्लवया राजानमादाय प्रत्यङ्ङासीनो धिष्ण्यान्व्याघारयतीति श्रुतावादानकरणत्वेनोपस्थितायाः परिप्लवाया एव व्याघारणेऽपि करणत्वम्। अन्यथा परिप्लवायामादानस्यादृष्टार्थत्वापत्तेः॥

Digitized by Google

सू० सोमे होमेषु ॥ २० ॥

वैसर्जनानि जुहोतीत्यादिभिर्विहितानां सौमिकानां दर्विहोमाणां द्रव्याकाङ्क्षत्वात्प्रकृतः सोम एव वा ऽर्थत्वान्नियम्यत इति प्राप्ते सोमद्रव्यस्य कतिपयकार्येष्वाहत्यविधानेन तदितरेषु तदभावध्वननादाज्यस्यैव कोशादौ हविःपदेन निर्देशेन तस्यानादिष्टद्रव्ये प्रवृत्तेराज्यं हविरनादेश इति स्मृत्या ऽनुमतेराज्येनैव ते होमा भवेयुः । अत एव धिष्ण्याव्याघारणसंपातेनाज्येन पात्नीवतं श्रीणातीत्यत्राज्यस्य सिद्धवत्कृत्यानुवाद उपपन्नः ॥

सू० सवैव स्यात् ॥ २१ ॥

यस्यैव धिष्णियो विह्रियते सो ऽनुध्यायतीत्यादिना यजमानं वा एतद्विकर्षन्ते यदाहवनीयात्पशुश्रपणं हरन्ति सवैव स्यान्निर्मन्थ्यं वा कुर्याद्यजमानस्य सात्मत्वायेत्यन्तेन पशुश्रपणार्थो ऽग्निर्नियम्यते । तत्र सवैव स्यादित्यनेनाहवनीय एवोच्यते । यजमानो वा आहवनीय इत्युपक्रान्तत्वेन तस्यैव बुद्धिस्थत्वादिति प्राप्ते प्राजहित एव तत्पदेनोच्यते निर्मन्थ्येन सह तुल्यकोटिकविकल्पोक्तिसामर्थ्यात् । सर्वत्र कोटिद्वये साधारणधर्मावश्यकत्वात् । प्राजहितस्यापि मथनजन्यत्वेन लौकिकनिर्मन्थ्यसाम्यात् । वैदिकनिर्मन्थ्य एव वा स्याल्लौकिकनिर्मन्थ्यो वेति तदर्थात् । आहवनीयहरणे यजमानस्यैव विकर्षणं स्यादिति विनिन्द्य यजमानस्यात्मलाभाय विधीयमानस्याग्नेराहवनीयातिरिक्तत्वावश्यम्भावाच्च । अन्येनान्यस्य सात्मत्वसम्भवात् । तस्मात्प्राजहितस्यैवायं वादः ।

सू० पशौ शालामुखीयः ॥ २२ ॥

वरुणप्रघासेषु प्राजहितादेवोत्तरवेदेः प्रणयनवन्निरूढपशावपि सम्भवान्न शालामुखीयो भवेदिति प्राप्ते प्रकृतौ शालामुखीये सौमिकस्य कस्यापि कार्यस्याभावात्पाशुककार्यार्थमेव तदुपादानेन पश्वङ्गत्वाच्चोदकलभ्यः शालामुखीयो निरूढादिष्वपि स्यादेव ॥

सू० पश्विष्टिषु ॥ २३ ॥

पशावुभयत इष्टिपत्तवदन्यतरत इष्टिपत्तोऽप्यस्ति । तत्र प्रथमत इष्ट्यभावे पशावेवाहवनीयप्रणयनं भवतीत्यविवादं । तद्वैरूप्याय प्रथमेष्टिपत्तेऽपि तथैव स्यात् । इष्टौ प्रणीतस्येष्ट्यपवर्गे लौकिकत्वादिति प्राप्ते देवतापरिग्रहरूपसंस्कारस्य साङ्गपश्वपवर्ग एवापनयाद्वैतणीयाहवनीयवदैष्टिक एवान्तं धार्यः ॥

सू० पूर्वेद्युः ॥ २४ ॥

पशौ पूर्वेद्युरेव प्रणयनं कृत्वाचिन्ता तद्दिनीयं सायमग्निहोत्रमौत्तरवेदिक एव स्यात् । तस्यैव मुख्याहवनीयत्वादिति प्राप्ते मध्येचिन्ता ॥

सू० अग्निहोत्रस्य ॥ २५ ॥

अग्निहोत्रद्रव्यस्य पाकः शालामुखीय एव स्यादिति प्राप्ते मुख्याहवनीयवन्मुख्यगार्हपत्यलाभेऽनुष्णाशीतवन्मध्यविधगार्हपत्यग्रहणे मानाभावात्स्वीयगार्हपत्यलाभे परकीयगार्हपत्यग्रहणस्यानुचितत्वाच्च प्राजहितएव श्रपणम् ॥

सू० शामित्रे ॥ २६ ॥

पशोरिव पशुतन्त्रान्तःपातिनः पुरोडाशस्यापि प्रसङ्गित्वेन शामित्र एव श्रपणे प्राप्ते शालामुखीय एव स्यात् । तस्य गार्हपत्याहवनीयोभयरूपत्वात् । पुरोडाशे चोदकेनोभयोर्विकल्पेन प्रापणेऽपि सम्भवत्यविरोधेन विधिद्वयानुग्रहेऽन्यतरत्यागस्यानुचितत्वात् ॥

सू० द्व्यहे ॥ २७ ॥

निरूढपश्वादिघूत्तरवेदेः कालोद्ग्रहरूपस्त्र्यहरूपो वा स्याच्चोदकानुग्रहादिति प्राप्ते स्नात्वोप्त्वा केशश्मश्रुणी अरणी समारोप्य निर्मथ्योदवसायेत्यादिना सद्यस्कालत्वस्य वाचनिकत्वादतिदेशबाधः । अत एवोत्तरवेद्यां नाग्निहोत्रस्य करणप्रसक्तिः । दैवात्कर्मण उत्कर्षे तु सत्यां प्रसक्तौ तत्रैव करणमिति कल्पः ॥

Digitized by Google

सू० पशुवरुणः ॥ २८ ॥

पशौ वरुणप्रघासेषु च प्रकृतितः प्राप्तत्वाच्छालामुखीयो न स्यादिति प्राप्ते वैशेषिकविधिबलादस्त्येव । अत एव वरुणप्रघासेष्वापस्तम्बमते शालामुखीयो नास्ति बोधायनमते त्वस्तीति व्यवस्था ॥

सू० संस्थिते ॥ २९ ॥

शालामुखीयादीनामग्नीनां धारणावश्यम्भावादनुगतेषु प्रायश्चित्तस्य यदाहवनीय उद्वायेदाग्नीध्राद्‌द्धरेदित्यादिनाऽऽम्नानाच्च सोमयागापवर्गे ते सर्वेऽपि समारोपणीया इति प्राप्ते प्राजहितस्यैव समारोपः । तद्धारणस्यैव सर्वाग्न्यर्थत्वात् । इतरधारणस्य सोममात्रार्थत्वात् । प्रायश्चित्तस्यापि क्रत्वर्थत्वात् । अतोऽन्येषां कर्मापवर्गे लौकिकत्वान्न समारोपः ॥

सू० गतश्रियः ॥ ३० ॥

अनस्पतेऽप्यनेनैव न्यायेन शालामुखीयस्य समारोपणाभावे प्राप्ते सर्वकर्मार्थतया तद्धारणस्यापि गतश्रियो नित्यत्वात्तस्यापि समारोपः । यच्छाखायामाहवनीयस्य नित्यं धारणमाम्नातं तच्छाखीयानामप्ययमेव न्यायः ॥

सू० दीक्षिताग्नेः ॥ ३१ ॥

दीक्षानिर्मोकात्पूर्वं प्रयाणप्रसक्तावग्नीनां पात्रान्तरे स्थापनेन सह नयनं स्यान्न समारोपः । प्रातरग्निहोत्रं हुत्वा समारोपयेदिति विधिना समारोपस्य सौत्रामण्यग्निन्यायेनाग्निहोत्राङ्गत्वात् । दीक्षितस्य चाग्निहोत्राभावेन तदयोगादिति प्राप्ते समारोपणस्याग्निनयनोपायत्वेनानन्तर्यमात्रेण वास्तोष्पतीयहोमस्येवाग्निहोत्राङ्गत्वे प्रमाणाभावाच्चाग्निहोत्राभावेऽपि समारोप्यैवाग्निर्नेयः ॥

सू० प्रत्यग्निः ॥ ३२ ॥

अग्निभेदेनारणिभेद आवश्यकः । एकत्रारोपे संसर्गापत्तेः । सहारणिभिस्तरन्तीति नदीतरणविधावरणिबहुत्वश्रवणाच्च । अरणिभ्यां

Digitized by Google

सह तरन्तीति शाखान्तरात्तु द्वित्वबहुत्वयोर्विकल्प इति प्राप्ते रथाङ्गेन तरन्तीत्यादाविव नदीतरणेऽरणिसाहित्यमात्रविधानेन द्वित्वबहुत्वयोरुत्तराधरारणिभेदाभिप्रायेणानुवादमात्रम्। अजस्रपक्षाभिप्रायेण वा तदुपपत्तिः॥

सू० समारोप्य ॥ ३३ ॥

अग्नेः प्रत्यक्षनयनस्य समारोपविधिनैव परिसङ्ख्यातत्वादुख्याग्नेरपि समारोपे प्राप्ते उखासंयोगस्यैवोख्यपदप्रवृत्तिनिमित्तत्वेन समाख्याविरोधाच्छकटे पात्रस्थापनादिविधानाच्च न तत्समारोपः॥

सू० अपरयोस्तु ॥ ३४ ॥

समारोपणविधेरुपायान्तरादूषकत्वेन समर्थस्यैव साग्निचित्यक्रताधिकारेणोख्यवद्गार्हपत्यादेरपि प्रत्यक्षनयनं स्यादिति प्राप्ते आयतनाद्वचनमन्तरेण बहिर्निर्गतस्य लौकिकत्वावश्यम्भावात्समारोपणस्य तु वाचनिकत्वात्समाख्याविरोधाभावाच्च समारोप्यैव नयनम्॥

सू० आत्मसमारोपणे ॥ ३५ ॥

आत्मसमारोपेण विधेरात्मनोऽग्नेर्वा संस्कारमात्ररूपत्वेनात्मन्यरण्योश्च समारोपौ समुच्चीयेतामिति प्राप्तेऽग्नेर्नयनोपाययोरेकार्थत्वेन समुच्चयायोगाद्विकल्पः। आत्मसमारोपस्य संस्कारकर्मत्वे मानाभावात्॥

सू० आत्मसमारूढे ॥ ३६ ॥

प्रत्यवरोहणं त्वात्मसमारूढस्य लौकिकेऽग्नाविव यस्याहिताग्नेरग्निर्मथ्यमानो न जायते यत्रान्यन्दीप्यमानं परापश्येत्तत आहृत्य होतव्यमिति विधिना लौकिकेऽग्नावपि होमविधानात् पूर्वं लौकिकस्यापि मन्त्रेण प्रत्यवरोहणोत्तरं तस्यैव संस्कृतत्वेन वैदिकत्वसम्भवात्। यस्याहिताग्नेरग्निर्मथ्यमान इत्यविशेषेण मथनश्रवणेऽपि तस्यारणिसमारोपपक्षाभिप्रायेण व्यवस्थापयितुं युक्तत्वात्। उपवेषेणाङ्गारमपोहतीत्यविशेषेण श्रवणेऽपि सान्नाय्यपक्ष एवोपवेषस्य व्यवस्थादर्शनात्। आत्मन्यारोपितस्या-

रण्योरुपावरोहणेन मन्थने आत्मारोपस्यैव वैयर्थ्यापपत्तेः, गुरुलघुपक्षयोर्विकल्पायोगाद्दिति प्राप्ते आत्मारोपपक्षेऽप्यरण्योरेवोपावरोहणम् । अरणिमथनस्य प्रत्यवरोहण साधनत्वेन नित्यवच्छ्रुतस्य पाक्षिकत्वकल्पनायोगात् । उपवेषस्य शाखाऽनुनिष्पन्नत्वेन तस्य सान्नाय्याभावे सम्भवादेव व्यवस्थितत्वेऽपि प्रकृते तदयोगात् । प्रत्युत लौकिकाग्नावरण्योर्वोपावरोहणस्यानियमप्राप्तौ मन्थनविधिबलादेवाधारनियमस्य कल्पयितुं युक्तत्वात् । प्रत्यवरोहणस्य संस्काररूपत्वाभावेन लौकिकाग्नेस्तावतैव वैदिकत्वायोगात् । यत्रान्यन्दीप्यमानमिति तु होमकालातिक्रमसम्भावनायां वचनेन तावन्मात्रस्य होमस्य तत्र विधानमित्यदोषः । गुरुलघ्वोरप्येकविंशतिसर्ववेदसयोरिव विकल्पो युक्त एव । तस्मादात्मसमारोपपक्षेऽप्यरण्योरेव प्रत्यवरोह्य मथनं, या तु स्मृतिर्लौकिकेऽग्नौ प्रत्यवरोहणपरा सूत्रान्तरकाराणां सा सुकरत्वरूपहेतुमूलिकैवेति ॥

इति संकर्षे भाट्टदीपिकायां पञ्चदशाध्यायस्य द्वितीयः पादः ॥ २ ॥

अयमग्निपादइत्युच्यते ।

अथ पञ्चदशाध्याये तृतीयः पादः ॥

सू० अतिग्राह्याः ॥ १ ॥

आग्नेय ऐन्द्रः सौर्यश्चेति त्रयोऽतिग्राह्याख्याग्रहास्तेषां सामानविधम्पूर्वमुक्तमिति स्मारितं धर्मिज्ञानार्थम् ॥

सू० विश्वजिति ॥ २ ॥

तानेव प्रकृत्य विश्वजिति सर्वपृष्ठे ग्रहीतव्या अप्यग्निष्टोम इति श्रुतोऽग्निष्टोमशब्दः प्रकरणादग्निष्टोमसंस्थविश्वजिद्यागपर इति प्राप्ते अप्यग्निष्टोम इत्यपि-शब्दाद् द्वितीयवाक्यत्वेन निश्चितेऽपि विश्वजित्पदानुवृत्तौ विशिष्टोद्देशापत्तेर्वाक्येन प्रकरणबाधादग्निष्टोमसंस्थत्वेन यागस्योद्देश्यत्वात्प्रकृतौ वेति न्यायेन प्रकृत्यग्निष्टोम एवैष विधिः ॥

Digitized by Google

सू० सप्रकृतिगः ॥ ३ ॥

यत्पृष्ठेन गृह्णीयात्प्राञ्चं यज्ञं पृष्ठानि संसृणीयुर्यदुक्थ्ये गृह्णीयात्प्रत्यञ्चं यज्ञमतिग्राह्याः संसृणीयुरिति निन्दार्थवादगम्यउक्थ्यसंस्थक्रतावतिग्राह्यनिषेध उक्तन्यायेन प्रकृतिगाम्येवेति प्राप्ते यत्पृष्ठ्य इत्युपक्रमेणाग्न्ये पार्ष्ठिकत्वरूपविशेषणलाभात्पार्ष्ठिकोक्थ्य एवायं निषेधः । न च विशिष्टोद्देशः अनुमितवाक्ये तस्यादोषत्वात् । समासपदस्यैवानुमेयत्वात् ॥

सू० विकल्पो वा ॥ ४ ॥

प्रकृतितः प्राप्तानां प्रतिषेधे पाशुकाज्यभागन्यायेन विकल्पापत्तेः पर्युदासपत एवाश्रयणीयः । अनुमितवाक्ये लक्षणाया अप्यभावादिति प्राप्ते पृष्ठ्यषडहप्रकरण एव वैराजस्य स्तोत्रायाग्नेयो गृह्यते शाक्वराणामैन्द्रो रैवतानां सौर्य इति विधाय पृष्ठानि वा एतानि पृष्ठ्या च्यावयन्ति यत्रैव पृष्ठानि युज्यैरँस्तेषु तेऽतिग्राह्या इति पुनर्विधिदर्शनेन ग्रहणाग्रहणवद्विकल्प एव । पार्ष्ठिकोक्थ्येतरक्रतूनामनुपस्थितत्वेन पर्युदासस्यायुक्तत्वात् ॥

सू० द्व्याश्रयवत् ॥ ५ ॥

यद्यप्यैच्छिकस्य तुल्यवद्विकल्पस्याष्टदोषदुष्टत्वाद्व्यवस्थितविकल्प एव युक्तः । नाना पृष्ठे षडहेऽतिग्राह्या भवेयुः बृहद्रथन्तरपृष्ठेतुनेति । वैराजस्तोत्रादिकाल एव तेषां विधानात् । तथापि पृष्ठ्य सामान्ये प्राप्तानां ग्रहाणामङ्गभूतवैराजादिस्तोत्रानुसारेण सङ्कोचायोगात्सर्वत्रैच्छिको विकल्पः । न च ग्रहाणां पृष्ठाप्रच्युतिहेतुत्वकथनस्याङ्गत्व एव पर्यवसानात्प्रधानपृष्ठानुसारेणाङ्गभूताग्रहा नियन्तुं युक्ता इति वाच्यं । यदा स्तोत्राण्युपयन्ति तदा ग्रहा इत्येवं समानकालिकत्वमात्रबोधनफलकत्वेनापि तदप्रच्युतिहेतुत्वोक्तिसम्भवात् । अतस्तुल्यवद्विकल्प इति प्राप्ते तान्वै पूर्वस्मिँस्त्र्यहे गृह्णीयादुत्तरस्मिँस्त्र्यहे ग्रहीतव्या इति वचनद्वयवशाद्व्यवस्थित एव विकल्पः । त्र्यहद्वयेऽपि प्रत्यहं त्रयाणां त्रयाणां ग्रहणे पृष्ठविधिनैव

तत्सिद्धावनयोर्वैयर्थ्यापत्त्यैव प्रत्यहमेकैक एव ग्रहो ग्राह्य इत्याकारक-समासविधायकत्वेनैव सार्थक्यस्य वक्तव्यत्वात् । उत्तरस्मिंस्त्र्यहे समासानुरोधेनैव वैराजादिकालनियमनात् । उपस्तम्भनं वा अतिग्राह्याश्चक्षु पृष्ठानीति पृष्ठबहुत्वसंयोगाच्च वैराजसामस्तोभैरतिग्राह्याणां सामन्वत्वेन स्तवनाच्च ॥

सू० वैराजस्य ॥ ६ ॥

वैराजस्य स्तोत्रायाग्नेयो गृह्यत इति वचनेन वैराजस्तोत्राख्य-दैवताकयागविधिः । आग्नेय इत्यस्योपांश्वादिवन्नामधेयत्वेन देवता-तद्धितत्वायोगात् । चतुर्थ्या आनर्थक्यप्रतिहतत्वाच्चेति प्राप्ते मान्त्रव-र्णिकदेवतालाभेन तत्प्रख्यन्यायेनैव नामत्वेन देवतानाङ्गत्वात्सम्ब-न्धसामान्यार्थे षष्ठीस्थाने चतुर्थी । न च तादर्थ्यचतुर्थ्या ग्रहाणां स्तो-त्राङ्गत्वं विनियोगभङ्गेन वैपरीत्यं वा शङ्क्यं । ये वा अमी वैराजस्य स्तोमास्तैरेवैते सामन्वन्त इति श्रुत्या सस्तोत्रकग्रहान्तरसाम्यसम्पिपा-दयिषया गौणसामवत्त्वोपपादनस्वारस्यविरोधात् । प्रातःसवनेऽति ग्राह्या गृह्यन्त इतिवदवान्तरकालवादो वा सप्तमीकल्पनयेति द्रष्टव्यम् ॥

सू० न वा सह ॥ ७ ॥

अतिग्राह्यानेव प्रकृत्य माहेन्द्रमनुहूयन्त इतिश्रुतावनुशब्दः सह-त्ववचनः । गामनुवत्सश्चरतीति साहित्येऽपि प्रयोगदर्शनात् । तद-व्यवहितोत्तरकालस्यानुयागावरुद्धत्वात् वाचनिकत्वादेवान्यदेवत्ययापि माहेन्द्रग्रहयाज्यायै ते हूयेरन्निति प्राप्तेऽग्ने तेजस्विचित्यादीनां मन्त्राणां होमकरणत्वेनाम्नानेन करणान्तरानाकाङ्क्षतया माहेन्द्रयागाव्यवहितोत्तर-कालपर एवानुशब्दः, अनुयजतीति विधेरितरयागेषु लब्धावकाशत्वेन प्रकृ-तत्रानन्तर्यांशे बाधस्य युक्तत्वात् । तेन माहेन्द्रेणैषद्रातिग्राह्यान् हुत्वाऽनुव-षट्कुर्यात् । यत्तु भाष्ये ऽतिग्राह्याणामपि ग्रहत्वाद्ग्रहसमानधर्मतावश्य-कतया सवषट्कारमेवैषां प्रदानं न पुनर्दर्विहोमत्वमित्युक्तम् तद्दधि-ग्रहादिषु व्यभिचरितत्वादुत्तराधिकरणान्त एव प्राणाय त्वेत्यादिरूपस्य मन्त्रस्य होमे सूत्रकृतैव विनियोगकथनेन तद्विरोधाच्च चिन्त्यम् ॥

Digitized by Google

सू० आदितो गृह्णीत ॥ ८ ॥

दधिग्रहो नित्य इत्युक्तं स चोपांश्वादिभ्यः पूर्व एव ग्राह्यः । एतदपूर्वविधेस्तेभ्यः पूर्वं पाठात् ज्येष्ठो वा एष ग्रहाणामिति श्रुत्यापि सर्वग्रहप्राथम्योक्तेः । प्रथमोत्पन्नस्यैव ज्येष्ठत्वेन व्यवहारादिति प्राप्ते ब्राह्मणक्रमान्मन्त्रक्रमस्य बलवत्त्वादुपांश्वादिमन्त्रोत्तरमेव दधिग्रहमन्त्रपाठात्प्रशंसायामेव ज्यादेशविधानेन ज्येष्ठा वा एता ब्राह्मणाः पुराविदामक्रन्नित्यादाविव ज्येष्ठशब्दस्य प्राथम्यवाचकत्वाभावादुपांश्वादिभ्यः परत एव तदिज्या । अत एवाऽऽयामानयनकाले दधिग्रहेज्याप्रदर्शनार्थोऽर्थवादो यथा गावः सञ्जानानाः सङ्गच्छमानाः सङ्घ्नान्योन्यं घ्नन्तीत्यादिः सङ्गच्छते ॥

सू० कामसंयोगः ॥ ९ ॥

दधिग्रहमेव प्रकृत्याम्नातम् । आज्यग्रहं गृह्णीयात्तेजस्कामस्य सोमग्रहं गृह्णीयाद्ब्रह्मवर्चसकामस्येति नित्यत्वेन दध्नः करणत्वेन प्राप्तौ तदपवादेन तद्यागमाश्रित्य फलाय गुणविधी एताविन्द्रियकामवाक्यवदिति प्राप्ते दध्नेन्द्रियकामस्येत्यत्र दध्नेति तृतीयया गुणस्यैव फलभावनाकरणत्वप्रतीतेर्गुणफलसम्बन्धविधानेऽप्याज्यसोमयोरिह ग्रहपदेन समस्तयोस्तत्रैव करणत्वेन धात्वर्थस्यैव फलभावनाकरणतया दधिग्रहविकृतिभूतयोः काम्यग्रहयोः कर्मान्तरयोरेवेमौ विधी ॥

सू० नित्यकामः ॥ १० ॥

तत्राय एव दधिग्रहं गृह्णीयात्पशुकामस्येति पठिते विधावप्युक्तन्यायेन कर्मान्तरत्वे प्राप्ते लाघवात्फलोद्देशेन धात्वर्थविधिमात्रम् गुणपदन्त्वनुवादः विहितस्य पुनःफलाय विधानात्संयोगपृथक्त्वेनैन्द्रवायवाग्रतावन्नित्यकाम्यत्वम् ॥

सू० सोमग्रहः ॥ ११ ॥

दधिग्रहविकारेऽपि सोमग्रहे सोमधर्मा भवेयुः । सोमङ्क्रीणातीत्यादिसोमविधिष्वपूर्वसाधनसोमोद्देशेन धर्मविधानात् । उद्देश्यतावच्छे-

Digitized by Google

दकस्य विधेयव्याप्यत्वनियमादिति प्राप्ते सोमेन यजेतेति विधिगम्यापूर्वसाधनत्वस्यैवोद्देश्यतावच्छेदकतया प्रकृतित एव धर्मप्राप्ते र्यागस्य कथंभावानाकाङ्क्षतया च न तत्र सोमधर्माः ॥

सू० तत्रार्थप्राप्तः ॥ १२ ॥

उक्तन्यायेनैवाभिषवस्याप्यप्राप्तत्वात्सोमलतांशुभिरेव यागः कार्य इति प्राप्ते चतुःस्रक्तिना पात्रेण ग्रहणस्य प्रकृतितः प्राप्तत्वात्तस्य च प्राथमात्यन्यायेन द्रवद्रव्यसाधनत्वेन व्यवस्थितत्वात्पात्रवशादेव प्रकृतावपि सान्द्रेतरदध्न एव करणत्वेन नियमयितुं युक्तत्वेनार्थिकत्वाभावाच्चोदकतोऽपि द्रवद्रव्याधारत्वद्वारैव पात्रप्राप्तेरभिषवस्याक्षेपः ॥

सू० कर्मसंयोगात् ॥ १३ ॥

तिस्रो वहुस्य समिध इत्येतया सोमं करोतीति सोमग्रहसन्निधौ श्रूयते । इह करोतेरेव भावनार्थकतया तत्र सोमस्य भाव्यतया ऋचः करणत्वेन चान्वयोभासमानोऽपि न युक्तः । सिद्धद्रव्यस्य साधनानाकाङ्क्षत्वेनासाधितमिति न्यायेन यागक्रिययैव तेन स्वभाव्यकभावनान्तरानाक्षेपात् । अतो विनियोगभङ्गेन सोमकरणकभावनायामेव मन्त्रविधानाश्रयणात्प्राकृतमन्त्रवाधाय यागे मन्त्रविधिः । यत्तु भाष्यकारैरसत्कार्यवादनिरासेन संस्कारात्मनः सतः स्वरूपात्मना सत्कार्यवादं समर्थ्य सोमस्य स्वरूपतोऽपि सत्त्वेन तत्र मन्त्रस्य करणत्वेन विधानायोगात्सोमग्रहादयं मन्त्र उत्कृष्येतेत्युक्तं तत्सोमोत्पादने यागान्तरेऽपि विनियोगासम्भवेन यागरन्तरेदित्यर्थादिविधेरिवाप्रामाण्यापादकत्वादुपेक्षितम् । अतः सक्तुन्यायेन तृतीयान्तत्वकल्पनाद्यागे विनियोगेनोत्कर्ष इति प्राप्ते उत्पाद्यविकार्यादिभेदेन भाव्यस्यानेकविधतया हिरण्यकार इत्यादिव्यवहारसमर्थनार्थमावश्यकतया पूर्वाधिकरणन्यायेनोत्पत्तिविधौ सोमपदस्य रसात्मकविकारपरत्वेन तदनुवादेन मन्त्रविध्युपपत्तेरभिषव एवायं मन्त्रः करणम् ॥

सू० अंश्वदाभ्यविधी ॥ १४ ॥

औपानुवाक्यकाण्डे च प्रकरणेऽवभृथात्परतश्चांश्वदाभ्यविधिद्वयं पठ्यते । तन्मन्त्रौ तूपांश्वादिभ्यः पूर्वमाम्नातौ । तत्रानारभ्याधीते सर्वक्रतूनामुपस्थित्यविशेषेऽपि द्विरुक्तत्वादिदोषपरिहारानुगुणनिवेशानुसन्धानसापेक्षात्तस्मात्प्राकरणिकवाक्यस्य प्रबलत्वेन तत्रैवांश्वदाभ्ययोरुत्पत्तिविधी । एतदनुवादेनौपानुवाक्यकाण्डे गुणविधयः । तेषां प्रधानविधिपारतन्त्र्येणैव प्रकृतिगामित्वसम्भवात् । तस्मादवभृथानन्तरमेव पाठक्रमात्तयोः प्रचार इति प्राप्ते भूयस्त्वेनोभयश्रुतीति न्यायेनौपानुवाक्य एव गुणविधिबाहुल्यात्प्रधानविधिरपि । तत्र च प्राकृताङ्गान्तरैः सह पाठक्रमाभावादितरग्रहप्रचारकाल एव तयोः प्रचारः । वस्तुतस्तु औपानुवाक्य एव विधिस्वीकारेऽपि तस्य प्रकृतावन्ते तु बादरायण इति न्यायेन क्लृप्तक्रमकग्रहाणां परत एव निवेशे प्राप्ते प्राकरणिकपुनःपाठवैयर्थ्यपरिहाराय तस्य क्रमार्थकत्वं स्वीकर्तुं युक्तमिति न पूर्वोत्तरपक्षयोः फलभेदः । यदि ब्राह्मणपाठात्प्रबलेन मन्त्रपाठेनोपांश्वन्तर्यामादिग्रहेभ्यः पूर्वमेव प्रचार इत्युच्यते तर्हि तत एव पूर्वपक्षेऽपि तत्रानुष्ठानं सिध्यति । वस्तुतो ध्रुवनीयापोदधिग्रहेण चरित्वांश्वदाभ्यौ चरतीति श्रौतक्रमेणैव सिद्धेः प्राप्तिसूत्रमेवैतत् । एवं पशुशीर्षोपधानेऽपि ॥

सू० भ्रातृव्यवता ॥ १५ ॥

औपानुवाक्ये विहितयोरंश्वदाभ्ययोर्भाव्याकाङ्क्षायां न्यायानुसन्धानसापेक्षज्योतिष्टोमोपकारापेक्षया भ्रातृव्यवता दाभ्यो ग्राह्यो बुभूषतांशुरिति वचनेन वैरिमरणादेरेव फलस्य झटित्युपस्थितेः काम्यावेवैतौ ग्रहाविति प्राप्ते एष वै हविषा हविर्यजते यो दाभ्यं गृहीत्वा सोमाय यजते परा वा एतस्यायुः प्राण एति योंऽशुं गृह्णातीति वचनयोर्वैयर्थ्यापत्तेः संयोगपृथक्त्वेनोभयार्थत्वम् । अग्निहोत्रस्येवोत्पत्तिविधिफलविधिपरत्वेनोभयसार्थक्येऽपि प्राकरणिकाभ्यां विधिभ्यां क्रत्वर्थत्वमनपोद्यमेव ॥

सू० नानार्थानाम् ॥ १६ ॥

रात्रिपर्यायेष्वनाम्नातसोमानि स्तुतशस्त्राणि सन्ति । तेषु सोमाकाङ्क्षायां ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति वचनाद्ग्रहो वा चमसो वा विकल्पेन प्राप्नोति । ग्रहाणां वचनान्तरैः प्राप्तत्वेन तदंशेऽस्य वचनस्यानुवादमात्रत्वेन चमसैकविधानपरत्वाच्चमस एव वेति प्राप्ते क्वचित्केवलग्रहाणां केवलचमसानां च क्वचित्समुच्चितानां च तत्तद्भागाभ्यासविहितवचनैरेव यथायथं प्राप्तत्वेन तेषु स्तोत्रशस्त्रोभयवत्सु स्तोत्रोपाकरणे विकल्पितकालमात्रविधानार्थं प्रवृत्तेऽस्मिन्वाक्ये स्तुतशस्त्रवतः सोमानाहेत्यत्रेव समासवचनमात्रम्, रात्रिपर्यायेषु तु ग्रहचमसानां समुच्चय एव । तत्समुच्चयवदभ्यासविकारत्वात् ॥

सू० ग्रहाः पृश्निः ॥ १७ ॥

वेदे तत्र व्यवह्रियमाणाः प्राणग्रहाः पृश्निग्रहाश्च न व ग्रहाभवेयुः । प्राणलिङ्गकैर्मन्त्रैर्गृह्यमाणानामिष्टकानां पञ्च शारदीये उपादीयमानानां सप्तदशानामुक्षणां च पृश्निवर्णवत्वेन तथाव्यपदेशोपपत्तेरिति प्राप्ते ग्रहपदसामानाधिकरण्येन रूढ्या योगापहारात्तेऽपि ग्रहविशेषा एव ॥

सू० प्राणभृत् ॥ १८ ॥

प्राणग्रहान् प्रकृत्य प्राणा वै प्राणग्रहा इत्यादिना स्तुत्वा तत्सन्निधौ त्वे क्रतुमपि वृञ्जन्ति विश्व इत्यादयो मन्त्राः पठिताः तेषां च परस्पराकाङ्क्षया सम्बन्धः । मन्त्राणां ग्रहेभ्योऽल्पत्वेऽप्यावृत्त्या पूर्त्तिसम्भवादिति प्राप्ते ज्येष्ठा वा एता ब्राह्मणाः पुराविदामक्रन्निति तदर्थवादेषु तन्मन्त्राणां महर्षिलिङ्गत्वेन संस्तवात्तादृशानां च चयनप्रकरणे वसिष्ठविश्वामित्रभरद्वाजादिपदघटितत्वात्प्राणभृन्मन्त्राणामेवोपलम्भात्तेषामेव ग्रहणेऽपि करणत्वम् । अत एव प्राणभृत उपधाय संयत उपदधातीति विधिशेषे प्राणानेवास्मिन् धित्वा संयद्भिः संयच्छतीति तेषामिष्टकानां प्राणग्रहाणां च प्राणत्वेन तुल्यः स्तव उपपद्यते। प्राणभृन्मन्त्राणां पञ्चाशत्सङ्ख्याकत्वेऽपि दश गृह्यन्त इत्यवयुत्यानुवाद एकपर्यायापेक्षो युज्यते ॥

Digitized by Google

सू० पृश्निप्राणग्रहान् ॥ १९ ॥

द्वादशाहे पृश्निप्राणग्रहान् व्यतिषजतीति श्रुतं । तत्र पृश्निग्रहाणां प्राणग्रहाणां च प्रदानकाले सोमरसग्रहणकाले वा वायुरसीत्यादिपृश्निमन्त्रदशकस्यायं पुरोभुव इत्यादिप्राणदशकस्य परस्परसाङ्कर्येण प्रयोगइति प्राप्ते जुहोतेरश्रवणाद्देवतानां चाभावेन नैते यागाः । ग्रहशब्दप्रयोगस्तूभावाज्ज्यग्रहान् जपत इत्यादाविव तन्मन्त्रेषु गौणः । व्यतिषङ्गोऽपि मानैर्व्यतिषजतीति वचनान्तरादभिषवार्थमंशुग्रहणरूपे माने क्रयकाल इन्द्राय त्वेत्यादिभिः प्राकृतैः पञ्चभिर्मन्त्रैः सह वैकृतानां विंशतेः साङ्कर्यं न पुनः प्रदान एव साङ्कर्यमित्यत्र मानमस्ति । अत एव व्यतिषङ्गविशदीकरणं कल्पसूत्रेषु एकः प्राकृतप्रथममन्त्रोदश पृश्नयः प्रथमे माने द्वितीयः प्राकृत एको दश प्राणग्रहा इति द्वितीयम्, ततस्तृतीयपञ्चमयोः पृश्नय एव चतुर्थे प्राणा एवैत्याकारक एकः । अन्योऽपि प्रकारस्तत्रैव द्रष्टव्यः ॥

सू० प्रायणीये च ॥ २० ॥

अनारभ्याधीतानां पृश्निप्राणग्रहाणामंश्वदाभ्यादीनामिव प्रकृतौ निवेशे प्राप्ते प्रायणीयोदयनीययोर्दशमेऽहनि च गृह्यन्त इति वचनान्मानैः पृश्निप्राणग्रहान् व्यतिषजतीति तत्प्रकरणे पाठाच्च द्वादशोपसत्त्वस्यैव ग्रहाणामुत्कर्ष एवेति ॥

इति सङ्कर्षे भाट्टदीपिकायां पञ्चदशाध्यायस्य तृतीयः पादः ॥ ३ ॥

अयं ग्रहपाद इत्युच्यते ।

अथ पञ्चदशाध्याये चतुर्थः पादः ।

सू० आर्षेयम् ॥ १ ॥

दर्शपूर्णमासयोरार्षेयं वृणीत इति श्रुतं । तत्र ऋत्विजो वृणीत इति वरणसंस्कृतस्यर्त्विजो विशेषणमार्षेयपदमृषिपदस्य तदुक्तमृषिणा

बन्धने चर्षाविति श्रुतिस्मृत्योर्वेदप्रयोगदर्शनादविच्छिन्नवेदार्थविज्ञानानुष्ठानशीलपूर्वपुरुषकत्वं बोधयति । अथदेवा योऽनूचानः श्रोत्रियस्तस्यापि वेद एष वै ब्राह्मणानृषीणामार्षेयोयच्छुश्रुवानेष वै पितृमान् पैतृमत्य आर्षेयो यच्छुश्रुवानिति व्यपदेशात्तादृशत्वमृत्विग्विशेषणं वासिष्ठो ब्रह्मेत्यादिवदिति प्राप्ते यजमानस्याशीर्गच्छेदृषीणां हि देवाः पुरुषमनुबध्नन्ते इत्यादिना यजमानपूर्वपुरुषपरत्वेन वाक्यशेषे स्तवनाद्यो वा अन्यस्यान्यस्य-प्रवरेणेत्यादिना यजमानेतरप्रवरानुकीर्त्तने निन्दाश्रवणाच्च कौषीतकिब्राह्मणेऽथ यद्यजमानस्यार्षेयमाहनता अनार्षेयस्य देवा हविरश्नन्तीति विधावेव यजमानसम्बन्धकीर्त्तनात्तदीयप्रवरर्षिनामकीर्त्तनपर एवायं विधिः ॥

सू० भृगुवसिष्ठेति ॥ २ ॥

प्रवरर्षीणां नाममात्रस्य भृगुवसिष्ठेत्यादिरूपस्य कथनमात्रेण विधिचारितार्थ्ये प्राप्ते अग्ने महाँ असि ब्राह्मणभारतेत्यस्यान्ते आर्षेययोजनेन यजमानाहवनीययोः पितापुत्रभावसम्बन्धेनाग्नेः स्तवनं कुर्यादित्यर्थस्य शाखान्तरपर्यालोचनलभ्यस्यानुगुण्यायापत्यप्रत्ययान्तसम्बुध्यन्तपदानि भार्गववासिष्ठेत्यादीनि प्रयोज्यानि ॥

सू० त्रीन्वृणीते ॥ ३ ॥

मन्त्रकृतो वृणीत इत्येक एव विधिः । तत्र चानियमेन बहुत्वसंख्यानां त्र्यादीनां कपिञ्जलन्यायेन त्रयाणामेव वा वरणप्रसक्तौ न पञ्चातिप्रवृणीते न चतुरो वृणीत इत्याभ्यां चतुःषडादिसंख्यानां निरासात्पञ्चार्षेयवरणमेकमेव विधीयते । एकं द्वौ त्रीनित्यवयुत्यवादस्तु स्तुतिमात्रं, तेन सप्तार्षेयोऽपि पञ्चानामेव वरणं कुर्यात् । इतरेषां तु मनुवत्कल्प इति षाष्ठस्य पुनराक्षेपे प्राप्ते चतुर्वरणस्याप्यवयुत्यवादेनोपपत्तौ न चतुर इत्यत्र नञो वैयर्थ्यापत्तेर्न पञ्चातिप्रवृणीत इति वाक्येऽपि पञ्चार्षेयवरणविधेः स्पष्टस्याभावाच्च त्रीन्वृणीत इत्यस्यैव विधित्वावसायात्तेन मन्त्रकृत इत्यस्योपसंहारात् त्र्यार्षेयस्यैव वरणं, भाष्यकारस्तु अत्र्या-

र्षेयस्येति सूत्रे प्रकृतसूत्रे च त्रिपदं पञ्चानामप्युपलक्षणम् । परिमाणाविख्यासेति त्रिपञ्चसंख्योपलिलक्षयिषेत्यर्थकर्मिति व्याचख्यौ ॥

सू० यथार्षि ॥ ४ ॥

त्रयाणामार्षेयाणामनियतानुपूर्वीकतयोच्चारणम् । कल्पसूत्रेषु गोत्रभेदेन पठितानां मन्त्रकृन्नाम्नां स्मार्तत्वेन पाठक्रमविवक्षायां मानाभावादिति प्राप्ते ऊर्ध्वानध्वर्युर्वेच्छब्दादित्यादिनाऽध्वर्युप्रवरेषु तद्धितविनिर्मुक्तप्रातिपदिकानां वच्छब्दान्तानां प्रातिलोम्येन पाठविधानाद्धोतृप्रवरेषु नियतानुपूर्वीसिद्धिः ॥

सू० मनुवत् ॥ ५ ॥

आवृश्च्यत एष ओषधिवनस्पतिभ्यो यः परान्वृणीत इति त्र्यार्षेयवरणं विनिन्द्य मनुवदित्येव ब्रूयादिति श्रुतम् । अयं च मनुवत्कल्पो राजन्यवैश्यपरः । तेषां ब्राह्मणर्षिसन्तानत्वाभावादिति प्राप्ते त्र्यार्षेयवरणप्रतिषेधपूर्वकं मनुवत्कल्पविधानात्तस्य च प्रसक्तिपूर्वकत्वेन तस्याश्च ब्राह्मणेष्विव पुरोहितस्यार्षेयेण वेदयेदिति वचनान्तरेण राजन्यवैश्ययोश्च सत्वात्त्रैवर्णिकानामार्षेयमनुवत्कल्पयोस्तुल्यवद्विकल्पः । वस्तुतस्तु निन्दार्थवादस्य विधिशेषत्वेन प्रतिषेधकल्पकत्वाक्षमतया कल्पने च वाक्यभेदापत्तेर्मनुवत्कल्पस्य च त्र्यार्षेययोग्यातिरिक्तब्राह्मणेषु सावकाशत्वात्सौत्रो विकल्पशब्दो व्यवस्थितविकल्पपरः । पुरोहितस्येत्यादिकन्त्वस्यैव गुणसूत्रम् । पञ्चावत्तातिरिक्तपरत्वेन चतुरवत्तस्येव ब्राह्मणातिरिक्तपरत्वेन मनुवत्कल्पस्य व्यवस्थाया निरासार्थम् । राजन्यवैश्ययोः पार्थक्येन विधिदर्शनाच्च तेषु मनुवत्पक्षस्य नियता प्रवृत्तिरित्येव व्याख्येयम् ॥

सू० निषादः ॥ ६ ॥

निषादस्थपते रथकारस्य च सङ्करजातित्वेनर्षिसन्ततित्वाभावान्नार्षेयवरणमिति प्राप्ते साक्षादृष्यपत्यत्वस्य त्रैवर्णिकेष्वप्यभावात्परम्परया तत्सम्बन्धे चाविच्छिन्नपारम्परिकतत्तद्वंश्यस्मृतिव्यतिरिक्तप्रमाणाप्रसरात्तस्याश्च तेष्वप्यविशिष्टत्वात्सर्वस्यैव जगत ऋषिवंश्यतायाः पुराणेषु कथ-

दशायां कस्यचिदनंशभूता अपि तन्तवः पटत्वावस्थायां सङ्घातापेक्षयां-ऽशत्वं भजन्ते, अतस्तन्तुगताश्च संस्थानवर्णपरिमाणादयः पटस्य प्रादेशिकविशेषणानि भवन्ति गगनस्य दुन्दुभ्यादिशब्दवत् भेदकाकारेण विनांशभेदस्य प्रतिपत्तुं वक्तुं चाशक्यत्वात् अंशभेदो नाम विशेषणभेदः अंशिन एकत्वं च विशेष्यैक्यमिति फलितम्, इयान् विशेषः केचित्प्रादेशिकधर्मा यावद्द्रव्यभाविनः, केचिदयावद्द्रव्यभाविनश्चेति, यतो नभसि प्रादेशिकविशेषाः कादाचित्काः अत एव तत्र स्वाभाविकांशभेदवादोऽपि निरस्तः। ननु गगनं घटाद्युपाधिभिः कार्त्स्न्येन सम्बध्यते चेद् गगनस्याल्पत्वं घटस्य विभुत्वं वा स्यात् गगनांशभेदेन चेत् सोंऽशभेदः किमुपाधिकृतः तदानीं तस्याप्युपाधेः कार्त्स्न्येन सम्बन्धायोगात्, अंशभेदेन सम्बन्धार्थमुपाध्यन्तरापेक्षायामनवस्था स्यात् अतो घटादिसंयुक्तगगनांशभेदस्वाभाविक इत्यभ्युपगन्तव्यः, नैवं गगनादिव्यापकपदार्थानां तत्तत्सूक्ष्मतरोपाध्यन्वितात्यल्पांशभेदानां स्वाभाविकत्वे परमाणुपुञ्जात्मकत्वप्रसङ्गात् क्षणिकत्वप्रसङ्गाच्च गगनादीनां परिमाणविशेषाः क्षणिकाः क्षणिकसंयोगादयश्च गगनादिभिः किं कालानवच्छिन्नैःसम्बध्यन्ते? उत कालभेदावच्छिन्नैः? क्षणोपाधयश्च किं कालेनानवच्छिन्नेन सम्बध्यन्ते? उतावच्छिन्नेन? आद्ये गगनादीनां क्षणकालवर्तित्वं परिणामविशेषसंयोगादीनां नित्यत्वादिकं वा स्यात्, द्वितीये च अवच्छेदकोपाधीनां पूर्ववदनवच्छिन्नगगनादिना सम्बन्धायोगेन अवच्छिन्नेन सम्बन्धसिद्ध्यर्थम् अवच्छेदकोपाध्यन्तरापेक्षया अनवस्था स्यादिति तत्परिहाराय गगनादेः प्रतिक्षणभेदस्य स्वाभाविकत्वमुपगन्तव्यमिति गगनादीनां क्षणिकत्वं स्यात्, एवं ब्रह्मपर्यन्तानां व्यापकपदार्थानां क्षणिकत्वं परमाणुपुञ्जात्मकत्वं स्यात्, त्वया च भिन्नाभिन्नत्वमभ्युपगतम्, अतो भिन्नाभिन्नस्वभावक्षणिकपरमाणुपुञ्जकारणकं जगदिति ब्रह्मकारणवादः परित्यक्तः स्यात्, अतो गगनादिषु प्रदेशभेद औपाधिकोऽभ्युपगन्तव्यः, उपाधिश्च न कृत्स्नाकाशेन सम्बध्यते परिमितत्वात्, नापि स्वतोभिन्नांशेन स्वतोंऽशभेदे पूर्वोक्तदूषणस्य दुष्परत्वात्, नाप्युपाध्यन्तरभिन्नेन तन्नैरपेक्ष्यात्, तन्नैरपेक्ष्यं चोपाधित्वादेव

स्वतस्तदाकाररहिते वस्तुनि तदाकारनिष्पादनसमर्थो ह्युपाधिः स्वतो निर्दुःखे ह्यात्मनि उपाधिर्दुःखहेतुः, स हि न पूर्वमेवात्मनि सहजदुःखान्तरयोगमपेक्षते, अत उपाधिः कश्चित् कल्प्याकारकल्पने सहतज्जातीययोगं नापेक्षते । किञ्च उपाधिसम्बन्ध एव गगनस्य भेदः अर्थान्तरादर्शनात् तावता भेदव्यवहारे सम्भवत्यर्थान्तरकल्पनायोगाच्च उपाधिसम्बन्धरूपो भेदश्च स्वावच्छेद्यवस्त्ववच्छेदे भेदान्तरनिरपेक्षः भेदत्वात् स्वतःसिद्धभेदवत्, न हि देहात्मनोर्भेदः स्वाश्रयावच्छेदे भेदान्तरमपेक्षते, अतो न स्वतो नभसि भिन्नांशत्वं पटस्यांशभेदे सत्यपि भावाभावविरोधगर्भं भिन्नाभिन्नत्वं नास्तीति दर्शितम् । तत्रांशभेदश्च विशेषणभेदे पर्यवस्यतीत्युक्तम्, अतो निर्दोषः सत्कार्यवादः ॥

सू० यथा च प्राणादिः ॥ २० ॥

मू० यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपादिकार्यान्तराणि भजते तद्वद् ब्रह्मैकमेव विचित्रस्थिरचररूपं जगद् भवतीति परमकारणात्परस्माद् ब्रह्मणोऽनन्यत्वं जगतः सिद्धम् ॥ आरम्भणाधिकरणं समाप्तम् ॥

टी० सू० यथा च प्राणादिः, एकस्य बहुत्वावस्थत्वे वैदिकदृष्टान्तोऽत्र प्रदर्श्यते अधिकरणार्थमुपसंहरति "इती"ति, ॥ आरम्भणाधिकरणं समाप्तम् ॥

इतरव्यपदेशाधिकरणम् ।

सू० इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

मू० जगतो ब्रह्मानन्यत्वं प्रतिपादयद्भिस्तत्त्वमसि अयमात्मा ब्रह्मेत्यादिभिर्जीवस्यापि ब्रह्मानन्यत्वं व्यपदिश्यत इत्युक्तं, तत्रेदं चोद्यते यदीतरस्य जीवस्य ब्रह्मभावो ऽभीभिर्वा-

कैर्व्यपदिश्यते तदा ब्रह्मणः सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तस्यात्मनो ऽहितरूपजगदकरणमहितरूपजगत्करणमित्यादयो दोषाः प्रसज्येरन्, आध्यात्मिकाधिदैविकाधिभौतिकानन्तदुःखाकरं चेदं जगत्, न चेदृशे स्वानर्थे स्वाधीनो बुद्धिमान्प्रवर्तते जीवाद्ब्रह्मणो भेदवादिन्यः श्रुतयो जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः भेदे सत्यनन्यत्वासिद्धेः, औपाधिकभेदविषया भेदश्रुतयस्स्वाभाविकाभेदविषयाश्चाभेदश्रुतय इति चेत्तचेदं वक्तव्यं स्वभावतः स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति वा न वा, न जानाति चेत्सर्वज्ञत्वहानिः, जानाति चेत्स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणोऽहिताकरणाहितकरणादिदोषप्रसक्तिरनिवार्य्या

टी० सू० इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ किं ब्रह्मणि जगत्कारणत्वं सम्भव ? त्युत ने ? ति किं ब्रह्मणो जगत्स्रष्टृत्वे हिताकरणादिदोषः प्रसज्यते ने ? ति किं ब्रह्मणस्तत्त्वमसीत्यादिसामानाधिकरण्यावगतं तादात्म्यमैक्यलक्षण ? मुतात्मशरीरभावलक्षण ? मिति, किमात्मशरीररूपतादात्म्य एव भेदश्रुतिसामञ्जस्य ? मुतैक्यलक्षणेऽपीति, यदा स्वरूपैक्यलक्षणतादात्म्येऽपि भेदश्रुतिसामञ्जस्यं तदा तत्त्वमस्यादिवाक्यानां स्वरूपैक्यपरत्वेन हिताकरणादिदोषप्रसङ्गात् ब्रह्मकारणत्वासम्भव इति फलं, यदाऽऽत्मशरीरभाव एव भेदश्रुतिसामञ्जस्यं तदा तत्त्वमस्यादिवाक्यानां शरीरात्मभावपरतया हिताकरणादिदोषप्रसङ्गाभावात् ब्रह्मकारणत्वसम्भव इति सिध्यति, अवान्तरसङ्गतिमाह "जगत" इति, सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तस्येति, हितानभिन्नश्चेदहितजगत्कारणत्वमुपपद्यते तत्र सर्वज्ञ-

त्वात् हितत्रस्यापि हि सत्यसङ्कल्पत्वाभावादहितजगत्कारणत्वमिति न वाच्यं सत्यसङ्कल्पत्वादिति भावः । भेदश्रुतिभिर्जीवविलक्षणत्वप्रतिपादनात्र दोष इति वदन्तं सिद्धान्तिनमाशङ्क्याह "जीवाद् ब्रह्मण" इति भास्करमतमनूद्य दूषयति "औपाधिके"ति अहितकरणादीति, आदिशब्देन सुखदुःखभोक्तृत्वं विवक्षितं ब्रह्माज्ञानवादिनोऽस्मिन्नधिकरणेऽनवकाशत्वमाह—

सू० जीवब्रह्मणोरज्ञानकृतो भेदस्तद्विषया भेदश्रुतिरिति चेत् अत्रापि[1] जीवाज्ञानपक्षे पूर्वोक्तो विकल्पस्तत्फलं च तदवस्थं ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोऽज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न सम्भवति, अज्ञानेन प्रकाशस्तिरोहितश्चेति तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषसहस्रं प्रागेवोदीरितम्, अत इदमसङ्गतं ब्रह्मणो जगत्कारणत्वमिति प्राप्तेऽभिधीयते—

सू० अधिकं तु भेदनिर्देशात् ॥ २२ ॥

तु-शब्दः पक्षं व्यावर्तयति, आध्यात्मिकादिदुःखयोगार्हात्प्रत्यगात्मनोऽधिकमर्थान्तरभूतं ब्रह्म कुतः—भेदनिर्देशात्प्रत्यगात्मनो हि भेदेन निर्दिश्यते परं ब्रह्म "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति स कारणं करणाधिपाधिपः "तयोरन्यः

1. तत्रापीति पा० ।

पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति "ज्ञाज्ञौ द्वावजावीशनीशौ प्राज्ञेनात्मना संपरिष्वक्तः प्राज्ञेनात्मनान्वारूढः अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः प्रधानक्षेत्रज्ञपतिर्गुणेशः नित्यो नित्यानां चेतनश्चेतनानाम् एको बहूनां यो विदधाति कामान् यो व्यक्तमन्तरे सञ्चरन् यस्याव्यक्तं शरीरं यमव्यक्तं न वेद योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद योमृत्युमन्तरे सञ्चरन् यस्य मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्यादिभिः ॥

सू० अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

टी० 'जीवब्रह्मणो"रिति, अधिकं तु भेदनिर्देशात्, दुःखयोगार्हादित्यत्रार्ह-शब्दो मुक्तव्यावृत्तिपरः, एवं श्रुतिर्दर्शिता । अथ श्रुत्यर्थोपपत्तिरुच्यते सू० अश्मादिवच्च तदनुपपत्तिः, चिदचिद्वाचकशब्दैः सामानाधिकरण्ये तुल्येऽपि यथा ब्रह्मणो जडस्य च स्वरूपैक्यासम्भवाद्व्यावृत्तिरभ्युपेता ब्रह्माज्ञानवादिना तथा चेतनस्यापीत्यभिप्रायेणाह—

सू० अश्मकाष्ठलोष्टतृणादीनामत्यन्तहेयानां सततविकारास्पदानामचिद्विशेषाणां निरवद्यनिर्विकारनिखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपनानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते तथा चेतनस्याप्यनन्तदुःखयोगार्हस्य खद्योतकल्पस्यापहतपाप्मेत्यादिवाक्यावगतसकलहेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरब्रह्मभावानुपपत्तिः

Digitized by Google

सामानाधिकरण्यनिर्देशो यस्यात्मा शरीरमित्यादिश्रुते-र्जीवस्य ब्रह्मशरीरत्वात् ब्रह्मणो जीवशरीरतया तदात्मत्वेनावस्थितेर्जीवप्रकारब्रह्मप्रतिपादनपरश्चैतदविरोधी, प्रत्युतैतस्यार्थस्योपपादकश्चेत्यवस्थितेरिति काशकृत्स्न इत्यादिभिरसकृदुपपादितम् । अतस्सर्वावस्थं ब्रह्म चिदचिद्वस्तुशरीरमिति सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणं तदेव ब्रह्म स्थूलचिदचिद्वस्तुशरीरं जगदाख्यं कार्य्यमिति जगद्ब्रह्मणोः सामानाधिकरण्योपपत्तिः जगतो ब्रह्मकार्य्यत्वं ब्रह्मणोऽनन्यत्वमचिद्वस्तुनोजीवस्य च ब्रह्मणश्च परिणामित्वदुःखित्वकल्याणगुणाकरत्वस्वभावासङ्करस्सर्वश्रुत्यविरोधश्च भवति, सदेव सोम्येदमग्र आसीदेकमेवेत्यविभागावस्थायामचिद्युक्तजीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेणावस्थानम् अवश्याभ्युपगन्तव्यं, वैषम्यनैर्घृण्ये न सापेक्षत्वान्न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चे"ति सूत्रद्वयोदितत्वात्तदानीमपि सूक्ष्मरूपेणावस्थानस्य अविभागस्तु नामरूपविभागाभावादुपपद्यते, अतो ब्रह्मकारणत्वं सम्भवत्येव ।

टी० "अश्मकाष्ठे"ति, तर्हि जीवसामानाधिकरण्यं कथमित्यत्राह "सामानाधिकरण्ये"ति, अवस्थितेरिति काशकृत्स्न इति सूत्रमेतदधिकरणशेषमित्यभिप्रायेणाह "अवस्थिते"रिति, आदि-शब्देन, न तु दृष्टान्तभावादुभयेऽपि हि भेदेनैनमधीयत इत्यादिकं विवक्षितम्, उभयेऽपीत्यादिसूत्रं भेदज्ञापनार्थमपि घटकवाक्यविषयम्, इत्थं चेतनसामानाधिकरण्यनिर्वाहः कृतः । चिदचिदात्मकजगत्सामानाधिकरण्यनिर्वाहमाह "अतस्सर्वे"ति, कारणावस्थायामेकत्वावधारणाच्चिदचिच्छरीरकत्वाभावेन

Digitized by Google

गुणदोषव्यवस्था नोपपद्यत इत्यत्राह "सदेवे"ति, अविभागः कथमित्यत्राह "अविभाग"स्त्वति, अनयोः सूत्रयोः परोक्तमर्थं दूषयति–

सू० ये पुनरस्यैव जीवस्याविद्याविमुक्तावस्थामभिप्रेत्यैवं भेदं वर्णयन्ति तेषामिदं सर्वमसङ्गतं स्यात्, न हि तदवस्थस्य सर्वज्ञत्वं सर्वेश्वरत्वं समस्तकारणत्वं सर्वात्मकत्वं सर्वनियन्तृत्वमित्यादीनि सन्ति अनेनैव रूपेण ह्याभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते तस्य सर्वस्याविद्यापरिकल्पितत्वात् तत्सर्वं ह्यविद्यापरिकल्पितं त्वन्मतेन चाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्तिकारजतादिभेदवत्परस्परभेदोऽच सूत्रकारेणाधिकं तु भेदनिर्देशादित्यादिषु प्रतिपाद्यते ब्रह्मजिज्ञासा कर्त्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणोजगज्जन्मादिकारणस्य वेदान्तवेद्यत्वं तस्य च स्मृतिन्यायविरोधपरिहारश्च क्रियते अपीतौ तद्वत्प्रसङ्गादसमञ्जसं, न तु दृष्टान्तभावादिति सूत्रद्वयमेतदधिकरणसिद्धमनुवदति–

टी० "ये पुनरि"ति, जीवादविद्याविमुक्तस्य ब्रह्मणः किं भेद उच्यते? उताविद्यासंसृष्टस्येश्वरस्ये? ति, विकल्पमभिप्रेत्य प्रथमं पक्षं दूषयति "तेषामि"ति,ततः किमित्यत्राह "अनेनैवेते"ति, तेषां तदानी मभावः कथमित्यत्राह "तत्सर्वमि"ति, तस्य सर्वस्याविद्यापरिकल्पितत्त्वादिति पाठे असङ्गतं स्यादिति पूर्वेणान्वयः तत्सर्वं ह्यविद्यापरिकल्पितं त्वन्मत इति पाठोऽस्ति अविद्यापरिकल्पितस्येश्वरस्य भेद उच्यत इति पक्षं दूषयति "न चाविद्ये"ति, कल्पितभेदो न प्रतिपाद्यते अकल्पितजीवस्वरूपज्ञानस्य प्रक्रान्तत्वादित्यर्थः, वेदान्तवेद्यत्वमिति समन्वयाध्यायार्थः, स्मृतिन्यायविरोधपरिहार इति द्वितीयाध्यायार्थः । किञ्च तत्त्वमस्यादिवाक्यार्थप्रतिबो-

Digitized by Google

धनात् प्रागीश्वरस्य भेदेन प्रतीपद्यमानस्य मिथ्याभूतैर्जीवगतदोषैरात्मनो लेपाभावं पश्यत उदासीनवृत्तेर्हिताकरणाद्यप्रसक्तिः ऐक्यज्ञानोदयात् पश्चाज्जगत्स्रष्टृत्वं दुःखादिभोक्तृत्वं च नास्तीति न हिताकरणादिप्रसक्तिरिति च परैरुच्यते तदयुक्तं वक्तृणां स्ववाक्यविषयादधिकविषयज्ञानवत्त्वात् समस्तशास्त्रयोनिभूतस्येश्वरस्य ब्रह्मणः शास्त्रेभ्योऽप्यधिकविष[illegible]तया सर्वज्ञत्वं हि शास्त्रयोनित्वादित्यत्र परैः समर्थितम् । अतः [illegible]ार्थाभिन्नस्येश्वरस्य तत्त्वमस्यादिवाक्यार्थानवबोधाद् भेदेन प्रतिपत्तेरहितकरणादिदोषपरिहारोऽनुपपन्नः, अहमात्मा गुडाकेश सर्वभूताशयस्थितः । क्षेत्रज्ञं वापि मां विद्धीत्यर्जुनादीनां तत्त्वमुपदिशत ईश्वरस्य ऐक्याज्ञानाभावोऽनुपपन्नः ऐक्यज्ञाने जाते सति स्रष्टृत्वभोक्तृत्वाद्यभावादहितकरणाद्यप्रसक्तिश्चायुक्ता गीतोपदेशात्पश्चादपि ईश्वरेण संसारस्य प्रवर्त्यमानत्वात्, न च वाच्यमिदानीं संसारप्रवृत्तिर्नेश्वराधीना किन्तु चक्रभ्रमणवद्वासनयाऽनुवर्तत इति अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्विति संसारप्रवर्तनस्य स्वेच्छाधीनत्वाभिधानात् मत्प्रसादात्तरिष्यतीति भविष्यतः संसारसन्तरणस्य स्वप्रसादाधीनत्वाभिधानाच्च, न हि चक्रभ्रमनिवृत्तेः पूर्ववेगोपरतिनिबन्धनायाः पुरुषविशेषप्रसादापेक्षित्वं बाधितानुवृत्तिश्चानुपपन्नेत्युक्तम् । किञ्च वासनाधीना संसारानुवृत्तिः किमवधीमती? उतावधिविधुरा? प्रथमे "अनादिर्भगवान् कालो नान्तोऽस्य द्विज! विद्यते । अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः" इति शास्त्रविरोधः, द्वितीये वाक्यार्थज्ञानवैयर्थ्यप्रसङ्गः वाक्यार्थज्ञानोदयेऽपि बन्धभ्रमानुवृत्तेरवसानाभावात्, आगामिनां स्वर्गनरकादिसर्गाणामीश्वरसङ्कल्पाधीनत्वादहितकरणदोषस्य दुर्वारत्वात्स्वप्नदृश्यभावानां वैचि[1]त्र्याज्जीवप्राज्ञपृथक्त्वोपपत्तिरिति दोषपरिहारश्चानुपपन्नः स्वप्नद्रष्टुः पुरुषस्य स्वाप्नपुरुषान्तरस्य च परस्परैक्यज्ञानाभावात् परस्परदुःखापादनं नाहितकरणदोषावहं स्वप्ने सर्पव्याघ्रादिभिः पीड्यमानस्य परवशतया स्वाहि-

१ वैचित्र्यवज्जीवप्राज्ञेति पा· ।

तत्करणं न स्यात् ऐक्यज्ञानवतः स्वतन्त्रस्येश्वरस्य नरकादिस्वर्गे स्वाहितकरणादिप्रसङ्गो दुष्परिहारः पृथिवीपाषाणत्वाद्यविशेषेऽपि वज्रवैदूर्य्यसूर्यकान्तादिवैचित्र्यदेकस्मिन्नपि वृक्षे पत्रपुष्पफलादिवच्च ब्रह्मानन्यत्वेऽपि जीवप्राज्ञपृथक्त्वप्रतिपादकमश्मादिवदिति सूत्रमितरैर्व्याख्यातं सर्वैरपि तदयुक्तमीश्वरस्य मृषा वा परमार्थतो वा सार्वज्ञस्य श्रौतस्य सर्वाभ्युपगतत्वात् स्वानन्यतया सर्वं जानत ईश्वरस्य नरकसृष्टिपापकरणतत्फलप्रदानादिषु स्वाहितकरणप्रसङ्गस्यानिवार्यत्वात्, अहितकरणस्य दोषत्वं हि फलभोक्तुः स्वानन्यत्वज्ञाननिबन्धनं न त्ववैचित्र्यकृतं पाणिपादचक्षुःश्रोत्रादीनाम् आकारवैचित्र्ये सत्यपि स्वप्ने वा प्रबोधे वा दुःखितमात्मानं स्वानन्यत्वेन जानतो दुःखं साक्षात्कुर्वतश्चेतनस्य स्वहस्तादिच्छेदनं हि स्वाहितकरणमेव भवति । ननु स्वशरीरगतत्वेन दुःखं जानत ईश्वरस्यापि स्वाहितकरणं स्यात् न, शरीरगतत्वेन दुःखज्ञानस्य क्वचिदप्यपुरुषार्थकत्वदर्शनाभावात् आत्मगतं हि दुःखं जीवानां न शरीरगतं स्वशरीरगतत्वेन छेदनभेदनदहनादिकं जानतः स्वात्मनि दुःखदर्शनात् शरीरभूतजगत्संहारादिव्यापारः परमात्मनश्चाहितकरणं स्यात्, नैवं छेदनादेर्दुःखहेतुतायाः शरीरमात्रान्वयप्रयुक्तत्वाभावात् स्वकर्मभोगार्थशरीरप्रतिकूलत्वं हि छेदनादीनां दुःखावहत्वे प्रयोजकम् एवं कर्मारब्धेन कर्मवश्येन वा वस्तुनोऽनन्यत्वं जानत ईश्वरस्य सर्वशक्तेः स्वाहितकरणादिदोषप्रसङ्गो ह्यपरेषां सर्वेषामवर्जनीयः मृषावादिनस्त्वीश्वरत्वं तदनुबन्धिगुणजातं चाविद्याकल्पितमिति वदतः स ईशोऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय पराऽस्य शक्तिर्विविधैव श्रूयते । स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतिविरोधो ह्यधिक इति वैषम्यं वैलक्षण्यमपीतावित्यादिनाऽधिकरणान्तरोक्तमित्यत्राह अपीतावित्यादि न अपीतावित्यादिसूत्रद्वयं तत्र सङ्गतमपीतावित्यादिसूत्रमस्मिन्नधिकरणे पूर्वपक्षसूत्रेण सङ्गतं तथा परिहारसूत्रं च सिद्धान्तसूत्रेण सङ्गतम् अपीतावित्यादिसूत्रद्वये ब्रह्मण्यचिद्गतदोषशङ्कापरिहारः कृतः, इतरव्यपदेशादित्यादौ चिद्गतदोषशङ्कापरिहारः, एवं विलक्षणत्वे सिद्धे सामानाधिकरण्यनिर्वाहार्थमवस्थि-

तेरिति कात्स्न्यस्य इति सूत्रमत्रैव सङ्गतम्, एवं सूत्रत्रयमेतदधिकरणशेषमित्यर्थः । अधिकरणसिद्धमनुवदति—तस्य शेषत्वेन वदतीत्यर्थः ।

भा॰ तत्र हि विलक्षणयोः कार्य्यकारणभावसम्भव एवाधिकरणार्थः असदिति, चेन्न प्रतिषेधमात्रत्वादिति च पूर्वाधिकरणस्थमनुवदति इतरव्यपदेशाधिकरणं समाप्तम् ॥

टी॰ तस्याऽधिकरणस्यायमर्थो न प्रतिपाद्यश्चेत्तत्र कोऽर्थः प्रतिपाद्य इत्यत्राह "तत्र ही"ति, तत्रासत्कार्यवादनिराकरणं दृश्यत इति विलक्षणयोः कार्यं कारणभावसम्भव एव कथं प्रतिपाद्यते इत्यत्राह "असदि"ति, प्रसङ्गादारम्भणार्थादनुवादस्तस्मिन्नधिकरणे अभेदश्रुत्यविरोधेन भेदश्रुतीनां मुख्यार्थप्रतिपादनमत्रैव क्रियत इत्यर्थः । इतरव्यपदेशाधिकरणं समाप्तम् ॥

उपसंहारदर्शनाधिकरणम् ।

सू॰ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

भा॰ परस्य ब्रह्मणः सर्वज्ञस्य सत्यसङ्कल्पस्य स्थूलसूक्ष्मावस्थसर्वचेतनाचेतनवस्तुशरीरतया सर्वप्रकारत्वेन सर्वात्मकत्वं सकलेतरविलक्षणत्वं चाविरुद्धमिति स्थापितम्, इदानीं सर्वज्ञस्य सत्यसङ्कल्पस्य परस्य ब्रह्मणः सङ्कल्पमात्रेण विचित्रजगत्सृष्टियोगो न विरुद्ध इति स्थाप्यते—

सू॰ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि, अवान्तरसङ्गतिमाह "परस्ये"ति, सत्यसङ्कल्पत्वादिभिर्विलक्षणयं प्रतिपादितं, तत्र सत्यसङ्कल्पमात्रपरिकरत्वमनुपपन्नमिति तस्य सत्यसङ्कल्पत्वस्य सङ्कुचितवृत्तित्व शङ्कयोत्थानात्सङ्गतिरित्यर्थः सर्वात्मत्वं सर्वभाव इत्यर्थः । किं ब्रह्मणो जगत्कारणत्वं सम्भवति नेति किं कार्यजननसमर्थस्य कार्यजनकत्वं नियमेन सहकार्यन्तरापेक्ष? मुत ने? ति विचारः, यदाऽपेक्षानियमस्तदा सहका-

रिशून्यस्य कारणत्वासम्भवः, यदा न सहकार्यपेक्षानियमस्तदा कारणत्व-सम्भव इति सिद्धम् । पूर्वपक्षोत्थनमाक्षिपति—

सू० ननु च परिमितशक्तीनां कारककलापोपसंहारसापेक्षत्व-दर्शनेनैव सर्वशक्तेर्ब्रह्मणः कारककलापानुपसंहारेण जगत्कारणत्वविरोधः कथमाशङ्क्यते उच्यते लोके तत्तत्कार्य्यजननशक्तियुक्तस्यापि तत्तदुपकरणापेक्षित्वदर्शनात्सर्वशक्तियुक्तस्य परस्य ब्रह्मणोऽपि तत्तदुपकरणविरहिणः स्रष्टृत्वं नोपपद्यत इति कस्यचिन्मन्दधियः शङ्का जायत इति सा निराक्रियते घटपटादिकारणभूतानां कुलालकुविन्दादीनान्तत्तज्जननसामर्थ्ये सत्यपि कानिचिदुपकरणान्युपसंहृत्यैव जनयितृत्वं दृश्यते तज्जननाशक्ताः कारककलापोपसंहारेऽपि जनयितुं न शक्नुवन्ति, शक्ताः पुनः कारककलापोपसंहारे जनयन्तीत्येतावानेव विशेषः, ब्रह्मणोऽपि सर्वशक्तेः सर्वस्य जनयितृत्वं तदुपकरणानुपसंहारे नोपपद्यते प्राक् सृष्टेश्चासहायत्वं सदेव सोम्येदमग्र आसीत् एको ह वै नारायण आसीदित्येवमादिषु प्रतीयते, अतः स्रष्टृत्वं नोपपद्यत इत्येवं प्राप्ते तदिदमाशङ्कते "उपसंहारदर्शनान्नेति चे"दिति, परिहरति "न क्षीरवद्धि" इति, न सर्वेषां कार्य्यजननशक्तानामुपसंहारसापेक्षत्वमस्ति यथा क्षीरजलादेर्दधिहिमजननशक्तस्य तज्जनने, एवं ब्रह्मणोऽपि स्वयमेव सर्वजननशक्तेः सर्वस्य जनयितृत्वमुपपद्यते हीति प्रसिद्धवन्निर्देशश्चो-

Digitized by Google

द्यस्य मन्दताख्यापनाय क्षीरादिष्वातञ्चनाद्यपेक्षा सा तद्ध्यादिभावाय अपि तु शैघ्र्यार्थं रसविशेषार्थं च

टी० "ननु चे"ति, सर्वशक्तेरुपकरणविरहः कारणत्वविरोधीति शङ्कैव न जायते सर्वशक्तित्वादिति चोदितम् उपकरणसापेक्षत्वनिरपेक्षत्वरूपं न शक्ताशक्तयोर्वैषम्यं शक्तः परिकरसम्पत्तौ करोति, अशक्तस्तु परिकरसम्पत्तावपि न करोतीति तयोर्वैषम्यं, तस्माद् ब्रह्मणः सङ्कल्पमात्रपरिकरत्वमयुक्तमित्यनुत्थानचोद्यपरिहारं संग्रहेणाह "उच्यतइत्यादिना" इममर्थं विवृण्वन् पूर्वपक्षमाह "घटपटादी"ति, ततः किमित्यत्राह "प्राक्सृष्टेश्चे"ति, सूत्रे चोद्यखण्डोव्याख्यातः। परिहारखण्डं व्याचष्टे "न क्षीरवद्वी"ति, जलं स्वयमेव हिमरूपेण परिणमिति, रविकिरणास्तु तदुत्सर्गमात्रहेतव इति भावः। क्षीरस्यातञ्चनक्वाथौ शैघ्र्यरसविशेषार्थौ। अथ वैदिकं दृष्टान्तमाह—

सू० देवादिवदपि लोके ॥ २५ ॥

भू० यथा देवादयः स्वे स्वे लोके सङ्कल्पमात्रेण स्वापेक्षितानि सृजन्ति तथाऽसौ पुरुषोत्तमः कृत्स्नं जगत्सङ्कल्पमात्रेण सृजति, देवादीनां वेदावगतशक्तीनां दृष्टान्ततयोपादानं ब्रह्मणो वेदावगतशक्तेः सुखग्रहणायेति प्रतिपत्तव्यम्। उपसंहारदर्शनाधिकरणं समाप्तम् ॥

टी० सू० देवादिवदपि लोके, दृष्टान्तान्तरोपादानफलमाह "देवादीनामि"ति, उपसंहारदर्शनाधिकरणं समाप्तम् ॥

कृत्स्नप्रसक्त्यधिकरणम्।

सू० कृत्स्नप्रसक्तिनिरवयवत्वशब्दकोपो वा ॥ २६ ॥

सदेव सोम्येदमग्र आसीत् इदं वा अग्रे नैव किञ्चनासीत् आत्मा वा इदमेक एवाग्र आसीत इत्यादिषु

Digitized by Google

कारणावस्थायां ब्रह्मैकमेव निरवयवमासीदिति कारणावस्थायां निरस्तचिदचिद्विभागतया निरवयवं ब्रह्मैवासीदित्युक्तम्

टी० सू० कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा, दृष्टान्ततयोपन्यस्तस्य क्षीरजलादेः सावयवत्वं दृष्टं तद्वद् ब्रह्मणोऽपि सावयवत्वं निरवयवत्वे कृत्स्नप्रसक्तिर्वा स्यादिति शङ्कया सङ्गतिः, किं ब्रह्मणोजगत्कारणत्वं सम्भवति ने? ति तदर्थं किं ब्रह्मणो जगदाकारेण कार्यत्वे निरवयवत्वश्रुतिर्बाध्यते ने? ति तदर्थं किं सर्वशक्तियोगो युज्यते ने? ति यदा न युज्यते तदा निरवयवत्वश्रुतिबाधप्रसङ्गात् कारणत्वासम्भवः, यदा युज्यते तदा निरवयवत्वश्रुत्यबाधात् कारणत्वसम्भव इति सदेवेत्यादि एकमेवाद्वितीयमित्यत्रानन्तरवाक्यं प्रसिद्धत्वादनुदाहृतमप्यर्थत उपात्तं, तत्रैकशब्दस्त्ववयवतोऽपि विभागासहः यावद् बाधं हि सङ्कोचः, इह तदभावादसङ्कुचितमेकपदं विभागासहमिति भावः । एकशब्दसिद्धनिरवयवत्वं ब्रह्मण इति ज्ञापनार्थं सदेवेति वाक्यमुपात्तम्, इदं वा इति अत्र नैव किञ्चनासीदिति देवादिप्राणिजाताभाव उच्यते अत्रापि न द्यौरासीन्न पृथिवीत्यादिकं प्रतीकग्रहणेनोपात्तं भवति, द्युपृथिव्यादिजगदवयवाभावकथनात् निरवयवत्वसिद्धिरिति भावः । आत्मा वा इदमित्यत्राप्येकशब्दोऽवयवतोऽपि विभागासहः । उदाहृतवाक्यानामर्थमाह "इत्यादिष्वि"ति, आदि-शब्दान्निष्कलं निष्क्रियमित्यादि गृह्यते, एकमेवेति व्याख्येयपदं निरवयवमिति व्याख्यानम्, । उदाहृतश्रुत्यर्थफलितमाह "कारणावस्थायामि"ति, निरवयवत्वस्य कारणवाक्यप्रतिपन्नत्वात् कारणावस्थायां चिदचिद्विभागाभावसिद्धिरित्यर्थः । विरोधं दर्शयितुमाह–

सू० तदविभागमेकं निरवयवमेव ब्रह्म बहु स्यामिति सङ्कल्प्य आकाशवाय्वादिविभागं ब्रह्मादिस्तम्बपर्य्यन्तं चेतनविभागं चाभवत् इति चोक्तम्, एवं सति तदेव परं ब्रह्म

कृत्स्नं कार्य्यत्वेनोपयुक्तमित्यभ्युपगन्तव्यम् । अथ चिदंशः क्षेत्रज्ञविभागविभक्तः, अचिदंशश्चाकाशादिविभागविभक्त इत्युच्यते, तदा सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं ब्रह्मैकमेवात्मैक एवेत्येवमादयः कारणभूतस्य ब्रह्मणोनिरवयवत्ववादिनः शब्दाः कुप्येयुः बाधिता भवेयुः, यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणं स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्य्यमित्यभ्युपगम्यते, तथाऽपि शरीर्य्यंशस्यापि कार्य्यत्वाभ्युपगमादुक्तदोषो दुर्वारः, तस्य निरवयवस्य बहुभवनं च नोपपद्यते कार्य्यत्वानुपयुक्तांशस्थितिश्च नोपपद्यते तस्मादसमञ्जसमेवा[1]भाति अतो ब्रह्मकारणत्वं नोपपद्यत इत्याक्षिप्ते समाधत्ते ॥

सू० श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

तु-शब्द उक्तदोषं व्यावर्तयति नैवमसामञ्जस्यं कुतः श्रुतेः, श्रुतिस्तावन्निरवयवत्वं ब्रह्मणस्ततो विचित्रसर्गं चाह, श्रौतेऽथ यथाश्रुति प्रतिपत्तव्यमित्यर्थः । ननु च श्रुतिरप्यग्निना सिञ्चेदितिवत्परस्परान्वयायोग्यामर्थं प्रतिपादयितुं समर्था अत आह-

टी० "तदविभाग"मिति, एकत्विरवयवमविभागमित्यन्वयक्रमः, वेदान्तेष्वेक-शब्देन प्रतिपादितत्वान्निरवयवमतो निरस्तचिदचिद्विभागमित्यर्थः । सिद्धान्तिनाऽनभ्युपगतेऽप्यापातप्रतीते स्वरूपैक्यपक्षे दूषणमाह "एवं सती"ति, तत्रांशभेदेन परिहारं शङ्कते "अथे"ति, सौत्रं पदमाख्यातरूपेण दर्शयति "कुप्येयुरि"ति, । मुख्यार्थायोगाद् व्याचष्टे "बाधिता

१ असमञ्जसमिवाभाति पा० ।

भावेयुरि''ति, । बाधफलभूतकोप-शब्देन बाध उपचरित इति भावः । यद्यपीति एकशरीरे शरीरयंशः परिसमाप्त इति नान्यत्र स्यादित्यर्थः सू॰ श्रुतेस्तु शब्दमूलत्वात्, श्रुतेस्त्विति सूत्रखण्डं व्याचष्टे तु-शब्द इत्यादिना खण्डान्तरं शङ्क्याऽवतारयति "ननु चे"ति,

भू॰ शब्दमूलत्वादिति शब्दैकप्रमाणकत्वेन सकलेतरवस्तु-विसजातीयत्वादस्यार्थस्य विचित्रशक्तियोगो न विरुध्यत इति न सामान्यतोदृष्टं साधनं दूषणं वाऽर्हतीति ब्रह्म ॥

सू॰ आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

किञ्चैवं वस्त्वन्तरसम्बन्धिनो धर्म्मस्य वस्त्वन्तरे चारोपणे सत्यचेतने घटादौ दृष्टा धर्म्मास्तद्विसजातीये चेतने नित्ये आत्मन्यपि प्रसज्यन्ते, तदप्रसक्तिश्च भावस्वभाववैचित्र्यादित्याह "विचित्राश्च ही"ति, यथाऽग्निजलादीनामन्योन्यविसजातीयानामौष्ण्यादिशक्तयश्च विसजातीया दृश्यन्ते तद्वल्लोकदृष्टसर्व्वविसजातीये परे ब्रह्मणि तच्च तचादृष्टाः सहस्रशः शक्तयस्सन्तीति न किञ्चिदनुपपन्नं, यथोक्तं भगवता पराशरेण "निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः । कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते" ॥ इति, सामान्यदृष्ट्या परिचोद्य "शक्तयः सर्वभावामचिन्त्यज्ञानगोचराः । शत[1]शोब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः । भवन्ति तपतां श्रेष्ठ । पावकस्य यथोष्णते"ति श्रुतिश्च किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवीनिष्टतक्षुः मनीषिणो मनसा पृच्छते तु तद्य-

१ यतोऽतोब्रह्मस्तास्तु पा॰ ।

दध्यतिष्ठद्भुवनानि धारयन् । ब्रह्मवनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद् भुवनानि धारयन्निति

टी० "शब्दमूलत्वादिती"ति, अग्निना सिञ्चेदित्यादिषु सेचनसाधनतानर्हत्वं धर्मिणः प्रत्यक्षसिद्धम् अतो न तदर्हत्वं वाक्यं प्रतिपादयति प्रमाणान्तरागोचरस्य तु धर्मिणो विलक्षणत्वं शास्त्रेण प्रतिपाद्यमिति विलक्षणधर्मिणो विलक्षणधर्मयोगो न विरुद्ध इत्यर्थः । सामान्यतो दृष्टमिति लोके द्रव्यत्वादग्निरनुष्ण इतिवद्येन केनचिदाकारेण यस्य कस्यचित्साहचर्य्यमात्रदर्शनेन तत्सामान्याद्यत्साधनं दूषणं वा क्रियते न तदर्हतीत्यर्थः सू॰ आत्मनि चैवं विचित्राश्च हि, तदप्रसक्तिश्चेत्यध्याहारेण व्याख्यातम् । उक्तस्फुटीकरणायाह "यथोक्तमि"ति, पुराणवचनस्य स्फुटार्थत्वात् पूर्वोपादानं वचनद्वयमध्यगतस्य परिचोद्येति पदस्य यथोक्तमिति पूर्वेणान्वयः । पुराणश्रुतिवचनयोरर्थमाह—

सू० सामान्यतो दृष्टं चोद्यं सर्ववस्तुविलक्षणे परे ब्रह्मणि नावतरतीत्यर्थः ॥ इतश्च

सू० स्वपक्षदोषाच्च ॥ २९ ॥

स्वपक्षे प्रधानादिकारणवादे लौकिकवस्तुविसजातीयत्वाभावेन प्रधानादेर्लोकदृष्टा दोषास्तत्र भवेयुरिति सकलेतरविलक्षणं ब्रह्मैव कारणमभ्युपगन्तव्यं, प्रधानं च निरवयवं तस्य निरवयवस्य प्रधानस्य कथमिव महदादिविचित्रजगदारम्भ उपपद्यते सत्त्वं रजस्तम इति, तस्यावयवा विद्यन्त इति चेत् तत्रेदं विवेचनीयं किं सत्त्वरजस्तमसां

सम्बन्धः प्रधानम्? उत सत्त्वरजस्तमोभिरारब्धं प्रधानं? मन्वन्तरे कल्पे प्रधानं कारणमिति स्वाभ्युपगमविरोधः, स्वाभ्युपेतसंख्याविरोधश्च, तेषामपि निरवयवानां कार्यारम्भविरोधश्च, सम्बन्धपक्षे च तेषां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां न स्थूलद्रव्यारम्भकत्वसिद्धिः, परमाणुकारणवादेऽपि तथैव, अणवो हि निरंशाः निष्प्रदेशाः प्रदेशभेदमनपेक्ष्य परस्परं संयुज्यमाना अपि न स्थूलकार्य्यारम्भाय प्रभवेयुः ॥

सू० सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

सकलेतरवस्तुविसजातीया परा देवता सर्वशक्त्युपेता च तथैव परां देवतां दर्शयन्तीह श्रुतयः "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। तथा, "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः," इति सकलेतरविसजातीयतां परस्याः देवतायाः प्रतिपाद्य

टी० "सामान्यत" इति सू० स्वपक्षदोषाच्च, दर्शनानुगुणमनुमीयमानस्यैव लोकदृष्टप्रसङ्ग इत्यर्थः, स्वाभ्युपगमविरोधः प्रधानस्य परमकारणत्वासिद्धेः संख्याविरोधश्चतुर्विंशतितत्त्वाधिक्यात् प्रदेशभेदमनपेक्ष्य संयुज्यमानानामिति, असंयुक्तप्रदेशभेदरहितसंयोगवतामित्यर्थः लोके हीष्टकादयः पूर्वपूर्वासंयुक्तैः प्रदेशैः संयुज्यमानाः पृथुकार्यारम्भका दृष्टः इत्यर्थः, सू० सर्वोपेता च तद्दर्शनात्, श्रुत्या निरवयवत्वकार्यत्वप्रतिपादनात् तदनुगुणशक्तियोगः कल्प्यः, धर्म्मिवैजात्यं च कल्प्यमित्युक्तम्, इदानीं धर्म्मिवैलक्षण्यविलक्षणधर्मयोः कण्ठोक्तिः प्रदर्शिता इति भेदः, अपहतपाप्मेत्यादिना धर्म्मिवैलक्षण्यसिद्धिः, एवं धर्म्मिवैलक्षण्याद्धर्मवैलक्षण्य-

Digitized by Google

कल्पनादपि सर्वशक्तित्वकार्येण सत्यसङ्कल्पत्वेन विलक्षणशक्तिमतीतिरा-सवेत्यभिप्रायेणाह–

भू० सत्यकामः सत्यसङ्कल्प इति सर्वशक्तियोगं प्रतिपादयन्ति, तथा, "मनोमयः प्राणशरीरो भारूपः सत्यकामः सत्यसङ्कल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तो वाक्यनादर" इति च ।

सू० विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

यद्यप्येकमेव ब्रह्म सकलेतरविलक्षणं सर्वशक्ति तथाऽपि न तस्य कार्यं करणं च विद्यत इति करणविरहिणस्तस्य न कार्यारम्भः सम्भवतीति चेत् तत्रोत्तरं शब्दमूलत्वात्, विचित्रास्त्र हीत्युक्तं शब्दैकप्रमाणकं सकलेतरविलक्षणं तत्तत्करणविरहेणापि तत्तत्तत्कार्य्यसमर्थमित्यर्थः, तथा च श्रुतिः "पश्यत्यचक्षुः स शृणोत्यकर्णः अपाणिपादो जवनो ग्रहीता इत्येवमाद्या कृत्स्नप्रसक्त्यधिकरणं समाप्तम् ॥

टी० "सत्यकामः सत्यसङ्कल्प" इति, सू· विकरणत्वान्नेति चेत्तदुक्तम् उपसंहारदर्शनादिति सूत्रे परिकराभावेऽपि सङ्कल्पमात्रेण सृष्ट्युपपत्तिरुक्ता अत्र तु दण्डचक्रादिपरिकरनिरपेक्षस्यापि करणकलेवरापेक्षा दृष्टेति शङ्का-परिह्रियत इति विशेषः, न तस्येति वाक्ये कार्य–शब्देन शरीरमुच्यते कर-णमिन्द्रियं सूत्रे भाष्ये च करण–शब्दः कार्यस्य शरीरस्याप्युपलक्षणार्थः अत्र मृषावादिनः आहुः–निरवयवं ब्रह्म एकदेशेन कार्यापयुक्तं चेति व्याहतमतस्तदुभयं न शास्त्रेण शक्यप्रतिपादनं शब्दस्याकाङ्क्षासन्निधि-योग्यतापेक्षाप्रतिपादनात् अतः परमार्थरूपेण निरवयवस्य सावयवत्वम-विद्याकल्पितरूपभेदेनेति वाच्यं न हि चन्द्रद्वित्वाभावेऽपि चन्द्रो बहुधा विभज्यते इति, अत्रोच्यते तत्र तावच्छब्दमूलत्वादिति सूत्राननुगुणत्वं

Digitized by Google

तदा मिथ्यात्वादिति हि वक्तव्यं प्रपञ्चमिथ्यात्वगोचरशब्दो विवक्षित इति चेन्न नात्मा श्रुतेः, शब्दविशेषादनावृत्तिः शब्दादितिवदत्रापि मिथ्याविषयत्वाप्रतीतेः, प्रपञ्चमिथ्यात्वविषयस्य कस्यचिदपि वाक्यस्याभावाच्च । किञ्चाविद्याकल्पितरूपेण सावयवं ब्रह्मेति ननूक्तं भवद्भिः अविद्या किं ब्रह्मैकदेशाश्रया तदेकदेशे कार्य्यं कल्पयति? उत कृत्स्नब्रह्मणि? आद्ये सावयवत्वप्रसङ्गः, द्वितीये अविद्यानिर्मुक्तब्रह्मासम्भवः, ततश्च सुषुप्तौ सत्सम्पत्तिः द्रष्टव्यत्वमिन्द्रियागोचरत्वमतोऽज्यायानित्यादिकमनुपपन्नं स्यात् विकृतेन ब्रह्मणा नित्यसम्पन्नत्वात् तस्यैन्द्रियकत्वादतो ज्यायस्त्वाभावाच्चेति भवद्भिरेवोक्तं यदेव ब्रह्म काल्पनिकरूपेण कारणं तदेव परमार्थतोऽविद्यानिर्मुक्तमिति चेत्परमार्थतोऽविद्यानिर्मुक्तत्वं नाम किं निवृत्ताविद्यत्वम्? उतानिवृत्तस्याप्यविद्यासंसर्गस्यापरमार्थत्वं? प्रथमे च किं ब्रह्मस्वरूपे क्वचिदविद्याविरह? उत सर्वत्र? आद्ये सावयवत्वम्, इतरत्र संसारभ्रमानवभासप्रसङ्गः, प्रथमविकल्पे द्वितीयशिरसि चापरमार्थभूतोऽविद्यासंसर्गः किं ब्रह्मणि क्वाचित्कः? उत सार्वत्रिक? आद्ये सावयवत्वं, द्वितीये कृत्स्नप्रसक्तिरङ्गीकृता स्यात्, कृत्स्नस्य ब्रह्मणोऽविद्यातिरोहितत्वात्परमार्थभूतोऽविद्यायोगो नास्तीति चेत् न, तावताऽविद्यानिर्मुक्तब्रह्मसिद्धिः, अविद्यानिर्मुक्तब्रह्मसिद्धिः अविद्यायोगो यादृशोऽभिमतस्तादृशस्यानिवृत्तत्वात्, यथा स्वप्नदृष्टापरमार्थपङ्कसंसर्गाभावेन जाग्रद्दशायां परमार्थपङ्कलिप्तो न लिप्तो न भवति । किञ्च किमविद्याकल्पितरूपमित्यविद्याविशिष्टं ब्रह्म विवक्षितम्? उतोपलक्षित? मुत त्रिगुणात्मकं प्रधानम्? अविद्याकल्पितरूपमिति विवक्षितम्? आद्ये विशेषणांशस्येव विशेष्यांशस्यापि सावयवत्वं स्यात्, द्वितीये विशेष्यांशस्यैव सावयवत्वं स्यात्, तृतीये च प्रधानं सावयवं परिणमते चेत् ब्रह्मणः कथं कारणत्वं प्रकृतेर्ब्रह्माश्रयत्वेनेति चेत् तद्दर्शनादेरबाधितायास्तस्या अविद्याकल्पितत्वाभावेन प्रकृतिशरीरकं ब्रह्म वास्तवप्रपञ्चकारणमित्यभ्युपगमोवरं सकप्रमाणन्यायानुपरोधित्वात, । ननु प्रकृतिविशिष्टस्य कारणत्वे विशेष्यांशस्यपि सावयवत्वं त्वन्मतेऽपि स्यात्, नैवं विशिष्टताङ्गीकारे

विशेषणविशेष्ययोः स्वभावव्यवस्थादर्शनाच्छरीरविशिष्टस्य प्रवृत्तिहेतुत्वेऽपि शरीरात्मनोः स्वभावव्यवस्था हि दृश्यते विशिष्टस्य कारणत्वमेव ह्यभ्युपगतं न तु सावयवत्वं तत्तु विशेषणांशस्यैव, अतो न कश्चिद्दोषः, आत्मनि स्वप्नदर्शिनि स्वरूपानुपमर्दनेन विविधसृष्टिवन्मायाविनो हस्त्यादिसृष्टिवच्च ब्रह्मस्वरूपानुमर्दन ब्रह्मस्वरूपानुपमर्देनेनाकारसृष्टिरिति आत्मनि चैवमिति सूत्रव्याख्यानमप्ययुक्तं स्वप्नसृष्टिवाक्यस्य परमात्मविषयत्वात्स हि कर्ता तस्मिन् लोकाः स्थिता इति हि वाक्यशेषः, ततश्च परमात्मकारणत्वविमतौ तदेव दृष्टान्तत्वेन वक्तुमयुक्तं मन्त्रौषधादिभिः सृजतो मायाविनश्च हस्त्यादिकार्य्ये प्रत्युपादानत्वाभावात्सावयवत्वाच्च घटशरावादिकं प्रतिकुलालादेरिवकर्तृत्वमात्रमिति निरवयवस्याकृत्स्नप्रसक्तौ दृष्टान्तत्वमनुपपन्नं।यादवमिश्रास्तु भोक्तृभोग्यनियन्तृष्वन्यतमांशे कृत्स्नपरिसमाप्तेरितरांशद्वयासम्भव इति पूर्वपक्षं कृत्वा स्वतोनिरवयवमपि सर्वशक्तियोगात् परिणामेन सावयवं बहु भवतीति सिद्धान्तयन्ति, तदयुक्तमेकस्य बीजस्य शक्तिमतः परिणामेन शाखापत्रपुष्पादिरूपेणेव प्रकृत्यादिरूपेण बहुभवने प्रकृतिपुरुषेश्वराणाम् अनादित्वनित्यत्वश्रुतिविरोधस्यावर्जनीयत्वात् सद्द्रव्यमात्रानादितया तेषामनादित्वे शाखापत्रपुष्पादीनामपि तथाऽनादित्वात्तैरविशेषप्रसङ्गः, परिणामानपेक्षानाद्यंशभेदे स्वतोनिरवयवत्वं न स्यात् निरवयवत्वश्रुतिरीश्वरांशविषयेति चेत्तर्हि जगदुपादानस्य ब्रह्मणः कृत्स्नप्रसक्तिनिरवयवत्वविरोधोऽपरिहृतः स्यात् निरंशस्योपादानत्वाभावात्, एवं जीवानामपि प्रत्येकं निरवयवत्वे दोषः समानः भोक्त्रंशस्याप्युपादानत्वाभावात् प्रकृत्यंशस्य तदुभयविरोधपरिहारे प्रधानकारणवादे चोद्यं परिहृतं स्यात् न तु ब्रह्मकारणवादे । किञ्च निरवयवत्वाकृत्स्नोपयोगविषयश्रुतिबलात् ब्रह्मणो विलक्षणत्वेऽपि निरवयवत्वमाकाशरूपरसादीनां निरवयवत्वादविलक्षणं सावयवतया परिणामप्रतिभटमित्युक्तदोषप्रसङ्ग इत्याशङ्क्य निरवयवत्वमपि शब्दमूलत्वादपूर्वं ब्रह्मणस्सावयवतया परिणामार्हत्वानिवारकमिति व्याख्यातं तदप्ययुक्तं धर्म्मिवैलक्षण्ये सति विलक्षणधर्मासम्भवशङ्कानुदयात्, धर्मवैलक्षण्याभावे

Digitized by Google

हि धर्मिवैलक्षण्यमेव न स्यात्, तस्माद्विलक्षणधर्म्मयोगे श्रुतेरिति प्रतिपादिते तदसम्भवशङ्कायां तत्सम्भवाय शब्दमूलत्वादिति धर्म्मिवैलक्षण्यप्रतिपादनमेव युक्तं, तथा सर्वोपेतेत्यधिकरणान्तरं च वर्णितम्, अशब्दमस्पर्शं सर्वकर्मा सर्वकामः बहु स्यामासीनोदूरं व्रजति शयानो याति सर्वतः अनेजदेकं मनसो [1]जवीयस्तद्धावतोन्यानत्येति तिष्ठन् पश्यत्यचक्षुरिति विरुद्धकार्याणां भ्रान्तिसिद्धत्वपूर्वपक्षीकृत्यांशभेदेनोपपन्नानि तानि सत्यानि तेषां च कार्य्याणां चक्षुःश्रोत्रपाणिपादादिसापेक्षत्वव्याप्तिभङ्गेन सर्वशक्तियोगोपपत्तेरिति सिद्धान्तितं तत्राधिकरणभेदोऽनुपपन्नः सर्वोपेता चेति चशब्देन पूर्वसूत्रसाध[2]नस्यैवोपपादकत्वावगमात् प्रकृतं साध्यं प्रत्युपयोगितया पाश्चात्यसूत्रद्वयार्थस्य तदार्थ्यसम्भवाच्च, तत्सम्भवश्च फलफलिभावे दर्शितः सर्वनामरूपोपेतत्वं च सर्वोपेत–शब्दार्थ उक्तः, भाष्ये तत्तदनुक्तिस्तस्योपपादकत्वाभावात् निरवयस्यापि सर्वकारणत्वे शर्वशक्त्यन्वय एव ह्युपपादकः नामरूपोपेतत्वं तू[3]पाधिकोटिघटितं, श्रुतिवाक्यं तु श्रुतेस्त्वित्यैव विवक्षितम् अत इह तदनुपादानम् ॥ कृत्स्नप्रसक्त्यधिकरणं समाप्तम् ॥

प्रयोजनवत्त्वाधिकरणम् । **सू० न प्रयोजनवत्त्वात् ॥ ३२ ॥**

भू० यद्यपीश्वरः प्राक्सृष्टेरेक एव सन् सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः स्वयमेवं विचित्रं जगत्स्रष्टुं शक्नोति तथाऽपीश्वरस्य कारणत्वं न सम्भवति, प्रयोजनवत्त्वाद् विचित्रसृष्टेः, ईश्वरस्य च प्रयोजनाभावात् बुद्धिपूर्वकारिणामारम्भे द्विविधं हि प्रयोजनं स्वार्थः परार्थो वा, न हि परस्य ब्रह्मणः स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किञ्चन प्रयोजनमनवाप्तमवाप्यते, नापि

१ अनेजते कर्म सतोदवीयस्तद्धावतोऽन्यानत्येति तिष्ठन् ।
२ पूर्वसूत्रसाध्यस्यैवेति पा० ।
३ तूपापाद्यकोटिघटकमिति पा० ।

Digitized by Google

परार्थः अवाप्तसमस्तकामस्य परार्थता हि परानुग्रहेण भवति न चेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं जगत्करुणावान्सृजति, प्रत्युत सुखैकतानमेव सृजेज्जगत्करुणया सृजन् ।

टी० सू० न प्रयोजनवत्त्वात्, सङ्गतिः स्पष्टा कारणत्वं सम्भवति? ने? ति विचारः तदर्थमवाप्तसमस्तकामस्य लीलाप्रयोजनं नेति लीलायां वैषम्यनैर्घृण्ये प्रसज्येते नेति च, यदा प्रसज्येते यदा च लीला न प्रयोजनं तदा लीलारूपव्यापारासम्भवात् कारणत्वासम्भवः यदा न वैषम्यादिप्रसङ्गः यदा च लीलाप्रयोजनं तदाऽवाप्तसमस्तकामस्य लीलारूपव्यापारसम्भवात्, कारणत्वसम्भव इति सिध्यति, प्रयोजनवत्त्वं कस्येत्यपेक्षायां पूरयति "विचित्रसृष्टेरि"ति, तस्य नेति पदेनान्वयस्य विरुद्धत्वादभिप्रेतमाह "ईश्वरस्य चे"ति, तदेव विवृणोति "बुद्धिपूर्वे"ति,–

भू० अतः प्रयोजनाभावाद्ब्रह्मणः कारणत्वं नोपपद्यत इति, एवं प्राप्ते प्रचक्ष्महे–

सू० लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

अवाप्तसमस्तकामस्य परिपूर्णस्य स्वसंकल्पविकार्य्यविविधविचित्रचिदचिन्मिश्रजगतसर्गे लीलैव केवलं प्रयोजनं लोकवत्, यथा लोके सप्तद्वीपां मेदनीमधितिष्ठतः सम्पूर्णशौर्य्यवीर्यपराक्रमस्यापि महाराजस्य केवललीलैकप्रयोजनाः कन्दुकाद्यारम्भा दृश्यन्ते तथैव परस्यापि ब्रह्मणः स्वसंकल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनमिति निरवद्यम् ॥

टी० सू० लोकवत्तु लीलाकैवल्यम्, लीलैव केवलेति पणबन्धपूर्वककूतादिव्यावृत्त्यर्थः केवल-शब्दः प्रयोजनान्तरानुद्देशेन प्रवृत्तत्वेऽपि यद्वृ-

च्छोपनतप्रयोजनस्यार्थात् सिद्धिव्युदासार्थं एवकारः । ननु कन्दुकाद्या-रम्भणस्य लीलात्वं युक्तं यत्र गौरवाभावात् जगद्व्यापारस्य तु लीलात्व-मनुपपन्नं महायासरूपत्वादिति शङ्कानिवृत्त्यर्थमाह "स्वसङ्कल्पमात्राऽव-क्लृप्ते"ति,

सू० वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ ३४ ॥

वृ० यद्यपि परमपुरुषस्य सकलेतरचिदचिद्वस्तुविलक्षणस्या-चिन्त्यशक्तियोगात्प्राक्सृष्टेरेकस्य निरवद्यस्यापि विचित्रचिदचिन्मिश्रजगत्सृष्टिः सम्भाव्येत तथाऽपि देवतिर्य्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः प्रसज्येत अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीयमिति तत्रोत्तरं न सापेक्षत्वादिति, न प्रसज्येयातां वैषम्यनैर्घृण्ये कुतः सापेक्षत्वात्, सृज्यमानदेवादिक्षेत्रज्ञकर्मसापेक्षत्वाद्विषमसृष्टेर्देवादीनां क्षेत्रज्ञानां देवादिशरीरयोगं तत्तत्कर्मसापेक्षत्वं दर्शयन्ति हि श्रुतिस्मृतयः "साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणा" तथा भगवता पराशरेणापि देवादिवैचित्र्यहेतुः सृज्यमानानां क्षेत्रज्ञानां प्राचीनकर्मशक्तिरेवेत्युक्तं, "निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि । प्रधानकारणीभूता यतो वै सृज्यशक्तयः" ॥ निमित्तमात्रं मुक्त्वैव नान्यत्किञ्चिदपेक्षते । नीयते तपसां श्रेष्ठ ! स्वशक्त्या वस्तु वस्तुता"मिति स्वशक्त्या स्वकर्मणैव देवादिवस्तुताप्राप्तिरिति ॥

Digitized by Google

टी० सू० वैषम्यनिर्घृण्ये न सापेक्षत्वात्तथा दर्शयति, वैषम्य–शब्दः पक्षपात–शब्देन व्याख्यातः। कस्य किमपेक्षमित्यत्राह "सृज्यमाने"ति, ईश्वरश्चेत्र सृष्टौ कार्यसापेक्षः किं तु वैषम्यांश एव तदपेक्षा अतो विषमसृष्टेरित्यध्याहृतं निमित्तमात्रमेवासाविति अप्रधानकारणं निमित्त–शब्देन विवक्षितं प्रधानकारणीभूता इति तत्रैव निर्द्देशात्, यथा "निमित्तमात्रं भव सव्यसाचिन्" इति, तद्दुत्प्राधान्यं चासाधारणकारणत्वं साधारणकारणत्वम् अप्राधान्यं यथा क्षेत्रसलिलादिकं सर्वसस्यसाधारणकारणं तत्तद्बीजशक्तिविशेषाङ्कुरविशेषोत्पत्तावसाधारणकारणं येश्वरस्य साधारणकारणत्वान्निमित्तमात्रत्वं कर्मणां विषमसृष्ट्यसाधारणकारणत्वात्प्राधान्यमित्यर्थः ॥

सू० न कर्म्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ॥ ३५ ॥

भा० प्राक्सृष्टेः क्षेत्रज्ञा नाम न सन्ति कुतः अविभागश्रवणात् "सदेव सोम्येदमग्र आसीदि"ति अतस्तदानीं तदभावात्तत्कर्म न विद्यते कथं तदपेक्षं सृष्टिवैषम्यमित्युच्यत इति चेन्न अनादित्वात्, क्षेत्रज्ञानान्तत्कर्म्मप्रवाहाणां च तदनादित्वेऽप्यविभाग उपपद्यते च यतस्तत्क्षेत्रज्ञवस्तुपरित्यक्तनामरूपं ब्रह्मशरीरतयाऽपि पृथग्व्यपदेशानर्हम् अतिसूक्ष्ममवतिष्ठते तथाऽनभ्युपगमे अकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च, उपलभ्यते च तेषामनादित्वं "न जायते म्रियते वा विपश्चि"दिति, सृष्टिप्रवाहानादित्वं च "सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्प"यदित्यादौ, "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते" इति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धं, स्मृतावपि "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभा-

Digitized by Google

"अगारैकदेशे प्रघणः प्रघाणश्च" ॥ 'द्वारप्रकोष्ठो बाह्य उच्यत-इति' । द्वारप्रदेशे द्वौ प्रकोष्ठावलिन्दावाभ्यन्तरो बाह्यश्च तत्र बाह्ये प्रकोष्ठे निपातनं नागारैकदेशमात्रे, एतच्च निपातनाल्लभ्यते, प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यतइति अप् कर्मणि पक्षे वृद्धिश्च ॥

"उद्घनोत्याधानम्" ॥ 'अत्याधानमिति' । अतिशब्द उपरिभावे वर्त्तते, आदधातिः स्थापने, अधिकरणे ल्युट्, उद्घन इत्यत्राप्यधिकरण-एवाप् ॥

"अपघनोङ्गम्" ॥ 'अपघन इति' । करणेप् ॥

"करणेयोविद्रुषु" ॥ 'द्रुघन इति' । द्रुरिति वनस्पतिनाम वनस्पतयो वै द्रव इति निगमो भवति । 'पूर्वपदात्सञ्ज्ञायामग इति वेति' । संज्ञा चैषा कुठारविशेषस्य ॥

"स्तम्बे क च" ॥ 'तत्र चेति' । अनन्तरोक्तेऽपि के तु घनादेशो न भवति पूर्वमेव घनादेशस्याप्सम्बन्धित्वात् । 'स्तम्बघ्न इति' । उपपद-समासः, गमहनेत्युपधालोपः, होहन्तेरिति कुत्वम् । 'स्त्रियामित्यादि' । एतच्च कापोः प्रतिपदविधानात्सर्वापवादत्वात् कृत्यल्युटो बहुलमिति वचनाद्वा लभ्यते, अन्ये पुनरूतियूतिजूतिसातिहेतीति हन्तेः क्तिनि निपात-नाच्चिपातनस्य च सर्वापवादत्वात्स्तम्बहेतिरितीच्छन्ति, अपरे तु करणाधि-करणयोश्चेति ल्युटि स्तम्बहननीति भवितव्यम्, यथा रक्षोयातूनां हननी-त्युक्तमित्याहुः । 'स्तम्बघात इति' । भावे घञ्, षष्ठीसमासः ॥

"परौ घः" ॥ 'पलिघ इति' । परेश्च घाङ्कयोरिति विभाषा लत्वम् ॥

"उपघ्न आश्रये" ॥ 'आश्रयशब्द इत्यादि' । आश्रयणमाश्रयः स प्रत्यासत्त्या ऽविनाभावीत्येष लक्षणा हेतुः । 'पर्वतोपघ्न इति' । पर्वते-नोपहन्यते सामीप्येन गम्यतइति कर्मण्यप् ॥

"संघोद्घौ गणप्रशंसयोः" ॥ संहननं संघो भावेप्, उद्धन्यते उत्कृष्टो ज्ञायतइति कर्मण्यप्, गत्यर्था बुद्ध्यर्था इति हन्तिर्ज्ञाने वर्त्तते । 'उद्घो मनुष्याणा[1]मिति' । मनुष्याणां मध्ये प्रशस्त इत्यर्थः ॥

---

[1] मुद्रितमूलपुस्तके मनुष्य इति प्रथमान्तपाठोऽपपाठः ।

"निघो निमितम्" ॥ 'समारोहपरिणाहमिति'। आरोह उच्छ्रायः, परिणाहो विस्तारः, तौ समानौ यस्य तत्तथोक्तम्। 'निघा वृत्ता इति'। निर्विशेषं हन्यन्ते ज्ञायन्तइति कर्मण्यप् ॥

"ड्वितः क्त्रिः"॥ 'भावे ऽकर्त्तरि च कारके इति वर्त्ततइति'। अधिकारस्याविच्छेदं दर्शयति, अयं तु क्त्रिप्रत्ययः स्वभावाद्भावएव भवति पाकेन निर्वृत्तं पक्त्रिममित्युच्यते न तु पक्केनेति। 'केवलो न प्रयुज्यतइति'। तेनावश्यमन्यशब्देनैव विग्रहः कर्त्तव्यः, तद्दर्शयति। 'पाकेन निर्वृत्तं पक्त्रिममिति'। 'उप्त्रिममिति'। यजादित्वात्सम्प्रसारणम्, अथ ड्वितः त्क्रिममित्येव कस्मान्नोक्तमेवं हि त्क्रेर्मम् नित्यमिति न वक्तव्यं भवति, नैवं शक्यम्, भावइत्यधिकाराद्भावेपि कृत्रिममिति प्राप्नोति, अथाप्युभयानुवृत्तावप्यभिधानस्वाभाव्यात्कारकएव कर्मणि भवेद् एवमपि भूतकालो न गम्येत, एतदप्यभिधानस्वाभाव्याद्भवतु नाम एवमर्थाभिधाने प्रकारभेदो न स्यात् नहि पक्वपक्त्रिमशब्दयोः पर्यायतां मन्यन्ते ॥

"ट्वितो ऽथुच्" ॥ अयमपि स्वभावाद्भाव एव भवति घञादेरपवादो वासरूपविधिना सोपि भवत्येव ॥

"यजयाचयतविच्छप्रच्छरक्षो नङ्" ॥ नङो ङकारो विच्छेर्गुणप्रतिषेधार्थः, अन्यथान्तरङ्गत्वात्तुक्कि छ्वोः शूडनुनासिके चेति सतुक्कस्य छस्यादेशे कृते लघूपधत्वाद्गुणः स्यात्, नङन्ताः सर्वे पुल्लिङ्गाः, याचिस्तु स्त्रीलिङ्गः, वासरूपविधिश्च यथाभिधानं भवति। 'प्रश्न इति'। अत्र ग्रहिज्यादिसूत्रेण सम्प्रसारणं कस्मान्न भवतीत्याह। 'प्रच्छेरिति' ॥

"कर्मण्यधिकरणे च" ॥ कर्माधिकरणयोः पृथक् पृथक् सप्तमीनिर्द्देशाच्च तावदुभयोरुपपदत्वं तत्र व्याख्यानात्कर्मोपपदमधिकरणं तु प्रत्ययार्थ इत्याह। 'कर्मण्युपपदइति'। 'अधिकरणग्रहणमर्थान्तरनिरासार्थमिति'। अर्थान्तरं भावः करणादि च कारकम् ॥

"स्त्रियां क्तिन्" ॥ 'घञजपामपवाद इति'। येन नाप्राप्तिन्यायेन घञोपवादः, अजपोस्तु परत्वादपवादो बाधक इत्यर्थः, उक्तं च अजब्भ्यां

स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति । अजपोरवकाशः चयः जयः लव इति, क्तिनोवकाशः कृतिर्हृतिः, चितिः स्तुतिरित्यत्रोभयप्राप्तौ क्तिन् भवति विप्रतिषेधेन, लब्धिः, षित्त्वादङपि भवति लभेति । ननु निष्ठायां वा सेटोऽकारवचनात्सिद्धमिति ब्रुवता वार्तिककारस्य गुरोश्च हल इत्यकारप्राप्ताविवाबादिभ्यश्चेति क्तिचभिमत इति गम्यते तत्कथमङ्विषये क्तिचुदाहृतः, सत्यं, प्रयोगबाहुल्यादिदमपि भवतीति मन्यते, एवं च युज्विषयेपि क्तिन्प्रयुज्यते आस्तिरिति, अत एवाबादयः प्रयोगतोनुसर्त्तव्या इत्युक्तम् । 'श्रुयजिस्तुभ्यः करणइति' । ल्युटि प्राप्ते वचनम्, श्रुतिः श्रोत्रम्, इज्यतेऽनया देवता इष्टिः । 'ऋकारल्वादिभ्य इति' । ऋकारान्तेभ्यो ल्वादिभ्यश्च परः क्तिन्निष्ठाकार्यं लभते रदाभ्यां निष्ठातो नः ल्वादिभ्य इति च निष्ठायां विधीयमानं नत्वं क्तिनोपि भवतीत्यर्थः । 'क्तिचपीष्यतइति' । अस्त्रियामिति प्रतिषेधाद्वासरूपविधेरभावादिदमुक्तम् ॥

"स्थागापापचो भावे" ॥ 'अङोपवादस्य बाधक इति' । स्थादिभ्य आतश्चोपसर्गइति प्राप्तस्य पचेस्तु षित्त्वात्प्राप्तस्याङोपवादः । कां स्थायिकां कां स्थायिमित्यत्र विभाषाख्यानपरिप्रश्नयोरिति प्राप्तयोर्ण्वुलिञोरपि बाधकः कस्माच भवति पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरानिति । 'कथमिति' । न कथं चिद्वासरूपविधेरभावात् । 'नात्यन्तायेति' । नियमेन चतुर्थ्यन्तप्रतिरूपकोयं निपातो यथा चिरायेति ॥

"मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः" ॥ 'प्रकृतिप्रत्यययोरिति' । प्रकृतिसामान्यविवक्षायां द्विवचनमन्यथा बहुत्वात्प्रकृतीनां बहुवचनप्रसङ्गात् । 'विभक्तिविपरिणामेनेति' । वृषादीनां द्वन्द्वे या प्रथमा तस्याः पञ्चमीभावेन यो विपरिणामस्तेन प्रकृतिप्रत्यययोः संबन्धः, अन्यथा संबन्धानुपपत्तिरित्यर्थः । वृषु सेचने इषु इच्छायां, वृषिसाहचर्यादुदितो ग्रहणं सूत्रे त्वकारो न विवक्षितः, मन ज्ञाने मनु अवबोधने द्वयोरपि ग्रहणं विदादीनामपि यथादर्शनम् । 'सर्वत्रेति' । मन्त्रे चामन्त्रे

चेत्यर्थः । वृषादिभ्यः क्तिप्रत्यये विधातव्यउदात्तवचनमुत्तरार्थं, व्रजयजो-भावे क्यबुदात्तो यथा स्यात् प्रमतिरित्यादौ च तादौ च निति कृत्य-ताविति पूर्वपदप्रकृतिस्वरार्थं च, पिबतेरपि मन्त्रे क्तिचुदात्तो दृश्यते त्वं सुतस्य पीतये, मध्वः सोमस्य पीतयइति ॥

"ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च" ॥ 'मन्त्रइति नानुवर्त्तत-इति'। तेन ब्राह्मणे भाषायां चायं विधिर्भवति'। 'स्यतेरिति'। षोन्त कर्म-णीत्यस्य । 'इत्वाभ:व इति'। द्यतिस्यतीत्यादिना प्राप्तस्येत्वस्याभावः । 'सनोतेर्वेति'। षणु दानइत्यस्य । 'हन्तेर्हिनोतेर्वेति'। यदा हन्तेस्तदा नकारस्येत्वं निपात्यते, यदा हिनोतेस्तदा तु गुणः । 'कीर्त्तयतेरिति'। कृत संशब्दन-इत्यस्य चुरादिणिजन्तस्य ण्यासश्रन्थो युजिति युचोपवादः क्तिनि-पात्यतउदात्तत्वं च, इडभावस्तु तितुत्रेत्यादिना सिद्धः , उपधायाश्चेती-त्वम्, हलि चोपधायां चेति दीर्घत्वम् । कालापास्तु युचमपीच्छन्ति की-र्त्तनेति ॥

"व्रजयजोर्भावे क्यप्" ॥ 'इज्येति'। वच्यादिसूत्रेण संप्रसारणम्। यश्चुदात्त इति वर्त्तते पित्करणं किमर्थमित्यत आह । 'पित्करणमुत्तरत्र तुगर्थमिति' ॥

"संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः" ॥ 'भाव-इति न स्वर्यतइति ।' पूर्वसूत्रे यद्भावग्रहणं तस्येहास्वरितत्वाचानुवृत्तिरि-त्यर्थः । 'समज्येति'। घञपोः प्रतिषेधे क्यप उपसंख्यानमिति वचनाद्वीभा-वाभावः, अन्ये तु संज्ञायामित्येव क्यपो विधानात् रूढ्यनुगमार्थत्वाच्च संज्ञाग्रहणस्य वीभावाभावमाहुः, नहि वीभावे सति संज्ञा गम्यते । समज्या सभा, निषद्या आपणः, निपत्या पिच्छिला भूमिः, मन्या गलपार्श्वशिरा मन्यन्ते नयेति कृत्वा, तया हि क्रुद्धो ज्ञायते, क्यपोऽझलादित्वादनुदा-त्तोपदेशेत्यनुनासिकलोपो न भवति तदभावात्तुगपि न भवति, अन्ये तु संज्ञायामिति वचनाद्यथा समज्येत्यत्र वीभावो न भवति एवं मनेरनुनासि-कलोपस्तत्र कृते तुगपीत्याहुः । नात्राप्तवचनमस्ति । विद्यते ज्ञायतेनयार्थ इति विद्या, सूयतेभिषूयते सोमोस्यामिति सुत्याभिषवदिवसः, सुत्यमह-

हृत्तमर्मिति त्वार्थे नपुंसकत्वम्, शय्यतेस्यामिति शय्या खट्वादिः, भरणं भृत्या जीविका, ईयते गम्यतेनयेतीत्या दीपिका, भृञोसंज्ञायामित्यत्रोक्तं स्त्रियां भावाधिकारोस्ति तेन भार्या प्रसिद्ध्यतीति, इह तु भावइति न स्वर्यतइत्युक्तं, तत्र पूर्वापरविरोधं मन्यमानः पृच्छति। 'कथं तदुक्तमिति'। परिहरति। 'भावाधिकार इति'। संज्ञायामित्युच्यते भृञश्च भावएवोत्पद्यमानेन क्यपा संज्ञा गम्यते ऽतः संज्ञावशाद्योयं भावस्य भृत्याशब्दवाच्यत्वेन व्यापारः स एव तत्र भावाधिकारो विवक्षितो न तु शास्त्रीयः स्वरितत्वनिबन्धन इत्यर्थः, संज्ञायामिति वर्त्तमाने पुनः संज्ञाग्रहणं भावार्थं, पूर्वकं हि संज्ञाग्रहणं कारकेण संबद्धम् असंज्ञायां तु क्तिन्नेव भवति ॥

"व्रजः श च" ॥ 'योगविभाग इति'। व्रजः क्यब् भवति ततः श च चकाराद्यथाप्राप्तं चेति तेन त्रीणि रूपाणि भवन्ति, अन्यथा चकारेणानन्तरस्य क्यप एव समुच्चयो न तु क्तिन इति क्तिन्न स्यात्, शकारः सार्वधातुकसंज्ञार्थस्तत्र यदा भावकर्मणोः शस्तदा सार्वधातुके यक् रिङ् शयग्लिङ्क्ष्विति रिङादेशोन्यत्र शकार एव परतो रिङादेशोचिश्नुधात्वित्यादिनेयङ् ॥

"इच्छा" ॥ 'इषेर्द्धातोरिति'। इषु इच्छायामित्यस्माद्भावे शप्रत्ययो भवतीति न त्वकर्त्तरि कारके स्वभावात्। 'परिचर्येत्यादि'। परिचर्यादीनामपि निपातनस्योपसंख्यानं परिचर्यादयोपि शप्रत्ययान्ता निपातयितव्या इत्यर्थः, तत्र सर्वत्र शप्रत्ययो यक्च निपात्यते, परिचर्या पूजा, परिसर्या परिसरणमत्र गुणोपि निपात्यते, मृग अन्वेषणे चुरादावदन्तोत्रातो लोपाभावो निपातनात्, शे यकि णिलोपः, मृगया, अटतेः शे यकि यका सह टकारस्य द्विर्वचनं पूर्वभागे यकारस्य निवृत्तिर्दीर्घत्वमित्येतत्सर्वं निपात्यते, हलादिशेषस्तु नास्ति षाष्ठिके द्विर्वचनेभ्याससंज्ञाविधानाद् यदा त्वट्यर्त्त्यशूर्णोतीनामिति यङन्तादप्रत्ययादित्यकारस्तदातोलोपे यलोपे चाटाटेति भवति। 'जागर्त्तेरकारो वेति'। वाशब्दात्पक्षे शः, तदा सार्वधातुके यक्, जाग्रोविचिण्णल्ङित्स्विति गुणः ॥

"गुरोश्च हलः" ॥ प्रकृतस्य धातोर्हला विशेषणात्तदन्तविधिरित्याह । 'हलन्तो यो धातुरिति'। अविशेषवाचिनो गुरुशब्दस्य हलन्ते धातौ न मुख्या वृत्तिः सम्भवतीति तद्वृति तच्छब्दो विज्ञायतइत्याह । 'गुरुमानिति'। विपर्ययस्तु न भवति गुर्वन्तो यो धातुर्हल्वानिति चेष्टायामनध्वनि आशंसायां भूतवच्चेति निर्द्देशात् । 'कुण्डा हुण्डेति'। कुडि दाहे हुडि संघाते ॥

"षिद्भिदादिभ्यो ऽङ्" ॥ 'गणपरिपठितेष्विति'। गणे तावद्भिदा छिदेत्यङन्ता एव समुदायाः पठ्यन्ते तेषु भिदिच्छिदिप्रभृतयो ऽङः प्रकृतयो यास्ता इह भिदादिशब्देन निर्द्दिश्यन्तइत्यर्थः, कुत एतत्, धात्वधिकारात्, भिदादिभ्यो धातुभ्य इति, भिदिर् विदारणे, छिदिर् द्वैधीकरणे, विद ज्ञाने, क्षिप प्रेरणे, गुहू संवरणे, डुधाञ् धारणपोषणयोः, मिधृ मेधृ हिंसासंक्लेशनयोः, ऋ गतौ, हृञ् हरणे, क्षि क्षये । अथ वा क्षि निवासगत्योः, तृ प्लवनतरणयोः, धृञ् धारणे, लिख अक्षरविन्यासे, चुद प्रेरणे, पीड अवगाहने, डुवप् बीजतन्तुसन्ताने, वस निवासे, मृजूष् शुद्धौ, क्रप कृपायामित्येता वेदितव्याः । 'जरेति'। ऋदृशोऽङि गुणः । 'गुहा गिर्योषध्योरिति'। गिरिशब्देन तदेकदेश उच्यते, अन्यत्र गूढिः क्तिन्नेव भवति । 'आरा हारा कारा तारा धारेति'। गुणे कृते दीर्घत्वं च निपात्यते । 'रेखा लेखेति'। लिखेः पक्षे लकारस्य रेफो निपात्यते गुणश्च । 'चूडेति'। चुदेर्डत्वं दीर्घत्वं च निपात्यते । 'भित्तिरन्येति'। भिद्यतइति भित्तिः कुड्यम्, छित्तिश्छिद्रम् । 'आरा शस्त्र्यामिति'। शस्त्री शस्त्रजातिः स्वभावाच्च विशेषः परिगृह्यते, आरा प्रतोदः, अर्यन्ते प्रेर्यन्तेनयाश्वा इति कृत्वा । 'आर्त्तिरन्येति'। आङोर्त्तेश्चोपसर्गादृति धाताविति वृद्धिः । धार्यते प्रपात्यतइति धारा । 'धृतिरन्येति'। प्रीतिर्धैर्यं च ॥

"चिन्तिपूजिकथिकुम्बिचर्चश्च" ॥ 'युचि प्राप्तइति'। सर्वेषामेव ण्यन्तत्वात् । कुम्बा अग्रम् । उदीचीनकुम्बां शम्यामिति हि दृश्यते, चकारोनुक्तसमुच्चयार्थस्तुलयतेस्तुला, अथ गुरोश्चहल इत्यस्यानन्तरं कस्मान्न कृतं किमङ्विधानेन, तत्रापि कर्त्तव्यं कोन्वत्र विशेषः, अपर

आह अङ्विधानसामर्थ्यात्पक्षे णिलोपो न भवति चिन्तियेत्यादि भवतीति, नात्राप्तभाषितमस्ति ॥

"आतश्चोपसर्गे" ॥ 'अदन्तरोरित्यादि'। उपसर्गे यादृशी वृत्तिः प्रत्ययोत्पत्तिलक्षणा तादृश्येव तयोरपि भवतीत्यर्थस्तत्र अद्वाशब्दस्तारकादिपाठात्सिद्धः, यदयमन्तर्द्धावित्युपसर्गनिबन्धनं किप्रत्ययं निर्दिशति तद् ज्ञापयति अन्तःशब्द उपसर्गवृत्तिरिति, एवं च कृत्वान्तर्णयतीत्युपसर्गादसमासेपीति णत्वमपि भवति ॥

"ण्यासश्रन्थो युच्" ॥ 'ण्यद्भविष्यतीति'। ननु वासरूपविधिना ण्यत्स्यात् स चास्त्रियामिति प्रतिषिद्धस्तत्राह। 'वासरूपप्रतिषेधश्चेति'। 'उत्सर्गापवादस्येति'। समाहारद्वन्द्वः, द्वयोरप्युत्सर्गापवादयोः स्त्र्यधिकारावस्थितयोरित्यर्थः। 'घट्टिवन्दिविदिभ्यश्चेति'। विदिर्लाभार्थो गृह्यते न ज्ञानार्थो विदचेतनाख्याननिवासेष्वित्यस्यैव चुरादेर्वेदनेति ज्ञाने सिद्धत्वात्, न च वेत्तेः क्तिनो निवृत्त्यर्थं वचनं संवित्तिरिति दर्शनात्। 'अन्वेषणेति'। इष आभीक्ष्ण्ये इष गताविति वा, युचश्चकारश्चिन्त्यप्रयोजन उदात्त इति हि वर्त्तते तत्सामर्थ्यादन्तोदात्तत्वं भविष्यति, प्रत्ययस्वरेणैवाद्युदात्तत्वसिद्धेः ॥

"रोगाख्यायां ण्वुल्बहुलम्" ॥ 'आख्याग्रहणमित्यादि'। यदि प्रत्ययान्तं रोगस्य नाम भवति एवं प्रत्ययो भवति नान्यथेत्येवमर्थमाख्याग्रहणमित्यर्थः, तेन पदान्तरद्योत्ये रोगे न भवति, बुभुक्षा भस्मकेनेति भस्मको नाम रोगविशेषस्तत्राशितपीतादिकं शरीरस्य व्यापकं न भवति सर्वदा च बुभुक्षा भवति। 'बहुलग्रहणं व्यभिचारार्थमिति'। क्व चित्प्रवृत्तिः क्व चिदप्रवृत्तिः क्व चिद्विभाषा क्व चिदन्यदेवेत्ययं व्यभिचारः। 'प्रच्छर्द्दिकेति'। छर्द्द वमने, वमिः मुहुर्मुहुः प्रवाहयति प्रवर्त्तयतीति ग्रहणी प्रवाहिका। 'विचर्च्चिकेति'। चर्च्च अध्ययने प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः, पामा विचर्च्चिका शिरोर्त्तिः शिरस्तोदः, अर्द्द हिंसायां तितुत्रेतीडभावः पूर्वपदस्य ह्रस्वमतो रोरप्लुतादित्युत्वमाद्गुणः एङः पदान्तादति। 'धात्वर्थनिर्द्देश इति'। क्रियानिर्द्देशइत्यर्थः। 'इक्श्तिपौ धातुनिर्द्देश इति'। धात्वनुकरणइत्यर्थः, बहु-

लवचनाच्च क्वचिन्न भवति गुप्तिच्किद्भ्यः सन्मान्बधदान्शान्भ्य इति, श्तिपः श्तिकरणसामर्थ्यादकर्तृवाचिन्यप्येतस्मिन् शबादयो भवन्ति, एवमभावकर्म वाचिन्यपि क्वचिद्यगपि भवति यथा विभाषा लीयतेरत्र लीलिङोर्यका निर्देशः कृतः, श्यनि तु लीङ एव ग्रहणं स्यात् न तु लीनातेः, कथं पुनः श्तिकरणस्य सामर्थ्यं यावता पिबतिर्जिघ्रतिरित्यादौ श्तिपि पिबाद्यादेशार्थं ग्लायत्यादावात्वप्रतिषेधार्थं च श्तिकरणं स्यात्, एवं तप्तोपसर्गात्सुनोतिसुवतिस्यति विभाषा लीयतेः भवतेर्ण उपसंख्यानं ध्यायतेः सम्प्रसारणं चेत्येवमादिनिर्देशाच्छबादयो भविष्यन्ति । 'वर्णादिति' । वर्णवाचिनो वर्णानुकरणादित्यर्थः, न तु वर्णादुच्चार्यमाणादिति, किं सिद्धं भवति ककार इत्यादौ साच्कादपि संघातात्कारः सिद्धो भवति अकारस्योच्चारणार्थत्वेन वर्णमात्रस्यानुकार्यत्वात्, ककारस्येत्सञ्ज्ञाप्रयोजनाभावाच भवति बहुलग्रहणादस्य च्वौ यस्येति चेत्यादौ कारप्रत्ययो न भवति, बहुलवचनादेव क्वचिद्वर्णसङ्घातादनुकरणादपि भवति एवकार इति, अधातुविहितत्वेपि कारप्रत्ययस्य कृत्सञ्ज्ञाधिकारसामर्थ्याद्भवति तेन कृदन्तत्वात्प्रातिपदिकसञ्ज्ञा भवति, इडागमस्त्वनार्द्धधातुकत्वाच भवति, किमर्थं पुनः कारप्रत्ययो विधीयते यावता करणं कारः, अस्य कारोकार इत्येवमस्तु, नैवं शक्यम्, एवं हि विज्ञायमाने ककारकरणमिति न स्यात् करोतेः पौनरुक्त्यात् । 'रादिफ इति' । कारस्यायमपवादः, कथं तर्हि रकारादीनि नामानि वासरूपविधीना कारोपि भविष्यति, [1]पूर्ववत्कृत्सञ्ज्ञायां प्रातिपदिकत्वम् । 'मत्वर्थाच्छ इति' । मतुना समानार्थो मत्वर्थस्ततः स्वार्थे छः, बहुलवचनादभत्वेपि यस्येति लोपः, पूर्ववत्प्रातिपदिकत्वम्, बहुलवचनात्क्वचिन्न भवति यथा तसौ मत्वर्थइति, बहुलवचनादेव च मतुबर्थशब्दादपि भवति शैषिकान्मतुबर्थीयादिति । 'आजिरिति' । बहुलवचनाद्वीभावाभावः । 'इक्कृष्यादिभ्य इति' । धात्वर्थनिर्देशे ण्वुलोपवादः ॥

---

१ 'रेफइति' २ पुस्तके ऽधिकम् ।

"सञ्ज्ञायाम्" ॥ उद्दालः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां सा उद्दालपुष्पभञ्जिका, वरणपुष्पाणि प्रचीयन्ते यस्यां वरणपुष्पप्रचायिका, अभ्यूषः पूलिकाऽपूपविशेषः स खाद्यते यस्यां साभ्यूषखादिका, तालस्य भञ्जनं यस्यां सा तालभञ्जिका, एवं सालभञ्जिका ॥

"विभाषाख्यानपरिप्रश्नयोरिञ् च" ॥ ननु पूर्वं परिप्रश्नः पश्चादाख्यानं भवति तत्कथं क्रमव्युदासेन सूत्रे पूर्वमाख्यानस्य निर्द्देशः पश्चात्परिप्रश्नस्य तत्राह । 'पूर्वं परिप्रश्न इत्यादि'। सत्यं पूर्वं प्रश्नः पश्चादाख्यानमिति सूत्रे तु लक्षणवशाद्विपर्यय आश्रित इत्यर्थः, स्वयं तु व्यत्यासेन व्याचक्षाणोऽर्थक्रमेण व्याचष्टउदाहरति च । 'कारिकामिति'। ण्वुल् । 'क्रियां कृत्यामिति'। कृञः श च चकारात्क्यप् च । 'कृतिमिति'। योगविभागात् क्तिन् । 'गणिमिति'। गण सङ्ख्याने चुरादिरदन्तः । 'गणनामिति । 'युच् । 'एवमित्यादि'। कां पाचिकां पचां षित्त्वादङ्, पक्तिं स्थागापापच इति क्तिन्, कां याजिं याजिकामिति कां पाठिं पाठिकां पठितिं, तितुत्रेष्वग्रहादीनामिति वचनादिट् ॥

"पर्यायार्हर्णोत्पत्तिषु ण्वुच्" ॥ 'परिपाटीति'। पटेः परिपूर्वादिगजादिभ्य इति इञ्, तदन्तात्कृदिकारादक्तिन इति ङीष् । 'तद्योग्यतेति'। तच्छब्देन धात्वर्थ उच्यते । 'परस्मादिति'। धारेरुत्तमर्ण इति सम्प्रदानसञ्ज्ञा,परस्येति तु पाठे परस्य वस्त्वित्यर्थः, धार्यते बध्यते, ग्रामगामिकेति कर्मणि षष्ठ्याः समासः । 'उदपादीति'। चिण् ते पद इति कर्त्तरि चिण् । 'स्वरार्थमिति'। चित इत्यन्तोदात्तत्वं यथा स्यात् ण्वुलि तु लितीति प्रत्ययात्पूर्वमुदात्तं स्यात् ॥

"आक्रोशे नञ्यनिः" ॥ आक्रोशः शपनं न क्षेपः स्वभावादकरणिरित्यादिकं शपनवाक्यम् ॥

"कृत्यल्युटो बहुलम्" ॥ 'स्नानीयमिति'। करणे कृत्यः । 'दानीय इति'। संप्रदाने अवसेचनादौ कर्मणि ल्युट् । 'प्रस्कन्दनः प्रपतन इति'। कर्त्तरि । बहुलग्रहणं न कर्त्तव्यमारम्भसामर्थ्यादेव कृत्यल्युटो यत्र विहिता-

स्ततोऽन्यत्र भविष्यन्ति ततो बहुलग्रहणात्क्तमात्रस्य स्वार्थव्यभिचारः साधितो भवति तयोरेव कृत्यक्तखलर्थाः कर्त्तरि कृदित्ययं त्वर्थनिर्द्देशो बाहुल्याद्भावादिषु भवन्ति क्वचिदेव त्वन्यत्रेति ज्ञापनार्थः। 'पादहारक इति'। कर्मणि ण्वुलि पञ्चम्यन्तस्य साधनं कृतेति समासः। 'गलेचोपक इति'। अमूर्द्धमस्तकादित्यलुक् ॥

"नपुंसके भावे क्तः" ॥ ननु च तयोरेव कृत्यक्तखलर्था इति नपुंसके भावे क्तः सिद्धः, सत्यं, भूते सिद्धः कालसामान्ये तु नपुंसके न प्राप्नोतीत्ययमारम्भः, इह सकर्मकेभ्योऽपि यथा भावे घञादयो भवन्ति ओदनस्य पाक ओदनस्य भोजनमिति तथायमपि क्तः सकर्मकेभ्यो भावे भवति अत्राकर्मकेभ्य इत्यवचनादिति केचिदाहुः, अथ तदा कर्मणि का विभक्तिर्भवति कृद्योगलक्षणा कर्मणि षष्ठी सा निष्ठायोगे प्रतिषिद्ध्यते, नपुंके भावउपसंख्यानमिति षष्ठी भविष्यति ओदनस्य भुक्तमुदकस्य पीतमिति, अस्मिन्पक्षएतदर्थोऽप्ययमारम्भो नहि तयोरेवेत्यनेन सकर्मकेभ्यो भावे क्तः सिद्ध्यति, अन्ये तु तयोरेवेत्येतदस्यापि क्तस्य विषयव्यवस्थापकं मन्यन्ते तद्धि निष्ठेति विहितस्य क्तस्य भावमर्थं विधत्तेऽकर्मकेभ्य इति च विषयं व्यवस्थापयति अस्य तु भावे क्त इत्यनुवादेनाकर्मकेभ्य इति विषयं व्यवस्थापयति ॥

"ल्युट् च" ॥ 'योगविभाग उत्तरार्थ इति'। उत्तरत्र ल्युट एवानुवृत्तिर्यथा स्यात् क्तस्य माभूदित्येवमर्थम् ॥

"कर्मणि च येन संस्पर्शात्कर्त्तुः शरीरसुखम्" ॥ कर्त्तुरिति कर्मणि षष्ठी उभयप्राप्तौ कर्मणीति नियमाद्येनेति कर्त्तरि तृतीया तदाह। 'येन कर्मणा संस्पृश्यमानस्येति'। कस्य शरीरसुखमित्यपेक्षायां कर्त्तुः सन्निधानात्तस्यैव विज्ञायतइत्याह। 'कर्त्तुः शरीरसुखमुत्पद्यतइति'। किमिदं शरीरस्य सुखमिति, ननु शरीरव्यतिरिक्तस्यात्मनो धर्मः सुखं, सत्यं, यस्मिन् सुखे समुत्पन्ने शरीरेऽपि स्वास्थ्यमुत्पद्यते तच्छरीरसुखमित्युच्यते। 'नित्यसमासार्थं वचनमिति'। कथं तर्ह्युभयप्राप्तौ कर्मणीत्यत्रोदाहृतं साधु खलु पयसः पानं देवदत्तेनेति यत्र प्रतिकूलतया सुखं नोत्पद्यते तत्र तदुदा-

Digitized by Google

हृतं द्रष्टव्यम् । 'पयःपानं सुखमिति'। तत्र पानेन सुखं न स्पर्शेन, इदं तूदाहृत्तुमुचितं चन्दनानुलेपनं सुखमिति, नैष दोषः, यत्र संस्पर्शनमन्तरेण न सुखमुत्पद्यते तद्विषयेोपलक्षणं संस्पर्शग्रहणं तत्र स्पर्शनादेव सुखं भवतु तत्पूर्वकात्पानादेर्वा सर्वत्र भविष्यति । 'तूलिकाया इति'। तूलेन निर्मितः कशिपुस्तूलिका तत्र शयित्वोत्थानं सुखम् । 'अग्निकुण्डस्योपासनमिति'। अत्राग्निकुण्डेनास्पृश्यमानस्यैव सुखम् । 'गुरोः स्नापनमिति'। यद्यप्यत्र गुरुः सुखानुभवस्य कर्त्ता तथापि न तदत्राश्रितमव्यभिचारात् किं तर्हि ल्युट्प्रकृतौ यत्कर्तृत्वं तदाश्रितं तदाह । 'स्नापयतेर्न गुरुः कर्त्तेति'। 'मानसी तु प्रीतिरिति'। पुत्रेण बलवत्परिष्वज्यमानस्य शरीरतोद एव भवति मानसी तु प्रीतिः, ननु प्रत्युदाहरणेष्वपि सर्वत्र ल्युट् प्रयुज्यते तत्कथं प्रत्युदाहरणत्वं तत्राह । 'सर्वत्रासमासः प्रत्युदाह्रियतइति' ॥

"करणाधिकरणयोश्च" ॥ 'करणे चाधिकरणे चाभिधेयइति'। उपपदे तु करणाधिकरणे न भवतः करणाधिकरणयोरित्यत एव निर्द्देशात्, क्रियते ऽनेनेति करणम् अधिक्रियतेस्मिन्नित्यधिकरणमिति करणाधिकरणसाधनौ ह्येतौ,यद्येवं सति निर्द्देशे प्रत्ययविधानं सति च प्रत्ययविधाने निर्द्देश इतीतरेतराश्रयः प्राप्नोति,न, नित्यत्वाच्छब्दानां नास्मान्निर्द्देशात्करणाधिकरणशब्दौ स्तः। 'इध्मप्रव्रश्चन इति'। 'कर्मणि षष्ठ्याः समासः दात्रादिरुच्यते। 'पलाशशातन इति'। शद्लृ शातने हेतुमण्णिच्, शदेरगतौ त इति तत्वं, येन दण्डेन वृक्षस्य पर्णानि पात्यन्ते स एवमुच्यते, गोदोहनी सक्तुधानी पात्री, योगश्चायं येन नाप्राप्तिन्यायेन घञोपवादः, अजपौ स्त्रीप्रत्ययांश्च परत्वाद्बाधते, उक्तं हि, अजप्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति ॥

"पुंसि संज्ञायां घः प्रायेण" ॥ 'दन्तच्छदाविति'। छद आवरणे चुरादिः, छादेर्घे द्व्युपसर्गस्येति ह्रस्वः, एत्यास्मिन्कुर्वन्ति व्यवहारमित्याकरः उत्पत्तिस्थानम् ॥

"गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च" ॥ गावश्चरन्त्यस्मिन्निति रूढिशब्दोयं विषयपर्यायः, तस्य यथाकथंचिन्निर्वचनं तथा च गो-

चर इन्द्रियगोचर इत्याद्यपि। 'सञ्चरन्तेनेनेति'। समस्तृतीयायुक्तादित्यात्मनेपदम्, सञ्चरो मार्गः, वहः स्कन्धः, व्रजो गोष्ठम्, व्यजस्तालवृन्तम्, आपणः पण्यस्थानं, निगमश्छन्दः, अयं योगः शक्योऽवक्तुं, पूर्वेणैव घः सिद्धः, हलश्चेति घञ् कस्मान्न भवति, प्रायेणग्रहणं तत्रानुवर्तते यथा कषो निकष इत्यत्र घञ् न भवति, एवं गोचरादिष्वपि न भविष्यति ॥

"अवे तृस्त्रोर्घञ्"॥ अवतारो कूपादिः, अवस्तारो जवनिकादिः, नद्यवतारस्तीर्थम्। 'प्रायेणग्रहणानुवृत्तेरसंज्ञायामपि भवतीति'। ननु घञ् विधेयः प्रधानं तस्य प्रायग्रहणमुपाधिस्ततश्च संज्ञायामेव क्वचिन्न भवतीत्यर्थः स्यात्, एवं मन्यते, संज्ञायामित्युपाधेरेव प्रायग्रहणमुपाधिर्नोपाधेरुपाधिर्भवति विशेषणस्यैव वा विशेषणमिति तु नाश्रीयते लक्ष्यानुरोधादिति ॥

"हलश्च"॥ लेखो लेखनी, वेष्टो वस्त्रादिः, वेष्ट वेष्टने, विद्येते ज्ञायेते अनेन धर्माधर्माविति वेदः, अपमृज्यतेनेन व्याध्यादिरित्यपामार्गो वीरुद्विशेषः, वीमार्गः समूहनी, पूर्ववत्कुत्वदीर्घत्वे ॥

"अध्यायन्यायोद्यावसंहाराश्च"॥ 'आवयन्तीति'। एत्यवयन्तीत्यर्थः। 'चकारोनुक्तसमुच्चयार्थ इति'। घञ्विधाववहारावायानामुपसंख्यानमिति वार्त्तिकं, वृत्तिकारस्तु आधारावायशब्दो सूत्रे प्रक्षिप्य चकारेणावहारशब्दं साधयति स्म विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण ॥

"उदङ्कोऽनुदके"॥ तैलमुदच्यते ,उद्ध्रियतेस्मिन्निति तैलोदकं चर्ममयं भाजनम्। 'घः कस्मादिति'। पुंसि संज्ञायामित्यादिना घे प्राप्ते घञ्विहितः, ततश्च तेन मुक्ते घ एव भवितुमर्हतीति भावः। 'विशेषाभावादिति'। ननु घे सति प्रत्ययस्वरो घञि ञित्स्वरेणाद्युदात्तं तत्कथं विशेषाभावस्तत्राह। 'घञ्यपि हीत्यादि'॥

"जालमानायः"॥ जल धात्यइत्यतो ज्वलितिकसन्तेभ्यो ण इति णे कृते जालमिति भवति, आनीयन्ते मत्स्यादयोनेनेत्यानायः ॥

"खनो घ च"॥ घित्करणं किमर्थं यावता न खनः कश्चिदवयवः कुत्वभागस्ति ज्ञापनार्थं तु एतज् ज्ञापयति अन्येभ्योप्ययं भवतीति

Digitized by Google

तेन भजेर्भगः पदेः पदं करणे घः, खल सञ्चलनेऽधिकरणे घः खल एवमादि सिद्धं भवति, आखनादयः खनित्रवचनाः ॥

"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्" ॥ 'तद्दुर इति'। सुदुरोरधिकरणइतिनिर्देशाद्दुःशब्दो रेफान्तोऽप्यस्ति । 'सम्भवादिति'। दुर एव कृच्छ्रे सम्भव इतरयोरेवाकृच्छ्रेतः सामान्येनोक्तावपि विशेषणस्य विषयविभागो लभ्यतइति भावः । 'ईषत्कार्यमिति'। मनागित्यर्थे ईषच्छब्दः ॥

"कर्तृकर्मणोश्च भूकृञोः" ॥ 'कर्त्तरि कर्मणि चोपपदइति'। प्रत्ययार्थत्वं तु कर्तृकर्मणोर्न भवति चकारस्योपपदसमुच्चयार्थत्वात् । किं च यदि तयोः प्रत्ययार्थत्वं स्यादीषदादिष्वेवोपपदेषु प्रत्ययः स्यात्ततश्च खित्करणमनर्थकं स्याद् अनव्ययस्य हि मुम् विधीयते तस्मात्सूक्तं कर्त्तरि कर्मणि चोपपदइति, अत्र चकारः सन्नियोगार्थः क्रियते, यदा कर्तृकर्मणोरीषदादीनां च युगपदुपपदत्वं तदा प्रत्ययो भवति समासस्तु युगपत्पर्यायेण वा भवति किं पुनरत्र परमुपपदं कर्तृकर्मणी, कुत एतत् खलः खित्करणात्, तद्धि मुमर्थं मुमागमश्चानव्ययस्य तत्रेषदादीनां धातोश्चानन्तर्ये खित्करणमनर्थकं स्यात्, ननु माभूदीषदो धातोश्चानन्तर्ये यत्रैतवास्ति ते प्राग्धातोरिति यत्र त्वस्ति सुदुरोस्तत्र तयोरेव प्राक् प्रयोगो युक्तः खित्करणं त्वीषदाढ्यंभवन्तीमित्यादौ मुमर्थं स्यात् सुदुरोरपि कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति तत्रापि मुमर्थं स्यात् यथोद्दिकूले रुजिवहोः कूलमुद्रुज इति, वक्तव्योऽत्र परिहारः कृत्यल्युटो बहुलमिति, बहुलग्रहणं वात्राश्रयणीयम् । 'ईषदाढ्यंभवमिति'। अनाढ्येन भवता सुखेनाढ्येन भूयतइत्यर्थः । 'ईषदाढ्यंकर इति'। अनाढ्यो देवदत्तः सुखेनाढ्यः क्रियतइत्यर्थः । 'स्वाढ्येन भूयतइति'। प्रमादपाठोयम् अत्र हि खलभावात्सुशब्दस्य धातोः प्राक् प्रयोगेण भाव्यं तस्मादाढ्येन सुभूयतइति पाठः ॥

"अन्येभ्योऽपि दृश्यते" ॥ 'अन्येभ्योऽपि धातुभ्यो गत्यर्थेभ्य इति'। गत्यर्थेभ्यो येन्ये धातवस्तेभ्य इत्यर्थः, अथ वा नञोत्र प्रश्लेषः अन्येभ्योऽपि धातुभ्यः, कोर्थः, अगत्यर्थेभ्य इति, । 'भाषायामिति'। छन्दसीत्यधि-

Digitized by Google

कारादयमारम्भः, शासु अनुशिष्टौ, युध संप्रहारे, दृशिर् प्रेक्षणे, ञिधृ श प्रागल्भ्ये, मृष तितिक्षायाम् ॥

"वर्त्तमानसामीप्ये वर्त्तमानवद्वा" ॥ अत्र केचिद्व्याचक्षते समीपस्य भावः सामीप्यं भावे ष्यञ्, वर्त्तमानस्य सामीप्यं वर्तमानसामीप्यं षष्ठीसमासः, वर्त्तमानस्य भूतभविष्यन्तौ प्रति यत्सामीप्यं तत्र वर्त्तमानवत्प्रत्ययातिदेशोनर्थको ये हि वर्त्तमाने प्रत्ययास्ते समीपभूतेपि तस्मिन् भवन्त्येव, अतो वर्त्तमानं प्रति भूतभविष्यतोर्यत्सामीप्यं तदत्र वर्त्तमानसामीप्यमित्युच्यते समीपद्वारकाच्च वर्त्तमानस्य सामीप्येनाभिसम्बन्धात्समासो नानुपपन्नो यथा देवदत्तस्य गुरुकुलमिति, गुणेन नेति प्रतिषेधोपि न भवति यस्माद्गुणशब्दस्य सम्बन्धिशब्दत्वाद्गुणाक्षिप्तस्य गुणिन एव समासनिषेधो न च वर्त्तमानः सामीप्यस्य गुणी, भूतभविष्यतोस्तद्गुणित्वादिति तदिदं क्लिष्टं व्याख्यानं ष्यञ्निर्द्देशश्च केवलं गौरवायैव स्यादित्यन्यथा व्याचष्टे। 'समीपमेव सामीप्यमिति'। न चास्मिन् पक्षे ष्यञो वैयर्थ्यमित्याह। 'ष्यञः स्वार्थिकत्वं ज्ञाप्यतइति'। स्वार्थेपि ष्यञ् भवतीति एतमर्थं ज्ञापयितुं ष्यञो निर्द्देशः कृत इत्यर्थः। 'चातुर्वर्ण्यादिसिद्ध्यर्थमिति'। आदिशब्देन चातुराश्रम्यमन्यस्य भावोन्यभावोन्यभाव एवान्यभाव्यमित्येवमादीनां ग्रहणम्। 'कदा देवदत्त आगतोसीति'। भूतकालेन प्रश्नः, उदाहरणे भूतकालाभिव्यक्तयेयमेष इत्यागमनाविनाभूतं यद्रूपं श्वेतपरिकरबन्धादियुक्तं तद्रूपं प्रतिनिर्द्दिश्यते, इदानीमागममित्यर्थः, एवं च कदेति प्रश्ने चोत्तरं सङ्गच्छते सामीप्यं च द्योतितं भवति। 'आगममिति'। लुङ् मिपोम्भावः, ऌदित्त्वादङ्। 'कदा देवदत्त गमिष्यसीति'। अत्रापि भविष्यत्कालेन प्रश्न उदाहरणे भविष्यत्कालाभिव्यक्तये। 'गन्तास्मीति'। अनद्यतने लुट्, अत्रापि सामीप्यं यथासम्भवं द्रष्टव्यम्। अथ वत्करणं किमर्थं यावतासत्यपि तस्मिन् प्रत्ययाधिकाराद्वर्त्तमाने ये प्रत्यया विहितास्ते वर्त्तमानसामीप्ये भवन्तीत्येषोर्थो लभ्यतएव नार्थो वत्करणेनात आह। 'वत्करणं सर्वसादृश्यार्थमिति'। असति वत्करणे वर्त्तमाने ये प्रत्यया इत्यनेन प्रत्ययानां रूपमात्रं लक्ष्येत ततश्च

सङ्करोपि स्यात्, अन्यस्माद्धातोर्यो वर्त्तमाने विहितः प्रत्ययः स धात्वन्तरादपि स्यात् वत्करणे तु सति सर्वसादृश्यावगतेः सङ्करो न भवति, सर्वसादृश्यमेव दर्शयति । 'येन विशेषणेनेति' । आदिशब्देनोपाधेरभिधेयस्य च ग्रहणम् । 'पचमानो यजमान इति' । वर्त्तमाने पूङ्यजोः शानन्विहितः सामीप्ये स ताभ्यामेव भवति । 'अलङ्करिष्णुरिति' । तच्छीलादिविशिष्टे कर्त्तर्यलम्पूर्वात्कृञ इष्णुज्विहितः स सामीप्येपि तस्मादेव तत्पूर्वादेव तस्मिन्नेवार्थे भवति, 'परुत्' पूर्वस्मिन् संवत्सरे यो हि मन्यत इत्यादिना प्रतिपत्तृविशेषं प्रतिप्रकरणं प्रत्याचष्टे । 'कालान्तरगतिस्त्विति' । कालान्तरं वर्त्तमानसमीपो भूतो भविष्यंश्च कालस्तस्य या गतिः प्रतीतिः सा ऽयं गच्छामीत्यतो वाक्यात् कदा देवदत्त गमिष्यसीत्यस्योत्तरत्वेन प्रयुक्ताद्भवति, ततः किमित्यत्राह । 'न चेति' । 'वाक्यार्थप्रतिपत्तारमिति' । वाक्यार्थोऽयं न पदार्थ इति यः प्रतिपद्यते स वाक्यार्थप्रतिपत्ता, कर्मणि षष्ठ्याः समासः, कर्त्तरि चेति प्रतिषेधस्त्वनित्यो जनिकर्त्तुरिति निर्द्देशात् शेषषष्ठ्या वा समासः । 'प्रकरणमिति' । इत आरभ्याष्टसूत्री प्रकरणशब्देनोच्यते । 'तथा च श्वः करिष्यतीत्यादि'। यदि वाक्यगम्योपि कालः पदसंस्कारउपयुज्यते तदा नैवमाद्युपपद्यते अनद्यतने लुटेव भवितव्यमिति कृत्वा ॥

"आशंसायां भूतवच्च" ॥ 'तस्याश्च भविष्यत्कालो विषय इति'। भविष्यत्कालोस्येति भविष्यत्कालो धात्वर्थः स आशंसाविषयः, सा तु वर्त्तमानकालैव, एवं च सामर्थ्याद्भविष्यद्विषयोयमतिदेशो विज्ञायत इत्याह। 'भविष्यत्काल इति'। 'आशंसायां गम्यमानायामिति' । आशंस्यमानक्रियावचनाद्धातोरित्यर्थः । उपाध्यायश्चेदित्यादिकमाशंसावाक्य तत्रोपाध्यायागमनं व्याकरणाध्ययनं चोभयमशंस्यमानमित्युभयत्रापि प्रत्ययः । 'अध्यगीष्महीति' । 'विभाषा लुङ्लृटोरिति' इङो गाङादेशो गाङ्कुटादिभ्य इति सिचो ङित्त्वं, घुमास्थादिसूत्रेणेत्वम् । 'सामान्यातिदेश इति' । अत्र सूत्रे भूतशब्देन भूतमात्रमुच्यते न तु तद्विशेषोनद्यतनः, सामान्यातिदेशे च विशेषो नातिदिश्यते ब्राह्मणवदस्मिन्क्षत्रिये वर्त्तितव्य-

मित्युक्ते ब्राह्मणमात्रप्रयुक्तं कार्यं गम्यते न तु माठरादिविशेषप्रयुक्तं तेनानद्यतनप्रयुक्तौ लङ्लिटौ न भवतः, इहानिष्पन्ने निष्पन्नशब्दः शिष्यः शासितव्यो देवश्चेद्वृष्टो निष्पन्नाः शालय इति वस्तुस्वरूपकथनमेतन्नात्राशंसा तेन सूत्रेणाप्राप्तिः, नैष दोषः, अप्तशालिबीजसंयोग एव निष्पत्तिः शालीनां तत्रैव निष्पादेर्वृत्तेः, अत एव लोको भविष्यद्वाचिनः शब्दस्य प्रयोगं न दूष्यति देवश्चेद्वृष्टः सम्पत्स्यन्ते शालय इति उक्ते वक्तारो भवन्ति मैवं वोचः सम्पन्नाः शालय इति ब्रूहीति, हेतुभूतकालसम्प्रेक्षितत्वात्सिद्धं हेतुभूतस्य वर्षादेर्यः कालः स एव कार्यस्य सम्प्रेक्षितः स एव कार्यस्यापि कालो व्यवस्थाप्यते कारणान्तरापेक्षाभावप्रतिपादनाय, ततश्च कारणस्यैव कार्यरूपेण विवक्षितत्वादभेदाध्यवसायात्कारणस्य भूतत्वात्कार्यस्यापि भूतत्वं सिद्धमित्यर्थः । इह तु कश्चिदध्वानं जिगमिषुः पश्यति अमुष्मिन्नवकाशे कूपो भविष्यतीति अनद्यतने कूपो भवितेति समासाद्य कूपोऽस्तीति अतिक्रम्य कूपोऽभूदिति, अतिक्रम्योषितत्त्वात् कूप आसीदिति, अतिक्रम्योषित्वा विस्मृत्य कूपो बभूवेति तदत्र सर्वत्र कूपसत्ताया वर्त्तमानत्वं भूतभविष्यद्रूपत्वमिति सर्वत्र लडेव प्राप्नोति लुङादयस्तु वक्तव्याः, तदाहास्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्त्तुर्विद्यमानार्थत्वादिति, भवन्तीशब्दो लटः पूर्वाचार्याणां सञ्ज्ञा, यदि वचनेन वर्त्तमान एव लुङादयो विधीयन्ते कूपोऽभूदिति प्रयोक्तव्ये कूपो भविष्यतीत्यपि प्रयुज्येत तस्माद्यथास्वमेता विभक्तयः कालेषु प्रयुज्यन्ते, कथ,मिन्द्रियव्यापारस्य कालस्य कूपसत्तां प्रति भेदकत्वेनाश्रयणात्तस्या अपि तत्कालत्वं ततश्चेन्द्रियव्यापारे भाविनि भविष्यद्विभक्तिर्वर्त्तमाने वर्त्तमानविभक्तिर्भूते भूतविभक्तिरिति सिद्धमिष्टम् उक्तं च ।

सत्तामिन्द्रियसम्बन्धात्सैव सत्ता विशिष्यते ।
भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः ॥
अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते ।
यः समासादनाद्भेदः स तत्र न विवक्षितः ॥

इति ॥

Digitized by Google

नाच्च स्यादेव तेषामप्यार्षेयवरणम् ॥

सू० तथा ब्राह्मणानाम् ॥ ७ ॥

क्षत्रियादिवृत्तिमाश्रिता ब्राह्मणा राजोपेताः । ब्राह्मणेन पुत्रत्वेन क्रीता ब्राह्मणवृत्त्या जीवन्तः क्षत्रिया ब्राह्मणोपेताः । तेषां पुरोहितप्रवरस्वप्रवरयोर्विरोधे सति विकल्पे परेण पूर्वबाधे वा द्विगोत्रवदुभयमेलने वा प्राप्ते राजोपेतादीनां प्रच्युतस्वकर्मणामपि ब्राह्मणत्वादिजातेरनपायात्स्वस्वजातीयमेव वरणम् । मासेन शूद्रो भवति ब्राह्मणः क्षीरविक्रयादित्यादयस्तु प्रायश्चित्तविधिशेषभूता निन्दार्थवादा न जातिनाशपराः ॥

सू० द्विगोत्रस्य ॥ ८ ॥

द्व्यामुष्यायणानां शैशिरादीनामुभयकीर्त्तने त्रित्वसङ्ख्याधिक्यापत्तेरन्यतरत्रितयकीर्त्तनेनैव त्रीन्वृणीत इति विध्यर्थानुष्ठानसिद्धिरिति प्राप्ते विकल्पस्य जघन्यतयैवैकतो द्वावन्यत एकमित्यादिवचनसिद्धव्यवस्थयैवार्षेयवरणम् । अत एवोभयतो द्वयोर्द्वयोर्ग्रहणे त्रित्रियहणे वा चतुःषडार्षेयप्राप्तौ तन्निषेधः सङ्गच्छते । अन्यथा चतुःषट्प्रवराणामभावादेव सिद्धेर्निषेधवैयर्थ्यापत्तिः ॥

सू० वषट्कर्तॄणां वा ॥ ९ ॥

दैक्षे श्रुतं दैवं च मानुषं च होतारौ वृत्वा श्रावमाश्रावं सौमिकानृत्विजो वृणीत इति । तदिदमृत्विग्वरणं कर्म मध्ये विहितमृत्विक्संस्कारकत्वादविशेषात्सर्वार्थं । सप्त वृणीत इति तु दश गृह्णन्त इतिवदवयुत्यवाद इति प्राप्ते यदवृता वषट्कुर्युर्भ्रातृव्यं यज्ञस्याशीर्गच्छेदथ यद्येते वृता वषट्कुर्वन्त्येकधैव यजमानं यज्ञस्याशीर्गच्छतीति वचनेनावृतानां वषट्कारनिन्दया वषट्कर्तॄणामेव वरणं नियम्यते । अत एव ऋत्विजो वृणीत इत्युक्त्वा छन्दांस्येव वृणीते यद्धोतारं वृणीते यदाग्नीध्रमतिछन्दसं तदित्यादिना वाचं तद्वृणीत इत्यन्तेन कतिपयानामेव गणनं सङ्गच्छते । वषट्कर्तृत्वेन प्रसक्तो नाच्छावाकं वृणीत इति निषेधोऽपि ॥

Digitized by Google

सू० होतृमैत्रा ॥ १० ॥

दर्शपूर्णमासयोरग्निर्देवो होतेति मन्त्रस्य होतृवरणे समाम्नातस्य चोदकतः प्राप्तत्वाद्धोतृमैत्रावरुणयोर्वैदिक्या वाचाऽन्येषां लौकिक्या वरणमिति द्वयोर्वरणं पशुधर्म इतरत्सोमधर्म इति प्राप्ते सर्वेऽपि लौकिक्यैव व्रियेरन् । सप्त वृणीत इत्येकविधिविहित एकस्मिन्कर्मणि वैरूप्यायोगात् । कृष्णविषाणया कण्डूयत इत्येकविधिविधेयस्यापि सवनभेदेन वैरूप्यं तु दक्षिणादानोत्तरं तत्प्रासनविधिविरोधादङ्गीकृतम् ॥

सू० प्रैषेण ॥ ११ ॥

येषां शाखायामृतुप्रैषादिभिर्वृणीत इत्याम्नातं तेषां यज्ञे तैरेव मन्त्रैर्वरणं । परं त्वृतुप्रैषेषु होता जक्षदित्यत्रास्य परित्यागेनेद्रं होत्रादित्यादय एव मन्त्रा भवन्ति प्रैषयागाधिकरणन्यायात् ॥

सू० सप्त ॥ १२ ॥

तिस्रो जुहोतीत्यादाविव सप्त वृणीत इत्यत्र धात्वर्थ एव सङ्ख्यान्वयः ऋत्विजां बहुत्वेन सप्तपदस्य सङ्ख्येयपरत्वायोगात् । अग्निर्दैवीनामित्यनेन यजमानस्यापि वरणोक्तेश्च । ततश्च वषट्कर्तृष्वेव वरणमिति नियमेन पूर्वोक्तवरणस्य कर्तृसंस्कारार्थत्वेऽप्येतद्वचनविहितवरणान्तराणामाराद्रुपकारकाणां तदतिरिक्ता ऋत्विजः परिशेषात्कर्मकारकतयाऽन्वीयेरन्निति प्राप्ते पूर्वोक्तवरणे यजमानेतरेषामष्टानां मध्येऽध्वर्युप्रतिप्रस्थात्रोरेकेन मन्त्रेण द्विवचनान्तेन वरणाभिप्रायेण सप्तर्त्विजो वृणीत इत्यनुवादमात्रम् ॥

सू० निरूढः ॥ १३ ॥

द्वितीयमस्याश्रावयति द्वौ ह्यत्र होतारौ होता च मैत्रावरुणश्चेति दैक्षेऽहन्येव श्रुतमुक्तन्यायेन द्वयोरेवेदं वरणान्तरं सोमधर्म इति प्राप्ते द्वावित्यनेन तृतीयहोत्रभावस्य हेतूकरणादत्रेति पदेन योग्यतया निरूढपशुबन्ध एवोच्यत इति तत्रास्योत्कर्षः ॥

Digitized by Google

सू० ध्रुवेभूते ॥ १४ ॥

वरणस्य सोमार्थत्वादौपवसथ्येऽहन्यप्याम्नातं सुत्याकाल उत्कर्षणीयम् । अङ्गानां प्रधानकालत्वनियमात् । अभिषवादिषु तथा दर्शनाच्चेति प्राप्ते सद्योहविधानादीनां सोमार्थानामपि दिनान्तर एव करणादभिषुत्य गृहीत्वा यागाम्नानेन तादृशक्रमादिविरोधेनाभिषवादेरुत्कर्षेऽपि न वरणस्योत्कर्षे किमपि विरुध्यते । तस्मात्पूर्वेद्युरेव वरणमिति ॥

इति सङ्कर्षे भाट्टदीपिकायां पञ्चदशाध्यायस्य चतुर्थः पादः
आर्षेयपादः, वरणपादोवा ॥ ४ ॥
पञ्चदशोऽध्यायश्च समाप्तः ॥ १५ ॥

अथ षोडशाध्याये प्रथमः पादः ।

सू० सामिधेनीः ॥ १ ॥

सामिधेनीरनुवक्ष्यन्नेता व्याहृतीः पुरस्ताद्दधातीत्यादिभिर्विहितानां दशहोतृव्याहृतिहिङ्कारसामिधेनीनां क्रमनियामकाभावादनियतक्रमेणाच्येरन् इति प्राप्ते हिङ्कृत्य सामिधेनीरन्वाहेति क्त्वा–प्रत्ययेनाव्यवहितपूर्वकालकथनात्सामिधेनीभ्यः पूर्वो हिङ्कारः । अनुवक्ष्यन् पुरस्तादित्याभ्यामव्यवधानांशस्याकथनाद्धिङ्कारात्पूर्वं व्याहृतयः । दशहोतुरपि तथैव श्रवणेऽपि मन्त्रपाठक्रमाद्व्याहृतिभ्योऽपि पूर्वं निवेशः सर्वत्राव्यवधानस्याशक्यतयाऽल्पव्यवधानेनोपपत्तौ स्थूलव्यवधानस्यायुक्ततया प्रैषक्रमः सिध्यति ॥

सू० तारमन्द्रौ ॥ २ ॥

अन्तरानूच्यं स देवत्वायेति श्रुतावन्तरेत्यनेन दशहोतृव्याहृतिमध्यभागे सामिधेनीपाठविधानेन पाठक्रमादिबाधः । न चान्तराशब्दः स्वस्वरवाचकत्वेन कोशादिषु प्रसिद्धः । उच्चैर्वा क्रियत इत्या-

Digitized by Google

दिना स्वरस्य प्राप्तत्वेन तदनपेक्षणाच्चेति प्राप्ते यत्क्रौञ्चमन्वाहासुरं तद्यन्मन्द्रं मानुषं तद्यदन्तरा तत्सदेवमिति श्रुत्यन्तरापदस्य तारमन्द्रोभयमध्यमभूमिकात्वेन स्वरविशेषं निर्दिश्यान्तरानूच्यमिति विधाने तस्यैवोपस्थितिश्रुतेर्न तस्य क्रमविधायकत्वम् ॥

सू० अन्तर्वेदि ॥ ३ ॥

सामिधेनीरेव प्रकृत्यान्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्य इति श्रुतं। तत्रार्धमन्तर्वेदीत्यादाविव न स्थानविशेषलक्षणा वाक्यद्वयेन सम्भवति। तादृशस्थानस्यैकत्वेन तत्रैकः पादोऽन्यत्रान्यः पाद इति कथनस्वारस्यविरोधापत्तेः। तस्माद्वेदेरन्तरुपविश्य प्रवोवाजा अभिद्यव इति पादो वक्तव्यः तद्बहिरुपविश्य हविष्मन्तो घृताच्येति। पुनस्तदन्तरुपविश्य देवान् जिगाति सुम्नयोमित्यादिरीत्या सामिधेनीरनुब्रूयादित्यनेनैकवाक्यतया सिध्यतीति प्राप्ते तिष्ठन्नन्वाहेति विधेः स्थानविशेषसाकाङ्क्षत्वेन तत्सम्पर्कतयैकवाक्यत्वे सम्भवति वाक्यभेदायोगात्तादृशस्थाने स्थितवतोऽर्थात्तदवयवभेदेन होतुः पादद्वयस्यावस्थानेनान्यः पाद इत्यस्यानुवादत्वसम्भवादन्यपादमाहेत्युच्चारणक्रमत्वेनानिर्देशात्पादशब्दस्य ऋक्पादपरत्वायोगाच्च स्थानविशेषलक्षणया तत्र होता स्थित्वाऽनुब्रूयादित्यर्थः ॥

सू० पञ्चदश ॥ ४ ॥

सामिधेन्यऋच एकादश पठिताः। विहितास्तु पञ्चदश। तत्र चतसृणामग्निसमिन्धनलिङ्गानामागमेन सङ्ख्या पूरणीया। तस्याःपृथक्त्वनिवेशित्वस्वाभाव्यात्। न च प्रथमोत्तमयोर्ऋचोस्त्रिरभ्यासविधानेन तदभिप्रायेण पञ्चदशत्वानुवादो युज्यत इति वाच्यं। तथाऽप्यृचामेकादशत्वानपायेन तासां चतुःषष्ठ्युत्तरद्विशताक्षरत्वेन तासां त्रीणि च शतानि षष्टिश्चाक्षराणि भवन्ति तावतीः सँव्वत्सरस्य रात्रय इति श्रुत्यन्तरविरोधापत्तेः। रात्रिदृष्टान्तेनानभ्यस्ताक्षरनिष्ठत्वेन सङ्ख्याप्रतीतेः। तस्मात्षण्णवत्यक्षरपूर्त्यर्धमनुष्टुप्त्रयं जगतीद्वयं गायत्रीचतुष्टयं वा नेयं। पञ्चदशेति त्वेकादशानामभ्यासविशिष्टानामनुवादकमित्युक्तमिति प्राप्तेऽक्षरशब्दस्य

Digitized by Google

व्यञ्जनोपसर्जनकस्वरपरत्वेन तेषां च स्वरा विंशतिरेकश्चेति शिक्षापरिगणितानामल्पत्वेन तदधिकसङ्ख्यायाः सर्वत्राभ्यासाभिप्रायेणैव कथनावश्यम्भावात्सप्तदश पृष्ठानीत्यादौ तृचस्याभ्यासेनैव सप्तदशत्वस्य षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनमित्यक्षरसम्पत्तेश्च निर्वाढव्यतया प्रकृतेऽपि प्रथमोत्तमयोरभ्यस्तयोर्मेलनेन पञ्चदशर्चत्वस्य षष्ट्यधिकत्रिशताक्षरकत्वस्य चोपपत्तेर्नान्यागमः । स्पष्टं च कौषीतकिवचनम् एकादशसामिधेनीरन्वाहेति प्रकृत्य त्रिःप्रथमया त्रिरुत्तमया पञ्चदश सम्पद्यन्ते पञ्चदश पूर्वपक्षापरपक्षयोरहानीत्यादि ॥

सू० सन्ततमुत्तरम् ॥ ५ ॥

यं कामयेत सर्वमायुरियादिति प्रवोवाज इति तस्य त्रिरनवानमनूच्य अग्न आयाहि वीतय इति सन्ततमुत्तरमर्धर्चमालभेत । यं कामयेत सर्वमायुरियादित्याजुहोता दुवस्य तेति तस्य त्रिरनवानमनूच्य सहोपक्रमेदिति च श्रुतम् । अत्र प्रवोवाजीयाया अग्न आयाहीत्यनेन सान्तत्यविधानात्सार्धायास्त्र्यर्चास्त्रिरभ्यासः । न चोक्ताक्षरसङ्ख्याविरोधः । काम्येन नित्यबाधसम्भवात् । न च तृतीयानुवचन एवोत्तरार्धर्चसान्तत्यविधिरस्तु सङ्ख्याया अविरोधायेति वाच्यं । प्रवोवाजीयामुद्दिश्य सन्तानविधेः प्रतिप्रवोवाजीयं प्रवृत्तेरावश्यकत्वात् । न च त्रिरनवानमनूच्येति त्रिः पाठोत्तरकालमेव सन्तानविधानेन चरमानुवचन एव तल्लाभ इति वाच्यम् । त्रिः प्रथमां त्रिरुत्तमामिति विधिभ्यामेव त्रिरभ्यासलाभेन प्रकृतविध्योरनुवचनमात्रोत्तरत्वविधानादिति प्राप्तेऽन्यतः प्राप्तत्रिरभ्यासोद्देशेन त्रिरनवानमित्यंशेन निरुच्छ्वासत्वविधिः । आवृत्तित्रयसमाप्तिपर्यन्तमेकेनैवोच्छ्वासेन ब्रूयान्न मध्ये निः[1]श्वसेदित्यर्थः । ऋङ्मात्रोद्देशेनानवानविधौ प्रत्यभ्यासमृचो मध्ये निश्वासाभावेऽप्यृक्समाप्तौ निश्वासाभावो न प्राप्नुयात् । तथा च त्रिरित्यस्य वैयर्थ्यापत्तिः । अभ्यासमात्रस्य विध्यन्तरेण लाभात् । एवमग्न आयाहीत्यर्धर्चस्य पाठत एवोत्तरत्वलाभेनान्यतरवैयर्थ्यापत्त्यैन्द्रवायवाग्रं प्रथममहरित्यत्र प्राथम्यस्येवोत्तरत्व-

१ न विश्वसेदविश्वस्तमितिवदिदं समर्थनीयम् ।

मात्रविवक्षितम् । ग्रहणं त्वहःपदवदनुवादः । तृतीयानुवचनोत्तरं तस्या एवोत्तरत्वात् । तथा च प्रथमद्वितीयानुवचनयोर्द्वितीयतृतीयानुवचनसम्बन्धिप्रबोवाजीयाद्वेचैनैव सान्तत्यसिद्धिः । वस्तुतः प्रथमोपस्थितत्वादग्नआयाहीत्येतदेव विवक्षितमिति तृतीयानुवचनएवोत्तरयर्चा सान्तत्यम् । तेन याजुषहै।त्रविधायककल्पादिसामञ्जस्यम् उत्तरमित्येव त्वनुवादः । नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेतेत्युक्तेः । रेवतीवाक्य इव च भावनाविशिष्टभावनान्तरविधानाच्च वाक्यभेद इति भाष्यकारः । त्रिरभ्यासोद्देशेनानवानमात्रविधिरिति तु युक्तम् । इतरांशस्य विध्यन्तरेण लाभस्योत्तराधिकरण एव वक्तव्यत्वात् । तस्मात्त्रसार्धर्चाभ्यास इति नात्तरसङ्ख्याविरोधः ॥

सू० सन्ततमन्वाह ॥ ६ ॥

ता एकश्रुतिसन्ततमनुब्रूयादिति वचनान्तरेणापि सान्तत्यं प्रथमोत्तमास्वेव विधीयते । त्रिः प्रथमामिति वाक्योत्तरमेवास्य पाठेन तच्छब्देन सन्निहितपरामर्शात् । नन्वनवानविधिनैव तासु सान्तत्यलाभात्पुनर्विधिर्न वाच्य इति चेत् न । अनवानसान्तत्ययोर्भेदात् । पूर्वोत्तरोच्चारणयोर्मध्ये मौनकृतकालव्यवधानाभावः सन्तानः । निःश्वासाभावोऽनवानमिति । ननु सन्ततमुत्तरमर्धर्चमारभेतेति विधिनैव सान्तत्यलाभादवाच्य इति चेन्न । तेन पूर्वोत्तरार्द्धद्वयसन्धौ सन्तानप्रापणेऽपि प्रत्यृचं पूर्वोत्तरार्धयोः सन्तानप्रापणस्यैतत्फलत्वेन फलभेदात् । ननु सन्ततमुत्तरमर्धर्चमारभेतेति विधावुत्तरपदेन तत्तदृगुत्तरार्धस्यापि प्रतीतेरविशेषात्तेनैव सान्तत्यप्राप्तेरयं विधिर्न वाच्य इति चेत् न तेनायुष्कामप्रयोगे प्राप्तावपि नित्यप्रयोगे लाभाय विध्यन्तरस्यावश्यकत्वात् । तथा च सूत्रम् । अवाच्यत्वाच्चेति चेत्स्यात्संयोगपृथक्त्वादिति । एवं त्रेधा संयोगे पृथक्त्वव्याख्यानसम्भवेऽपि यदेकैकामेव सन्तनुयादिति विध्यन्तरसत्त्वादिति भाष्यकृता व्याख्यानं तदवाच्यत्वाच्चेत्याक्षेपनिरसनासमर्थत्वादुपेक्ष्यं । तस्मात्प्रथमोत्तमयोरेव सान्तत्यं एकैकामेवेति वचनान्तरमप्यस्यैवानुवाद

Digitized by Google

इति प्राप्ते तादृशवचनवैयर्थ्यापत्त्यैव सामिधेनीमात्रोद्देशेनर्चां सन्धिषु सान्तत्यविधिः । प्रथमोत्तमपदेन तासां विशेष्टुमशक्यत्वात् । ता एकश्रुतीत्यत्र तु सन्ततमित्यनूद्यैकश्रुतिमात्रविधिः । अन्यथा वाक्यभेदात् । उत्तरमर्धर्चमारभेतेत्यत्र त्वारम्भपदसमवधानेनोत्तरपदमृगन्तरप्रथमार्धर्चमात्रपरम् ॥

सू० सामिधेनीसन्तानः ॥ ७ ॥

एकैकामृचं सन्तन्वन्तीति विधावृचः सन्तन्वन्तीत्यनुक्त्वैकैकामित्युक्तेरेकैकस्या ऋचो याववयवावर्धर्चौ तयोराम्नायपाठेन प्राप्तस्य मध्येऽवसानस्य निषेधः प्रतीयते । ऋङ्मात्रोद्देशेन विधाने त्वृच एकस्या ऋगन्तरेण सन्तानः प्राप्नुयात् । सन्ततमेकं श्लोकं वक्तीत्यादावर्द्धयोः सन्तानप्रतीतेः । तस्मात्प्रवर्ग्यर्चामिव न मध्येऽवसानम् । ऋगन्ते तु भवेदेव । अत एवायुष्कामस्याग्न आयाहीत्यस्या ऋचः पूर्वेण सन्तानविधिरुपपद्यत इति प्राप्ते एकैकामृचमित्यनेन सन्तानप्रतियोगिनः कीर्त्तनात्तदनुयोगिनोऽपेक्षायामुपस्थितत्वात्तदुत्तरासामृचामेकैकस्या उपस्थितेरेकैकां स्वस्वपरयोः संयोजयेदित्यर्थप्रतीतेर्नार्धर्चयोः परस्परं सन्तानविधिः । अत एव चरमाया ऋवस्तृतीयावृत्तावनुयोगिन्या ऋचो ऽभावान्निगदेनैव सन्तानो वचनान्तरेण विहितो युज्यते । उत्तमायै तृतीये वचने प्रणवेन निगदमुपसंदधात्यग्ने महाँ असीत्यादिना । ऋगुद्देशेन सन्तानविधाने त्ववसानसामान्याभाव एव प्राप्येत । न चार्द्धर्चौ सन्दधातीति वचनादनुयोगिप्राप्तिः । तस्यर्गुत्तरार्धगन्तरपूर्वार्धत्र परत्वात् । यदसंयुक्ताः स्युरित्यादिनर्चामसंयोगं विनिन्द्यार्धर्चयोः सन्धानं विधाय संयुनक्त्येवैना इत्युपसंहारात् । एतेनान्तरर्चावव्यन्य पुनरर्धर्चे व्यन्यादिति यथासाम्नायं विरामानुवादः सङ्गच्छते ॥

सू० प्रकरणात् ॥ ८ ॥

राथन्तरीं प्रथमामन्वाह बार्हतीमुत्तमामिति सामिधेनीष्वेव प्रकृतौ श्रुतं । तद्वशाद् बृहद्रथन्तरयोर्योनी ऋचावागमयितव्ये त्रिःप्र-

Digitized by Google

थमामिति विधिभिःस्तुतयोरप्यभ्यासादि भवेत् । तेन प्रवोवाजीयाद्योर्विकल्प इति प्राप्ते प्रतिरथन्तरस्य रूपं करोतीति वचनेन प्रवोवाजीयाया एव रथन्तररूपत्वेन संस्तवाचान्या ऋक् प्रथमा कार्या । उत्तमायास्तूत्तमत्वादेव बृहद्रूपत्वम् । परमत्वमेव निमित्तीकृत्य बृहत्सामत्वेन वेदे बहुशः स्तुतिदर्शनात् । यथैन्द्रवायवोऽग्रे गृह्यते रथन्तरस्यैषवर्णोध्रुवउत्तमो गृह्यते बृहत एष वर्ण इति । अयज्ञो वा एष योऽसामेत्यारभ्याग्नऽआयाहीति तृचं रथन्तरवामदेव्यबृहद्वर्णत्वेन संस्तुत्य यमेवैतत्सामन्वन्तं करोतीत्युपसंहाराच्च । अस्मिन्नेव तृचे प्रथमोत्तमयोः सा स्तुतिरित्यपि सुवचम् । अतोनोत्तमाऽप्यन्या ऋक् ॥

सू० त्रिर्विगृह्णाति ॥ ९ ॥

राथन्तरीं प्रथमामित्यादिना ऋक्त्रयं स्तुत्वेदमाम्नायते । त्रिर्विगृह्णाति अन्तरिक्षेण वा इमे लोकाः सन्तता अन्तरिक्षं वा अङ्गिर इति । एकस्या ऋचस्त्रिर्विभागं कुर्यादित्यर्थः । सामिधेनीप्रकरणे चास्य विधेः पाठात्तासामेवोद्देश्यत्वात्प्रत्यृचं त्रिस्त्रिर्विभजेत् । न च तन्त्वासमिद्भिरङ्गिर इत्येतत्सन्निधौ पाठात्तस्या एव त्रिर्विग्रह इति वाच्यम् । सन्निधानात्सामिधेनीप्रकरणस्य बलवत्त्वादिति प्राप्ते तन्त्वेत्यृच एव त्रिर्विभागः । तस्याः पाठं विधाय मध्ये विग्रहं विधायान्तरिक्षं वा अङ्गिर इति पुनस्तस्या ऋचःपरामर्शेनावान्तरप्रकरणप्रतीतेस्तस्याश्च सामिधेन्यवान्तरप्रकरणाद्बलवत्त्वात् । यत्तु शाखान्तरीयं वचनं तन्त्वासमिद्भिरङ्गिर इत्येतां त्रिर्विगृह्णातीति तन्न्यायसिद्धानुवादकम् ॥

सू० पदवादे वा ॥ १० ॥

समिद्वती घृतवती चानूच्येते इति श्रुतौ समिद्वतीति स्त्रीलिङ्गवशादृचोर्विशेष्यत्वावगमात्समिध्यमानवतीं समिद्वतीं चेत्यादाविव समित्पदप्रथमप्रतीका ऋक् तादृश्येव घृतवती चानेया । समिधाग्निं दुवस्यत घृतं मिमिक्षिर इत्यादिका । अनूच्येते इत्यृगद्वयाभिप्रायं द्विवचनमिति

प्राप्ते तन्त्वासमिद्भिरङ्गिरो घृतेन वर्धयामसीत्यस्या एवायं वादः समिद्घृतयोरग्निसमिन्धनानुगुण्यद्योतनार्थः । अनूच्येते इति द्विवचनं तु छान्दसं । तत्पदवैशिष्ट्यभेदेनैकस्या एव द्वित्वोपचार इति तु पदवाद इत्यस्यार्थः । भाष्यकारस्तु समिद्वती इति नपुंसकद्विवचनं पदविशेष्यत्वाभिप्रायं समित्पदघृतपदयोः सृष्टिन्यायेनैकैकपदाभ्यां व्यपदेश इत्याह । समिद्वतो घृतवती च पदे अनूच्येते इति शाखान्तरवाक्यं तु यतः पदे अनूच्येते ततः करणादियमेव ऋक्समिद्वती घृतवती चेति सुयोजम् ॥

सू० ऋचि प्रणवम् ॥ ११ ॥

तत्रैव ऋचि प्रणवं दधातीति विधानात्प्रत्यृचमन्ते प्रणवः प्रयोज्यः स च यद्यपि कुण्डे बदरन्यायेन ऋगक्षरासंमिश्रो वा दधनि सितान्यायेन तत्संमिश्रो वेति द्वेधाऽपि सम्भाव्यते तथाऽपि प्रकृतेरुपांशुयाजपुरोनुवाक्योत्तरमिव कुण्डबदरन्याय एव युक्तः । आम्नात ऋगक्षराणां मध्य एकस्यापि विकारायोगात् । यो वै सामिधेन्याः प्रणवः स गायत्र्या नवममक्षरमिति श्रुत्यन्तरेणाष्टमाक्षरोत्तरत्वप्रतीतेरिति प्राप्ते क्रमेणोच्चरणीययोर्द्वयोः शब्दयोः सम्बन्धस्याङ्गुलिद्वयसम्बन्धस्येव वृत्तिनियामकत्वाभावादृचीति सप्तमीबोधिताधाराधेयभावबाधापत्तेर्वाचनिकत्वेनाक्षरविकारस्यादोषत्वात्प्रणवश्रुतेरिति विधिसिद्धत्वाच्चाक्षरं विकुर्वन्नेव निविशते । उपांशुत्वोच्चैस्त्वधर्मभेदात्तु नोपांशुयाजीयाक्षरविकारः । क्रतुमध्येऽष्टमाक्षरस्यापार्थक्येऽपि ब्रह्मयज्ञादौ तस्याविकृतस्य पाठात्तदभिप्रायेण नवमाक्षरत्वोक्तिः कालभेदेन ध्रियमाणयोरपि द्वे वस्त्रयुगे धारयतीति मिलित्वोक्तिदर्शनात् ॥

सू० अन्त्यंवा ॥ १२ ॥

निवेश्यमानः प्रणवः प्रथमोपस्थितत्वादाद्याक्षर एव निवेश्यः, अग्न आयाहि वीतय इत्यादिरीत्येति प्राप्ते ऋगक्षराणां क्रमविपर्यासे मानाभावेनागन्तुकत्वादन्त्याक्षरस्यैव विकारः । अग्ने दीद्यतं बृहदित्यादौ-

Digitized by Google

तु चरमव्यञ्जनसहितः स्वर एकाक्षरम् । अत एव वषट्कारकत्वेन प्रण-वस्तुतिरुपपद्यते । ऋचमुक्त्वा प्रणौतीत्यादौ त्वाधाराधेयभावाभावान्ना-न्त्याक्षरविकारः ॥

ओङ्कारः ॥ १ ॥

ऋचि प्रणवं दधातीति विधानात्प्रणव इत्यक्षरत्रयात्मक एव शब्दो निक्षेप्यः । विधौ श्रूयमाणशब्दनियमनस्य न्याय्यत्वात् । ऐरङ्कृत्वो-द्गेयमित्यादौ तथा दर्शनादिति प्राप्ते ॐकारस्यैवान्ते निक्षेपः । इराप-दार्थस्य भूम्यादेः शब्दानुपूर्वीघटकत्वबाधेनेवेति शब्दस्वरूपलक्षणायामपि प्रणवपदस्य शब्दविशेष एव शक्तत्वेन वाचकशब्दे लक्षणायां मानाभा-वात् । अग्न्यादिदेवतावाचकपर्यायाणामनियमप्रसक्तौ वैधशब्दनियमनस्य न्याय्यत्वेऽपि नियतलब्धशब्दबाधस्यान्याय्यत्वात् । न हि वेदशास्त्रपुरा-णानि पठेदित्युक्ते वेदादिशब्दान् पठेदित्यर्थः प्रतीयते । अत एव ॐमिति प्रणौतीति बह्वृचाः प्रणवपदस्यार्थप्रदर्शनीं श्रुतिमामनन्ति । तस्मादोङ्कार एव निधेय इति ॥

इति श्रीसङ्कर्षे भट्टदीपिकायां षोडशस्याध्यायस्य प्रथमः पादः ॥ १ ॥

हौत्रकाध्याये सामिधेनीपादः ॥

अथ षोडशाध्याये द्वितीयः पादः ।

सू० त्रींस्तृचान् ॥ १ ॥

सामिधेनीरेव प्रकृत्य त्रींस्तृचाननुब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात्पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान्करोतीति श्रुतं । सन्ति हि गायत्रीत्रिष्टुब्जगत्यनुष्टुप् चेति चत्वारि छन्दांसि ब्राह्मणादिव-र्णचतुष्टयसम्बन्धित्वेन तत्र तत्र स्तुतानि । तदत्र राजन्यातिरिक्तवर्णत्र-यस्य स्ववशंवदतापादकत्वेन तृचत्रयसंस्तवबलात्तृचा अपि गायत्रजागता-

नुष्टुभाएव राजन्येनोपादेयाः । तुल्यन्यायेन वैश्यस्य गायत्रत्रैष्टुभानुष्टुभा-भवन्ति । ता वै गायत्र्यो भवन्तीति प्राकृतविधेर्नैमित्तिकेन विकारेण बाध इत्यालेखनो मन्यते । आश्मरथ्यस्तु अष्टावेतानि हर्तोषि भवन्त्य-ष्टाक्षरा गायत्रीत्यादिवदर्थवादमात्रेण छन्दोविशेषपरत्वेन नियमनस्य प्राकृतबाधस्य चायुक्तत्वात् पुनर्विधेः प्रकृतिप्राप्तं तृचान्तरपरिसङ्ख्यार्थत्वेन सार्थक्याद्गायत्र्या एव प्राकृतास्तृचा ग्राह्यादित्याह । ते च तृचाः प्रथमोत्तमे त्रिस्त्रिरुक्ते इति द्वावग्नआयाहि वीतयइत्यृक्त्रयेण तृतीयइत्येवंरूपाः । प्रथमोत्तमे त्रिरुक्ते सहसामन्वता तृचेनेति वाक्यशेषात् । अग्न आयाहीत्यृक्-त्रयस्य रथन्तरवामदेव्यबृहत्सामत्वेन संरुरवात्सामन्वत्तृचपदेन परिग्रहः ॥

सू० सर्वाणि ॥ २ ॥

सामिधेनीष्वेव सर्वाणि छन्दांस्यनुब्रूयाद्बहुयाजिन इति श्रुतं । तत्र सप्ताधिकशतसङ्ख्यानि छन्दांसि सर्वपदेनोच्यन्ते । सङ्कोचे मानाभा-वात् । यदि गायत्र्यादिसप्तकमेव निरुपपदछन्दःपदेनोच्यते । तदधि-कानात्तराणां त्वति छन्दःकृतिछन्दःपदादिनैव व्यवहारः । अत एवाथ-र्वणसर्वानुक्रमण्यां यत्र सर्वाणि छन्दांसीत्युच्यते तत्र गायत्र्यादि जगत्य-न्तानि सप्त छन्दांसि जानीयादिति सूत्रमित्यालोच्यते तदा तावन्त्येव-प्रयोज्यानीति प्राप्ते गायत्रीत्रिष्टुब्जगतीनामेव प्रकृतत्वात्सर्वत्वमिहा-धिकारिकम् । अतएव त्रैधातवीयायामप्येतत्त्रितयमेव सर्वाणि छन्दांस्ये-तस्यामिष्ट्यामनूच्यानीत्युक्त्वा त्रिष्टुभो वा एतद्वीर्यमित्यादिना त्रिष्वेवे-तरचतुष्टयरूपतासम्पादनार्था स्तुतिरुपपद्यते ॥

सू० अभीदणाम् ॥ ३ ॥

बहुयाजिपदेन यागबाहुल्यप्रतीतेर्बहुयष्टेव ग्राह्यः । सहस्रदक्षि-णायागकर्तर्यपि सहस्रद इति प्रयोगदर्शनाद्बहुदक्षिणपौण्डरीकादियाजी वा ग्राह्य इति प्राप्ते ऐष्टिकपाशुककर्माण्यपेक्ष्य सोमस्येतिकर्तव्यताबाहुल्या-द्विश्वसृजामयनान्ताखिलविकृत्यनुगतत्वाच्च सोमयाज्येव बहुयाजी ।

Digitized by Google

अत एव यो ब्राह्मणो बहुयाजी स्यात्तस्य कुम्भ्यां गृह्णीयादिति विधाय स हि गृहीतवसतीवरीक इति विवरणमुपपद्यते ॥

सू० अनाम्नानात् ॥ ४ ॥

सामिधेन्युत्तरं पठ्यमानानां निविदामप्यग्निसमिन्धनार्थत्वात्सन्तानविधिः प्रवृत्त्या कार्यापत्त्या च तत्रापि प्रवर्त्तते । सामिधेनीनां स्वरूपे सन्तानस्यानर्थक्यादग्निसमिन्धनद्वारा दार्शिकापूर्वसाधनत्वस्योद्देश्यतावच्छेदकत्वाच्च । अत एव द्वयं वा इदं सर्वं छन्दस्कृतं चाछन्दस्कृतं च तेन सर्वेणाग्निं स्तावानीति श्रुत्या ऋचामनृचां चैकधर्मावच्छिन्नत्वं बोध्यते । तेन यवेषु प्रोक्षणमिव निवित्स्वपि सन्तानः स्यादिति प्राप्ते क्रमैकनियामिकायाः प्रवृत्तेरिहाप्रवृत्तेरेकप्रकरणे कार्यापत्त्यभावात्सामिधेनीभिरिष्ट्वा निविद्भिरुपस्तुत्येति कार्यभेदश्रवणात्स्तुत्यर्थत्वे वा शूरत्वचित्रत्वादिगुणभेदेन रथन्तरबृहतोरिव स्तुतिवैलक्षण्येन द्वारभेदात्तासां सप्तपदानि समस्यावस्येदथ चत्वार्यथ चत्वारीत्येवं प्रतिनियतनिर्देशेन धर्मभेदविधानाच्च न विदां सन्तानः ॥

सू० वरणार्थं वा ॥ ५ ॥

आसीनमूर्ध्वजानु[१] होतारं वृणीत इत्यत्र विधीयमानमूर्ध्वजान्वासनमृत्विक्संस्कारद्वारा प्रकरणधर्मः । वरणस्यैव वायं धर्मः । होतृपदं च वहनसाधनत्वादृत्विक्परं । तेन सर्वेषां व्रियमाणानामूर्ध्वजान्वासनमिति प्राप्ते होतारं वृणीत इति वाक्यान्तरेणैकवाक्यतयोर्ध्वजान्वासनविशिष्टहोतृवरणविधानान्न सर्वर्त्विग्वरणधर्मः ॥

सू० अध्वर्युः ॥ ६ ॥

होतृप्रवराध्वर्युप्रवरयोः क्रमेण मन्त्रपाठः ब्राह्मणपाठस्तु शाखाभेदेन क्वचिद्विपरीतोऽपि दृश्यते । तथाऽप्यध्वर्युप्रवर एव पूर्वः स्यात् । मन्त्रलिङ्गोपोद्बलितब्राह्मणपाठस्य मन्त्रपाठाद् बलवत्वात् । ब्रह्मण्वदाचव त-

१ "ऊर्ध्वज्ञुम्" इति "ग" पुस्तकपाठः ।

Digitized by Google

दिति मन्त्रे वहेर्लेटि सिपि रूपेणावाहनं कुर्यादित्यावहनस्यासिद्धत्वेन मानात् । आवहनोत्तरमस्य मन्त्रस्य बाधितार्थतापत्तेरिति प्राप्ते मानुषेण होत्रा देव होतारं प्रत्यावहेति प्रैषमात्रेकृतेऽपि तदात्वएव देवास्तेनाहूताइत्यत्र मानाभावेनाग्निकृतदेवतावहनस्याधुनाऽप्यसिद्धत्वाभिप्रायेण मन्त्रलिङ्गोपपत्तेर्मन्त्रपाठानुसारेण होतृप्रवर एव पूर्वः ॥

सू० आवह ॥ ७ ॥

अग्नेनेमिर्देवांस्त्वमग्निरिभूरस्यावह देवान्यजमानायेति मन्त्रे श्रुतमावाहनसमस्तदेवतानां स्यात् । त्वष्ट्रादीनामपि देवतात्वात्प्राकरणिकत्वाच्च । सन्निधानेन विशेषपरत्वे तु प्रयाजानामेव प्रथममिज्यमानत्वात्तद्देवतापरमिति प्रयाजलोपे मन्त्रलोप इति प्राप्ते ब्राह्मणानावह चैत्रं मैत्रं यज्ञदत्तञ्चेति लौकिकवाक्ये सामान्यवाचिनोऽपि ब्राह्मणपदस्य चैत्रादिमात्रपरत्वप्रतीतेरग्निमग्न आवहेत्याद्युत्तरवाक्येषु कीर्त्यमानानामेवैतदावाहनं न सर्वेषाम् ॥

सू० आहवनीयः ॥ ८ ॥

अग्निमग्न आवहेत्यत्र वाह्यत्वं वाहकत्वं चैकस्यैव प्रतीयते । उभयोरग्निपदेन व्यपदेशात् । युक्तं चैतत् । स्वं महिमानमावहेति स्वाभिन्नस्य स्वमहिम्नः स्वेनैव वहनप्रतीतेः । स चोभयात्मकोऽग्निराग्नेयाज्यभागदेवतारूप एव । यदग्निमग्न आवहेत्याह तदाग्नेयाज्यभागायाग्निमावाहयतीति श्रुतेरिति प्राप्ते वहनकर्तृकर्मत्वयोरेकस्मिन्विरोधात्स्वमहिमपदस्यापि कौषीतके वायुपरत्वेन व्याख्यानात्सामिधेनीभिरिष्ट्वाग्निमुपस्तुत्याग्निमग्नआवहेति श्रवणादाहवनीयरूपः प्रत्यक्षोऽग्निरेवावोढा । तेनाहवनीयभेदेऽप्याहितस्यैकत्वादौपाधिकद्वित्वस्याप्रयोजकतयाऽऽमन्त्रिते वचनोहाभावेऽप्यवभृथेऽग्निमापआवहतेत्यादिरूहः ॥

सू० अग्निंहोत्राय ॥ ९ ॥

यदग्निं होत्रायावाहयति स्विष्टकृतं तदावाहयतीति श्रुत्या होत्रार्थमोह्यमानोऽग्निः स्विष्टकृद्यागदेवतारूपः स्विष्टकृद्गुणकोऽग्निरेवेत्यव-

Digitized by Google

गतं यदाहवनीयें जुहोति तेन सोऽस्याभीष्टः प्रीत इति श्रुत्यन्तरे चाहवनीये आहुतिसंयोगादिष्टः प्रीतश्च भवतीत्यवगमात् स्विष्टकृत्त्वमाहवनीयाग्नेरेव प्रतीयत इत्येकस्यैवावोढृत्वमोह्यत्वञ्चेति द्वयमपि सम्पन्नं। तच्चौपाधिकभेदाङ्गीकारेणापि सूपपादमित्याहवनीय एव स्विष्टकृदग्निरित्यवभृथेऽग्निं होत्रा यावहेति निगदेऽप इत्यूहः। यत्तु भाष्ये देवतावोढुर्हव्यवोढुश्चैकत्वेनावहनहव्यवहनाभ्यां स्विष्टकृद्यागसम्बन्धादसतिस्विष्टकृति सर्वहुते देवतावाहनस्यैव लोपइति। तन्न। तत्तद्देवतावाहने तत्तद्यागानामेव प्रयोजकत्वात्। स्विष्टकृद्देवतावाहने हव्यवहनस्यैव प्रयोजकत्वात्। स्विष्टकृद्यागलोपेऽपि तत्तत्प्रयोजकलोपाभावेन देवतावाहनलोपायोगादिति प्राप्तेऽभीत्युपसर्गयोगादिषिधातोरिच्छार्थकाविष्टचेष्टशब्दार्थकर्तृत्वस्याहवनीयउपपादनेऽपि सूपसृष्टयजिधातुनिष्पन्नस्विष्टशब्दाभेदादेकस्यैवौपाधिकभेदाङ्गीकारेणोभयनिर्वाहकोपाधेरश्रवणादाहवनीयादन्य एवाग्निः स्विष्टकृत्॥

सू० स गार्हपत्यः॥ १०॥

स आहवनीयादन्यत्वेन निश्चितो देवतारूप एव कश्चिदग्निः स्यात्। स्विष्टकरणे देवताया एव सामर्थ्यादिति प्राप्ते गार्हपत्यः स्विष्टकृद्भवतीति वचनात्तस्यापि कतिपयाहुतिसंयोगेन स्विष्टकृत्त्वसम्भवाद्गार्हपत्याग्न्यधिष्ठातृदेवताविशेष एव स्विष्टकृत्॥

स होमाय॥ ११॥

स चोह्यमानो होमार्थमेव। होत्रशब्दस्य होमपरत्वात्। कतिपयहोमाधिकरणत्वस्य तत्रापि सत्त्वात्। यस्मिन्नेवैतदग्नावाहुतयो हूयन्त इत्यादिना होमार्थत्वश्रवणाच्चेति प्राप्ते होतुः कर्म होत्रं तच्च हव्यप्रापणं। हव्यावह यविष्ठ याते अद्य यथा वो येन पथा हव्यमावो वहानीत्यादिमन्त्रलिङ्गेन तथा निर्णयात्। होत्रायेति तादर्थ्यचतुर्थ्या च हव्यवहनप्रयोजनकत्वप्रतीतेः। अतः शंय्वन्तासु पत्नीसंयाजाभावेऽपि भवेदेवाग्निं होत्रायेति निगदः॥

सू० होत्रीयष्टु ॥ १२ ॥

स्वं महिमानमावहेत्यत्र स्वशब्दस्यात्मीयपरत्वेन सम्बोधनीयाहवनीयपरत्वावश्यम्भावात्तन्निष्ठस्य होतृत्वयष्टुत्वादिधर्मनिकरस्यैव महिमरूपतया तद्धर्मविशिष्टो भवत्येतदर्थकोऽयन्निगदआहवनीयपर एवेति प्राप्तेऽथ यत्स्वं महिमानमावाहयति वायुं तदावाहयति वायुर्वा अग्ने स्वोमहिमेति कौषीतके श्रवणाद्वायुपदस्य च वायोरग्निरित्यादिश्रुत्या जनकपरत्वेनाहवनीयजनकगार्हपत्यपरएवायं निगदः । होतृत्वादिधर्माश्च देवतावोढृत्वेनाहवनीय इव हव्यवोढृत्वेन गार्हपत्येऽपि सम्भवन्तीति न त आहवनीयासाधारणाः। अग्ने यदद्यविशो अध्वरस्य होतः पावकशोचेवेष्ट्वंहियज्वेति स्विष्टकृत्यपि प्रयोगात् । तस्मादेकस्यैव गार्हपत्यस्य हव्यवोढृत्वेनाहवनीयजनकत्वेन चावाहनम् । आवाह्यतावच्छेदकभेदावहतेरावृत्तिः । तेन पितृमेधे वाक्यद्वयस्यापि स्थानेऽग्निं कव्यवाहनमावहेत्येक एव निगदः ॥

सू० अतूर्त्तः ॥ १३ ॥

अतूर्त्तो होता तूर्णिर्हव्यवाडिति वाक्ये हव्यवाहनलिङ्गाद्गार्हपत्य एवाभिधीयत इति प्राप्ते देवेद्धोमन्विद्ध इत्युपक्रमे समिध्यत्वलिङ्गेन सामिधेनीभिः स्तुतस्याहवनीयस्यैवैष वादः ॥

सू० आचाग्ने ॥ १४ ॥

अग्निं होत्रायावहेत्युपक्रम्याचाग्ने देवान्वह सुयजा च यज जातवेदइत्यत्रापि गार्हपत्यवादे प्राप्तेऽग्निमग्नआवहेति सर्वोपक्रमे सम्बोधितस्येहापि प्रत्यभिज्ञानादाहवनीयस्यैव वादः ॥

सू० स्वाहाऽग्निम् ॥ १५ ॥

उत्तमप्रयाजे स्वाहा ऽग्निं होत्राज्जुषाणा इत्यत्र होत्रायेति तादर्थ्यस्यानाम्नानात्प्रयाजदेवताया अग्नेरेव वादउपक्रान्तत्वादिति प्राप्ते स्वाहादेवानाज्यपानित्यस्योत्तरपाठादेव स्थानाद्यदनिष्ठाभ्यो देवताभ्यः स्वाहा करोतीति वचनेन यक्ष्यमाणदेवतेज्याप्रतीतेर्होत्रादित्यनेन हव्यव-

Digitized by Google

हनर्निमित्तकत्वस्य सौविष्टकृतहविर्ज्ञोषणे भृतिरूपे प्रतीतिसम्भवात्स्विष्टकृत एवैष वादः ॥

सू० अग्निर्होत्रेण ॥ १६ ॥

सूक्तवाकाग्ने त्वं सूक्तवागसीति सम्बोधनस्य स्वाभिमुखावहनीयपरत्वेन सूक्तवागसीति सूक्तवचनसंबन्धेन होतृत्वाध्यवसायादग्निर्होत्रेणेदं हविरजुषतेत्यत्र सहार्थतृतीयया होतृकर्मसाहित्यमात्रप्रतीतेस्तावन्मात्रस्य च तूर्णिर्हव्यवाडित्यादाविवौपचारिकोक्तेराहवनीयेऽपि सम्भवादग्निर्होत्रेणेत्यपि तस्यैव वाद इति प्राप्ते इत्थम्भूतलक्षणतृतीयया स्थानाद्गार्हपत्यस्यैव वादः । सूक्तवचनसम्बन्धस्याहवनीयपरत्वेऽपि हविर्ज्ञोषणप्रायपठितस्य गार्हपत्यपरत्वावश्यम्भावात् ॥

सू० अयाडग्निः ॥ १७ ॥

स्विष्टकृद्याज्यानिगदेऽयाडग्निरग्नेः प्रियाधामानीत्यत्राहवनीयस्योपक्रान्तत्वेन यत्तदग्नेरित्यत्रापि तस्यैव वादः । जातवेदा जुषतां हविरिति हविर्ज्ञोषणलिङ्गेन गार्हपत्यस्य पृथङ्निर्दिष्टत्वादिति प्राप्ते स्थानादेव गार्हपत्यस्यैव वादः तस्यैव सोऽध्वरेत्यनेन प्रकृतहविर्ज्ञोषणाभ्यनुज्ञार्थं पुनर्निर्देशोपपत्तेः ॥

सू० अग्निर्देवः ॥ १८ ॥

अध्वर्युप्रवरनिगदेऽग्निर्देवो होता देवान्यक्षदित्यत्र होतृयष्टृत्वयोरुभयसाधारण्यादनियमे प्राप्ते उत्तरत्र ब्रह्मण्वदा च वक्षदित्यावोढृत्वलिङ्गादाहवनीयवाद एव ॥

सू० अग्निर्होता ॥ १९ ॥

स्रुगादापननिगदेऽग्निर्होता वेत्त्वित्यत्राप्यनियमे प्राप्तेऽग्निर्होतेत्याहाग्निर्वै देवानां तं वृणीते इत्युक्त्वा यो ऽग्निं होतारमवृथा इत्याहवनीयं पुनर्वृणीत इति श्रवणात्पुनरित्यनेन पूर्ववृत्तस्य होतुरग्नेराहवनीयत्वं गम्यते । ज्वलनस्य देवतायाश्च परस्पराभेदेन बहुशो व्यवहारदर्शनात् ॥

इति सङ्कर्षे भाट्टदीपिकायां षोडशस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

हौत्रकाध्याये निगदपादोऽयम् ॥

Digitized by Google

वपी"ति, अतस्सर्वविलक्षणत्वात्सर्वशक्तित्वाल्लीलैकप्रयो-जनत्वात् क्षेत्रज्ञकर्म्मानुगुण्येन विचित्रसृष्टियोगाद्ब्रह्मैव जगत्कारणम् ।

टी० सू० न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च, अपि-शब्दं व्याचष्टे "तदनादित्वेऽपी"ति, उपपद्यते चेत्यत्र च-शब्दाभिप्रेतार्थमाह "अकृताभ्यागमे"ति, स्वरूपानादित्वे सत्यपि सृष्टिप्रवाहानादित्वे सति हि कर्मप्रवाहानादित्वसिद्धिः, अतः सृष्टिप्रवाहानादित्वं दर्शयति "सूर्य्याचन्द्रमसा"विति, प्रतिकल्पमधीतस्यास्य-वाक्यस्यार्थवत्त्वात्सृष्टेरनादित्वसिद्धिः, तत्तत्सूत्रोक्तानर्थान् यथाक्रमं वदन्नधिकरणार्थमुपसंहरति "अत"इति,

सू० सर्वधर्म्मोपपत्तेश्च ॥ ३६ ॥

भा० प्रधानपरमाण्वादीनां कारणत्वे यद्धर्म्मवैकल्यमुक्तं वक्ष्यमाणं च तस्य सर्वस्य धर्म्मजातस्य कारणत्वोपपादिनो ब्रह्मण्युपपत्तेश्च ब्रह्मैव जगत्कारणमिति स्थितम् । प्रयोजनवत्त्वाधिकरणं समाप्तम् ।

इति श्रीमद्भगवद्रामानुजाचार्य्यविरचिते शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥

——o——

टी० सू० सर्वधर्म्मोपपत्तेश्च, इदं सूत्रं सर्वाधिकरणशेषं के धर्माः कस्मिन्नुपपत्तिः किंव्यवच्छेद्यमित्यपेक्षायां व्याचष्टे "प्रधाने"ति, पञ्चम्या अन्वयं दर्शयति "ब्रह्मैवे"ति, परमप्रकृतिसाध्येनान्वय इत्यर्थः, इदमधिकरणं ब्रह्माज्ञानपक्षे न सङ्गच्छते जगद्व्यापारस्य निष्प्रयोजनतया चोदिते लीलात्वेन परिहारात् प्रपञ्चस्य भ्रान्तिपरिकल्पितत्वे भ्रान्तकृत्यस्य निष्प्रयोजनत्वं न दोष इति हि वक्तव्यं, न हि शुक्तिरूप्यचन्द्रद्वित्वाध्यासादिकं प्रयोजनाय प्रवर्तते, न च पित्तोपहतः प्रयोजनाकाङ्क्षया घटं भिनत्ति गृहं च दहति

न हि स्वप्नदर्शी प्रयोजनापेक्षतया स्वशिरश्छेदं पश्यति । ननु भ्रान्तस्यापि हि क्रीडा सम्भवति अतस्तदुक्तिरिति चेन्न, केषांचिद्व्यापाराणां क्रीडातुल्यत्वेऽपि स्वशिरःप्रहारादीनामिव भ्रान्तव्यापारत्वादेव तेषां क्रीडात्वानुपपत्तेः । किञ्च बहु स्यामिति सङ्कल्पेन हीश्वरः सृष्ट्यादि करोति तदयुक्तं, न हि कश्चिद् भ्रान्तः स्यामिति सङ्कल्प्य भ्राम्यति । किञ्चेश्वरस्सर्वज्ञश्चेत्स्वानर्थरूपसंसारप्रवर्त्तनं क्रीडेति न मन्यते अज्ञश्चेत्सर्वज्ञत्वश्रुतिविरोधः विवेकज्ञाननिष्पादनेन स्वानर्थपरिहाराय जगत्सृजतीति चेत् तथाऽपि लीलात्वमनुपपन्नं, न हि व्याध्युपहतस्यौषधानयनप्रवृत्तिर्लीला भवति स्वयं प्रयोजनरूपव्यापारो हि लीला, ऋग्वेदादिप्रवर्तकस्य शास्त्रादधिकविषयज्ञानवत ईश्वरस्य जगत्सृष्टिनिष्पाद्यं विवेकज्ञानं न सम्भवति यस्सर्वज्ञस्सर्ववित् तस्मादेतद् ब्रह्म नामरूपमन्नं च जायत इति हि श्रुतिः यदीश्वरस्स्वबन्धभ्रमनिवर्तनाय जगत्सृजति तर्हि बन्धच्छेदनोपयिकानेवार्थान्सृजतु किमर्थं बन्धवर्धकानर्थकामादीन् सृजति । किं च किं भ्रान्तिहेतुर्लीला? उत भ्रान्तिकार्या? उत भ्रान्तिर्वे, नाद्यः लीलया स्वभ्रमसम्पादनानुपपत्तेः न द्वितीयः, प्रथमसङ्कल्पस्य लीलात्वानुपपत्तेः, तद्वदेवोत्तरत्रापि लीलामन्तरेण भ्रमोपपत्तेश्च, नापि तृतीयः द्विचन्द्रज्ञानस्य लीलात्वाप्रसिद्धेः, स्वयमभ्राम्यन्नीश्वरो लीलया परान्मोहयतीति चेन्न त्वन्मते भ्रान्त्या विना परदर्शनायोगात्परदर्शने सम्भवति तेषां स्वानन्यत्वज्ञानाच्च निर्विशेषसन्मात्रस्य ब्रह्मणो निर्विशेषत्वादेव न लीलासम्भवः, ईश्वरस्य तु सर्वज्ञत्वेन संसारमहितत्वेन जीवान्स्वानन्यत्वेन च जानतो जन्मजरामरणादिनिर्वर्तननरकयातनादिव्यापारो न लीला भवितुमर्हति, अत इदमधिकरणं ब्रह्माज्ञानवादिनां विरुद्धम् । वैषम्येत्यादि सूत्राणि चाधिकरणान्तरं सर्वैर्वर्णितं, न च तद्युक्तं फलफलिभावेन प्रकृतिसाध्येन तेषामन्वितार्थत्वात्, फलफलिभावश्च दर्शितः कर्मसापेक्षतया वैषम्यनैर्घृण्यपरिहारश्च भ्रान्तब्रह्मवादिनां न घटतेऽपि पित्तोपहतो हि शुभाशुभानपेक्षः किञ्चित्स्तौति सान्त्ववादिनमपि कञ्चन निन्दति कांश्चिदम्भसा सिञ्चति कांश्चिन्मुसलेन हन्ति न च तस्मि-

न्वैषम्यनैर्घृण्ययोर्दोषरूपता । न च युक्त्या परिहर्तव्यत्वं सापेक्षत्वादिति पदं च विषमसृष्ट्या सम्बन्धमर्हति न ईश्वरश्चेत् कर्मसापेक्षः तस्य स्वतन्त्रत्वात्सृष्टिश्चेच्च कर्मसापेक्षा समष्टितत्त्वसृष्टौ सर्वशक्तितयेश्वरस्य निरपेक्षत्वात् यस्मिन्नंशे वैषम्यनैर्घृण्यप्रसङ्गस्तत्रैव हि कर्मणोऽपेक्षा अतः प्राप्ताप्राप्तविवेकेन वैषम्यांशस्य कर्मसापेक्षत्वाद्विषमसृष्टेरित्युक्तम्, उपपद्यत इति चानादित्वमुपपद्यत इति व्याख्यातं तदानीमविभागादिति शङ्कितहेतुरपरिहृतः स्यात् अतः क्षेत्रज्ञानामनादित्वेऽपि अविभाग उपपद्यत इति व्याख्यातम् । उक्तलक्षणस्याविभागस्य तथात्वोपपादकत्वेन अकृताभ्यागमादिप्रसङ्गरूपस्तर्कोऽपि सूत्राभिप्रेतो भवतीत्यभिप्रायेणाह "तथाऽनभ्युपगम"इति, अकृताभ्यागम-शब्देन मुक्तानामप्युत्पत्तिप्रसङ्गोऽभिप्रेतः एवमुपपद्यत उपलभ्यत इति द्वयं यथाक्रमम् अविभागानादित्वयोः समर्थनपरं सर्वधर्मोपपत्तेश्चेति सूत्रं निर्विशेषवादेऽत्यन्तमघटितमिति दुरपह्नवं ब्रह्मणो महामायत्वात्तस्मिन्मायाकल्पितधर्मोपपत्तिरिति तु श्रद्धामात्रम् अशाब्दतत्वात्, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतिविरोधाच्च । यादवमिश्रानुसारिणस्तु सू· सर्वधर्मोपपत्तेश्चेति सूत्रमप्यधिकरणान्तरमाहुः तत्र चैतन्यशक्तिक्रियाशक्तिपरिणामशक्तिरूपाः सर्वे धर्मा ब्रह्मणि नोपपद्यन्ते नित्यसर्गादिप्रवृत्तिप्रसङ्गात्, न चेच्छया नित्यप्रसङ्गपरिहारः इच्छाया नित्यत्वे नित्यप्रसङ्गात्, अनित्यत्वेऽपि हेतुसापेक्षत्वात् हेतोश्चामानकत्वात् कथञ्चिद्धेत्वन्वेषणे तस्यापि नित्यानित्यविकल्पे पूर्वोक्तदोषप्रसङ्गादिच्छया व्यवस्थाऽनुपपत्तेर्नित्यसर्गप्रसङ्गः । अतो ब्रह्मणि सर्वे धर्मा नोपपद्यन्त इति पूर्वपक्षः कृतः । इच्छायाः प्रलयकालात्ययज्ञानजन्मत्वात् तज्ज्ञानस्य प्रलयादौ किञ्चित्कालं स्वप्स्यामि ततः प्रबोद्धाहे इति सङ्कल्पस्य नष्टत्वेऽपि तदाहितविशेषप्रबोधशक्त्या प्रलयकालात्यये जन्यत्वात् प्रलयकालस्य प्रकृतिपरिणामरूपत्वादन्त्यपरिणामस्य नित्यप्रसङ्गाभावादिच्छायाः कादाचित्कत्वोपपत्तेर्नित्यसर्गादिप्रसङ्गाभावात् ब्रह्मणि ज्ञानक्रियापरिणामशक्तिरूपसर्वधर्मोपपत्तेरिति राद्धान्तितं तत्र तावदधिकरण-

Digitized by Google

न्तरत्वमयुक्तं सन्मात्रस्यापि ब्रह्मणः प्रकृत्यंशेन महदाद्युपादानत्वात् परिणामशक्तिमतोऽपि प्रकृत्यंशस्यान्तर्यामिब्राह्मणादिष्वीश्वरनियाम्यतयाऽवगतस्य स्वातन्त्र्येण परिणामायोगात् सदेव सोम्येदमग्र आसीत्तदैक्षत बहु स्यां सोऽकामयतेति जगत्सर्गादिविषयस्येश्वरसङ्कल्पस्य कादाचित्कत्वावगमाच्च नित्यसर्गादिप्रवृत्त्यप्रसङ्गेन पूर्वपक्षोत्थानासम्भवाद्द्विपरार्द्धकालभाविसदृशतरसूक्ष्मपरिणामपरम्परास्वन्त्यपरिणामलक्षणस्य प्रलयकालात्ययस्य ज्ञानं सिसृक्षाहेतुः, तत्र यदुक्तं सुषुप्तस्येश्वरस्यस्य पूर्वसङ्कल्पाहितविशेषाप्रबोधशक्तिः प्रलयकालात्ययसहकृता प्रबोधं जनयति तेन प्रलयात्ययं ज्ञात्वा सङ्कल्पयतीति तदयुक्तं स्वतः सर्वज्ञस्य ज्ञानसङ्कोचककर्मपारवश्यरहितस्येश्वरस्य स्वापायोगात्स्वेच्छया स्वाप इति चेन्न इच्छानुपपत्तेः, अज्ञानांशेऽपि ज्ञानमेव हि सर्वे वाञ्छन्ति न तु ज्ञानलोपं निद्राया अभिमतत्वं दृश्यत इति चेत् आहाराजरणतीव्रामयदुःखपरिश्रमतमोगुणाभिभूतानां तत्तदनिष्टशमनाय निद्राकाङ्क्षा, लघुशरीरस्य व्याध्यादिपहितस्य प्रसन्नमनसो विचित्रमभिमतं विषयमवलोकयतो हि निद्रानभिमतैवेति, अत ऊर्मिषट्कातिगस्यानामयस्य सर्वशक्तेस्तमसः परमेश्वरस्य कथञ्ज्ञानलोपोऽभिमतः स्यात् प्रबोधशक्तेः पूर्वसङ्कल्पाहितविशेषत्वमप्ययुक्तं विशेषस्य प्रबोधजननयोग्यतालक्षणत्वाद्योग्यतान्तरानुपपत्तेर्द्रव्यस्यैव सर्वविधयोग्यतापादनदर्शनाच्च, स च योग्यतालक्षणविशेषः किं प्रलयकालात्ययज्ञानात्प्रबोधमीश्वरे जनयति? उताज्ञानात्? न प्रथमः योग्यतायाश्चैतन्याभावात्, द्वितीये सयोग्यतारूपविशेषस्तदानीमीश्वराधिष्ठितो न वा? न प्रथमः अप्रबुद्धस्याधिष्ठातृत्वायोगात् । द्वितीये चानधिष्ठितस्य विशेषस्य यथाप्रबोधकार्यकरत्वम् एवमीश्वरानधिष्ठितस्य प्रकृत्यंशस्यैव जगज्जननसम्भवात् प्रबोधपरिकल्पनं विफलं तद्धि कल्प्यं अश्रुतत्वात्प्रबोधानन्तरभावितया त्वदभिमतसङ्कल्प एव हि तदैक्षतेति श्रुतः न तु प्रबोधः अप्रबुद्धस्य सङ्कल्पायोगात् तत एव प्रबोधः कल्प्यत इति चेन्न स्वापप्रबोधयोरुभयोः कल्पनादपीश्वरज्ञानस्य नित्यतामात्रकल्पनस्य न्याय्यत्वाच्छ्रुत्यनुरोधित्वाच्च स्वापप्रबोधावपि वचनसिद्धाविति

चेत् नित्यज्ञानत्वं च वचनसिद्धं तद्वचनं ज्ञानशक्तिनित्यत्वपरमिति चेत्स्वापप्रबोधवचनमपि जगद्व्यापारवैमुख्यौन्मुख्यविषयं स्यात् इयान्विशेषः क्वचिज्ज्ञानलोपस्याभिमतत्वानुपपत्तिः शक्त्याहितविशेषत्वानुपपत्तिरीश्वरानधिष्ठितायाः कार्यकरत्वेऽतिप्रसङ्गश्च जगत्सर्गादिविषयसङ्कल्पातिरेकेण स्वापप्रबोधयोरश्रुतयोः परिकल्पनगौरवं चान्यत्र तद्विरहश्चेति । किञ्च स्वापशब्दस्यामुख्यत्वं चाग्रप्रायन्यायसिद्धं "यदा स्वपिति शान्तात्मा तदा सर्वं निमीलतीति ह्युच्यते निमीलनशब्दस्य हि प्रवृत्त्यनर्हसूक्ष्मदशापत्तिविषयत्वममुख्यं प्रबोधानन्तरभाविसङ्कल्पानुपपत्तिश्च भवतां, बहु स्यां प्रजायेयेति हि सङ्कल्पः प्रकृतिपुरुषेश्वरस्वरूपेण बहु स्यां महदादिरूपेण प्रजायेयेति हि भवद्भिर्व्याख्यातं प्रकृत्यधिकरणे, ईश्वरांशस्य विभागो नाम प्रबोध एव न हि खण्डितत्वमतः प्रबोधात्सङ्कल्पः सङ्कल्पाद्विभाग इत्यन्योन्याश्रयः, बहु स्यामिति सङ्कल्पः पूर्वं प्रलयादाविति चेत् न प्रजायेयेति सङ्कल्पतुल्यकालताप्रतीतिस्वारस्यात् सोऽपि सङ्कल्पः पूर्वं प्रलयादाविति चेत् न तत्तेज ऐक्षत तदपोऽसृजतेत्यादिसर्गानन्तरपूर्वभाविसङ्कल्पपरप्रकरणविरोधात् सदेव सोम्येदमग्र आसीदेकमेवेति पूर्ववाक्यविरोधाच्च । स एकाकी न रमतेत्यरतिरपि हि न प्रलयारम्भे युज्यते । अतः सङ्कल्पानुपपत्तेश्च राद्धान्तवर्णनमयुक्तम् ॥ प्रयोजनवत्त्वाधिकरणं समाप्तम् ॥

इति श्रुतप्रकाशिकायां द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

अथ द्वितीयाध्यायस्य द्वितीयः पाद आरभ्यते ॥

रचनाऽनुपपत्त्यधिकरणम् ।

सू० रचनाऽनुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ १ ॥

ननु उक्तं जगज्जन्मादिकारणं परं ब्रह्मेति, तत्र परैरुद्भाविता दोषाश्च परिहृताः, इदानीं स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते, इतरथा कस्यचिन्मन्दधियस्तेषां पक्षाणां युक्त्याभासमूलतामजानतः प्रामाणिकत्वशङ्कया वैदिक-

Digitized by Google

पक्षे किञ्चिच्छ्रद्धावैकल्यं जायेतापि, अतः परपक्षप्रतिक्षेपायानन्तरः पादः प्रवर्त्तते, तत्र प्रथमं तावत्कापिलमतं निरस्यते वैदिकानुमतसत्कार्यवादाद्यर्थसंग्रहेण तस्य सत्पक्षनिक्षेपसम्भावनाभ्रमहेतुत्वातिरेकात् ईक्षतेर्नाशब्दमित्यादिभिर्वैदिकवाक्यानामतत्परत्वमात्रमुक्तम् अत्रैव तत्पक्षस्वरूपप्रतिक्षेपः क्रियत इति न पौनरुक्त्याशङ्का, एषा साङ्ख्यानां दर्शनस्थितिः "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति तत्त्वसंग्रहः, मूलप्रकृतिर्नाम सुखदुःखमोहात्मकानि लाघवप्रकाशचलनोपष्टम्भनगौरवावरणाद्यर्थान्यत्यन्तातीन्द्रियाणि कार्य्यैकनिरूपणविवेकान्यन्यूनातिरेकाणि समतामुपेतानि सत्त्वरजस्तमांसि द्रव्याणि, सा च सत्त्वरजस्तमसां साम्यरूपा प्रकृतिरेका स्वयमचेतनाऽनेकचेतनभोगापवर्गार्थानित्या सर्वगता सततविक्रिया न कस्यचिद्विकृतिः,

टी० सू॰ रचनाऽनुपपत्तेश्च नानुमानम्प्रवृत्तेश्च, प्रथमाध्यायार्थपूर्वकं प्रथमपादार्थं वदन् द्वितीयपादेन सङ्गतिमाह "उक्त"मिति, स्वपक्षे कारणविषये परोक्तदोषाः परिहृताः परपक्षोक्तकारणविषयं दूषणं क्रियत इत्यर्थः अनेन तृतीयपादस्य पूर्वभावित्वशङ्का निरस्ता । तत्र कार्यविषये परोक्तदूषणपरिहारो हि क्रियते अतः कारणविषये स्वमतस्थापनं परपक्षदूषणं च सङ्गतं किमर्थं परपक्षप्रतिक्षेप इत्यत्राह "इतरथे"ति, कापिलमतनिरासप्राथम्यहेतुमाह "तत्रे"ति, सत्कार्यवादादीति, आदि–शब्देन चतुर्विंशतितत्त्वस्वीकारो विवक्षितः । पौनरुक्त्यमाशङ्क्य निराकरोति "ईक्षते"रिति, किं ब्रह्मकारणवाद एकान्ततः अद्वेयः? उत ने? ति तदर्थं प्रधानं जग-

Digitized by Google

त्कारणं ने? ति किं प्रधानस्य पुरुषसन्निधानात् पङ्गुसन्निधानादन्धस्येव प्रवृत्तिः सम्भवति ने? ति किमन्धस्य पङ्गुसन्निधानात् मार्गावलोकनव्यापारवत्पुरुषसन्निधानात्तच्छायापत्त्या वा ज्ञातृत्वं सम्भवति ने? ति, यदा ज्ञातृत्त्वसम्भवः तदा प्रवृत्तिसम्भवात् प्रधानकारणत्वमुपपन्नमिति नैकान्ततो ब्रह्मकारणवादः श्रद्धेयः । यदा ज्ञातृत्वासम्भवः तदा प्रवृत्त्यसम्भवात् प्रधानकारणवादानुपपत्तेर्ब्रह्मकारणवाद एकान्ततः श्रद्धेय इति सिध्यति, यः एषेत्यादि तत्त्वसंग्रहश्लोकं व्याचष्टे मूलप्रकृतिर्नामेत्यादिना, उपष्टम्भनं, धारणमत्यन्तातीन्द्रियाणि नित्यानुमेयानीत्यर्थः, समतामुपेतानीत्युक्ते केनचिदाकारेण साम्यं स्यादिति तद्व्यावृत्त्यर्थं सम-शब्दव्याख्यानायान्यूनानतिरिक्तानीत्युक्तं सत्त्वरजस्तमः समूहः प्रकृतिरित्यर्थः ।

सू० अपि तु परमकारणमेव महदाद्यास्तद्विकृतयोऽन्येषां च प्रकृतयः सप्त महानहङ्कारः शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति, तत्राहङ्कारस्त्रिविधो वैकारिकस्तैजसो भूतादिश्च, क्रमात्सात्त्विकोराजसस्तामसश्च, तत्र वैकारिकः सात्त्विक इन्द्रियादिर्भूतादिस्तामसो महाभूतहेतुभूततन्मात्रहेतुः, तैजसो राजसस्तूभयानुग्राहकः, आकाशादीनि पञ्चमहाभूतानि श्रोत्रादीनि पञ्चज्ञानेन्द्रियाणि वागादीनि पञ्चकर्मेन्द्रियाणि मन इति केवलविकाराः षोडश, पुरुषस्तु निष्परिणामत्वेन न कस्यचित्प्रकृतिर्न कस्यचिद्विकृतिः, तत एव निर्धर्मकश्चैतन्यमात्रवपुर्नित्यो निष्क्रियः सर्वगतः प्रतीशरीरं भिन्नश्च, निर्विकारत्वान्निष्क्रियत्वाच्च तस्य कर्तृत्वं भोक्तृत्वं च न सम्भवति, एवं भूतेऽपि तत्त्वे मूढाः प्रकृतिपुरुषसन्निधिमात्रेण पुरुषस्य

Digitized by Google

चैतन्यं प्रकृतावध्यस्य प्रकृतेश्च कर्तृत्वं स्फटिकमणाविव जपाकुसुमस्यारुणिमानं पुरुषेऽध्यस्याहङ्कर्ता भोक्तेति मन्यन्ते, एवमज्ञानाद्भोगस्तत्त्वज्ञानाच्चापवर्गः तदेव[1] प्रत्यक्षानुमानागमैः साधयन्ति, तत्र प्रत्यक्षसिद्धेषु पदार्थेषु नातीव विवादा[2]स्पदमस्ति, आगमोऽपि कपिलादिसर्वज्ञज्ञानमूल इति सोऽपि प्रथमे काण्डे प्रमाणलक्षणे निरस्तप्रायः। यदिदं प्रधानमेव जगत्कारणमित्यनुमानं तन्निरसनेन तन्मतं सर्वं निरस्तं भवतीति तदेव निरस्यते—

टी० विकृतिः—कार्यं महदाद्या इति स्वकारणापेक्षया विकृतयः स्वकार्यापेक्षया प्रकृतय इत्यर्थः। षोडशकश्च विकार इत्यत्र च एवकारार्थः, षोडशको विकार एवेत्यर्थः । न प्रकृतिरित्यादि श्लोकखण्डं व्याचष्टे "पुरुषस्त्वि"ति, निर्धर्मकः ज्ञातृत्वरहितः तद्धन्तःकरणस्येति तन्मतं तर्हि भोगमोक्षौ न स्यातामित्यत्राह "एवम्भूतेऽ"पीति, तत्त्वमर्थस्थितिः तदेतदिति नातीव विवादपदमस्तीति सत्कार्यवादसमवायानभ्युपगमादिभिर्न विवाद इत्यर्थः । अभिव्यक्त्यवस्थावैषम्यादिकमभिप्रेत्य नातीवेत्युक्तं निरस्तप्राय आगमः किं कपिलप्रोक्तः? उत वेदः? तत्र वेदस्य प्रधानादिपरत्वव्यावृत्तिः प्रथमाध्याये दर्शिता, कपिलागमस्य तु निरासो धर्मविचारारम्भे फलित इत्यर्थः। अनुमानमेकं स्थितं तस्मिन्निरस्ते सर्वं निरस्तं भवतीत्याह "यदिद"मिति, अनुमानव्युदासाय प्रथमं विषयशुद्धिं करोति—

मू० ते चैवं वर्णयन्ति, कृत्स्नस्य जगतः एकमूलत्वमवश्याभ्युपगमनीयम् अनेकेभ्यः कार्य्योत्पत्त्यभ्युपगमे कारणानवस्थानात् तन्तुप्रभृतयो ह्यवयवाः स्वांशभूतैः षड्भिः पार्श्वैः परस्परं संयुज्यमाना अवयविनमुत्पादयन्ति, ते च तन्त्वा-

१ तदेतत्प्रत्यक्षेति पा० ।
२ विवादपदमस्तीति पा० ।

Digitized by Google

दयः स्वावयवैस्तथाभूतैरुत्पाद्यन्ते, ते च तथाभूतैः स्वावयवैरिति परमाणुभिरपि स्वकीयैः षड्भिः पार्श्वैः संयुज्यमानैरेव स्वकार्य्योत्पादनमभ्युपेतव्यम्। अन्यथा प्रथिमाऽनुपपत्तेः, परमाणवोऽप्यंशित्वेन स्वांशैस्तथैवोत्पाद्यन्ते, ते च स्वांशैरिति न क्वचित्कारणव्यवस्थितिः अतः कारणव्यवस्थासिद्ध्यर्थमेकं द्रव्यं विविधविचित्रपरिणामशक्तियुक्तं स्वयमप्रच्युतस्वरूपमेव महदाद्यनन्तावस्थाश्रयः कारणमाश्रयणीयं, तच्चैकं कारणं गुणत्रयसाम्यरूपं प्रधानमिति तत्कल्पनहेतूनुपन्यस्यन्ति "भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ कारणमस्त्यव्यक्त"मिति, अयमर्थः विश्वरूपमेव वैश्वरूप्यं विचित्रसन्निवेशं तनुभुवनादिकृत्स्नं जगत्, तच्च जगद्विचित्रसन्निवेशत्वेन कार्य्यभूतं तत्स्वरूपाव्यक्तकारणकं, कुतः कार्य्यत्वात्, कार्य्यस्य हि सर्वस्य तत्स्वरूपात्कारणविशेषाद्विभागस्तस्मिन्नेवाविभागश्च दृश्यते, यथा घटमुकुटादेः कार्य्यस्य तत्स्वरूपान्मृत्सुवर्णादेः कारणाद्विभागस्तस्मिन्नेव चाविभागः,

टी० ते चैवमित्यादिना, अनेकेभ्यः कार्योत्पत्तौ कारणानवस्थानमुपपादयति "तन्तुप्रभृतय"इति, असंयुक्तप्रदेशेन संयुक्तैरेव पृथ्व्यादिकार्योत्पादनं दृश्यते, यद्यसंयुक्तप्रदेशभेदमनपेक्ष्यैकत्र सर्वे संयुज्यन्ते तर्ह्येकः स्यात् परमाणोरनतिरिक्तप्रदेशतया पृथ्व्यादिकार्य्यं नोत्पद्यते प्रदेशभेदः परमाणोरस्तीति चेत् सांशत्वात्तस्याप्यारम्भकापेक्षतयाऽनवस्थेत्यर्थः, अत इति एकस्मिन्कार्ये कृत्स्नस्य कारणस्य निरवशेषान्वयव्यावृत्त्यर्थमाह"स्वयम-

प्रच्युते''ति, एवं परमाणुव्यावृत्तिः सिद्धा । अथ ब्रह्मव्यावृत्त्यर्थमाह "तच्चैक"मिति, भेदानामित्यादिश्लोकं व्याचष्टे "अयमर्थ"इति, वैश्वरूप्यपदं व्याचष्टे विश्वरूपमित्यादिना, कारणकार्यविभागादित्येतद्व्याचष्टे "कार्यस्य ही"ति, व्याप्तिप्रदर्शनमित्यर्थः । व्याप्तिस्थलमाह "यथे"ति, पक्षधर्मताबलसिद्धमर्थमाह–

सू० अतो विश्वरूपस्य जगतस्तत्सरूपात्प्रधानादुत्पत्तिस्तस्मिन्नेव लयश्चेति प्रधानकारणकमेव जगत् गुणत्रयसाम्यरूपं प्रधानमेव जगत्सरूपकारणं तत्त्वरजस्तमोमयसुखदुःखमोहात्मकत्वाज्जगतः, यथा च मृदात्मनो घटस्य मृद्द्रव्यमेव कारणं तदेव हि तदुत्पत्त्याख्यशक्तिप्रवृत्तिमत् तथा दर्शनात् अव्यक्तस्य गुणसाम्यरूपस्य देशतः कालतश्चापरिमितस्यैव कारणत्वं भेदानां महदहङ्कारतन्मात्रादीनां परिमितत्वादवगम्यते, महदादीनि च घटादिवत्परिमितानि कृत्स्नजगदुत्पत्तौ न प्रभवन्ति अतस्त्रिगुणं जगद्गुणत्रयसाम्यरूपप्रधानैककारणकमिति निश्चीयते, अत्रोच्यते सू० रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च, अनुमीयत इत्यनुमानं न भवेदुक्तं प्रधानं विचित्रजगद्रचनासमर्थम् अचेतनत्वे सति तत्स्वभावाभिज्ञाऽनधिष्ठितत्वात् यदेवं तत्तथा, यथा रथप्रासादादिनिर्माणे केवलदार्वादिकम् ॥

टी० "अतो विश्वरूपस्ये''ति, कार्यं सरूपकारणकमस्तु तत्कथं प्रधानकारणत्वसिद्धिरिति शङ्कायां समन्वयादिति पदं व्याचष्टे "सत्त्वरजस्तमोमये''ति, शक्तितः प्रवृत्तेश्चेत्येतद्व्याचष्टे "तदेव ही''ति, सरूपत्वं महदादीनामप्यस्तीति तेषां कारणत्वशङ्कायां भेदानां परिमाणादित्येत-

द्व्याचष्टे "अव्यक्तस्ये"ति, निगमयति "अत" इति, जगद्विचित्रसन्निवेशत्वात् कार्यं रथादिवत् जगत्स्वसमानरूपकारणकं कार्यत्वात् यत्कार्यं तत्स्वसमानरूपकारणकं दृष्टं यथा घटादीत्यनुमानशरीरम् अत्र सत्त्वरजस्तमोमयसुखदुःखमोहानां कार्येऽन्वयदर्शनात् तदुत्पादनशक्तं सत्त्वरजस्तमोमयमेव कारणं तस्य परिमितत्वे कृत्स्नकारणत्वानुपपत्त्या तस्यापि कारणापेक्षयाऽनवस्थानाच्चापरिच्छिन्नं वस्तु कारणं भवतीति पक्षधर्मताबलात् सिद्धं यथा कार्यत्वात् सकर्तृकत्वेऽनुमीयमाने पक्षधर्मताबलादीश्वरसिद्धिः तद्वत्तत्र निमित्तमत्रोपादानमिति विशेषः, अत्रोच्यत इत्यादि अनुमानशब्दस्यानुमितिकरत्वे कस्येत्यपेक्षायां प्रधानस्येति धर्मिवाचिषष्ठ्यन्तपदाध्याहारप्रसङ्गात्तन्निरपेक्षनिर्वाहे सम्भवति तस्यैव न्याय्यत्वात् आह "अनुमीयत"इति, प्रत्यनुमीयत इति प्रत्यनुमानोपयोगिनीं व्याप्तिं शिक्षयति न भवदुक्तमित्यादिना, अपेक्षितान्वयव्यतिरेकौ दृष्टान्ते दर्शयन्सूत्रस्य वाक्यार्थमाह—

सू० दार्वादेरचेतनस्य तज्ज्ञाऽनधिष्ठितस्य कार्य्यारम्भानुपपत्तेर्दर्शनात् तज्ज्ञाऽनधिष्ठितस्य कार्य्यारम्भप्रवृत्तेर्दर्शनाच्च न प्राज्ञाऽनधिष्ठितं प्रधानं कारणमित्युक्तं भवति, चकारादन्वयस्यानैकान्त्यं समुच्चिनोति, न ह्यन्वितं शौक्ल्यं गोत्वादिकारणत्वव्याप्तं न च वाच्यं माभूदन्वितानामपि शौक्ल्यादिधर्माणां कारणत्वं द्रव्यस्य तु हेमादेः कार्य्यान्वितस्य कारणत्वव्याप्तिरस्त्येव सत्त्वादीन्यपि द्रव्याणि कार्य्यान्वितानि कारणत्वव्याप्तानीति यतः सत्त्वादयो द्रव्यधर्म्मा न तु द्रव्यस्वरूपं सत्त्वादयो हि पृथिव्यादिद्रव्यगतलघुत्वप्रकाशादिहेतुभूतास्तत्स्वभावविशेषा एव न तु मृद्धिरण्यादिवद् द्रव्यतया कार्य्यान्विता उपलभ्यन्ते गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः। यच्च कारणव्यवस्था-

Digitized by Google

सिद्धये जगत एकमूलत्वमुक्तं, तदपि सत्त्वादीनामनेकत्वान्नोपपद्यते अत एव कारणव्यवस्था चैन सिद्ध्यति ।

टी० दार्वादेरित्यादिना, प्रथमस्य च-शब्दस्यार्थमाह "चकारादि"ति, कार्येऽन्वितस्य मृदादेः कारणत्वं दृश्यते तथा सत्त्वादिमयसुखदुःखादेः कार्येऽन्वयात् कार्ये सत्त्वाद्यन्वयः सिद्ध इति सत्त्वादीनां कारणत्वमिति हि युक्तं तस्य शौक्ल्यादिष्वनैकान्त्यमित्यर्थः कार्ये समन्वितद्रव्यत्वादिति चेत् द्रव्यत्वमसिद्धमित्याह माभूदित्यादिना, सत्त्वादयो हीति लघुत्वादिकार्यद्वारा सत्त्वादीनां सुखदुःखादिहेतुत्वमिति मन्तव्यं गुणा इत्येव चेति सत्त्वादीनां द्रव्यत्वस्याप्रमाणिकतया गुण-शब्दस्यास्वारस्यमयुक्तमिति भावः । जगत्प्राज्ञानधिष्ठचेतनकारणकं न भवति कार्यत्वात् यत्कार्यं तत्स्वाभिज्ञाऽनधिष्ठिताचेतनोपादानकं न भवति यथा घटादिकं चेतनाधिष्ठितकारणकं दृष्टं यत्प्राज्ञाधिष्ठिताचेतनोपादानकं न भवति तत्कार्यमपि न भवति यथा नित्यं तुच्छं वेति, प्रत्यनुमानशरीरम् । यद्वा नात्र प्रत्यनुमानं विवक्षितमीश्वरानुमान इव विशेषविरोधो विवक्षितः, अचेतनत्वं प्राज्ञाधिष्ठितत्वं साधयेदिति तदुपयोगिनी व्याप्तिर्दर्शिता, यच्चेति सत्त्वादीनामनेकत्वादेकमूलत्वं नास्तीत्यर्थः । अत एवेति अनेकत्वादेव कारणव्यवस्था च नास्तीत्यर्थः अनेकत्वाभ्युपगमं दर्शयति-

भू० साम्यावस्थाः सत्वादय एव हि प्रधानमिति[1] तन्मतम् अतः कारणबहुत्वादनवस्था तदवस्थैव । न च तेषामपरिमितत्वेन व्यवस्थासिद्धिः अपरिमितत्वे हि त्रयाणामपि सर्वगतत्वेन न्यूनाधिकभावाभावाद्वैषम्यासिद्धेः कार्य्यारम्भासम्भवात् कार्य्यारम्भायैव परिमितत्वमवश्याश्रयणीयं यच्च रथादिषु स्पष्टं चेतनाधिष्ठितत्वं दृष्टं तद्व्यतिरिक्तं सर्वं पक्षीकृतमित्याह-

१ त्वन्मतमिति पा० ।

सू० पयोऽम्बुवच्चेत्तत्रापि ॥ २ ॥

यदुक्तं प्रधानस्य प्राज्ञाऽनधिष्ठितस्य विचित्रजगद्रचनाऽनुपपत्तिरिति तन्न यतः पयोऽम्बुवत्प्रवृत्तिरुपपद्यते पयसस्तावद्दधिभावेन परिणममानस्यानन्यापेक्षस्याद्यपरिस्पन्दनप्रभृतिपरिणामपरम्परा स्वत एवोपपद्यते, यथा च वारिदविमुक्तस्याम्बुन एकरसस्य नारिकेरतालचूतकपित्थनिम्ब[1]तिन्तिण्याद्विविचित्ररसरूपेण परिणामप्रवृत्तिः स्वत एव दृश्यते, तथा प्रधानस्यापि परिणामस्वभावस्यान्यानधिष्ठितस्यैव प्रतिसर्गावस्थायां सदृशपरिणामेनावस्थितस्य सर्गावस्थायां गुणवैषम्यनिमित्तविचित्रपरिणाम उपपद्यते ।

टी० "साम्यावस्था"इति, ततः किमित्यत्राह "अत"इति, बहूनां कारणानां विषमावस्थत्वेनैव कारणत्वदर्शनात् परिमितानामेव वैषम्यदर्शनाच्च विषमावस्थानां परिमितानां पार्श्वविशेषैः संयुक्तानामेव पृथुकार्यारम्भकत्वं स्यात् तेषामपि विषमत्वात् परिमितत्वात्कार्यत्वात् कारणान्तरसापेक्षत्वं स्यात् तेषामपि तस्यारम्भाय विषमत्वात् परिमितत्वाच्च सकारणत्वमित्यनवस्थेत्यर्थः । अपरिमितत्वाचानवस्थेत्यत्राह "अपरिमितत्वे ही"ति, कार्यारम्भायैव परिमितत्वमवश्याश्रयणीयमिति कार्यारम्भसिध्यर्थं वैषम्यसिध्यर्थं परिमितत्वमाश्रयणीयं तथा सति तेषामपि सकारणत्वमित्यनवस्थेत्यर्थः । उत्तरसूत्रमवतारयति "यत्रे"ति, क्षीरादिदृष्टान्तेन प्राज्ञानधिष्ठितत्वं साधयाम इति चेत् तत्प्रतीकृतं तत्रापि प्राज्ञाधिष्ठितत्वं सिषाधयिषितमित्यर्थः पयोऽम्बुवच्चेत्तत्रापि आद्यपरिस्पन्देति चक्रभ्रमपरिणामादिव्यावृत्त्यर्थमाद्यशब्दः, परिस्पन्द–शब्देनान्यथाभावोद्योगो विवक्षितः न तु चलनं,

[1] तिन्त्रिण्याद इति पा० ।

श्रु० यथोक्तं "परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषादिति तदेवमत्यक्तमन्यानपेक्षं प्रवर्तत इति चेत् अत उत्तरं "तत्रा"पीति यत्तु क्षीरजलादिदृष्टान्ततया निदर्शितं तत्रापि प्राज्ञाऽनधिष्ठाने प्रवृत्तिर्नापपद्यते तदपि पूर्वमेव पक्षीकृतमित्यभिप्रायः । उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीत्यत्र दृष्टपरिकरान्तररहितस्यापि स्वासाधारणपरिणाम उपपद्यत इति एतावदुक्तं न प्राज्ञाधिष्ठितत्वं पराकृतं, योऽप्सु तिष्ठन्नित्यादिश्रुतेः, ॥

सू० व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ३ ॥

इतश्च सत्यसङ्कल्पेश्वराधिष्ठानानैरपेक्ष्यपरिणामित्वे सर्गव्यतिरेकेण प्रतिसर्गावस्थाया अनवस्थितिप्रसङ्गाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणं प्राज्ञाधिष्ठितत्वे तस्य सत्यसङ्कल्पत्वेन सर्गप्रतिसर्गविचित्रसृष्टिव्यवस्थासिद्धिः, न च वाच्यं प्राज्ञाधिष्ठितत्वेऽपि तस्यावाप्तसमस्तकामस्य परिपूर्णस्यानवधिकातिशयानन्दस्य निरवद्यस्य निरञ्जनस्य सर्गप्रतिसर्गव्यवस्थाहेत्वभावाद्विषमसृष्टौ निर्दयत्वप्रसङ्गाच्च समानोऽयं दोष इति परिपूर्णस्यापि लीलार्थं प्रवृत्तिसम्भवात् ।

टी० यथोक्तमिति प्रतिप्रतीति वस्तुषु प्रत्येकं गुणानामङ्गाङ्गिभावेनावस्थानरूपवैषम्यात्सलिलवत्स्वत एव परिणामाज्जगत्प्रवृत्तिश्चेतननिरपेक्षोपपद्यत इत्यर्थः । रचनानुपपत्तेरिति पूर्वसूत्रनिर्दिष्टशसामर्थ्यानुरोधादिहाप्यनुपपत्तेरित्यध्याहार उपपन्न इत्यभिप्रायेण नोपपद्यत इत्युक्तं, विरोधमाशङ्क्य परिहरति 'उपसंहारे'ति, शरीरव्यतिरिक्तदण्डचक्रादिस्थानी-

याचिद्रूपपरिकरान्तरनैरपेक्ष्यमुक्तमित्यविरोध इत्यर्थः । सू॰ व्यतिरेकानवस्थितेश्चानपेक्षत्वात्, इतश्चेति वाक्यभेदः व्यतिरेकशब्दं व्याचष्टे "सर्गे"ति प्रतिसर्गावस्थयाऽनवस्थितिप्रसङ्गाच्चेति प्रतिसर्गावस्थाप्रलयितावस्थाना-भावप्रसङ्गाच्चेत्यर्थः, न चेत्यादि अवाप्तसमस्तकामस्य अभक्ष इतिवत् अवधारणगर्भमिदम् अवाप्ता एव समस्ताः कामा येन सोऽवाप्तसमस्त-कामः अवाप्तव्यं नास्तीत्यर्थः । कुत इत्यत्राह "परिपूर्णस्य" गुणविभूतिभिः परिपूर्णत्वादवाप्तव्यं नास्तीत्यर्थः विभूत्यादेरनुकूलत्वेऽप्यवाप्तसमस्त-कामत्वं नास्तीत्यत्राह । यद्वा तिष्ठन्तु गुणा विभूतयश्च तथाऽपि स्वेनै-वाप्तसमस्तकामत्वमाह "अनवधिकातिशयानन्दस्ये"ति, निरवद्यस्या-कर्मवश्यस्य निरञ्जनस्यागुणवश्यस्य सर्गस्थितिप्रलयाः रजःसत्त्वतमः-कार्याः गुणवश्यत्वं च, कर्मवश्यस्य अकर्मवश्यस्येश्वरस्य गुणवश्यत्वाभावात् गुणानुगुणेच्छया सर्गादिव्यापारो न सम्भवतीति भावः । इति न च वाच्यमित्यन्वयः ॥

मू॰ सर्वज्ञस्य तस्य परिणामविशेषापन्नप्रकृतिदर्शनरूपसर्गवि-शेषहेतोस्सम्भवात् क्षेत्रज्ञकर्मणामेव विषमसृष्टेर्व्यवस्था-पकत्वाच्च । नन्वेवं क्षेत्रज्ञपुण्यापुण्यरूपकर्मभिरेव सर्वा-वस्थाः सिद्ध्यन्तीति किमीश्वरेणाधिष्ठात्रा पुण्यापुण्यरू-पानुष्ठितकर्मसंस्कृता प्रकृतिरेव पुरुषार्थानुरूपं तथा तथा व्यवस्थया परिणंस्यते यथा विषादिदूषितानामन्नपाना-दीनामौषधिविशेषाप्यायितानां च सुखदुःखहेतुभूतः प-रिणामविशेषो देशकालव्यवस्थया दृश्यत अतस्सर्गप्र-तिसर्गव्यवस्था देवादिविषमसृष्टिः कैवल्यव्यवस्था च सर्व-प्रकारपरिणामशक्तियुक्तस्य प्रधानस्यैवोपपद्यते इति । अन-भिज्ञो भवान्पुण्यापुण्यकर्मस्वरूपयोः पुण्यापुण्यस्वरूपे

Digitized by Google

हि शास्त्रैकसमधिगम्ये, शास्त्रं चानादिनिधनाविच्छिन्न-पाठसंप्रदायानाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः तच्च परमपुरुषाराधनतद्विपर्य्ययरूपे कर्म्मणी पुण्यापुण्ये तदनुग्रहनिग्रहायत्ते च तत्फले सुखदुःखे इति वदति तथा चाह द्रमिडाचार्य्यः "फलसंविभक्त्सया हि कर्म्मभि-रात्ममानं पिप्रीषन्ति स प्रीतोऽलं फलायेति शास्त्रमर्य्या-दे"ति ॥

टी० सर्वज्ञस्येत्यादि सर्गप्रतिसर्गव्यवस्थाहेतुरीश्वरेणानुसन्धीय-मान प्रकृतेः परिणामविशेषापत्तिः, न च तया स्वातन्त्र्यहानिः प्रत्युत स्वातन्त्र्यपूर्तिरेव परिणामविशेषापत्तौ सत्यामेव सर्गादिव्यापारस्य तत्स-ङ्कल्पायत्तत्वात् यथासङ्कल्पमनुष्ठानं हि स्वातन्त्र्यमिति भावः । नन्वित्यादि कालादिव्यवस्थायां दृष्टान्तमाह "यथे" ति, उष्णवर्जिते शीतवर्जिते वा वर्त्तमानस्य पथ्यापथ्यविभागो देशव्यवस्था कैवल्यव्यवस्था मोक्षव्यवस्था परिहरति "अनभिज्ञ इत्यादिना, कपिलागमादिव्यावृत्त्यर्थमाह "शास्त्रं चे"ति, ततः किमित्यत्राह "तच्चे"ति, शास्त्रज्ञैरेवमुक्तमित्याह "तथा-हे"ति, इष्टापूर्त्ते श्रौतस्मार्तकर्मणी, बाहुविध्यं देवताफलादिभेदेन भुव-नस्य नाभिः तद्यथा रथस्यारेषु नेमिरर्पिता इत्यादिश्रुतिप्रक्रियया ऽन्तर्या-मिरूपेण सर्वाधारभूत इत्यर्थः । बिभर्त्ति आराधनतया स्वीकरोति पापस्य तदपराधरूपत्वज्ञापनार्थं च भगवद्गीतावचनं दर्शयति—

मू० तथा च श्रुतिः "इष्टापूर्त्तं बहुधाजातं जायमानं विश्वं बि-भर्त्ति भुवनस्य नाभिरि"ति तथा च भगवता स्वयमेवोक्तं "यतः प्रवृत्तिर्भूतानां ये सर्वमिदं ततं स्वकर्मणा तमभ्य-र्च्य सिद्धिं विन्दति मानव" इति, "तानहं द्विषतः क्रूरा-न्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव यो-

निष्वि"ति, स च भगवान्पुरुषोत्तमोऽवाप्तसमस्तकामः सर्वज्ञः सर्वेश्वरः सत्यसङ्कल्पः स्वमहात्म्यानुगुणलीलाप्रवृत्तः एतानि कर्माणि समीचीनान्येतान्यसमीचीनानीति कर्म्मद्वैविध्यं संविधाय तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदर्श्य स्वशासनावबोधिशास्त्रं च प्रदर्श्य तदुपसंहारार्थं चान्तरात्मतयाऽनुप्रविश्य—

टी० "तथा चे"ति, तेषां सततयुक्तानामिति वचनस्य वक्ष्यमाणत्वादत्र नोपापात्तम् एभिर्वचनैः प्रस्तुतचोद्यस्य किमुक्तं भवति दयालुः सन् संसारिणोऽहितरूपकर्मणि कथं प्रवर्तयति कर्मसापेक्षनिग्रहानुग्रहानुग्रहत्वे स्वातन्त्र्यहानिः, तस्य स्वतन्त्रत्वे जीवानां फलान्वयानुपपत्तिरित्यत्राह "स भगवानि"ति, निर्दोषत्वं मङ्गलगुणत्वं च भगवच्छब्दार्थः, ताभ्यां वैलक्षण्य पुरुषोत्तमशब्दार्थः विविधफलप्रदानसर्गाद्युपयोगिविशेषणानि सर्वज्ञत्वादीनि सर्गादेरायासरूपत्वान्न लीलात्वमित्यत्राह "स्वमाहात्म्ये"ति, सर्वं तदिच्छाधीनं चेज्ज्योतिष्टोमादेः पुण्यत्वं ब्रह्महत्यादेः पापत्वं च विपर्ययेण स्यातामित्यत्राह "एतानि कर्माणीत्या"दि, अनादिपुण्यापुण्यव्यवस्था च तदीयानादिस्वातन्त्र्यनिबन्धनेत्यर्थः सर्वप्रवृत्तेस्तदिच्छाधीनत्वात् क्षेत्रज्ञानां सुखादिभोक्तृत्वं न स्यात्, तस्य निर्दयत्वादिप्रसङ्गश्चेत्यत्राह "तदुपादानोचिते"ति, यथा पितृभ्यामुत्पाद्य वर्द्धितः शिक्षितोऽर्थगृहक्षेत्रदानादिनोपकृतः पुत्रः पितृदत्तैरेवार्थादिभिर्यज्ञादिकं वा करोति विषयचापलं वाऽनुवर्त्तते न तत्र पित्रोर्दोषः तदधीनवैभवत्वं च पुत्रस्य न हीयते तद्वदिति भावः । सामान्येन प्रदिश्येति देहेन्द्रियादिकं सर्वेषां ददाति न तु कस्य चिद्दत्त्वा चिन्न कस्यचिन्न ददाति देहेन्द्रियादिवैषम्यं तु कर्मकृतमित्यभिप्रेत्याह देहेन्द्रियादिकमित्यादि परमात्मनः शक्तस्याप्यनिवारणं दोष इति चेन्न उपेक्षकत्वं प्रयोजयितृत्वमनुमन्तृत्वं चेति त्रयमस्ति तत्र प्रयोजयितृत्वमप्रवृत्तस्य प्रवर्तकत्वं तच्चा-

ज्ञापयितृत्वममर्थयितृमुपदेष्टृत्वं च त्रिधा अनुमन्तृत्वं प्रवृत्तस्य प्रवर्तकत्वम् उपेक्षकत्वमौदासीन्यं तत्र भगवतः पुण्यपापयोः प्रयोजयितृत्वं नास्ति प्रथममुपेक्षमाण एवास्ते पश्चादनुमन्तृत्वमस्त्येव अभिमते प्रवृत्तं केनचिद्विघ्नेन निवृत्तमविघ्नं प्रवर्तयति पश्चात् फलं च ददाति आज्ञातिलङ्घनप्रवृत्तत्वेन कुपितत्वात् भगवाननुमन्ता भवति ।

सू० अनुमन्तृतया च नियच्छँस्तिष्ठति, ते च ज्ञास्तु तदाहितशक्तयस्तत्प्रदिष्टकरणकलेवरादिकास्तदाधाराश्च स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्म्मणी उपाददते, ततश्च पुण्यरूपकर्म्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयते, शासनातिवर्तिनं च तद्विपर्ययैर्योजयति अतः स्वातन्त्र्यादिवैकल्यचोद्यानि नावकाशं लभन्ते । दया हि नाम—

टी० अनुमतिः फलदानमुभयमपि दण्डप्रकार एव तथा च दृश्यते राजानो हि स्वशासनातिवृत्तिप्रवृत्तं ज्ञात्वा कोपात्तथा करोत्वित्यनुमन्यन्ते अनुमतिश्च कोपकृतो दण्डविशेष एवातीवानुकूल्यप्रातिकूल्यप्रवृत्तयोरुत्तरोत्तरहिताहितकर्मसु प्रयोजयिता च भवति भगवान्, अहितप्रवृत्तविषय उपेक्षकत्वेऽनुमन्तृत्वे प्रयोजयितृत्वे च तस्य निर्दयत्वादिप्रसङ्ग इति चेत्ततः किं दया चेद्गुणः निग्रहश्चेद्दोष इति न नियमोऽस्ति लोकेऽस्थानदयायाः स्थाननिग्रहस्य च गुणत्वदोषत्वदर्शनाभावात्, राजादीनां दण्ड्यादण्डनादेर्दोषत्वं शास्त्रवश्यक्षेत्रज्ञत्वप्रयुक्तमिति चेत्, तर्हि तेषामनुग्रहादेर्गुणत्वमपि क्षेत्रज्ञत्वप्रयुक्तं स्यात् तत्रैव निग्रहानुग्रहादेर्दोषत्वगुणत्वदर्शनात् अतो निर्दयत्वहेतुरनैकान्तिकः, शक्तस्यापीश्वरस्य कथमुपेक्षकत्वंनोपेक्षणं शास्त्रप्रवर्तनमुखेन सामान्येनाहितप्रवृत्तिनिवारणस्य कृतत्वात्, प्रवृत्तिकाले तु विशेषतोऽनिवारकत्वाभावरूपमुपेक्षकत्वं स्वातन्त्र्यात्, तच्च स्वातन्त्र्यं दोष इति चेत् तत्र किं प्रमाणम् ईश्वरस्याप्र-

त्यन्नत्वाच्च न तत्प्रमाणं यद्यनुमानं तत्रेदं वक्तव्यं किमीश्वराख्यं धर्मिणं शास्त्रैकसमधिगम्यमभ्युपगम्य तत्स्वातन्त्र्यस्य दोषत्वमनुमीयते? उतानभ्युपगम्य? अनभ्युपगमे हेतोराश्रयासिद्धिः, अभ्युपगमे धर्मिग्राहकप्रमाणेन शास्त्रेण तस्य गुणत्वेन प्रतिपन्नत्वात् कालात्ययापदिष्टत्वमिति । एतदभिप्रेत्याह "अनुमन्तृतया च नियच्छँस्तिष्ठती"ति, क्षेत्रज्ञास्त्विति अनुमन्तृतया नियन्तृत्वाद् धारकत्वात्सामान्येन देहेन्द्रियादिप्रदत्वाच्च सर्वं तदधीनमित्यभिप्रायेण तदाहितशक्तय इत्यादिकं विशेषणमुक्तं, पुण्यापुण्ययोः प्रवृत्तस्य प्रवृत्तिस्तदनुगुणेच्छया तदनुगुणज्ञानं च क्षेत्रज्ञाधीनमेव भगवत उपेक्षकत्वात् तत्रापेक्षकत्वात् तत्रापेक्षकत्वमपि स्वातन्त्र्यविशेष एवेत्यभिप्रायेणाह "स्वयमेव स्वेच्छानुगुण्येने"ति, कर्मानुगुणफलप्रदत्वे स्वातन्त्र्यवैकल्यं नोचेन्निर्दयत्वादिप्रसङ्ग इत्यत्राह "अत"इति, स्वातन्त्र्यादिवैकल्य-शब्देन दयावैकल्यं सर्वेषु समत्ववैकल्यं जीवानां फलान्वयराहित्यं च विवक्षितम् एतत्कर्मकारिण एतत्फलं दास्यामीति तस्य सङ्कल्पः, तत्र यथासङ्कल्पं कुर्वतस्तस्य स्वातन्त्र्यपौष्कल्यमेवेति भावः । अपराधिनं दण्डयतोऽनपराधिनमदण्डयतश्च राज्ञा न हि स्वातन्त्र्यवैकल्यं तद्वदिति तर्हि निर्दयत्वमिति शङ्कायां दयास्वरूपं शिक्षयति "दया ही"ति, उपजीविनामुपजीव्यापदि यद्दुःखासहिष्णुत्वं तद्व्यावृत्त्यर्थमाह–

मू० स्वार्थनिरपेक्षा परदुःखासहिष्णुता, सा च स्वशासनातिवृत्तिव्यवसायिन्यपि वर्तमाना न गुणायावकल्पते प्रत्युतापुंस्त्वमेवावहति तन्निग्रह एव तत्र गुणः, अन्यथा शत्रुनिग्रहादीनामगुणत्वप्रसङ्गात् स्वशासनातिवृत्तिव्यवसायिनि वृत्तिमात्रेणानाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते यथोक्तं "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ तेषामेवानुकम्पार्थम-

दमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वते”ति, अतः प्राज्ञानधिष्ठितं प्रधानमकारणम् । अथ स्याद्यद्यपि प्राज्ञानधिष्ठितायाः प्रकृतेः परिस्पन्दप्रवृत्तिरपि न सम्भवतीत्युक्तं, तथाऽप्यनपेक्षाया एव परिणामप्रवृत्तेः सम्भवति तथा दर्शनात् धेन्वादिनोपभुक्तं हि तृणोदकादि स्वयमेव क्षीराद्याकारेण परिणममानं दृश्यते, अतः प्रकृतिरपि स्वयमेव जगदाकारेण परिणंस्यत इति तत्राह–

सू० अन्यत्राभावाच्च न तृणादिवत् ॥ ४ ॥

नैतदुपपद्यते तृणादेः प्राज्ञानधिष्ठितस्य परिणामाभावादृष्टान्तासिद्धेः, कथमसिद्धिः अन्यत्राभावात् यदि हि तृणोदकादिकमनुडुहाद्यु[1]पभुक्तम् ।

टी० “स्वार्थनिरपेक्षे”ति, तर्हि दयाया अनवकाशत्वप्रसङ्ग इत्यत्राह “स्वशासनातिवृत्ती”ति, यथोक्तमित्यत्र प्रीतिपूर्वकं ददामीत्यन्वयः सततयुक्तानामित्यत्राशंसार्थेनाशंसायां क्त इति सूत्रविहितेन क्तेनोपासकप्रीतेरुक्तत्वात्, तस्याशंसार्थत्वमविवक्षितं चेत् सततयुक्तानां भजतामिति पौनरुक्त्यम् अनपेक्षितकथनमपेक्षिताकथनं च स्यातां तस्मादयमर्थः । सूत्रार्थमुपसंहरति “अत”इति; ईश्वरस्य स्वातन्त्र्यवैकल्यादिप्रसङ्गाभावेन कर्मणां तदाराधनरूपतयैव फलप्रदत्वात्सर्गप्रतिसर्गादिव्यवस्थासिद्ध्यर्थं ब्रह्मैककारणत्वं सिद्धमित्यर्थः । उत्तरसूत्र शङ्कामाह “अथ स्यादि”ति, धेन्वादिनेति केवलदार्वादिव्यावृत्त्यर्थं चित्सन्निधिमात्रमेवोपगन्तव्यं न तु संकल्पविशेषवत्पुरुषाधिष्ठितत्वं गवि सुप्तायमपि तदुपयुक्ततृणादेः क्षीरादिभावदर्शनात्, न च तदपि पत्नीकार्यं तावता कार्यं सम्भवत्यधि-

[1] अनुडुदाद्युपयुक्तमिति पा० ।

ककल्पनायोगादिति भावः । सू॰ अन्यत्राभावाच्च न तृणादिवत्, केवला-चिन्मात्रस्य प्रपरिणामे दृष्टान्तत्वं विवक्षितं चेत्तद्दूषितम् ।

भू॰ प्रक्षीणं वा क्षीराकारेण परि[1]णंस्यते ततः प्रागनधिष्ठित-मेव परिणमत इति वक्तुं श[2]क्येत, न चैतदस्ति, अतो-धेन्वाद्युपभुक्तं प्राक् एव क्षीरीकरोति पयोऽम्बुवच्चेत्तचा-पीत्युक्तमेवाच प्रपञ्चितं तत्रैव व्यभिचारप्रदर्शनाय ॥

सू॰ पुरुषाश्मवदिति चेत्तथाऽपि ॥ ५ ॥

अथोच्येत यद्यपि चैतन्यमात्रवपुः पुरुषो निष्क्रियः प्रधानमपि दृक्शक्तिविकलं तथाऽपि पुरुषसन्निधानादचे-तनं प्रधानं प्रवर्तते तथा दर्शनात्, गमनशक्तिविकलदृक्-शक्तियुक्तपङ्गुसन्निधानात्तचैतन्योपकृतो दृक्शक्तिवि-कलः प्रवृत्तिशक्तियुक्तोऽन्धः प्रवर्तते अयस्कान्ताश्मसन्नि-धानाच्चायः प्रवर्तते, एवं प्रकृतिपुरुषसंयोगकृतो जगत्सर्गः प्रवर्तते यथोक्तं "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधा-नस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" इति, पुरुषस्य प्रधानोपभोगार्थं कैवल्यार्थं च पुरुषसन्निधाना-त्प्रधानं सर्गादौ प्रवर्तत इत्यर्थः, अत्रोत्तरं "तथाऽपि" इति, एवमपि प्रधानस्य प्रवृत्त्यसम्भवस्तदवस्थ एव पङ्गोर्गमन-शक्तिविकलस्यापि मार्गदर्शनतदुपदेशादयः कादाचित्का-विशेषाः सहस्रशः सन्ति, अन्धोऽपि चेतनः सन् तदुप-देशाद्यवगमेन प्रवर्तते तथाऽयस्कान्तमणेरप्ययःसमीपग-

1 पर्यणंस्यतेति पा॰ ।

2 अशक्ष्यतेति पा॰ ।

Digitized by Google

मनादयस्सन्ति, पुरुषस्य तु निष्क्रियस्य न तादृशा विकाराः सम्भवन्ति सन्निधानमात्रस्य नित्यत्वेन नित्यसर्गप्रसङ्गो नित्यमुक्तत्वेन बन्धाभावोऽपवर्गाभावश्च ॥

टी० प्रहीणं वेति चित्संनिधिमात्रेण परिणामो दूषितः, अनडुदाद्युपयुक्तमिति सङ्कल्पविशेषान्वितचेतनविशेषाधिष्ठानेन परिणामित्वं तु परस्यानिष्टमित्यभिप्रेतम् । प्राज्ञाऽनधिष्ठमिति, एवं विकल्पत्रयमत्राभिप्रेतम् अदृष्टविशेषवदात्मसंयोगाद्धेनूपयुक्ततृणादेः क्षीरभाव इतिचेन्न अदृष्टस्याप्यनडुदाद्युपयुक्तप्रहीणतृणतुल्ययोगक्षेमतया तस्यापि कार्यकरत्वे प्राज्ञाधिष्ठानमपेक्षितमित्येतत्सर्वमधिकशङ्कापरिहाररूपमर्थजातमिहोपपादितं, सूत्रप्रयोजनमाह 'प्रपञ्चितमि"ति, उक्तशङ्काविशेषपरिहाररूपं प्रपञ्चनं, तत्रैव-पयोदृष्टान्त एवेत्यर्थः ॥ सू॰ पुरुषाश्मवदिति चेत्तथाऽपि, उदाहृतामार्यां व्याचष्टे "पुरुषस्ये"ति, उपभोग-शब्देन दर्शनशब्दो व्याख्यातः तथापीति सूत्रखण्डं व्याचष्टे "एवमपी"ति, प्रवृत्त्यसम्भवस्तदवस्य इति पूर्वापरसूत्रस्यानुपपत्ति-शब्दानुरोधेनाध्याहारः कृतः नित्यनिर्विकारस्य पुरुषस्य पङ्गोर्मार्गदर्शनोपदेशादिवत्कादाचित्कविशेषोऽस्ति अन्धस्य तदुपदेशावगतिवत्र प्रकृतेर्विशेषोऽस्ति अयस्कान्तस्य समीपगमनादिवत् पुरुषस्य न विकारसम्भवः विभुत्वात्समीपगमनापेक्षा न चेन्नित्यसर्गप्रसङ्ग इत्यर्थः ॥

सू० अङ्गित्वानुपपत्तेश्च ॥ ६ ॥

भा० गुणानामुत्कर्षनिकर्षनिबन्धनाङ्गाङ्गिभावाद्धि जगत्प्रवृत्तिः प्रतिप्रतिगुणाश्रयविशेषादिति वदद्भिर्भवद्भिरभ्युपगम्यते प्रतिसर्गावस्थायान्तु साम्यावस्थानां सत्त्वरजस्तमसामन्योन्याधिक्यन्यूनत्वाभावादङ्गाङ्गिभावानुपपत्तेर्न जगत्सर्ग उपपद्यते, तथाऽपि वैषम्याभ्युपगमे नित्यसर्गप्रसङ्गः, अतश्च न प्राज्ञानधिष्ठितं प्रधानं कारणम् ॥

Digitized by Google

सू० अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ ७ ॥

दूषितप्रकारातिरिक्तप्रकारान्तरेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात् त एव दोषाः प्रादुष्ष्युः, अतो न कथञ्चिदप्यनुमानेन प्रधानसिद्धिः ॥

सू० अभ्युपगमेऽप्यर्थाभावात् ॥ ८ ॥

अनुमानेन प्रधानसिद्ध्यभ्युपगमेऽपि प्रधानेन प्रयोजनाभावान्न तदनुमातव्यं "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्ये"ति प्रधानस्य प्रयोजनं पुरुषभोगापवर्गावभिमतौ तौ च न सम्भवतः पुरुषस्य चैतन्यमात्रवपुषो निर्विक्रियस्य निर्विकारस्य निर्मलस्य तत एव नित्यमुक्तस्वरूपस्य प्रकृतिदर्शनरूपो भोगस्तद्वियोगरूपोऽपवर्गश्च न सम्भवति एवंरूपस्यैव प्रकृतिसंनिधानात्तत्परिणामविशेषसुखदुःखदर्शनरूपभोगसम्भावनायां प्रकृतिसंनिधानस्य नित्यत्वेन कदाचिदप्यपवर्गो न सेत्स्यति ॥

सू० विप्रतिषेधाच्चासमञ्जसम् ॥ ९ ॥

विप्रतिषिद्धं चेदं सांख्यानां दर्शनं, तथाहि प्रकृतेः परार्थत्वेन दृश्यत्वेन भोग्यत्वेन प्रकृतेर्भोक्तारमधिष्ठातारं द्रष्टारम्

टी० सू० अङ्गित्वानुपपत्तेश्च, एवं परोक्तानुमानस्य प्राज्ञाधिष्ठितत्वप्रसङ्गमुखेन च विषमावस्थत्वप्रसङ्गमुखेन विशेषविरोध उक्तः अनुमानान्तरेऽप्युक्तदूषणमतिदिशति सू० अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात्, ज्ञातृत्वे सति हि सङ्कल्पादधिष्टात्रन्तरनिरपेक्षप्रवृत्त्युपपत्तिः, तच्च नास्ति तस्मान्नित्यसर्गादिप्रसङ्ग इत्यर्थः । अचेतनत्वादेव प्राज्ञाधिष्ठितत्वं प्रसजेदिति भावः । इदं । विषयमावस्थत्वप्रसङ्गस्यापि दर्शनार्थमुक्तम् अभ्युपग-

Digitized by Google

मेऽप्यर्थाभावात् कस्याभ्युपगम इत्यपेक्षायां पूर्वसूत्रप्रत्यासत्त्याऽनुमितिरेवार्थतो बुद्धिस्थेत्यभिप्रायेण "अनुमानेनेति प्रवृत्तिस्त्वनेकसूत्रव्यवहितत्वान्न सा ऽनुबन्धमर्हतीति भावः । नित्यनिर्विकारस्यापि भोगापवर्गाभ्युपगमशङ्कायामनन्तरसूत्रं सू॰ विप्रतिषेधाच्चासमञ्जसम्, परार्थत्वप्रतियोगित्वेनाह–

भा॰ साक्षिणं च पुरुषमभ्युपगम्य प्रकृत्यैव साधनभूतया तस्य कैवल्यमपि प्राप्यं वदन्त एव तस्य नित्यनिर्विकारचैतन्यमात्रस्वरूपतया अकर्तृत्वं कैवल्यं च स्वरूपमेवाहुः । तत एव बन्धमोक्षसाधनानुष्ठानं मोक्षं च प्रकृतेरेवाहुः एवंभूतनिर्विकारोदासीनपुरुषसंनिधानात्प्रकृतेरितरेतराध्यासेन सर्गादिप्रवृत्तिं पुरुषभोगापवर्गार्थत्वं चाहुः । "सङ्घातपरार्थत्वात् त्रिगुणादिविपर्य्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च । "तस्माच्च विपर्य्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च"ति पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येत्युक्त्वैवमाहुः "तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिरिति, तथा "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः । पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" इति साक्षित्वद्रष्टृत्वभोक्तृत्वादयो नित्यनिर्विकारस्याकर्तुरुदासीनकैवल्यकस्वरूपस्य न सम्भवन्ति, एवंरूपस्य तस्याध्यास-

"क्षिप्रवचने लृट्" ॥ 'वचनग्रहणं पर्यायार्थमिति' । असति तस्मिन् स्वं रूपं शब्दस्येति वचनात्क्षिप्रशब्दएवोपपदे स्यात् सति तु पर्यायेष्वपि भवति, ननु भूतवच्चेत्यस्यायमपवादः स च भविष्यत्कालविषयस्तत्र नेत्येव वक्तव्यं तस्मिन्प्रतिषिद्धे लृट् शेषे चेत्यनेनैव लृट् सिद्धः तत्किं लृड्ग्रहणेन तत्राह । 'नेति वक्तव्यइत्यादि'। नेत्युच्यमाने लृट् शेषे चेत्यनेन लुङ्व नद्यतने न स्यात् लुटा बाधितत्वाद् अतो लुङ्विषयेपि यथा स्यादिति लृड्ग्रहणं क्रियतइत्यर्थः ॥

"आशंसावचने लिङ्" ॥ 'अधीयेयेति'। इङो लिङ इटोत्, सीयुट् लिङः सलोपो धातोरियङ् उपसर्गेण सह सवर्णदीर्घत्वं, क्षिप्रवचने लृट् आशंसावचने लिङ् विप्रतिषेधेन । क्षिप्रवचने लृडित्यस्यावकाशः क्षिप्रमध्येष्यामह इति, आशंसावचने लिङत्यस्यावकाशः आशंसे युक्तोधीयीयेति, इहोभयं प्राप्नोति आशंसे क्षिप्रमधीयीयेति लिङ् भवति विप्रतिषेधेन तदेतदुदाहरणे दर्शयति । 'आशंसे क्षिप्रमधीयीयेति' ॥

"नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः" ॥ 'कालानां सामीप्यमिति'। वर्त्तमानसामीप्यइत्यारभ्य कालप्रायत्वादस्य प्रकरणस्य सामान्येनोक्तावपि कालसम्बन्धिन एव सामीप्यस्याश्रयणमिति भावः । 'तुल्यजातीयेनेति'। तत्रैव लोके सामीप्यव्यवहारादिति भावः । 'अदादिति'। गातिस्थेत्यादिना सिचो लुक्। 'अध्यापिपदिति'। इङो णिच्, क्रीङ्जीनां णावित्यात्वम्, अर्त्तिह्रीत्यादिना पुक्, लुङि चङि अजादेर्द्वितीयस्येति पिशब्दस्य द्विर्वचनं णिलोपः। 'येयं पौर्णमास्यतिक्रान्तेति'। पौर्णमास्यन्तरेणाव्यवहिता या पौर्णमासी तामधिकृत्येदमुच्यते सापि यद्यप्यमावास्ययान्याभिश्च तिथिभिर्व्यवहिता तथापि तुल्यजातीयेन पौर्णमास्यान्येनाव्यवहितत्वात्सामीप्यं नातिवर्त्तते । 'आधितेति'। दधातेराङ्पूर्वस्य स्थाघ्वोरिच्चेतीत्वं, ह्रस्वादङ्गादिति सिचो लोपः । 'अयष्टेति'। झलो झलीति सिचो लोपः, व्रश्चादिसूत्रेण षत्वम् । 'अदितेति'। ददाते रूपं पूर्ववत् । 'यक्ष्यतइति'। व्रश्चादिषत्वे षढोः कः सीति कत्वं, सर्वत्र स्वरितञित इत्यात्मनेपदम्, इह क्रियाप्रबन्धसामीप्ययोरद्यतनप्रत्ययौ लुङ्लृटाविष्येते नानद्यतनप्रत्ययौ

लङ्लृटौ, तौ च लुङ्लृटावद्यतनवत् क्रियाप्रबन्धसामीप्ययोरित्युच्यमानेऽपि सिद्धत एव किमर्थं द्वौ प्रतिषेधावुच्येते इत्यत आह । 'द्वौ प्रतिषेधाविति'। 'यथाप्राप्तस्येति'। यथा येन प्रकारेण प्राप्तं प्राप्तिर्यस्येति बहुव्रीहिः, अव्ययीभावे त्वम्भावः स्यात्, इहाद्यतनवचने सति विधानमिदं विज्ञायेत तत्र लङ्विधिप्रसङ्गे पूर्वविधाने ह्यद्यतनसंशब्दनेन विहितस्य कस्य चित्प्रत्यस्याभावादद्यतने दृष्टस्यातिदेशो लट् चाप्यद्यतने दृष्टस्तेन तस्यापि भूतभविष्यतोः प्रसङ्गो लुङ्लृटोश्चायथाकालं विधिः प्रसज्येत लुङो विषये लृट् लृटश्च विषये लुङ् । ननु च वत्करणात्सादृश्यार्थात्सङ्करो न भविष्यति । नैतदस्ति । इह लुङ्लृटौ भूतभविष्यतोरद्यतने च दृष्टौ तत्राद्यतनवदित्युच्यमाने तस्मिन्नेवाद्यतने तयोरतिदेशोऽनर्थक इति कश्चिदंशो हातव्यस्तत्राद्यतनांशत्यागेनातिदेशे विज्ञायमाने भूतानद्यतने लुङ् भविष्यदनद्यतने लृडिति सिद्धम्, यदा तु भूतभविष्यदंशपरित्यागेनातिदेशस्तदा भूताद्यतने दृष्टस्य भविष्यदद्यतने भविष्यदनद्यतने च दृष्टस्य भूताद्यतने विधानमिति सङ्करः स्यादेव, लङ् चोभयत्र प्रसज्येत, वत्करणं तु यस्माद्धातोर्यस्मिन्नुपाधौ यः प्रत्ययो विहितः स तस्मादेव तस्मिन्नुपाधावेव यथा स्यादित्येवमर्थं स्यात्तेन पूङ्यजोः शानन्नित्यादौ कालव्यत्यास एव भवति न धात्वादिव्यत्यासः, यदि पुनरयं द्वौ प्रतिषेधौ कृत्वा तूष्णीमास्ते स्वैरेव विधायकैर्लङादय उत्सर्गाः स्वेषु स्वेषु कालेषु अपवादविनिर्मुक्तेषु भवन्तीति न सङ्करप्रसङ्गः, अतो यथाप्राप्तस्याभ्यनुज्ञानाचायं वतिः किं तर्हि मतुप्, अनद्यतनमस्यास्तीत्यनद्यतनवत्, सामान्यविवक्षायां नपुंसकत्वम् । 'अनद्यतनवत्प्रत्ययविधिर्न भवतीति'। अस्याप्यनद्यतनवांश्चासौ प्रत्ययश्च तस्य विधिरित्यर्थ इति सर्वथा यदनद्यतने विहितं तत्सर्वं न भवति । वृत्तौ लङ्लुटौ विहितौ तयोः प्रतिषेध इत्युपलक्षणम् ॥

"भविष्यति मर्यादावचनेऽवरस्मिन्" ॥ 'अक्रियाप्रबन्धार्थमसामीप्यार्थं च वचनमिति'। क्रियाप्रबन्धसामीप्ययोरिति नानुवर्त्तते तदनुवृत्तौ हि नियमार्थमेतत् स्याद् भविष्यत्येव मर्यादावचनएवावरस्मिन्नेवेति वा

विधिनियमसम्भवे च विधिरेव ज्यायानिति भावः । 'मर्यादावचने सतीति'। मर्यादोक्तौ सत्यामित्यर्थः, वचनग्रहणमभिविध्यर्थं वचनग्रहणे हि सति मर्यादामात्रवचने मर्यादावचनइत्यर्थो भवति सैव हि मर्यादा यदा कार्येणाभिसम्बध्यते तदाभिविधिरित्युच्यते। 'अवरस्मिन्नविभागइति' । अपरभागविषयश्चेद्भात्वर्थो भवतीत्यर्थः, अपरस्मिन्निति वचनाद्यस्य मर्यादा तस्य द्वौ भागौ कल्पयितव्याविति गम्यते। 'गन्तव्य इति'। अध्वगमनस्य भविष्यत्वं दर्शयंस्तत्र कर्त्तव्यस्य भोजनादेर्भविष्यत्वं दर्शयति। 'तस्य यदपरमिति'। अनेनाध्वनो विभागो द्विरित्यनेनापि क्रियाप्रबन्धाभावो द्विरेव नानवरतमिति । 'योयमध्वागत इति' । भूतकालतां दर्शयति । 'अध्येमहीति' । इङो लङ्, शपो लुक्, आडजादीनाम्, आटश्च । 'अभुञ्ज्महीति'। भुजोनवनइत्यात्मनेपदं, श्नसोरल्लोपः, चुत्वम्। 'तत्र उत्तरसूत्रे विशेषं वक्ष्यतीति' । अनहोरात्राणामित्यनेन ॥

"कालविभागे चानहोरात्राणाम्" ॥ 'कालमर्यादाविभागे सतीति'। मर्यादा च विभागश्च मर्यादाविभागं समाहारद्वन्द्वः, तेन कालशब्दस्य षष्ठीसमासः। 'न चेदहोरात्रसम्बन्धी विभाग इति' । एतेनानहोरात्राणामिति सम्बन्धसामान्ये षष्ठी न कर्तृकर्मणोरिति दर्शयति, एवं सति यदिष्टं सिद्धं तद्दर्शयति । 'तैरिति'। तैरन्यस्य कालस्य विभागोन्येन वा तेषां तैरेव वा तेषां सर्वथा प्रतिषेधः । ननु पूर्वसूत्रएवानहोरात्राणामिति वक्तव्यमेवमपि हि सामर्थ्यात्कालविभागस्यैव प्रतिषेधो विज्ञायते नहि देशविभागस्याहोरात्रैः सम्बन्धोस्ति तत्किं योगविभागेन तत्राह। 'योगविभाग उत्तरार्थ इति'। उत्तरसूत्रे कालविभागएव विभाषा यथा स्याद्देशविभागे माभूदिति, आग्रहायणी मार्गशीर्षी। 'त्रिविधमुदाहरणमिति'। प्रथमं तैर्विभागस्य द्वितीयं तेषां विभागस्य तृतीयं तैस्तेषा,महोरात्रसंस्पर्शे अहोरात्रगन्धे, एतच्च प्रसज्यप्रतिषेधसमाश्रयणाल्लभ्यते, दर्शितश्च प्रसज्यप्रतिषेधो न चेदहोरात्रसम्बन्धी विभाग इति, अन्यथानहोरात्रसम्बन्धिनि विभागइत्यवक्ष्यत् ॥

"लिङ्निमित्ते लृङ् क्रियातिपत्तौ" ॥ 'कुतश्चिद्वैगुण्यादिति'। प्रतिबन्धकोदयः सामग्रीवैकल्यं वा वैगुण्यम्। 'दक्षिणेन मार्गेण न शकटं पर्याभविष्यदिति'। तस्य मार्गस्य ऋजुत्वात्स्थाण्वादेरभावाच्च, पर्याभवनं भङ्गः, कमलकः कश्चित्पुरुषः स शकटादीनां विषमेष्वपि स्थानेषु मुसलाद्यवष्टम्भयोगेन नेता। 'अभोक्ष्यत भवान् घृतेनेति'। घृतमात्रस्यातिपत्तौ भोजनक्रियाभिनिर्वृत्तावपि लृङ् भवति कारणभेदाद्विभिन्नैव भोजनक्रिया ततो घृतातिपत्तौ घृतभोजनक्रियाप्यतिपन्नैव। 'भविष्यत्कालविषयमेतद्वचनमिति'। कथं तर्हि भविष्यतोऽर्थस्येदानीमवगतिस्तत्राह। 'भविष्यदपर्याभवनमिति'। 'हेतुमत् तत्र हेतुभूतमिति'। एतेन लिङ्निमित्तं हेतुहेतुमद्भावं दर्शयति। 'लिङ्गेन बुध्वेति'। असकृत्प्राक्कमलकाह्वाने सति शकटापर्याभवनं दृष्ट्वा भाविनोऽपि कलमकाह्वानस्य शकटापर्याभवनं दृष्ट्वा भाविनोऽपि कलमकाह्वानस्य शकटापर्याभवनहेतुभूतत्वं लिङ्गेन बुद्ध्वा, लिङ्गं पुनः कलमकाह्वानत्वं, भविष्यत्कलमकाह्वानमपि शकटापर्याभवनस्य हेतुः कलमकाह्वानत्वात्पूर्वकलमकाह्वानवदिति एवं बुध्वेत्यर्थः। 'तदतिपत्तिमिति'। प्रकरणाद् द्विवचनान्तस्य समासस्तयोराह्वानापर्याभवनयोरतिपत्तिमित्यर्थस्तत्र कमलकस्य देशान्तरगमनादिना तदाह्वानस्यातिपत्तिरवसीयते तदतिपत्त्यैव च पर्याभवनस्याप्यतिपत्तिः शकटस्य गुरुतरभारारोपणादिना। 'भविष्यत्काल[1]योरतिपत्तिरितो वाक्याद्गम्यतइति'। नेदानीं कमलक आह्वातुं शक्यते तच्च शकटमपि पराभविष्यत्येवेत्यवगमात् ॥

"भूते च" ॥ 'अचार्यो चङ्क्रम्यमाण इति'। भोक्तुकामः क्षुधा कुटिलं गच्छन्नित्यर्थः। 'अपरश्च द्विजो ब्राह्मणार्थीति'। चङ्क्रम्यमाणो दृष्ट इत्यनुषङ्गः, ब्राह्मणार्थी भोक्तारं मार्गयमाण इत्यर्थः। सोपि संभ्रमात्कुटिलं गच्छति, ततः किमित्यत आह। 'यदीत्यादि'। यदि दृष्टो भविष्यदिति क्वचित्पठ्यते तत्तु यदाययोरुपसंख्यानमिति यदि लिङ्निमित्तत्वात् लृङ् किं तूत्तरसूत्रेण विकल्पितः, दृष्ट इत्येव तु पाठो युक्तः। 'न तु भुक्तवानिति'। क्रियातिपत्तिं दर्शयति, तत्र हेतुः। 'अन्येन पथा स गत इति' ॥

१ मुद्रितमूलपुस्तके विषययोरित्यधिकं दृश्यते।

Digitized by Google

"वोताप्योः" ॥ 'वा आ उताप्योरिति'। आङः प्रश्लेषं दर्शयति, तत्राङ उताप्योरित्यनेन सम्बन्धादल्पापेक्षत्वेनान्तरङ्गत्वाद्वा पूर्वं परेण सहाद्गुणे कृते पूर्वं प्रत्यन्तवद्भावादेरमाङोश्चेति पररूपं यथा आ ऊढा-ओढा अद्य ओढा अद्योढा कदोढेति, अत्रोताप्योः समर्थयोरिति यत्सप्त-म्यन्तं तदवधित्वेनोपादीयते तत्र प्रकृतिवदनुकरणं भवतीत्यनुकरणस्याप्य-प्रत्यय इति प्रतिषेधेनाप्रातिपदिकत्वादाङोपि योगे पञ्चम्यभावः। 'मर्या-दायामाङिति'। एतच्च विभाषा गर्हाप्रकृतौ प्रागुतापिभ्यामिति स्मरणा-दवसीयते, गर्हाप्रकृतौ गर्हाविशिष्टे प्रकृत्यर्थे, गर्हाग्रहणमनवक्लृप्त्यादेरपि लिङ्निमित्तस्योपलक्षणं विभाषा कथमि लिङ् चेति लिङ्निमित्ताभावा-दुत्तरसूत्रातिक्रमः ॥

"गर्हायां लडपिजात्वोः" ॥ 'कालसामान्येन प्राप्नोतीति'। विधी-यते इत्यनेन भविष्यतीत्यादेः कालविशेषवाचिनो निवृत्तिं सूचयन् काल-सामान्ये विधिरिति दर्शयति। 'कालविशेषविहितांश्चेत्यादि'। भाष्ये त्वेष निर्णयो गर्हायां लड्विधानानर्थक्यं क्रियासमाप्तेरविवक्षितत्वात् ताच्छी-ल्यप्रतिपादनेनात्र गर्हा ततश्च यदनेन क्रियते तत्सर्वं वृषलयाजनार्थं-मिति सर्वदासौ वृषलं याजयन्नेव भवति ततश्च क्रियायाः समाप्तिरवि-वक्षितेति वर्तमाने लडित्येव लट् सिद्धः, यद्येवं शतृशानचावपि प्राप्नुत इष्येते च शतृशानचावपि मां याजयन्तं पश्य अपि मां याजमानं पश्येति प्रत्युत सूत्रारम्भे सत्यवर्त्तमानकालविहितत्वाल्लुटस्तौ न प्राप्नुत इति दोषवानेव सूत्रारम्भ इति ॥

"विभाषा कथमि लिङ् च" ॥ 'विभाषाग्रहणमित्यादि'। स्वस्मिन् स्वस्मिन् काले ये लडादयो विहितास्तेषां च बाधा माभूदित्येवमर्थमि-त्यर्थः, यद्येवं विभाषाग्रहणादेव लडपि भविष्यति नार्थश्चकारेण, सत्यं, वर्त्तमाने सिद्ध्यति कालान्तरे तु न सिद्ध्यति तस्मात्तदर्थश्चकारेण लटः समुच्चयः। 'अत्र लिङ्निमित्तमस्तीति'। कथमीत्येतद्गर्हा च ॥

"किंवृत्ते लिङ्लृटौ" ॥ किंवृत्ते लिप्सायामित्यत्र किंवृत्तं व्याख्या-तम् इह किंवृत्ते लृट् चेति वक्तव्यं चकारात्प्रकृतो लिङ् भविष्यति नार्थो

Digitized by Google

लिङ्ग्रहणेन तत्राह । 'लिङ्ग्रहणमिति'। चकारेण लिङ इव लटोपि समुच्चयः स्यात् तस्यापि प्रकृतत्वात्तस्मात्तन्निवृत्त्यर्थमिति भावः ॥

"अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि" ॥ अपिग्रहणं शक्यमकर्त्तुं कथं यथोपकादिभ्योन्यतरस्यामद्वन्द्वइत्यत्राद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थं तथेहाप्यकिंवृत्तग्रहणं किंवृत्ताधिकारनिवृत्त्यर्थमस्मिन्निवृत्ते किंवृत्ते चाकिंवृत्ते च प्रत्ययद्वयं भविष्यति तत्क्रियते विस्पष्टार्थं, तथाऽकिंवृत्त इत्यपि विस्पष्टार्थमेव, अस्वरितत्वादेव किंवृत्तइत्यस्याननुवृत्तेरविशेषेण प्रत्ययद्वयं भविष्यति, आह च, किं वृत्तस्यानधिकारादुत्तरत्राकिंवृत्तग्रहणानर्थक्यमिति, ननु चाकिंवृत्तग्रहणेन किंवृत्तादन्यत्पदं पर्युदासाश्रयणेन गृह्यते तस्योपपदसंज्ञां वक्ष्यामीत्यकिंवृत्तग्रहणं स्यात् किं पुनरुपपदसंज्ञायाः प्रयोजनं, समासो नातिङिति प्रतिषेधात्, यदा तर्हि लृटः सत्संज्ञकौ भवतस्तदा समासो यथा स्यात् नास्य लृटः सत्संज्ञकौ भवतः लृटः सद्वेत्यत्र भविष्यतीत्यधिकाराद्भविष्यतीत्येवं विहितस्य लृटो ग्रहणमयं तु कालमात्रे विधानाद्यद्यपि भवति तथापि भविष्यदधिकारविहितो न भवतीति नास्य शतृशानचौ भवतः ॥

"किंकिलास्त्यर्थेषु लृट्" ॥ 'समुदाय उपपदमिति'। केवलस्य किंशब्दस्यानवक्लृप्त्यमर्षयोर्वृत्त्यसम्भवात् । 'लिङोपवाद इति'। पूर्वेणाप्राप्तस्य। 'अस्ति नामेत्यादि'। भवत्कर्तृकं वृषलयाजनमस्तीत्यर्थः, उक्तं हि पच्यादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति ॥

"जातुयदोर्लिङ्" ॥ 'लृटोपवाद इति'। अनवक्लृप्त्यादिसूत्रेण लिङ्लृटोर्द्वयोरपि प्राप्तयोर्लिङेव यथा स्यात् लृणमाभूदित्येवमर्थ इत्यर्थः । 'यदायद्योरुपसङ्ख्यानमिति'। सूत्रवत् लृटोपवादः ॥

"यच्चयत्रयोः" ॥ 'लृट ए[1]वापवाद इति'। पूर्ववत्प्राप्तस्य, एवकारः पौनर्वचनिकः । 'योगविभाग उत्तरार्थ इति'। उत्तरत्र यच्चयत्रयो-

[1] मुद्रितमूलपुस्तके एवेति नास्ति ।

रेवानुवृत्तिर्यथा स्यात् जातुयदोर्माभूदिति, इहानवक्लृप्त्यमर्षौ द्वौ यच्च यत्रयोरित्युपपदे अपि द्वे एव ततश्च यथासङ्ख्यं प्राप्नोति तत्राह । 'यथासङ्ख्यमिह नेष्यतइति' । पूर्ववल्लक्षणव्यभिचारचिह्नात् बह्वचः पूर्वनिपातात् ॥

"गर्हायां च" ॥ दरिद्रश्चेद्वृषलयाजनमपि युक्तं स्यात् तत उक्त- 'मृद्ध इति' । ऋद्धस्याप्युपभोगबाहुल्येन सम्भाव्येत अत उक्तं 'वृद्ध इति' । वृद्धस्यापि जातिमात्रब्राह्मणस्य युक्तं स्यादत उक्तं 'सद्ब्राह्मण इति' । सद्वं- शजः सदाचारश्चेत्यर्थतो गर्हामर्ह इति ॥

"शेषे लृडयदौ" ॥ 'यच्चयत्राभ्यामिति' । चित्रीकरणापेक्षस्तु शेषो न भवति तस्येह स्वरितत्वेनाधिकारात् । 'आश्चर्यं यदि स भुञ्जी- तेति' । अत्रानवक्लृप्तिराश्चर्यं च द्वयं गम्यते तत्राश्चर्यनिमित्ते लृटि प्रतिषिद्धे जातुयदोर्लिङ्विधाने यदायद्योरुपसङ्ख्यानमित्यनवक्लृप्तौ लिङ् । भाष्ये तु सम्भावनार्थो यदिशब्दः प्रयुज्यते ततश्च सम्भावनमत्र तात्प- र्यार्थो न चित्रीकरणं ततश्चायदाविति न वक्तव्यं लिङपि सम्भावने- लमित्यनेनैवेत्युक्तं यदाह, चित्रीकरणे यदिप्रतिषेधानर्थक्यमर्थान्य- त्वादिति ॥

"उताप्योः समर्थयोर्लिङ्" ॥ 'समर्थयोरिति' । सूत्रे समशब्दस्य निपातनादतो लोपः शकन्ध्वादित्वाद्वा पररूपत्वं संशब्द एव वा वृत्तौ समशब्देन समानार्थः यथा प्रोपाभ्यां समर्थाभ्याम् यथा मुखसंमुखस्येत्य- त्रेति भावः । 'प्रश्नः प्रच्छादनं च गम्यत इति' । आद्ये प्रश्नो गम्यते द्वितीये प्रच्छादनं, ननु चापिशब्दोपि प्रश्ने दृष्टः, अप्यग्रणीर्मन्त्रकृतामृषीणाम् अपि प्रसन्नं हरिणेषु ते मन इति ततश्च प्रश्नेपि समानार्थत्वमनयोरिति उत दण्डः पतिष्यतीति प्रत्युदाहरणानुपपत्तिः, एवं मन्यतेऽप्यग्रणीरित्यादौ प्रष्टव्यमर्थान्तरमपेक्ष्य समुच्चयार्थ एवापिशब्दः प्रश्नस्त्वर्थः प्रकरणादिना गम्यते तेन नानयोः प्रश्ने समानार्थत्वमिति ॥

"कामप्रवेदनेऽकच्चिति" ॥ 'स्वाभिप्रायाविष्करणं कामप्रवेदनमि- ति' । एतदेवावयवार्थप्रकाशनेनोपपादयति । 'काम इच्छेति' । 'माराधि-

द त्वां पृच्छामीति'। माराविशब्दं ददातीति माराविदो माराविरवो माकारीत्यर्थः, संज्ञैषा शुकविशेषस्य तं हस्ते निधाय कश्चिल्लालयति पार्वत्यपि शुकस्यैव का चिदिष्टा, प्रायेण तु मातापितरौ पृच्छामीति पाठः, तत्र तदुपक्रमं वाक्यं मातापितरौ पृच्छामि किमत्र पृच्छ्यते कच्चिज्जीवति ते मातेति ॥

"सम्भावनेलमिति चेत्सिद्धाप्रयोगे"॥ 'योग्यताध्यवसानमिति'। योग्यताया निश्चयः, एतदेव स्फोरयति। 'शक्तिश्रद्धानमिति'। शक्तिः सामर्थ्यं श्रद्धायते विषयीक्रियते येन ज्ञानेन तत्तथोक्तं तदिति, सम्भावनपर्याप्त्येत्येतेन पर्याप्ताविहालंशब्दो न भूषणादावित्याह। 'यद्येवं सम्भावन इति'। सप्तम्यन्तस्य कथमलमिति चेदित्येतद्विशेषणमुपपद्यत इत्याशङ्क्य विपरिणामेन व्याचष्टे।'तच्चेत्सम्भावनमिति'। सम्भावनमलमिति चावर्तते सम्भावने लिङ् भवति तच्चेत्सम्भावनमलमात्मकं भवतीति, एवं पर्यवसानेनालमा सम्बन्धोतोत्रेतिशब्दो न सम्बन्धनीयः ततोलमित्यस्मिन् सिद्धाप्रयोगे सतीत्यन्वयोत्र चेच्छब्दो न सम्बन्धनीयः सप्तम्यन्तेन सम्बन्धासम्भवात्, वृत्तौ तु वस्तुमात्रं दर्शितं सिद्धश्चेदलमोप्रयोग इति न पुनरत्र चेच्छब्दस्यान्वयः। 'पर्याप्तमिति'। स्वकार्यनिर्वर्त्तने समर्थं स्वकार्यं पुनस्तस्याविपरीतमविषयपरिच्छेदस्तद्दर्शयति। 'अवितथमिति'। अतथाभूतार्थविषयत्वं ज्ञानस्य वैतथ्यं यथा शुक्तिकायां रजतज्ञानस्य तद्विपरीतमवितथं तथाभूतार्थविषयमित्यर्थः। 'तदीदृशसम्भावनोपाधिक इति'। तदिति वाक्योपन्यासे ईदृशमलमर्थविशिष्टं सम्भावनमुपाधिर्यस्येति त्रिपदो बहुव्रीहिः, क्वचित्त्वीदृशे सम्भावनोपाधिकइत्यसमासः पठ्यते तत्रेदृश इति न सङ्गच्छते न हि धात्वर्थस्य किञ्चिद्रूपं प्राङ्निर्दर्शितं यदीदृशमित्युच्येत। 'सर्वलकाराणामपवाद इति'। सम्भावनस्य भविष्यद्विषयत्वाद्भविष्यद्विषयाणां सर्वलकाराणामित्यर्थः। 'अपि पर्वतं शिरसा भिन्द्यादिति'। अत्र यत्पर्वतभेदविषयं सामर्थ्यं पुंसः सम्भाव्यते तद्यस्य भीमसेनादेर्विद्यतएव तत्र सम्भावनमवितथमिति तद्विषयमुदाहरणम्। 'अपि द्रोणपाकं भुञ्जीतेति'। यत्पक्वस्य भोजनं तदेव पाकस्य भोजनं

Digitized by Google

कर्मसाधनो वा पाकशब्दः। 'विदेशस्थायी' देशान्तरगतः। 'प्रायेणागमिष्यतीति'। प्रायिकस्वदक्षिणाक्षिस्पन्दनादेर्लिङ्गाभासादागमनं सम्भाव्य तत एतत्प्रयुज्यते तत्तथ्यमपि भवति विपरीतमपि भवति। 'अलं देवदत्त इति'। पर्याप्तं हनिष्यतीत्यर्थः भाविविषयत्वात्सम्भावनस्य सर्वत्र ऌट् प्रत्युदाहृतः। अपरा व्याख्या सम्भावनं भाविवस्तूत्प्रेक्षणमसति विरुद्धप्रत्ययोपनिपाते भवितव्यमनेनेति ज्ञानं यथा प्रत्युदाहरणे प्रायेणागमिष्यतीति तस्य विशेषणमलमिति चेदिति अलमिति चेत् तत्सम्भावनमिति विपरिणामेनान्वयः, तत्र यथा घट इति ज्ञानं पट इति ज्ञानमित्युक्ते ज्ञानस्य विषयनिर्द्देशः प्रतीयते तथेहापि सम्भावनाख्यस्य ज्ञानस्य विषयनिर्द्देशोयमलमिति चेत् तत्सम्भावनमलमर्थविषयं चेदित्यर्थः, अलमर्थश्च पर्याप्तिर्न भूषणादिर्धातोश्च प्रत्ययविधानात्तदर्थगोचरमेव सामर्थ्यं गृह्यते इमं धात्वर्थमनुष्ठातुं समर्थ इत्येवं रूपं चेत् तत्सम्भावनमित्यर्थः, सिद्धाप्रयोगे कस्मिन् सन्निधानादलंशब्द, एवं तावत्सूत्राक्षराणां निर्वाहः वृत्तेस्तु। 'यत्क्रियासु योग्यताध्यवसानमिति'। तदिह सूत्रे जिघृक्षितस्य सम्भावनस्य लक्षणं न सम्भवनमात्रस्य अन्यथा प्रत्युदाहरणमनुपपन्नं स्यात् न हि तत्र शक्तिश्रद्धानं गम्यते कथं पुनरत्रेदृशं सम्भावनं गृह्यत इत्यत्राह। 'तदिदानीमिति' तत्खलु सम्भावनमेतत्सूत्रप्रणयनकालेस्मिन्सूत्रइत्यर्थः, अलमर्थेन विषयेणाविशेष्यते अलमिति चेत् सम्भावनमिति पर्याप्तिमिति पर्याप्तिरलमर्थो न भूषणादिरित्यर्थः, विपरिणामेनान्वयं दर्शयति। 'तच्चेत्सम्भावनमिति'। पर्याप्तिविषयत्वात् पर्याप्तम् अवितथविषयत्वात् अवितथम् एतद्धात्वर्थानुष्ठाने पर्याप्तो वितथारम्भोयमस्मिन् धात्वर्थ इत्येवं रूपं चेत्सम्भावनमित्यर्थः। 'अपि पर्वतं शिरसा भिन्द्यादिति'। एवं नामायं बलवानित्यर्थः, पर्वतं तु भिनत्तु मावाभिदत्॥

"विभाषा धातौ सम्भावनवचनेऽयदि"॥ 'सम्भावयामि भुञ्जीत भवानिति'। भोजने भवांश्शक्त इत्युत्प्रेक्ष इत्यर्थः॥

"हेतुहेतुमतोर्लिङ्"॥ 'भविष्यति च काल इति'। इष्यत इत्य-

Digitized by Google

पेक्ष्यते कथं पुनरेतद् द्वयं सूत्रेनुपात्तमेव लभ्यतइत्याह। 'तत्रेति'। 'लङिति वर्त्तमाने इति'। उताप्योरित्यादेः सूत्रात्। 'हन्तीति पलायत इति'। अत्र हननं हेतुः पलायनं हेतुमत्, वर्षणं हेतुः सरणं हेतुमत् 'पलायतइति'। उपसर्गस्यायताविति लत्वम्, अत्र लक्षणहेत्वोः क्रियाया इति शत्रादेशोपि न भवति इतियोगे च सद्विधिरिति व्यवस्थितविभाषासु पठितत्वात् ॥

'इच्छार्थेषु लिङ्लोटौ" 'कामप्रवेदनइति वक्तव्यमिति'। कामप्रवेदने कच्चितीत्ययं तर्हि योगः किमर्थः यावता कामो मे भुञ्जीत भवान् अभिलाषो मे भुञ्जीत भवानित्यत्राप्यनेनैव सिद्धं यत्रेच्छार्थमुपपदं न भवति अर्थप्रकरणादिना तु कामप्रवेदनं गम्यते तत्रापि लिङ् यथा स्यात्, इदं तर्हि किमर्थं लोडर्थं लिङ्ग्रहणं तु लोटा बाधा मा भूदिति, एवमपि लोट्, चेति वक्तव्ये किं लिङ्ग्रहणेन प्रकृतं लिङ्ग्रहणं विभाषासम्बन्धमतस्तदनुकर्षणे विभाषाग्रहणस्याप्यनुकर्षणं सम्भाव्येत ॥

"समानकर्तृकेषु तुमुन्" ॥ 'तुमुन्प्रकृत्यपेक्षमिति'। तुमुन्प्रकृतौ यः कर्त्ता स चेदिच्छार्थेष्वपि भवतीति, एतच्च सान्निध्याल्लभ्यते। 'इच्छति भोक्तुमिति'। आत्मनो भोजनमिच्छतीत्यर्थः, य एवेषः कर्त्ता स एव भुजेरपीत्यस्तीह समानकर्तृकत्वम् इच्छाया भुजिक्रियां प्रति तादर्थ्यस्याप्रतीतेस्तुमुन्ण्वुलावित्यादिना तुमुन् न सिद्ध्यतीत्ययमारम्भः, अथापि कथं चित्तादर्थ्यं स्यादेवमपि समानकर्तृकेष्विति वक्ष्यामीत्ययमारम्भः, तेन देवदत्तेन भोक्तुमिच्छति यज्ञदत्त इति न भवति। 'इच्छन्करोतीति'। अत्रार्थे इच्छन्कर्त्तुमिति न भवतीत्यर्थः, इच्छन्कर्त्तुं गच्छतीत्यादौ तुमुन्ण्वुलावित्यादिना तुमुन्, ननु भावे तुमुन् विधीयते तत्कथमिच्छन्करोतीत्यत्र कर्त्तरि प्रसङ्गः, एवमपीच्छता क्रियतइत्यत्र प्रसङ्गादनभिधानमेवाश्रयणीयम् ॥

"लिङ् च" ॥ किमर्थमिदमुच्यते लिङ् यथा स्यात्, सिद्धोत्र लिङ् इच्छार्थेषु लिङ्लोटाविति, तस्य समानकर्तृकेषु तुमुन् बाधकः

Digitized by Google

प्राप्तो वासरूपविधिश्च क्तल्युट्तुमुन्खलर्थेषु प्रतिषिद्धस्तत्र यथा लोगन भवति एवं लिङपि न स्यात्, अथापि वासरूपविधिः स्यादेवमपि लिङेव यथा स्याल्लोगमाभूदित्येवमर्थमेतदारब्धव्यमेव ॥

“इच्छार्थेभ्यो विभाषा वर्तमाने” ॥ ‘उश्यादिति’। वश कान्तौ अदादिर्ग्रहिज्यादिना सम्प्रसारणम् ॥

“विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्” ॥ ‘विधिः प्रेरणमिति’। भृत्यादेर्निकृष्टस्य क्वचित्प्रवर्त्तनमाज्ञापनमित्यर्थः, नियोगतोवश्यम्भावेन यत्करणमनुष्ठानं तन्निमन्त्रणं स निमन्त्रणस्य विषय इत्यर्थः, अवश्यकर्त्तव्ये श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनेति यावत्, श्राद्धे हि निमन्त्रितो दौहित्रादिरभुञ्जानः प्रत्यवैति। ‘कामचारकरणमिति’। कामचार इच्छाप्रवृत्तिस्तया यत्करणमनुष्ठानं तदामन्त्रणं तद्विषयमामन्त्रणमित्यर्थः, यत्राननुष्ठानेपि न प्रत्यवायस्तत्र प्रवर्त्तनेति यावत्। कल्याणादौ ह्यामन्त्रितोऽभुञ्जानोपि न प्रत्यवैति। ‘अधीष्टमिति’। अधिपूर्वादिच्छतेर्नपुंसके भावे क्तः, पुल्लिङ्गेन पाठस्त्वयुक्तः। ‘सत्कारपूर्वको व्यापार इति’। गुर्वादेराराध्यस्य व्यापारणेत्यर्थः, ण्यन्तादेरच्, इदं वा कर्त्तव्यमिदं वा कर्त्तव्यमित्येवं भूतविचारणा सम्प्रधारणं यथेदमिह सम्प्रधार्यतइति याज्ञा प्रसिद्धा।

‘न्यायव्युत्पादनार्थं च प्रपञ्चार्थमथापि वा।
विध्यादिनामुपादानं चतुर्णामादितः कृतम् ॥
अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥

अयं विध्यादिः प्रकृत्यर्थः प्रत्ययार्थः प्रकृत्यर्थविशेषणं प्रत्ययार्थविशेषणं वेति चत्वारः पक्षाः, तत्राद्ये पक्षे विध्यादिषु वर्त्तमानाद्धातोरित्यर्थः स्यात् ततश्च यत्र प्रकृतिरेव विध्यादीनाचष्टे तत्रैव स्यात् विदध्यान्निमन्त्रयेत आमन्त्रयेताऽधीच्छेत् संप्रच्छेत प्रार्थयेतेति, तत्रापि प्रकृत्यर्थो भावकर्मकर्त्तारश्चेत्येतावदवगम्येत न प्रकृत्यर्थव्यतिरेकेणापरंविध्यादिकं, यथे-

च्छार्थेभ्यो विभाषा वर्त्तमानद्दत्यत्र लिङि इच्छेदिति लडादयश्च न स्युरनेन लिङा बाधितत्वात्, द्वितीये नाप्राप्तेषु भावकर्मकर्तृषु विध्याद-योर्था निर्द्दिश्यमानास्तेषां बाधकाः स्युरिति लिङा कर्त्रादीनामभिधानं न स्यात्, द्विवचनबहुवचनानुपपत्तिश्च विध्यादीनामेकत्वात्, तृतीये तु यत्र प्रकृतिरेव विध्यादीनाचष्टे तत्र न स्यात् विदध्याच्चिमन्त्रयेतेति नह्यत्र प्रकृत्यर्थादन्ये तद्विशेषणभूता विध्यादयः सन्ति, चतुर्थे तु विध्यादीनां कर्त्रादीनां च स्पष्ट एव भेद इति दोषाभाव इति तमेवाश्रयति। 'विध्याद-यश्चैत इति'। 'विध्यादिविशिष्टेष्विति'। विध्यादयः प्रवर्त्तनाविशेषास्तै-र्विशिष्टेषु प्रवर्तितेष्वित्यर्थः। सम्प्रश्नप्रार्थनयोस्तु सम्पृच्छ्यमाने प्रार्थ्यमाने च कर्त्तरि। ननु च प्रकृत्या योऽर्थो नाभिधीयते तत्रैव प्रत्ययेन भाव्यं न तु प्रकृत्याभिहित, उक्तार्थानामप्रयोग इति न्यायात् ततश्चास्मिन्नपि पत्ते विदध्यादित्यादो तदवस्थ एवाप्रसङ्गः, एवं तर्हि सन्त्येवात्र व्यतिरिक्ता विध्यादयो विषयभेदात्, तथाहि। आद्दे मां निमन्त्रयेत भवानिति मत्कर्मकं निमन्त्रणं तवानुष्ठेयमित्यर्थः, तत्र प्रकृत्यभिहितं निमन्त्रणं भोजनविषयं लिङभिहितं तु निमन्त्रणविषयमिति विस्पष्ट एव निमन्त्र-णभेदः, यथैषितुमिच्छतीति कालसाधनभेदादिच्छयोर्भेदाश्रयो योगस्त-द्वत्, एवं विध्यादिष्वपि द्रष्टव्यम्, एवं च कृत्वा प्रकृत्यर्थविशेषणपत्तेपि नातीव दोषः। 'आमन्त्रण इह भवान् भुञ्जीतेति'। यदीच्छतीत्यर्थः, अधीष्यामह इत्यपपाठोयं नहीच्छतेरेतद्रूपं सम्भवति इष्यतिरपि परस्मै-पदी गुणश्च श्यनि दुर्लभः इङश्चात्रार्थो नास्ति सूत्रे चाधीष्टेति इङ्‌ प्रयुक्तस्तस्मादधीच्छाम इति पाठः। 'उपनयेतेति'। आचार्यकरणआत्म-नेपदम् ॥

"लोट् च" ॥ 'योगविभाग उत्तरार्थ इति'। उत्तरत्र लोट एवा-नुवृत्तिर्यथा स्याल्लिङो मा भूदिति। 'अध्ययै इति'। इट् उत्तमैकवचनं, टेरेत्वम्, एत ऐ, आडुत्तमस्य पिच्चेत्याडागमः, आटश्चेति वृद्धिः, प्रकृतेर्गु-णायादेशैा ॥

"प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" ॥ 'कृत्य इति'। विभाषा

Digitized by Google

कृवृषोरिति क्यप्, भवान् हि प्रेषित इत्यादिर्वाक्यशेषः सर्वेष्वेवोदाहरणेषु योज्यः । 'न सामान्येनेनि' । भावकर्मणोरित्युपलक्षणं भव्यगेयादीनां कर्त्तर्यपि भावात् । 'एवं तर्ह्येतज्ज्ञापयतीति' । प्रैषादिष्वेव कृत्या भवन्ति नान्यत्रेति नियमार्थं चैतन्न भवति अनिष्टत्वात्, अन्यत्रापि कृत्या दृश्यन्ते, तृणेन शोष्यं बुधेन बोध्यमिति अग्निस्तोकं तृणेन दीपनीय इति, वस्तु-स्वरूपकथनमेतत् न त्वत्र प्रैषादिप्रतीतिः । 'अधिकारात्परेणेति' । एनपा योगे पञ्चमी मृग्या । 'नावश्यमिति' । क्वचिद्भवति क्वचिन्नेत्यर्थः । 'का विशेष इति' । विधिः प्रेरणमिति पूर्वत्र व्याख्यातत्वात् नास्त्येव भेद इति प्रश्नः, यद्यविशेषः कथं द्वन्द्वनिर्द्देश इति चेत् शब्दरूपस्याभिधेयत्वात्, का विशेष इति कोनयोः शब्दयोर्विशेषोभिधेय इत्यर्थः । 'के चिदिति' । एवमामन्त्र-णातिसर्गयोरपि विशेषो ज्ञेयः,केचिदिति वचनादपरेनयोर्विशेषं नेच्छन्तीत्युक्तं भवति तेषामपि प्रैषातिसर्गग्रहणं कर्त्तव्यमेव तत्रैव कृत्या यथा स्युरिति, प्राप्तकाले चेति ह्युक्ते निमन्त्रणादावपि कृत्याः स्युः चकारेण लोडप्यनुक-र्षणीयः प्राप्तकाले यथा स्यादिति ॥

"लिङ् चोर्ध्वमैाहूर्तिके" ॥ 'चकाराद्यथाप्राप्तं चेति' । लोट् कृत्याश्च ॥

"स्मे लोट्" ॥ 'लिङ्कृत्यानामपवाद इति' । अनन्तरसूत्रेण प्राप्तानाम् । 'करोतु स्मेति' । स्मशब्दोधिकारं सूचयति भवानत्राधिकृत इत्यर्थः ॥

"अधीष्टे च" ॥ 'अङ्ग स्म राजंचिति' । अङ्गशब्दोनुनये ब्राह्मणा-नामेवाध्यापनं वृत्तिरेता राजंचित्यभ्यर्हितेत्यर्थः ॥

"कालसमयवेलासु तुमुन्" ॥ 'प्रैषादिग्रहणं सम्बद्ध्यतइति' । न चेह प्रैषादयो गम्यतइति भावः । 'इह कस्मादिति' । 'काले भोजन-स्येति' । तस्माद्भुङ्क्तां भवानिति वाक्यार्थस्तेन गम्यतेत्र प्रैष इति प्रश्नः । 'वास-रूपविधिनेति' । ननु प्रैषादिषु कृत्यविधानात् स्त्र्यधिकारात्परेण वासरूप-विधिर्नास्तीति ज्ञापितं तत्राह । 'उक्तमिति' । अनित्यत्वमेव तत्र ज्ञापितं न सर्वथाभाव इत्यर्थः, पर्यायोपादानं पर्यायान्तरनिवृत्त्यर्थम्, अन्ये त्वाहुर-

Digitized by Google

वसरो भोक्तुमित्यादावपि तुमुन् दृश्यते उपयोः शेतेरित्यत्र राजानमुपशयितुं पर्याय इति प्रयुक्तो वृत्तिकारेण तस्मादर्थग्रहणार्थं पर्यायोपादानं यथा निमित्तकारणहेतुष्वित्यत्रेति ॥

"लिङ् यदि" ॥ 'तुमुनोपवाद इति'। कर्तृकर्मणोः सावकाशोपि लिङ् प्रतिपदविधेर्बलीयस्त्वात्परत्वाच्च भावे तुमुनो बाधक इत्यर्थः ॥

"अर्हे कृत्यतृचश्च" ॥ 'अर्हतीत्यर्ह इति'। पचाद्यच्। 'तद्योग्य इति'। तच्छब्देन धात्वर्थः परामृश्यते। 'अर्हे कर्त्तरि गम्यमानइति'। क्वचिद्वाच्ये क्वचिद्गम्यमान इत्युभयथानुग्रहाय गम्यमान इत्युक्तं क्वचिद्वाच्ये गम्यमाने वेति पाठस्तत्र यथा सम्भवमित्यन्वयस्तत्र तृच् अजर्यकुण्यादिषु कृत्याश्च वाच्यत्वे भवन्ति लिङ् भव्यगेयादिषु कृत्याश्चोभयत्र भवन्ति, अथ कस्मात्कृत्यतृचाविति सूत्रे कृत्यभेदविवक्षया बहुवचनमिह तु सामान्यविवक्षया द्विवचनं, क्वचित्तु वृत्तावपि बहुचनमेव पठ्यते। 'तेन बाधा मा भूदिति'। वासरूपविधिश्च नावश्यं भवतीत्यनन्तरमेवोक्तम् ॥

"आवश्यकाधमर्ण्ययोर्णिनिः" ॥ 'अवश्यं भाव आवश्यकमिति'। मनोज्ञादित्वाद् वुञ्, अव्ययानां भमात्रे टिलोपः। 'उपाधिरिति'। प्रत्ययार्थविशेषणमित्यर्थः। 'नोपपदमिति'। शीतोष्णाभ्यां कारिणि सेनान्तलक्षणकारिभ्यश्चेति निर्द्देशात् उपपदत्वे हि केवलाण्णिनिर्न स्यात् तत्साहचर्यादाधमर्ण्यमप्युपाधिरेव नोपपदम्। 'शतं दायीति'। अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधाद् द्वितीयैव भवति ॥

"कृत्याश्च" ॥ 'भव्यगेयादयः कर्तृवाचकाः कृत्या इति'। भव्यगेयादिष्वन्वयत्वेन स्थिताः कृत्या इत्यर्थः, आदिशब्देन न भव्यगेयादि सूत्रनिर्द्दिष्टानामेव ग्रहणं किं तर्ह्यजर्यरुच्यकुप्यकृष्टपच्याव्यथ्यादीनामपि ग्रहणं, योगविभाग उत्तरार्थः ॥

"शकि लिङ् च" ॥ 'प्रकृत्यर्थविशेषणमिति'। नोपपदं तव्यजय्यौ शक्यार्थेइति लिङ्गात्, उपपदत्वे हि केवलौ क्षय्यजय्यौ शक्यार्थे न सम्भवतः भवान्खलु शक्त इति वाक्यशेषः सर्वत्र योज्यः। 'लिङा बाधा मा भूदिति'। स्त्रियाः परेण वासरूपविधेरनित्यत्वाल्लिङा बाधा शङ्का, परा-

जेरसोढ इत्यत्रासोढो योर्थः सोढुं न शक्यतइति शक्यार्थे क्तप्रत्ययो व्याख्यातः स कृत्यल्युटो बहुलमिति वा वासरूपविधिना वा समर्थनीयः ॥

"आशिषि लिङ्लोटौ"॥ आशीर्विशिष्ट इत्याशास्यमान इत्यर्थः। विध्यादिसूत्र एवाशीर्ग्रहणं न कृतं स्मे लोडित्यादिविषयेपि परत्वादेष विधिर्यथा स्यादिति अवश्यं चोत्तरार्थमिहाशीर्ग्रहणं कर्त्तव्यम् ॥

"क्तिच्क्तौ च सञ्ज्ञायाम्" ॥ 'तन्तिरिति'। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः प्राप्नोति अनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वं च तदुभयमपि न भवति न क्तिचि दीर्घश्चेति प्रतिषेधात्। 'सातिरिति'। सनः क्तिचि लोपश्चास्यान्यतरस्यामित्यात्वं, क्तिचश्चकारश्चिन्त्यप्रयोजनो न क्तिचि दीर्घश्चेत्यत्र एकानुबन्धकपरिभाषया क्तिनो निवृत्तेः सिद्धत्वात् ॥

"स्मोत्तरे लङ् च" ॥ अत्रोत्तरशब्द आधिक्यवचनो न द्विवचनस्तेन पूर्वभूतेपि स्मशब्दे भवति तद्दर्शितम्। 'स्मशब्दसहित इति'॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयस्याध्यायस्य तृतीयः पादः ॥

"धातुसम्बन्धे प्रत्ययाः" ॥ प्रयोगे स्वार्थाभिधानव्यग्रयोर्धात्वोः परस्परेण सम्बन्धाभावादुपचरितवृत्तिरत्र धातुशब्द इत्याह । 'धात्वर्थे धातुशब्द इति'। 'धात्वर्थानां सम्बन्धो धातुसम्बन्ध इति'। सम्बन्धस्यानेकाधिष्ठानत्वात् वृत्तावपि संख्याविशेषोवगम्यत इति भावः। सकलविषयापेक्षया च बहुवचनम्, एकैकं विवक्षायां तु धात्वर्थयोः सम्बन्ध इति द्रष्टव्यं, यदि तु कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकं विशेषणमितिवद्धात्वोरेवार्थद्वारकः सम्बन्ध आश्रीयेत इह तु न स्यात् गोमानासीत् गोमान् भवितेति द्वयोर्हि प्रयुज्यमानयोः सम्बन्धो भवति न चात्र वर्तनकालेस्तिः प्रयुज्यते कीदृशः पुनरयं धातुसम्बन्ध इत्याह। 'विशेषणविशेष्यभाव इति'। तत्र तिङन्तवाच्योर्यो विशेष्यं तत्प्रधानत्वाद्वाक्यस्य

Digitized by Google

सुबन्तवाच्यस्तु विशेषणं कारकस्य क्रियां प्रति गुणभावात्। 'अयथाकालोक्ता अपीति'। यस्मिन्काले विहितास्ततोऽन्यत्रापि प्रयुक्ता इत्यर्थ, एतेन कालमात्रस्यात्र बाधो न तूपपदोपाधिप्रकृतिप्रत्ययार्थानामिति दर्शयति, एतच्च वर्त्तमानसामीप्यइत्यारभ्य प्रायेण कालान्यत्वप्रतिपादनाल्लभ्यते। 'अग्निष्टोमयाजीति भूतकाल इति'। भूतः कालो यस्येति बहुव्रीहिः, एतेन भविष्यत्काल इति व्याख्यातम्। 'तत्रेति'। तयोर्मध्ये भूतकालोऽग्निष्टोमयाजीत्येवशब्दो भविष्यत्कालेन जनितेत्यनेन सम्बद्ध्यमानः साधुर्भवति अयमपि भविष्यत्कालः सन्साधुर्भवतीत्यर्थः, अथ वा भविष्यत्कालेन स्वयमपि भविष्यत्कालेनाभिसम्बद्ध्यमानः स्वकालपरित्यागेन भविष्यत्कालः सन्नित्यर्थः, अयं ह्यत्रार्थः पुत्रोऽस्य जनिता स चाग्निष्टोमेन यष्टेति तत्र यदि भूतकाल एव णिनिरवतिष्ठेत तदा यागस्य भविष्यत्तावगमो न प्राप्नोतीत्ययमारम्भः, एवमितरयोरप्युदाहरणयोर्द्रष्टव्यम्, अथ विपर्ययः कस्मान्न भवति भविष्यत्कालो भूतकालेनाभिसम्बद्ध्यमानः स्वकालपरित्यागेन भूते साधुर्भवति ततश्चाग्निष्टोमयाज्यस्य पुत्रो जात इत्ययं वाक्यार्थ इति तत्राह। 'विशेषणं गुणत्वादिति'। प्रधानानुवर्त्ती गुणो न गुणानुवर्त्ति प्रधानमुभयोश्च स्वकालनिष्ठयोः सम्बन्धानुपपत्तिरिति प्रधानानुरोधेन गुणस्य कालपरित्याग इत्यर्थः। 'प्रत्ययाधिकार इति'। यद्यपि प्रकृतः प्रत्ययशब्दः स्वरूपपदार्थकस्तथापीह सञ्ज्ञिनामनिर्द्देशात्सञ्ज्ञिपदार्थको विज्ञास्यत इति भावः। 'अधात्वधिकारविहिता अपीति'। अन्यथा प्रकृतानां धातुप्रत्ययानामेव ग्रहणं स्यात् प्रत्ययग्रहणात्तु सर्वपरिग्रहार्थात्तद्धितानामपि कालान्तरेऽपि साधुत्वं भवति। 'गोमानासीत् गोमान्भवितेति'। तदस्यास्त्यस्मिन्निति मतुप्प्रत्ययो वर्त्तमानसत्ताविशिष्टेन प्रकृत्यर्थेन विशिष्टेऽर्थे विहितः धातुसम्बन्धे तु प्रकृत्यर्थस्य भूतभविष्यत्त्वेऽपि साधुर्भवति ततश्चायमत्रार्थः गावोऽस्यासन् गोमानासीत् गावोऽस्यभवितारो गोमान् भवितेति। धात्वधिकारादेव धातुग्रहणे सिद्धे पुनर्धातुग्रहणं धातुविशेषपरिग्रहार्थं तेनास्तिभूजनिसम्बन्धे तद्विशेषणानामेव कालान्यत्वेन साधुत्वं भवतीति केचित्, न चायं पक्षो भाष्ये सिद्धान्तत्वेन

अथ षोडशाध्याये तृतीयः पादः ।

सू० इमे वयम् ॥ १ ॥

सुगाद्दापनमन्त्रे शाखाभेदेनेमे वयं स्मो वयमिति पाठौ द्वावपि विनिन्द्य वेत्तु प्रावित्रमित्येव ब्रूयादिति विहितं । तथा नमस्यामनमस्या नित्यंशोऽपि शाखाभेदेन प्रथमतो मध्यतोऽन्ततश्च पठितः तत्राद्यद्वयं विनिद्यान्तत एव ब्रूयादिति विहितं । तत्र निन्दाया विहितस्तुत्यर्थत्वेन विकल्पे प्राप्ते निन्दितस्य गिरापदवत्कर्मान्तरे सावकाशत्वाद्यथाविधान-मेवानुष्ठानम् । आपादितयोराम्नातयोर्विकृतौ विकल्पार्थत्वमिति भाष्ये विकृतिशब्दो ब्रह्मयज्ञादिपरो नेयः ॥

सू० वषडित्येके ॥ २ ॥

वौषडिति वषट् करोतीति सामान्येन विधाय वषडित्येके वौत्ता-डित्येके षडित्येके वात्तडित्येक इति कल्पान्तराणि विधाय वषडिति ब्राह्मणस्य वषट् कुर्याद्वौषडिति राजन्यस्य वौत्ताडिति वैश्यस्य षडिति शूद्रस्येति निमित्तसंयोगेनाप्याम्नातम् । अत्र पञ्चानां तुल्यवद्विकल्पः ब्राह्म-णस्येत्यादयो ऽवयुत्यानुवादा इति वृत्तिकृतां पक्षे प्राप्ते भाष्यकार आह । ब्राह्मणादिवाक्यानां वैयर्थ्यस्यायुक्तत्वाद्बृहस्पतिसव-राजसूय-वैश्यस्तो-मेषु क्रमेण त एव शब्दा नियताः नैमित्तिकैरन्येषां बाधात् । नित्यस्या-वशिष्टानां वषट्काराणां चान्यत्र तुल्यवदेव विकल्प इति । वस्तुतस्तु एतत्पक्षेऽपि ब्राह्मणादिशब्दानान्तत्तन्मात्राधिकारिककर्मविशेषे लक्षणाप-त्तेस्तत्कर्तृककर्मसामान्यसम्बन्धस्यैव सप्तदश वैश्यस्येत्यादाविव प्रतीतस्य बाधापत्तिः । अतो नैमित्तिकविधिभिः सामान्यतो विहितानामुपसंहारः । अनुपसंहृतानां तु पक्षाणां सर्वकर्मसु सर्वेषां विकल्पः । शूद्रशब्दस्तु त्रैव-र्णिकातिरिक्ते लाक्षणिकः सविषादादिपरस्तान्त्रिककर्माभिप्रायो वा ॥

Digitized by Google

सू० सन्ततम् ॥ ३ ॥

याज्यया यजति वषट्कारेण प्रदीयत इति विधिभ्यामुभयोः प्रदानार्थत्वावगतेरेकार्थत्वादृग्जुषाणाधिकरणन्यायाद्विकल्पः ततश्च सन्ततमृचा वषट्कृत्यमिति विधावनवानसन्तानयोर्विधानायोगादेकश्रुतिरूपः स्वरविशेष एव सान्तत्यं । यज्ञकर्मण्यजपन्यूङ्खसामस्विति स्मृतेः । एकश्रुतित्वं च तदन्तर्गताक्षराणामेकजातीयस्वरकत्वं । तच्च यथा याज्यायां तथैव वषट्कारे इत्यर्थः । उच्चैर्वषट् करोतीति श्रुत्या "उच्चैस्तरां वा वषट्कार इति स्मृत्या च विहितयोर्वैकल्पिकस्वरयोस्तु नैकश्रुत्या सह विरोध इति प्राप्ते याज्यावषट्कारोभयोद्देशेन स्वरविधौ वाक्यभेदात्सन्तानस्यैवायं विधिः । न च विकल्पितयोः सन्तानासम्भवः । एतद्बलादेव समुच्चयस्यापि लाभात् । कथमन्यथा याज्याया अधिवषट्करोतीति याज्यावषट्कारयोः क्रमविधानं सङ्गच्छेत । एकश्रुतिस्तु समानवदृचा वषट्करोतीति वचनान्तरात्सेत्स्यति ॥

सू० अवगूर्य ॥ ४ ॥

आगूः शब्दस्येवावगूर्येत्यस्यापि येयजामहवाचित्वादवगूर्य वषट्करोतीति वचनेन तदानन्तर्यस्य वषट्कारे कण्ठरवेण विधानाद्याज्यावषट्कारसमुच्चयपक्षस्य च ज्ञापकसिद्धत्वेन निरपेक्षप्रदानार्थत्वबोध्यविकल्पाद्दुर्बलतया चासार्वत्रिकताया एव वक्तव्यतया यदा समुच्चयस्तदा याज्योर्ध्वं वषट्कारः यदा केवलो वषट्कारस्तदा ये यजामहव्यवहितोत्तरमेव प्रयोक्तव्य इति प्राप्ते किञ्चिद्व्यवधानेऽपि भुक्त्वा गत इत्यादौ लोके पुरोऽनुवाक्यामनूच्य याज्यया जुहोतीति वेदेऽपि क्त्वाप्रत्ययप्रयोगात्समुच्चयविकल्पयोर्विकल्पकल्पनस्यात्यन्तजघन्यत्वादुत्तरकालतायामेवावगूर्येति ल्यप् । वस्तुतस्तु आधानावधानयोरानयनावनयनयोराहारावहारयोरुपसर्गभेदेनार्थभेदस्य बहुशो दर्शनादवगोरणस्य बधाध्यवसायपरत्वेनान्यत्र प्रयोगादिह तदसम्भवेऽपि लक्षणयोच्चैरुच्चारणाध्यवसानमेवार्थः ॥

Digitized by Google

सू० यं कामयेत ॥ ५ ॥

वषट्कारमेव प्रकृत्याम्नायते। यं कामयेत प्रमायुकः स्यादिति नीचैस्तरां तस्य याज्याया वषट् कुर्यादित्यस्यान्ते उच्चैः क्रोश्चमिव वषट् कुर्यात्स्वर्गकामस्येति श्रुतौ द्वावपि काम्यविधी कुर्यादिति लिङ्श्रुतेरविशेषात्। दीर्घरोगसन्तप्तस्य प्रत्याख्यातभिषक्क्रियस्य मरणकामनाया अपि सम्भवात्। अन्यथा तादृशस्यात्महननविधेः स्मृतिषु वैयर्थ्यापत्तेः। सर्वस्वारादिश्रौतकर्मस्वपि मरणकामाधिकारिकतादर्शनात्। पुरुषाभिप्रायाणां विचित्रत्वात्। वस्तुतस्तु यः प्रमायुकः स्यामित्यानुत्त्या होतृगत एवैष कामः प्रतीयते। स च द्वेष्ये यजमाने सम्भवत्येव। अत एव ऋत्विगाचार्यौ नातिचरितव्याविति स्मृतिरपि दृष्टार्था सती युज्यते। न चादधीतेत्युपग्रहविशेषविरोधः। यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स इति श्रुत्येव क्वचिदपवादस्यापि सम्भवात्। अत एव प्रउगशस्त्रे सप्तदेवताः शंसतीति सप्तानां तृचानां शंसनं होतुर्विधाय स यजमानस्य पापभद्रमाद्रियेतेति ह स्माह योऽस्य होता स्यादित्यत्रैवैनं यथा कामयेत तथा कुर्यादित्युपक्रम्य यं कामयेत प्राणेनैनं व्यर्धयानीति वायव्यमस्य लुब्धं शंसेदृचं वा पदं वातीयादित्यादिना तृचभेदेन तत्तद्गतपदादिलोपेन यजमानस्य प्राणादिसप्तकव्यृद्धिर्होतृकाम्यमानाप्रतिपादितोपपद्यते। तस्मात्प्रधानफलमङ्गफलं वा यजमान तदितरसाधारणं यथावचनं स्वीकार्यं। प्रकृते च होतृपदाश्रवणेऽप्यैतरेयब्राह्मणे प्रउगसजातीयस्यैव वाक्यस्य श्रवणाद्धोतुरेवायं काम्यो विधिरिति प्राप्ते ऽनवधिकदुःखरूपस्य मरणस्य सर्वथाऽनिष्टत्वेन तदधिकृतदेकजन्यफलान्तराभावेन तस्य नान्तरीयकत्वाभावाच्च सर्वस्वारमरणादौ साधनान्तरकथनाच्चाविचिकित्स्यरोगवतां मरणविधेरभ्यनुज्ञामात्रत्वाच्च न यजमानस्य कामः सम्भवतीति स्वर्गकामविधेरयमर्थवाद एव। जर्त्तिलवाक्यादाविव विधिप्रत्ययस्याविधायकत्वात्। विषं भुंक्ष्व मा चास्य सद्मनि भुङ्क्था इति लौकिकवाक्येऽपि पूर्वविधेरुत्तरविध्युपपादकतयैकवाक्यतादर्शनात्। नापि होतुः कामः अनन्यथासिद्धापवादादर्शनात्। प्रउगशस्त्रेऽपि यमु कामयेत

सर्वैरेनमङ्गैः सर्वेणात्मना समर्धयानीत्येतदेवास्य यथापूर्वमृजुकॢप्तं शंसेदिति विधेरर्थवादत्वेनैव सप्तवाक्यानामुपपत्तेः ॥

सू० यस्यै ॥ ६ ॥

यस्यै देवतायै वषट्कुर्यात्तां ध्यायेदिति विहितं देवताध्यानमविहितकालनियमेन यदा कदाचन कुर्यादिति प्राप्ते जातमञ्जलिना गृह्णाति जातमभिप्राणितीत्यादौ जननाव्यवहितोत्तरकालस्य सामर्थ्येनापि नियमनदर्शनाद्देवतार्चनविधौ ध्यानस्य प्राथमिकदर्शनाद्वषट्कारात्पूर्वमेव देवताध्यानं । वस्तुतो यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्साक्षादेव तद्देवतां प्रीणातीति वचनान्तरेणैव कालनियमः ॥

सू० एवं वा ॥ ७ ॥

कान्तां ध्यायन्नास्त इत्यादौ तद्रूपध्यानस्यैव प्रकृतेऽपि देवतारूपध्यानविधिः । अर्थवादेषु देवतारूपाम्नानात् । विध्यपेक्षितघृतादिनियमांशे तस्य प्रामाण्याच्च । देवतायाः फलदातृत्वं स्वरूपेण कर्माङ्गत्वं च धर्माणां तत्प्रयुक्तता चेत्येतन्नितयनिरासेनैव सामञ्जस्ये विग्रहनिरासस्य देवताधिकरणार्थत्वाभावात् । तथात्वे तिर्यगधिकरणे तेषामनधिकारसाधनमनर्थकं स्यात् । असदेव वा रूपमीदृशविध्यपेक्षितार्थनियमनार्थतयोपदिश्यत इत्यपि सुवचं । न च शब्दद्वारेणैव देवतायाः कर्माङ्गतया शब्दस्यैव मानसमुपनीतभानमङ्गत्वेन विधीयत इति वाच्यं । यद्धि मनसा ध्यायति तद्वाचा वदतीति व्याप्त्या याज्यानुवाक्यान्तर्गतदेवताशब्दोच्चारणतः पूर्वं नियमतस्तत्सत्त्वेन तस्याविधेयत्वादिति प्राप्ते सर्वत्रापि प्रथमोपस्थिते शब्दे कार्यस्यासम्भवादेव हि तदर्थपर्यन्तानुधावनं । नच प्रकृते तदसम्भवः । सङ्कल्पपूर्वकशब्दध्यानविशेषस्येह विधेयत्वात् । याज्योच्चारणपूर्वनियतशब्दध्यानस्य होतुः सत्त्वेऽपि हविर्ग्रहणाव्यवहितोत्तरकालं यजमानस्यैतद्विधिसार्थक्यात् । तस्माद्देवतारूपः शब्द एव ध्यातव्यः ॥

सू० वषट्कृत्य ॥ ८ ॥

क्वचिच्छाखायां वषट्कृत्यापान्यान्निमिषदपानेनैव प्राणं दधाति निमेषेण चक्षुरिति श्रुतं वषट्कृत्य प्राण्यादथापान्यादथ निमिषेदिति तु शाखान्तरे । तत्र शाखाभेदेन केषांचिद्विधिद्वयं केषां चिद्विधित्रयमेतद्विति प्राप्ते ऽपाननार्थवादस्यापाननविध्युत्तरमेव युक्तेऽपि पाठेऽपानननिमेषविध्योरुत्तरमर्थवादद्वयश्रवणेन वषट्कृत्येत्यस्य निमेषविधावप्यनुषङ्गप्रतीतेरपाननिमिषयोर्वषट्काराव्यवहितोत्तरकाल एव प्राप्तौ शाखान्तरे वषट्कारोत्तरं प्राणनस्यैकस्यैव विधिः इतरयोः क्रमार्थमनुवादः ॥

सू० न व्यपवदेत् ॥ ९ ॥

याज्यां चानुवाक्यां चान्तरा न व्यपवदेद्यद्व्यपवदेद्यज्ञं विच्छिन्द्यात्पूरोऽनूच्यं यज्ञस्य सन्तत्या इति श्रुतौ पुरोऽनुवाक्यातः पूर्वं वाग्व्यवहारो यज्ञसन्ततिफलको नियम्यत इति प्राप्त उत्तरकाले वाग्यमनस्य विहितत्वात्तत्प्रागभावस्य तत्स्थैर्यार्थोऽयं वादः ॥

सू० सहोत्तमेन ॥ १० ॥

स्वाहा देवा आज्यपा जुषाणा इत्युत्तमप्रयाजयाज्यायां श्रुतं यद्यपि देवां आज्यपां आवहेत्यावहनमन्त्रैः प्रयाजानुयाजदेवता मिलित्वा कीर्त्तिताः । यद्देवां आज्यपां आवाहयति प्रयाजानुयाजांस्तदावाहयतीति श्रुतेः । तथाऽपि तं स्वाहाकारेण प्रयाजेषु समस्यापर्यचिति श्रुत्या यज्ञसमाप्तेरिव कीर्त्तनाद्यदनिष्टाभ्योदेवताभ्यः स्वाहा करोतीति श्रुत्यन्तराच्च प्रयाजानामिष्टत्वेनानिष्टानामनूयाजदेवतानामेवेदं कीर्त्तनं । तेनातिथ्यायामस्यांशस्य लोपः । अपवर्हिषोर्द्विवचनान्तोहश्च । अस्तु वाऽनिष्टत्वाविशेषेणोत्तमप्रयाजदेवतायाअष्टाभिधानमित्यातिथ्यायामेकवचनान्त ऊहएवेति प्राप्ते उत्तमप्रयाजस्याग्न्येकदेवताकत्वेन यदनिष्टाभ्य इत्यर्थवादस्याज्यभागादिदेवतापरत्वेनाप्युपपत्तेर्मान्त्रवर्णिकदेवताकीर्त्तनस्य स्म-

रणरूपसंस्काराधायकत्वेन तस्य चेष्टानिष्टसाधारण्येनाविस्मरणफलकत्वेनावाहनमन्त्रवैलक्षण्यायोगेन प्रयाजानूयाजदेवतानां सर्वासामभिधानम् ॥

सू० जुषाणः ॥ ११ ॥

आज्यभागयोर्जुषाणो अग्न आज्यस्य वेतु । जुषाणः सोम आज्यस्य हविषो वेत्विति निगदरूपौ याज्यमन्त्रौ श्रुतौ । रूपावेकेषां जुषाण याज्यौ भवतः ऋग्याज्यौ भवतः सहविषौ भवतोऽहविषौ भवत इति च विधयः । तत्र ऋग्जुषाणयोर्विलक्षणार्थप्रतिपादकत्वेन कार्यभेदात्समुच्चयः । सहविष्काहविष्कयोस्तु पदमात्रसदसद्भावकृतभेदेऽपि प्रतिपाद्याभेदादुत्तमप्रयाजयाज्यायां हविःपदस्येव विकल्पः कार्यैक्यादिति प्राप्तेऽर्थप्रतिपादनरूपद्वारभेदेऽपि मुख्यविशेष्यभूतप्रदानप्रकाशनरूपकार्यैकत्वादृग्जुषाणनिगदयोर्विकल्पः । याज्यावषट्कारयोस्तथात्वेऽपि वाचनिकः समुच्चय इत्युक्तं । हविःपदविषये त्वहविःसहविःपदयोः समिद्घृतन्यायेनोक्तयोरेव निगदयोः प्रयोगसम्भवादनुवादमात्रम् । उत्तमप्रयाजे तु शाखान्तरीयं हविःपदरहितं निगदांशमनूद्याग्नआज्यस्य व्यन्त्विति हैक आहुर्न तथा कुर्यादिति निषिध्य विनिन्द्य तस्मात्स्वाहादेवा आज्यपा जुषाणा अग्न आज्यस्य हविषो व्यन्त्वित्येव ब्रूयादिति निगमनादुदितानुदितहोमवद्विकल्पः । प्रकृते तु हविष इत्युत्तरमाहेति वचनान्तरेण व्यवस्थापनाच्च सहविषावहविषा इत्यनयोर्विधित्वम् ॥

सू० गायत्री ॥ १२ ॥

दर्शपूर्णमासप्रकरणे गायत्रीपुरोऽनुवाक्या भवति त्रिष्टुब्याज्या त्रिपदापुरोऽनुवाक्या भवति चतुष्पादा याज्या । पुरस्ताल्लक्ष्मापुरोऽनुवाक्या भवत्युपरिष्टाल्लक्ष्मा याज्या । मूर्धन्वती पुरोऽनुवाक्या भवति नियुत्वतीयाज्येत्येवं जातीयकानि बहूनि वाक्यानि श्रूयन्ते । अग्निर्मूर्धेत्येषर्क् त्रिपदा गायत्री । प्रथमपादएव देवतापदवती मूर्धपदवती च । भुवोयज्ञस्येति तु चतुष्पदा त्रिष्टुप् उत्तरार्धदेवतापदवती नियुत्पदवती च । एवमन्या अप्यृचो य-

Digitized by Google

थासम्भवं वर्त्तन्ते । तेनैनयोरेव क्रमप्रकरणाभ्यां प्राप्ताङ्गताकयोर्ऋचोः स्ता- वकानि नित्यानुवादरूपाणि वाक्यानीमानीति प्राप्ते क्रमादिना तत्तद्भ- क्तित्वस्याङ्गतावच्छेदकत्वेन बोधितस्य बाधेन गायत्रीत्वादिधर्माणामङ्- ङ्गतावच्छेदकत्वबोधनेन सार्थक्यसम्भवेन केवलं नित्यानुवादः । तेन भा- वनासंस्पर्शेन विवक्षिततयाऽर्थिकत्वाभावेन चोदकतस्तेषामप्यतिदेशे यस्यां विकृतावेतद्विरुद्धा ऋच आम्नातास्तत्रोपदेशेनैवातिदेशबाधः । यास्त्वना- म्नातयाज्यानुवाक्याका विकृतयस्तत्र सति सम्भवे आनीयमाना ऋचश्चो- दकातिदिष्टधर्मका एवानेया इति सिध्यति, तेन धर्माणां विकृतौ सम्भ- वत्समुच्चयो यथायथं बोध्यः ॥

सू० गायत्र्यौ ॥ १३ ॥

दर्शपूर्णमासयोरेव गायत्र्यौ संयाज्ये ब्रह्मवर्चसकामस्य त्रिष्टुभौ वी- र्यकामस्येत्यादि श्रुतं । पिप्रीहि देवानग्ने यदद्येत्यनयोस्त्रिष्टुभोर्नित्यव- दाम्नातत्वेन केवलकाम्यप्राये तयोर्विशिष्य पाठाभावेन च तादृशावृचा- वन्ये वीर्यकामस्यागमयितव्ये इति प्राप्ते त्रिष्टुप्छब्देनापि द्रव्यवचनेन सन्निहितयोर्ऋचोः परामर्शसम्भवात्संयोगपृथक्त्वेनोभयार्थता ॥

सू० अनुष्टुभौ अयाट् ॥ १४ ॥

स्विष्टकृन्निगदे अयाड्देवानामाज्यपानां प्रियाधामानीत्यंशेन प्रयाजदेवता एवाभिधीयन्ते तासामेवेष्टत्वात् । यदनिष्टाभ्य इत्यस्या- र्थवादत्वेनाविवक्षितार्थत्वेऽपि मन्त्रस्य तथात्वायोगात् । अयाडिति भूतार्थकलकारश्रवणाद्वाक्यगम्यार्थस्य लिङ्गेन बाधादिति प्राप्ते सर्वकालेष्व- पि "छन्दसि लुङ्लङ्लिट" इति विधानदर्शनादिष्टानामनिष्टानामपि स्म- रणसंस्कार्यत्वस्याविशेषात्प्रयाजानूयाजदेवतानामुभयासामभिधानम् । अत एव यदयाड्देवानामाज्यपानामिति तत्प्रयाजानूयाजानामिति शाखान्त- रीयं वचनं न्यायसिद्धानुवादकमुपपद्यते । तस्मादप्रयाज उदयनीयेऽपि न तल्लोपः ॥

सू० अनवानम् ॥ १५ ॥

अनुयाजान्प्रकृत्यानवानं यजतीति श्रुतं । शाखान्तरे चोत्तमेनावान्यादिति श्रूयते । तत्रानुयाजत्रयसामान्येन प्राप्तस्यानवानस्योत्तम उपसंहार इति प्राप्ते उत्तम इति वाक्यस्यानुवादकत्वेन विशेषविधित्वाभावान्नोपसंहारकत्वं । सूत्रेऽप्यनुवादपदमनुवर्त्तयितव्यमिति भाष्यकारः । वर्हिर्नराशंसयाज्ययोरल्पाक्षरत्वेन तावन्मध्येऽवानस्य कादाचित्कत्वेन प्राप्तावनवानोच्चारणं नियम्यते । स्विष्टकृदनुयाजयाज्यायास्त्वतिदीर्घत्वान्मध्येऽवाननं नित्यमेव प्रसक्तमतस्तस्य प्रतिषेधः । तेनानयोर्भिन्नविषयत्वाद्विधिप्रतिषेधरूपत्वाच्च नैकेनान्यस्योपसंहारः । एवं सत्यपि प्राणाभ्यासशालिनो दीर्घयाज्यायामपि कदाचिदवाननस्याप्राप्तिरप्यस्तीत्येतावन्मात्रेण पाक्षिकीं प्राप्तिमादाय परिधौ पशुन्नियुञ्जीतेति विधेरिव नियमविधित्वं तृतीयानूयाजांशेऽपि सम्भवन्न निरस्तुं शक्यम् । अतएव सकृदवान्यादेवमप्यनवानमिति न्यायसिद्धस्यैव गौणानवानस्य कण्ठतोऽनुवादेनानवानं यजतीति विधिगतानवानपदं गौणमुख्यसाधारण्येन व्याचक्षाणा श्रुतिरनूयाजत्रयविषयकत्वं विधेरनुमन्यते । अतस्तेनैव सिद्धौ प्रतिषेधोऽनुवादत्वान्नोपसंहारक्षम इत्याशयः ॥

सू० उपांशु ॥ १६ ॥

पत्नीसंयाजेषूपांशुयाजे चोपांशु यजतीति विहितमुपांशु यजतीति विहितमुपांशुत्वं साक्षाद्यागेऽसम्भवात्तदङ्गमन्त्रेष्वविशेषात्सर्वेषु निविशत इति प्राप्ते प्रैषार्थादिप्रतिपत्त्यर्थत्वेनाश्रुतप्रत्याश्रुतप्रणववषट्कारादिभिन्नमन्त्रेष्वेव वस्तुसामर्थ्यादुपांशुत्वम् ॥

सू० आज्येडा ॥ १७ ॥

औषधेडाया इव आज्येडाया अपि प्रकरणे पाठात्प्राकरणिकसर्वयागानामाज्यसापेक्षत्वेन तत्संस्कारकत्वात्तद्द्वारेयं सर्वेषामङ्गमिति प्राप्ते येनाज्येन पत्नीसंयाजा इष्टास्तच्छेषेणैवाज्येडायाः कथनात्तस्यैवाज्यसंस्कारद्वारा पत्नी-

संयाजमात्राङ्गम् । एवमैाषधेडाप्याग्नेयादीनामेव । तेन शंय्विडान्तेषु नाज्येडा ॥

सू० पराचीम् ॥ १८ ॥

इडामेव प्रकृत्य यंकामयेतापशुः स्यादिति पराचीं तस्येडामुपह्वयते। यं कामयेत पशुमान्स्यादिति प्रतीचीं तस्येडामुपह्वयत इति श्रुतैा प्रत्यक्छब्देन प्रत्यङ्मुखता कर्त्तुरुच्यते। एवं पराक्छब्दोऽपि समुखं प्रत्युपह्वयत इति वचनान्तरादिति प्राप्तेऽभ्यासानभ्यासवचनावेतैा शब्दैा । पराचीः सामिधेनीरन्वाह पराग्बहिष्पवमानेन स्तुवत इति प्रयोगात् । यदिडोपहूतेति तत्पराची यदुपहूतेडेति तत्प्रतीचीत्याम्नानाच्च । अभ्यासस्तु इडोपहूतोपहूतेत्येक इत्यादिनाऽनेकविधो यः प्रतीयते तस्यायं प्रतिषेधः । मुखं प्रतीति तु मुखसंमितामवस्थापयेदित्यर्थकम् । इष्टकानां तु मुखासम्भवादशब्दत्वाच्च कर्त्तुर्मुखवाद एवाश्रितः ॥

सू० चतुः ॥ १९ ॥

चतुरुपह्वयत इति विधिनेडानिगदः सर्वोऽपि चतुर्वारमावर्त्तनीयः। चतुरनुवाकः पठ्यतामित्यादैा तथा दर्शनादिति प्राप्ते इडोपहूतेति पदे एव प्रकृत्यास्यपाठात्पदविषयिण्येवावृत्तिः समिद्घृतन्यायेनायम्पदवादः ॥

सू० यद् ब्रूयात् ॥ २० ॥

सूक्तवाकनिगदे यद् ब्रूयात्सूपावसाना च स्वध्यवसानाचेति प्रमायुको यजमानः स्यादिति विनिन्द्य सूपचरणाच स्वधिचरणा चेत्येव ब्रूयादित्येवमादयो विधयः श्रूयन्ते । तेषु श्रुतस्यापि गिरापदस्य निषेधेनेरापदविधिना गिरापदघटितमन्त्रस्यान्यत्र विनियोगकल्पनवदश्रुतस्य पदस्य निषेधेन श्रुतदृढीकरणेऽपि निषेधानुमितस्याश्रुतपदप्रयोगस्य विकृतैा निवेश इति प्राप्ते शाखान्तरे सूपचरणा चेति पाठं विनिन्द्य सूपावसानाचेत्यस्यैव विधिदर्शनादुभयोरपि प्रकृतैा विकल्पेन निवेशः ॥

Digitized by Google

सू० यन्न निर्दिशेत् ॥ २१ ॥

आशास्तेयं यजमानोऽसाविति यजमाननामनिर्देशस्य विधिनिषेधाभ्यां षोडाशप्रकृत्य यन्न निर्दिशेत् प्रतिवेशं यज्ञस्याशीर्गच्छेत् यजमानोऽसाविति निर्दिश्यैवैनं सुवर्गं लोकं गमयतीति श्रुतौ नामनिर्देशस्य विधिनिषेधाभ्यां षोडशिन इव विकल्पे प्राप्ते यन्न निर्दिशेदित्ययं नित्यानुवादः। अनिर्देशस्यैवोत्तरत्र निन्दितत्वात्। अनिर्देशस्य प्रापकान्तराभावात्। अतो नित्यं निर्देशः ॥

सू० नाम ॥ २२ ॥

नामानि गृह्णीयात्। नाम गृह्णीयादिति च श्रुतं। यजमानस्यामुकत्वेन ज्ञापनार्थत्वाद्बहुनामशालिनोऽपि यत्किञ्चिदेकं नाम ग्राह्यमतो विधौ बहुत्वमविवक्षितसमिति प्राप्ते द्व्यक्षरचतुरक्षरनामानि कुर्यादिति विधाय सोमयाजितृतीयं नाम कुर्वीतेति विधिना बहुनामविधेः सोमयाजिपरत्वेनोपसंहारादितरेषां द्वे एव नामनी इति स्थितिः। एतेषां च विधीनां वैयर्थ्यापत्तेर्नामानि गृह्णातीत्येक एव विवक्षितसङ्ख्याविधिः। एकवचनघटितस्त्वश्रुत्याऽनुवादः। एतद्वशादेवासोमयाजिनामपि यज्ञकाम इति तृतीयं नामेति केचित्। नामानीत्यस्यैकत्वातिरिक्तसङ्ख्यापरत्वेन सुव्याख्यत्वाच्च यज्ञकामपदे प्रमाणमिति भाष्याशयः ॥

इति संकर्षे भाट्टदीपिकायां षोडशस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

हौत्रकाध्याये नाम्ना वषट्कारपादोऽयम् ॥

—०—

अथ षोडशाध्याये चतुर्थः पादः ।

सू० एते वै ॥ १ ॥

पृथुपाजवत्यौ धाय्ये भवतः अनुपदा वाज्यभागावित्यादयोऽनारभ्यवादाः प्रकृतौ निर्विशेषत्विति प्राप्ते पञ्चदशसङ्ख्यात्तरसङ्ख्यादिविरोधाद्वार्त्रघ्नीवृधन्वत्यवरोधाच्च विकृतावुत्कृष्येरन् ॥

सू० कामेष्टिः ॥ २ ॥

अनुपदावाज्यभागाविति विकृतौ निर्विशिमानमपि काम्येष्टिष्वेव तदीयफलार्थत्वात् । अत एवादिदेशिकमन्त्रकाधोऽपि काम्येष्टिषु । वस्तुतोऽनुपदसञ्ज्ञकमन्त्राणामभावात्पदं स्वस्थानमनुगताविति व्युत्पत्त्या प्राकृतावेवेत्यर्थः । एवमुक्तिश्च पौर्णमास्यमावास्याविकृतिषु वार्त्रघ्नादिव्यवस्थासिध्यर्था । तस्याः सर्वस्या न्यायेनैव सिद्धत्वान्नित्यानुवादोऽयमितिप्राप्ते कौषीतके सर्वासु विकृतिषु सद्वन्तावाज्यभागाविति विधिभिरपोदितानां प्राकृतमन्त्राणां प्रतिप्रसवार्थोऽयं विधिः । तेन विकृतिषु सद्वन्तौ वा प्राकृतौ वेति विकल्पः ॥

सू० वामदेवस्य ॥ ३ ॥

सन्ति वामदेवेन दृष्टाः पञ्चदशर्चः । अगस्त्यस्य कयाशुभीयसंज्ञा अपि तावत्यः ताः प्रत्येकं प्रकृत्य सामिधेन्यः स्युर्याज्यानुवाक्याश्चेत्याम्नातं । तत्र चकारादुभयत्र सर्वासां विनियोगस्य स्पष्टत्वात्पञ्चदशानामृचां समुच्चयेन सामिधेनीत्वं । याज्यानुवाक्यार्थत्वेन चतसृणामेवापेक्षितत्वेऽप्यवशिष्टानां विकल्पेन विनियोग इति प्राप्ते क्वचित्सर्वोपदेशः क्वचिदेकदेशोपदेश इति विधिवैरूप्यस्यायुक्तत्वात्प्रथमोत्तमावृत्त्यैव सामिधेनीषु पञ्चदशत्वसिद्धेरेकादशर्चश्चतस्रश्चेत्येवं विभज्य विनियोगः ॥

Digitized by Google

सू० य इन्द्रिय ॥ ४ ॥

सर्वपृष्ठायां व्यत्यासमन्वाहेत्यादिना देवताभिर्व्यतिषजतीत्यन्तेन द्वयोर्द्वयोर्ऋचोरन्योन्यं व्यतिषङ्गं विधायेन्द्राय रथन्तरायानुब्रूहीति रथन्तरस्यर्चमनूच्य बृहत ऋचा यजेदिन्द्राय बार्हतायानुब्रूहीति बृहत ऋचमनूच्य रथन्तरस्यर्चा यजेदित्यादिना मध्ये विवृतं । तत्रैव न बृहत्या वषट् कुर्यादित्यपि प्रतिषिद्धं । तत्र बृहतीशब्दस्य द्रव्यवचनत्वेन त्रिष्टुप्सं याज्याधिकरणन्यायेन बृहद्रथन्तरयोरेवोपस्थितत्वेन तयोर्याज्यात्वप्रतिषेधाद्विकल्प इति प्राप्तेऽक्षरसङ्ख्यावच्छेदकधर्मविशेषस्य बृहतीपदवाच्यतया तस्यैव प्रदानकरणतावच्छेदकत्वप्रतिषेधोऽयमनुवाक्यान्तिमाक्षरचतुष्टयस्य याज्यायामध्यूहनविधेरर्थवादमात्रम् । अनुष्टुभं च ह वा एतां सम्पादयतीतिवत् । तथा चाभित्वाशूरेत्यारभ्येशानमित्यन्तमनुष्टुभमनूच्य इसुस्तुषस्त्वामिद्धि हवामह इति पङ्क्त्या यजेत् । एवं त्वामिद्धीत्यारभ्य त्वाङ्काष्ठेत्यन्तमनुष्टुभमनूच्य स्ववंतो भित्वाशूरनोनुम इति पङ्क्त्या यजेदित्यर्थः ॥

सू० द्वे याज्ये ॥ ५ ॥

महापितृयज्ञे तिस्र ऋचो याज्यानुवाक्यात्वेनाम्नाताः । तासु द्वयोर्ऋचोः समुच्चित्य याज्यात्वं । द्वे वै देवानां याज्यानुवाक्ये इति प्रकृत्य परे हि देवेभ्यः पितर इति श्रुत्या देवापेक्षयाधिक्यकथनात् । आधिक्यं च प्रदानमन्त्रांश एव । तद्देषा तृतीयैतया वै प्रददातीति श्रुत्या विवरणात् । अनुवाक्यायाज्यात्वेन क्रमप्राप्तयोर्द्वयोर्विनियोगे तृतीयाया अवशिष्टायाः संनिहितत्वेन याज्यायामेवोक्तलिङ्गेन समुच्चित्य विनियोगस्य न्याय्यत्वादिति प्राप्ते द्वे पुरोऽनुवाक्यात्वेनैव द्वे विनियोज्ये लिङ्गस्योभयसाधारणत्वात् । प्रथमया द्वितीयया गमयति प्रैवतृतीयया यच्छतीति स्पष्टमेव कौषीतके विनियोगाच्च ॥

सू० उभे ॥ ६ ॥

अग्नीषोमयोर्देवतात्ववदुभयोः पुरोऽनुवाक्यात्वस्य व्यासज्यवृत्तितयान्ते निधीयमानः प्रणवो द्वितीयर्चान्त एव स्यादिति प्राप्ते पुरोऽनुवाक्ये इति द्विवचनेन प्रत्येकपर्याप्तत्वावधारणात्प्रतिपुरोऽनुवाक्यं प्रणवो निधेयः । एतेन ऋचमुक्त्वा प्रणौत्यपरामुक्त्वा प्रणौतीति श्रुतिरुपपद्यते ॥

सू० गृहमेधीये ॥ ७ ॥

न सामिधेनीरन्वाहेति गृहमेधीये सामिधेनी निषेधादावाहनमपि न कार्यम् । कौषीतके आवाहनविधिभ्यः परतोऽथ यत्परस्तात्सामिधेनीनां जपति वज्रो वै सामिधेन्य इति सामिधेनीपरामर्शेन तदवान्तरप्रकरणे पाठेन तदङ्गत्वावगतेरिति प्राप्ते उभयोर्भिन्नकार्यार्थत्वेन गुणानां च परार्थत्वादिति न्यायेन परस्पराङ्गाङ्गिभावे मानाभावात्परस्ताज्जपविधेर्दूरस्थानुवादेनाप्युपपत्तावावान्तरप्रकरणाभावान्नावाहनबाधः ॥

सू० वाजिनाम् ॥ ८ ॥

वैश्वदेवे पर्वणि वाजिनेज्यादेवतानां वाजिनामप्यावाहनकाले स्विष्टकृदादिदेवतानामिवाहनं कर्त्तव्यमिति प्राप्ते परप्रयुक्तद्रव्योपजीवित्वाद्द्रव्यस्य चावाहनकाले जनिष्यमाणत्वेनानिश्चितत्वाद्विष्णोरुरुक्रमस्येव नावाहनम् । अत एव सर्वे वाजिनो नावाहयतीति लिङ्गम् ।

सू० कालपृथक्त्वात् ॥ ९ ॥

एतामिष्टिं निरवपदग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमिति विहितायां चक्षुष्कामेष्टावग्निं भ्राजस्वतमावहेत्यावाहनं तन्त्रेण स्यात् । सम्प्रतिपन्नदेवताकत्वेन प्रदानस्यापि तन्त्रेण सम्भवादिति प्राप्ते सौर्यपूर्वोत्तरत्वरूपकालभेदस्य विवक्षिततया तन्त्रेण प्रदाने तदन्यतरबाधापत्तेः । पार्थक्येनैव प्रदानादि । दधिपयसोस्तु सौविष्टकृताग्नेयपूर्वोत्तरत्वयोरबाधात्तन्त्रतोपपत्तिः ।

Digitized by Google

सू० विद्यते वान्यकालत्वाद्यथा याज्यासम्प्रैषो यथा याज्यासंप्रैषः ॥ १० ॥

पशावुत्तमप्रयाजस्य कालत उत्कर्षात्सक्तत्स्रुगादापनमन्त्रस्य घृतवतीमध्वर्यो स्रुचमास्यस्वेत्यादेः प्रयुक्तत्वेन तावतैवाध्वर्योः प्रैषार्थप्रतिपत्तेर्जातत्वाच्च पुनश्चरमप्रयाजकाले स्रुगादापननिगदः प्रयोज्य इति प्राप्ते प्रैषजनितसंस्कारस्य कर्मकालत्वेन कालभेदेन कर्मणो भेदे सति तदङ्गत्वात्प्रैषोऽप्यावर्त्तते । अग्निं भ्राजस्वन्तं यजेति याज्यासंप्रैषस्यावृत्तिदर्शनात् । सूत्रे वाक्यावृत्तिः शास्त्रपरिसमाप्तिद्योतनार्था । तदेवं षोडशभिरध्यायैः षट्सप्तत्या पादैर्भगवता जैमिनिना निरूपितौ धर्माधर्मौ तदुक्तयैव दिशा विविच्य गुरुकुलादवगत्य स्नात्वा यथाश्रमं यथाशास्त्रं धर्माननुष्ठाय भगवत्यर्पितवतां क्रमेण चित्तशुद्धिविविदिषात्मज्ञानोदयैर्नित्यसुखाभिव्यक्तिरूपो मोक्षः फलति । एतदुत्तरापि व्यासपादप्रणीता चतुर्लक्षणी शारीरकमीमांसात्मज्ञानोपयोगिन्यप्यनुबन्धभेदादिभिर्भि*न्नमेव शास्त्रमिति द्योतनाय वाक्यावृत्तिर्वाकारेण याज्यादिपदेन च मङ्गलं ध्वनितमिति सर्वं शिवम् ॥

जैमिनेर्विमलसूक्तितटिन्यां मग्नमाप शुचितां मम चेतः ।
तेन खेलतु पिनाकिपदाब्जे येन जन्मनिवहो न पुनः स्यात् ॥ १ ॥

खण्डदेवकृतभाट्टदीपिका लक्षणैः कतिपयैरसम्भृता ।
इत्युदीक्ष्य बुधभास्करोऽग्निचिद्भारती वरिभ†राम्बभूव ताम् ॥ २ ॥

---

* यथा पूर्वोत्तरमीमांसे संभूयैकं शास्त्रं तथा सूपपादितं मया शास्त्रदीपिकाभूमिकायां तस्मादकिंचिदिदम् । अत एवेह 'विद्यते वाऽन्यकालत्वाद्यथा याज्यासंप्रैषो यथा याज्यासंप्रैष इति वाक्यमावर्तितं काण्डसमाप्तिसुसूचयिषया न तु समस्तसूत्रं, यथाऽऽवर्तयिष्यते शास्त्रसमाप्तिं बोधयितुकामेन बादरायणेन 'अनावृत्तिः शब्दादनावृत्तिः शब्दादिति । कर्तृभेदेन शास्त्रभेदादिशङ्कनं तु पुनरनवलोकितबहुशास्त्राणापित्याद्यपि च न्यरूपयमन्यत्रेति नेह बहु प्रपञ्च्यते । इति शम् ।

† विभर्तेर्भरतेर्वा यङि तलुकि च रुग्रिकौ च लुकीति अभ्यासस्य रिकि चायं प्रयोगः ।

अद्यावधि कृतिरेषाऽध्यन्तविहीनेति दीपिकाख्याऽऽसीत् ।
षोडशकलाभिरधुना परिपूर्णा भाट्टचन्द्रिकात्वमगात् ॥ ३ ॥

आसीत् षोडशलक्षणी श्रुतिपदा या धर्ममीमांसिका ।
संकर्षाख्यचतुर्थभागविधुरा कालेन साऽजायत ॥
गायत्री त्रिपदात्मिकेव विबुधैरद्यापि पापठ्यते ।
तां पूर्णामतनोत्क्रमेण महता गम्भीरजो भास्करः ॥ ४ ॥

इति श्रीसंकर्षे भाट्टदीपिकायां षोडशस्याऽध्यायस्य चतुर्थः पादः ॥ ४ ॥
षोडशोऽध्यायो ग्रन्थश्च समाप्तः । समाप्तं च पूर्वमीमांसाशास्त्रम् ॥

श्रीसम्वत् १९५०

शुद्धाषाढशुक्लद्वितीयाशनौ ।

Digitized by Google

Digitized by Google

ब्लो भ्रमोऽपि न सम्भवति अध्यासभ्रमयोरपि विकारत्वात्प्रकृतेश्च तौ न सम्भवतः, तयोश्चेतनधर्म्मत्वात् । अध्यासो हि नाम चेतनस्यान्यस्मिन्नन्यधर्मानुसन्धानं, स च चेतनधर्म्मो विकारश्च । न च पुरुषस्य प्रकृतिसन्निधिमात्रेणाध्यासादयः सम्भवन्ति, निर्विकारत्वादेव सम्भवन्ति चेन्नित्यं प्रसज्येरन् सन्निधेरकिञ्चित्करत्वं च, न विलक्षणत्वादित्यत्र प्रतिपादितं, प्रकृतिरेव संसरति बध्यते मुच्यते चेत्कथं नित्यमुक्तस्य पुरुषस्योपकारिणी सेत्युच्यते, वदन्ति हि "नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः । गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरती"ति, यथा प्रकृतिर्येन पुरुषेण यथास्वभावा दृष्टा तस्मात्पुरुषात्तदानीमेव निवर्तत इति चाहुः "रङ्गस्य दर्शयित्वा निवर्त्तते नर्तकी यथा नृत्यात् । पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः । प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति । या दृष्टास्मीऽति पुनर्न दर्शनमुपैति पुरुषस्ये"ति तदप्यसङ्गम ॥

टी० "अधिष्ठातारमि"ति, अधिष्ठाता-स्वतन्त्रः साक्षी-स्वरूपेणानुसन्धाता द्रष्टा-इन्द्रियादिभिर्द्रष्टा । उक्तार्थविषयं तद्गुन्यमाह "सङ्घाते"ति, त्रिगुणादिविपर्ययात् आदि-शब्दः कार्य्यपरः त्रिगुणतत्कार्यं जडं जडस्याधिष्ठातृत्वायोगात् तदन्योऽधिष्ठातेत्यर्थः, अधिष्ठानादिति, अधिष्ठेयात् त्रिगुणादेरधिष्ठातुर्विलक्षणत्वात् कर्मकर्तृविरोधादित्यर्थः कैवल्यार्थं प्रवृत्तेश्च, न हि त्याज्यमेव त्यागकर्त्तेत्यर्थः, उक्तार्थानां विप्रतिषेधं दर्शयति "साक्षित्वे"ति, चेतनधर्मो विकारश्चेति चेतनधर्मत्वाच प्रधानस्य

सम्भवति विकाररूपत्वाचात्मनः सम्भवतीत्यर्थः । प्रथमभ्रमोऽध्यासस्तन्मूला अन्ये भ्रमशब्दवाच्याः । प्रकृतिदर्शनं पुरुषकर्तृकं स्वात्मकर्तृकं चानुपपन्न-मित्याह—

सू० पुरुषो हि नित्यमुक्तत्वान्निर्विकारत्वाच्च तां कदाचिदपि पश्यति नाध्यस्यति च, स्वयं च स्वात्मानं न पश्यति अचेतनत्वात् पुरुषस्य स्वात्मदर्शनं स्वदर्शनमिति नाध्यस्यति च स्वयमचेतनत्वात्पुरुषस्य च दर्शनरूपविकारासम्भवात् । अथ सन्निधिमात्रमेव दर्शनमित्युच्यते सन्निधेर्नित्यत्वेन नित्यदर्शनप्रसङ्ग इत्युक्तं, स्वरूपातिरिक्तकादाचित्कसन्निधिरपि नित्यनिर्विकारस्य नोपपद्यते । किञ्च मोक्षहेतुस्तु स्वसन्निधिमात्रमेव दर्शनं चेद्बन्धहेतुरपि तदेवेति नित्यवद्बन्धो मोक्षश्च स्याताम्, अयथादर्शनं बन्धहेतुः, यथावत्स्वरूपदर्शनं मोक्षहेतुरिति चेत् उभयविधस्यापि दर्शनस्य संनिधानरूपतानऽतिरेकात् सदोभयप्रसङ्ग एव, सन्निधेरनित्यत्वे तस्य हेतुरन्वेषणीयस्तस्यापीत्यनवस्था । अथैतद्दोषपरिजिहीर्षया स्वरूपसद्भाव एव सन्निधिरिति तदा स्वरूपस्य नित्यत्वेन नित्यवद्बन्धमोक्षौ, अत एवमादेर्विप्रतिषेधात् सांख्यानां दर्शनमसमञ्जसम् ॥ येऽपि कूटस्थनित्यनिर्विशेषस्वप्रकाशचिन्मात्रं ब्रह्माविद्यासाक्षित्वेनापारमार्थिकबन्धमोक्षभागिति वदन्ति तेषामप्युक्तनीत्याऽविद्यासाक्षित्वाध्यासाद्यसम्भवादसामञ्जस्यमेव ॥

टी० पुरुषोहीत्यादिना, सन्निधेः स्वरूपानतिरिक्तत्वे च दूषण-

माह—अथेत्यादिना, अस्मिन्सांख्यपक्षनिरासे मायावादिनामनवकाशत्व-माह "येऽपी"ति, निर्विकारस्याविद्यानुभवाध्यासायोगादित्यर्थः ॥

सू० इयांस्तु विशेषः सांख्या जननमरणप्रतिनियमादिव्यव-स्थासिद्ध्यर्थं पुरुषबहुत्वमिच्छन्ति । ते तु तदपि नेच्छन्तीति सुतरामसामञ्जस्यम् । यत्तु प्रकृतेः पारमार्थ्यापारमार्थ्यवि-भागेन वैषम्यमुक्तं, तदयुक्तं पारमार्थिकत्वे ऽप्यपारमार्थि-कत्वेऽपि नित्यनिर्विकारस्वप्रकाशैकरसचिन्मात्रस्य स्वव्य-तिरिक्तसाक्षित्वाद्यनुपपत्तेः, अपारमार्थिकत्वे तु तस्य दृश्यत्वबाध्यत्वाभ्युपगमात्सुतरामसङ्गतम्, औपाधिकभे-दाभेदवादेऽपि उपाधिसम्बन्धिनो ब्रह्मणोऽयमेव स्वभाव इत्युपाधिसम्बन्धाद्यनुपपत्तेरसामञ्जस्यं पूर्वमेवोक्तम् । रचनानुपपत्त्यधिकरणं समाप्तम् ॥

टी० अधिकं दूषणमाह "इयांस्त्व"ति, दृश्यत्वबाध्यत्वाभ्युपग-मादिति यदविद्याविरोधि तदेव तत् साक्षीति वचनसङ्गतमित्यर्थः । यद्वा अविद्यानुभवरूपदर्शनं तद्बाधकदर्शनमपि विकार स तु निर्विकारस्य नोप-पद्यते इत्यर्थः अयमेव स्वभाव इति नित्यनिर्विकारत्वनिर्दोषत्वादि-स्वभाव इत्यर्थः । हेयप्रत्यनीकत्वकल्याणैकतानत्वश्रुतिविरोधोऽभिप्रेतः सर्वैरपि परैः प्रवृत्तेश्चेति सूत्रान्तरं कृतं तत्र जगद्रचनासिद्ध्यर्था प्रकृतेरा-द्या गुणसाम्यप्रच्युतिव्यापाररूपा प्रवृत्तिः साऽपि प्रधानस्य स्वतन्त्रत्वेऽनु-पपन्ना मृदादिष्वदर्शनादिति शङ्करभास्कराभ्यां रथशकटादिष्वदर्शना-दिति यादवमिश्रैश्च व्याख्यातं, तदयुक्तं चेतनाधिष्ठितस्यैवाचेतनस्य कार्यकरत्वदर्शनरूपयुक्तेर्भेदाभावात् जगद्रचनाऽनुरूपव्यापारस्य तदर्थ-स्याद्यव्यापारस्य च तुल्यन्यायविषयतया तुल्यार्थानां विषयवाक्यानामिव सूत्रभेदप्रणयने प्रयोजनाभावाच्च अतोऽन्वयव्यतिरेकरूपेणोभयव्याप्तिद-र्शकमेकं सूत्रं पयसोवत्सवृद्धये प्रवृत्तिवदम्बुनोलोकोपकाराय स्यन्दनप्रवृत्ति

Digitized by Google

वच्च प्रधानस्य स्वत एव पुरुषार्थानुगुणा प्रवृत्तिरिति पयोऽम्बुवदित्यंशो व्याख्यातः, ततोऽपि दध्यादिपरिणामे नालिकेरादिरसात्मना च परिणामे च प्रवृत्तिवदिति व्याख्यानं युक्तं कारणावस्थस्य प्रधानस्य कार्यजगद्रूपेण परिणतौ चेतनाधिष्ठाननिरपेक्षत्वं वदता पूर्वपक्षिणा चेतनसम्बन्धानपेक्षतया प्रतिपन्नपरिणामस्य प्रदर्शयितुं युक्तत्वात्पुरुषार्थसिद्ध्यनुगुणत्वदूषणस्याभ्युपगमेऽप्यर्थाभावादिति वक्ष्यमाणतयाऽत्र तत्पृथगुक्तेर्वैफल्यत्वात् कार्यं प्रति पुरुषस्य फलित्वमेव निमित्तत्त्वम्, अतो नाधिष्ठानापेक्षेति शङ्का च परिहर्त्तव्येति चेन्न फलित्वस्य पुरुषसन्निधितुल्ययोगक्षेमतयाऽन्यत्राभावाच्च न तृणादिवदिति न्यायेनार्थतः परिहृतत्वात्तत्पुरुषस्य फलित्वमात्रेण कार्य्यं प्रति निमित्तत्वेऽनडुदाद्युपयुक्तं तृणादिकमपि हि क्षीरीभवेदिति हि तर्कः समानः, अम्बुनः स्पन्दने च निम्नभूम्यपेक्षाऽस्तीति परिहारश्च न साधीयान् चेतनरसापेक्षत्वापादने निम्नभूम्यपेक्षणस्यानुपयोगात् उपसंहारनिदर्शनाच्चेति चेत् क्षीरवद्धीति सूत्रेणास्य सूत्रस्य व्याहृतिपरिहारश्च लोकदृष्टिशास्त्रदृष्टिभेदादित्युक्तं, तस्मिन्नधिकरणे बाह्यनिमित्तनिरपेक्षतायां लोकदृष्ट्या दर्शितस्य दृष्टान्तस्यात्र प्रतिपन्नतया शास्त्रदृष्ट्या स्वपक्षेण साध्यवैकल्ये परिचोदिते निरुत्तरत्वापत्तेः, तदयुक्तम् अतो दण्डचक्रादिवदुपकरणान्तरनैरपेक्ष्यं तत्राभिप्रेतमित्येव परिहर्त्तव्यम्, अन्यत्राभावाच्च न तृणादिवदित्यस्यानन्तरमभ्युपगमेऽप्यर्थाभावादिति सूत्रं व्याख्यातं भाष्ये त्वन्त्यसूत्रात्पूर्वं न्निवेशितं तत्र हेतुर्वृत्त्यनुरोध इति ज्ञातव्यम् अर्थात्सङ्गतिश्चान्यथा स्यात्, प्राज्ञस्यैव क्षीरोभावनिमितत्वेऽभिहिते परोक्तपक्षेऽपि चेतनान्वयः सुवच इति शङ्कायां परिहारपरं पुरुषाश्मवदिति सूत्रं सङ्गच्छते अभ्युपगमेऽप्यर्थाभावादिति भोगापवर्गरूपप्रयोजनाभावाद्दूषिते पुरुषाश्मवदिति चेदिति पङ्ग्वन्धायस्कान्तलोहदृष्टान्तनिबन्धनशङ्कायाः कथं सङ्गतिः, प्रवृत्त्युपपत्तौ हि पङ्ग्वन्धादिदृष्टान्तः न पुरुषार्थोपपत्तौ अयस्कान्तलोहयोः प्रयोजनभाक्त्वाभावात् व्याप्तिनिबन्धनकृत् स्वानुपपत्तिसूक्तासु चाभ्युपगमेन परिहारोक्तिर्घटते, एकं कारणं त्रीणि तानि सप्तेन्द्रियाणि तान्येकादशमहतस्तन्मात्रासर्गः अहङ्कारादिति प्रतिषेधो दर्शितः शाङ्करे, अन्तर्भावानन्त-

Digitized by Google

भावाभ्यां विवक्षावशात् सद्वारकाद्वारभावाच्च तादृशविप्रतिषेधस्य सुपरिहरत्वात् भाष्ये तथाऽनादरः वेदान्तविरोधादिति भास्करः असामञ्जस्यप्रतिज्ञानस्य परस्परव्याहतिनिबन्धनत्वौचित्यात्तद्वाचित्वस्वारस्याच्च भाष्ये तदनादरः वेदान्तविरोधादिति विवक्षितं चेदाद्यसूत्रस्य प्रधानकारणत्वप्रतिक्षेप एव साध्यतयाऽन्वीयत इति प्रतिज्ञान्तरासाधारणहेतुपरतया विप्रतिषेधव्याख्यानं भाष्ये, तेन परमसाध्यप्रधानकारणवादनिषेधः सिध्यतीति निर्विशेषज्ञप्तिमात्रस्य प्रवर्तकत्वानुपपत्तिर्मृषावादिनामपि तुल्या, स्वरूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयं प्रवर्तकत्वमित्यविरोधश्चानुपपन्नः, मायायाश्च ब्रह्मणि सर्वविधाध्यासकार्यजनप्रकृतौ स्वतन्त्रत्वे तदुत्साङ्ख्याभिमतप्रधानस्यापि प्रवृत्त्युपपत्तेः, तस्या ईश्वराधीनत्वे मायाप्रवृत्तेरीश्वराध्यासः अध्यस्तेश्वरवशान्मायाप्रवृत्तिरित्यन्योन्याश्रयः, तदध्यासस्यानादित्वे प्रधानस्यापि पुरुषे स्वधर्माणामनाद्याध्यासमुखेन जगत्प्रवृत्तिहेतुत्वमिति तुल्यं नित्यसर्गप्रसङ्गश्च तुल्यः प्रधानस्येवाविद्यायाः सन्निहितत्वात्, अध्यस्तेश्वरेच्छयानित्यप्रसङ्ग इति चेत् न ईश्वरेच्छया अध्यासनिबन्धनत्वात् अध्यासहेतोर्मायायाः सदा सन्निहितत्वात् क्षेत्रज्ञेच्छाया इव कर्मणा व्यवस्थापयितुमशक्यत्वाच्च नित्येच्छाप्रसङ्गात् । यादवार्यैस्तु प्रवृत्तेश्चेति पदं रथशकटादीनां स्पन्दात्मकप्रवृत्तेश्चेतनसापेक्षत्वदर्शनादिति व्याख्यातं, तत्र च पूर्वोक्तमेवोत्तरमनुसन्धेयम् । अर्थान्तरं च तैरभिहितं स्वफलाय प्रवृत्ताः शकुनादयः स्वफलाय प्रवृत्तानां मनुष्याणां शुभाशुभे सूचयन्ति, तत्र शकुनिकर्म न पुरुषप्रतर्कं । पुरुषकर्म च न शकुनिप्रवर्त्तकम्, अतश्च उभयकर्माभिज्ञेनेश्वरेण सर्वशक्तिना शकुनिचेष्टितपुरुषफलादिकं सर्वं सङ्गमयितव्यमिति तदपि मन्दं शकुनिसंनिधानस्य पुरुषव्यापारद्वारा पुरुषफलोपयोऽगितया तदुपयोगिवृष्ट्यादेरिव तदौपयिकशकुनिसंनिधानादीनामपि तत्फलभोक्तृपुरुषकर्मनिबन्धनप्रवृत्तेश्चेतनसापेक्षत्वेऽपि परिणामप्रवृत्तेस्तन्नैरपेक्ष्ययुक्तमिति शङ्कापरमन्यत्राभावाच्चेत्यादिसूत्रं व्याख्यातं तच्च पयोऽम्बुवच्चेदिति सूत्रस्यैव परिणामप्रवृत्तौ नैरपेक्ष्यपरिहारपरत्वोपपादनं

युक्तम् अतः पयोऽम्बुवदित्युक्तस्य प्रपञ्चमिदम् अभ्युपगमेऽप्यर्थाभावादिति प्रकृतेः प्रतिसर्गादिव्यवस्थासिद्ध्यर्थं सहकारिकारणाऽभ्युपगमेऽपि तादृश सहकारिरूपार्थाभावान्नित्यसर्गादिप्रवृत्तिनित्यतदभावप्रसङ्गपरिहार उपपन्न इति च व्याख्यातं साङ्ख्यैः, प्रकृतिपरिणामसङ्ख्याविशेषव्यतिरेकेण प्रतिसर्गादिव्यवस्थानिमित्तभूतार्थविशेषानभ्युपगमाच्छङ्कापरिहारा उभावपि निष्फलौ विप्रतिषेधादिति सूत्रमेवमपि व्याचक्षते हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तमिति प्रकृतेर्व्यक्तविपरीतत्वमभ्युपगम्यते, तद्धि प्रतिषिद्धं व्यक्तवद्धेतुमत्त्वनित्यत्वाभ्युपगमेऽनुमानप्रवृत्तिसम्भवद्वृत्तस्य परिणामपरम्परां प्राप्तस्यावृक्षद्वत्र त्रिगुणात्मकप्रधानस्यापि परिणामपरम्परया त्रैगुण्यातिक्रमेणावस्थान्तरं तन्मूलं स्यात् तस्याऽपि प्रहाणेन ततोऽप्यवस्थान्तरमिति क्वचिदपि न तत्त्वनिष्ठाप्रधानस्यानित्यत्वं सहेतुकत्वं तत्त्वसङ्ख्यानियमासिद्धिश्चातोऽसमञ्जसमिति इदमप्यनुचितम् अनित्यत्वप्रसङ्गादीनां विप्रतिषेधशब्दवाच्यत्वाभावान्मिथोविरुद्धार्थभाषणं हि विप्रतिषिद्धाभिधानम् ॥ रचनाऽनुपपत्त्यधिकरणं समाप्तम् ॥

महद्दीर्घाधिकरणम् ।

सू० महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ १० ॥

प्रधानकारणवादस्य युक्त्याभासमूलतया विप्रतिषिद्धत्वाच्चासामञ्जस्यमुक्तं, संप्रति परमाणुकारणवादस्याप्यसामञ्जस्यं प्रतिपाद्यते महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामिति, असमञ्जसमिति वर्तते, वा-शब्दश्चार्थे, ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घवत् त्र्यणुकोत्पत्तिवादवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसम् ।

टी० सू० महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्, सङ्गतिमाह "प्रधाने" ति, प्रधानकारणवादस्यासत्त्वेन धीस्थत्वात्तद्दूषितम् आनुमानिकप्रधानकारणत्वे निरस्ते आनुमानिकपरमाणुकारणत्वं स्यादिति प्रस्ता-

Digitized by Google

त्वात् सङ्गतिरित्यर्थः प्रधानकारणवादसाम्येऽपि शैवमतस्य पश्चान्निरासस्तु बाह्यत्वाधिक्याद्वेदबाह्यमतानन्तर्यस्य युक्तत्वात् । किं विपक्वजीवादृष्टसचिवाः परमाणवो जगत्कारणमुत? न परिमाणूनां संयोगद्वाराऽवयव्यारम्भकत्वे कारणानवस्थितिकार्यप्रथिमासिद्ध्योरन्यतरप्रसक्तिरवर्जनीया नेति, यदा न प्रसक्तिस्तदा परमाणूनां जगदारम्भकत्वोपपत्तेर्ब्रह्मकारणवादस्य अद्वैयतमत्वहानिः, यदा प्रसक्तिरवर्जनीया तदा परमाणुकारणवादानुपपत्तेर्ब्रह्मकारणवादस्य अद्वैयतमत्वं,वा–शब्दश्चार्थे समुच्चय इत्यर्थः इष्टसमुच्चयोऽभिप्रेतः ह्रस्वं द्व्यणुकं परिमण्डलं परमाणुः, महद्दीर्घं त्र्यणुकं तच्च द्व्यणुकत्रयारब्धं त्र्यणुकस्य द्व्यणुकत्रयारब्धत्वेऽपि सूत्रे द्व्यणुकेन परमाणुना चारब्धत्वं प्रतीयत इवेति तद्व्यावृत्त्यर्थमन्यच्च तदभ्युपगतमित्युक्तस्य घटादिकार्यान्तरव्यावृत्त्यर्थं चाह–

सू० परमाणुभ्यो द्व्यणुकादिक्रमेण जगदुत्पत्तिवादवदन्यदप्यसमञ्जसमित्यर्थः, तथा हि तन्तुप्रभृतयो ह्यवयवाः स्वांशैः षड्भिः पार्श्वैः संयुज्यमानाः अवयविनमुत्पादयन्ति परमाणवोऽपि स्वकीयैः षड्भिः पार्श्वैः संयुज्यमाना एव द्व्यणुकादीनामुत्पादका भवेयुः, अन्यथा परमाणूनां प्रदेशभेदाभावे सति सहस्रपरमाणुसंयोगेऽप्येकस्मात्परमाणोरनतिरिक्तपरिमाणतया अणुत्वह्रस्वत्वमहत्त्वदीर्घत्वाद्यसिद्धिः स्यात्, प्रदेशभेदाभ्युपगमे परमाणवोऽपि सांशाः स्वीयैरंशैस्ते च स्वकीयैरंशैरित्यनवस्था । न च वाच्यमवयवाल्पत्वमहत्त्वाभ्यां हि सर्षपमहीधरयोर्वैषम्यं परमाणोरप्यनन्तावयवत्वे अवयवानन्त्यसाम्यात्सर्षपमहीधरयोर्वैषम्यासिद्धेरवयापकर्षकाष्ठाऽवश्यमभ्युपगमनीयेति परमा-

णूनां प्रदेशभेदाभावे सत्येकपरिमाणुपरिमाणातिरेकी प्रथिमा न जायेतेति सर्षपमहीधरयोरेवासिद्धेः ।

टी० "परमाणुभ्य" इति, भाष्यस्थत्र्यणुकशब्द एव कार्यान्तरस्योपलक्षणं परमाणुभ्यो द्व्यणुकादिकार्योत्पत्तिवादवत गगननित्यत्वादिकमन्यत्तदभ्युपगतमसमञ्जसमित्यर्थः, सूत्रे ह्रस्वपरिमण्डल-शब्दाभ्यां कारणद्वयमुक्तं महद्दीर्घशब्दोऽणुह्रस्वस्य द्व्यणुकस्याप्युपलक्षणं द्व्यणुकपरिमाणुभ्यां त्र्यणुकद्व्यणुकादिकार्य्यवदन्यच्चासमञ्जसमित्यर्थः कार्य्यद्वयोपलक्षणमुत्तरत्र वक्ष्यते । महद्दीर्घशब्दौ भावप्रधानौ महत्त्वं दीर्घत्वं च, अतः सामानाधिकरण्याभावादान्महत इत्यादिना महच्छब्दस्यात्वाभावः, एवं भावप्रधानाभ्यां महद्दीर्घशब्दाभ्यां तद्गुणकं त्र्यणुकं लक्ष्यते, परमाणुभ्या द्व्यणुकाद्युत्पत्त्यनुपपत्तिः कथमित्यत्राह "तथा ही"ति, अणुत्वह्रस्वत्वे द्व्यणुकस्य धर्मौ महत्त्वदीर्घत्वे त्र्यणुकस्य, न च व्याच्यमित्यादि सर्षपमहीधरवैषम्यसिद्ध्यर्थं परमाणूनां निरवयवत्वमास्थेयम् अन्यथा अवयवानन्त्य साम्यात् तयोर्वैषम्यासिद्धेरित्यर्थः । परिहरति "परमाणूनामि"ति, निरवयवत्वे सहस्रपरमाणुसंयोगेऽप्येकपरमाण्वनतिरिक्तपरिमाणतया सर्षपमहीधराख्यधर्म्यसिद्धेः परमाणूनां सांशत्वमास्थेयमित्यर्थः । एवं वैषम्याख्यधर्मसिद्ध्यर्थं निरवत्वमुक्तं सर्षपमहीधराख्यधर्मिसिद्ध्यर्थं सावयवत्वमुक्तम् ।

सू० किं कुम्भे इति चेद्वैदिकः पक्षः परिगृह्यताम् ॥ यत्तु परैर्ब्रह्मकारणवाददूषणपरिहारमिदं सूत्रव्याख्यातं तदसङ्गतं पुनरुक्तं च, ब्रह्मकारणवादे परोक्तान्दोषान् पूर्वस्मिन् पादेपरिहृत्य परपक्षप्रतिक्षेपो ह्यस्मिन् पादे क्रियते चेतनाद्ब्रह्मणो जगदुत्पत्तिसम्भवश्च न विलक्षणत्वादित्यत्रैव प्रपञ्चितः, अतो ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवदन्यच्च तदभ्युपगतसर्वमसमञ्जसमित्येव सूत्रार्थः । किमत्रान्यदसमञ्जसमित्याह ॥

Digitized by Google

सू० उभयथा न कर्मातस्तदभावः ॥ ११ ॥

परमाणुकारणवादे हि परमाणुगतकर्मजनिततत्संयोगपूर्वकद्व्यणुकादिक्रमेण जगदुत्पत्तिरिष्यते तच्च निखिलजगदुत्पत्तिकारणभूतपरमाणुगतमाद्यं कर्मादृष्टकारितमित्यभ्युपगम्यते । अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्य्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानीति, तदिदं परमाणुगतं कर्म स्वगतादृष्टकारितमात्मगतादृष्टकारितं वा ? उभयथाऽपि न सम्भवति चेतनपुण्यपापानुष्ठानजनितस्यादृष्टस्य परमाणुगतत्वासम्भवात्, सम्भवे च सर्वदोत्पादकत्वप्रसङ्गः ॥

टी० किं कुर्म्म इति चेदिति सावयवत्वे वैषम्यासिद्धिः, निरवयवत्वे धर्म्यसिद्धिरिति किमवलम्बनीयमित्यर्थः । वैदिकः पक्षः परिगृह्यतां युक्तिबाधागोचरशास्त्रैकसमधिगम्यार्थः स्वीक्रियताम् । तत्र हि न ह्रस्वेन विपुलस्योत्पत्तिः दशगुणं बृहतो ब्रह्मणः कारणादल्पस्य कार्य्यत्वं हि प्रतिपाद्यते तत्तु न युक्तिबाधगोचर इत्यर्थः, अस्य सूत्रस्य परोक्तनिर्वाहमनूद्य दूषयति यत्त्वित्यादिना, असङ्गतं—पादसङ्गतिर्नास्ति पुनरुक्तं च अनपेक्षितं चेत्यर्थः । तत्रासङ्गतिमुपपादयति "ब्रह्मकारणे"ति, पुनरुक्तिमुपपादयति "चेतनादि"ति, एवं हि परैर्व्याख्यातं तथा विलक्षणाभ्यां परमाणुद्व्यणुकाभ्यां विलक्षणम् द्व्यणुकादिकार्य्यमुत्पद्यते तथा विलक्षणात् ब्रह्मणो विलक्षणं जगदुत्पद्यत इति तदिदमसङ्गतिपुनरुक्तिमनुपपन्नमित्यर्थः । अत इति अत्र कारणद्वयोपादानं कार्यद्वयोपादानं च स्पष्टमुक्तं ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवदित्युक्तेर्द्व्यणुकात् त्र्यणुकोत्पत्तिः, परमाणोर्द्व्यणुकोत्पत्तिरित्यर्थः । उत्तरसूत्रशङ्कामाह "किमत्रे"ति, सू· उभयथाऽपि न कर्मास्तदभावः ॥

सू० आत्मगतस्य चादृष्टस्य परमाणुगतकर्मोत्पत्तिहेतुत्वं न

Digitized by Google

सम्भवति । अथादृष्टवदात्मसंयोगादणुषु कर्मोत्पत्तिस्तदा तस्यादृष्टप्रवाहस्य नित्यत्वेन नित्यसर्गप्रसङ्गः । नन्वदृष्टं विपाकापेक्षं फलायालं कानिचिददृष्टानि तदानीमेव विपच्यन्ते कानिचिज्जन्मान्तरे कानिचित्कल्पान्तरे, अतो- विपाकापेक्षत्वान्न सर्वदोत्पादकत्वप्रसङ्ग इति नैतत् अनन्तैरात्मभिरसङ्केतपूर्वकमयुगपदनुष्ठितानेकविविधक- र्मजनितानामदृष्टानामेकस्मिन् काले एकरूपविपाकस्या- प्रामाणिकत्वात्, अत एव युगपत्सर्वसंहारो द्विपरार्द्धका- लमविपाकेनात्रस्थानं च न सङ्गच्छते । न चेश्वरेच्छाहितवि- शेषादृष्टसंयोगादणुषु कर्म, आनुमानिकेश्वरासिद्धेः, शा- स्त्रयोनित्वादित्यत्रोपपादितत्वात्, अतो जगदुत्पत्तेरणु- गतकर्मपूर्वकत्वाभावः ॥

सू० समवायाभ्युपगमाच्च साम्यादनव- स्थितेः ॥ १२ ॥

समवायाभ्युपगमाच्चासमञ्जसं कुतः साम्यादनवस्थितेः समवायस्याप्यवयविजातिगुणवदुपपादकान्तरापेक्षासा- म्यादुपपादकान्तरस्यापि तथेत्यनवस्थितेरसमञ्जसमेव

टी० आत्मगतस्य चेति व्यधिकरणत्वादित्यर्थः विपाकः फलार्ह- दशा, स चेति संयोगशब्दः परम्परया सम्बन्धपर :ईश्वराहितविशेषादृष्ट- वदात्मसंयोगादित्यर्थः । दूषयति "आनुमानिके"ति, सिद्धेऽपीश्वरे तस्य नि- त्येच्छायाः पराभ्युपगमान्नित्यसर्गप्रसङ्गस्य पूर्वोक्तया दिशा स्फुटत्वात्तद- नुक्तिः । सू० समवायाभ्युपगमाच्च साम्यादनवस्थितेः, प्रथमपञ्चम्यन्तपदस्य परमसाध्येनान्वयं दर्शयन् व्याचष्टे "समवाये"ति, समवायाभ्युपगम-

स्यासामञ्जस्यहेतुत्वोपपादिकाऽनवस्थितिरित्यभिप्रायेणाह "कुत"इति, अनवस्थित्युपपादकं साम्यपदमित्यभिप्रायेण साम्यादनवस्थितेरित्युपादानं, तत्र साम्यं केनाकारेणेत्यत्राह "अवयविजातिगुणवदुपपादकान्तरापेक्षा साम्यादि"ति, अत्यन्तभेदसाम्यादिति परे, तदयुक्तं भिन्नयोर्घटयोः समवायाभावाद्भेदस्य समवायकल्पकत्वेन वैशेषिकैरनुक्तत्वाच्च, इहप्रत्ययसाम्यादित्यन्ये तच्चायुक्तं कुण्डवदरयोः समवायाभावात्, तस्मादिह प्रत्ययविशेषस्य निर्वाहकान्तरसापेक्षत्वं साम्यमित्यर्थः । अवयविजातिगुणानामुपपादकान्तरापेक्षा कथं समवायस्य तदपेक्षासाम्यं वा कथं? तत्र स्वपरनिर्वाहकत्वं वा स्यादित्याशङ्क्याह–

सू० एतदुक्तं भवति अयुतसिद्धायामाधाराधेयभूतानामिह–प्रत्ययहेतुर्यः सम्बन्धः समवाय इति समवायोऽभ्युपगम्यते अपृथक्स्थित्युपलब्धीनां जात्यादीनां तथाभावस्य निर्वाहकत्वेन चेवायोत्समऽभ्युपगम्यते समवायस्यापि तत्साम्यात्तथाभावहेतुरन्वेषणीयः, तस्यापि तथेत्यनवस्थितिः, समवायस्य तदपृथक्सिद्धत्वं स्वभाव इति परिकल्प्यते चेत् जातिगुणादीनामेवैष स्वभावः परिकल्पनीयः न पुनरदृष्टचरं समवायमभ्युपगम्य तस्यैष स्वभाव इति कल्पयितुं युक्तमिति, समवायस्य नित्यत्वे अनित्यत्वे चायं दोषः समानः । नित्यत्वे दोषान्तरं चाह–

सू० नित्यमेव च भावात् ॥ १३ ॥

समवायस्य सम्बन्धत्वात् सम्बन्धस्य नित्यत्वे सम्बन्धिनो जगतश्च नित्यमेव भावादसमञ्जसम् ॥

टी० "एतदुक्त"मिति, अयुतसिद्धिरपृथक्सिद्धिः पृथक्सिद्धानामाधाराधेयभावोपपादकः संयोगः, अपृथक्सिद्धानां तु तदुपपादकः समवाय

इत्यर्थः, तथाभावस्यापृथक्स्थित्युपलब्धित्वस्येत्यर्थः, संयोगस्तु प्रत्यक्षसिद्धः अनुपलब्धं समवायं कल्पयित्वा तस्योपपादकान्तरनैरपेत्यकल्पनादपि प्रत्यक्षसिद्धस्यापृथक्सिद्धवस्त्वाधाराधेयभावस्यैव सम्बन्धस्योपपादकान्तरनैरपेत्यकल्पनं युक्तं धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायादित्यर्थः ॥ उत्तरसूत्रमवतारयति "समवायस्ये"ति, समवायस्यानित्यत्वं बहुत्वं च प्राभाकराभ्युपेतं वैशेषिकैरेकत्वं नित्यत्वं चाभ्युपेतमिति तस्य पक्षे सूत्रमिदमुच्यते

सू॰ नित्यमेव च भावात्, समवायस्य संबन्धत्वादिति सम्बन्धिविनाशविनाशित्वं संयोगे दृष्टमिति समवायस्यापि सम्बन्धत्वादेव सम्बन्धिविनाशविनाशित्वोपपत्तेस्तन्नित्यत्वाय सम्बन्धिजगन्नित्यत्वं स्यात्, ततश्च जगत्कारतयापरमाण्वीश्वरक्लृप्तिरयुक्तेत्यर्थः । दिक्कालादिद्रव्यतद्गतसङ्ख्यापरिणामादिनित्यसम्बन्धिसद्भावान्नित्यत्वोपपत्तिरिति चेन्न घटाद्यनित्यसम्बन्धिविनाशप्रयुक्तानित्यत्वस्यावर्जनीयत्वान्नित्यत्वविरोधादनित्यत्वं न स्यादिति चेत् अनित्यत्वविरोधान्नित्यत्वमेव न स्यात् उभयात्मकत्वं विरुद्धमिति चेत् तर्हि नित्यत्वानित्यत्वरूपविरुद्धाकारयोगाय समवायानेकत्वमभ्युपगन्तव्यं । किञ्च समवायस्य घटतद्गुणादीन्प्रति सम्बन्धात्मकत्वस्वरूपं न वा स्वरूपं चेत् घटादिविनाशे स्वरूपाभावादनित्यत्वं, न चेत् स्वरूपस्य दुर्निरूपतया समवायस्य तुच्छत्वमेव स्यात् पदार्थत्वाद्याकारेण सुनिरूपितमिति चेत् न तस्य द्रव्यादिव्यावृत्तत्वाभावात् अव्यावृत्तत्वे हि द्रव्यान्तर्भावेन तदतिरिक्तसमवायस्य तुच्छतैव स्यात् इति पदार्थषट्कवादो हीयेत, तत्तस्मादयुतसिद्धं सम्बन्धिनः प्रतिसम्बन्धात्मकत्वमेव समवायस्य द्रव्यावृत्तं स्वरूपमिति घटतद्गुणादीन्प्रति सम्बन्धात्मकत्वं स्वरूपं घटादिविनाशान्नास्तीत्यनित्यत्वं दुर्वारं नित्यसम्बन्धिनोः सम्बन्धात्मकत्वं स्वरूपमस्तीति चेत् अनित्यसम्बन्धिनोः सम्बन्धात्मकत्वं स्वरूपं नास्तीत्यनित्यत्वैव स्यात्, अयुतसिद्धयोः सम्बन्धात्मकत्वमात्रं स्वरूपमिति चेत् तथाऽपि नित्यानित्यरूपसम्बन्धिद्वैविध्येन उभयप्रसक्तिर्दुर्वारा अतस्तदुभयविरोधपरिहाराय घटादिनित्यत्वं वा समवायानेकत्वं वाऽभ्युपगन्तव्यं स्यात् तत्र घटादिनित्यत्वे प्रत्यक्षविरोधः परमाण्वीश्वरक्लृप्त्यनुपपत्तिश्च

स्यात् समवायानेकत्वे तु पूर्वसूत्रोक्तप्रकारेण समवायस्यैवाकल्पनीयत्वात् तदेकत्वं दूरोत्सारितम् ॥

सू० रूपादिमत्त्वाच्च विपर्य्ययो दर्शनात् ॥ १४ ॥

भू० परमाणूनां पार्थिवाप्यतैजसवायवीयानां चतुर्विधानां रूपरसगन्धस्पर्शवत्त्वाभ्युपगमादभिमतनित्यत्वसूक्ष्मत्वनिरवयवत्वादिविपर्य्ययेणानित्यत्वस्थूलत्वसावयवत्वादि प्रसज्येते, रूपादिमतां घटादीनामनित्यत्वं तथाविधकारणान्तरारब्धत्वादिदर्शनान्न हि दर्शनानुगुण्येनादृष्टोऽर्थः कल्प्यमानः स्वाभिमतविशेषे व्यवस्थापयितुं शक्यः, दर्शनागुण्येन हि परमाणूनां रूपादिमत्त्वं च त्वया कल्प्यते अतोऽप्यसमञ्जसम् । अथैतद्दोषपरिजिहीर्षया परमाणूनां रूपादिमत्त्वं नाभ्युपगम्यते तत्राह—

सू० उभयथा च दोषात् ॥ १५ ॥

भू० न केवलं परमाणूनां रूपादिमत्त्वाभ्युपगम एव दोषः रूपादिविरहेऽपि कारणगुणपूर्वकत्वात् कार्य्यगुणानां पृथिव्यादयोरूपादिशून्याः स्युः, तद्दोषपरिजिहीर्षया रूपादिमत्त्वाभ्युपगमे पूर्वोक्तदोष इत्युभयथा च दोषादसमञ्जसम् ।

टी० सू· रूपादिमत्त्वाच्च विपर्य्ययोदर्शनात्, प्रसञ्जकाकारस्य पराभ्युपगममाह "परमाणूना"मिति, विपर्यय—शब्दस्य पराभ्युपगतार्थविपर्ययपरत्वात्तद्वैशद्याय पराभ्युपगमप्रकारं दर्शयति अभिमतनित्यत्वे"ति, दर्शनादिति सौत्रं पदं विवृणोति "रूपादिमता"मिति, परमाणूनाम् अयं विशेषो यद् घटादिवैधर्म्येण नित्यत्वं तद्धि धर्मिग्राहकप्रमाणसिद्धमित्य-

पेक्षायां दर्शनादिति पदाभिप्रेतं विवृणोति "न ही"ति, सू॰ उभयथा च दोषात्, न केवलमिति, अन्यथा चेति नोक्तमपि तूभयथेत्युक्तम्, अत्र शिरोऽन्तरं नास्तीत्यभिप्रायः ।

सू॰ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १६ ॥

भा॰ कापिलपक्षस्य श्रुतिन्यायविरोधपरित्यक्तस्यापि सत्कार्य्यवादादिना कश्चिदंशो वैदिकैः परिग्रहोऽस्ति अस्य तु काणादपक्षस्य केनाप्यंशेनापरिग्रहादनुपपन्नत्वाच्चात्यन्तमनपेक्षैव निश्श्रेयसार्थिभिः कार्य्या । महद्दीर्घाधिकरणं समाप्तम् ॥

समुदायाधिकरणम् ।

सू॰ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १७ ॥

परमाणुकारणवादिनो वैशेषिका निरस्ताः सौगताश्च जगतः परमाणुकारणत्वमभ्युपगच्छन्तीत्यनन्तरं तन्मतेऽपि जगदुत्पत्तितद्व्यवहारादिकं नोपपद्यत इत्युच्यते, ते च चतुर्विधाः, केचित्पार्थिवाप्यतैजसवायवीयपरमाणुसंघातरूपान् भूतभौतिकान् बाह्यांश्चित्तचैत्तरूपांश्चाभ्यन्तरार्थान् प्रत्यक्षानुमानसिद्धानभ्युपयन्ति । अन्ये तु बाह्यार्थान् सर्वान् पृथिव्यादीन् विज्ञानानुमेयान् वदन्ति । अपरे त्वर्थशून्यं विज्ञानमेव परमार्थं सत्, बाह्यार्थास्तु स्वप्नार्थकल्पा इत्याहुः त्रयोऽप्येते स्वाभ्युपगतं वस्तु क्षणिकमाचक्षते उक्तभूतभौतिकचित्तचैत्तव्यतिरिक्तमात्माकाशादिकं स्वरूपेणैव नानुमन्यन्ते । अन्ये तु सर्वशून्यत्वमेव संगिरन्ते, तत्र ये बाह्या-

Digitized by Google

र्थास्तित्ववादिनस्ते तावन्निरस्यन्ते, ते चैवं मन्यन्ते रूपरसस्पर्शगन्धस्वभावाः पार्थिवाः परमाणवो रूपरसस्पर्शस्वभावाश्चाप्या रूपरसस्पर्शस्वभावास्तैजसाः स्पर्शस्वभावाश्च वायवीयाः पृथिव्यप्तेजोवायुरूपेण संहन्यन्ते तेभ्यश्च पृथिव्यादिभ्यः शरीरेन्द्रियविषयरूपसंघाता भवन्ति तच्च शरीरान्तर्वर्तिग्राहकाभिमानरूढो विज्ञानसंतान एवात्मत्वेनावतिष्ठते, तत एव सर्वो लौकिकव्यवहारः प्रवर्तत इति, तत्राभिधीयते—

सू० समुदाये उभयहेतुकेऽपि तदप्राप्तिः ॥ १७ ॥

योऽयमणुहेतुकः पृथिव्यादिभूतात्मकः समुदायः, यश्च पृथिव्यादिहेतुकः शरीरेन्द्रियविषयरूपसमुदायस्तस्मिन्नुभयहेतुकेऽपि समुदाये तत्प्राप्तिर्नोपपद्यते जगदात्मकसमुदायोत्पत्तिर्नोपपद्यत इत्यर्थः ॥

टी० सू० अपरिग्रहाच्चात्यन्तमनपेक्षा, अत्यन्त—शब्दव्यावर्त्यं कापिलमित्यभिप्रेत्याह "कापिले"ति, वेदविरुद्धार्थत्वं दूषणमुक्तं भवति, नित्यमेव च भावादिति सूत्रं परैरेवं व्याख्यातं परमाणूनां प्रवृत्तिस्वभावत्वे नित्यसर्गः, निवृत्तिस्वभावत्वे प्रलयान्तेऽपि न सर्गः, उभयस्वभावत्वं विरुद्धम्, अनुभयस्वभावत्वे अदृष्टवशात्प्रवृत्तिरित्यदृष्टस्य च नित्यसद्भावात् नित्यसर्ग इति, तदयुक्तम् उभयेति वत्सर्वथेतिवच्च विकल्पद्योतकपदाभावात्, अयं च विकल्पो ब्रह्मकारणवादेऽपि सुवचः तथा सति ब्रह्म स्वेच्छायां सत्यां प्रवर्तते, इतरथा निवर्तते इति हि वक्तव्यं, तर्हीश्वरेच्छया परमाणवोऽपि प्रवर्तन्त इति तुल्यमुत्तरं प्राप्नोति, अतः स्वपक्षे तुल्यत्वात् सूत्रस्यैतदर्थमयुक्तम् आनुमानिकेश्वरासिद्धिरधिकयुक्तिरिति चेत्, उभयथाऽपि न कर्मेत्यत्रैव सापेक्षितत्वाद्विवक्षितेति सूत्रवैयर्थ्यं स्यात्, उभयथा-

च दोषादिति, गन्धरसरूपस्पर्शगुणा स्थूला भूः, त्रिगुणाः सूक्ष्मा आपः, द्विगुणं सूक्ष्मं तेजः, स्पर्शगुणः सूक्ष्मो वायुरिति पृथिव्यादिभूतानामुपचितापचितगुणत्वं कल्प्यते न वा कल्प्यते चेत् गुणोपचयापचयस्य मूर्त्त्युपचयापचयातिवन्धनत्वस्य कार्य्यभूतेषु दर्शनात् गुणोपचयापचयवत्त्वेन परमाणूनामपि मूर्त्त्युपचयापचयवत्त्वादपरमाणुत्वं स्यात्, उपचितापचितगुणकत्वं न कल्प्यते चेत्सर्वपरमाणूनामेकरूपत्वं स्यात्, एकैकगुणकतया ऐकरूप्ये पृथिव्यादिषु रूपाद्यनुपलब्धिप्रसङ्गः, चतुर्गुणकतयैकरूप्ये वाय्वादिष्वपि रूपाद्युपलब्धिप्रसङ्ग इति व्याख्यातं, तत्रोपचितापचितगुणकत्वे मूर्त्त्युपचयादपरमाणुत्वमिति तन्नित्यत्वादिविपर्य्ययेणानित्यत्वस्थूलत्वादिप्रसङ्गात् पूर्वसूत्रोक्तत्वादविशिष्टमतोऽत्र तदुक्तिर्विफला विकल्पभेदेन तदापादनं प्रयोजनमिति चेन्न मुखभेदस्य दुःस्थत्वाद्गुणोपचयस्य मूर्त्त्युपचयहेतुकतया ह्यपरमाणुत्वमापादितं, तदयुक्तं गुणोपचयशब्दः किं गुणबाहुल्यपरः? उतापेक्षिकप्रकर्षपरः? उतोत्पत्तिपरः नाद्यः सार्वज्ञ्याद्यनेकगुणकस्येश्वरस्योपचितस्वरूपत्वाभावेनानैकान्त्यात्, न द्वितीयः जीवापेक्षया प्रकृष्टज्ञानस्य तस्योपचयात्मकत्वाभावात्, न तृतीयः, परमाणुषु स्पर्शादिगुणानां नित्यत्वाभ्युपगमात्,उत्पत्तावपि बुद्धिसुखदुःखाद्युत्पत्तिमदनेकगुणकस्य जीवस्योपचयात्मकत्वाभावाच्च । अन्येऽपि उभयथाऽपि न कर्मेत्यादिकम् एवं व्याचक्षते किमागन्तुकेभ्यो हेतुभ्यः परिमाणुगतकर्मोत्पत्तिः? उत प्रलयदशायामपि स्थितेभ्यो हेतुभ्य? इति, प्रथमे आगन्तुकहेतोरपि हेत्वन्तरापेक्षयाऽनवस्था, द्वितीये सदा सर्गप्रसङ्ग इति, अयं विकल्पस्तावदनिर्द्धारितविशेषो हेतुमात्रेण नावतरितुमर्हति अणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानीति हेतुविशेषस्य सूत्रितत्वादुक्तानादरेण दूषणानुपपत्तेः, स्थिते चादृष्टे तस्य तदानीमागन्तुकत्वशङ्का नोदेति, अदृष्टस्य पूर्वकल्पसम्पादितत्वात्, तस्मादात्मगतमणुगतं वेत्येव विकल्प? उपपद्यते । ननु प्रत्यात्मनियतभोगसाधनस्यादृष्टस्यानुगतत्वशङ्का न भवितुमलं कथं विकल्प इति चेन्न अदृष्टस्य कारणत्वेऽभिहिते कारणत्वस्य सामान्यरूपत्वाददृष्टस्य च समवायितया कारणत्वासम्भवात् असमवायित्वनिमित्तत्वशङ्कोपपत्तेः, नित्यमेव

च भावादित्यत्र प्रलयेऽप्यदृष्टसम्भवादित्यत्र प्रलयेऽप्यदृष्टसम्भवादणुषु नित्यकर्मोत्पत्तिप्रसङ्ग इति व्याख्यातं तदप्ययुक्तम् उभयथाऽपि न कर्मेति सूत्र एवादृष्टवदात्मसंयोगस्य कारणत्वेन शङ्कासम्भवात् परिहारस्यापि तत्रैव विवक्षितत्वोपपत्तेः, तत्रापेक्षितमस्मिन् सूत्रे कण्ठोक्तमिति चेन्न तथा सत्यस्य सूत्रस्य तदनन्तरभावित्वापत्तेः, इदं हि समवायव्युदाससूत्रव्यवहितमतस्तेन व्यवहितत्वादनेनाव्यवहितत्वाच्च समवायस्य वैशेषिकाभिमते नित्यत्वपक्ष एव दूषणपरत्वं युक्तम्, उभयथा च दोषादित्यत्रापि पार्श्वभेदेन संयोगे एकभागेनैव सर्वैः संयोगे च दोष इत्युक्तं, तथात्वे तु महद्दीर्घवद्वेति सूत्रेणैव द्व्यणुकादिक्रमेण कार्योत्पत्त्यसामञ्जस्यं दृष्टान्तीकुर्वता परमाणूनां पार्श्वभेदाभेदप्रयुक्तदूषणजातमभिप्रेतमिति इह तदुक्तिः पुनरुक्तिः स्यात्, तस्य च सूत्रस्य पराभिमतार्थपरत्वानुपपत्तिश्च दर्शिता । अत इदं सूत्रं परमाणूनां रूपादिमत्त्व इव तद्विरहे दोषप्रतिपादकमिति युक्तं, महद्दीर्घाधिकरणं समाप्तम् ॥

सू० परमाणूनां पृथिव्यादिभूतानां च क्षणिकत्वाभ्युपगमात्क्षणविनाशिनः परमाणवो भूतानि च कदा संहतौ व्याप्रियन्ते कदा वा संहन्यन्ते कदा च विज्ञानविषयभूताः कदा च हानोपादानादिव्यवहारास्पदतां भजन्ते को वा विज्ञानात्मा कं च विषयं स्पृशति कश्च विज्ञानात्मा कमर्थं कदा वेदयते कं वा विदितमर्थं कश्च कदोपादत्ते स्प्रष्टा हि नष्टः स्पृष्टश्च नष्टः, तथा वेदिता विदितश्च नष्टः कथं चान्येन स्पृष्टमन्यो वेदयते कथं चान्येन विदितमर्थमन्य उपादत्ते सन्तानानामेकत्वेऽपि सन्तानिभ्यस्तेषां वस्तुतो वस्त्वन्तरत्वानभ्युपगमान्न तन्निबन्धनं व्यवहारादिकमुपपद्यते अहमर्थ एवात्मा, स च ज्ञातैवेति चोपपादितं पुरस्तात ॥

टी० सू० समुदाय उभयहेतुकेऽपि तदप्राप्तिः, सङ्गतिमाह "परमाणिव"ति, असत्कार्यवादसाम्यात् कार्य्यविशेषे शरीरे क्षणिकत्वाभ्युपगमसाम्याद्वा धीस्थतया वैशेषिकमतनिरासानन्तरं बौद्धनिरास इति केचित्परमाणूनामेकान्तत्वचातुर्विध्याभ्युपगमसाम्याद्धीस्थतया बौद्धमतनिरास इति सङ्गतिः, आर्हतमते स्थिरत्वास्थिरत्वादिभिरनैकान्त्यमैकविध्यं च परमाणूनां हि स्वीकृतं, न हि सर्वैरपि बौद्धैः परमाणुकारणत्वमङ्गीकृतमित्यत्राह "ते चतुर्विधा" इति, वैभाषिकसौत्रान्तिकयोः परमाणुकारणवादाभ्युपगमेन प्रस्तावे सति बौद्धत्वसाजात्याद्योगाचारमाध्यमिकयोरपि निरासः क्रियत इत्यर्थः । किं क्षणिकाः परमाणवो जगदारम्भका ने? ति क्षणिकानां तेषां किं सङ्घातकारणत्वं सम्भवति ने? ति अस्थिरादिषु स्थिरत्वादिरूपा अविद्या परमाणूनां पृथिव्यादिसङ्घातहेतुत्वमुपपादयति ने? ति यदोपपादयति तदा संघातहेतुत्वोपपत्तेः परमाणूनां क्षणिकानां कारणत्वं स्यात्, यदा नोपपादयति तदा सङ्घातहेतुत्वानुपपत्तेः क्षणिकानां परमाणूनां जगदारम्भकत्वं न स्यात् । वैभाषिकादीनामभ्युपगमप्रकारं यथाक्रममाह केचिदित्यादिना, चित्तचैत्तरूपानिति-चित्तं ज्ञानसन्तानः, चैत्तं रागादिकं रूपविज्ञानवेदनासंज्ञासंस्काराः पञ्चस्कन्धाः, भूतेन्द्रियविषया रूपस्कन्धः, तत्तद्विषयग्राहकत्वेनाहमित्यभिमानारूढा ज्ञप्तिरेव विज्ञानस्कन्धः, प्रियाप्रियानुभयानुभवजन्यसुखदुःखोपेक्षात्मकचित्तस्यावस्थाविशेषो वेदनास्कन्धः, संज्ञास्कन्धः सविकल्पकः प्रत्ययः, संस्कारस्कन्धो रागद्वेषमोहादयः, कायस्थत्वादान्तरचित्तविषयत्वाद्वा रूपस्कन्धोऽपि चित्तचैत्तान्तर्गत इति वाचस्पत्यादयः शाङ्करभाष्यं च । रूपस्कन्धव्यतिरिक्तस्कन्धचतुष्टयं चित्तचैत्तान्तर्गतमिति भास्करभाष्ये, तदिदमाह "चित्तचैत्तरूपांश्चाभ्यन्तरानर्थानि"ति, अन्ये त्विति पृथिव्यादिविषयज्ञानेन तत्तद्विषयानुमानमित्यर्थः । तत्र चेति अहं जानामीति ग्राहकत्वेनाभिमानो ग्राहकाभिमानः तमारूढ इत्यर्थः । तत्प्राप्तिः समुदायत्वप्राप्तिरित्यर्थः । क्षणिकत्वमस्तु तेन कथं समुदायत्वाप्राप्तिरित्यत्राह "क्षणध्वंसिन"इति, संहतौ व्याप्रियन्त इति व्यापारश्चलनं किं–शब्दः

क्षेपे । विषयं स्पृशति इन्द्रियेण सम्बद्धं करोति इन्द्रियव्यापारो ज्ञानं हानोपादानादि च नोपपद्यत इत्यर्थः कदा-न कदाचिदिति भावः । उपपादयति "स्प्रष्टा ही"ति, ततः किमित्यत्राह "कथमि"ति, एकसन्तानत्वादुपपद्यत इत्यत्राह "सन्तानानामि"ति, स्थिरत्वेनानुयायित्वेन सन्तानस्य वस्त्वन्तरत्वानभ्युपगमादित्यर्थः, विज्ञानस्य चात्मत्वमयुक्तमित्याह "अहमर्थ एवे"ति, अणुहेतुको भूतभौतिकसङ्घातः पञ्चस्कन्धैरारब्धः पञ्चस्कन्धीरूपसङ्घातश्चेोभयहेतुकसमुदाय इति परैर्व्याख्यातं, तत्र स्कन्धानामुपपन्नत्वे तत्समुदायात्मा पञ्चस्कन्धी न दुष्यति इति स्कन्धानामेव निराचिकीर्षितत्वे तद्धेतुकसमुदाय-शब्देन तेषामुपस्थानमतिक्लिष्टं समुदायो गर्भरूपः मातृभुक्ताहारः कर्म च तद्धेतुरिति तन्निरासपरं यादवप्रकाशैर्व्याख्यातं तदप्ययुक्तं गर्भारम्भदूषणादपि जगदारम्भदूषणस्य प्राधान्येन चास्मिन् पादे प्रक्रान्तत्वात्, अतस्समुदायशब्दस्यैवमर्थः प्रतिपादितः ॥

सू० इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न सङ्घातभावानिमित्तत्वात् ॥ १९ ॥

भू० अविद्यादीनामितरेतरहेतुत्वेनोपपन्नं सङ्घातभावादिकमिति चेत् एतदुक्तं भवति यद्यपि क्षणिकास्सर्वे भावास्तथाऽप्यविद्ययैतत्सर्वमुपपद्यते अविद्या हि नाम विपरीतबुद्धिः क्षणिकादिषु स्थिरत्वादिगोचरा तथा संस्काराख्या रागद्वेषादयो जायन्ते ततश्चित्ताभिज्वलनरूपं विज्ञानं, ततश्च नामाख्याश्चित्तचैत्ताः पृथिव्यादिकं च रूपिद्रव्यम् ।

सू० इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात् ॥ १९ ॥ अयमेवार्ह्णत्रिमोवृत्तिसिद्धः पाठः, अविद्यादीनामिति प्रत्यय-शब्दो हेतुवाची संघातभावादिकमित्यादि-शब्देन विज्ञानविषयत्वं व्यवहारास्प-

Digitized by Google

दत्वं च विवक्षितम् अविद्यादयः के कथं तेषामन्योन्यहेतुत्वं तेन संघातभवोपपत्तिः कथमित्यत्राह "एतदुक्तं भवति" इति, अविद्यां विवृणोति "क्षणिकादि"ष्विति, आदिशब्दद्वयं कार्य्यत्वनित्यत्वादिमिथोविरुद्धाकारपरं क्षणिककार्य्यदुःखशून्यस्वभावेषु पदार्थेषु स्थायिनित्यसुखवस्तुत्वबुद्धिरित्यर्थः, तस्या रागादिहेतुत्वं स्फुटं रागादयः संस्काराः, ते च ग्राहकाभिमानारूढस्य सूक्ष्मचित्तसन्तानस्य प्रदेशान्तरं नीयमानस्य प्रतिक्षणमुपजायमानस्य दीपसन्तानस्येव मातृकुक्षिप्रवेशहेतवः गर्भगतस्य तदनन्तरभाविनी विषयज्ञप्तिर्विज्ञानं, तदिदमाह "ततश्चित्ताभिज्वलनरूपमि"ति, ततश्चेति तदुत्तरोत्तरविषयविज्ञप्तिश्चित्तं, तेन सहजन्मविनाशभाजः स्पर्शवेदनासंज्ञाचेतनानिवर्तकविचारप्रीतिरेकाग्रताश्रद्धावीर्य्यस्मृतिप्रज्ञादयः कुशलाकुशलरूपा धर्माः, एते चित्तचैत्तनामाख्याः, ततश्च पृथिव्यादिकं चरूपिद्रव्यमिति कालातिक्रमेण पुञ्जीभावसिद्धिरित्यर्थः ॥

मू० ततः षडयतनाख्यमिन्द्रियषट्कं, ततः स्पर्शाख्यः कायः ततो वेदनादयश्च ततश्च पुनरप्यविद्यादयो यथोक्ता इत्यनादिरियमविद्यादिकाऽन्योन्यमूला चक्रपरिवृत्तिः, एतच्च सर्वं पृथिव्यादिभूतभौतिकसङ्घातमन्तरेण नोपपद्यते, अतः सङ्घातभावादिकमुपपन्नमिति तत्रोत्तरं न सङ्घातभावानिमित्तत्वादिति नैतदुपपद्यते एषामविद्यादीनां पृथिव्यादिभूतभौतिकसङ्घातभावं प्रत्यनिमित्तत्वात् न खलु अस्थिरादिषु स्थिरत्वादिबुद्ध्यात्मिकाऽविद्या तन्निमित्ता रागद्वेषादयो वाऽर्थान्तरस्य क्षणिकस्य संहति हेतुतां प्रतिपद्यन्ते ।

टी० तत इन्द्रियषट्कनिष्पत्तिमाह "तत"इति, अत्र स्पर्शशब्दश्चैत्तकुशलधर्मान्तर्गतस्पर्शादर्थान्तरपरः कायवाचित्वात्, ततो वेदनादय इति वेदना सुखदुःखादिबुद्धिः, आदि-शब्देन तृष्णोपादानभवजातिज-

Digitized by Google

रागरणाशोकपरिवेदनदुःखदौर्मनस्यानि उपक्लेशरूपमदमानादय उपवासाश्च गृह्यन्ते, अत्र तृष्णा वाक्कायचेष्टा, भवशब्दो धर्माधर्मवाची ततः स्कन्धप्रादुर्भावो जातिः, मानसदुःखं दौर्मनस्यम्, अविद्यादिभिर्वेदनादयः, वेदनादिभिरविद्यादयः अविद्यादिभिर्जन्मजरादयस्तैरविद्यादय इति वा स्यादितरेतरप्रत्ययत्वमुभयथापि नार्थभेदः, वेदनादिषु जन्मजरादीनामन्तर्गतत्वात् एतच्चेति, अविद्यादिभिः सङ्घातः सङ्घातादविद्यादिकमिति उपलभ्यमानं चक्रकम् । अविद्यादिहेतुभूतसङ्घातानभ्युपगमे तु नोपपद्यत इत्यर्थः । अविद्यादीनां स्वरूपेण कार्यकरत्वानुपपत्तिमाह–

भा० शुक्तिकारजतादिबुद्धिर्हि न शुक्त्याद्यर्थसंहतिहेतुर्भवति । किञ्च यस्य क्षणिके स्थिरत्वबुद्धिः स तदैव नष्ट इति कस्य रागादय उत्पद्यन्ते संस्काराश्रयं स्थिरमेकद्रव्यमनभ्युपगच्छतां संस्कारानुवृत्तिरपि न शक्या कल्पयितुम् ॥

सू० उत्तरोत्पादे च पूर्वनिरोधात् ॥ १९ ॥

इतश्च क्षणिकत्वपक्षे जगदुत्पत्तिर्नोपपद्यते उत्तरक्षणोत्पत्तिवेलायां पूर्वक्षणस्य विनष्टत्वात् तस्योत्तरक्षणं प्रति हेतुत्वानुपपत्तेः, अभावस्य हेतुत्वे सर्वं सर्वत्र सर्वदोत्पद्येत । अथ पूर्वक्षणवर्तित्वमेव हेतुत्वमित्युच्यते एवं तर्हि कश्चिदेव घटक्षणस्तदुत्तरकालभाविनां सर्वेषामेव गोमहिषाश्वकुड्यपाषाणादीनां त्रैलोक्यवर्तिनां हेतुः स्यात् । अथैकजातीयस्यैव पूर्वक्षणवर्त्तिनो हेतुत्वमिष्यते तथाऽपि सर्वदेशवर्त्तिनामुत्तरक्षणभाविनां घटानामेक एव पूर्वक्षणवर्ती घटो हेतुः स्यात् । अथैकस्यैव हेतुरेक इति मनुषे तथाऽपि कस्यैकस्य को हेतुरिति न ज्ञायते । अथ यस्मि-

न्देशे घटक्षणः स्थितस्तद्देशसम्बन्धिन एवोत्तरघटक्षणस्य स हेतुरिति किं देशस्य स्थिरत्वं मनुषे । किंच चक्षुरादिसंप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकाले अनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं सम्भवति ॥

सू० असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा [१]वा ॥ २० ॥

असत्यपि हेतौ कार्य्यमुत्पद्यते चेत्सर्वं सर्वत्र सर्वदोत्पद्येतेत्युक्तं, न केवलमुत्पत्तिविरोध एव प्रतिज्ञा च भवतामुपरुध्येत अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ हेतवः इति वः प्रतिज्ञा, अधिपतिरिन्द्रियम् ।

टी० "शुक्तिके"ति, न हि शुक्तिरजतादौ रजतादिभ्रमे सति शुक्तिकाद्वयं संहतं भवतीत्यर्थः । यद्वा न शुक्तिरङ्गुलीयकादिकार्यकरी भवतीत्यर्थः । सूत्राभिप्रेतं सहकारिवैकल्यमाह "किञ्चे"ति, संस्कारेणेति चेत् तत्राह "संस्काराश्रय"मिति, संस्कारश्च तदाश्रयश्च नष्ट इत्यर्थः । सू· उत्तरोत्पादे च पूर्वनिरोधात्, क्षण-शब्दः क्षणिकपदार्थवाची किं देशस्येत्यादिभाष्यानन्तरमिदमपि पदकपर्वाभिप्रेतं यद्देशसंतानस्थितोयोघटः स तद्देशसंतानसम्बन्धिन उत्तरघटक्षणस्य हेतुरिति चेन्न देशान्तरं नीयमानस्य तस्याप्युत्तरोत्तरं नीयमानस्य देशान्तरसम्बन्धिसन्तानदर्शनादिति । उक्तं दूषणं न वस्तुन्येव ज्ञानेऽपि तुल्यमित्यभिप्रायेणाह "किञ्चे"ति, सू· असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा, सहकार्यालोकादिः आलम्बनं विषयः, समनन्तरप्रत्ययः, अनन्तरपूर्वक्षणप्रत्ययः । अनुपरोधं शङ्कते—

भू० अथ प्रतिज्ञानुपरोधाय घटक्षणे स्थित एव घटक्षणान्त-

[१] पुस्तकान्तरे वा-शब्दो न विद्यते ।

रोत्पत्तिरिष्यते तथा च सति द्वयोः कार्यकारणयोर्घटक्षणयोर्यौगपद्येनोपलब्धिः प्रसज्येत । न च तथोपलभ्यते क्षणिकत्वप्रतिज्ञा चैवं हीयेत, क्षणिकत्वं स्थितमेवेति चेत् इन्द्रियस[1]म्बन्धज्ञानयोर्यौगपद्यं प्रसज्येत ॥

सू० प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २१ ॥

एवं तावदसत उत्पत्तिर्निरस्ता सतो निरन्वयविनाशोऽपि नोपपद्यत इत्युच्यते क्षणिकत्ववादिभिर्मुद्गराभिघाताद्यनन्तरभावितयोपलब्धियोग्यःसदृशसन्तानावसानरूपः स्थूलो यः सदृशसंताने प्रतिक्षणभावी चोपलब्ध्यनर्हः सूक्ष्मश्च यो निरन्वयोविनाशः प्रतिसंख्याप्रतिसंख्यानिरोधशब्दाभ्यामभिधीयेते तौ न सम्भवत इत्यर्थः, कुतः अविच्छेदात्सतो निरन्वयविच्छेदासम्भवात्, असम्भवश्च सत उत्पत्तिविनाशौ नामावस्थान्तरापत्तिरेव अवस्थायोगि तु द्रव्यमेकमेव स्थिरमिति कारणादनन्यत्वं कार्यस्योपपादयद्भिरस्माभिस्तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र प्रतिपादितः, निर्वाणस्य दीपस्य निरन्वयविनाशदर्शनादन्यत्रापि विनाशो निरन्वयोऽनुमीयत इति चेन्न घटशरावादौ मृदादिद्रव्यानुवृत्त्युपलब्ध्या सतो द्रव्यस्यावस्थान्तरापत्तिरेव विनाश इति निश्चिते सति प्रदीपादौ सूक्ष्मदशापत्त्याऽप्यनुपलम्भोपपत्तेः, तत्राप्यवस्थान्तरापत्तिकल्पनस्यैव युक्तत्वात् ।

१ इन्द्रियसंप्रयोगज्ञानयोरिति पा० ।

Digitized by Google

टी० "अथे"ति, पूर्वक्षणस्योत्तरक्षणानुवृत्तौ युगपदुपलब्धिप्रसङ्गः क्षणिकत्वहानिश्चेति दूषणद्वयमाह "तथा चेत्या"दिना, शङ्कते "क्षणिकत्व"मिति, क्षणिकत्वं स्थितमेवेति चेदिति उत्तरक्षणः पूर्वक्षणवर्तौ चेदित्यर्थः । दूषयति "इन्द्रियसंप्रयोगज्ञानयोर्यौगपद्यं प्रसज्येते"ति, ततः कार्य्यकारणभावाभावप्रसङ्ग इत्यर्थः युगपदुपलब्धिप्रसङ्गश्चार्थसिद्धः ज्ञानतत्कारणयौगपद्यप्रसङ्गः प्रदर्शनार्थः अर्थेष्वपि कारणभूतघटक्षणकार्यभूतघटक्षणयोर्यौगपद्यप्रसङ्ग इत्यभिप्रायः । सू॰ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्, तदनन्यत्वमित्यत्र प्रतिपादित इति वस्त्वन्तरानुपलब्धेः बुद्धिशब्दान्तरादीनामन्यथोपपत्तेश्चेत्यर्थः । निर्वाणस्येति अबाधितप्रत्यभिज्ञया मृदनुवृत्तौ सत्याव तदपह्नवो युक्तः दृष्टेनादृष्टकल्पनं हि युक्तं न तु दृष्टहानमित्यर्थः ॥ सू॰ उभयथा च दोषात्, न च प्रतीयते—न तुच्छत्वेन प्रतीयत इत्यर्थः, सू॰ आकाशे चाविशेषात्, बाह्येत्यादि क्षणिकत्वदूषणोपयुक्तत्वाभावात् प्रसङ्गात्सङ्गतिरित्यर्थः, चाक्षुषत्वेऽप्यविरोध इति, अनेनानुमेयत्वमप्यनुमतमित्यवगम्यते । यद्वा चाक्षुषमेव तथाऽपि तत्प्रयुक्तविरोधो नास्तीत्यर्थः । सू॰ अनुस्मृतेश्च, प्रत्यभिज्ञानादित्यर्थः, स्मृतिसादृश्यादनुस्मृतिशब्देनाभिधानं घटादिषु ज्वालादिष्विवेति उत्पत्तिविनाशसामग्र्यनुवृत्त्यभावादित्यर्थः, तच्च कार्यकारणेति तर्कानुगृहीतप्रत्यभिज्ञाप्रत्यक्षेण तर्कविरुद्धमनुमानं वाधितमित्यर्थः, कार्यकारणभावानुपपत्त्यादिभिरिति प्रत्यक्षानुमानसाधारणं दूषणमुक्तम्, अथ प्रत्यक्षस्य क्षणिकविषयत्वं दूषयति "किंचे"ति, तस्यैवेति यथा वस्तुनो नीलत्वोत्पलत्वयोगो न वस्त्वन्तरत्वसाधकस्तथा कालद्वययोगोऽपि सम्भवतीत्यर्थः, अनुमानद्वयमपि दूषयति "तत्त्वि"ति तदभिमतविपरीतसाधनत्वात् विपर्ययेणापि व्याप्तिसद्भावात् विरुद्धं विपरीतस्यापि साधकमित्यर्थः । विपरीतव्याप्तिं दर्शयति "सत्त्वादि"ति, प्रकरणसमत्वमुक्तमर्थक्रियाकारित्वस्य हेतोरभिमतविरुद्धस्यैव साधकत्वमाह "किंचे"ति, व्यापारासम्भवात्—व्यापारस्य हेतुत्वमाश्रयत्वं च न सम्भवति उत्पत्त्यनन्तरक्षण एव विनष्टत्वात् अतो नाभिमतकार्यकरणत्वमित्यर्थः, समीहितविपर्ययसाधनो विरुद्ध इति विरुद्धलक्षणं

Digitized by Google

स्थापितः तस्मादविशेषेण भवतीत्यन्ये, दृश्यते चान्यत्रापि कालान्यत्वं 'साटोपमुर्वीमनिशं नदन्तो ये प्लावयिष्यन्ति समं ततोमी' इत्यत्र, नदन्त इति वर्त्तमानकालः प्लावयिष्यन्तीति अवर्त्तमानेनाभिसम्बध्यमानो भविष्यत्कालः सम्पद्यते । सूत्रप्रत्याख्यानं तु अग्निष्टोमयाजीति भूतएव णिनिः जनितेत्येतत्सम्बन्धात्तु केवलं व्यपदेशस्य भावित्वप्रतीतिरस्य सूत्रस्य शाटकं वयेतिवत्, ततश्च भाविव्यपदेशविज्ञानाद्विशेषणस्य कालान्यत्वं वाक्यार्थवशादसत्यपि सूत्रारम्भे प्रत्येष्यते, अवश्यं च स्वकालएव प्रत्ययविधिरेष्टव्योऽन्यथा भाविकृत्यमासीदित्यत्र भाविशब्दस्य भूतकालत्वे भाव्यासीच्छब्दयोः पर्यायत्वाद्युगपत्प्रयोगो न स्यात्, तस्मादिदानीमासीदित्येवं तत्रार्थः, गोमानासीदित्यत्रापि देवदत्तस्य विद्यमानत्वेपि गोमद्रूपस्यातीतत्वाद् भूतप्रत्ययः, तत्रार्थाद् गवामप्यतीतत्वं प्रतीयते गोमच्छब्दस्तु स्वमहिम्ना वर्त्तमानसत्ताविशिष्टमेव प्रकृत्यर्थमाह ॥

"क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः" ॥ 'धातुसम्बन्धइति वर्त्ततइति' । अनुप्रयोगधातुना च संबन्धः, क्वचित्त्वयं ग्रन्थो न पठ्यते । 'प्रकृत्यर्थविशेषणं चैतदिति' । उपपदत्वाशङ्कां निरस्यति । व्याख्यानाच्चोपपदत्वाभावः । 'समभिहारविशिष्टक्रियावचनादिति' । क्रियाधर्मे समभिहारमात्रे धातोर्वृत्त्यसम्भवादेतदुक्तम्, अत्र यदि लोटो हिस्वाविति वचनात्तस्यैव हिस्वौ स्यातां तदा सामान्यविहितानां तिङां शतृशानज्भ्यामिव हिस्वाभ्यां बाधा स्यात्ततस्तध्वमोर्लोट्स्थानिकयोरभावाद्वा च तध्वमोरिति तयोः स्थानित्वेनोपादानमनुपपन्नमिति लोट्शब्देन तदादेशानां ग्रहणमित्युपलक्ष्यते, अस्तु तथा को दोषः, इह हि तिप्सिप्मिपां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्त्वान्ङित्त्वाभावाल्लुनीहीतीत्वं न स्यात्, ब्रूहीति ब्रुव ईट् स्यात्, तृण्ढीति तृणह इम् स्यात्, अनुदात्तत्वं च हेः प्रसज्येत । नैष दोषः । सेर्ह्यपिच्चेत्यत्र योगविभागः करिष्यते तत्सामर्थ्यादनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति नाश्रीयते सेर्हिर्भवति अपिच्च भवति यावान्कश्चिद्धिर्नामेति, यौ तर्ह्युत्तमादेशौ हिस्वौ तयोराडागमः प्राप्नोति लुनीहिलुनीहीत्येवाहं लुनामि अधीष्वाधीष्वेत्येवाहमधीयइति ।

नैष दोषः। आटि कृते साट्कस्यादेशौ भविष्यतः सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् हिस्वयोः पुनराट् न भविष्यति, इह ह्याट् क्रियतां हिस्वाविति सम्प्रधारणायामुभयोरनित्ययोः शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवतीति परत्वादाटि कृते साट्कस्य हिस्वाविति सिद्धमिष्टम्, एवमपि हेर्योगविभागेन पित्त्वाभावेपि स्वशब्दस्योत्तमादेशस्य पित्त्वाद्भुङ्क्ष्व-भुङ्क्ष्वेत्येवाहं भुञ्ज इत्यत्र श्नसोरल्लोप इत्यकारलोपो न प्राप्नोति, ब्रूष्व-ब्रूष्वेत्येवाहं ब्रुवे ब्रुव ईट् प्राप्नोति, सर्वेषां च तिङां द्वावपि हिस्वौ पर्यायेण स्यातां न तु परस्मैपदानां हिरितरेषां स्व इति नियामकमस्ति तस्माद्दुष्ट एवायं पक्ष इति मत्वा लकारस्यैवादेशौ हिस्वावाश्रयणीयाविति दर्शयति। 'तस्य च लोट इति'। नन्वस्मिन्पक्षे वा च तध्वमोरित्यनुपपन्नमित्युक्तं तत्राह। 'तध्वम्भाविनस्तु वा भवत इति'। मुख्यार्थासम्भवे तध्वभावी लोडेव तथोच्यत इत्यर्थः, यदि तर्हि लोट एव हिस्वावादेशौ न तदादेशानां लः परस्मैपदमिति द्वयोरपि परस्मैपदसंज्ञा स्यात् ततश्च-द्वावपि परस्मैपदिभ्य एव स्यातां तिङ्त्वसन्निवेशाच्च तदन्तस्य तिङन्तता न स्यात् ततश्च तिङ्ङतिङ इति निघातो न प्राप्नोति हिस्वयोश्च कृत्वा-त्तदन्तस्य शतृशानजन्तस्येव प्रातिपदिकत्वात्स्वाद्युत्पत्तिः प्राप्नोति तत्र च विभक्तिसंज्ञकहिस्वसदृशत्वादनयोर्हिस्वयोर्विभक्तिस्वरप्रतिरूपकाश्च निपाताः निपातोव्ययमित्यव्ययसंज्ञायां यद्यपि विभक्तीनां श्रवणं न भवति तथापि ततः परस्य तिङ्ङतिङ इति निघातः प्राप्नोति, द्वावपि च कर्तर्य्येव स्यातां न तु स्वादेशो भावकर्मकर्तृषु स्यात् तस्मादयमपि पक्षो दुष्ट एव तत्राह। 'योगविभागश्चात्र कर्त्तव्य इति'। योगविभागे यथेष्टं सिद्ध्यति तथा दर्शयति। 'लोडित्येवेति'। एतेन द्वितीययोगे प्रथमान्तस्य लोड्ग्रहणस्यानुवृत्तिं दर्शयति, तत्र च सामानाधिकरण्येन लोडित्यनेन हिस्वौ विशेष्येते न षष्ठ्याविपरिणामेन, न च हिस्वौ लोटौ भवत उच्यते चेदं लोटो हिस्वाविति ततश्च धर्मातिदेशो विज्ञायते तदाह। 'लोड्धर्माणौ तौ भवत इत्यर्थ इति'। अत्र च लोट्शब्देन लोट्संबन्धिनौ हिस्वावुच्येते मुख्यलोट्संबन्धिनो धर्मस्यातिदेश्यस्यासम्भवात्प्रसिद्धौ लोट्संबन्धिनौ

यौ हिस्वौ सेर्ह्यपिच्च सवाभ्यां वामाविति विहितौ तद्धर्मारणावित्यर्थः । किं सिद्धं भवति तद्दर्शयति । 'तेनेति' । तयोर्हि परस्मैपदात्मनेपदत्वं भेदेन व्यवस्थितं हेः परस्मैपदत्वं स्वस्यात्मनेपदत्वमिति अतस्तद्धर्मातिदेशादिहापि तदुभयं भेदेन व्यवतिष्ठते, भेदेन भविष्यतीत्यर्थः । 'तिङ्त्वं च भवतीति' । तथा च हीत्यस्य कर्त्ता वाच्यः स्वशब्दस्य तु भावकर्मकर्त्तारः पुरुषैकवचनसंज्ञे तु विधानसामर्थ्याच्च भवतः, यदि हि ते अपि स्यातां हिस्वयोरनेन विधानमनुपपन्नं स्याद् वचनान्तरेणैव तयोस्तादृशयोः सिद्धत्वात् । 'लुनीहिलुनीहीत्यादि । 'पुनःपुनर्लवनमयं करोतीत्यादिरर्थः । तत्र च लोडन्तं पुनःपुनर्लवनमाहानुप्रयोगधातुस्तु कृतिं तद्विषयां वदन् अभिव्यनक्ति संमुग्धं तद्गतं साधनादिकम्, एवं च सामान्यविशेषयोर्विशेषणविशेष्यभावाद् धातुसंबन्ध उपपद्यते, इत्येवशब्दौ लोडन्तानुप्रयोगयोः संबन्धार्थौ, अयन्त्वमहंशब्दाः पुरुषविशेषाभिव्यक्तिहेतवः । 'अथ वेति' । वा च तद्धर्मोरित्यस्य फलं दर्शयति । 'अलावीदिति' । लुङ् सिचि वृद्धिः सिच इट्, तिपोस्तिसिचोपृक्तइतीट्, इट ईटीति सिचो लोपः, सिज्लोप एकादेशे सिद्धो वक्तव्य इति सवर्णदीर्घत्वम् । 'एवं मध्यमोत्तमयोरुदाहार्यमिति' । लुनीहिलुनीहीत्येव त्वमलावीः अलाविष्टमलाविष्ट, अथ वा लुनीतलुनीतेत्येव यूयमलाविष्ट लुनीहिलुनीहीत्येवाहमलाविषम् अलाविष्वालाविष्म । 'एवं मध्यमोत्तमयोरपीति' । लुनीहिलुनीहीत्येव त्वं लविष्यसि लविष्यथो लविष्यथ, अथ वा लुनीतलुनीतेत्येवं यूयं लविष्यथ लुनीहि लुनीहीत्येवाहं लविष्यामि लविष्यावः लविष्यामः । 'एवं सर्वेषु लकारेषूदाहार्यमिति' । लुनीहिलुनीहीत्येवायमलुनात् लुनातु लुनीयात् लूयात् लुलाव लविता लविष्यति अलविष्यत्, अधीष्वाधीष्वेत्येवमध्यैत अधीताम् अधीयीत अध्येषीष्ट अधिजगे अध्यगीष्ट अध्यैष्ट अध्येता अध्यैष्यत अध्यगीष्यत अध्येष्यते । कर्मणि लूयस्वलूयस्वेत्येवायं केदारो लूयतइत्यादि, भावे तु प्रसिद्धः स्वशब्दो दृष्टो न वेति चिन्त्यम् । अथोदाहरणेषु कथं द्विर्वचनं यावता क्रियासमभिहारं द्योतयितुं द्विर्वचनं विधीयते स चात्र तस्मिन्नेव विधीयमानेन लोटैव द्योतितः, अथ द्योति-

तेपि तस्मिन्क्रियासमभिहारे द्वे भवत इति वचनसामर्थ्यादत्र द्विर्वचनं यङन्तेपि प्राप्नोति वक्तव्यो वा विशेषस्तत्राह। 'क्रियासमभिहाराभिव्यक्ता-विति'। लः कर्मणि चेति वचनाद्भावकर्मकर्त्तारोस्य वाच्याः समभिहारस्तु द्विर्वचनेनैव द्योत्यः, यङस्तु न किञ्चिदन्यद्वाच्यं द्योत्यं वा विद्यतइति तेनैव क्रियासमभिहारस्य द्योतितत्वाद् द्विर्वचनाभावः। ननु च सन्तु भावकर्म-कर्त्तारोस्य वाच्याः समभिहारोप्युपाधित्वेन श्रुतः सोपि लोटो द्योत्यो भवतु यथा लडादिषु वर्त्तमानादयः, एवं तर्ह्यसति द्विर्वचने शुद्धस्य लो-टोस्य च साधारणं रूपमिति समभिहाराभिव्यक्तयेवश्यं द्विर्वचनमपेक्ष्यते शब्दशक्तिवैचित्र्यं चात्र हेतुः, यथा स्त्रीत्वं क्वचिदेकेनैव प्रत्ययेन द्योत्यते क्वचिद्द्वाभ्यां क्वचित् दृषदित्यादौ प्रातिपदिकेनैवेत्यलं प्रबन्धेन॥

"समुच्चये ऽन्यतरस्याम्"॥ समुच्चयइति समान्योक्तावपि क्रियासमुच्चयएव दृश्यते धातोः प्रत्ययविधानादित्याह। 'अनेकक्रियाध्या-हारः समुच्चयइति'। अनेकासां क्रियाणामेकस्मिन् संबन्धिनि निचीयमा-नतेत्यर्थः। एतेनैकक्रियाविषयात्समभिहारात्समुच्चयस्य भेदो दर्शितः, धातोः क्रियावाचित्वात्क्रियाधर्मे समुच्चयमात्रे वृत्तिर्न भवतीत्यभिप्राये-णाह। 'समुच्चीयमानक्रियावचनादिति'। एकस्मिन्साधने याः क्रियाः समु-च्चियन्ते तद्वाचिभ्यो धातुभ्यः प्रत्यय इत्यर्थः। 'भ्राष्ट्रमटेत्यादि'। भ्राष्ट्राट-नादीनि करोतीत्यर्थः। तत्रानुप्रयुज्यमानो धातुः साधनभेदेन भिन्नेष्वटने-ष्वनुवर्तमानं कृतिव्यापारं वदंस्तद्गतानि साधनादीनि प्रकाशयतीति पर-स्परसम्बन्धः, भ्राष्ट्रं चुल्लि, खस्य दूरं खदूरमपवरकं, स्थाल्यः प्रक्षालिता यत्र निधाय पिधीयन्ते तत्स्थाल्यपिधानम्। 'अथ वेति'। प्रथमेनाथवाशब्देन वा च तध्वमोरित्यस्य व्यापारं दर्शयति द्वितीयेनान्यतरस्याङ्ग्रहणस्य, एवं द्वितीयेप्युदाहरणे द्रष्टव्यम्॥

"यथाविध्यनुप्रयोगः पूर्वस्मिन्"॥ 'यथाविधीति'। पदार्थानति-वृत्तौ यथार्थे यदव्ययमित्यव्ययीभावः, अनुप्रयोग इत्यनुशब्दो धात्वर्थानु-वादी न पश्चाद्भावेनानन्तर्यर्थे तेन पूर्वव्यवहितप्रयोगोपि भवति, पूर्व-स्मिन्निति वचनं विस्पष्टार्थं समुच्चये हि सामान्यवचनस्यानुप्रयोगं

वक्ष्यति तेन ततोऽन्यत्रायं विधिरन्यश्च विषयः पूर्वमेव लोड्विधानम्। 'धातुसम्बन्धे प्रत्ययविधानादिति'। ननु च हिस्वान्तमेतदनभिव्यक्तपदार्थकं संख्याकालपुरुषाणामनभिव्यक्तत्वात् अतस्तदर्थाभिव्यक्त्यर्थमेवानुप्रयोगः सिद्धः, अस्त्वेवं किमेतावता वृत्तिकारोक्तो हेतुर्न भवति, अथ वा यावन्तमर्थमभिव्यक्तुं हिस्वान्तं समर्थं तावता विवक्षायामनुप्रयोगासिद्धिं मत्वैवमुक्तम्। 'यथाविध्यर्थं वचनमिति'। ननु च समुच्चये सामान्यवचनस्येति वक्ष्यति तत्र नियमो विज्ञास्यते समुच्चय एव धात्वन्तरस्यानुप्रयोग इति ततश्च क्रियासमभिहारे यथाविध्यनुयोगो भविष्यति, एवं मन्यते समुच्चये सामान्यवचनस्यैवानुप्रयोग इति नियमादन्यत्र धात्वन्तरस्यापि स्यादिति छिनत्तीति नानुप्रयुज्यतइति, पचतीत्यादेर्भिन्नार्थस्य त्वप्रसङ्गो लोडन्तेनानन्वयात्, समानार्थस्य तु सम्भवति सम्बन्धो यथा तस्यैव, एवं सामान्यवचनस्य करोत्यादेरप्यनुप्रयोगप्रसङ्गः, तस्यापि हि सन्निहितलोडन्तवाच्ये विशेषे पर्यवसानात्सम्भवत्येवान्वयः। ननु चैकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भवति एतच्च कृञ्चानुप्रयुज्यतइत्यत्र व्याख्यातं तत्र यथा गवां स्वामी अश्वेषु चेति न भवति तथेहापि येनैव धातुना लोट्प्रयोगः प्रारब्धस्तेनैवासौ समापयिष्यते, न। अस्यापि न्यायस्य वेदे लोके च व्यभिचारात्, वेदे तावदिन्द्राय राज्ञे सूकर इति चतुर्थी प्रयोगप्रकरणे त्रिप्रश्येनस्य वर्त्तिका ते धातुरिति षष्ठी,मयुः प्राजापत्य इति तद्धितश्च देवतासम्बन्धे दृश्यते, लोकेपि सक्तुः पयः पपुरिति लिटा सहानेनिर्जुरिति लङ् प्रयुक्तः, तस्मादारभ्यमेवैतत्॥

"समुच्चये सामान्यवचनस्य"॥ ननु च हिस्वान्तस्यानभिव्यक्तपदार्थकत्वाद्धातुसम्बन्धे प्रत्ययविधानाच्चानुप्रयोगः सिद्धो नार्थ एतेन तत्राह। 'सर्वविशेषेति'। असत्यस्मिन्यतो धातोर्लोड्विहितः स तस्यानुप्रयुज्येत, एवमपि हिस्वान्तार्थस्याभिव्यक्तिर्भवत्येव धातुसंबन्धश्चोपपद्यते, ननु च सर्वेषु विशेषेषु यदनुगतं सामान्यं तद्वाचिनोनुप्रयोगेपि तस्य सामान्यस्य सन्निहितेषु विशेषेषु पर्यवसानादर्थाभिव्यक्तिश्च सर्वेषां भवति धातुसंबन्धश्च तत्र सामान्यवचनस्यैकस्यानुप्रयोगोस्तु बहूनां विशेषवा-

चिनां वेति सम्प्रधारणायामेकस्यैव भविष्यति लघुत्वात्तत्राह । 'लाघवं चेति' । अन्यथा तरुद्रुमादीनामेव प्रयोगः स्यान्न वनस्पत्यादिशब्दानामिति भावः । ननु भ्राष्ट्रमटेत्यादौ तस्यैवानुप्रयोगात्कथं सामान्यवचनता तत्राह । 'भ्राष्ट्रमटेत्यादि' । 'कारकभेदात् क्रियाभेदे सतीति' । भेदनिबन्धनः समुच्चयोप्येवमेवात्रोपपाद्यः ॥

"छन्दसि लुङ्लङ्लिटः" ॥ उदाहरणेषु धातुसम्बन्धो मृग्यः । 'अकरदिति' । कृमृदृरुहिभ्यश्छन्दसीति च्लेरङादेशः ऋदृशोऽङि गुणः ॥

"लिङर्थे लेट्" ॥ 'जोषिषदिति' । जुषी प्रीतिसेवनयोरनुदात्तेत् व्यत्ययेन परस्मैपदम्, इतश्च लोपः परस्मैपदेषु, लेटोडाटाविति तिपोडागमः, सिब्बहुलं लेटीति सिप्, इडागमः । 'तारिषदिति' । सिविधौ बहुलं णिद्वद्भाव उक्तस्ततो वृद्धिः । 'पतातीति' । पत्लृ गतौ, तिप आडागमः ॥

"उपसंवादाशङ्कयोश्च" ॥ यदि मे भवानित्यादिनोपसंवादस्य स्वरूपं दर्शयति । 'कारणत इत्यादिना' । शङ्काया अनुसरणमनुगमनमित्यर्थः । 'अहमेवेत्यादि' । त्रिपुरविजये देवैः प्रार्थितस्य देवस्यैतद्वचनम् । ईश ऐश्वर्ये, उत्तमैकवचनमिट्, टेरेत्वं, वैतोन्यत्रेत्यैकारः । पशवो द्विपादश्चतुष्पादश्च वायुं देवा अब्रुवन्सोमं राजानं हनामेति सोऽब्रवीद्वरं वृणै मदग्रा एव वो ग्रहा गृह्यान्तादिति । मद्ग्रहो ऽग्रं प्रथमं येषां ते तथोक्ताः, ग्रहेः कर्मण्यात्मनेपदं यक् ग्रहिज्यादिना सम्प्रसारणम् झस्याडागमः पूर्ववदैत्वम् । देवाः सोममघ्नन्, सोऽपूयदशक्यतामागमत्, ते वायुमब्रुवन् इमं नः स्वदयेति, सोऽब्रवीद्वरं वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता इति अहं देवता येषां तानि तथोक्तानि, उच्यान्तादिति । वचेर्वचिस्वपीत्यादिना सम्प्रसारणं शेषं पूर्ववत्, 'नेज्जिह्मायन्त इति' । इच्छब्द आशङ्कां द्योतयति । जिह्माचरणेन नरकपातः सम्भाव्यते स मा भूदित्यर्थः, जिह्मं कुटिलं पापं छन्दसि परेच्छायामिति क्यच्, अश्वाघस्यादिति योगविभागेनात्वं, वृत्तौ तु वस्तुमात्रं दर्शितम् । 'जिह्माचरणेनेति' । न पुनराचारे उपमानादन्यत्र क्यजस्ति, हेतौ शतृप्रत्ययः । 'लिङर्थ एवायमिति' । हेतुहे-

तुमद्भावे, कथम् उपसंवादे तावत्करणं हेतुर्द्दानं हेतुमत् अन्यथा यदि मे भवानिदं कुर्यादिति लिङ् स्यात् विभाषा तु लिङिति अहमपि ते इदं दास्यामीति लृट्, भाष्ये तु ददातेरपि लिङ् प्रयुक्तः, आशङ्कापि कारणतः कार्यानुसरणं तत्र कारणं हेतुः कार्यं हेतुमत्, अथापि करणमत्र-धिर्दानमवधिमदित्यवध्यवधिमद्भाव उपसंवादे प्रतीयते न हेतुहेतुमद्भावः, आशङ्कायामपि निश्चितो हेतुहेतुमद्भावो नास्तीत्युच्येत तथापि लिङ्प्र-योगसिद्ध्येवश्यं वक्तव्योऽत्रहेतुहेतुमद्भावः, अतो लिङर्थ एवायमित्यर्थः । 'नित्यार्थं तु वचनमिति'। छन्दसि नित्योऽत्र लिङ् दृश्यतइति मन्यते, तथापि व्यवस्थितविभाषया सिद्धमिति चेत्तदेव तर्हि वचनेन ज्ञाप्यते ॥

"तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवे-ङ्तवेनः" ॥ 'कथं ज्ञायतइति'। कर्तरि कृदिति वचनात् भावस्तुमर्थो नोपपद्यतइति प्रश्नः। अपकर्षापनयः स्वार्थश्च धातूनां भाव इति साध्य-मानरूपः स एव हि धातुवाच्यो भावः, घञादिवाच्यस्तु भावो धात्व-र्थव्यतिरिक्तः सिद्धतारूपः । 'पिबध्याइति'। यको बहुलं छन्दसीति लुकि पिबादेशः। 'मादयध्याइति'। यकः प्रसङ्गे व्यत्ययेन शप् ॥

"दृशे विख्ये च" ॥ योगविभागश्चिन्त्यप्रयोजनः ॥

"ईश्वरे तोसुन्कसुनौ" ॥ 'वितृद इति'। ओतृदिर् हिंसाना-दरयोः ॥

"कृत्यार्थे तवैकेन्केन्यत्वनः" ॥ 'कृत्यानामर्थो भावकर्मणी इति'। यद्यपि भव्यगेयादिषु कर्त्ताप्यर्थः वह्यं करणं स्नानीयं चूर्णमित्यादिषु करणादयस्तथापि न तत्र कृत्यत्वेन कर्त्रादिषु विधानं किं तर्हि स्वरूपेण, अतः कृत्यतया विधानं भावकर्मणोरेवेति भावः। 'दिदृक्षेण्य इति'। दृशेः सन्नन्तात्केन्यः। 'शुश्रूषेण्य इति'। शृणोतेः। 'सयादिसूत्रेपीति'। येन सयादयो विधीयन्ते तत्र तुमर्थे सेसेनसे इत्यत्रेत्यर्थः,। 'तस्य तु-मर्थादन्यत्रेति'। अन्यथानेनैव तुमर्थे भावेपि सिद्धत्वादनर्थकं तत्स्यात् ॥

"अवचक्षे च" ॥ 'एशप्रत्यय इति'। शित्करणं सार्वधातुक-त्वार्थं तेन चक्षिङः ख्याञ् न भवति ॥

Digitized by Google

"भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्" ॥ संस्थानादीनामवधित्वेन लक्षणभावः । 'आ समाप्तेरिति' । सम्पूर्वो हि तिष्ठतिः समाप्तौ रूढः, सन्तिष्ठते पिण्डपितृयज्ञ इत्यादौ दर्शनात् । 'आतमितोरिति' । तमु ग्लानौ ॥

"अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" ॥ तुमर्थइत्येव । 'अलंकृत्वेति' । अमैवाव्ययेनेति नियमादुपपदसमासाभावः । न कर्त्तव्यमित्यर्थः, 'वासरूप इति चेदिति' । पूर्वं तु प्रैषादिषु कृत्यानां वचनेन स्त्र्यधिकारादूर्ध्वं वासरूपविधिर्नावश्यमस्तीति ज्ञापितत्वादिह तदभावमभिप्रेत्य प्राग्ग्रहणं विकल्पार्थमित्युक्तम् ॥

"उदीचां माङो व्यतीहारे"॥ 'अपमित्येति' । मेङ् प्रणिदाने क्त्वो ल्यपि मयतेरिदन्यतरस्यामितीत्वं, ह्रस्वस्य तुक् । 'अपूर्वकालत्वादिति'। पूर्वं ह्यसौ याचते पश्चादयमयते यदा चास्माद्वचनान्मयतेः क्त्वो भवति तदा समानकर्तृकयोरित्यादिना याचेर्न भवति अनेन बाधितत्वात्, यथा द्वितीयद्विर्वचनेन प्रथमद्विर्वचनम्, अनभिधानाद्वा । 'मेङ इत्यादि'। मेङोयं कृतात्वस्य निर्द्देशः कृतो न पुनर्माङ् मानइत्यस्य तस्य व्यतिहारे वृत्त्यसम्भवादित्यर्थः, यद्येवं मेङ इत्येव वक्तव्यं तत्रायमप्यर्थो व्यतिहारग्रहणं न कर्त्तव्यं भवति तत्राह । 'ज्ञापनार्थमिति' । किं ज्ञाप्यतइत्याह । 'नानुबन्धकृतमिति' । प्रयोजनमाह । 'तेनेति' । यद्ययमर्थो न ज्ञाप्येत ततः श्रूयमाणे पकारे दैप आत्वं न स्यात् अनेजन्तत्वात् ततश्चादाबिति प्रतिषेधे तस्य ग्रहणं न स्याद्दाप् लवनइत्यस्यैव तु स्यात् ॥

"परावरयोगे च" ॥ परावरशब्दयोः सम्बन्धिशब्दत्वाद्यदपेक्षं परावरत्वं तयोः पूर्वपरयोरेव परावराभ्यां योगो गम्यतइत्याह । 'परेण पूर्वस्येति' । पूर्वशब्देनात्रावरो विवक्षितः । 'अप्राप्य नदीमिति' । नद्याः पूर्वदेश इत्यर्थः । 'ततश्च नदी परा भवतीति' । परनदीयोगेन पर्वतो विशेष्यते । 'अतिक्रम्य पर्वतमिति' । पर्वतस्य परस्तादित्यर्थः । ततश्चावरः पर्वतो भवति तेनावरपर्वतयोगेन नदी विशेष्यते, अयमप्यपूर्वकालार्थ आरम्भः, अतिक्रमोत्र कीदृश इति चिन्त्यम् ॥

Digitized by Google

"समानकर्तृकयोः पूर्वकाले" ॥ क्रियापेक्षत्वात्कर्तृभावस्य धात्वधिकारेऽपि तदर्थस्यैव समानकर्तृकत्वं विज्ञायते न धातोरित्याह । 'समानः कर्त्ता ययोर्द्धात्वर्थयोरिति' । समानशब्दोयमेकवाची, तत्रेति निर्द्धारणे सप्तमीं दर्शयति, षष्ठ्यामपि न दोषः सप्तमीत्वाश्रिता । 'पूर्वकाले धात्वर्थे वर्त्तमानादिति' । प्राभाकरास्तु पूर्वप्रयुज्यमानादिति व्याचक्षते अनुष्ठाने पौर्वकाल्यं नाद्रियन्ते तद्भाष्यवार्त्तिकविरोधादुपेक्ष्यम् । उक्तं हि व्यादाय स्वपिति संमील्य हसतीत्युपसंख्यानमपूर्वकालत्वादिति, ननु च शक्तिः कारकं सा च प्रतिक्रियं भिद्यते तत्कुतः समानकर्तृकत्वमित्यत आह । 'शक्तिशक्तमतो रिति'। इह समानकर्तृकयोरिति द्विवचननिर्द्देशः क्रियते तेन द्वयोरेव पौर्वकाल्ये स्याद्बहूनां न स्यात्तत्राह । 'द्विवचनमतन्त्रमिति' । अवश्यं येन केन चिद्वचनेन निर्द्देशः कर्त्तव्यः, तत्र समानकर्तृकत्वस्य पूर्वकालत्वस्य च भेदाधिष्ठानत्वाद्भेदनिबन्धनयोर्द्विवचनबहुवचनयोः प्रथमभावित्वाद्द्विवचनं प्रयुक्तं न त्वेतत्तन्त्रमित्यर्थः, एवमपि लोकविज्ञानाच्च सिद्ध्यति तद्यथा लोके ऽमीषां ब्राह्मणानां पूर्वं आनीयतामित्युक्ते सर्वपूर्व एवानीयते एवमिहापि सर्वपूर्वायाः क्रियायाः प्राप्नोति तस्मादेवं वक्तव्यं सर्वेषामेवात्र व्रजिं प्रति पौर्वकाल्यम्।'स्नात्वा व्रजति भुक्त्वा व्रजति पीत्वा व्रजतीति'। आख्यातवाच्या हि क्रिया विशेष्यत्वात्प्रधानं तेन तां प्रति सर्वासां विशेषणत्वात्परस्परेणासंम्बन्धः, तदुक्तं, गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति, एवं च कृत्वा प्रयोगोप्यनियतो भवति स्नात्वा भुक्त्वा पीत्वा व्रजति पीत्वा स्नात्वा भुक्त्वा व्रजतीति। 'भुक्तवति ब्राह्मणइति'। ननु तुमर्थाधिकाराद्भावे क्त्वाप्रत्ययः क्तवतुस्तु कर्त्तरि एवं तर्ह्यस्मिन्विषये भावे न भवतीति प्रत्युदाहरणत्वं वाच्यं, श्रीशैलशिखरं दृष्ट्वा सर्वपापैः प्रमुच्यतइत्येवमादीनां कर्तृभेदविषयाणां प्रयोगाणामसाधुत्वमेव। 'व्रजति जल्पति चेति'। यौगपद्यादिह पूर्वकालता नास्ति । 'अपूर्वकालत्वादिति' । पूर्वं ह्यसौ स्वपिति पश्चाद्व्याददाति यदैव हसति तदैव संमीलयति न वा स्वप्नस्यापरकालत्वात् अवश्यं त्वसौ व्यादाय मुहूर्त्तमपि स्वपिति संमील्य च हसति ततश्चोत्तरकालभाविस्वापहासाद्यपेक्षं पौर्वकाल्यं तदाश्रयश्च प्रत्ययः, इह

Digitized by Google

कस्मान्न भवति पूर्वं भुङ्क्ते ततो व्रजतीति स्वशब्देनोक्तत्वात्, विभाषाग्र- इत्यनेनापि न भवति किं कारणं साधनपौर्वकाल्यविषयाणामग्रयादीनां तत्र ग्रहणमन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा ततो व्रजतीति, इह तु व्रज्यपेक्षं भोजनस्य यत्पौर्वकाल्यं तत्र क्त्वाप्रत्ययश्चोच्यते तत्पूर्वशब्देनोक्तं, न च वचनसामर्थ्यादुक्तेपि प्रसङ्गः, साधनपौर्वकाल्यविषये ऽग्रयादावुपपदे चरितार्थत्वात् क्रियाविषयत्वाच्च कालव्यवहारस्य तद्द्वारकमेव साधनपौर्वकाल्यं द्रष्टव्यम्, उक्तं हि, क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिकेति, इहास्यते भोक्तुमिति वासरूपेण लड् भवति यदा ऽसेः क्त्वा भवति तदा भुजेर्लडादय एव भवन्ति आसित्वा भुङ्क्त इति न तु तुमुन् अनभिधानात् आसित्वा भोक्तुमित्युक्ते प्रक्रमत इत्यादिना सम्बन्धः प्रतीयते ॥

"आभीक्ष्ण्ये णमुल् च" ॥ 'द्विर्वचनसहिताविति'। केन पुनरत्र द्विर्वचनमित्याह। 'आभीक्ष्ण्ये द्वे भवत इत्युपसङ्ख्यानाद् द्विर्वचनमिति'। नित्यवीप्सयोरित्यत्र तु वामनो वक्ष्यति तिङ्क्षु नित्यता अव्ययकृत्सु चेति तन्मते नित्यग्रहणादेवात्र द्विर्वचनम्। 'पायंपायमिति'। आतो युक् ॥

"न यद्यनाकाङ्क्षे" ॥ 'अनाकाङ्क्ष इति'। पचाद्यजन्तेन नञ्समासः, तद्दर्शितम्। 'नापरं किञ्चिदाकाङ्क्षत इति'। क्त्वा तु पूर्वसूत्रविहितोपीति'। णमुल् चेत्युक्तं तदपेक्षं पूर्वत्वमपिशब्दादनन्तरसूत्रविहितोपि आभीक्ष्ण्येनाभीक्ष्ण्ये च क्त्वामात्रस्य प्रतिषेध इत्यर्थः। एतच्च पूर्वकाले यत्प्राप्नोति तन्न भवतीत्येवं प्रकरणापेक्षया प्रतिषेधविज्ञानाल्लभ्यते ॥

"विभाषाग्रेप्रथमपूर्वेषु" ॥ अग्रशब्दो देशविशेषवचनोप्यस्ति प्रभोरग्रे भुङ्क्त इति इह तु प्रथमशब्दसाहचर्यात्कालविशेषवाचिनो ग्रहणम्। अनुकरणत्वाच्चाग्रे इति विभक्तेर्लुगभावोऽस्य वामीयमिति यथा, 'आभीक्ष्ण्य इतिनानुवर्त्तत इति'। अप्राप्तविभाषेयमित्यत्रेयं युक्तिः, तदनुवृत्तौ हि पूर्वसूत्रेण प्राप्ते विभाषा स्याद् एवं च ब्रुवता साधनपौर्वकाल्यविषया अग्रयादय इत्युक्तं भवति, क्रियापौर्वकाल्ये हि अग्रयादिभिरेव तस्योक्तत्वादाभीक्ष्ण्येपि क्त्वाणमुलोरप्राप्तिरित्याभीक्ष्ण्यइत्यनुवृत्तावप्यप्राप्तविभाषैव स्यात्, न च द्विर्वचनमन्तरेणाभीक्ष्ण्यं द्योतयितुं शक्यमिति

न तद्द्योतनायापि क्त्वाणमुलोर्विधानमुपपद्यते । नन्वननुवर्तमानेप्याभीक्ष्ण्यग्रहणे पूर्वसूत्रस्यावकाशो यत्राग्र्यादयो न सन्ति अस्य तु यत्राभीक्ष्ण्यं नास्ति सोवकाशः, आभीक्ष्ण्ये चाग्र्यादिषु च सत्सूभयप्रसङ्गे परत्वादियमेव विभाषा प्राप्नोतीत्युभयत्र विभाषेयं युक्ता, एवं मन्यते पूर्वविप्रतिषेधेनाभीक्ष्ण्ये नित्य एव विधिर्भवतीति, अग्रेभोजंभोजं व्रजति अग्रेभुक्त्वाभुक्त्वा व्रजति, एवं पूर्वप्रथमयोरपि द्रष्टव्यम् । नन्वेवं णमुल्यप्राप्ते क्त्वाप्रत्यये तु समानकर्तृकयोरित्यादिना प्राप्ते सत्ययमारम्भ इति पुनरप्युभयत्रविभाषैव युक्ता, नैतदस्ति, सह विहितौ यौ क्त्वाणमुलौ यद्विषये वासरूपविधेरभावो ज्ञापयितुमिष्टस्तावनन्तरसूत्रविहितौ क्त्वाणमुलावभिप्रेत्याप्राप्तविभाषेयमुच्यते न तु क्त्वाणमुल्मात्रापेक्षया । 'क्त्वाणमुलौ प्रत्ययौ भवत इति' । किमर्थं पुनः क्त्वाविधीयते यावता नाभीक्ष्ण्येपि समानकर्तृकयोरित्येवासौ सिद्धः । सत्यं, विभाषाग्रहणेन वासरूपविधेरभावो ज्ञाप्यतइति वक्ष्यति न च केवलं णमुल्विधौ तदभावो ज्ञापयितुमिष्यते किं तर्हि क्त्वासहितणमुल्विधौ, तस्माण्णमुलः क्त्वासहितस्य विधिर्यथा स्यादिति णमुल् चेत्यनुवृत्त्या क्त्वोप्यनुवादः क्रियते, एवं हि द्वयोः सह विधातुमुपादीयमानं विभाषाग्रहणं तादृश एव विषये वासरूपविधेरभावं ज्ञापयतीति सिद्धमिष्टम् । 'अग्रेभोजं व्रजतीति' । अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीत्यर्थः । 'आभीक्ष्ण्ये लडादयो न भवन्तीति' । अग्रे भुङ्क्ते भुङ्क्ते ततो व्रजतीत्येवं न भवतीत्यर्थः । 'उपपदसमासः कस्मान्न[1] भवतीति' । प्राप्तविभाषायामस्यामग्र्यादीनां पक्षे प्रत्ययनिवृत्तौ निमित्तत्वं न तु प्रत्ययोत्पत्तौ तयोराभीक्ष्ण्ये णमुल् चेत्यनेनाविशेषेण विहितत्वादित्यनुपपदत्वमप्राप्तविभाषायां त्वग्र्यादीनां प्रत्ययोत्पत्तिं प्रति निमित्तत्वान्निमित्तस्य चोपपदसंज्ञाविधानादुपपदसमासः प्राप्नोतीति भावः । 'अमैव यत्तुल्यविधानमिति' । एतच्च तत्रैव व्याख्यातम् ॥

"कर्मण्याक्रोशे कृञः खमुञ्" ॥ उदाहरणेषु करोतिरुच्चारणे वर्तते तस्य शब्दात्मकमेव कर्म भवति तत्र चोरादिशब्दाः शब्दप्रधानाः

१ कस्मान्न क्रियते इति २ पु॰ पाठः ।

चोरङ्कारं क्रोशतीत्यत्र चोरशब्दमुच्चार्येत्यर्थस्तदाह । 'चोरोसीत्यादि' । 'चोरक-रणमिति' । चोरशब्दोच्चारणम् । 'आक्रोशसम्पादनार्थमिति' । निन्दितश-ब्दोच्चारणमन्तरेण तस्य सम्पादयितुमशक्यत्वात् । 'न त्वसाविति' । न हि चोरोसीति वचनेन चोरः क्रियते ॥

"स्वादुमि णमुल्" ॥ 'स्वादुमीत्यर्थग्रहणमिति' । एतच्च व्याख्या-नाल्लभ्यते । 'स्वाद्वर्थेष्विति' । मान्तत्वमपि सर्वेषां भवति अर्थे सम्भवात्, लवणसम्पन्नशब्दावपि स्वादुशब्दपर्यायौ । अथ स्वादुमीति मकारान्तनि-पातनं किमर्थं यावता खमुञ् प्रकृतः सोनुवर्त्तिष्यते तत्रारुर्द्विषदजन्तस्य मुमिति मान्तत्वं सिद्धमिति तत्राह । 'मकारान्तनिपातनमीकाराभावार्थ-मिति' । भावप्रत्ययविषये मान्तत्वे निपात्यमाने वोतो गुणवचनादिति ङीन्न भवति मकारान्तत्वादुकारान्तत्वाभावादित्यर्थः । 'च्व्यन्तस्येति' । खमुञ्यपि न सर्वत्र मुम् सिद्ध्यति तद्विधावनव्ययस्येत्यधिकारादिति भावः । एवं तर्हि मान्तत्वमेव निपात्यतां प्रत्ययस्तु प्रकृतः खमुञेव विधेयः, नैत-दस्ति, अव्ययार्थमेव मान्तनिपातनं स्यादिति ङीप्स्यादेव णमुलि तु मान्तत्वमपूर्वं विधीयमानमीकाराभावार्थं च च्व्यन्तस्य च मकारान्तार्थं विज्ञायते, अवश्यं चोत्तरत्र णमुल् विधेय इति लाघवाभावादिहैव कृतः । 'अस्वाद्वीं स्वाद्वीं कृत्वेति' । द्वयोर्वाक्ययोस्तन्त्रेणोपादानमेतत्, स्वाद्वीं कृत्वा यवागूं भुङ्क्ते इतीकाराभावस्योदाहरणम्, अस्वादुं स्वादुं भुङ्क्ते इत्यव्य-यस्य, इह यदि क्त्वादयः प्रत्ययाः कर्त्तरि कृदितिवचनात्कर्त्तरि स्युः, इह पक्त्वोदनो भुज्यते देवदत्तेनेति देवदत्तात्तृतीया न स्यात् क्त्वाप्रत्ययेनाभि-हितः कर्त्तेति, अथ क्त्वाप्रत्ययेनाभिधाने सत्यपि भुजिप्रत्ययेनानभिहितः कर्तेति कृत्वानभिहिताश्रया विभक्तिर्भवति तृतीया, यद्येवमोदने द्वितीया प्राप्नोति किं कारणं भुजिप्रत्ययेनाभिधानेपि क्त्वाप्रत्ययेनानभिहितं कर्मेति तथा यदि कर्मणि स्युः पक्त्वौदनं भुङ्क्ते देवदत्त इति देवदत्तात्तृतीया प्राप्नोति ओदनात्प्रथमा पक्त्वोदनो भुङ्क्ते देवदत्तेन पक्त्वौदनं भुङ्क्ते देवदत्त इत्येव तु भवति तथास्मिन् णमुल्यपि स्वादुंकारं भुज्यते यवागूर्देवदत्ते-नेति यवाग्वा द्वितीया न भवति स्वादुङ्कारं यवागूं भुङ्क्ते देवदत्त इत्य

Digitized by Google

त्रापि कर्मणि द्वितीया भवति कर्त्तरि तृतीया च न भवति, एवमा तुमुनो द्रष्टव्यं, तथा तुमुन्ण्वुलौ क्रियायां क्रियार्थायां समानकर्तृकेषु तुमुन्नित्य-त्रापि तुमुनि भोक्तुमोदनः पच्यते देवदत्तेन इष्यते ग्रामो गन्तुं देवदत्तेन भोक्तुमोदनं पचति देवदत्तः ग्रामं गन्तुमिच्छति देवदत्त इति सर्वत्रानुप्र-योगाद्यत्र लादयस्तदनुरोधेनैव कर्तृकर्मणोर्विभक्तिर्भवति, तस्मादव्ययकृतः समानाधिकरणइति वक्तव्यं, केन समानाधिकरणे, अनुप्रयोगेण, एतदुक्तं भवति, अनुप्रयुज्यमानाद्धातोर्यस्मिन्कारके लादयो विहितास्तत्रैवाव्ययकृ-तोपि भवन्तीति, एवं क्त्वाभ्यां कर्तृकर्मणोरभिहितत्वाद्यथायथं विभ-क्तयः सिद्ध्यन्ति, वृत्तिकारस्त्विममर्थमन्यथा साधयितुमाह । 'तुमर्थाधिका-राच्चेति'। तत्र सयादिसूत्रे तुमर्थग्रहणात्तुमुन् भावे भवतीति ज्ञापितं तदेव च तुमर्थग्रहणं शकधृषज्ञेति यावदनुवर्त्तते ऽतः सर्वएते क्त्वादयो भावे भवन्तीति तत्र चोदयति । 'यद्येवमिति'। 'तृतीया कस्मान्न भवतीति'। एतच्चोपलक्षणं स्वादुङ्कारं यवागूर्भुज्यते देवदत्तेनेत्यत्र कर्मणि द्वितीया कस्मान्न भवतीत्यपि द्रष्टव्यम्, अनभिहितइति पर्युदासे चैतच्चोद्यं तदा हि सत्यभिधानेनभिधाने च यतोनभिधानं तदाश्रया विभक्तिः प्राप्नोति, परिहरति । 'भुजिप्रत्ययेनेति'। अनभिहितइति प्रसज्यप्रतिषेध आश्रीयत-इति भावः । तदा हि यतोभिधानं तदाश्रयः प्रतिषेधो भवति । ननु च शक्तिः कारकमन्या च करणविषया शक्तिरन्या च भुजिविषया तत्र यद्ये-कस्याः शक्तेरभिधानमनभिधानं च स्यात्स्यादयं परिहारः, यतोभिधानं तदाश्रयः प्रतिषेध इति शक्तिभेदात्त्वयुक्त इत्यत्राह । 'न चास्मिन्निति'। किं कारणं भेदो न विवक्षित इत्याह । 'समानकर्तृकत्वं हि विवक्ष्यत-इति'। ननु च मा नामास्मिन्प्रकरणे शक्तिभेदो विवक्षितोऽनभिहितइत्यत्र कस्मान्न विवक्ष्यते, असंबद्धमेतत्, कथं हि तस्मिन्नेव प्रयोगे तदेव विवक्षा-विवक्षे स्यातां, किञ्चानभिहितइत्येकत्वादीनामाधारनिर्देशो ऽनभिहिते कर्मादौ यदेकत्वादि तत्रेति द्रव्यमेव चैकत्वादीनामाधारो न शक्तिरतस्त-त्रापि द्रव्यमेवानभिहितमित्युच्यते तस्य च शक्तिद्वारेणाभिधानानभिधा-नयोः सतोर्यतोभिधानं तदाश्रयः प्रतिषेधो भवतीति युक्तमेव । अभ्युपेत्यापि

Digitized by Google

शक्तिभेदविवक्षां परिहारमाह। 'प्रधानशक्त्यभिधाने चेति'। आख्यातपद- वाच्या क्रिया विशेष्यत्वात्प्रधानं विशेषणभूता त्वप्रधानं तद्द्वारेण तद्विषययोः शक्त्योरपि गुणप्रधानभावः, तत्र प्रधानानुवर्तित्वाद्गुणानां तन्मुखप्रेक्षित्वा- त्तद्विरुद्धस्वकार्यारम्भाभावात् यथायथं विभक्तिसिद्धिरित्यर्थः। उक्तं च

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ॥

इति। वयं तु ब्रूमः सकृच्छ्रुतस्य युगपदुभाभ्यां सम्बन्धाभावादे- केनैव प्रधानेन शाब्दोऽन्वय इति इतरेण तु सन्निधानादार्थ इति ॥

"अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्" ॥ 'कथं पुनरसौ सिद्धा- प्रयोग इति'। सिद्ध ओदन इत्यादौ सिद्धशब्दो निष्पन्नवचनः, ततश्च सिद्ध- श्चेदप्रयोगः कथमप्रयुज्यमानात्ततो णमुल्विधिरिति प्रश्नः, सिद्धे सत्या- रम्भो नियमार्थ इतिवत्प्राप्तवचनः सिद्धशब्द इत्युत्तरम्। 'निरर्थकत्वादि- ति'। निष्प्रयोजनत्वात्। 'एवमेवेति'। निरर्थक एव सन्नित्यर्थः। एतदेव स्फोरयति। 'अन्यथा भुङ्क्त इति'। 'यावानर्थ इति'। उदाहरणेष्वनुप्र- योगेषु या क्रिया तत्प्रकारवचना अत्रान्यथादयः। 'अन्यथा कृत्वा शिरो भुङ्क्त इति'। अत्र तु विना करोतिना शिरसोऽन्यथा करणं न प्रतीयते भुजिक्रियागत एव प्रकारो गम्यते ऽतोऽवश्यं प्रयोज्यः करोतिः ॥

"यथातथयोरसूयाप्रतिवचने" ॥ 'यदसूयन् पृच्छति प्रतिवक्तीति'। पृच्छति सति यदसूयन्प्रतिवक्तीत्यर्थः, असु मानसोपतापे कण्ड्वादिः। 'तत्रेति'। एवं भूते विषये यत्प्रतिवचनं तदसूयाप्रतिवचनमित्यर्थः। 'यथा- कारमिति'। प्रष्टुमनर्हः सन्यदि पृच्छति तदेदमुत्तरम्। 'यथा कृत्वाहं भोक्ष्य इति'। तत्त्वकथनमेतत्। कथं पुनरत्र क्त्वाप्रत्ययो यावता सिद्धा- प्रयोग इति वचनादनर्थकोऽत्र करोतिः, ततश्च भेदनिबन्धनस्य पौर्वकाल्यस्य समानकर्तृकत्वस्य चाभावान्नात्र प्राप्नोति, णमुल् पुनरुभयाभावेपि वचन-

सामर्थ्याद्भवति, उच्यते, क्रियासामान्यवचनः करोतिस्तद्विषयप्रकारो यथा॰ तथाशब्दाभ्यामुच्यते तत्र सामान्यस्य सन्निहिते विशेषे पर्यवसानात्तद्विषय एव प्रकार उक्तो भवति ततश्च यथा भोक्ष्यतइति यावानर्थस्तावानेव सत्यपि करोतावित्येतावता सिद्धाप्रयोगत्वमुच्यते न पुनरत्यन्तमभिधेयाभावात्, ततश्च क्रियाभेदनिबन्धन उपपन्न एव क्त्वाप्रत्ययः, एवं च कृत्वा पूर्वसूत्रेपि वासरूपेण क्त्वा भवति, भाष्येपि तत्र तत्र प्रयुज्यते अन्यथा कृत्वा चोदितमन्यथा कृत्वा परिहार उक्तः, कथं कृत्वा बाधकमित्यादि ॥

"कर्मणि दृशिविदोः साकल्ये" ॥ 'कर्मण्युपपदे साकल्यविशिष्टइति'। सकलस्य भावः साकल्यं तद्विशिष्टे कर्मण्युपपदइत्यर्थः। 'कन्यादर्शं वरयतीति'। अत्र दर्शनविषयभूतानां सर्वासामेव कन्यानां वाक्यार्थेनान्वयात्साकल्यं, सर्वाः कन्या वरयतीत्यत्रापि दर्शनविषयभूता इत्यर्थः, अतिशयप्रतिपादनपरं चैतत्, यस्मात्कस्याश्चित्परित्यागेपि भवत्येव। 'जानाति लभते विचारयति वेति'। सत्तार्थस्य तु विदेरकर्मकत्वादग्रहणमिति भावः ॥

"यावति विन्दजीवोः" ॥ विन्देति विदेर्लाभार्थस्यानुकरणं तस्य हि विन्दतीत्यादौ शे मुचादीनामिति नुमस्ति। 'यावल्लभते तावद् भुङ्क्ते इत्यर्थ इति'। एतेनासाकल्यं दर्शयति साकल्ये हि पूर्वेणैव सिद्धम् ॥

"चर्मोदरयोः पूरेः" ॥ कर्मणीत्यनुवृत्तेः पूरेरिति ण्यन्तस्येदं ग्रहणं केवलस्याकर्मकत्वादित्याह। 'पूरयतेरिति'। 'उदरपूरं भुङ्क्तइति'। उदरं पूरयन् भुङ्क्तइत्यर्थः। एवमादिषु प्रायेण पौर्वकाल्यं नास्ति तस्मात्पूर्वकालइति न सम्बन्धनीयमित्याहुः ॥

"वर्षप्रमाणऊलोपश्चास्यान्यतरस्याम्" ॥ 'गोष्पदपूरमिति'। गोः पदं पूरयन्वृष्ट इत्यर्थः, वृषेरकर्मकत्वात्कर्त्तरि क्तः, अत्रापि पूर्वकालइति न सम्बन्धनीयमित्याहुः। 'सीतापूरमिति'। सीता लाङ्गलपद्धतिः। 'अस्य ग्रहणं किमर्थमिति'। सन्निधानादेव पूरयतेरूलोपो विज्ञास्यतइति

प्रश्नः । 'उपपदस्य मा भूदिति' । अस्येत्यनुच्यमाने वर्षप्रमाणवदूलोपोपि समुदायविषयो विज्ञायेत प्रकृत्युपपदसमुदाये सन्निहितो य ऊकारस्तस्य लोप इति ततश्चोपपदस्यापि स्यादिति भावः । ऊलोपश्चास्यान्यतरस्यामिति शक्यमकर्तुं, कथं गोष्पदप्रमिति, प्रा पूरणइत्यस्माद्धातोरातोनुपसर्गे कः क्रियाविशेषणत्वात्कर्मत्वनपुंसकत्वे, न रूपभेदो नार्थभेदो न स्वरभेदः कप्रत्यये थाथादिसूत्रेणान्तोदात्तत्वं णमुल्यूलोपे कृते पूर्वस्य स्वरभाजोभावाल्लितीत्यस्याप्रवृत्तौ प्रत्ययस्वरस्तस्य कृदुत्तरपदप्रकृतिस्वरेणावस्थानमित्यन्तोदात्तत्वमेव, ननु च णमुलि सति कृन्मेजन्त इत्यव्ययत्वाद्विभक्तीनां श्रवणं न भवति तरपि च गोष्पदप्रतरमिति भवति, कल्पबादौ च गोष्पदप्रकल्प इति भवति, अज्ञातादिषु चाव्ययत्वादकच्भवति के तु सति सर्वमेतन्न सिद्ध्यति, उच्यते, इष्यते तावद्विभक्तीनां श्रवणमेकेन गोष्पदप्रेणेति तरबादिषु चोपन्यस्तानि रूपाणि नेष्यन्तएव, एतच्च भाष्ये ऊलोपप्रत्याख्यानादवसीयते । ननु च गोष्पदपूरमित्याद्यपि घञैव सिद्धं न सिद्ध्यति यदि तावत्करणे घञं विधाय तदन्तेन कर्मणि षष्ठ्याः समासः क्रियते ततस्थाथादिस्वरेणान्तोदात्तत्वं स्यादथ भावे घञि व्यधिकरणपदोबहुव्रीहिः क्रियते गोष्पदस्य पूरणमस्मिन्वर्षेइति ततः पूर्वपदप्रकृतिस्वरप्रसङ्गः, गोष्पदपूरन्तरां गोष्पदपूरङ्कल्पमित्यादि न च सिद्ध्यति तस्माद्वर्षप्रमाण इति वक्तव्यम् ॥

"चेले क्नोपेः" ॥ 'अस्माद्धातोर्ण्यन्तादिति' । पुका निर्द्देशादेव ण्यन्तत्वमवसीयते, व्याख्यानाच्चेल इत्यर्थग्रहणमित्याह । 'चेलार्थेष्विति'। 'चेलक्नोपं वृष्ट इति' । चेलं क्नोपयन् शब्द.ययन्वृष्ट इत्यर्थः, यथा वर्षेण चेलानि शब्दायन्ते तथा वृष्ट इति यावत् ॥

"निमूलसमूलयोः कषः" ॥ अत्र प्रकरणे समानकर्तृकत्वमेव । 'निमूलकाषमिति' । कषतिर्हिंसार्थः । एकस्यैव धात्वर्थस्य सामान्यविशेषभावेन भेदे सति विशेषणविशेष्यभावः, निगतं मूलमस्य निमूलं, सह मूलेन समूलं कषणं करोति, सह मूलेन कषतीत्यर्थः । एवं सर्वत्र प्रकरणे द्रष्टव्यम् ॥

"समूलाकृतजीवेषु हन्कृञ्ग्रहः" ॥ 'जीवग्राहमिति' । जीवतीति जीवः, इगुपधलक्षणः कः, जीवन्तं गृह्णातीत्यर्थः ॥

"करणे हनः" ॥ 'नित्यसमासार्थं चेति' । हिंसार्थानामित्यनेन णमुलि तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पितः समासः स्याद् अतो हिंसार्थेप्यनेनैव णमुलेषितव्य इत्यर्थः । कथं पुनरिष्यमाणोपि लभ्यते, यावता ऽहिंसार्थे हन्तौ सावकाशोयं विधिर्हिंसार्थानामित्यस्य तु हन्तिव्यतिरिक्तो हिंसार्थो ऽवकाशः, हिंसार्थे हन्तावुभयप्रसङ्गे परत्वात्स एव विधिः प्राप्नोति तत्राह । 'पूर्वविप्रतिषेधेनेति' । कथं तर्हि हिंसार्थानामित्यत्रोदाहरिष्यते दण्डोपघातं गाः कालयति दण्डेनोपघातं वेति । अत्राहुः । यत्रैक एव धात्वर्थः सामान्यविशेषभावेन भिद्यमानो विशेषणविशेष्यभावमनुभवति सोस्य विषयः, कषादिषु यथाविध्यनुप्रयोग इति वचनात्, अत्यन्तभिन्नधात्वर्थसम्बन्धे तु तेनैव णमुल् भवतीति, एवं च नित्यसमासार्थो यथाविध्यनुप्रयोगार्थश्चेति, कोर्थः, यथाविध्यनुप्रयोगार्थः सन्नित्यसमासार्थ इत्यर्थः । इह द्विर्हन्ग्रहणं समूलग्रहणं च क्रियते सकृदेव तु शक्यं कर्त्तुं, कथम्, एवं वक्ष्यामि जीवाकृतयोर्ग्रहकृञः, शुष्कचूर्णरूक्षेषु पिषः, निमूले कषः, समूले हनश्च, चकारात्कषश्च, ततः करणे हन इत्येव, यदेतत्कषादिषु यथाविध्यनुप्रयोग इति एतद्ग्रहादिष्विति वक्तव्यं, तथा तु न कृतमित्येव ॥

"स्नेहने पिषः" ॥ व्याख्यानात्स्नेहनद्रव्यार्थग्रहणमित्याह । 'स्नेहनवाचिनीति' । 'उदपेषमिति' । पेषंवासवाहनधिषु चेत्युदकस्योदभावः, शुष्कचूर्णेत्यत्र स्नेहनग्रहणं न कृतं कर्मणि तत्र प्रत्यय इह तु करणे ॥

"हस्ते वर्त्तिग्रहोः" ॥ जीवे ग्रहः, हस्ते च, वर्त्तेश्चेति, नोक्तं तत्र कर्मोपपदमिह तु करणम् । 'वर्तिर्ण्यन्त इति' । निर्द्देश एवात्र प्रमाणम् । 'हस्तवर्त्तं वर्त्तयतीति' । हस्तेन वर्त्तयति गुलिकां करोतीत्यर्थः ॥

"स्वे पुषः" ॥ 'स्वपोषमिति' । 'पित्पर्यायवचनस्य चेति' । स्वरूपेपि भवति ॥

"सञ्ज्ञायाम्" ॥ अनधिकरणार्थोयमारम्भः, पूर्वयोगस्त्वसञ्ज्ञार्थः, कथं तर्हि ग्रामे बन्ध इति, वासरूपविधिना घञ् भविष्यति ॥

"कर्त्रोर्जीवपुरुषयोर्नशिवहोः" ॥ 'जीवेन नष्ट इति'। जीवेन करणेनापदं प्राप्त इत्यर्थः। 'पुरुषेणोढ इति'। पुरुषेण करणेन देशान्तरं प्रापितो देवदत्तादिरित्यर्थः ॥

"ऊर्द्ध्वे शुषिपूरोः" ॥ 'ऊर्द्ध्वशोषं शुष्यतीति'। वृक्षादिरूर्द्ध्व एव तिष्ठन् शुष्यतीत्यर्थः। 'ऊर्द्ध्वः पूर्यतइत्यर्थ इति'। ऊर्द्ध्वमुख एव सन् घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः ॥

"उपदंशस्तृतीयायाम्" ॥ इतः प्रभृति पौर्वकाल्यमप्यस्ति। 'मूलकोपदंशं भुङ्क्तइति'। ननु च नात्र तृतीयान्तस्योपदंशिना संबन्धः, नहि मूलकेनान्य उपदश्यते किं तर्हि तदेवोपदश्यते, भुजिना तु संबन्ध उपपद्यते तम्प्रति करणत्वात् किं तूपदंशिना सामर्थ्याभावात्प्रत्ययो न प्राप्नोति उपपदसञ्ज्ञा च न स्यात् तदभावादुपपदसमासोपि न प्राप्नोति, वचनस्य तु दशनैरुपदश्य भुङ्क्तइत्यादिरवकाशः स्यादित्यत आह। 'मूलकादि चेति'। सत्यं मूलकादेर्भुजिनैव शाब्दोन्वय उपदंशिना तु कर्मापेक्षायां सन्निधानाद्योग्यत्वाच्च वस्तुतः संबन्धोस्त्येव, भुजिं प्रति करणत्वमन्यथा नोपपद्यते, ततश्चायमर्थः, मूलकेन भुङ्क्ते किं कृत्वोपदश्य, किमुपदश्य तदेव मूलकमिति, यदि तु यत्र तृतीयान्तेनैव शाब्दोन्वयस्तत्रैवायं प्रत्ययोभिमतः स्यात् करणइत्येव ब्रूयाद् यथा करणे हन इति, तस्मादार्थेन संबन्धेन सामर्थ्ये सति प्रत्ययादिकं सर्वं भविष्यति ॥

"हिंसार्थानां च समानकर्मकाणाम्" ॥ धातुसंबन्धइत्यधिकारादनुप्रयोगधातुना समानकर्मत्वं विज्ञायतइत्याह। 'अनुप्रयोगधातुना समानकर्मकाणामिति'। 'कालयति'। काल विक्षेपे चुरादिः। 'दण्डताडमिति'। तड आघाते चुरादिरेव। 'उपहत्येति'। वा ल्यपीत्यनुनासिकलोपः, ह्रस्वस्य तुक् ॥

"सप्तम्याञ्चोपपीडरुधकर्षः" ॥ 'उपशब्दः प्रत्येकमिति'। पीडादीनां समाहारद्वन्द्वं कृत्वोपपूर्वः पीडरुधकर्ष इत्युत्तरपदलोपी समासः,

Digitized by Google

सौत्रः पुल्लिङ्गनिर्देशः, करणाधिकरणविवक्षाभेदेनोपपदेषु विभक्तिद्वयम् । कर्षतेरिति भौवादिकस्य न कृषतेरिति तौदादिकस्य शपा निर्देशात्, शपा निर्देशस्तु विहितगुणस्योच्चारणाद्विज्ञायते, सूत्रे तु पञ्चम्यर्थे प्रथमा, किञ्च स्याद्यदि तौदादिकस्य ग्रहणं स्यात् यावताभयोरपि विलेखनार्थत्वाचार्थभेदो नापि रूपभेदः, यद्यप्युभयोरपि विलेखने पाठस्तथापि तौदादिकस्य क्षेत्रविषये विलेखने वृत्तिः पञ्चभिर्हलैः कृषतीति, तेन क्षेत्रे उपकृष्य हलेनोपकृष्येति तौदादिकात्क्त्वाप्रत्यय एव भवति न णमुल् ॥

"समासत्तौ" ॥ 'सप्तम्यां तृतीयायामित्यनुवर्त्ततइति' । पूर्वसूत्रेपि स्वरितत्वादेव तृतीयानुवर्त्तते सप्तम्यां तु तस्या निवृत्तिर्मा विज्ञायीति चकारः क्रियते, तेन चानुकृष्टमुत्तरत्र नानुवर्त्ततइति न चोदनीयम् । 'युद्धसंरम्भादिति' । कोपादिना मनःक्षोभपूर्वको वाक्कायविकारः संरम्भः, युद्धार्थः संरम्भो युद्धसंरम्भः, अश्वघासादिवत्षष्ठीसमासः । 'अत्यन्तं सन्निकृष्य युद्ध्यन्तइत्यर्थ इति' । सन्निकर्षप्रतिपादनपरमेतत्क्लेशग्रहणं भवतु मा वा भूदिति ॥

"प्रमाणे च" ॥ 'तृतीयासप्तम्योरित्येवेति' । अर्थानुवृत्तिप्रदर्शनमेतत्, नह्येवंविधः शब्दः प्रकृतोस्ति । 'द्व्यङ्गुलोत्कर्षमिति' । द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलं तत्पुरुषस्याङ्गुलेरित्यच् समासान्तः, द्व्यङ्गुलेनोत्कृष्य परिच्छिद्येत्यर्थः, ह्रस्वाः खण्डाः खण्डिकाः ।

"अपादाने परीप्सायाम्" ॥ 'परीप्सा त्वरेति' । ञित्वरा सम्भ्रमे घटादिः, घटादयः षितः, षित्त्वादङ् । 'शय्योत्थायमिति' । उदः स्थास्तम्भोरिति तिष्ठतिसकारस्य तकारः, पूर्ववद्णमुल् 'अवश्यकर्त्तव्यमपीति' । अक्षिप्रक्षालनादिकम् । 'द्वितीयायां परीप्सायामित्येवेति' । अनुदात्तं पदमेकवर्जमित्यत्रापि परीप्सा भवत्येव, कथं परिभाषेयं पदग्रहणं च परिभाषार्थं तेनोदात्तः स्वरितो वा यत्र विधीयते तत्र तत्समकालमेवैकमचं वर्जयित्वा परिशिष्टमनुदात्तं कर्त्तव्यं न विलम्बितव्यमिति ॥

"स्वाङ्गे ध्रुवे" ॥ स्वाङ्गलक्षणं चतुर्थे वक्ष्यते अद्रवन्मूर्त्तिमदित्यादि । 'अक्षिनिकाणमिति' । कण निमीलने चुरादिर्निपूर्वः । 'उत्क्षिप्य शिरः क-

यतीति'। ननु च ध्रुवमिति नित्यमुच्यते ध्रुवा द्यौर्ध्रुवा पृथिवीति यथा, अध्रुवमनित्यं शिरश्चाप्यनित्यमेव प्राणिनामेवानित्यत्वादत आह। 'यस्मिन्नङ्ग इति'। अयं भावः। विशेषणसामर्थ्यात्प्रकर्ष आश्रीयते प्रकर्षेण यदध्रुवमिति, प्रकर्षश्च जीवत्यपि प्राणिनि कदा चिदभाव इति॥

"परिक्लिश्यमानसिद्धौ च"॥ 'परिक्लिश्यमानइति'। क्लिश विबाधनइत्येतस्यैतद्रूपं न तु क्लिश उपतापइत्यस्य, परिश्च सर्वतो भावइत्याह। 'परिक्लेशः सर्वतो विबाधनमिति'॥

"विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः"॥ 'अनवयवेनेति'। साकल्येन। 'पदार्थानामिति'। गेहादीनाम्। 'तात्पर्यमिति'। पौनःपुन्यमाभीक्ष्ण्यमित्यर्थः, द्रव्ये व्याप्तिरित्यादिना व्याप्त्यासेवयोर्विषयविभागं दर्शयति। 'गेहानुप्रवेशमिति'। ननु व्याप्तौ वीप्सा गम्यते आसेवायां च नित्यत्वमिति नित्यवीप्सयोरिति द्विर्वचनं प्राप्नोति तत्कस्मान्न भवतीत्याह। 'समासेनेति'। यद्यपि समास एतयोरर्थयोर्न विधीयते तथापि स्वभावत एतयोस्तेनाभिधानं यथा सप्तपर्ण इति, पर्वगताया वीप्सायाः पर्वणिपर्वणि सप्तपर्णान्यस्येति। 'तथा च वक्ष्यतीति'। नित्यवीप्सयोरित्यत्र वक्ष्यति भाष्यकारः। 'तिङ्क्षु नित्यतेति'। उपलक्षणमव्ययकृत्सु चेत्यपि द्रष्टव्यम्। 'क्त्वानिवृत्त्यर्थमिति चेदिति'। आभीक्ष्ण्ये णमुल् चेत्यनेन क्त्वाणमुलौ द्वावपि विहितौ तत्र विश्यादिभ्यो णमुलेव यथा स्यात् क्त्वाप्रत्ययो मा भूदित्येवमर्थं पुनर्णमुलुच्यतइति चेदित्यर्थः। दूषयति। 'नेष्टत्वादिति'। इष्यते ह्यासेवायां विशिप्रभृतिभ्यः क्त्वा गेहमनुप्रविश्यानुप्रविश्यास्तइति। 'द्वितीयोपपदार्थं तर्हीति'। अत्र हि द्वितीयायां चेत्यधिकाराद् द्वितीयान्तस्योपपदसंज्ञा लभ्यते, किमर्थं पुनरुपपदत्वमिष्यतइत्याह। 'उपपदसमास इति'। तृतीयाप्रभृतीन्यन्यतरस्यामिति वचनात्पक्षइत्युक्तम्। 'तेन हि सत्युपपदाभाव इति'। सप्तमीस्थस्य कस्य चिदभावात्॥

"अस्यतितृषोः क्रियान्तरे कालेषु" ॥ असु क्षेपणे ञितृषा पिपासायाम् । 'क्रियामन्तरयतीति क्रियान्तर इति' । व्यवधानवाचिनोन्तरशब्दात्तत्करोतीति णिचि कर्मण्यण् । 'पाययतीति' । पिबतेर्णिचि शाच्छासाह्वेत्यादिना युक् । 'अत्यसनेनेत्यादि' । यच्चाद्य पानं यच्च द्व्यहे गते भविता तन्मध्यवर्त्तित्वादत्यसनतर्षणयो,रेतदेव स्पष्टयन्नुदाहरणस्यार्थमाह । 'अद्य पाययित्वेत्यादि' । 'द्व्यहमुपोष्येति' । उपपूर्वाद्वसेः क्त्वो ल्यप्, यजादित्वात्सम्प्रसारणं, शासिवसिघसीनां चेति षत्व, मन्त्रोपवासेन भोजनं व्यवधीयते । 'अहरिति' । कालाध्वनोरिति द्वितीया । कृत्स्नमहरिषूनत्यस्य क्षिप्त्वा गत इत्यर्थः । 'योजनमत्यस्येति' । क्व चित्प्रपादौ पाययित्वा ततो योजनमतिक्रम्य पाययतीत्यर्थः ॥

"नाम्न्यादिशिग्रहोः" ॥ 'आदिशेर्ग्रहेश्चेति' । एतेनाङो दिशिनैव सम्बन्धो न ग्रहिणेति दर्शयति ॥

"अव्यये ऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ" ॥ अयथाभिप्रेताख्यानइति नञः प्रश्लेषः पश्चान्निर्द्देशाद्विज्ञायते, अन्यथा ऽसन्देहार्थं पूर्वं निर्द्दिशेत्, अयथाभिप्रेतशब्दश्चाख्यानक्रियाविशेषणं, यथाभिप्रेतं न भवति तथाख्यानइत्यर्थः, पुत्रजन्म प्रार्थयमानं ब्राह्मणं गत्वा केन चिद्गोपनीयवचोभिराख्यातं ब्राह्मण पुत्रस्ते जात इति तममृष्यमाणो ब्राह्मण आह । 'किं तर्हीति' । पुत्रजन्माख्यानस्य प्रियत्वेपि आख्यानप्रकारस्यानभिप्रेतत्वाद्भवत्युदाहरण,मत एवायथाभिप्रेताख्यानइत्युक्तं न पुनरप्रियाख्यानइति । 'आचक्षइति' । लट् स्वासस्से शपो लुकि स्कोः संयोगाद्योरिति ककारलोपः, षढोः कः सि, उदाहरणे ऽयथाभिप्रेताख्यानं दर्शयति । 'उच्चैर्नामेति' । नामशब्दः प्रसिद्धौ न पुनरिदं ब्राह्मणवाक्यमुक्तमिति उपदंशस्तृतीयायामित्यत्रेदमुक्तम् । 'समासार्थं वचनमिति' । एतदेवोपपादयति । 'तथाहीति' । क्त्वा चेत्यत्र तृतीयाप्रभृतीन्यन्यतरस्यामिति वर्त्तते तस्मादनेन यः क्त्वा विहितस्तेनैव पक्षे समासो लभ्यते न तु समानादिसूत्रविहितेन, नहि तेन तृतीयाप्रभृतिषूपपदेषु क्त्वाविधीयतइत्यर्थः । णमुलग्रहणमनर्थकं प्रकृतो ह्यसौ तत्र क्त्वा चेति वक्तव्यमित्यत आह । 'णमुलधि-

कार इत्यादि'। तुल्यकक्षत्वं, तुल्यबलत्वम्। 'तेनेत्यादि'। यदि तु चकारेण यत्नेन णमुलनुकृष्येत उत्तरत्र नानुवर्त्तेत यत्नाभावात्, पुनर्णमुल्ग्रहणे तु द्वन्द्वनिर्दिष्टयोर्द्वयोरप्युत्तरत्रानुवृत्तिः सिद्धा भवति॥

"तिर्यच्यपवर्गे"॥ 'तिर्य्यक्कृत्येति'। तिरोऽञ्चतीति ऋत्विगित्यादिना क्विन्, तिरसस्तिर्यलोपइति तिर्यादेशः, व्युत्पत्तिमात्रं चैतच्च त्वत्रावयवार्थोऽस्ति समुदायो ह्ययमपवर्गे वर्त्तते तद्दर्शितम्। 'समाप्य गत इत्यर्थ इति'। 'तिर्यक्कृत्वेति'। अनृजु कृत्वा ऽग्रतः स्थितं पार्श्वे चिप्त्वेत्यर्थः, तिर्यचीत्ययुक्तोऽयं निर्द्देशः भसंज्ञायां सत्यामच इत्यकारलोपे तिरश्चीति भवितव्यमत आह। 'तिर्यचीति'। 'शब्दानुकरणमेतदिति'। अच इत्यर्थवतोऽजित्यस्य ग्रहणं स चार्थो लोकप्रसिद्धो गृह्यते, अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुता इति न्यायात्, अतो ऽञ्चेः स्वार्थे वर्त्तमानस्याल्लोपः, एतत्तु तत्र स्थितस्य शब्दरूपस्यानुकरणं तेनानुकार्येण रूपेणार्थवत्त्वं तु लौकिकार्थेन तेन लोपाभाव इति भावः। नन्वेवमपि प्रकृतिवदनुकरणं भवतीति लोपः प्राप्नोत्येवात आह। 'न च प्रकृतिवदनुकरणेन भवितव्यमिति'। कस्मादित्याह। 'अनुक्रियमाणरूपविनाशप्रसङ्गादिति'। यादृशं रूपमनुकर्त्तुमिष्टं तादृशं न प्रतीयेत लौकिक एव त्वर्थः प्रतीयेतेत्यर्थः, क्व च यथा प्रकृतिवदनुकरणं न भवतीत्याह। 'एतदोशित्यादि'। यद्यनुक्रियमाणरूपविनाशेऽपि प्रकृतिवदनुकरणं स्यादेतदः अदस इत्यत्रोभयत्रापि त्यदाद्यत्वादिके प्रकृतिकार्ये सति एतस्यामुष्येति रूपं स्यात्। ननु प्रयोजनानुवर्त्ति प्रमाणं ततश्चेल्लोपः प्राप्नोति कर्त्तव्य एवायं कथं यत्तदेतेभ्य इति त्यदाद्यत्व,मस्य वामीयमिति यस्येति लोपः, गवित्ययमाहेत्यवादेशः पटिति करोतीत्यनुक्रियमाणरूपविनाशे सत्यप्यव्यक्तानुकरणस्यात इताविति पररूपत्वं वा भवति तस्मादुभयथा निर्द्देशदर्शनात्क्वचित्प्रकृतिवदनुकरणं भवति क्वचिन्नेति वाच्यं तथा चास्मिन्नेव सूत्रे भाष्यं सौत्रो निर्द्देश इति॥

"स्वाङ्गे तस्प्रत्यये कृभ्वोः"॥ तस्प्रत्ययइति बहुव्रीहिनिर्द्देश इत्याह। 'तस्प्रत्ययो यतः स्वाङ्गात्तदेवमुच्यत इति'। न च क्विन्प्रत्ययस्य

Digitized by Google

कुरितिवत्कदा चित्तस्प्रत्ययान्तत्वेन दृष्टे संप्रत्यतदन्तेपि स्वाङ्गे प्रसङ्गः' तस्प्रत्ययग्रहणसामर्थ्यात् कर्मधारयो वायं तस्प्रत्यये परतो यत्स्वाङ्गं तस्मिन्नुपपदइति, वृत्तौ तु वस्तुमात्रं प्रदर्शितम् । 'यथासंख्यमत्र नेष्यतइति' । व्याख्यानात् । 'मुखत इति' । आद्यादित्वात्सप्तम्यर्थे तसिः । 'मुखे तस्यतीत्यादि' । ननु उपद्दय इत्यस्मान्मुखशब्दउपपदे अन्येभ्योपि दृश्यतइति क्विप्, मुखतः, अत्वसन्तस्य चेति दीर्घो न भवत्यधातोरिति प्रतिषेधात्, प्रत्ययाप्रत्ययपरिभाषयैवात्राप्रसङ्गात् नार्थः प्रत्ययग्रहणेन ॥

"नाधार्थप्रत्यये च्व्यर्थे" ॥ 'नार्थो धार्थश्चेति' । नाधासहचरितोर्थो नाधाशब्दाभ्यामुक्तः, नार्थो यस्य स नार्थः नार्थार्थ इत्यर्थः, एतेन धार्थो व्याख्यातः । 'प्रत्ययो यस्मादिति' । यदि पञ्चम्या विग्रहः क्रियते ततः प्रकृतेरुपलक्षणं नाधार्थग्रहणं स्यादिति सम्प्रत्यतदन्तत्वेपि प्रकृतिमात्रे प्रसङ्गः, न प्रसङ्गः, एवं हि विनञ्सङ्ख्यास्विति वक्तव्यं स्यात्, षष्ठ्या विग्रहः कर्त्तव्यः नाधार्थः प्रत्ययो यस्य समुदायस्यावयव इति, ल्यब्लोपे वा पञ्चमी व्याख्येया, यं समुदायमुद्दिश्य नाधार्थः प्रत्ययो विधीयतइति । 'विनाकृत्य नानाकृत्येति' । विनञ्भ्यां नानाञौ नसहेति नानाञौ । 'द्विधाकृत्येति' । सङ्ख्याया विधार्थे धा । 'द्वैधंकृत्येति' । द्व्र्योश्च धमुञ् । हिरुक्पृथक्शब्दो विनार्थो । 'नाना कृत्वा काष्ठानि गत इति' । पूर्वमेव नाना सन्ति काष्ठान्यन्यत्र कृत्वा गत इत्यर्थः । 'धार्थमर्थग्रहणमिति' । बहवो हि धार्थाः प्रत्ययास्तत्रासत्यर्थग्रहणे प्रत्ययस्यैव ग्रहणं स्यान्नान्येषां तदर्थानामर्थग्रहणे तु तेषामपि भवति यश्चाधादेशो धार्थः धमुञन्तात्स्वार्थे डदर्शनमिति तदर्थमर्थग्रहणं द्वैधकृत्य द्वैधकारं द्वैधभूय द्वैधभावमिति धमुञादीनां तु स्थानिवद्भावादेव सिद्धं तद्धितौ ध इत्यधिकारेणादेशपक्षस्याश्रयणात्, अथ नार्थमप्यर्थग्रहणं कस्मान्न भवतीत्यत आह । 'ना पुनरेक एवेति' । ननु च नाप्रत्ययावपि द्वौ भवतो निरनुबन्धकः सानुबन्धकश्चेति तत्रासत्यर्थग्रहणे निरनुबन्धकस्यैव ग्रहणं स्यान्नेतरस्य, एवं मन्यते तन्त्रावृत्त्येकशेषाणामन्यतमस्याश्रयणात्तस्यापि भविष्यति ॥

Digitized by Google

"अन्वच्यानुलोम्ये" ॥ 'अन्वभूयेति'। अग्रतः पार्श्वतः पृष्ठतो वाऽनुकूलो भूत्वास्तइत्यर्थः। 'अन्वभूत्वेति'। पृष्ठतो भूत्वेत्यर्थः। अनुकूलोननुकूल इति शब्देन न स्पृश्यते ॥

"शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्" ॥ अत्रानन्तरेणास्तिशब्देनैवार्थशब्दः सम्बध्यते शकधृषज्ञानां घटार्हयोश्च पृथगुपादानात्तदाह। 'शकादिषूपपदेषु अस्त्यर्थेषु वेति'। 'तुमुन् प्रत्ययो भवतीति'। भावे। 'अक्रियार्थोपपदार्थ आरम्भ इति'। क्रियार्थोपपदे तुमुन्ण्वुलावित्यादिनैव सिद्धत्वात्, तत्र तावत् शक्नोति भोक्तुं धृष्णोति जानातीति भोजने प्रावीण्यं गम्यते। 'ग्लायति भोक्तुमिति'। तत्राशक्तिः, घटते ऽर्हतीति योग्यता, आरभते प्रक्रमतइति भुजेराद्यावस्था। 'लभते भोक्तुमिति'। अप्रत्याख्यातं भोजनं लभतइत्यर्थः। 'उत्सहते भोक्तुमिति'। भोजने व्याप्रियतइत्यर्थः। 'अस्ति भोक्तुमिति'। भोजनमस्तीत्यर्थः। प्रवीणो भोक्तुं कुशलो भोक्तुं पटुर्भोक्तुमित्यादौ पर्याप्तिविवक्षायामुत्तरसूत्रेण तुमुन् भवति ॥

"पर्याप्तिवचनेष्वलमर्थेषु" ॥ 'पर्याप्तिरन्यूनता'। परिपूर्णतेत्यर्थः। अन्यूनता च द्विधा सम्भवति भोजनस्य प्रभूततया वा भोक्तुः समर्थतया वा, ऽतः सामर्थ्येनालमर्थेन विशिनष्टि। 'अलमर्थेषु पर्याप्तिवचनेष्विति'। 'पर्याप्तो भोक्तुमिति'। भोजने न न्यूनीभवति समर्थ इत्यर्थः। 'पर्याप्तमिति'। प्रभूतमित्यर्थः। 'शक्यमेवं कर्त्तुमिति'। सुकरमेतदित्यर्थः। सम्भवमात्रं वा ऽत्र विवक्षितं सम्भवत्येवं विधस्य करणमिति ॥

"कर्त्तरि कृत्" ॥ किमर्थमिदमुच्यते, कर्त्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात्, यत्र वचनेनार्थो निर्दिश्यते तत्र प्रत्यासत्त्या प्रकृत्यर्थएव प्रत्ययो भवति तद्यथा गुप्तिकिद्भ्यः सन्, यावादिभ्यः कनिति एवमिमे कृतः स्वार्थे स्युः स्वार्थे मा भूवन् कर्त्तरि स्युरिति। ननु च यमिच्छति स्वार्थे आह तं भावे घञ् भवतीति तन्नियमार्थं भविष्यति घञेव भावे नान्यः कृदिति, असति ह्येतस्मिन्सूत्रे घजित्येतावत्सूत्रं कर्त्तव्यं धातोर्घञ् भवतीति, तत्रानिर्दिष्टार्थत्वाद्भावएव घञ् भविष्यतीति, ततः पदरुजवि-

श इति द्वितीयं सूत्रं कर्त्तव्यं, ततश्च भावइति न कर्त्तव्यं, क्रियमाणं तु नियमार्थं भविष्यति घञेव भावे नान्यः कृदिति, ततश्चान्यः कृद्धात्वर्थाक्षिप्ते कर्त्तरि भविष्यति। स्यादेतत् । कर्मादीनामपि धात्वर्थेनाक्षेपात्तेष्वपि कृतः स्युरिति, न । धः कर्मणि ष्ट्रन्, करणाधिकरणयोर्ल्युट्, दाशगोघ्नौ सम्प्रदाने, भीमादयोऽपादाने, इत्यत्र ष्ट्रनेव कर्मणि नान्य इत्यादिको नियमो विज्ञास्यते, यद्येकं कर्मादि नियतं प्रत्ययास्त्वनियता इति कारकान्तरेऽपि ष्ट्रनादयः स्युः, नैष दोषः । एकमिदं वाक्यं धः कर्मणि ष्ट्रनिति तेन च कर्मणि विधीयमानः कथं कारकान्तरेऽपि स्यात्, द्वितीयोऽपि वा नियमो विज्ञास्यते कर्मण्येव ष्ट्रन्निति, एवं सर्वत्र, य इदानीमतोऽन्यः प्रत्ययः शेषः सोऽन्तरेणापि वचनं कर्त्तर्येव भविष्यति कर्त्तरि भुवः खिष्णुच्खुकञौ कर्त्तरि चर्षिदेवतयोरित्युभयत्रापि करणनिवृत्त्यर्था कर्तृश्रुतिर्विद्धार्थैवेति खिष्णुजादिषु कर्तृनियमो न भविष्यति, तदेव तर्हि प्रयोजनं स्वार्थे मा भूवन्निति, ननु चोक्तं भावइति नियमो विज्ञास्यतइति स्वार्थादन्यः स भावो धात्वर्थस्य सिद्धता नाम शुद्धे स्वार्थे कृतः स्युः, लः कर्मणि च भावे चेत्ययं तर्हि नियमो भविष्यति ल एव भावे इति, नायं नियमः शक्यो विज्ञातुं कर्तृकर्मणोर्निर्द्देशेन निर्द्दिष्टार्थत्वात् लकाराः स्वार्थे न स्युः, अकर्मकेभ्य इति च वक्ष्यामीत्येवमर्थमेतत्स्यात्, अतः सुष्ठूक्तं कर्त्तरि कृद्वचनमनादेशे स्वार्थविज्ञानादिति । अत्र च द्वैधम् एतद्वाक्यनिरपेक्षैः स्वैर्विधायकैर्वाक्यैर्विहितानां कृतां पश्चादनेनार्थ आदिश्येत कृदुत्पत्तिवाक्यानां वायं शेषः स्यात् ण्वुल्तृचौ कर्त्तरि नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः कर्त्तरीति, तत्राद्ये पक्षे यथानेन तृजादीनामर्थ आदिश्यते तथा ल्युनादीनामप्यादिश्येत विशेषानुपादानात् ततश्चैतेष्वनेन कर्त्तरि च स्युः स्वेषुस्वेषु विधिवाक्येषु करणादीनामप्युपादानात्करणादिषु च, ननु च ल्युनादिषु करणादिरर्थो विशेषविहितत्वात् कर्त्तुश्च बाधको भविष्यति, न। नानावाक्यत्वात्, इह दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति अभिन्नकालत्वादेकं वाक्यं विशिष्टदानस्य प्रतिपादकमिति तक्रेण दधि बाध्यते यदा तु पूर्वाह्णे ब्राह्मणभोजनप्रकरणे दधि ब्राह्मणेभ्यो दीयता-

मित्युच्यते ऽपराह्णे तु तक्रं कौण्डिन्याय दीयतामिति न तदा बाध्यबाधकभावः, तथास्मिन्पक्षेपि कालभेदेन वाक्यद्वयोच्चारणाद्बाध्यबाधकभावो न लभ्यते तस्माद्दुष्ट एवायं पक्ष इति द्वितीयं पक्षमाश्रित्याह । 'कृदुत्पत्तिवाक्यानामयं शेषः स्यादिति'। प्रागुक्तो दोषस्तदवस्थ एव तत्राह । 'येष्वित्यादि'। कुत एतदित्याह । 'अर्थाकाङ्क्षत्वादिति'। येषु वाक्येष्वर्थो न निर्दिश्यते तान्यर्थाकाङ्क्षीणि । तथाहि । ण्वुल्तृचौ भवत इत्युक्तेर्थविषया आकाङ्क्षा जायते क्वतौ भवत इति, कर्त्तरि कृदित्यस्याकाङ्क्षा भवति कः कृत् कर्त्तरि भवतीति, अतस्तृजादिविध्युपस्थाने शेषशेषिणोरुभयोरप्याकाङ्क्षापूर्यते ततस्तत्रैवोपतिष्ठतइत्यर्थः। 'ल्युनादिवाक्येष्विति'। उपतिष्ठतइत्यनुषङ्गः, कारणमाह । 'साक्षादर्थनिर्द्देशे सति तेषां निराकाङ्क्षत्वादिति'। न च रक्तपटन्यायेनाकाङ्क्षोत्थापनेनोपस्थानं युज्यते स्वत एव साकाङ्क्षे तृजादिविध्युपस्थानेन शेषस्यापि चरितार्थत्वात्, रक्तः पटो भवतीत्यत्र तु पटो भवतीत्यस्य निराकाङ्क्षत्वेपि रक्तपदार्थस्य साकाङ्क्षत्वादाकाङ्क्षोत्थापनेनान्वयः, न च विदेशस्थानां कथमेकवाक्यत्वमिति वाच्यं, शास्त्रे विदेशस्थानामप्यवान्तरवाक्यानामाकाङ्क्षावशादेकवाक्यत्वदर्शनात्, यथा द्वितीयेध्याये लुगुच्यते तस्य चतुर्थषष्ठयोरलुगपवादो गोत्रे लुगचि, अलुगुत्तरपदइति ॥

"भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा" ॥ 'भव्य इति'। अचो यत्, गुणः, वान्तो यि प्रत्ययइति वान्तादेशः । 'गेयो माणवकः साम्नामिति'। एतेन कै गै शब्दइत्यस्येदं निपातनं न गाङ् गतावित्यस्येति दर्शयति, एतच्च निपातनाल्लभ्यते, ईद्यतीतीत्वम् । 'जन्य इति'। अचो यदित्यत्र तकिशसिचतियतिजनीनामुपसङ्ख्यानमिति वचनाद्यत् । 'आप्लाव्य इति'। ओरावश्यके । 'आपात्य इति'। ऋहलोर्ण्यत् ॥

"लः कर्मणि च भावे चाकर्मकेभ्यः" ॥ ल इति लङ्लटोरकारानुबन्धयोः सामान्येन ग्रहणमेकवचनं चेति शङ्कामपाकरोति । 'ल इत्युत्सृष्टानुबन्धसामान्यमेकं गृह्यतइति'। 'प्रथमाबहुवचनं चैतदिति'। सामान्यस्यैकत्वेपि जात्याख्यायामेकस्मिन् बहुवचनम् । अथादेशापेक्षया षष्ठी-

कवचनं कस्मान्नाश्रीयते लः लस्य य आदेश इति, यथा लः परस्मैपदमिति, उच्यते। एवं विज्ञायमाने लादेशानामनेनार्थो निर्दिश्येत ततश्चाम्विषयस्य लकारस्यार्थो न निर्दिष्टः स्यात्, लुगत्रादेशः, न चाभावरूपस्य तस्यार्थादेशनं युज्यते ततश्चासौ कर्त्तरि कृदिति कर्त्तर्य्येव स्यात्। ननु च तस्याम इति लुकापहारे सत्यनुप्रयोगे ये लादेशास्तैरेव भावादीनामभिव्यक्तिर्भविष्यति, नैतदस्ति, यदा ह्याम्विषयो लकारः कर्त्तर्येवेति स्थितं तदा विरोधाद्भावकर्मवाचिप्रत्ययपरोऽनुप्रयोगो नैव प्राप्नोति श्रुतस्यैव च संबन्धोपपत्तावादेश इत्यध्याहारो न युक्तः, तस्मात्प्रथमाबहुवचनान्तमेव युक्तं, तत्र द्विविधो लकारस्तिङ्भाव्यतिङ्भावी च, तत्र तिङ्भाविनः कृत्संज्ञानिषेधात्कर्त्तरि कृदित्यस्यानुपस्थानात्स्वार्थे भावे विधानं प्राप्नोति, अतिङ्भाविनस्तु कर्त्तरि कृदिति वचनात्कर्त्तर्येव साधुत्वं प्राप्नोति न भावकर्मणोः, आस्यमानं शय्यमानमित्यादाविति वचनमिदमारभ्यते। ननु च भावकर्मणोरात्मनेपदं विधीयते शेषात्कर्त्तरि परस्मैपदं ततश्च लकारस्य भावकर्मकर्त्तारोऽर्था अनुमास्यन्ते, यद्वा लकारस्य प्रयोगेऽसमवायादादेशानामेव ते ऽर्था भविष्यन्ति नार्थ एतेनेत्याशङ्क्याह। 'सकर्मकेभ्यो भावे न भवन्तीति'। अनारभ्यमाण एतस्मिन्यथा भावे विधीयमाना घञादयः सकर्मकेभ्योपि भावे भवन्ति ओदनस्य पाकः सूत्रस्य कृतिरिति तथा भावकर्मणोरित्यनेन भावआत्मनेपदं सकर्मकेभ्योपि स्यात् ततश्च पच्यते यवागूं देवदत्तेनेति प्रयोगः प्राप्नोति, अतो भावे चाकर्मकेभ्य इति वक्ष्यामीत्ययमारब्धः, अथ तत्रैव भावकर्मणोरकर्मकादित्युच्यते तत्राकर्मकग्रहणं कर्तव्यं स्यात्, ननु चेहापि क्रियते, इहावश्यं कर्तव्यं तयोरेव कृत्यक्तखलर्थाः भावे चाकर्मकेभ्य इति, तस्मात्सकर्मकेभ्यो भावे मा भूदित्येवमर्थमयमारम्भ इति स्थितं, किं चाम्विषयस्य लकारस्यार्थादेशनार्थमपीदं वक्तव्यम्। इतरथा पूर्वोक्तदोषप्रसङ्गादित्यलमियता॥

"तयोरेव कृत्यक्तखलर्थाः"॥ 'तयोर्भावकर्मणोरिति'। पूर्वसूत्रे साक्षाच्छ्रुतयोर्भावकर्मणोस्तच्छब्देन परामर्शो न चकारेण संनिधापितस्य कर्त्तुरिति भावः। अत एवोत्तरसूत्रे पुनः कर्त्तरि चेत्युक्तं, यदि ह्यनन्तरवाक्ये

चकारेण संनिधापितस्य कर्त्तुर्भावस्य चात्र प्रत्यवमर्शः स्यात् तत्र कर्तृग्रहणमनर्थकं स्यात् कर्त्तर्यनेनैव सिद्धत्वात्। 'एवकार इत्यादि'। कृत्वात्कर्त्तरि कृत्याः प्राप्ता एवकारेण कर्त्तुरपकृष्यन्ते व्यावर्त्यन्ते। ननु च तक्रकौण्डिन्यन्यायेन न कर्त्तुरपकर्षो भविष्यति, यथा वडवाया वृषे वाच्य इत्यत्र वक्ष्यते ऽपत्ये प्राप्तस्ततोपकृष्य वृषे विधीयते ऽपत्ये त्वणेव भवतीति, सत्यं, न्यायप्राप्त एवार्थ एवकारेणानूद्यते। 'शयितमिति'। निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृष इत्यकित्त्वाद्गुणो भवति। 'भावे चाकर्मकेभ्यइति वर्त्तत इति'। वयं तु ब्रूम एवकारः कर्त्तुरपकर्षणाय न कर्त्तव्य इत्युक्तं तस्यात्रोपयोगः, ययोर्भावकर्मणोर्लकार उक्तस्तयोरेवान्यूनानतिरिक्तयोः कृत्यादयो भवन्तीति, यदि च सकर्मकेभ्यो भावे स्युस्तयोस्तादृशयोरेव तु न कृताः स्युरिति ॥

"आदिकर्मणि क्तः कर्त्तरि च" ॥ 'आदिकर्मणीति'। कर्मधारयः, कर्मशब्दश्च क्रियावचन इत्याह। 'आदिभूतः क्रियाक्षण आदिकर्मेति'। साधनकर्म तु न गृह्यते आदिशब्देन विशेषणात्, बहूनां समवाये आदिमध्यान्तभावः, साधनकर्मत्वे किमिति किं तत्रादिशब्देन। 'तस्मिन्नादिकर्मणि भूतत्वेन विवक्षितइति'। एतेन निष्ठेत्यनेनैवादिकर्मणि क्तः सिद्धो न पुनरादिकर्मणि निष्ठा वक्तव्येति दर्शयति, आद्ये हि क्रियाक्षणे भूते समूहरूपारोपादेकदेशे समूहे चेति न्यायाद्वा धात्वर्थ एव भूतो भवतीति युक्त एव क्तः। 'प्रकृतः कटं देवदत्त इति'। प्रारब्धवानित्यर्थः। 'प्रकृतं देवदत्तेनेति'। अत्र कर्मणोऽविवक्षितत्वेन धातोरकर्मकत्वाद्भावएव क्तः। एवं प्रभुक्तं देवदत्तेनेत्यत्रापि ॥

"गत्यर्थाकर्मकश्लिषशीङ्स्थासजनरुहजीर्यतिभ्यश्च" ॥ 'अनूषित इति'। वसतिक्षुधोरिट्, अनुप्राप्य जातोनुजातः, एवमनुजीर्णः, सकर्मकेभ्यः कर्माविवक्षायां भावे क्तः ॥

"दाशगोघ्नौ सम्प्रदाने" ॥ 'गोघ्न इति'। अत्र दानपूर्वके हनने हन्तिर्वर्त्तते। 'अर्घार्ह इति'। अर्घो मधुपर्कः तदङ्गत्वेन गोहननं विहि-

Digitized by Google

तम् । एतावद्गोरालम्भनस्थानमतिथिः पितरो विवाहश्चेति, यदि सम्प्रदाने गोघ्न इति निपात्यते चाण्डालादेरपि तेनाभिधानं प्राप्नोति, अस्मास्वपि ह्यागताय गां दातुमर्हन्ति सुहृदादयोत आह । 'निपातनसामर्थ्यादिति' । 'असत्यपि चेति' । यथा ऽपचन्नपि योग्यतया पाचक इत्युच्यते तथेहा-पीत्यर्थः ॥

"भीमादयो ऽपादाने" ॥ 'उणादिप्रत्ययान्ता एतइति' । बाहु-ल्यादेतदुक्तं प्रस्कन्दनप्रपतनयोरप्यौणादिकत्वात् । 'ताभ्यामन्यत्रोणादय इति पर्युदासे प्राप्तइति' । यद्यप्यसत्यस्मिन्सूत्रे ऽपादानस्य प्रकृतत्वात्ता-भ्यामिति निर्देशो नोपपद्यते तथाप्ययमर्थस्तावत्तत्र वक्तव्यस्ततोपादा-नाच्चान्यत्रोणादय इति, ततश्च स्यादेव पर्युदास इत्यर्थः ॥

"ताभ्यामन्यत्रोणादयः" ॥ ननु चान्यत्रोणादय इत्युक्ते प्रकृत-त्वादेव ताभ्यामन्यत्रेति विज्ञास्यते ऽत आह । 'सम्प्रदानार्थं इति' । कृषित इत्यादिना कर्मणि वृत्तिं दर्शयति, अत्रेडागमश्चिन्त्यः, एवं तनित इत्य-त्रापि, के चिदाहुः । यस्य विभाषेतीट्प्रतिषेधो ऽनित्यः, कृतिनृत्योरी-दित्करणात्, तद्धि श्वीदितो निष्ठायामितीट्प्रतिषेधार्थं क्रियते तत्र सेसिचिकृतीति विभाषितेट्त्वादेव यस्य विभाषेतीट्प्रतिषेधो भविष्य-तीति किमीदित्करणेन । अपर आह, चुरादावदन्तौ कृषितनी पठितव्या-विति ॥

"क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" ॥ 'स्वनिकायप्रसि-द्धिरिति' । यथा यूपचषालादयो याज्ञिकानामेव प्रसिद्धास्तथा वैयाकर-णानां निकायएषां प्रसिद्धिः, निघण्टुषु तु अभ्यवहारपर्यायतया प्रत्यवसा-नशब्दस्य पाठो वैयाकरणप्रसिद्धिमूलः । 'इदमेषामासितमिति' । अधिक-रणवाचिनश्चेति षष्ठी । 'कथमित्यादि' । कर्त्तरि निष्ठां मन्यमानस्य प्रश्नः । 'अकारो मत्वर्थीय इति' । अर्शआदेराकृतिगणत्वादच् प्रत्यय इत्यर्थः । इह द्विर्गत्यर्थाकर्मकग्रहणं च क्तग्रहणं च क्रियते सकृदेव तु शक्यं कर्तुं, कथम्, एवं वक्ष्यामि त्क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः, ततो

Digitized by Google

गत्यर्थाकर्मकेभ्यः कर्त्तरि च, चकारादधिकरणे च, अनुवृत्ताच्चकाराद्यथा-प्राप्तं च, ततः श्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च, कर्त्तरीत्येव, एते-भ्यश्च कर्त्तरि क्तो भवति चकाराद्यथाप्राप्तं च, अधिग्रहणग्रहणन्तु नात्रा-नुवर्त्तते योगविभागकरणसामर्थ्यात्, तत आदिकर्मणि च, आदिकर्मणि च कर्त्तरि क्तो भवति चकाराद्यथाप्राप्तं च, ततो दाशगोघ्नावित्यादि, तथा तु न कृतमित्येव ॥

"लस्य" ॥ 'अकार उच्चारणार्थ इति'। नानुबन्धः, अन्यथा लङ्ल-टोरेव ग्रहणं स्यात् ततश्च परस्मैपदानां णलादयः लोटो लङ्वत् एरु-रित्यादिकार्यविधानमनुपपन्नं स्यात्, लिङ्लोटोस्तिबादीनामभावात्। 'लका-रमात्रं स्थानित्वेनाधिक्रियतइति'। ननु चेत्सञ्ज्ञायां लोपः प्राप्नोति वच-नसामर्थ्यात्सत्यामपीत्सञ्ज्ञायां लोपो न भविष्यति, एवमपि लित्स्वरः प्राप्नोति, णलो लित्करणं ज्ञापकं न लादेशेषु लित्स्वरो भवतीति। 'किञ्चे-दमिति'। लकारमात्रस्य ग्रहणं प्राप्नोतीति मन्यमानस्य प्रश्नः। धात्वधिका-रोनुवर्त्ततइति वक्ष्यमाणाभिप्रायेणाह। 'दश लकारा इति'। अक्षरसमाम्नाये यथानुपूर्व्या ऽकारादयः तदानुपूर्वीविशिष्टैरकारादिभिरनुबन्धैः कथ्यन्ते न तु विधानक्रमेणेत्यर्थः। 'लकारमात्रस्य ग्रहणं कस्मान्न प्राप्नोतीति'। विशेषानुपादानात्प्राप्नोत्येवेति भावः। वर्णग्रहणेषु चार्थवद्ग्रहणपरिभाषा न प्रवर्त्तते तथा च यस्येति लोपोनर्थकस्यापि भवति दैवदत्तिरिति, अकुर्वे-ह्यत्रेति यणादेशः। 'धात्वधिकारोनुवर्त्ततइति'। धातुग्रहणमनुवर्त्ततइ-त्यर्थः,एवमप्यग्निचिल्लुनाति, अत्रापि प्राप्नोति विहितविशेषणं धातुग्रहण,-मेवमपि शामामलिभ्यो ल औणादिकः शाला माला मल्लः, अत्रापि प्राप्नोति, उणादयो ऽव्युत्पन्नानि प्रातिपदिकानि तथापि परिहारान्तरमाह। 'क-र्त्रादय इति'। लः कर्मणि चेत्यत्र निर्द्दिष्टा अर्थाः कर्तृकर्मभावा इहानु-वर्तन्ते, तैश्च लकारो विशेष्यते, कर्त्रादिषु विहितस्य लस्येति, तेन विशि-ष्टविषयस्यैव लस्य ग्रहणं न सर्वस्य ॥

"तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्" ॥ तिबादीनां समाहारद्वन्द्वः। 'पकारः स्वरार्थ इति'। प्रदर्शन-

मेतत्सार्वधातुकमपिदित्याद्यपि प्रयोजनम् । 'इटष्टकार इत्यादि' । ननु चेटोदित्यत्र लिङित्यनुवर्तते तेनेकारस्यात्वविधानेपि नास्त्यतिप्रसङ्गः, एवमपि तिबाद्यवयवस्य प्राप्नोति, यथा एरुरित्येतल्लोट इत्यनुवृत्तावपि तिबाद्यवयवस्य भवति, नहि तत्रावयवषष्ठी लिङ इति तु स्थानषष्ठीत्यत्र प्रमाणमस्ति, अथाद्यन्तौ टकिताविति देशविध्यर्थष्टकारः कस्मान्न भवतीत्याह । 'तिबादिभिरित्यादि' । तुल्यत्वं सदृशत्वं तच्चैकयोगनिर्दिष्टत्वेन, लस्येत्येका षष्ठी तत्र तिबादयः सप्तदशादेशाः स्थाने योगं प्रयोजयन्ति तानेको नोत्सहते विहन्तुमित्यर्थः । 'महिङो ङकार इत्यादि' । तिङित्युपलक्षणं तङित्यपि प्रत्याहारो भवति, चिनुमह इत्यादौ तु गुणप्रतिषेधार्थो न भवति सार्वधातुकमपिदित्यनेनैव सिद्धत्वात्, यत्र त्वार्द्धधातुकमेषिषिमहीति तत्र ङित्त्वार्थः कस्मान्न भवति, प्रत्याहारे चरितार्थस्य समुदायानुबन्धस्यावयवानुबन्धत्वे प्रामाणाभावात्, तृनि कथं, तस्यापि हि नकारो नलोकाव्ययेत्यत्र प्रत्याहारे चरितार्थः, ओङ आप इत्यत्र च वक्ष्यते सामान्यग्रहणार्थो ङकारोऽन्यथा निरनुबन्धकस्य प्रथमाद्विवचनस्यैव ग्रहणं स्याद् न सानुबन्धकस्यौट इति तच्च विरुद्ध्येत, तस्यापि टकारस्य सुडिति प्रत्याहारे चरितार्थतया औकारस्य निरनुबन्धकत्वात्, तस्मान्महिङो ङकारः प्रत्याहारार्थो न त्ववयवानुबन्ध इत्याचार्याणां स्मृतिपरम्परैवात्र शरणम् ॥

"टित आत्मनेपदानां टेरे" ॥ 'टितो लकारस्य स्थानइति' । एतेन टित आत्मनेपदानामिति व्यधिकरणे षष्ठ्याविति दर्शयति, यदि तु प्रत्येकसंबन्धादेकवचनमित्याश्रित्य टितामात्मनेपदानामित्याश्रीयते, अकुर्वीत्यत्रापि प्रसज्येतेति भावः । 'प्रकृतैरित्यादि' । यएते तिबादयः प्रकृतास्तेषां मध्ये यान्यात्मनेपदानि विहितानीत्येवमात्मनेपदानि विशेष्यन्ते, न च तिबादीनां मध्ये शानच् सविविशिष्टस्ततो न तस्य प्रसङ्ग इत्यर्थः । एवं च तङामित्येव वक्तव्यं, के चित्तु आने मुगिति निर्द्देशं ज्ञापकं वर्णयन्ति तिङामेवैत्वं नान्येषामिति, इतरथा ह्यानयीति वक्तव्यं स्यात्, नेति

वयं, यो ऽलादेश आनः पूङ्यजोशानन् तस्यायं निर्द्देशः स्याद् वयमानो यजमानइति ॥

"थासः से" ॥ 'पेचिषइति'। लिट्, अत एकहलमध्यइत्यादिना एत्वाभ्यासलोपौ, क्रादिनियमादिट्, इह थः सइति वक्तव्यं थकारस्य सकारे कृते परभागस्य टेरेत्वे सति सिद्धमिष्टं, पचथः पचथ अत्रापि प्राप्नोति, आत्मनेपदानामिति वर्त्तते, एवमप्याथामस्थकारस्य प्राप्नोति, धातोरिति वर्त्तते, धातोरनन्तरो यस्थकार इति, इहापि तर्हि न प्राप्नोति पचसे चिनुषइति, विकरणेन व्यवधानात्, क्व तर्हि स्यात् यएते लुग्विकरणाः श्लुविकरणाः श्नम्विकरणा,स्तस्मात् थासः से इति वक्तव्यम्, एवमपि सशब्द एवादेशो विधेयो टेरेत्वेनैव सिद्धं, ज्ञापकार्थम्, एतज्ज्ञापयति आत्मनेपदानां य आदेशास्तेषां टेरेत्वं न भवतीति, तेन पक्ता पक्तारौ पक्तार इति डारौरसामेत्वं न भवति ॥

"लिटस्तझयोरेशिरेच्" ॥ 'पूर्वसूत्रे ज्ञापितमात्मनेपदादेशानां टेरेत्वं न भवतीति तेन इशिरज्इत्येतावादेशौ न विहितौ। 'शकारः सर्वादेशार्थ इति'। अन्यथा धातोरित्यधिकारादादेः परस्येति तकारस्य प्रसज्येत, अथ शे इत्येव कस्मान्नोक्तं, शइरेजिति ह्युक्ते मत्रालाघवं भवति, नैवं शक्यं, शे इति प्रगृह्यसंज्ञा स्यात्, इह च पपे सोममिति पिबादेशः प्राप्नोति, जग्ले मम्ले इत्यादौ चात्वं न स्यात्, एशि तु न दोषः, वर्णे यत्स्यात्तच्च विद्यात्तदाविति न्यायात् ॥

"परस्मैपदानां णलतुसुस्थलथुसणल्वमाः" ॥ 'तिबादीनामिति'। एतच्च प्रकरणाल्लभ्यते, तेन क्वसोर्णलादयो न भवन्ति, विधानसामर्थ्याद्वा क्वसोर्णलाद्यभावः। 'लकारः स्वरार्थ इति'। अन्यथा प्रत्ययस्य पित्त्वादनुदात्तत्वेपि धातुस्वरे कृते द्विः प्रयोगोद्विर्वचनमिति द्वयोरप्युदात्तत्वं प्राप्नोति, अनुदात्तं पदमेकवर्जमिति नास्ति यौगपद्येन सम्भवः पर्यायेण प्रसज्येत। 'णकारो वृद्ध्यर्थ इति'। इदमन्यथासिद्धं णलुत्तमो वे त्यत्र योगविभागः, अत् णिद्भवतीति, तत उत्तमो वा, वा णिद्भवतीति। 'पपावेति'। कथमयं सर्वादेशो यावता नानुबन्धकृतमनेका-

घटत्तणसत्त्वस्य हेतोः सोपाधिकमाह "तथाऽन्त्ये" ति, आनन्तर्यायुक्तमिति, न हि घटे तिष्ठति कपालोत्पत्तिः, अपि तु विनाशादनन्तरमेवोत्पत्तिः मुद्गराभिघातानन्तरभावी विनाश इति अनन्तरभाविनं प्रतिहेतुत्वं युक्तं न तु व्यवहितं प्रतीत्यभिप्रायः, पूर्वेति ज्ञानं यथा स्वविषयं दर्शयति तस्य तथात्वमेव अन्यथाऽतिप्रसङ्ग इत्यर्थः किंचेत्यादि प्रमातृप्रमेययोरित्यादिना स्वार्थानुमानस्य दुर्वचत्वयुक्तं, तथेत्यादिना परार्थानुमानानुपपत्तिरुक्ता, न च प्रत्यभिज्ञायाः सामग्र्यनुपपत्तिर्वक्तुं शक्यते संस्कारसविवेन्द्रियसंप्रयोगस्य सामग्रीत्वात् लिकुचस्य कर्पूरसाहचर्यात् विलक्षणकार्यकरत्वं दृष्टं, तद्वदतीतविषये स्मृतित्वात् संनिहितविषयेऽनुभवत्वात् प्रत्यभिज्ञास्वरूपं दुर्घटमिति चेन्न एकज्ञानतयैवावभासमानत्वात् संप्रतिपन्नैकज्ञानवत् एकत्वं हि प्रतीयते, नापि विषयानुपपत्तिः, एकस्य वस्तुनः कालद्वयसम्बन्धविषयत्वात् कालविशिष्टाकारे कालान्तरान्वयपरत्वाभावात् ॥

सू० उभयथा च दोषात् ॥ २२ ॥

भू० क्षणिकत्ववादिरभ्युपेतात्तुच्छादुत्पत्तिरुत्पन्नस्य तुच्छतापत्तिश्च न सम्भवतीत्युक्तं, तदुभयप्रकाराभ्युपगतो दोषश्च भवति तुच्छादुत्पत्तौ तुच्छात्मकमेव कार्य्यं स्यात् यद्धि यस्मादुत्पद्यते तत्तदात्मकं दृष्टं, यथा मृत्सुवर्णादेरुत्पन्नं मणिकमुकुटादि मृत्सुवर्णाद्यात्मकं दृष्टं, न च जगत्तुच्छात्मकं दृष्टं भवद्भिरभ्युपगम्यते न च प्रतीयते, सतोनिरन्वयविनाशे सति एकक्षणादूर्ध्वं कृत्स्नस्य जगतस्तुच्छतापत्तिरेव स्यात्, पश्चात्तु तुच्छाज्जगदुत्पत्तावनन्तरोक्तं तुच्छात्मकत्वमेव स्यात्, अत उभयथाऽपि दोषान्न भवदुक्तप्रकारावुत्पत्तिनिरोधौ ॥

सू० आकाशे चाविशेषात् ॥ २३ ॥

बाह्याभ्यान्तरवस्तुनः स्थिरत्वप्रतिपादनाय प्रतिसंख्याप्रतिसंख्यानिरोधयोस्तुच्छरूपता निराकृता, तत्प्रसङ्गेन ताभ्यां सह तुच्छत्वेन सौगतैः परिगणितस्याकाशस्यापि तुच्छता प्रतिक्षिप्यते आकाशे च निरुपाख्यता न युक्ता भावरूपत्वेनाभ्युपगतपृथिव्यादिवदाकाशस्यापि अबाधितत्वप्रतीतिसिद्धत्वाविशेषात्, प्रतीयते ह्याकाशेऽच श्येनः पतत्यच गृध्र इति श्येनादिपतनदेशत्वेन, न च पृथिव्याद्यभावमात्रमाकाश इति वक्तुं शक्यं विकल्पासहत्वात् पृथिव्यादेः प्रागभावः, प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभावो वा आकाशः सर्वथाऽप्याकाशप्रतीत्यनुपपत्तिः स्यात्प्रागभावप्रध्वंसाभावयोराकाशत्वे पृथिव्यादिषु वर्तमानेषु आकाशप्रतीत्ययोगात् निराकाशं जगत्स्यात्, इतरेतराभावस्याकाशत्वेऽपीतरेतराभावस्य तत्तद्वस्तुगतत्वेन तेषामन्तराले आकाशप्रतीतिर्न स्यात्, अत्यन्ताभावस्तु पृथिव्यादीनां न सम्भवति अभावस्य विद्यमानपदार्थावस्थाविशेषत्वापपादनाच्चाकाशस्य अभावरूपत्वेऽपि न निरुपाख्यत्वम् अण्डान्तर्वर्तिनः आकाशस्य चिवृत्करणोपदेशप्रदर्शितपञ्चीकरणेन रूपवत्त्वाच्चाक्षुषत्वेऽप्यविरोधः ॥

सू० अनुस्मृतेश्च ॥ २४ ॥

पूर्वं प्रस्तुतं वस्तुनः स्थिरत्वमेवोपपाद्यते, अनुस्मरणं पूर्वानुभूतवस्तुविषयं ज्ञानं प्रत्यभिज्ञानमित्यर्थः, तदेवेदमिति सर्वं वस्तुजातमतीतकालानुभूतं प्रत्यभिज्ञायते, न च भव-

Digitized by Google

ज्ज्विज्वालादिष्विव सादृश्यनिबन्धनोऽयमेकत्वव्यामोह इति वक्तुं शक्यं व्यामुह्यतो ज्ञातुरेकस्यानभ्युपगमात्, न ह्यन्यानुभूतेनैकत्वं सादृश्यं वा स्वानुभूतस्यान्योऽनुसंधत्ते, अतो भिन्नकालवस्त्वाश्रयसादृश्यानुभवनिबन्धनमेकत्वव्यामोहं वदद्भिर्ज्ञातुरेकत्वमवश्याश्रयणीयं, न च ज्ञेयेष्वपि घटादिषु ज्वालादिष्विव भेदसाधनप्रमाणमुपलभामहे, येन सादृश्यनिबन्धनां प्रत्यभिज्ञां कल्पयेम, यदपि चेदमुच्यते प्रत्यक्षानुमानाभ्यां घटादेः क्षणिकत्वं सिद्ध्यति प्रत्यक्षं तावद्वर्तमानार्थविषयमवर्तमानाद्वस्तुनो व्यावृत्तं स्वविषयमवगमयति नीलमिव पीतात्, एवं च भूत भविष्यद्भ्यां वर्तमानस्य वस्त्वन्तरत्वमवगतं भवति, अनुमानमप्यर्थक्रियाकारित्वात्सत्त्वाच्च घटादि क्षणिकं यदक्षणिकं शशविषाणादि तदनर्थक्रियाकार्यसच्च, तथा अन्त्यघटक्षणसत्त्वात्पूर्वघटक्षणसत्त्वा निर्विनाशीनि घटक्षणसत्त्वात् अन्त्यघटक्षणसत्त्ववदिति ॥ तच्च कार्यकारणभावानुपपत्त्यादिभिः पूर्वमेव निरस्तं, किंच प्रत्यक्षगम्यावर्तमानमानस्यावर्तमानाद्व्यावृत्तिर्न वर्त्तमानस्य वस्त्वन्तरत्वमवगमयति, अपि तु वर्तमानकालयोगितामात्रं, न च तावतावस्त्वन्तरत्वं सिध्यति तस्यैव कालान्तरयोगसंभवात्। यत्तु सत्त्वादर्थक्रियाकारित्वाच्चेति क्षणिकत्वे हेतुद्वयमुक्तं, तदभिमतविपरीतसाधनत्वाद्विरुद्धं, सत्त्वादर्थक्रियाकारित्वाद्वा घटादिस्थास्नु यदस्थास्नु तदसदनर्थक्रियाकारि च यथा शशविषाणमित्यपि हि वक्तुं शक्यं किं

Digitized by Google

च अर्थक्रियाकारित्वमक्षणिकत्वमेव साधयेत् क्षणिकत्वमेव साधयेत् क्षणध्वंसिनो हि व्यापारासंभवादर्थक्रियाकारित्वं न संभवतीत्युक्तं तथाऽन्त्यघटक्षणस्य हेतुतो नाशदर्शनादितरेऽपि घटक्षणा हेत्वपेक्षविनाशाः स्युरिति आमुद्गरादिहेतूपनिपातात्स्थास्नुत्वमेव, न च वाच्यं न मुद्गराद्यो विनाशहेतवः अपि तु कपालादिविसदृशसन्तानोत्पत्तिहेतव इति कपालत्वावस्थापत्तिरेव घटादीनां विनाश इत्युपपादितत्वात्कपालोत्पत्तिव्यतिरिक्तत्वाभ्युपगमेऽपि विनाशस्य विनाशहेतुत्वमेव मुद्गरादेरानन्तर्यायुक्तम् अतः प्रत्यभिज्ञायास्थिरत्वमवगम्यमानं न केनापि प्रकारेणाह्नोतुं शक्यं, पूर्वापरकालसम्बन्ध्यर्थैक्यविषयायाः प्रत्यभिज्ञाया अन्यविषयत्वं ब्रुवन्नीलादिज्ञानानामपि नीलादेरर्थान्तरविषयत्वं ब्रूयात् । किञ्च प्रमातृप्रमेययोः क्षणिकत्वं वदद्भिर्व्याप्यवधारणतत्स्मरणपूर्वकानुमानाभ्युपगमोऽपि दुःशकः तथेदं क्षणिकमित्यादिप्रतिज्ञापूर्वकहेतूपन्यासादिकमपि नोपपद्यते भवतां, प्रतिज्ञोपक्रमक्षण एव वक्तुर्विनष्टत्वात्, नह्यन्येनोपक्रान्तम् अजानद्भिरन्यैः समापयितुं शक्यम् ।

सू० नासतो दृष्टत्वात् ॥ २५ ॥

भा० एवं तावद्वैभाषिकसौत्रान्तिकयोर्बाह्यार्थास्तित्ववादिनोः साधारणानि दूषणान्युक्तानि तत्र यदुक्तं संप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकाले अनवस्थितत्वान्न कस्यचिदर्थस्य

ज्ञानविषयत्वं सम्भवतीति नच सौत्रान्तिकः प्रत्यवतिष्ठते न ज्ञानकालेऽनवस्थानमर्थस्य ज्ञानाविषयत्वहेतुः ज्ञानोत्पत्तिहेतुत्वमेव हि ज्ञानविषयत्वं, न चैतावता चक्षुरादेर्ज्ञानविषयत्वप्रसङ्गः स्वाकारसमर्पणेन ज्ञानहेतोरेव ज्ञानविषयत्वाभ्युपगमात् ज्ञाने स्वाकारं समर्प्य विनष्टोऽप्यर्थो ज्ञानगतेन नीलाद्याकारेणानुमीयते, न च पूर्वपूर्वाज्ञानेनोत्तरज्ञानाकारसिद्धिः नीलज्ञानसन्तती पीतज्ञानानुत्पत्तिप्रसङ्गादतोऽर्थकृतमेव ज्ञानवैचित्र्यमिति । अत्रोच्यते नासतोऽदृष्टत्वात्, इति, योऽयं ज्ञाने नीलादिराकार उपलभ्यते स विनष्टस्यासतोऽर्थस्याकारो भवितुं नार्हति कुतः, अदृष्टत्वान्न खलु धर्मिणि विनष्टे तद्धर्मस्यार्थान्तरे संक्रमणं दृष्टं प्रतिबिम्बादिकमपि स्थिरस्यैव भवति तत्रापि न धर्ममात्रस्य अतोऽर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमर्थस्य ज्ञानकाले अवस्थानादेव संभवति पुनरपि साधारणं दूषणमाह–

सू० उदासीनानामपि चैवं सिद्धिः ॥ २६ ॥

एवं क्षणिकत्वासदुत्पत्त्यहेतुकविज्ञानाद्यभ्युपगमे उदासीनानामनुद्युञ्जानामपि सर्वार्थसिद्धिस्स्यात् इष्टप्राप्तिरनिष्टनिवृत्तिर्वा प्रयत्नादिभिः साध्यते क्षणध्वंसे हि सर्वेषां भावानां पूर्वपूर्ववस्तु तद्गतोवा विशेषः संस्कारादिकोऽविद्यादिर्वा उत्तरत्र न कश्चिदनुवर्तत इति प्रयत्नादिभिः साध्यं न किञ्चिदस्ति, एवं सत्यहेतुसाध्यत्वा-

Digitized by Google

त्सर्वसिद्धीनामुदासीनानामप्यैहिकामुष्मिकफलं मोक्षश्च सिद्ध्येत् । समुदायाधिकरणं समाप्तम् ॥

टी० सू० नासतो दृष्टत्वात्, सौत्रान्तिकस्य प्रत्यवस्थानावसरं दर्शयति "तत्र यदुक्तमि"ति, उत्तरोत्पादे चेत्यादिसूत्रषट्कं दृष्टमुखेन दूषणपरम् अतो दृष्टानुबन्धिदूषणान्तरं सौत्रान्तिकावसरः दृष्टानुबन्धिदूषणपरिहारार्थः योगाचारमतमाशङ्क्य दूषयति "न च पूर्वे"ति, विनष्टस्याकारः प्रतिविम्बित इत्यत्राह "प्रतिविम्बादिकमि"ति, आदिशब्देन स्फटिके जपाकुसुमस्य छायापत्तिर्विवक्षिता तत्रापीति न केवलं धर्ममात्रस्य प्रतिविम्बो दृष्टः धर्मिण एव तु दृष्ट इत्यर्थः सू० उदासीनानामपि चैवं सिद्धिः, उदासीनानामर्थसिद्धेरनिष्टत्वमाह "दृष्टे"ति, प्रयत्नसाध्यत्वादसम्भवमाह "क्षणध्वंसे ही"ति, स्वर्गादिहेतुभूतविशेषः संस्कारादिः मोक्षहेतुविशेषो विद्यादिः—समुदायाधिकरणं समाप्तम् ॥

उपलब्ध्यधिकरणम् । **सू० नाभाव उपलब्धेः ॥ २७ ॥**

भू० विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते यदुक्तमर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमिति तन्नोपपद्यते अर्थवज्ज्ञानानामेव साकाराणां स्वयमेव विचित्रत्वात् तच्च स्वरूपवैचित्र्यं वासनावशादेवोपपद्यते, वासना च विलक्षणप्रत्ययप्रवाह एव यद्घटाकारं ज्ञानं कपालाकारज्ञानस्योत्पादकं तत्पूर्वघटज्ञानं तस्य च तथाविधस्योत्पादकं ततः पूर्वघटज्ञानमित्येवंरूपः प्रवाह एव वासनेत्युच्यते, कथं वहिष्ठसर्षपमहीधरादिकारान्तरस्य ज्ञानस्यैवेत्युच्यते इत्यमर्थस्यापि व्यवहारयोग्यत्वं ज्ञानप्रकाशायत्तम् अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गात् प्रकाश-

मानस्य च ज्ञानस्य साकारत्वमवश्याश्रयणीयं निराकारस्य प्रकाशायोगात्, एकस्यायमाकार उपलभ्यमानो ज्ञानस्यैव तस्य च बहिर्वद्वभासोऽपि भ्रमकृतः, ज्ञानार्थयोः सहोपलम्भनियमाच्च ज्ञानादव्यतिरिक्तोऽर्थः । किञ्च बाह्यमर्थमभ्युपयद्भिरपि घटपटादिविज्ञानेषु

टी० सू० नाभाव उपलब्धेः किमर्थशून्यज्ञानवादे जगदुत्पत्तिः सम्भवति नेति स पक्षः समीचीनयुक्तिमूलो नेति घटाद्याकारो ज्ञानाकार उतार्थाकार? इति, उतार्थासाधारण्यं नाम तत्तदर्थसारूप्यम्? उतार्थसम्बन्ध? इति किं घटाद्याकारातिरेकेणार्थव्यवहारानुगुण्यं नाम ज्ञानाकारो भासते न वेति यदाऽऽकाशान्तरं न भासते यदा चार्थसारूप्यलक्षणसमर्थासाधारण्यं तदा घटाद्याकारो विज्ञानाकार इति विज्ञानमात्रवादस्य सम्यग्युक्तिमूलत्वात्तत्र जगदुदयसम्भवः यदा ज्ञानस्य तत्तदर्थव्यवहारानुगुण्यमाकारान्तरं भासते यदा चार्थासाधारण्यं तत्संबन्धलक्षणं तदा घटाद्याकारस्य ज्ञानाकारत्वाभावाद्योगाचारमतस्य युक्तिशून्यतया तत्पक्षे न जगदुत्पत्तिसम्भवः । वैचित्र्यं कथमित्यत्राह "स्वरूपे"ति, विजातीयज्ञानोत्पत्तिः कथमित्यत्राह "यद्घटाकारे"ति, सजातीयज्ञानसन्तानेषु चरमज्ञानं विजातीयोत्पादनशक्तमित्यर्थः, यथार्थाभ्युपगमेऽपि विजातीयघटादेर्विजातीयकपालाद्युत्पादकत्वं तथेति भावः । ज्ञानार्थयोरिति द्विचन्द्रज्ञाने चन्द्रद्वयसहोपलम्भनियमाद् द्वितीयचन्द्रस्य चन्द्रादव्यतिरिक्तत्वं तद्वदिति भावः किञ्चेत्यादि ज्ञानानामेव वासनावशाद्वैचित्र्योपपत्तेश्चरमज्ञानस्यैवार्थवद्विजातीयोत्पादनशक्तत्वाच्च ज्ञानानां साकारतयैव प्रकाशमानत्वेनाकारद्वयानुपलब्ध्या ज्ञानस्यैव तत्तदाकारभाक्त्वाच्च सहोपलम्भनियमाच्च बाह्यार्थाभ्युपगमेऽपि

भू० ज्ञानस्य तत्तदर्थासाधारण्यं तत्तदर्थसारूप्यमन्तरेणोपपद्यत इत्यवश्यं ज्ञानेऽर्थसरूपं रूपमास्थेयं तावतैव सर्वव्यव-

व्यवहारोपपत्तेः, तद्व्यतिरिक्तार्थकल्पना निष्प्रामाणिका, अतो विज्ञानमात्रमेव तत्त्वं न बाह्यार्थोऽस्तीत्येवं प्राप्ते प्रचक्ष्महे नाभाव उपलब्धेरिति, ज्ञानव्यतिरिक्तस्यार्थस्याभावो वक्तुं न शक्यते कुतः उपलब्धेः ज्ञातुरात्मनोऽर्थविशेषव्यवहारयोग्यताऽऽपादनरूपेण ज्ञानस्योपलब्धेः, एवमेव हि सर्वे लौकिकाः प्रतियन्ति घटमहं जानामीति

टी० ज्ञानस्य तत्तदर्थासाधारण्यस्य तत्तदर्थसारूप्यनिबन्धनत्वाच्च तावतैव सर्वव्यवहारोपपत्तेश्च ज्ञानमात्रमेव तत्त्वमित्यर्थः एवं प्राप्त इत्यादि ज्ञातुरात्मनोऽर्थविशेषव्यवहारयोग्यतापादानरूपेणेत्यनेन निराकारस्य प्रकाशायोगादिति हेतुः प्रत्युक्तः, न नीलादिर्ज्ञानाकारः तत्तन्नीलाद्यर्थव्यवहारानुगुण्यमेव ज्ञानस्याकार इत्यस्यार्थस्योक्तत्वात् उपलब्धिं दर्शयति "एवमेव ही"ति, एवं रूपेणेति ज्ञानं सकर्मकं सकर्तृकमेव भासते तत्र ज्ञानमात्रस्यैव पारमार्थ्यं किमनेनैव ज्ञानेन साध्यते?

श्रु० एवंरूपेण सकर्मकेण सकर्तृकेण ज्ञानाधात्वर्थेन सर्वलोकसाक्षिकमपरोक्षमवभासमानेनैव ज्ञानमात्रमेव परमार्थ इति साधयन्तः सर्वलोकोपहासोपकरणं भवन्तीति वेदवादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतरं प्रपञ्चितम् । यत्तु सहोपलम्भनियमादभेदो नीलतद्धियोरिति तत्स्ववचनविरुद्धं साहित्यस्यार्थभेदहेतुकत्वात्तदर्थव्यवहारयोग्यतैकस्वरूपस्य ज्ञानस्य तेन सहोपलम्भनियमः तस्माद्वैलक्षण्यसाधनमिति च हास्यं, निरन्वयविनाशिनां ज्ञानानामनुवर्तमानस्थिराकारविरहाद्वासना च दुरुपपादा विनष्टेन पूर्वज्ञानेनानुत्पन्नमुत्तरज्ञानं कथं वास्यते, अतो

ज्ञानवैचित्र्यमप्यर्थवैचित्र्यकृतमेव तत्तदर्थव्यवहारयोग्यता-पादानरूपतया साक्षात्प्रतीयमानस्य ज्ञानस्य तत्तदर्थसम्बन्धायत्तं तत्तदसाधारण्यं सम्बन्धश्च संयोगलक्षणः, ज्ञानमपि हि द्रव्यमेव प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वमविरुद्धमित्युक्तम् । अतो न बाह्यार्थाभावः । यत्परैः स्वप्नज्ञानदृष्टान्तेन जागरितज्ञानानामपि निरालम्बनत्वमुक्तं तत्राह—

उत ज्ञानान्तरेण? चरमः पक्षोऽनुपलब्धिनिरस्तः, प्रथमे च सकर्मके च सकर्तृके ज्ञाने परोक्षं भासमाने तत्र कस्यचिदंशस्यापारमार्थ्ये तदन्यस्याप्यपारमार्थ्यप्रसङ्गः, तस्मादपरोक्षसिद्धौ सर्वं ज्ञानवत्सत्यमित्यर्थः । यत्त्विति साहित्यं द्वयोरेवेति तद्भेदसाधकम्, उपलम्भनियमो भिन्नेष्वभिन्नेष्वपि नास्तीति असाधारणोऽनैकान्तिकत्वम् । किञ्च भेदहेतोर्नियमो भेदस्यैव साधक इत्यभिप्रायेणोक्तं तदर्थेत्यादि, तत्तदसाधारण्यस्य तत्तसारूप्यनिबन्धनत्वं परिहरति "तत्तदर्थे"ति, सम्बन्धश्चेति साक्षात्सम्बन्धः संयोग इत्यर्थः, संयोगो हि द्रव्ययोरित्यत्राह "ज्ञानमपि ही"ति, द्रव्यस्य द्रव्यान्तरधर्मतैकस्वरूपत्वं कथमिति शङ्कायां प्रदीपदृष्टान्तेन परिहरति "प्रभाद्रव्यस्ये"ति, उत्तरसूत्रमवतारयति "यत्परै"रिति,

सू॰ वैधर्म्याच्च न स्वप्नादिवत् ॥ २८ ॥

स्वप्नज्ञानवैधर्म्याज्जागरितज्ञानानामर्थशून्यत्वं न युज्यते वक्तुं, स्वप्नज्ञानानि हि निद्रादिदोषदुष्टकरणजन्यानि बाधितानि च, जागरितज्ञानानि तु तद्विपरीतानीति तेषां न तत्साम्यं, सर्वेषां च ज्ञानानामर्थशून्यत्वे भवद्भिः साध्योऽप्यर्थो न सिद्ध्यति, निरालम्बनानुमानज्ञानस्याप्यर्थशू-

न्यत्वात्, तस्यार्थवत्त्वे ज्ञानत्वस्यानैकान्त्यात्सुतरामर्थशून्यत्वासिद्धिः ॥

सू० न भावोऽनुपलब्धेः ॥ २९ ॥

न केवलस्यार्थशून्यस्य ज्ञानस्य भावः संभवति, कुतः क्वचिदप्यनुपलब्धेः, न ह्यकर्तृकस्याकर्मकस्य वा ज्ञानस्य क्वचिदुपलब्धिः, स्वप्नज्ञानादिष्वपि नार्थशून्यत्वमिति ख्यातिनिरूपणे प्रतिपादितम् ॥ उपलब्ध्यधिकरणं समाप्तम् ॥

टी० सू० वैधर्म्याच्च न स्वप्नादिवत् सोपाधिकत्वं स्वप्नादेर्मिथ्यात्वाभ्युपगमेनोक्तं सूत्रकारैः, तदेव नास्तीति वक्ष्यते न भावोऽनुपलब्धेः, क्वचिदपीत्यस्यायमभिप्रायः सुषुप्तौ केवलधर्मिस्फुरणमेव न धर्मभूतज्ञानस्येति कथं क्वचिदनुपलब्धिः स्वप्ने ह्यर्थशून्यं ज्ञानमित्यत्राह "स्वप्नज्ञानादिष्वपि" इति, उपलब्ध्यधिकरणं समाप्तम् ॥

सर्वथाऽनुपपत्त्यधिकरणम् ।

सू० सर्वथाऽनुपपत्तेश्च ॥ ३० ॥

अत्र सर्वशून्यत्ववादी माध्यमिकः प्रत्यवतिष्ठते—शून्यवाद एव हि सुगतमतकाष्ठा, शिष्यबुद्धियोग्यताऽनुगुण्येनार्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः, विज्ञानं बाह्यार्थाश्च सर्वं न सन्ति शून्यमेव तत्त्वम् अभावापत्तिरेव च मोक्ष इत्येव बुद्धस्याभिप्रायः, तदेव हि युक्तं शून्यस्याहेतुसाध्यतया स्वतःसिद्धेः, सत एव हि हेतुरन्वेषणीयः, तच्च सद्भावादभावाच्च नोत्पद्यते भावात्तावन्न कस्यचिदुत्पत्तिर्दृष्टा न हि घटादिरनुपमृदिते पिण्डादिके जायते । नाप्यभावादुत्पत्तिः सम्भवति, नष्टे पिण्डादिके ह्यभावादुत्प-

द्यमानं घटादिकमभावात्मकमेव स्यात्, तथा स्वतः परतश्चोत्पत्तिर्न सम्भवति स्वतस्स्वोत्पत्तावात्माश्रयदोषप्रसङ्गात् प्रयोजनाभावाच्च ॥

सू॰ सर्वथाऽनुपपत्तेश्च, किं माध्यमिकेनोक्तः सर्वशून्यवादः सम्भवति? ने? ति किं सर्वं कार्य्यं भावरूप? मुताभावरूप? मिति सर्वकार्येष्वपि भाव एव कारणं? मुताभाव? इति, किं भावान्तरमभावरूपम्? उत तुच्छं नामार्थान्तरं? यदा अतुच्छनामाऽर्थान्तरमभावः? तदा सर्वकार्येष्वभाव एव कारणमिति कार्य्यस्याप्यभावात्मकतया शून्यवादः उपपन्नः स्यात्, यदा भावान्तरमभावः तदा सर्वकार्येषु भाव एव कारणमिति कार्यस्यापि भावरूपत्वात्सर्वशून्यवादोऽनुपपन्नः स्यात्, अहेतुसाध्यतयेति सतो हेत्वभावादेव शून्यसिद्धिः न तु साधकहेत्वन्तरापेतयेत्यर्थः । कथं सतो हेत्वभाव इत्यत्राह "तच्चे"ति, न हीति विनाशादेव जायते इत्यर्थः ॥

परतः परोत्पत्तौ परत्वाविशेषात् सर्वेषां सर्वेभ्य उत्पत्तिप्रसङ्गः, जन्माभावादेव विनाशस्याप्यभावः, अतः शून्यमेव तत्त्वम्, अतो जन्मविनाशसदसदादयो भ्रान्तिमात्रं, न च निरधिष्ठानभ्रमासम्भवाद्भ्रमाधिष्ठानं किञ्चित्पारमार्थिकं तत्त्वमाश्रयितव्यं दोषदोषाश्रयत्वज्ञातृत्वाद्यपारमार्थ्येऽपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः, अतः शून्यमेव तत्त्वमिति प्राप्ते उच्यते—

सू॰ सर्वथाऽनुपपत्तेश्च ॥

सर्वथाऽनुपपत्तेः सर्वशून्यत्वं च भवदभिप्रेतं न सम्भवति, किं भवान्सर्वं सदिति वा प्रतिजानीते? असदिति वा? अन्यथा वा? सर्वथा तवाभिप्रेतं तुच्छत्वं न सम्भवति, लोके भावाभावशब्दयोस्तत्प्रतीत्योश्च विद्यमानस्यैव वस्तुनोऽव-

Digitized by Google

स्थाविशेषगोचरत्वस्य प्रतिपादितत्वात्, अतस्सर्वं शून्यमिति प्रतिजानता सर्वं सदिति प्रतिजानतैव सर्वस्य विद्यमानस्यावस्थाविशेषयोगयतैव प्रतिज्ञाता भवति इति भवदभिमता तुच्छता न कुतश्चिदपि सिद्ध्यति । किञ्च कुतश्चित्प्रमाणाच्छून्यत्वमुपलभ्य शून्यत्वं सिषाधयिषता तस्य प्रमाणस्य सत्यत्वमभ्युपेत्यं, तस्यासत्यत्वे सर्वं सत्यं स्यादिति सर्वथा सर्वशून्यत्वं चानुपपन्नम् ॥ सर्वथाऽनुपपत्त्यधिकरणं समाप्तम् ॥

टी० प्रयोजनाभावाच्चेति स्वयं विद्यमानत्वादुत्पत्तिनैरपेक्ष्यं प्रयोजनाभावः, स्वसत्ता ह्युत्पत्तेः प्रयोजनं, पूर्वमेव सत्त्वाच्चोत्पत्त्या प्रयोजनं किं सत उत्पत्तिः? उतासतः? सत्त्वेचोत्पत्त्यपेक्षा, असत्त्वे शशविषाणवन्नोत्पत्तिरिति भावः । न चेत्यादि ब्रह्माज्ञानवादिचोद्यनिराकरणं पूर्वपक्षमुपसंहरति "अत" इति, सर्वथा-शब्देन प्रमाणविकल्पानुपपत्तिः प्रमेयविकल्पानुपपत्तिश्च विवक्षिता । तत्र प्रमेयं विकल्पयति "किं भवानि" ति, अन्यथा वा किमुभयात्मकत्वेन? उतानुभयात्मकत्वेनेत्यर्थः, उभयात्मकत्वेऽनुभयात्मकत्वे चावस्थान्तरापत्तिरेवोक्ता स्यात्, लोकप्रतीत्या पराभ्युपगमप्रकारेण वा सत्त्वासत्त्वयोरवस्थाविशेषरूपत्वात्, न हि शून्यवादिन उभयप्रकारातिरेकेण साधनदूषणव्यवहारसम्भवः, घटत्वं स्वापेक्षया सत्कपालापेक्षया असदित्युभयात्मकत्वं, घटःस्वापेक्षया नासन् कपालापेक्षया असन् अतोऽनुभयात्मकत्वमप्यवस्थाविशेष इति, सदिति प्रतिजानतेवेति, किं सदिति विकल्पो दृष्टान्तार्थ इत्युक्तं भवति । प्रमाणानुपपत्तिमाह "किं चे" ति, प्रमाण-शब्दः प्रमितेरप्युपलक्षणार्थः किं सर्वं शून्यमिति प्रमितिस्तत्कारणं वा सत्य? मुत न सत्यं? सत्यं चेत् न सर्वशून्यत्वम् असत्यं चेन्नितरामित्यर्थः, अधिकरणत्रयात्मको बौद्धमतनिरासः अणुहेतुको भूतभौतिक संहतिरूपः स्कन्धहेतुकः पञ्चस्कन्धीरूप इत्युभयहेतुकः समुदाय इति

परे । चित्तचैत्तहेतुकश्चाभ्यन्तरो बाह्यश्च भूतभौतिकसङ्घात इत्यपरे तत्र पञ्चस्कन्धीरूपसमुदायानादरहेतुः पूर्वोक्तः, उभयथा च दोषादित्यत्राविद्यारागादीनां विनाशः सपरिकरात्सम्यग्ज्ञानाच्चेद्विनाशस्य निर्हेतुकत्वप्रतिज्ञाभङ्गः, स्वयमेवाविद्याविनाशश्चेत्सर्वमुक्तिप्रसङ्गः मोक्षमार्गोपदेशानर्थक्यं चेति परे, तदयुक्तम् उदासीनानाम् अपि चैवं सिद्धिरिति सूत्रे ऐहिकामुष्मिकफलसाधनप्रवृत्तिवैयर्थ्यस्य वक्ष्यमाणतया पुनरुक्तिप्रसङ्गात्, नासतो दृष्टत्वादित्यत्राभावाद् भावोत्पत्तिरनुपपन्ना असतः शशविषाणादेः सदुत्पत्त्यदर्शनात् अभावादुत्पत्त्यभ्युपगमे शशविषाणादिभ्योऽप्यङ्कुरादयो जायेरन्निति परे, तच्चायुक्तम् उत्तरोत्पादे च पूर्वनिरोधादित्यत्रैवाभावाद् भावोत्पत्तौ दूषणस्य दर्शितत्वात् तत्रैव हि कार्योत्पत्तिदशायां क्षणिकस्य कारणस्यावस्थानाभावनिबन्धनं दूषणं दर्शितं दूषणभेदाच्च पुनरुक्तिरिति चेन्न दूषणभेदाभावात् कथंचिद्दूषणभेदात्प्रेक्षणेऽप्यभावात् भावोत्पत्त्यनुबन्धितया सर्वस्य दूषणस्यैकसूत्राभिप्रेतत्वसम्भवात् शब्दविरोधाभावात् पूर्वनिरोधादिति हि शब्दो न ह्यत्रेदं दूषणं विवक्षितं न त्वन्यद्विप्रक्षितमिति वक्तुं शक्यते निरोधस्य शाब्दत्वात्तनुबन्धिदूषणस्याभिप्रेतत्वाच्च आभिप्रायिकत्वे हि इयदेवाभिप्रेतव्यं नान्यदिति को निवारकः पृथग्योगकरणमेव निवारकमिति चेन्न तस्यार्थान्तरपरत्वेन प्रयोजनवत्तरत्वात् क्षणिकत्वप्रयुक्तदूषणस्य साधारणत्वादसाधारणदूषणेन सौत्रान्तिकनिरसनं हि प्रयोजनवत्तरम्, अपेक्षितस्य शाब्दत्वे सम्भवति कथं तदुपेक्षणेनान्यथासिद्धानपेक्षितार्थान्तरपरत्वाश्रयणं युक्तं नीलादिराकार इति पदद्वयाध्याहारस्तदा स्यादिति चेत्तवापि तुल्यं भावस्योत्पत्तिरिति पदद्वयाध्याहारेण हि भवद्योजना । नन्वेवं तर्ह्युदासीनामित्यनन्तरसूत्रे कथं साधारणदूषणोक्तिः, न परपक्षेष्वसाधारणदूषणान्वितेषु साधारणदूषणमप्यनुसन्धेयमिति प्रदर्शनार्थत्वात्तदुक्तेः, वैधर्म्याच्चेत्यादिसूत्रव्याख्यातं परेषां स्वयं वि[1]रुद्धं कृत्स्नप्रपञ्चमिथ्यात्वनिरासकत्वा-

१ स्वपक्षविरुद्धम् ।

Digitized by Google

त्तस्य सूत्रस्य । ननु न विरोधः ज्ञानार्थयोरभेदो योगाचाराभिमतः, वयं तु भेदमङ्गीकृत्यार्थमिथ्यात्वं ब्रूम इति चेत् अर्थमिथ्यात्वस्यैव योगाचाराभिमतत्वात्, अन्यथा ज्ञानमिथ्यात्वार्थसत्यत्वयोरन्यतरप्रसङ्गात् । नन्वर्थतुच्छत्वं तदभिमतं वयं तु तन्निरासेनानिर्वाच्यत्वं ब्रूम इति चेत् तुच्छत्वमिति किमप्रतीतत्वं विवक्षित? मुत प्रतीतत्वेऽपि बाधार्हत्वं? न तावदप्रतीतत्वं योगाचाराभिमतं सहोपलम्भनियमस्य तैरुच्यमानत्वात्, द्वितीये तु शब्दवैषम्यमेव तेषां युष्माकं च प्रतीतत्वे सति बाधार्हत्वस्योभयाभिमतत्वाच्च । अस्तु वा किञ्चिद्वैषम्यं भवतां ग्रन्थेष्वन्यग्रन्थात्तदानीमपि सूत्रं विरुद्धं कारणदोषबाधकप्रत्यययोरनिर्वाच्यपक्षेऽप्युपाधित्वोपपत्तेरविशिष्टत्वात्, न ह्यनिर्वाच्यपक्षास्पर्शी कश्चिदुपाधिः सूत्रितः व्याख्यातश्च, अतो विरुद्धत्वं स्थितं न भावोऽनुपलब्धेरिति उत्तरोत्तरज्ञानवैचित्र्यहेतुतया सुगताभिमतानाम् अनादिवासनानां न भावः अर्थानुपलब्धेश्च । यद्वाऽर्थेनाश्रयेण विना धीवैचित्र्यहेतुभूतवासनानुपलब्धेश्च अर्थोपलब्धिनिबन्धना स्थिराश्रयनिष्ठा हि वासनेति व्याख्यातं, तत्रार्थाभावेऽपि स्वप्नानुभवजन्याः पाश्चात्यस्मृतिहेतुभूता वासना जायन्ते तद्वदिहापि सम्भवतीत्युक्ते किमुत्तरं स्वाप्नानि ज्ञानानि च न विषयशून्यानीति वक्तव्यमिति चेत् तर्हि हेत्वन्तरसापेक्षयोजनाया अपि सूत्रस्य नैरपेक्ष्यसिद्ध्यर्थं चरमहेतुविषयतया वर्णनं युक्तम्, अतोऽर्थशून्यज्ञानानामनुपलब्धिपराहतत्वपरं सूत्रमिदं वासनानामाश्रयानुपलब्धेरिह पृथक्कथनमपेक्षितम् अनुस्मृतेश्चेति सूत्रे तदवगमात्, पूर्वानुभवजनितसंस्काराश्रयस्य स्थिरस्याभावे प्रतिसन्धानानुपपत्तिस्तत्रावगता सर्वथानुपपत्तेश्चेति सूत्रमपि सुगतमात्रविषयं, न तु शून्यवादप्रतिक्षेपपरं तस्य तु सर्वप्रमाणविरुद्धत्वान्निरसनानादर इति परे । तदयुक्तं नास्तिक्यकाष्ठागतस्यासत्तर्काकरस्य तस्यावश्यं निरसनीयत्वात्, यदि सर्वप्रमाणविरोधेन दुर्बलतया न तन्निरासः तर्हि पक्षान्तराणामपि तत्तत्प्रत्यनीकप्रमाणविरुद्धतया दुर्बलत्वात्तन्निरासस्यानादरणीयता किं न स्यात्, वस्तुतो दुर्बलत्वेऽप्यापाततः प्राबल्यप्रतीतिस्तन्निरसनीयत्वमिति चेत्तच्छून्यवादेऽपि तुल्यं, पक्षान्तराणां कति-

Digitized by Google

पयप्रमाणानुगुण्यात्प्राबल्यावभासः शून्यवादस्य तु सर्वप्रमाणविरोधान्न प्राबल्यावभास इति चेत् पक्षान्तरेषु प्रमाणानुगुणांशस्य निरसनमशक्यं विरुद्धांशस्य तु प्राबल्यावभासाभावात् किमिति तेनेन, विरुद्धांशस्य प्रमाणविरोधनिमित्तदौर्बल्यस्यापाततो ऽनवभासात्तज्ज्ञापनमपेक्षितमिति चेत्त शून्यवादस्यापि कार्त्स्न्येन प्रमाणविरोधस्य ज्ञाप्यत्वात् तन्निरसनमपेक्षितं। यदि विरुद्धैकदेशमपि मतं निरस्यते तर्हि कार्त्स्न्येन विरुद्धस्य निरसनीयत्वं किं पुनर्न्यायसिद्धम्। किंच यद्यपि प्रमाणविरोधोऽवभासते तथाऽपि तदुक्तकुतर्काणां प्रबलत्वभ्रमो निराकरणीयः, अन्यथाज्वालाभेदयुक्त्या तदैक्यज्ञानस्येव प्रमाणज्ञानानामपि भ्रान्तित्वशङ्काप्रसङ्गात्, अतो ऽपेक्षितत्वाच्छब्दानुरोधाच्च शून्यवादप्रतिक्षेपपरमिदं सूत्रमिति युक्तम् । अन्ये त्वेवं वर्णयन्ति मातृशरीरं प्राप्तात् कर्मणः प्रथमं हृदयवस्तु स्त्रीन्द्रियपुरुषेन्द्रिययोरन्यतरसचिवोऽष्टद्रव्यकलापस्तदनन्तरं चित्तमप्युत्पद्यते तस्माच्चित्तात्पूर्वस्माच्च कलापान्मातृभुक्ताहाराच्च यथायथमष्टद्रव्यकलाप उत्पद्यते चक्षुरादीनि च, कर्मशब्दश्च पूर्वकर्मवासितविलक्षणचित्तसंतानपरः, एवमुभयहेतुके कर्ममातृभुक्ताहारहेतुकेऽपि गर्भे समुदायस्याप्राप्तिः संयोजयितुः स्थिरस्य प्रशासितुरीश्वरस्यानभ्युपगमादिति तदयुक्तं परपक्षेषु जगत्कारणानुपपत्तेर्वक्तव्यत्वात् संयोजकेश्वरानभ्युपगमरूपहेतोः कृत्स्नजगदुत्पत्तिप्रतिक्षेपकस्य गर्भस्थदेहमात्रविषयतया संकोचानुपपत्तेः, उभयथा च दोषादित्यत्र निरोधस्य सहेतुकत्वे निर्हेतुकत्वप्रतिज्ञाविरोधः । अहेतुकत्वे नित्यनिरोधः प्रसज्येत हेत्वभावाविशेषादित्युक्तं तदप्ययुक्तम् ईदृशानाममन्येषामपि प्रध्वंसविषयदूषणानां प्रतिसंख्याप्रतिसंख्यानिरोधप्रतिक्षेपकसूत्र एव विवक्षितत्वोपपत्तेः, कार्यकारणतुच्छताविषयदूषणस्यात्र विवक्षितत्वोपपत्तेश्च, नासतो दृष्टत्वादिति सूत्रं शून्यवादिनिरासपरं व्याख्यातं न भावोऽनुपलब्धेरित्यादिसूत्रद्वयं च बाह्यार्थानुमेयताव्युदासपरं वर्णितं, तदयुक्तं स्वारसिकक्रमाभावात्प्रत्यक्षादिना स्थिरतयोपलब्धा बाह्यार्थाः क्षणिकाः क्षणिकाश्चनुमेया, उभयविधाश्चार्था मिथ्याभूताः तद्विषयज्ञानमपि मिथ्येति हि लोकबुद्ध्यवतरणक्रमः, वैभाषिकसौत्रान्तिकयोर्बाह्यार्थस्थिर-

त्वाभ्युपगमाच्च संगतिर्युक्ता, न तु वैभाषिकमाध्यमिकयोर्बाह्यार्थानभ्युपगमाद् योगाचारमाध्यमिकयोः संगतत्वे बुद्ध्यवतरणक्रमान्माध्यमिकस्य पाश्चत्यत्वं युक्तं न तु योगाचारसौत्रान्तिकयोः पौर्वापर्यं युक्तम् उक्तसङ्गत्यभावात् ज्ञानास्तित्वसाम्यात्, सङ्गतिरिति चेत् तर्हि पौर्वापर्यविपर्ययो युक्तः, ज्ञानास्तित्वसाम्यस्यार्थसद्भावप्रतिषेधरूपेण वैषम्यस्य चानुगुणतया सङ्गतेर्वक्तव्यत्वात् । किंच शब्दानौचित्यमपि भवति नासतः सदुत्पत्तिर्दृष्टा, नापि स्वयमसदिति युक्तम् असतः केनापि प्रमाणेनादृष्टत्वादिति हि तद्योजना, तत्रासत इति पदस्य षष्ठ्यन्तत्वे प्रथमं प्रतिज्ञावाक्यमध्याहार्य्यं स्यात्, पञ्चम्यन्तत्वे द्वितीयं प्रतिज्ञावाक्यमध्याहार्य्यं स्यात्, अस्माकं तु न वाक्याध्याहारः, न नीलादिरसत आकार इति पदद्वयाध्याहार एव, एतावांश्चाध्याहारः सर्वेषामवर्जनीयः सू॰ न भावोऽनुपलब्धेरिति न तादृशस्याप्रत्यक्षस्य भावः, अनुपलब्धेः अनुपलभ्यमानस्य व्याप्तिग्रहणायोगादिति वर्णितं तदयुक्तम् नित्यातीन्द्रियाणामिन्द्रियादीनामनुमानाभावप्रसङ्गात् तेषु कल्पकमनन्यथासिद्धमिह तु बाह्यार्थकल्पकं ज्ञानवैचित्र्यमन्यथासिद्धं संस्कारेण तत्सम्भवादिति चेन्न उत्सूत्रत्वाद्धेतोः । ननु न सर्वेषु हेतुः सूत्रेषु शाब्दः अभिप्रेतहेतुभिराकाङ्क्षापूरणस्य सर्वव्याख्यातृसंमतत्वादिति चेत्, सत्यं निर्दिष्टहेतुर्यैरुपपादकैर्विना न स्थिरीभवति तेषामभिप्रेतत्वं युक्तं निर्दिष्टहेतूपयोगित्वात्, कण्ठोक्तहेतुदौःस्थ्येन तत्परिहारानुपयोगिहेत्वन्तरस्याभिप्रेतत्वकल्पनमनुपपन्नं, न हि सम्यञ्चं हेतुं वाचकेन वक्तुमशक्नुवंस्तस्याभिप्रेततासिध्यर्थं दुःस्थं हेतुं सूत्रकारो वदतीति युक्तं शश्वदनुपलब्धस्याशक्यानुमानत्वं हि दुःस्थं कल्पकहेत्वन्यथासिद्धिरेव हि सम्यग्युक्तिः सर्वथाऽनुपपत्तेश्चेति निर्देशश्च विकल्पितशिरोभेदेषु अनुपपत्तेर्विवक्षितां विवक्षितत्वमवगमयति । न त्वेकस्वरूपस्यैवार्थस्य बहूनुपपत्तियुक्तत्वम्, उभयथा च दोषादितिवत् अतो रूपादीनामनुमेयत्वे प्रत्यक्षानुभवविरोधादनेकोपपत्तिपरतया व्याख्यानमयुक्तं तत्र चार्थसङ्गतिवशात् शब्दानुरोधाच्च सर्वशून्यवासनिरासपरत्वमुक्तम् । सर्वथाऽनुपपत्त्यधिकरणं समाप्तम् ॥

Digitized by Google

एकस्मिन्नसंभवा-
धिकरणम् ।

सू० नैकस्मिन्नसम्भवात् ॥ ३१ ॥

भा० निरस्तास्सौगताः, जैना अपि परमाणुकारणत्वादिकं जगतो वदन्तीत्यनन्तरं जैनपक्षः प्रतिक्षिप्यते, ते किल मन्यन्ते जीवाजीवात्मकं जगदेतन्निरीश्वरं, तच्च षड्द्रव्यात्मकं, तानि च द्रव्याणि जीवधर्माधर्मपुद्गलकालाकाशाख्यानि, तत्र जीवा बद्धा योगसिद्धा मुक्ताश्चेति त्रिविधाः, धर्मो नाम गतिमतां गतिहेतुभूतो द्रव्यविशेषोजगद्व्यापी, अधर्मश्च स्थिति हेतुभूतो व्यापी, पुद्गलो-नाम वर्णगन्धरसस्पर्शवद्द्रव्यं, तच्च द्विविधं परमाणुरूपं, तत्संघातरूपं च, पवनज्वलनसलिलधरणीतनुभवनादिकं, कालस्त्वभूदस्ति भविष्यतीति व्यवहारहेतुरणुरूपोद्रव्यविशेषः, आकाशोऽप्येकोऽनन्तप्रदेशश्च, तेषु चाणुव्यतिरिक्तानि द्रव्याणि पञ्चास्तिकाया इति च संगृह्यन्ते, जीवास्तिकायो धर्मास्तिकायो ऽधर्मास्तिकायः पुद्गलास्तिकाय आकाशास्तिकाय इति, अनेकदेशवर्तिनि द्रव्येऽस्तिकायशब्दः प्रयुज्यते, जीवानां मोक्षोपयोगिनमपरमपि संग्रहं कुर्वन्ति "जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षा" इति मोक्षसंग्रहेण मोक्षोपायश्च गृहीतः, स च सम्यग्ज्ञानदर्शनचारित्ररूपः, तत्र जीवस्तु ज्ञानदर्शनसुखवीर्यगुणः अजीवश्च जीवभोग्यवस्तुजातम् आस्रवस्त[1]दुपभोगोपकरणभूतमिन्द्रियादिकं, बन्धश्चाष्टविधः घातिकर्मचतुष्टयम-

[1] तद्योगोपकरणभूतमिन्द्रियमिति पा० ।

घातिकर्मचतुष्टयं चेति, तत्राद्यं जीवगुणानां स्वाभाविकानां ज्ञानदर्शनवीर्य्यसुखानां प्रतिघातकरम्, अपरं शरीरसंस्थानतदभिमानतत्स्थितितत्प्रयुक्तसुखदुःखोपेक्षाहेतुभूतं निर्जरं मोक्षसाधनमर्हदुपदेशावगतं तपः, संवरो[1] ज्ञानेन्द्रियनिरोधिसमाधिरूपः, मोक्षस्तु निवृत्तरागादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावः पृथिव्यादिहेतुभूतास्त्वणवो वैशेषिकादीनामिव न चतुर्विधाः, अपि त्वेकस्वभावाः । पृथिव्यादिभेदस्तु परिणामकृतः सर्वं च वस्तुजातं सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिभिरनैकान्तिकमिच्छन्ति, स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति चावक्तव्यं च, स्यान्नास्ति चावक्तव्यं च, स्यादस्ति च नास्ति चावक्तव्यं चेति सर्वंच सप्तभङ्गीनयावतारात्सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्वनित्यत्वाद्युपपादयन्ति, पर्यायात्मना च तद्विपरीतं, पर्यायाश्च द्रव्यस्यावस्थाविशेषाः, तेषां च भावाभावरूपत्वात् सत्त्वासत्त्वादिकं सर्वमुपपन्नमिति । अत्राभिधीयते नैतदुपपद्यते,

सू० नैकस्मिन्नसम्भवादिति ॥ ३२ ॥

कुतः एकस्मिन्नसम्भवात् एकस्मिन्वस्तुनि अस्तित्वनास्तित्वादेर्विरुद्धस्य छायातपवद्युगपदसम्भवात् ।

[1] संवरो नामेन्द्रियनिरोधः इति पा० ।

टी० सू० नैकस्मिन्नसम्भवात्, सङ्गतिमाह "निरस्ता" इति, वैशेषिकबौद्धयोः परमाणुकारणवादिनोरैकान्तत्वपरमाणुचातुर्विध्यसाम्यात्तन्निरासौ सङ्गतौ बौद्धानन्तरमार्हतमतनिरासः प्राप्तः किमेकान्तब्रह्मकारणवादो विचाल्यः? उत ने? ति किं जैनमतं समीचीनयुक्तिमूलं? मुत ने? ति किमेकस्य वस्तुनः सत्त्वासत्त्वभिन्नत्वाभिन्नत्वनित्यत्वानित्यत्वाद्यनेकस्वभावत्व सम्भवति? ने? ति किं पर्यायस्वभावाभ्यामेकस्य वस्तुनोऽनेकस्वभावत्वमापादयितुं शक्यते ने? ति यदा शक्यते तदैकस्य वस्तुनोऽनेकस्वभावत्वसम्भवाज्जैनमतस्य समीचीनयुक्तिमूलतया ब्रह्मकारणवादस्याश्रद्धेयता स्यात् । यदा तु न शक्यते तदा वस्तुनोऽनेकस्वभावत्वासम्भवेन जैनमतस्य कुतर्कमूलतया ब्रह्मकारणवादस्य श्रद्धेयतमत्वं, ते किलेत्यादि,-स्थितिहेतुभूतः स्थावरत्वादिहेतुः अप्रवृत्तिहेतुरित्यर्थः। संघातरूपमेव विवृणोति "पवने"ति, अपरिमितशरीरसंस्थानं तदभिमानः तत्स्थितिः तत्प्रयुक्तसुखदुःखोपेता इत्येषां हेतुरित्यर्थः अन्यथा चतुष्टयायोगात्पर्यायोऽवस्था अवस्थाविशेषाणां भावाभावरूपत्वाद्द्रव्यस्य सत्त्वादिकमुपपन्नमित्यर्थः। दूषयति अत्राभिधीयत इत्यादिना, आकारभेदादविरोध इत्यत्राह—

भा० एतदुक्तं भवति द्रव्यस्य तत्तद्विशेषणभूतपर्यायशब्दाभिधेयावस्थाविशेषस्य च पृथक्पदार्थत्वान्नैकस्मिन् विरुद्धधर्मसमावेशः सम्भवतीति, तथा ह्येकेनास्तित्वादिनाऽवस्थाविशेषेण विशिष्टस्य तदानीमेव न तद्विपरीतनास्तित्वादिविशिष्टत्वं सम्भवति, उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वं, च तद्विपरीतं च नित्यत्वं तस्मिन्कथं समवैति, विरोधिधर्माश्रयत्वं च भिन्नत्वं, तद्विपरीतं चाभिन्नत्वं, कथं वा तस्मिन्समवैति यथाऽश्वत्वमहिषत्वयोर्युगपदेकस्मिन्नसम्भवः। अयमर्थः पूर्वमेव भेदाभेद-

Digitized by Google

वादिनिरसनसमये तत्तु समन्वयादित्यत्र प्रपञ्चितः, कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथक् अस्तित्वनास्तित्वादयो न वक्तव्याः, न च परिहर्त्तव्याः, कालोऽस्ति नास्तीति व्यवहारो व्यवहर्तॄणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्यः, जात्यादयो हि द्रव्यविशेषणतयैव प्रतीयन्त इति पूर्वमेवोक्तं, कथं पुनरेकमेव ब्रह्म सर्वात्मकमिति श्रोचियैरुच्यते सर्वचेतनाचेतनशरीरत्वात्सर्वज्ञस्य सर्वशक्तेः सत्यसङ्कल्पस्य पुरुषोत्तमस्येत्युक्तम् ।

टी० "एतदुक्तं भवति" इति, किं द्रव्यावस्थे भिन्ने? उताभिन्ने? उत भिन्नाभिन्ने? इति विकल्पमभिप्रेत्य भेदपक्षे दूषणमाह "द्रव्यस्ये"ति, अभिन्नत्वपक्षेऽपि नाकारभेदादविरोधः, भिन्नाभिन्नत्वपक्षेऽपि तदविरोधनिर्वाहकाकारान्तराभावान्नाविरोध इतीदं पूर्वमुक्तत्वान्नात्र कण्ठोक्तं, पूर्वं प्रस्तुतास्तित्वादेः कथं विरोध इत्यत्राह "तथा ही"ति, सत्त्वासत्त्वादिविरोधो नाकारभेदेन परिह्रियते अपि तु द्रव्यस्यैवोच्यत इति पूर्वं प्रस्तुतं तदनुपपन्नमित्याह "तथा ही"ति, आकारभेदाभ्युपगमे आकारे नास्तित्वादिधर्मः द्रव्ये त्वस्तित्वादिधर्मः अनभ्युपगमे तु द्रव्यमेवोभयधर्मीति विरोधः, सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वविरोधः क्रमेणोपपादितः, कालस्येति पदार्थविशेषणतयैवेत्यनेन कालस्याणुत्वनिराकरणं फलितम्, अनेककालकल्पनमयुक्तम्, एकस्मिन् कालेऽनेकपदार्थाः सन्तीत्येव प्रतीतेः, कालस्य द्रव्यविशेषणतयाऽस्तित्वं प्रतिपन्नं ततस्तस्य नास्तित्वशङ्का निरवकाशेत्यर्थः । कथमित्यादिना परिचोद्य परिहरति "सर्वे"ति, शरीराणामन्योन्यं ब्रह्मणश्च भेदः शरीरिणो ब्रह्मण एकत्वमित्यर्थः, सर्वज्ञस्येत्यादि विशेषणमेकस्य सर्वचिदचिन्नियन्तृत्वाद्यसम्भावितत्वशङ्काव्यावृत्त्यर्थं । शरीरदोषाणां शरीरिण्यस्पर्शमुपपादयति–

भा० शरीरशरीरिणोस्तद्धर्माणां चात्यन्तवैलक्षण्यमप्युक्तं, किञ्च जीवादीनां षण्णां द्रव्याणामेकद्रव्यपर्यायत्वाभावात्तेषु द्रव्यैकत्वेन पर्यायात्मना चैकत्वानेकत्वादयोऽनुपपाद्याः, अथोच्येत षडेतानि द्रव्याणि स्वकीयैः पर्यायैः स्वेन स्वेन चात्मना तथा भवन्तीति, एवमपि सर्वमनैकान्तिकमिभ्युपगमविरोधः, अन्योन्यतादात्म्याभावात्, अतो न युक्तमिदं जैनमतम् । ईश्वरानधिष्ठितपरमाणुकारणवादे पूर्वोक्तदोषास्तथैवावतिष्ठन्ते ॥

सू० एवं चात्माकार्त्स्न्यम् ॥ ३३ ॥

एवं भवदभ्युपगमे सत्यात्मनश्चाकार्त्स्न्यम् प्रसज्येत जीवोऽसङ्ख्यातप्रदेशो देहपरिमाण इति हि भवतां स्थितिः, तच्च हस्त्यादिशरीरेऽवस्थितस्यात्मनस्ततो न्यूनपरिमाणे पिपीलिकाशरीरे प्रविशतोऽल्पदेशव्यापित्वेनाकार्त्स्न्यं प्रसज्येत अपरिपूर्णता प्रसज्येत इत्यर्थः । अथ सङ्कोचविकासधर्मतयाऽऽत्मनः पर्यायशब्दाभिधेयावस्थान्तरापत्त्या विरोधः परिह्रियत इत्युच्यते तचाह-

सू० न च पर्य्यायादप्यविरोधो विकारादिभ्यः ॥ ३४ ॥

न च सङ्कोचविकासरूपावस्थान्तरापत्त्याऽपि विरोधः परिहर्तुं शक्यते विकारवत्प्रयुक्तानित्यत्वादिदोषप्रसक्तेर्घटादितुल्यत्वप्रसङ्गात् ॥

टी० "शरीरशरीरिणोरि"ति, अनेकान्तत्वस्य व्यभिचारमाह "कि-ञ्चे"ति, सू· एवं चात्माकार्त्स्न्यम्, एवं-शब्दं वाचष्टे "भवदि"ति, बुद्धि-स्थतदभ्युपगमप्रकार एवं-शब्दोक्त इत्यर्थः, यथा पूर्वोक्तदोषः एवं दोषा-न्तरमिति परे। अन्यत्रापि दूषणान्तरे विवक्षितपूर्वोक्तदूषणस्य दृष्टान्तीक-रणादर्शनात् प्रयोजनाभावाच्च धीस्थप्रकारपरत्वेन व्याख्यातम्, तत्र हि दूष्यं जीवस्य देहपरिमाणत्वमन्तर्गतमुपस्थापितं स्यात् असङ्ख्यातप्रदेशः एकरूपसङ्ख्याहीनप्रदेशः एकरूपसङ्ख्याहीनः अनियतप्रदेश इत्यर्थः। उत्तर-सूत्रशङ्कामाह "अथे"ति, सू· न च पर्यायादप्यविरोधो विकारादिभ्यः, अवस्थाभेदादविरोधवर्णने विकारत्वमवयवोपगमापगमाभ्यामुपपादयन्ति परे सर्वं तपनातपरत्नालोकादीनां सङ्कोचविकासभाजामशीर्णावयवत्वस्य पूर्वमुपपादितत्वात् सङ्कोचविकासयोरवयवापगमोपगमाभ्यां विनाऽपि सम्भवात्तदनुक्तिः, अत एव हि सङ्कोचविकासरूपेत्यवस्थाविशेषिता, तेन वृक्षादिगतवृद्धिक्षयादिव्यावृत्तिः विकार उत्पत्तिविनाशश्चानित्यत्वं परि-मितकालवर्तित्वम्। यद्वा विकारो जन्मादिः, अनित्यत्वं विनाशः आदि-शब्दः पराक्त्वचैतन्यानश्रयत्वपरः। ननु त्वन्मते धर्मभूतज्ञानस्य सङ्कोचविकासाभ्युपगमे कथं नित्यत्वादि स्वरूपेण नित्यस्य वस्तुनो निरुपाधिकधर्मत्वादिति ब्रूमः-धर्मभूतज्ञानस्य पराक्त्वं चैतन्याश्रयत्वं चेष्टं न[1] तु जीवस्वरूपमेव सङ्कोचविकासभागिति तस्यालोकस्येव अनित्य-त्वपराक्त्वचैतन्यानाश्रयत्वप्रसङ्गो दुर्वारः॥

सू० अन्त्यावस्थितेश्चोभयनित्यत्वादवि-शेषः ॥ ३५ ॥

भा० जीवस्य यदन्त्यं परिमाणं मोक्षावस्थागतं तस्य पश्चाद्देहान्त-रपरिग्रहाभावादवस्थितत्वाभावादात्मनश्च मोक्षावस्थस्य तत्परिमाणस्य चोभयोर्नित्यत्वात्तदेवात्मनः स्वाभाविकं

[1] तव तु इति पा·।

परिमाणमिति पूर्वमपि तस्मादविशेषः स्यात्, अतो देह-परिमाणत्वमात्मनो न स्यादित्यसङ्गतमेवेदमार्हतमतम् ॥

एकस्मिन्नसम्भवाधिकरणं समाप्तम् ॥

टी० सू॰ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः, जीवस्य तावदणुत्वादेरिवापरिमाणत्वमनभ्युपगतं विभुत्वं चानिष्टं देहपरिमाणवादेऽणुत्वं चासम्भावितम् । अणुपरिमाणदेहाभावात्, एवं च यथास्वरूपं मोक्षावस्थास्थितं नित्यतया पूर्वमपि सत् तथाऽन्त्यपरिमाणं मोक्षावस्थास्थितम् अदेहोपाधिकं नित्यतया पूर्वमपि सत्स्यात्, तत आत्मनो देहपरिमाणत्वहानिरित्यर्थः । अन्त्यावस्थितेश्चान्त्यपरिमाणस्य नित्यत्वे तस्या भूत्वाभावित्वानुपपत्तेः प्रागपि तदस्तीति तद्विरुद्धपरिमाणावरोधायोगादाद्यं मध्यमं च परिमाणं तदेवेत्याद्यमध्यमपरिमाणयोरपि नित्यत्वादविशेषः एकपरिमाणशरीरतारूपः स्यादिति परे । उभयोराद्यमध्यमावस्थयोरन्त्यपरिमाणस्य नित्यत्वादविशेषः सर्वदाऽणुत्वमेकरूपमहत्त्वं वा स्यादिति च ते चापरे च योजनान्तरमाहुः । तन्न रोचते आत्मनोऽनादित्वात्तद्गतपरिमाणेष्ववस्थाऽन्तरेषु वा कस्यचिदाद्यत्वानुपपत्तेः, आद्यत्वाभावाच्च[1] कस्यचिन्मध्यमत्वानुपपत्तेश्च न चाद्यशब्देनाणुत्वविवक्षोपपन्ना अणुपरिमाणशरीरासम्भवेन देहपरिमाणस्यात्मनोऽणुत्वानुपपत्तेः, आद्यमध्यमयोरभावे कथमन्त्यव्यपदेश? इति चेन्न अन्त्यशब्दस्यावसानवाचित्वादनादेरप्यवसानसम्भवाच्च उभयेषामपि भिन्नाभिन्नत्ववादिनामिदमधिकरणं विरुद्धम् । एकस्मिन् भिन्नाभिन्नत्वाद्यसम्भवस्योक्तत्वात्, भिन्नाभिन्नत्वयोश्च परस्परप्रतिक्षेपकत्वं दर्शितम् । ननु तयोर्मिथः प्रतिक्षेपकत्वं मृदादिद्रव्यरूपेणाभेदस्य घटाद्यवस्थारूपेण भेदस्य च दर्शनादिति चेत् तर्हि साधारणाकारस्यासाधारणाकारस्य च भेदाभेद इति नाममात्रं कृतं स्यात्, ततश्च भेद एवावतिष्ठेत असाधारणधर्मस्य स्वविरोधिधर्माश्रयात्स्वाश्रयस्य व्यावर्तकत्वात् । नन्वभेदोऽप्यवस्थितः किं न स्यात्साधारणाकारस्य स्वाश्रयैक्यनिर्वाहकत्वदर्शनादिति चेन्न साधारणाकारस्य भेदसहस्यैक्यनिर्वाह-

१ आद्याभावाश्चेति पा॰ ।

Digitized by Google

कत्वाभावात् असाधारणाकारस्य अभेदासहत्वाच्च एकस्य वस्तुनस्साधारण्यं हि बहुप्रतियोगिकं विरोधिधर्मानाश्रयतालक्षणत्वादभेदस्य, विरोधिधर्मसंसर्गस्तं प्रतिविपति, अतो घटत्वाव्यवस्थाविशेषः स्वाभावरूपैर्वा स्वभावाविनाभूतैर्वा शरावत्वपिण्डत्वादिधर्मैराक्रान्तात् मृद्द्रव्यात्स्वाश्रयद्रव्यं भिनत्ति, यदा न भिनत्ति तदा घटत्वादिराकारः स्वयं न स्यात् अभेदस्य स्वाभावरूपत्वात् स्वभावाविनाभावाद्वा । अतो भिन्नाभिन्नत्वयोरेकस्मिन्नसम्भवो दुर्वारः द्रव्यपर्यायात्मना भिन्नत्वाभिन्नत्वे एकवस्तुनि वदतो विवसनात् किं वैषम्यं युवयोः, पर्यायानपेक्षणस्य द्रव्यस्य पर्यायाणां च नित्यत्वानित्यत्वसत्यत्वासत्यत्वभिन्नाभिन्नत्वादिकं स ब्रूते वयं तु न तथेति चेन्न अवस्थातद्वतोरप्यवस्थान्तरमनपेक्ष्य भिन्नाभिन्नत्वाभ्युपगमात् । यथैकस्य द्रव्यस्य स्वरूपेण नित्यत्वानित्यत्वादिकमवस्थामनपेक्ष्य न शक्यते वक्तुं, तथाऽवस्थातद्वतोः स्वरूपेणाभिन्नत्वे कथमवस्थामनपेक्ष्य भिन्नत्वमाश्रीयते, स्वरूपेण तयोर्भिन्नत्वे कथमवस्थामनपेक्ष्य भिन्नत्वमाश्रीयते स्वरूपेण तयोर्भिन्नत्वे कथं घटमुकुटयोरिवावस्थान्तरमनपेक्ष्याभिन्नत्वमाश्रीयते? अवस्थायाः स्वपरनिर्वाहकत्वादवस्थान्तरनिरपेक्षत्वमिति चेत्तर्हि द्रव्यस्यावस्थान्तरसापेक्षत्वादुभयातिरिक्तमवस्थान्तरसापेक्षत्वादुभयातिरिक्तमवस्थान्तरमाश्रयणीयं ययाऽवस्थया द्रव्यस्य भेदाभेदौ तामेव द्रव्यं तन्निर्वहणायाऽपेक्षते नावस्थान्तरमिति चेन्न, विकल्पासहत्वात्सा यद्यभेदनिर्वाहिका तर्हि भेदनिर्वहणायावस्थान्तरमन्वेष्टव्यं, सा यदि भेदनिर्वाहिका अभेदनिर्वहणायाऽवस्थान्तरमन्वेष्टव्यम्, उभयनिर्वाहकत्वमेकस्य व्यवस्थायाविरुद्ध निर्वाह्यद्वयविरोधात्, न ह्यग्निगतपैङ्गल्यमुष्णत्वशीतत्वयोर्निर्वाहकं भवति । ननु न निर्वाह्यद्वयं विद्यते भिन्नत्वमभिन्नत्वं च सैव घटावस्थेति चेत्तर्हि नास्मि विवादः तस्मादवस्थातद्वतोर्भिन्नाभिन्नत्वं नैवोक्तं स्यात् यथा पटस्य घटत्वं कुड्यत्वं च पटत्वमेवेत्युक्ते पटे घटत्वकुड्यत्वानुक्तिरेव स्यात् तद्वत् एवमवस्थान्तरमनपेक्ष्यावस्थान्तद्वतोर्भिन्नाभिन्नत्वं वदतामर्हतो न वैषम्यम् । अत एव सूत्रयोजनाऽपि न संभवति सत्त्वासत्त्वादेरेकस्मिन्धर्मिण्यसंभवादिति कथमेको भावो ऽस्ति नास्ति चेति भास्करः, न

त्त्वं, ततश्च धातोरित्यधिकाराद्यादेः परस्येति यकारस्य प्राप्नोति, अनित्त्वात्सिद्धं, नह्ययं णल्विधानसमये प्रत्यय इत्यनित्त्वाद् णकारस्यानेकाल्त्वात्सर्वादेशः, ततो णकारस्येत्संज्ञेत्यानुपूर्व्यात्सिद्धम्., ननु च णकारो न कर्तव्य इत्युक्तम्, एवं तर्हि लकार आदौ क्रियते तस्याप्यनित्त्वात्सिद्धं, ल उत्तमो वेति वक्तव्यम्, एवमात औ लस्येति, हल्ङ्यादिसूत्रे चाप्यपृक्तं हलिति हल्ग्रहणं लिङ्गं सर्वादेशो णलिति, तद्धि पपाचेत्यादौ माभूदिति, सर्वादेशत्वे च तदुपपद्यते । 'पपक्थेति' । क्रादिनियमात्प्राप्त इडुपदेशेत्वत इति प्रतिषेधाच्च भवति, क्व चित्पेचिथेति पाठः, ऋतो भारद्वाजस्येति नियमादिट्, थलि च सेटीत्येत्वाभ्यासलोपौ । 'पेचेति' । धातोरित्यधिकारात्तस्मादित्युत्तरस्यादेः परस्येति थकारस्याकारे द्वयोरतो गुणे पररूपत्वम् ॥

"विदो लटो वा" ॥ 'विद ज्ञानइति' । सत्ताविचारार्थयोस्त्वात्मनेपदित्वात्तिबादीनामसम्भवो लाभार्थस्यापि विकरणेन व्यवधानादनन्तराणामसम्भव इति भावः ॥

"ब्रुवः पञ्चानामादित आहो ब्रुवः" ॥ 'पञ्च णलादय इति' । आदेशा अपि पञ्चैव तत्राप्यादितो णलादयः पञ्च न पुनरिच्छातः पञ्चेत्यर्थः, कथं पुनर्द्वितीयं पञ्चग्रहणमादिग्रहणं चान्तरेणादेशेष्वयं विशेषो लभ्यते, ननु सर्वैरेव णलादिभिः पञ्चानां स्थाने युक्तम्भवितुम् । उच्यते, पूर्वसूत्रे तावद्यथासङ्ख्यं प्रवर्त्तते ततश्च तत्रैव निर्ज्ञातः स्थानिविशेषेण णलादीनां सम्बन्धः, तएवेहानुवर्त्तन्तइत्यत्रापि तथैव भविष्यति, ततश्च स्थानिसम्बन्धादिति पूर्वसूत्रे स्थानिविशेषेण सम्बन्धस्य निर्ज्ञातत्वादित्यर्थः । 'आत्थेति' । आहस्थः, । 'परेषामिति' । थादीनाम् । ननु च ब्रुव इति यदेतत्पञ्चम्यन्तं तदेवार्थाद्विभक्तिविपरिणामो भवतीत्यादेशसम्बन्धे षष्ठ्यन्तं विज्ञास्यते नार्थो ब्रुव इति पुनर्वचनेन, तत्राह । 'ब्रुव इति' । 'पुनर्वचनमित्यादि' । 'परस्मैपदानामेव हि स्यादिति' । असति श्रुते सम्बन्धिनि विभक्तिविपरिणामो भवति, इह तु परस्मैपदानामिति श्रुतत्वात्तेषामेव स्यादित्यर्थः ॥

"लोटो लङ्वत्" ॥ 'लोटो लङ्वत्कार्यं भवतीति'। अत्र लोडादेशेषु लोट्शब्दो वर्त्तते, लङादेशेषु च लङ्शब्दः, लोडादेशानां लङादेशवत्कार्यं भवतीत्यर्थः। तदाह। 'तामादयः सलोपश्चेति'। यद्यप्येते लङ्याहत्य न विहितास्तथापि लङि दृष्टत्वादतिदिश्यन्ते। 'अडाटौ कस्मान्न भवत इति'। लङ्येवाहत्य विहितत्वात् प्रत्युत तयोरेवातिदेशो युक्त इति प्रश्नः। 'तथा झेर्जुसादेश इति'। कस्मान्न भवतीति विभक्तिविपरिणामेनानुषङ्गः, लङः शाकटायनस्येति जुसभावो ऽपि लङ एवाहत्य विहितः, इह तु जाग्रतु विदन्तु सिजभ्यस्तविदिभ्यश्चेति लङि दृष्टो जुसभावः प्राप्नोति। 'वाग्रहणमनुवर्त्ततइति'। लोट इत्युपमेये षष्ठीनिर्द्देशादुपमानं षष्ठ्यन्तं विज्ञायते लङो यत्कार्यं तल्लोटो भवतीति न तु लङि यत्कार्यं तल्लोटीत्यडाटोः परिहारान्तरं, झेर्जुसभावस्य तु परिहारान्तरं लङःशाकटायनस्येत्यत्र स्वयमेव वक्ष्यति ॥

"एरुः" ॥ 'लोडादेशानामिकारस्येति'। अथ तु लोडादेशो य इकारस्तस्येत्यर्थोऽभिप्रेतः स्यादिट इत्येव ब्रूयात्, तुह्योः विदाङ्कुर्वन्त्विति च निर्द्देशोनुपपन्नः स्यादथेदानीमिटोऽपि व्यपदेशिवद्भावेनोत्वं कस्मान्न भवति, पुनःप्रसङ्गविज्ञानाट्टेरेत्वं भविष्यति। 'न वोच्चारणसामर्थ्यादिति'। यदि हिन्योरुत्वं स्यात्सेर्हुर्मेर्नुरित्येव ब्रूयादेवं हि प्रक्रियालाघवं भवतीति भावः। आनि लोट्, हुझल्भ्यो हेर्धिरिति लिङ्गं हिन्योरुत्वाभावस्य ॥

"सेर्ह्यपिच्च" ॥ 'लुनीहीति'। पित्त्वाभावान्ङित्त्वे सति ई हल्यघोरितीत्वं भवति, राध्नुहीत्यत्र गुणाभावः, इह सेर्हिर्ङिच्चेति वक्तव्यम्। नन्वेवं ङित्त्वान्ङित्कार्यं भवतु स्थानिवद्भावेन पित्त्वमप्यस्तीत्यनुदात्तत्वमपि प्राप्नोति, ङिच्च पिन्न भवतीति वचनान्न भविष्यति, यथाऽपि स्तुयाद्राजानमिति, अत्र उतो वृद्धिर्लुकि हलीति पिति विधीयमाना वृद्धिर्न भवति। ब्रूताद्ब्रवानिति, ब्रुव इण्न भवति, किं च नाप्राप्ते पित्त्वे ङित्त्वमारभ्यमाणं तद्बाधिष्यते ॥

"वा छन्दसि"॥ 'अपित्त्वं विकल्प्यतइति'। अनन्तरत्वात्। नादेश इति, व्यवहितत्वात्। 'युयोधीति'। बहुलं छन्दसीति शपः श्लो द्विर्वचनम्। अत्र पित्त्वात् ङित्त्वाभावे ऽङितश्चेति धिभावः॥

"मेर्निः"॥ 'उत्वलोपयोरपवाद इति'। यथाक्रममेरुर्लोटो लङ्वदिति प्राप्तयोः, इतश्चेतीकारलोपस्यापि लङि दृष्टत्वादतिदेशतः प्राप्तिः। वयं तु ब्रूमो लोटो लङ्वदिति प्राप्तस्यामादेशस्यापवाद इति॥

"आमेतः"॥ 'लोट्सम्बन्धिन इति'। लोडादेशसम्बन्धिन इत्यर्थः। एतेन लोटैकारो विशेष्यतइति दर्शयति, एकारेण तु लोटि विशेष्यमाणे तदन्तविधौ सत्येकारान्तस्य लोट आम्विधीयमानोनेकाल्त्वात्सर्वादेशः स्या,त्तत्र हि निर्द्दिश्यमानस्यादेशा भवन्तीति परिहारो वाच्यः स्यादित्यर्थः॥

"आडुत्तमस्य पिच्च"॥ 'स चोत्तमपुरुषः पिद्भवतीति'। आट एव पित्त्वं कस्मान्न विज्ञायते, तुल्यविभक्तिकयोर्हि युक्तः सम्बन्ध आट् पिदिति, निरर्थकत्वात्, अनुदात्तत्वं तावदागमत्वादेव सिद्धं, करवाणि मार्जानीत्यादौ गुणवृद्ध्योरपि प्रत्यय एव निमित्तं न त्वागमः॥

"एत ऐ"॥ 'इह कस्मादिति'। गुणस्यान्तवद्भावेन लोड्ग्रहणेन ग्रहणादस्ति प्रसङ्ग इति भावः। 'बहिरङ्गलक्षणत्वादिति'। द्विपदाश्रयत्वाद्गुणस्य बहिरङ्गत्वमैकारस्त्वेकपदाश्रयत्वादन्तरङ्गः, अत एव हेतोरामेत इत्ययमपि विधिर्न भवति॥

"लेटोडाटौ"॥ 'पर्यायेणेति'। न यौगपद्येनाद्विधानसामर्थ्यात्, अन्यथा सवर्णदीर्घत्वे सत्यड्विधानमकिञ्चित्करं स्यात्॥

"आत ऐ"॥ 'करवैते इति'। छन्दस्युभयथेति सार्वधातुकत्वाद्विकरणः, आर्द्धधातुकत्वात् ङित्त्वाभावे विकरणस्य गुणः, करोतेश्चोत्वाभावः, पवैते अश्नवैथे प्रवैते वियन्थैथे॥

"वैतोन्यत्र"॥ 'एतद्विषयमिति'। षष्ठीसमासः, एवं विषयमिति तु युक्तः पाठः, उदाहरणान्युपसंवादाशङ्कयोश्चेत्यत्र व्युत्पादितानि। 'दधसइति'। थासः से, शपः श्नुः, अट्, घोर्लोपो लेटि वेत्याकारलोपः॥

"इतश्च लोपः परस्मैपदेषु" ॥ 'परस्मैपदग्रहणमित्यादि' । अन्यथा टेरेत्वस्यावकाशो ऽन्ये लकाराः, लेट्यपीकारादन्यत्र इतो लोपस्य परस्मैपदानि, इडादिषूभयप्रसङ्गे परत्वादितो लोपः स्यात् ॥

"स उत्तमस्य" ॥ 'करवाव करवामेति' । पूर्ववद्गुणोत्वाभावौ, लोटोडाटावित्याट् । 'उत्तमग्रहणमित्यादि' । इह वस्मसग्रहणमेव कर्त्तव्यं तत्रायमप्यर्थः, स इति न वक्तव्यं भवति, अलोन्त्यस्येत्येव सिद्धं, यदा च पुरुषान्तरस्य स्थाने वस्मसौ भवत एतयोश्च स्थाने सकारान्तं पुरुषान्तरं तदापि वाग्रहणानुवृत्त्यैव लोपालोपौ यथादर्शनं व्यवस्थितौ भविष्यतः, यथा क्रियमाणे युत्तमग्रहणे वाग्रहणं चानुवर्त्तते, उत्तरत्र नित्यग्रहणं स्यात् नित्यं ङितः ॥

"लिङः सीयुट्" ॥ लिङ्शब्दोऽत्र लिङादेशेषु स्थानिवद्भावात् प्रयुक्त इत्याह । "लिङादेशानामिति" । सीयुट्सकारस्यार्द्धधातुके लिङि श्रवणं सार्वधातुके लिङः स लोपोनन्त्यस्येति स लोपः, यकारस्याजादिषु श्रवणमन्यत्र लोपः ॥

"यासुट् परस्मैपदेषूदात्तो ङिच्च" ॥ 'परस्मैपदविषयस्येति' । लिङः परेषां परस्मैपदानामसम्भवात् । 'सीयुटोपवाद इति' । नाप्राप्ते तस्मिन्नारम्भात्, तेन यासुटि कृते तस्य तिङ्भक्तत्वात्तदादेः सीयुट् प्रसङ्ग इति न चोदनीयं, सत्यपि हि सम्भवे सामान्यविधेर्विशेषविधिबाधकः, कथं तर्हि कृषीष्ट इत्यादिषु सुटि कृते सीयुड् भवति, ननु तत्रापि सुटा सीयुड् बाधनीयः, अत्र परिहारं सुड्विधौ वृत्तिकारः स्वयमेव वक्ष्यति । 'आगमत्वादनुदात्तत्वे प्राप्त इति' । अत एव यासुडुदात्तवचनाद्विज्ञायते आगमा अनुदात्ता भवन्तीति, अन्यथा यासुटः प्रत्ययभक्तत्वात्प्रत्ययस्वरेणैव सिद्धमुदात्तत्वं, नैतदस्ति ज्ञापकं, यानि पिद्वचनानि तदर्थमेतत्स्यात्, यद्येतावत्प्रयोजनमपिदित्येव ब्रूयात्, तदेतदुदात्तवचनं ज्ञापकमेवागमा अनुदात्ता भवन्तीति । 'तत्र तत्कार्याणां सम्भवादिति' । ग्रहिज्यादिसूत्रेपि धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्प्रत्ययस्यैव ग्रहणं कुर्यादिति विकरणाश्रयो धातोर्गुणः, अत

Digitized by Google

उत्सार्वधातुकइत्युत्वं, ये चेत्युकारलोपः, । 'कुर्युरिति' । झेर्जुस्, लिङः स लोपोनन्त्यस्य, उस्यपदान्तात् । 'स्थानिवद्भावादेवेति' । सार्वधातुकमपिदित्यतिदेशादिति नोक्तं, पिदर्थत्वात् ङिद्वचनस्य, 'यासुटो ङिद्वचनमिति' । यासुडादेर्लिङो ङिद्वचनमित्यर्थः । इदानीमेव ह्युक्तं ङित्वं तु लिङ एव विधीयतइति, एतच्च ज्ञापनं पिच्च ङिन्न भवतीत्येतदनाश्रित्योच्यते, तदाश्रयणे तु स्थानिवद्भावेन प्राप्तं ङित्वमौपदेशिकेन पित्त्वेन बाध्यतइति प्राप्त्यर्थमेव ङिद्वचनं स्यात् ॥

"किदाशिषि" ॥ 'तस्य यासुट्' 'किद्भवतीति' । तस्य यासुड् भवति स च लिङ्किद्भवतीत्यर्थः । अन्यथा प्रत्ययस्येदं कित्त्वमित्यनन्तरयन्येन विरोधः स्यात् । 'प्रयोजनाभावादिति' । वचिस्वपीत्यत्रापि धातोः स्वरूपग्रहणइति प्रत्ययस्यैवेदं ग्रहणं स्यादन्यथा वाच्यति वाचिकं कथयति वाग्जहातीत्यत्रापि स्यात् । 'गुणवृद्धिप्रतिषेधस्तुल्य इति' । किमर्थं तर्हि कित्त्वविधानमित्यत आह । 'सम्प्रसारणमिति' । 'जागर्य्यादिति' । जाग्रो ऽविचिण्णल्ङित्स्विति गुणः ॥

"झस्य रन्" ॥ झस्येत्यकारोच्चारणात्सङ्घातस्यैव ग्रहणं न वर्णस्य, अन्यथा तादेशविधाविव झ इत्येव ब्रूयादिति मन्यमान आह । 'लिङादेशस्य झस्येति' । 'झोन्तापवाद इति' । झकारस्य योन्तादेशस्तस्यापवाद इत्यर्थः, झोन्त इत्यस्य वा विधेरपवाद इत्यर्थः । ननु झवर्णस्यान्तादेशः समुदायस्य रन्निति कथं भिन्नविषययोर्बाध्यबाधकभावः, विरोधात्, येन नाप्राप्तिन्यायाच्च । झोन्तापवाद इत्युपलक्षणं, कृषीरन् तृषीरन्नित्यत्रात्मनेपदेष्वनत इत्यस्यापवादः, ननु चापवादविप्रतिषेधादद्भाव एव प्राप्नोति, न, प्रतिपदविधेर्बलीयस्त्वात्, प्रतिपदविहितो हि रन्भावः, यद्वा कृषीरन् तृषीरन्नित्यत्रापि प्रवर्त्ततामद्भावः, सत्यपि तु तस्मिन्पुनः प्रसङ्गविज्ञानात्सङ्घातस्य रन् भविष्यति ॥

"इटोत्" ॥ 'नैवायमादेशावयव इति' । तेन नास्येत्संज्ञया प्रयोजनं स्वयमेव निवृत्तत्वादित्यर्थः । प्रत्युतेत्सञ्ज्ञायां स्वरितत्वं

Digitized by Google

स्यात्, न विभक्तौ तुस्मा इत्यत्राभ्युपगमवादेनोक्तं क्मिदिदिटोदिति चात्र प्रतिषेधो न भवत्यनित्यत्वादस्येति । 'अर्थग्रहणादित्यादि' । ल स्थाने य इडिति विशेषणादप्यागमस्येटो ग्रहणाभावः ॥

"सुट् तिथोः" ॥ तिथोरिति सप्तमी वा स्यात् षष्ठी वा, आद्ये पक्षे यस्मिन्विधिस्तदादावल्ग्रहणइति तकारथकारादेर्लिङादेशस्य सुटा भाव्यमिति कृषीष्ट कृषीष्ठा इत्यत्रैव स्यात्, कृषीयास्तां कृषीयास्थामित्यत्र न स्यात्, सुटा च सीयुटो बाधः स्यात्, उभयोरपि लिङादेशभक्तत्वादिति द्वितीयं पक्षमाश्रित्याह । 'लिङ्सम्बन्धिनोस्तकारथकारयोरिति' । एतदेव स्पष्टयति । 'तकारथकाराविति' । 'लिङ् तद्विशेषणमिति' । लिङ्शब्देन तदादेशा उच्यन्ते, एवं लिङ्संबन्धिनोरित्यत्रापि । 'कृषीष्टेति' । विध्यादौ लिङि सार्वधातुकत्वाल्लिङः स लोप इति लोपेन सुटः श्रवणाभावादाशिषि लिङेवोदाहृतः ॥

"झेर्जुस्" ॥ 'झोन्तापवाद इति' । पूर्ववद्व्याख्येयं, जागृयुरित्यादौ च पूर्वत्रदेवादभ्यस्तादित्यस्यापि बाधः । 'पचेयुरिति' । अतोयेय इतीयादेशः, शपा सहाद्गुणः ॥

"सिजभ्यस्तविदिभ्यश्च" ॥ सत्ताविचारणार्थयोर्विदोरात्मनेपदित्वादसम्भव एव झेः, लाभार्थस्यापि विकरणेन व्यवधानादनन्तरस्य झेरसम्भवः, तस्माल्लुग्विकरणस्यैव विदेर्ग्रहणमित्याह । 'वेत्तेश्चेति' । 'अभ्यस्तविदिग्रहणमसिजर्थमिति' । न चैवं लोडादिष्वपि प्रसङ्ग इत्याह । 'ङित इति चानुवर्त्ततइति' ॥

"आतः" ॥ 'सिच आकारान्ताच्च परस्य झेरिति' । द्वाभ्यामनन्तरस्येत्यर्थः । 'कथमिति' । आतः सिचा व्यवधानाद् द्वाभ्यामानन्तर्यं न सम्भवतीति प्रश्नः । सिज्लुकीत्यादि परिहारः, श्रुत्या श्रवणेन, तदेवं द्वाभ्यामानन्तर्याश्रयणात्सिज्लुगन्ताद् झेर्जुस् भवतीत्युक्तं भवति । 'अभूवन्निति' । भुवो वुग्लुङ्लिटोरिति वुक् । 'तुल्यजातीयापेक्षत्वाच्चेति' । द्वाभ्यामानन्तर्यस्याश्रवणात् सिज्लुगन्तस्य ग्रहणमित्युक्तं, तेन

Digitized by Google

सिज्लुगन्ताद्यदि भवति आत एवेति नियमाश्रयणाच्छ्रूयमाणे सिच्यक्राक्षुरित्यादावनाकारान्तादपि भवत्येवेत्यर्थः ॥

"लङः शाकटायनस्यैव" ॥ 'अयुरवुरिति' । शपो लुक्, उस्यपदान्तादिति पररूपत्वम् । 'लङेवेति' । लुङ्लिङोस्तावद्भवितव्यं, लङस्तु स्यप्रत्ययेन झेर्व्यवधानमिति भावः । 'यान्तु वान्त्विति' । लोटो लङ्वदित्यत्र तु वाग्रहणानुवृत्त्याप्ययमर्थः साधितः । ननु च लङ्ग्रहणादन्यत्र ज्जुसभावोयं लोटो माभूत् सिजभ्यस्तेत्ययं तु स्यादेव, तत्राह । 'सिजभ्यस्तेत्यादि' । कथमित्यत्राह । 'जुसभावमात्रं हीति' । कथं पुनरातइत्यनुवर्तमाने जुसभावमात्रं मुख्येन लङा शक्यं विशेषयितुं, लङ इति योगविभागः कर्तव्य इति मन्यते । ननु चात इत्येतत्सिज्ग्रहणानुवृत्त्या नियमार्थमित्युक्तं ततश्चायुरित्यत्र केन चिदप्राप्तत्वाद्विध्यर्थमेतत्किमेवकारेणेत्यत्राह । 'एवकार उत्तरार्थ इति' । लिट् च, लिङाशिषीत्यत्रास्य प्रयोजनं दर्शयिष्यति ॥

"द्विषश्च" ॥ द्विषिरदादिः ॥

"तिङ्शित् सार्वधातुकम्" ॥ 'तरति नयतीति' । तिङः सार्वधातुकत्वाच्छप्, शपः सार्वधातुकत्वाद्धातोर्गुणः । 'रोदितीति' । शपो लुकि रुदादिभ्यः सार्वधातुकइतीट् । 'पवमानो यजमान इति' । पूर्ववच्छब्गुणौ ॥

"आर्धधातुकं शेषः" ॥ 'धातुसंशब्दनेनेति' । धातुशब्दमुच्चार्येत्यर्थः । अत्र हि यङ्विधौ यद्धातुग्रहणं शमिधातोरिति वा यच्च धातोरिति तदुभयमनुवर्तते, तत्रैकेनाधातुप्रत्ययो व्यावर्त्यते, अपरेण धातुप्रत्ययो विशिष्यते, धातोरित्येवं यो विहित इति, तेनायमर्थः । 'लूभ्यां लूभिः जुगुप्सतइति' । यद्यप्यत्र धातोरेव विहितस्तथापि धातुशब्दमुच्चार्य न विहित इति भवति प्रत्युदाहरणं, शेषग्रहणं तिङ्शितोमाभूत्, अन्यथैकसंज्ञाधिकाराभावात्प्रत्ययादिसंज्ञानामिव समावेशः स्यात्, यद्येवकारोनुवर्त्तते शक्यं शेषग्रहणमकर्त्तुम् ॥

Digitized by Google

"लिट् च" ॥ 'पेचिथ शेकिथेति'। ऋतो भारद्वाजस्येति नियमादिट्, थलि च सेटीत्येत्वाभ्यासलोपौ। 'जग्ले मम्लइति'। आर्धधातुकत्वादातो लोप इटि चेत्याकारलोपः, यदुक्तं सार्वधातुकसंज्ञाया अपवाद इति तद्विघटयति। 'ननु चेति'। सत्यमित्यादिना ऽपवादत्वं समर्थयते ॥

"छन्दस्युभयथा" ॥ 'सर्वमेव प्रकरणमिति'। तिङ्शित्सार्वधातुकमित्यारभ्य चतुःसूत्रीप्रकरणम्। 'भूभावो न भवतीति'। तदानीमेवार्धधातुकत्वात् श्नसोरल्लोप इत्यस्याभावः ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयस्याध्यायस्य चतुर्थः पादः। समाप्तश्चायमध्यायः ॥

Digitized by Google

श्रीगणपतयेनमः ॥

काशिकाव्याख्या पदमञ्जरी ।

“ङ्याप्प्रातिपदिकात्” ॥ ‘अधिकारोयमिति’। विधेयपरिभाष्ययोरनिर्द्देशाद्वक्ष्यमाणानां च स्वादीनां प्रकृत्यपेक्षत्वात्स्वरितत्वाच्च ‘आ पञ्चमाध्यायपरिसमाप्तेरिति’। अधिकारस्यावधिं दर्शयति। अधिकारोनेकप्रकारः संज्ञाधिकारो विशेषणाधिकारः प्रकृत्यधिकारश्चेति, तत्र कीदृशोयमधिकार इत्यत आह। ‘स्वादिषु कप्पर्यन्तेषु प्रकृतिरधिक्रियतइति’। ‘टाब्डाप्चापां चाबितीति’। सामान्यग्रहणमित्यनुषङ्गः। ‘समाहारनिर्द्देश इति’। समाहारद्वन्द्वेन तेषां ङ्यादीनामयं निर्द्देश इत्यर्थः। ततश्च समाहारस्यैकत्वादेकवचनमेव युक्तं न बहुवचनमिति भावः। किमर्थमिदमुच्यते ङ्याप्प्रातिपदिकात्परे स्वादयो यथा स्युरिति केवलानां प्रयोगो मा भूत्, परश्चेति वचनात्केवलानां प्रयोगो न भविष्यति, इदं तर्हि प्रयोजनं ङ्याप्प्रातिपदिकादेव यथा स्युरिति प्रकृत्यन्तरान्मा भूवन्, असति ह्यस्मिन्नधिकारे धातुस्तिङन्तं वाक्यं सुबन्तं चेति ङ्याप्प्रातिपदिकव्यतिरिक्तापि चतुर्विधा प्रकृतिरस्ति, वक्ष्यमाणाश्च प्रत्ययाश्चतुर्विधाः स्वादयष्टाबादयो ऽणादयः स्वार्थिकाश्चेति, तदिह चतुर्विधाभ्यः प्रकृतिभ्यश्चतुर्विधाः प्रत्यया मा भूवन्निति कर्त्तव्य एवायमधिकारः, न कर्त्तव्यः। ननु चासत्यस्मिन् धात्वधिकाराद्धातोरेव स्युः कृदुपपदसंज्ञे च स्यातां वासरूपविधिश्च स्यात्। न, निवृत्तत्वाद्धातुग्रहणस्य, यदि परं धातोरपि स्युः, तदपि न, कर्मादीनामभावात्। कर्मादिषु च कारकेष्वेकत्वादिकायां च संख्यायां स्वादयो विधीयन्ते, न च धात्वर्थस्य कर्मादिभिर्योगः सम्भवति, कथं तर्हि कर्मणि तव्यदादयो भवन्ति, नैव धात्वर्थस्य कर्मत्वे तव्यदादयो भवन्ति किं तर्हि धात्वर्थं प्रति यत्कर्म तस्मिन्वाच्ये कर्त्तव्यः कट इति, स्वादयस्तु प्रकृत्यर्थस्य कर्मत्वे चरितार्था नान्यस्य कर्मत्वे भवितुमर्हन्ति, तव्यदादिभिश्च बाधितत्वाद्धातोः स्वादीनामभावः। ननु च

धात्वर्थस्यैव कर्मत्वं दृष्टं, सन्प्रकृतौ चिकीर्षतीत्यादौ, एवमपि संख्याभावः सिद्ध एव, अव्ययेभ्यस्त्वव्ययादाप्सुप इति ज्ञापकात्स्वादयो भवन्ति, यत्पुनर्बहुषु बहुवचनमित्यत्रोक्तं यत्र च संख्या सम्भवतीति तदस्यां दशायां तथा नाश्रीयते, टाबादयस्तर्हि धातोर्मा भूवन्निति, स्त्रियां टाबादयो विधीयन्ते, न च धात्वर्थस्य स्त्रीत्वेन योगोस्ति, कथं तर्हि स्त्रियां क्तिचादयो विधीयन्ते, नैवात्र धात्वर्थस्य स्त्रीत्वे क्तिचादयः स्मर्यन्ते, कस्य तर्हि, यस्तस्य सिद्धत्वं नाम धर्मस्तस्य, क्तिचादिभिश्च बाधितत्वाट्टाबादीनामभावः। अणादयस्तर्हि धातोर्मा भूवन्निति। अपत्यादिष्वर्थेष्वणादयो विधीयन्ते न च धात्वर्थस्यापत्यादिभिर्योगोस्ति, समर्थविभक्त्यभावाच्चाणादीनामनुत्पत्तिः, तस्यापत्यं, तेन रक्तं, तत्र भव, इत्येवमादिभिः षष्ठ्यादिविभक्त्यन्तादणादयो विधीयन्ते, न च धातोर्विभक्तिः सम्भवति, स्वार्थिका अपि स्वार्थिकैस्तुमुन्नादिभिर्बाधितत्वादेव धातोर्न भविष्यन्ति, तिङन्तात्तर्हि स्वादयो मा भूवन्निति, तिङन्तेषु क्रिया प्रधानभूता साधनं गुणभूतं, तत्र प्रधानभूतायाः क्रियायाः कर्मादीनामभावात्स्वादयो न भविष्यन्ति। पचति भवति, भवति वै किञ्चिदाचार्याः क्रियमाणमपि चोदयन्तीत्यादौ कर्तृत्वं दृष्टमिति चेत्, एवमपि संख्याया अभावः सिद्ध एव, यस्तु गुणभूतः कर्ताभिधीयते तत्राभिहितत्वादेव विभक्त्यभावः सिद्धः, न च गुणभूतस्य कर्तुः क्रियान्तरावेशः सम्भवति, यतः पाचकं पश्येत्यादिवद् द्वितीयादयो भवेयुः। ननु पुत्रीयवद्भेतत्स्यात्, तद्यथा, पुत्रीयशब्दादन्तर्भूतक्रियाकर्मवाचिनः कर्तरि लकार उत्पद्यते पुत्रीयतीति, तथेहापि पचतिशब्दात्कर्तृविशिष्टक्रियावाचिनः कर्मादिषु द्वितीयादयः स्युरेव, नैष दोषः। उक्तमेतत्, प्रकृत्यर्थस्य कर्मत्वे चरितार्थाः स्वादयो नान्यस्य कर्मत्वे भवितुमर्हन्तीति, न चैकक्रियाप्रेक्षयोर्भिन्नयोः साधनयोरेकस्मिन्पदे युगपदभिधानं सम्भवति, पुत्रीयशब्दस्तु जीवत्यादिधातुवद्विशिष्टक्रियावचन इति ततः कर्तरि लकारोत्पत्तिरविरुद्धा, अवश्यं चैतदेवं विज्ञेयम्, अर्थाभावादेव तिङन्ताद्द्वितीयादयो न भवन्तीति। यो हि मन्यते ङ्याप्प्रातिपदिकाधिकाराच्च भवन्तीति ल्पबाद्यन्तात्तस्य द्वितीयादयः स्युरेव पच-

तिरूपं पश्य पचतिरूपेण कृतमित्यादि, भवति ह्येतत्प्रातिपदिकं, कथं तर्हि रूपबाद्यन्तात्प्रथमैकवचनमपि भवति उक्तत्वात्सङ्ख्यायाः, न हि तत्कर्तुः सङ्ख्यायामेकवचनं यदि तथा स्यात् पचतोरूपं पचन्तिरूपमिति द्विवचन-बहुवचने स्यातां, प्रातिपदिकार्थेऽन्यत्र तु प्रातिपदिकग्रहणात्प्रातिपदिक-मात्रानुबन्धिनी प्रथमा भवति तत्राप्येकवचनमेव, एकवचनमुत्सर्गः करिष्यतइति वचनात् । न चैवं तिङन्ते ऽपि प्रसङ्गः, तस्याप्रातिपदिक-त्वात् । टाबादयस्तर्हि तिङन्तान्माभूवन्निति, स्त्रियां टाबादयो विधी-यन्ते, न च तिङन्ते प्रधानस्यार्थस्य स्त्रीत्वेन योगोऽस्ति, यदि परं साध-नस्य स्त्रीत्वे टाबादयः स्युः पचेद्ब्राह्मणी पचेरन् ब्राह्मण्य इति, तदपि न, स्वभावतो हि तिङन्तानि साधनाश्रयां सङ्ख्यामेवोपाददते न लिङ्गम् । उक्तं च॥

एकत्वेपि क्रियाख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः ॥

इति । शोभनं पचतीत्यादौ क्रियाविशेषणस्यैव लिङ्गेन योगो न क्रियायास्तत्रापि नपुंसकेन । पचतिरूपमित्यादावपि रूपबाद्यन्तवाच्यायाः क्रियायाः स्वभावतो लिङ्गेन योगस्तत्रापि नपुंसकेन, विचित्रा हि शब्दानां शक्तयो यथादर्शनमभ्युपगन्तव्याः, न सामान्यतो दृष्टेनानुमानेन व्यव-स्थापयितुं शक्यन्ते । अवश्यं चैतदेवं विज्ञेयं स्त्रीत्वाभावात्तिङन्ताट्टाबा-दयो न भवन्तीति, अन्यथा पचतिरूपं ब्राह्मणीत्यादौ रूपबाद्यन्ताट्टा-प्स्यादेव, अणादयस्तर्हि तिङन्तान्माभूवन्निति, अपत्यादिष्वर्थेष्वणादयो विधीयन्ते, न च तिङन्ते प्रधानस्यापत्यादिभिर्योगोऽस्ति । अप्रधानस्य त्व-प्रधानत्वादेवापत्यादिभिर्योगाभावः, समर्थविभक्त्यभावाच्चाणाद्यभावः सिद्धः, अवश्यं चैतदेवं विज्ञेयम्, अन्यथा यः पचतिरूपं तस्यापत्यमिति रूपबाद्यन्तादणादयः स्युरेव, स्वार्थिका अपि ज्ञापकात्तिङन्ताच्च भवि-ष्यन्ति यदयं क्व चित्तद्धितविधौ तिङ्ग्रहणं करोति अतिशायने तमबि-ष्ठनौ तिङश्चेति, वाक्यादपि नैव स्वादयो भवितुमर्हन्ति कर्मादीना-मभावात् । न खलु क्रियारूपस्य संसर्गरूपस्य भेदरूपस्य वा वाक्यार्थस्य कर्मादिभिः स्त्रीत्वेनापत्यादिभिर्वा योगः सम्भवति । पश्य मृगो धावती-

Digitized by Google

त्यादौ दृष्टमिति चेदेवमपि संख्यायोगाभावः सिद्धः, स्वार्थिका अप्यभिधानाभावान्न वाक्याद्भविष्यन्ति। तथाहि। देवदत्तारोहाश्वमित्यस्माद्वाक्यात्प्रागिवीयेष्वर्थेषु के सुब्भक्ति च कृते वाक्यार्थस्यासत्त्वभूतत्वाच्छक्तिलिङ्गसङ्ख्यायोगाभावात्स्वाद्युत्पत्तेरभावाद्देवदत्तारोहाश्वकेति भवितव्यम्, न चैवंभूतेन वाक्यार्थगताः कुत्सादयो गम्यन्तइति, सुबन्तादपि नैव स्वादयो भवितुमर्हन्ति नहि स्वादिषु विधीयमानेषु तदन्ता प्रकृतिः सम्भवति, यथोक्तं, सनन्तान्ननिष्यतइति, किं च सुबन्तमपि सङ्ख्याप्रधानं कारकशक्तिप्रधानं वा, न चास्यापरैः कर्मादिभिर्योगः सम्भवति, टाबादयोऽपि स्त्रीत्वाभावान्न भविष्यन्ति। अणादिषु पुनर्नास्ति विशेषः सुबन्ताद्वोत्पत्तौ सत्यां प्रातिपदिकाद्वा, यथा चैतत्तथा समर्थानां प्रथमाद्वेत्यत्र प्रतिपादयिष्यामः, सर्वथा रूपबाह्यन्तात्प्रातिपदिकादप्यनिष्टः प्रत्ययो यद्वत् तद्वद्वा-स्वादिकादपीति नार्थ एतेनेत्याक्षेप्ता शङ्कते तावत्। 'यद्यपीति'। 'प्रत्ययपरत्वेन[1] प्रकृतिर्लभ्यते,' पारिशेष्याच्चेयमेव प्रकृतिर्लभ्यतइत्यर्थः। परिहरति। 'तथापीति'। वृद्धादयो लक्षणं निमित्तं यस्य प्रत्ययविधेस्तत्र ङ्याप्प्रातिपदिकस्य विशेष्यत्वेन सम्प्रत्ययो यथा स्यादित्येवमर्थमित्यर्थः। 'इतरथा हीति'। यदि ङ्याप्प्रातिपदिकग्रहणं न क्रियेतेत्यर्थः। 'समर्थविशेषणमेतत्स्यादिति'। समर्थानां प्रथमाद्वेत्यधिकारात्। किं च समर्थं सुबन्तं, समर्थविशेषणे सति को दोषः, उदीचां वृद्धादगोत्रादिति फिन् इह च प्रसज्येत त्रयाणां ब्राह्मणानामपत्यमिति एतद्धि समर्थं वृद्धम्, इह च न स्यात् त्रयोर्ब्राह्मणयोरपत्यमिति नह्येतत्समर्थं वृद्धम्। अवृद्ध। प्राचामवृद्धात्फिन् बहुलमिह च प्रसज्येत त्रयोर्ब्राह्मणयोरपत्यमिति, एतद्धि समर्थमवृद्धम्। इह च न स्यात् त्रयाणां ब्राह्मणानामपत्यमिति, नह्येतत्समर्थमवृद्धं, यत्र त्वादेशादिवशेन सङ्ख्याविशेषाभिव्यक्तिर्भवति न भवति तत्र द्विवचनबहुवचनान्तानामपि वृत्तिस्तावको मामक इति, यथा इह च फिञुत्पद्यमानो बहुत्वमन्तरेण वृद्धत्वानुपपत्तेर्बहुत्वं गमयेत्, एवं फिन्नपि द्वित्वमिति स्यादेवायं प्रसङ्गः, अवर्णं। अत इञ्, इहैव स्यात्

[1] पारिशेष्यादियमेवेति मुद्रितमूलपुस्तके पाठस्तु पदमञ्जर्यसंमतः।

दत्तस्यापत्यमिति, दत्तयोर्दत्तानामित्यत्र तु न स्यात्। स्वर। अनुदात्तादेरञ्, इह च प्रसज्येत वाचो विकारः त्वचो विकारः, एतद्धि समर्थमनुदात्तादि सावेकाचइति विभक्तेरुदात्तत्वात्, नन्वत्रैकाचो नित्यं मयटमिच्छन्तीति मयटा भाव्यम्, इदं तर्हि पञ्चानां विकार इति षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वे सति समर्थमनुदात्तादि, प्रातिपदिकं तु ष्णः सङ्ख्याया इत्याद्युदात्तम्, इह च न स्यात् सर्वेषां विकार इति, सर्वस्य सुपीत्याद्युदात्तं पदं प्रातिपदिकं त्वन्तोदात्तं निपातितम्। ठच्। नौद्व्यचष्ठन् इह च प्रसज्येत वाचा तरति त्वचा तरति, एतद्धि समर्थं द्व्यच्, नौग्रहणं तु नियमार्थं स्यात् औकारान्ताद्यदि भवति नौशब्दादेवेति, इह च न स्यात् घटेन तरतीति, साम्ना तरतीत्यादौ पुनरुभयथापि सिद्धं ङ्याप्प्रातिपदिकग्रहणे तु सति तत्सामर्थ्यात्तस्यैव विशेषणं वृद्धादि भवति समर्थाधिकाराच्च समर्थात्प्रत्ययः, तत्रैवमभिसम्बन्धः, वृद्धादि यन्ङ्याप्प्रातिपदिकं तस्मात्समर्थात्प्रत्यय इति, यस्मात्प्रत्ययविधिरिति प्रत्ययविधौ पञ्चमीनिर्दिष्टस्य विधीयमाना अङ्गभपदसंज्ञा ङ्याप्प्रातिपदिकस्य यथा स्युरित्येतत्तु प्रयोजनं न भवति, कथं दैवेन हि जानता यतः प्रत्ययो विहितस्तस्यैताः संज्ञाः पञ्चम्या निर्दिश्यतां मा वा निर्देशि, इह च कंसीयपरशव्ययोर्यञञौ लुक्चेति प्रातिपदिकात्परयोश्छयतोर्लुग्यथा स्यादौणादिकयोरुकारसशब्दयोर्मा भूदित्येतदपि न प्रयोजनं, कथम्, उणादयोऽव्युत्पन्नानि प्रातिपदिकानि, उणादिषु नावश्यं व्युत्पत्तिकार्यं भवतीत्यर्थः। एतच्चातः कृकमिकंसेत्यत्र कमिग्रहणेनैव सिद्धे पुनः कंसग्रहणाद्विज्ञायते, तस्माद् वृद्धाद्येव प्रयोजनमधिकारस्य। ङ्याब्ग्रहणं क्रियते प्रत्ययान्तत्वेनाप्रातिपदिकत्वात्, यूनस्तिः युवतिरित्यस्य तु तद्धितान्तत्वात्प्रातिपदिकत्वम्, ऊङुत इत्युवर्णान्तादूङ् विधीयते तत्रैकादेशस्यान्तवद्भावात्प्रातिपदिकत्वं, श्वशुरस्योकाराकारलोपश्चेति श्वश्रूरित्यत्र श्वशुरः श्वश्र्वेश्चेति निपातनाद्विभक्त्यादिसिद्धिः, एवं स्थिते चोद्यम्। 'अथेति' 'न प्रातिपदिकग्रहणादिति'। नञः काक्वा प्रयोगात्सिद्धमेवेत्यर्थः। अनेकार्थत्वाद्वा निपातानाम्। ननुशब्दस्यार्थे नशब्दो द्रष्टव्यः। 'लिङ्गविशिष्टस्येति'। लिङ्गनिमित्तप्रत्ययेना-

Digitized by Google

धिकस्येत्यर्थः । अस्याश्च परिभाषायाः प्रयोजनं सर्वनामस्वरसमासोपचारेष्टवद्भावाः । सर्वनाम । भवच्छब्दस्य विधीयमाना सर्वनामसंज्ञा भवतीशब्दस्यापि भवति, सर्वनाम्नस्तृतीया च, भवता हेतुना भवतो हेतोर्भवत्या हेतुना भवत्या हेतोरिति । स्वर । कुशूलकूपकुम्भशालं बिले, कुशूलबिलं कुशूलीबिलम् । समास । पूर्वसदृश । मातृसदृशः मातृसदृशी । सदृशप्रतिरूपयोरिति स्वरोप्यत्र भवति, तथा कुमारः श्रमणादिभिः कुमारी श्रमणा, कुमारश्रमणा, एवं युवतिर्बलिना युवबलिना । उपचार । अतः कृकमिकंसकुम्भ । अयस्कम्भः अयस्कुम्भी । इष्टवद्भाव । णाविष्ठवत्प्रातिपदिकस्य, कुमारीमाचष्टे कुमारयति, इह त्वचित्तहस्तिधेनोष्ठक् हस्तिनीनां समूहो हास्तिकमिति, भस्याढे तद्धिते इति पुंवद्भावेन ङीपि निवृत्ते हस्तिशब्द एवायमिति ठक्सिद्धिः, तद्धितइत्येषा हि विषयसप्तमी, अवश्यं च पुंवद्भाव एवाश्रयणीयः, अन्यथा हस्तिनीशब्दाट्ठकि यस्येतिलोपस्य स्थानिवद्भावाचस्तद्धितइति टिलोपो न स्यात्, इह च नेन्सिद्धबध्नातिषु च स्थण्डिलशायिनीति गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनादनुत्पन्नएव ङीपि समासे सतीनन्तमेवोत्तरपदमित्यलुक्प्रतिषेधः सिद्धः, एवं शयवासवासिष्वकालात् ग्रामेवासिनीत्यलुक्, तथा क्यङ्मानिनोश्च स्वाङ्गाच्चेतोमानिनि दर्शनीयमानिनी दीर्घमुखमानिनी मानिन्शब्द एवोत्तरपदमिति पुंवद्भावः सिद्धः । इह च तृजकाभ्यां कर्त्तरि कर्त्तरि चेति कर्त्तरि यौ तृजकौ ताभ्यां योगे या षष्ठी तस्या येनयेन सह समासः प्राप्तः स सर्वो न भवतीति विज्ञानादपां स्रष्ट्रीत्यत्रापि समासनिषेधः सिद्धः । यदि प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति अतिप्रसङ्गो भवति द्विषत्परयोस्तापेः द्विषतीताप इत्यत्रापि स्यात् । उक्तमत्र द्विषत्परयोरिति द्वितकारकोयं निर्द्देशः तकारान्तो द्विषच्छब्दइति, इह च गार्ग्या अपत्यं दाक्ष्या अपत्यमिति यञिञोश्चेति फकं परत्वात्स्त्रीभ्यो ढग्बाधते, इह च उनित्यादिर्नित्यं दाक्षिः ग्लुचुकायनिरित्यस्यामवस्थायामाद्युदात्तत्वे कृते पश्चादितो मनुष्यजातेरिति ङीषि सति शिष्टः प्रत्ययस्वर एव भवति दाक्षी ग्लुचुकायनी, न चास्यामव-

स्यायामाद्युदात्तत्वं पुनः प्रवर्त्तते पूर्वमेव प्रवृत्तत्वात्, तथा बहवो गोमन्तोस्यां बहुगोमतीति प्रागेव बहुस्वरे प्रवृत्ते पश्चान्ङीप् पित्त्वादनुदात्तो भवति, न च पुनरपि बहोर्नञ्वदित्यस्य प्रवृत्तिः पूर्वमेव प्रवृत्तत्वात्समासत्त्वाच्च ङीबुत्पद्य इत्युत्तरपदं न लिङ्गविशिष्टम्, इह तर्हि राजाहःसखिभ्यष्टच् मद्राणां राज्ञीति टच् स्यात् ततश्च भस्याढे तद्धित इति पुंवद्भावेन ईकारे निवृत्ते टिलोपे च टित्त्वान्ङीपि मद्रराजीति स्यान्मद्रराज्ञीति चेष्यते, तथा महती प्रिया यस्य महतीप्रिय इति पुंवद्भावप्रतिषेधविषये आन्महत इत्यात्वं स्यात् तथाऽऽर्या ब्राह्मणकुमारयोः, राजा च राजब्राह्मणीत्यत्रापि स्यात्, तथा विभक्त्याश्रयं यत्कार्यं विभक्तौ परतो विभक्तेर्वा तत्रापि दोषो यथा न गोश्वन्साववर्णेति, शुना शुन इत्यत्र सावेकाच इति प्राप्तं विभक्तेरुदात्तत्वं न भवति, तथा गौरादिङीषन्तात् शुन्या शुन्यै इत्यादावप्युदात्तयणो हल्पूर्वादित्यस्यापि निषेधः स्यात्, उगिदचामिति नुम् गोमतीत्यादावपि स्यात्, चतुरनडुहोराम् अनडुहीत्यत्रेकारात्परः स्यात्, पथिमथ्यृभुक्षामात् शोभनः पन्था अस्यामिति न पूजनादिति समासान्ते निषिद्धे ऋन्नेभ्यो ङीपि भस्य टेर्लोपे सुपथीत्यत्रापि स्यात्, अङ्गाधिकारे तदन्तस्यापि ग्रहणात्सुपन्थाइतिवत्पुंसोसुङ् सुपुंसीत्यत्रापि स्यात्, शोभनाः पुमांसोस्यामिति, उरःप्रभृतिषु पुमान्निति विभक्त्यन्तस्य पाठादेकवचनान्तादेव नित्यं कप् भवति बहुवचनान्तस्य तु शेषाद्विभाषेति विकल्पित एवेति कबभावपक्षे पूङो ह्रस्वः म्सुश्च प्रत्ययः, अकार उच्चारणार्थः, तत्र प्रत्ययस्योगित्त्वादुगितश्चेति ङीप्, सख्युरसम्बुद्धौ अनङ् साविति णित्त्वानङौ सखी सख्यावित्यादावपि स्यातां सख्यशिश्वीति भाषायामिति ङीष्विधानं तु सखीभ्यामित्याद्यर्थं स्यात्, विभाषा भवद्भगवदघवतामित्यत्र त्ववशब्दः सम्बुद्धाविति विशेष्यते तत्र येन नाव्यवधानमित्येकेन वर्णेन व्यवाये ओत्वं प्रवर्त्तमानमिह न भवति हे भगवति हे अघवतीति तदभावात्तत्सन्नियोगशिष्टस्य रुत्वस्याप्यभावः, श्वयुवमघोनामतद्धित इत्यत्राप्यल्लोपेन इत्यतोन इत्यपकर्षाद्युवतीः पश्येति सम्प्रसारणाभावः, तदेवं लिङ्गविशिष्टपरिभाषायाः सन्ति प्रयोज-

नानि सन्ति च दोषाः, यानि प्रयोजनानि तदर्थमेषा कर्त्तव्या प्रतिविधेयं दोषेषु, प्रतिविधानं च शक्तिलाङ्गलेत्यत्र घटग्रहणेनैव सिद्धे घटोग्रहण-मस्याः परिभाषाया अनित्यत्वज्ञापनार्थमिति, तदेवं स्थितमेतत् ङ्याब्ग्र-हणमनर्थकं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादिति । परिह-रति । 'नैतदस्तीति' । 'स्वरूपविधिविषय इति' । स्वरूपाश्रयो विधिः स्वरूपविधिः, स चासौ विषयश्च तत्रेत्यर्थः । किमुक्तं भवतीत्याह । 'प्रातिपदिकस्वरूपग्रहणे सतीति' । कुत एतदित्यत आह । 'तथा चेति' । यथा च युवऽक्षब्दस्य जरतीशब्देन समासवचनमत्रार्थे ज्ञापकं तथा तत्रैव प्रतिपादितम् । 'तादृशमेवेति । प्रातिपदिकस्वरूपग्रहणे लिङ्गविशिष्ट-स्यापि ग्रहणं भवतीति यदुक्तं तदनुगुणमेवेत्यर्थः । यदि स्वरूपविधिवि-षये परिभाषेयं, कथमिष्ठवद्भावः कुमारीमाचष्टे कुमारयतीति, बाहुलका-त्सिद्धिं मन्यते, चुरादौ हीदं पठ्यते प्रातिपदिकाद्धात्वर्थे बहुलमिष्टव-च्चेति । भाष्ये तु यथाकथं चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रह-णमिति स्थितं, तथा च सर्वप्रातिपदिकेभ्य इत्येकइति क्विप् ङ्यन्तादपि भवति यामिनयन्त्यहानीति । किं चेत्यादिना प्रयोजनान्तरं समुच्चि-नोति । 'कालितरेति' । कालशब्दाज्जानपदादिसूत्रेणङीषि तरपि घरूपकल्पेत्यादिना ह्रस्वः, किं पुनः कारणं तदन्तात्तद्धितविधिर्न सिद्ध्य-तीत्याह । 'विप्रतिषेधाद्धीति' । स्त्रीप्रत्ययस्यावकाशः प्रकर्षाविवक्षायां कालीति, प्रकर्षप्रत्ययस्यावकाशः स्त्रीत्वाविवक्षायां कालतर इति, उभय-विवक्षायामुभयप्रसङ्गे परत्वात्तद्धितः स्यात्, ङ्याब्ग्रहणे तु सति तरब्विधौ प्रकृतित्रयाधिकारसामर्थ्यात्पूर्वं ङ्यापौ भवतः पश्चात्तरबिति सिद्धमि-ष्टम् । ननु च स्त्रीत्वस्यान्तरङ्गत्वात्तन्निमित्तः प्रत्ययोन्तरङ्गः प्रकर्षस्तु बाह्यप्रतियोग्यपेक्षत्वाद्बहिरङ्गः, ततस्तन्निमित्तस्य प्रत्ययस्यापि बहिर-ङ्गत्वं, योप्यज्ञातादिष्वर्थेषु प्रागिवात्को विधीयते सोऽप्यज्ञाताद्यर्थापेक्ष-त्वाद्बहिरङ्ग एव, विभक्त्यन्तस्य हि सतः पश्चादज्ञातादियोगो भवति, विभक्तयश्च संख्याकर्माद्यपेक्षाः प्रागेव संख्याकर्मादियोगाल्लिङ्गेन प्राति-पदिकं युज्यते । उक्तं च । स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह

समवेतं, समवेतस्य तु वचने लिङ्गं संख्यां विभक्तिं चाभिधाय तान्विशेषानवेक्षमाणश्च पूर्णमात्मानमप्रियकुत्सनादिषु ततः प्रवर्त्तते ऽसौ विभक्त्यन्त इति, युक्तं चैतत् । तथाहि । नागृहीतविशेषणा विशेष्ये बुद्धिरिति पूर्वं विशेषणभूतः स्वार्थोऽभिधातव्यः पश्चात्तद्विशिष्टं द्रव्यं तस्य धर्मित्वेन प्रधानत्वा,त्ततो लिङ्गमन्तरङ्गत्वा,त्संख्या हि भेदापेक्षत्वाद्बहिरङ्गा सापि तु सजातीयापेक्षा विजातीयकर्मादिकारकशक्त्यपेक्षेभ्यः कारकेभ्योऽन्तरङ्गेति, ततस्तस्या अभिधानं, ततः कारकाणामेवं परिपूर्णार्थस्य पश्चात्कुत्सनादिभिर्योगः, स्वार्थादयो हि कुत्सनादिहेतवो द्रव्यस्य पण्डितक इत्यादौ तथावसायात्, तदेवमन्तरङ्गः स्त्रीप्रत्ययः बहिरङ्गास्तद्धिताः, अन्तरङ्गबहिरङ्गयोश्चायुक्तो विप्रतिषेधः । इह तर्हि वर्ण चानित्ये, रक्ते, कालाच्चेत्यस्यावकाशः स्त्रीत्वाविवक्षायां कालक इति, स्त्रीप्रत्ययस्य कालीत्यवकाशः, कालिकेत्यत्रोभयप्रसङ्गे परत्वात्कन् स्यात् तस्य चात्यन्तस्वार्थिकत्वान्न तदपेक्षं स्त्रीप्रत्ययस्यान्तरङ्गत्वमस्ति, नास्त्यत्र विशेषः, कालशब्दादप्युत्पत्तौ प्रत्ययस्थादितीत्वे कालिकेति सिद्धं, यदा तर्हि हरितशब्दाच्च सामिवचनइति प्रतिषेधेन ज्ञापितोऽत्यन्तस्वार्थिकः कन् क्रियते तदा वर्णादनुदात्तादिति ङीन्नकारौ बाधित्वा परत्वात्कन् स्यात्ततश्च हरिणिकेति न स्यात्, हरितशब्देन समानार्थो हरिणशब्दोऽस्ति ततः कनीत्वे च भविष्यति, हरितशब्दात्तु हरितिकेति, अयं तर्हि लोहितान्मणावित्यत्यन्तस्वार्थिकः कन् वर्णादनुदात्तादिति ङीन्नकारौ परत्वाद्बाधेत ततश्च लोहितिकेत्येव स्यान्न लोहिनिकेति, उभयमपीष्यते तदर्थं ङ्याब्ग्रहणम् । ननु च लोहिताल्लिङ्गबाधनं वेत्यनेनैवैतत्सिद्धं, तन्न वक्तव्यं भवति, कथं, वर्णादनुदात्तादित्यत्र वेति वर्त्तते तत्र ङ्याबन्ताभ्यां लोहिनीलोहिताशब्दाभ्यां कनि विहिते यथायोगं ह्रस्वत्वेत्वयोः कृतयोर्लोहिनिका लोहितिकेति सिद्धमि॰, तदेवं सति ङ्याब्ग्रहणे लिङ्गनिमित्तेन प्रत्ययेन विकल्पेन बाधा यथा स्यान्नित्यं माभूदित्येवमर्थं तावन्न वक्तव्यं लोहिताल्लिङ्गबाधनं वेति, नापि प्रतिपदविहितत्वेन कना लिङ्गनिमित्तस्य प्रत्ययस्य नित्ये बाधे प्राप्ते विकल्पेन बाधा यथा स्यादित्येवमर्थ-

Digitized by Google

मपि वक्तव्यं, ङ्याब्ग्रहणस्यानन्यार्थत्वात् । यदि ह्येतश्वेतशब्दाभ्यामत्यन्तस्वार्थिकः कनिष्यते तदा तत्र ङ्याब्ग्रहणस्य चरितार्थत्वाल्लोहितशब्दात्प्रतिपदविहितेन कना ङीपो नित्ये बाधे प्राप्ते तद्वक्तव्यं, तदापि वा न वक्तव्यं, लोहितान्मणावित्यस्यापि पुन्नपुंसकयोश्चरितार्थत्वात् । तदेवमत्यन्तस्वार्थिकोपि कन् ङ्यन्तादन्यथा स्यादिति ङीब्ग्रहणं तावत्कर्त्तव्यम्, आब्ग्रहणं तु विस्पष्टार्थं, तत्र समासान्तेषु दोषः, बहवो गोमन्तोऽस्यां नगर्यामिति बहुव्रीहौ कृते स्त्रिया अन्यपदार्थत्वान्ङीप् च प्राप्नोति कप् च ङ्याब्ग्रहणान् ङीपि कृते कप् स्यात् ततश्च बहुगोमतीकेति रूपं स्यात् बहुगोमत्केति चेष्यते, नैष दोषः। समासार्थादुत्तरपदादकृत एव समासे समासान्ता भवन्ति पश्चात्तदन्तेन समासः, एवं हि समासं प्रत्यन्तावयवत्वमुपपद्यते समासान्तानां, तथा च न कपीत्यत्र वक्ष्यति । तत्र चोत्तरपदे समासार्थाया विभक्तेः पुरस्तात्समासान्ता इति केचित् । परस्तात्समासान्तेषु सुब्लुकि तद्धितान्तत्वेन ततः सुपि सुबन्तस्य समास इत्यन्ये । सर्वथा बहुचर्मिकेतीत्वं न प्राप्नोति, असुप इति प्रतिषेधात्, यथा बहुपरिव्राजका मधुरेति, कर्त्तव्योऽत्र यत्नः । नञस्तत्पुरुषादित्यादौ तु ग्रन्थविरोधं तत्रतत्र परिहरिष्यामः । तदेवं स्थितमेतत् तदन्तात्तद्धितविधानार्थं ङ्याब्ग्रहणं विप्रतिषेधाद्धि तद्धितबलीयस्त्वमिति । यद्येवं यूनस्तिः ऊङुत इति त्यूङोरपि ग्रहणं कर्त्तव्यन्तदन्तात्तद्धितविधानार्थं युवतितरा । भाष्यकारप्रयोगात्तसिलादिष्वाकृत्वसुच इति पुंवद्भावो न भवति, खिद्घादिषु पुंवद्भावाद् ह्रस्वत्वं विप्रतिषेधेनेति वा पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वेन बाधितत्वात् । ब्रह्मबन्धूतरा नद्याः शेषस्यान्यतरस्यामिति ह्रस्वाभावपक्षे जातेश्चेति पुंवद्भावप्रतिषेधः । पूर्वत्र त्वनेन प्रतिषेधो न लभ्यते यौवनस्याजातित्वात्, यावद्द्रव्यभाविनी हि जातिः, तथा च युवजानिरित्युदाहृतम् । नन्वत्रान्तरङ्गत्वादेव त्यूङौ भविष्यतः, अत्यन्तस्वार्थिके तु कनि ब्रह्मबन्धुकेत्यत्र केण इति ह्रस्वे सति नास्ति विशेष ऊङन्ताद्वोत्पत्तौ सत्यामुकारान्ताद्वा,युवतिशब्दादपि कनि पुंवद्भावेन भाव्यमिति नास्त्येव विशेषः। न चास्मात्कश्चिष्यतइत्यत्रापि प्रामाणमस्ति तस्माच्चार्थस्त्यूङोर्ग्रहणेन ॥

"स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप्" ॥ 'उकारादयोनुबन्धा इत्यादि'। तत्र प्रथमैकवचनस्योकार एतत्सदोः सु लोपो हल्ङ्याब्भ्यो दीर्घात्सुतिसीत्यत्र केवलस्य व्यञ्जनस्योच्चारयितुमशक्यत्वादुच्चारणार्थः, अत्र तु सूत्रे औकारोपश्लेषाच्छक्यते सकारमात्रमुच्चारयितुम्, अनङ् सावित्यत्र विशेषणार्थस्तु न भवति व्यावर्त्यस्याभावात्, न चानङ् सीत्युच्यमाने वर्णनिर्देशे च तदादिविधिसम्भवात्सप्तमीबहुवचनेपि प्रसङ्गः, सर्वनामस्थानइत्यनुवृत्तेः। जसो जकारोस्मिन्नेव सूत्रे ऽसन्दिग्धोच्चारणार्थः, अन्यथा ह्यौकारस्यावादेशे सन्देहः स्यात् किमौकारस्योच्चारणमथावित्यस्येति । जसः शीत्यादौ विशेषणार्थस्तु न भवति, असः शीत्युच्यमानेप्यतिप्रसङ्गाभावात्, शसादीनां सानुबन्धकत्वात्। शसश्शकार औटष्टकारस्यासन्दिग्धोच्चारणार्थः, अन्यथा हकारष्टकार इति सन्देहः स्यात्, तस्माच्छस इत्यादौ विशेषणार्थस्तु न भवति जसादीनां सानुबन्धकत्वात्। टा इत्यत्र टकारष्टाङसिङसामिनात्स्या इति विशेषणार्थः, अन्यथा सुपां सुलुगित्यादिना विहितस्याकारस्यापि ग्रहणं स्यात्। तदेवमेषां चतुर्णामुकारादय उच्चारणविशेषणार्थाः, इत्संज्ञाप्येषां प्रयोगे श्रवणं मा भूदिति न पुनरित्कार्यं किं चिदस्ति। औटष्टकारः सुडिति प्रत्याहारग्रहणार्थः, ङेप्रभृतिषु ङकारो घेर्ङितीति विशेषणार्थः। ङसेरिकारो युष्मदस्मद्भ्यां ङसोशित्यत्र ग्रहणं मा भूदित्येवमर्थः। पकारः प्रत्याहारग्रहणार्थ इति। उकारादयोनुबन्धा यथायोगमुच्चारणविशेषणार्था इत्यनेनागतार्थत्वादिदमुक्तमेवं चौटष्टकारः सुडिति प्रत्याहारार्थ इत्ययमग्रन्थेन भवितव्यम्। क्व पुनरमेर्थे स्वादयो भवन्तीत्याह। 'संख्याकर्मादयश्चेति'। 'शास्त्रान्तरेणेति'। बहुषु बहुवचनं, कर्मणि द्वितीयेत्यादिना। 'तेन सहास्यैकवाक्यतेति'। पूर्वं त्ववान्तरवाक्यभेदापेक्षया शास्त्रान्तरेणेत्युक्तम् आकाङ्क्षायोग्यता[1]वशेन भिन्नप्रकरणपठितानामप्येकवाक्यता भवत्येव, प्रकरणभेदेन तु पाठस्तिङादिविधिनाप्ये[2]कवाक्यत्वं यथा स्यादिति। बहुषु बहुवचनमित्यत्र तु भिन्नवा-

१ संनिधीत्यधिकं २ पुस्तके। २ वाक्यैकवाक्यतेति २ पुस्तके पाठः।

Digitized by Google

क्यत्वमाश्रित्योक्तं, ङ्याप्प्रातिपदिकात्स्वादयो लस्य तिबादय इति बहुवचनं विहितं तस्यानेन बहुत्वं संख्यावाच्यत्वेन विधीयतइति, अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्तएवेति च, एकवाक्यतायां तु विशिष्टएवार्थे कर्मादिसंबन्धिन्येकत्वादौ स्वादीनां विधानात्सामान्यविहितत्वं नोपपद्यते, तस्मादव्ययादाप्सुप इत्यव्ययादुत्पन्नस्य सुपो लुग्विधानाल्लिङ्गादव्ययेभ्यो ऽस्मिन्पक्षे स्वाद्युत्पत्तिः । उदाहरणानि यथायोगं स्वेस्वे वाक्ये प्रकटीकरिष्यन्ते ॥

"स्त्रियाम्" ॥ 'ङ्यापोरनेनैव विधानादिति' । प्रातिपदिकमात्रमत्र प्रकरणेभिसम्बद्ध्यतइत्यत्रायं हेतुः, प्रकरणापेतया चैतदुच्यते, सूत्रान्तरव्यापारसमये तु सूत्रान्तरविहितप्रत्ययान्ता प्रकृतिः सम्भवत्येव । ननु चात्र प्रकरणे सर्वत्र सति सम्भवे ऽत इति सम्बद्ध्यते, न च ङ्याबन्तमदन्त,मुक्तार्थत्वाच्च ङ्याबन्तात् ङ्योपोरप्रसङ्गः । सत्यम् । न्यायस्तु निरूप्यते, चोदयति । 'स्त्रियामित्युच्यतइति' । सप्तमीनिर्देशेन कार्यान्तरविधानार्थमनूद्यतइत्यर्थः । ततः किमित्याह । 'केयं स्त्री नामेति' । इह शास्त्रे स्त्रिया अपरिभाषितत्वाल्लौकिकस्त्रीग्रहणे च खट्वादावव्याप्तिप्रसङ्गात्प्रसिद्धवदनुवादोनुपपन्न इत्यर्थः । स्वरूपस्य च जिज्ञासितत्वात्प्रथमान्तेन प्रश्नः, कस्यां स्त्रियामिति तूच्यमाने विशेषविषयः प्रश्नः स्यात्, स्त्रीग्रहणं च प्रसङ्गेन पुनपुंसकयोरपि प्रदर्शनार्थं, मत एवोत्तरे सामान्यविशेषाः स्त्रीत्वादय इति त्रयाणां स्वरूपं दर्शित, मेवं च प्रथमोपनिपातिनि ह्रस्वो नपुंसकइत्यत्र लिङ्गस्वरूपनिरूपणमुचितं तथा तु न कृतमित्येव, तत्र लौकिकानां लक्षणम्

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषःस्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥

इति । भूमादौ मतुप्, तथैव लोमश इति शः, स्तनकेशवत्त्वं च प्रसिद्धत्वादन्यस्यापि कुमार्यादिगतस्य स्त्रीप्रतिपत्तिहेतोरुपलक्षणं, लोमशत्वं च पुंविज्ञानहेतोः कुमारादिगतस्य, उभयोरपि स्त्रीपुंसयोर्यदन्तरं सदृशं

Digitized by Google

स्तनलोमाद्युभयव्यञ्जनं तन्नपुंसकमित्यर्थः, तेनाव्ययाख्यातार्थस्य स्त्रीपुंसत्वाभावेपि नपुंसकत्वं न भवति, अन्यथा तदभावइत्येतावत्युक्ते स्यात्प्रसङ्गः, तदभावइत्यनेन कुक्कुटमयूर्यादेः स्त्रीपुंससमुदायरूपस्य द्वन्द्वार्थस्य नपुंकत्वं न भवति, भवति हि समुदायः समुदायिनः सदृश इति स्यात्प्रसङ्गः, नायं प्रसङ्गः । परवल्लिङ्गमित्यनेन समुदायस्य परवल्लिङ्गातिदेशात्, सत्यम् । इदं तु वस्तुस्वरूपनिरूपणपरं द्रष्टव्यं, तदनेन स्तनकेशादिसम्बन्धः, स्तनादय एव वा विशिष्टसंस्थानास्तदुपव्यञ्जना वा जातयः स्त्रीत्वादय इत्युक्तं भवति, अत्र पक्षे भ्रुकुंसे टाप् प्रसज्येत, भ्रुकुंसः स्त्रीवेषधारी नटस्तस्य स्तनकेशसम्बन्ध उपलभ्यते, खरकुट्यादीनां च लोमशत्वात्पुंस्त्वे सति खरकुटीः पश्येत्यत्र नत्वं प्राप्नोति, खरकुटी नापितगृहमुच्यते । ननु च स्वाभाविकपरिणामशालिभिः स्तनादिभिरत्र सम्बन्धो विवक्षितो न यथा कथं चित्, स्तनादि च प्रसिद्धस्यान्यस्याप्युपलक्षणमुक्तं तत्कुतोयं प्रसङ्गः, एवं तर्हि खट्वावृक्षौ न सिद्ध्यतः, खट्वावृक्षादीनां स्तनलोमाद्यभावात् । स्यादेतत् । यथा वस्त्रान्तर्हितानि द्रव्याणि नोपलभ्यन्ते तद्वत्खट्वावृक्षयोः सदेव लिङ्गं नोपलभ्यतइति, तन्न । वस्त्रान्तर्हितानि द्रव्याणि वस्त्रापायउपलभ्यन्ते खट्वावृक्षयोस्तिलशस्तक्षणेपि लिङ्गं नोपलभ्यते, यथा तर्ह्यादित्यगतिः सती प्रत्यक्षेण नोपलभ्यते देशान्तरप्राप्त्या त्वनुमीयते, तथा खट्वावृक्षयोरपि सदेव लिङ्गं सूक्ष्मत्वान्नोपलभ्यते, सतामपि हि भावानां षड्भिः प्रकारैरनुपलब्धिर्भवति, अतिसन्निकर्षाद् यथा स्वचक्षुर्गतस्याञ्जनादेः, अतिविप्रकर्षाद्यथोड्डीनस्य शकुनेः, मूर्तान्तर्द्धानाद्यथा कुड्यादिव्यवहितस्य सुवर्णादेः, अन्धकारावृतत्वाद्यथान्धकाराक्रान्तस्य घटादेः, इन्द्रियदौर्बल्यात् तिमिराद्युपधाते चक्षुरादेः, अतिप्रमादात्, प्रमादो ऽनवधानता, विषयान्तरव्यासक्तचित्तो हि सन्निकृष्टमप्यर्थं नोपलभ्यते, सौक्ष्म्यं त्विन्द्रियदौर्बल्यएवान्तर्भूतं, दिव्यचक्षुःश्रोत्रो हि सूक्ष्ममप्यर्थमुपलभते, एवं समानाभिहारोपि तत्रैवान्तर्भूतः, तद्यथा माषराशौ माषः प्रक्षिप्तः पृथङ्नोपलभ्यते, एवमभिभवोपि, तद्यथा, सौरीभिः प्रभाभिरभिभूतानि नक्षत्राणि दिवा नोपलभ्यन्ते । केन पुनरेतदवसीयते खट्वावृक्षयोः सदेव

Digitized by Google

लिङ्गं नोपलभ्यतइति, टाबादेस्तत्कृतस्यानन्यकार्यस्य दर्शनात्, यद्येवमितरेतराश्रयं प्राप्नोति लिङ्गावगमाट्टाबादिशब्दप्रयोगस्तद्योगाल्लिङ्गावगतिरिति, इन्द्रियदौर्बल्यं कदा चिदुपलब्धस्य कदा चिदनुपलम्भे कारणं शक्यमभिधातुं, खट्वादिषु च लिङ्गस्य कदा चिदप्यनुपलम्भाल्लिङ्गविविक्तखट्वादिवस्तुग्राहिणा प्रत्यक्षेण लिङ्गाभावनिश्चयात्तद्विरुद्धमनुमानं नोदेतुमर्हति, नहि शक्यते वक्तुं भित्तुगृहं गजवद् देशत्वाद्गजशालावत्, प्रत्यक्षेणेन्द्रियदौर्बल्यात्तु गजो नोपलभ्यतइति, तस्मादसदेव लिङ्गं शब्दप्रयोगमहिम्ना खट्वादिषु प्रतीयते, भवत्वेवं श्रोतुः प्रतीतिः, यस्त्वसौ प्रयोक्ता स केन लिङ्गमवगम्य तदनुरूपं शब्दं प्रयुङ्क्ते, किं च कुमार्यर्थः कुमारी वस्त्विति कुमार्यादिष्वर्थवस्तुशब्दयोः पुन्नपुंसकयोरनुपपत्तिः, भाष्ये तु

आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः ।
धर्मा मूर्त्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः ॥

आविर्भाव उपचयः पुंस्त्वं, तिरोभावो ऽपचयः स्त्रीत्वम्, अन्तरालावस्था स्थितिर्नपुंसकत्वमित्यर्थः । कस्य पुनराविर्भावादिकं लिङ्गं सत्त्वरजस्तमसां गुणानां तत्परिणामरूपाणां च तदात्मकानां शब्दस्पर्शरूपरसगन्धानां, शब्दादिसङ्घातरूपाश्च सर्वा मूर्त्तयः प्रतिक्षणपरिणामस्वभावाश्च सत्त्वादयो गुणा न स्वस्मिन्नात्मनि मुहूर्त्तमप्यवतिष्ठन्ते, एवं शब्दादय आकाशादयो घटादयश्च । उक्तञ्च

सर्वमूर्त्त्यात्मभूतानां शब्दादीनां गणेगणे ।
त्रयः सत्त्वादिधर्मास्ते सर्वत्र समवस्थिताः ॥

इति ।

क्वथितोदकवच्चैषामनवस्थितवृत्तिता ।
अजस्रं सर्वभावानां भाष्यएवोपवर्णिता ॥

इति च । तथा ।

रूपस्य चात्ममात्राणां शुक्लादीनां प्रतिक्षणम् ।
का चित्प्रलीयते का चित्कथं चिदभिवर्द्धते ॥

इति ।

प्रवृत्तिमन्तः सर्वे हि तिसृभिश्च प्रवृत्तिभिः ।
सततं न वियुज्यन्ते वाचश्चैवात्र सम्भवः ॥

इति च । टाबाद्यन्तः शब्द एवैता अवस्था गोचरयतीत्यर्थः । पुरुषो यद्यप्यपरिणामी तथापि

अचेतनेषु सङ्क्रान्तं चैतन्यमिव दृश्यते ।
प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनम् ॥

ततश्च ।

यश्चाप्रवृत्तिधर्मार्थश्चितिरूपेण गृह्यते ।
अनुयातीव सोऽन्येषां प्रवृत्तिर्विष्वगाश्रया ॥
सामान्यमपि गोत्वादि व्यक्तेरव्यतिरेकतः ।
प्रवृत्तिधर्म तद्द्वारा शशशृङ्गादिवत्तु तु ॥
तस्मादुक्तपदार्थस्य सम्भवाल्लिङ्गयोगिता ।
प्रवृत्तेरपि विद्यन्ते तिस्रो ह्येताः प्रवृत्तयः ॥
पुन्नपुंसकता स्त्रीत्वं तेन स्यादन्यलिङ्गता ।

तदेवं सर्वपदार्थव्यापित्वादुपचयापचयान्तरालावस्था स्त्रीणि लिङ्गानि, एवं च नक्षत्रं तारका तिष्यः, कुमार्यर्थो वस्तु इति एकस्याप्यर्थस्य नानालिङ्गयोग उपपद्यते, आविर्भावादित्रयस्यापि गुणभेदेन तस्मिन्नेवार्थे सर्वदा सम्भवात् । न चैवं तद्वृत्तेः सर्वस्यैव शब्दस्य त्रिलिङ्गता प्रसङ्गः, नह्यस्ति नियमो यः शब्दो यत्रार्थे पर्यवस्यति तत्र विद्यमानः सर्व एवाकारस्तेन शब्देनाभिधातव्य इति किं तु य आकारोऽभिधीयते तेन सता भवितव्यमित्येतावत् । तद्यथा तक्षा युवा कृष्णः कामुक इति तक्षादिशब्दानामेकार्थपर्यवसितानामपि व्यवस्थित एवाकारो वाच्यः, तथा लिङ्गेष्वपि द्रष्टव्यम्, उक्तं च,

सन्निधाने पदार्थानां किं चिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ॥

इति । उपचीयते कुमारीत्यत्रापि कुमारीशब्दः स्वमहिम्ना कस्य चिद्धर्मस्यापचयमेवाह, शब्दान्तरप्रयोगात्तु धर्मान्तरस्योपचयः प्रतीयते, एवं

Digitized by Google

चीयते वृत्त इत्यत्रापचयः, तदेवं सर्वमनाकुलमिदं दर्शनम् । वृत्तिकारस्तु लौकिकानामेवं प्रतिपत्तेरभावत्तत्प्रतिपत्त्यनुगुणं पक्षं दर्शयति । 'सामान्यविशेषा इति' । कानि चित्सामान्यानीत्यर्थः । यद्वा सत्ताव्यतिरिक्तेषु सामान्येषु सामान्यविशेषशब्दो रूढः, तिस्रो ऽवान्तरजातय इत्यर्थः । उक्तं च

तिस्रो जातय एवैताः केषां चित्समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥
हस्तिन्यां वडवायां च स्त्रीत्वबुद्धेः समन्वयः ।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ॥

इति । ननु चैषां त्रयाणामपि सामान्यविशेषाणां सर्वार्थेषु सद्भावोऽभ्युपगन्तव्यो, न गोत्वादिवत्कतिपयेष्वेवार्थेषु, कथमन्यथार्थव्यक्तिवस्त्वादिशब्दानां भिन्नलिङ्गानामेकस्मिन्नर्थे प्रयोगः स्यात्, ततश्च सर्वत्र त्रिलिङ्गप्रतिभासप्रसङ्ग इत्यत आह । 'बहुप्रकारव्यक्तय इति' । व्यज्यन्ते सामान्यविशेषा आभिरिति व्यक्तय आश्रयाः, एतदुक्तं भवति । विचित्रत्वादाश्रयाणां व्यञ्जकानां कश्चिदाश्रयः कस्य चित्सामान्यविशेषस्य व्यञ्जको न सर्वः सर्वस्येति, तत्र चेतनेषु स्तनादिमती व्यक्तिः स्त्रीत्वस्य व्यञ्जिका, लोमशत्वादिमती पुंस्त्वस्य, उभयव्यञ्जना नपुंसकत्वस्य, अचेतनेषु कथं, नहि तत्र किं चिदपि लिङ्गं व्यज्यते, तथा चेतनेष्वर्थव्यक्तिवस्त्वादिशब्दानां भिन्नलिङ्गानामप्यनुपपत्तिः, दारशब्दस्य च पुलिङ्गस्य भार्यायामनुपपत्तिरत आह । 'क्व चिदाश्रयविशेषाभावादिति' । तदभिव्यञ्जनसमर्थ आश्रयविशेषः, तत्राचेतनेषु सर्वत्रोपदेशादेवाभिव्यक्तिः, उपदेशः पुनर्लिङ्गानुशासनादिषु । अत्रैव दृष्टान्तमाह । 'यथा ब्राह्मणत्वादय इति' । ब्राह्मणक्षत्रियादिव्यक्तीनामत्यन्तसादृश्यादुपदेशादेव ब्राह्मणत्वादीनामभिव्यक्तिर्भवति नो खलु ब्राह्मणक्षत्रिययोः पुरोवस्थितयोरयं ब्राह्मणोयं क्षत्रिय इति प्रागेवोपदेशात्प्रत्यय उदेति । यथा गवाश्वव्यक्त्योरभावे शशविषाणादावप्युत्तरपदार्थद्वारकः सामान्ययोगः, सामान्यं जातिः, स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्तेत्यादौ सामान्येपि

ह्येकस्मिन्द्रव्ये सन्मात्ररूपे सर्वे गुणपर्यायाः सम्भवन्ति तस्मिन्दर्शने षड्द्रव्याभ्युपगमात् य[1]च्चोक्तं सन्मात्ररूपमनन्तसर्वपर्यायमद्वितीयमभ्युपगम्यते ततो युक्तमिदं दर्शनं, न चैतदभ्युपगन्तुं जैनैः शक्यं तेषां प्रमाणाभावादिति यादवार्यः, । अत्र किंचिद् ब्रूमः किमेकस्मिन् भिन्नाभिन्नत्वाद्यसम्भवमात्रं सूत्रकारेणाभिप्रेतम्? उत परमते तदसम्भवः? आद्ये स्वपक्षव्याघातकत्वं स्याद्धेतोः, द्वितीये वैषम्यं वक्तव्यं, षड्द्रव्याभ्युपगमस्तस्य वैषम्यमिति चेत्ततः किं षण्णां भिन्नस्वभावानां परस्परं द्रव्यपर्यायात्मना भिन्नाभिन्नत्वाभावात् सर्वानेकान्तत्वहानिरिति चेत्तर्हि वेदान्तिनामेव सर्व नैकान्त्यवादो घटते न त्वार्हतस्येति सूत्रकारनिर्देशः श्वभूभिताप्रतिक्षेपायेत् तच्चायुक्तं क्षणिकवादज्ञेयमिथ्यात्वसर्वशून्यवादनिराकरणेषु परपक्षेष्वनुपपन्नानां तेषां स्वपक्षे सामञ्जस्याभ्युपगमाभावात् तेषां श्रुतिविरोधात् अनभ्युपगमश्चेदनेकान्तवादेऽपि श्रुतिविरोधश्च तुल्यः श्रुतिभिर्ब्रह्मणो वैलक्षण्यप्रतिपादनात्, तादात्म्यश्रुतयः सन्तीति चेत्तासां निर्वाहोऽसकृदुक्तः इति न तासामनेकान्तत्वे प्रमाणत्वम् । किञ्च अणुभिश्च महद्भिश्च जायस्व म्रियस्व विज्ञानं चाविज्ञानं च सत्यं चानृतं च नेह नानास्ति नेति नेतीत्यादीनां परमाणुद्व्यणुकक्षणिकवादज्ञेयमिथ्यात्वसर्वमिथ्यात्वपरत्वमापातप्रतिपन्नमाश्रित्य पूर्वाधिकरणेष्वपि परपक्षेष्वसामञ्जस्यं स्वपक्षे तत्सामञ्जस्यं चोच्यत इति न कस्माद्व्याख्यायते, तेषां पूर्वापरवाक्यविरोधात् बह्वनुपपत्तिभिर्विध्वस्तत्वाच्च तथा निर्वहणमयुक्तमिति चेत्तदनेकान्तवादेऽपि तुल्यं, यथा सत्त्वासत्त्वनित्यत्वानित्यत्वादय एकदैकत्र एकस्य स्वरूपेण न सम्भवन्ति एवं घटस्य घटत्वावस्थायामेव मृदन्तरेण भिन्नमभिन्नत्वं च न सम्भवति, अवस्थातद्वतोश्च तदुभयं न सम्भवति विरोधस्य पूर्वमेवोपपादितत्वात्, अतो वेदान्तमवलम्ब्य भिन्नाभिन्नत्ववादिनामिदमधिकरणं विरुद्धम् । अन्त्यावस्थितेरित्यस्योभयोर्द्रव्यपर्य्याययोर्नित्यत्वादविशेषः अनित्याः पर्यायाः द्रव्यं नित्यमिति

१ यच्चैकमिति पा॰ ।

विभागो न स्यादिति यादवार्यः । तदनादरहेतुः, हेतुहेतुमतोरवि-शिष्टत्वं नित्यानित्यविभागाभावो ह्युभयोर्नित्यत्वमेव । ननु न साध्य-साधनयोरवैशिष्ट्यम् अनित्याः पर्यायाः द्रव्यं नित्यमिति स्वाभ्युपगमे वि-रोधः साध्य इति चेन्न अशाब्दत्वात्. अविशेषशब्दो हि तद्वैषम्याभाव-वाची न त्वभ्युपगमविरोधवाची अशाब्दत्वेऽप्यभिप्रेतत्वे को विरोध इति चेन्न विरोधः किन्तूक्तांशस्य दूषणतया पर्यवसानं नास्ति चेद् दूषणपर्यव-सानाय कल्यान्तराभिप्रेतत्वं कल्पनीयम् अविशेष–शब्देन यः पूर्वावस्थाया-मप्यात्मनो देहानुरूपपरिमाणतारतम्याभावः प्रसञ्जितः तदा ततः किमि-त्याकाङ्क्षानुदयाद् दूषणं पर्यवस्यति, अतो हेतुहेतुमतोरवैशिष्ट्यकल्यान्तरक-ल्पनोपेतादपि निर्वाहाद्वरं तदुभयनिर्मुक्तो निर्वाहः ॥ एकस्मिन्नसंभवाधि-करणं समाप्तम् ॥

पशुपत्यधिकरणम् । सू० पत्युरसामञ्जस्यात् ॥ ३६ ॥

भू० कपिलकणादसुगतार्हतमतानामसामञ्जस्याद्वेदबाह्यत्वाच्च निःश्रेयसार्थिभिरनादरणीयत्वमुक्तम्, इदानीं पशुपति-मतस्य वेदविरोधादसामञ्जस्याच्चानादरणीयतोच्यते तन्म-तानुसारिणश्चतुर्विधाः कापालाः, कालामुखाः, पाशुपताः, शैवाश्चेति, सर्वे चैते वेदविरुद्धां तत्त्वप्रक्रियामैहिका-मुष्मिकनिश्रेयससाधनकल्पनाश्च कल्पयन्ति, निमित्तो-पादानयोर्भेदं निमित्तकारणं च पशुपतिमाचक्षते, तथा निःश्रेयससाधनमपि मुद्रिकाषट्कधारणादिकं, यथाऽऽहुः कापालाः "मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः । भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति । कण्ठिका रुचकं चैव कुण्डलं च शिखामणिः । भस्मयज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ॥ आभिर्मुद्रितदेहस्तु न भूय इह

Digitized by Google

जायत इत्यादिकं, तथा कालामुखा अपि कपालपात्रभोजनशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवपूजादिकमैहिकामुष्मिकसकलफलसाधनमभिदधतीति। रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके कपालं भस्मना स्नानमित्यादि च प्रसिद्धं शैवागमेषु, तथा केनचित्क्रियाविशेषेण विजातीयानामपि ब्राह्मण्यप्राप्तिमुत्तमाश्रमप्राप्तिं चाहुः "दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात्कापलं व्रतमास्थाय यतिर्भवति मानवः" इति, तत्रेदमुच्यते पत्युरसामञ्जस्यादिति नैकस्मिन्नसम्भवादित्यतो नेत्यनुवर्तते, पत्युः पशुपतेर्मतं नादरणीयं कुतः असामञ्जस्यात्, असामञ्जस्यं चान्योन्यव्याघाताद्वेदविरोधाच्च मुद्रिकाषट्कधारणभगासनस्थात्मध्यानसुराकुम्भस्थापनतत्स्थदेवतार्चनगूढाचारश्मशानभस्मस्नानप्रणवपूर्वाभिध्यानान्यन्योन्यविरुद्धानि, वेदविरुद्धं चेदं तत्त्वपरिकल्पनमुपासनमाचारश्च वेदाः खलु परं ब्रह्म नारायणमेव जगन्निमित्तमुपादानं च वदन्ति। नारायणः परं ब्रह्म तत्त्वं नारायणः परः नारायणः परो ज्योतिरात्मा नारायणः परः॥ तदैक्षत बहु स्यां प्रजायेयेति सोऽकामयत बहु स्यां प्रजायेये"ति "तदात्मानं स्वयमकुरुतेत्यादयः परब्रह्मभूतपरमपुरुषवेदनमेव च मोक्षसाधनमुपासनं वदन्ति"वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसस्तु पारे तमेतं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत"

इत्यादिनैकतां गताः सर्वे वेदान्ताः तदितिकर्त्तव्यताभूतं कर्म च वेदविहितवर्णाश्रमसम्बन्धियज्ञादिकमेव वदन्ति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन एतमेव लोकमिच्छन्तः प्रव्राजिनः प्रव्रजन्ति इत्यादयः, केवलपरतत्त्वप्रतिपादनपरनारायणानुवाकसिद्धतत्त्वपराः केषुचिदुपासनादिविधिपरेषु वाक्येषु श्रुताः प्रजापतिशिवेन्द्राकाशप्राणादिशब्दा इति शास्त्रदृष्ट्या तूपदेशो वामदेववदित्यत्र प्रतिपादितं, तथा "एको ह वै नारायण आसीन्न ब्रह्मा नेशान" इत्यारभ्य स एकाकी न रमेतेति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव समानप्रकरणस्थाः सदेव सोम्येदमग्र आसीदीत्यादिषु साधारणाः सद्ब्रह्मादिशब्दाः प्रतिपादयन्तीति जन्माद्यस्य यत इत्यत्र प्रतिपादितम्, अतो वेदविरुद्धतत्त्वोपासनानुष्ठानाभिधानात्पशुपतिमतमनादरणीयमेव ॥

सू॰ अधिष्ठानानुपपत्तेश्च ॥ ३७ ॥

वेदबाह्यानामनुमानाद्धि केवलनिमित्तेश्वरकल्पना तथा सति दृष्टानुसारेण कुलालादिवदधिष्ठानं कर्त्तव्यं, न च कुलालादेर्मृदाद्यधिष्ठानवत्पशुपतेर्निमित्तभूतस्य प्रधानाधिष्ठानमुपपद्यते अशरीरत्वात्सशरीराणामेव हि कुलालादीनामधिष्ठानशक्तिर्दृष्टा, न चेश्वरस्य सशरीरत्वमभ्युपगन्तव्यं तच्छरीरस्य सावयवस्य नित्यत्वे अनित्यत्वे च शास्त्रयोनित्वादित्यत्र दोषस्योक्तत्वात् ॥

सू० करणवच्चेन्न भोगादिभ्यः ॥ ३८ ॥

यथा भोक्तुर्जीवस्य करणकलेवराद्यधिष्ठानमशरीरस्यैव दृश्यते तद्वन्महेश्वरस्याप्यशरीरस्य च प्रधानाधिष्ठानमुपपद्यत इति चेन्न भोगादिभ्यः पुण्यपापरूपकर्मफलभोगाय पुण्यपापरूपादृष्टकारितं हि तदधिष्ठानं तद्वत्पशुपतेरपि पुण्यपापरूपादृष्टवत्तया तत्फलभोगादिसर्वं प्रसज्येत अतो नाधिष्ठानसम्भवः ॥

टी० सू० पत्युरसामञ्जस्यात्, सङ्गतिमाह "कपिले"ति, प्रधानकारणत्वाभ्युपगमसाम्यात्साङ्ख्यनिरासानन्तरभावित्वे पाशुपतनिरासस्य प्राप्तेऽपि सौगतार्हतमतनिरासानन्तरं तत्प्रतिक्षेपस्तस्यात्यन्तवेदबाह्यत्वज्ञापनाय कृतः, पशुपतिमतं निःश्रेयसार्थिभिरुपादेयं नेति? किमस्य श्रुतिविरोधोऽस्ति ने?ति, यदा न श्रुतिविरोधस्तदानीमुपादेयता, यदा तु विरोधस्तदाऽनुपादेयता तत्त्वविपर्ययमाह "निमित्ते"ति अनुष्ठानविपर्ययमाह "तथे"ति, तत्रेदमुच्यते इति व्याघातमाह "मुद्रिके"ति, एकतन्त्रोक्तार्थस्तन्त्रान्तरेण दूषित इत्यन्योन्यव्याघातादुपहतं न केवलं वेदविरोधादित्यर्थः । मुद्रिकाषट्कधारणादयो बहुषु तन्त्रेषूक्ताः क्रमेण परिगणिताः न त्वेकत्र । वैदिकपक्षस्य तद्वैषम्यमाह "वेदाः खल्वि"ति, एकतां गताः सर्वशाखाप्रत्ययनयादिति भावः । सद्ब्रह्मात्मशम्भुशिवादिशब्दनिर्वाहार्थमाह "केवलपरे"ति, नारायणानुवाकानुगुणमुपनिषदन्तरार्थः कथं निर्णेय इत्यत्राह "केवले"ति, यथा जुह्वा जुहोतीति वाक्यस्य होमसाधनत्वमात्रपरत्वेन द्रव्यविशेषनिर्णये न तात्पर्यं यस्य पर्णमयी जुहूरित्येतद्वाक्यस्य द्रव्यविशेषनिर्णयपरत्वेन तदनुगुणार्थत्वं जुह्वा जुहोतीति वाक्यस्य भवति, तथा शम्भुराकाशमध्ये ध्येय इत्यादीनां वाक्यानामुपासनविधिपरत्वान्नोपास्यविशेषनिर्णयपरत्वं, नारायणानुवाकस्य तु उपासनविध्याद्यन्यपरत्वाभावादुपास्यविशेषनिर्णयैकपर-

Digitized by Google

त्वमस्ति, अतस्तस्तदनुगुणार्थत्वं शम्भुराकाशेत्यादिवाक्यानामभ्युपगन्तव्यमित्यर्थः । कारणवाक्येषु देवतान्तरप्रतीतिरस्तीत्यत्राह "एको ह वा" इति, सद्ब्रह्मात्मशब्दे पूर्वपूर्वं उत्तरोत्तरशब्दं प्रति सामान्यशब्दाः, एवं पूर्वपूर्वं प्रत्युत्तरोत्तरशब्दा विशेषशब्दाः, एवं नारायणशब्दं प्रति शम्भुशिवादयः सामान्यशब्दा शम्भुःस्वयंभूर्द्रुहिणः स्वःश्रेयसं शिवं भद्रं विश्वाद्यं विश्वशम्भुवं शाश्वतं शिवमच्युतं शिवः शिवानामशिवोऽशिवानामित्यादिष्वनेकार्थेषु प्रयोगदर्शनात्, नारायण–शब्दस्य तथाऽर्थान्तरे प्रयोगाभावाच्च, तस्मात्पशुना यजेत "छागोवा मन्त्रवर्णादि"ति नयात्सामान्यशब्दानां विशेषपर्यवसानात् ब्रह्मादिसामान्यशब्दानां नारायणविशेषपर्यवसायित्वं युक्तमित्यर्थः । जन्माद्यस्य यत इत्यत्र प्रतिपादितमिति, यतो वा इमानीत्यादिवाक्ये अस्यार्थस्याभिप्रेतत्वात् सूत्रकारेणापि तथाऽभिप्रेतमित्यर्थः । जन्मादिसूत्रभाष्येण परस्मात्पुंस इत्यन्तेनायमर्थः सूचितः सू॰ अधिष्ठानानुपपत्तेश्च, पौरुषेयवाक्यस्य प्रमाणमूलत्वे बुभुत्सिते सत्यतीन्द्रियार्थे श्रुतिमूलत्वमनुमानमूलत्वं वा सम्भवेत् तत्र श्रुतिमूलत्वं श्रुतिविरुद्धपरावरतत्त्वप्रतिपादनप्रदर्शनादपास्तमित्यनुमानमूलत्वनिरासपरं सूत्रत्रयं शास्त्रयोन्यधिकरण एवाभिप्रेतानां दूषणानामत्राप्यपेक्षितत्वात् कण्ठोक्तिः कृता तेषां वक्ष्यमाणत्वबुद्ध्या शास्त्रयोन्यधिकरणे कण्ठोक्त्यभावः, । वक्ष्यमाणदूषणस्य स्वास्पर्शित्वायाह "वेदबाह्याना"मिति, सू॰ करणवच्चेन्न भोगादिभ्यः, किं शरीरत्वे न जगदधितिष्ठति? उत तद्व्यतिरिक्तत्वेन? शरीरत्वेन चेत् भोगादिप्रसङ्गः, न चेच्छरीरान्तरसापेक्षत्वं स्यादित्यर्थः । शरीरनिरपेक्षाधिष्ठानं शरीरे दृष्टमिति चेन्न शरीरत्वप्रयुक्तं तदित्युक्तं भवति तदा जगतः शरीरत्वे भोगादिप्रसङ्ग इत्ययमशरीरत्वाभ्युपगमेन परिहारः, अशरीरत्वानभ्युपगमेन आगमप्रामाण्ये उक्तः शरीरमपि सशरीरेणैवाधिष्ठीयते शरीरं ह्यन्याधिष्ठाने करणभूतं स्वाधिष्ठाने करणं कर्म च यथा दीपोऽन्यप्रकाशहेतुः स्वप्रकाशे स्वयमेव हेतुः, न दीपान्तरसापेक्षः, यथा च मनोयुगपदनेकज्ञानानुत्पत्तिलिङ्गेनानुमीयमानं स्वानुमाने करणभूतं कर्म च तथेति । एवं स्वपरनिर्वाहकत्वेन परिहारः ॥

Digitized by Google

सू० अन्तवत्त्वमसर्वज्ञता वा ॥ ३६ ॥

भू० वा-शब्दश्चार्थे पशुपतेः पुण्यपापरूपादृष्टवत्त्वे जीववदन्तवत्त्वं सृष्टिसंहाराद्यास्पदत्वमसर्वज्ञता च स्यादित्यनादरणीयमेवेदं मतं "विरोधे त्वनपेक्षं स्यादित्यादिना वेदविरुद्धस्यानादरणीयत्वे सिद्धेऽपि पशुपतिमतस्य वेदविरुद्धताख्यापनार्थं पत्युरसामञ्जस्यादिति पुनरारम्भः। यद्यपि पाशुपतशैवयोर्वेदाविरोधिन इव केचन धर्माः प्रतीयन्ते तथाऽपि वेदविरुद्धनिमित्तोपादानभेदकल्पनापरावरतत्त्वव्यत्ययकल्पनामूलत्वात्सर्वमसमञ्जसमेवेत्यसामञ्जस्यादित्युक्तम् ॥ पशुपत्यधिकरणं समाप्तम् ॥

टी० सू० अन्तवत्त्वमसर्वज्ञता वा, वेदाविरोधिन इवेत्यत्र इव-शब्दो विप्रलम्भकत्वद्योतकः। ननु वेदविरुद्धत्वख्यापनार्थत्वमधिकरणस्यायुक्तं तान्त्रिकग्रन्थैरेवार्थविरोधप्रतीतेः, विरोधे प्रतिपन्ने विरोधाधिकरणन्यायाद् वेदविरुद्धस्याप्रामाण्यसिद्धेश्चास्याधिकरणस्य कृतकरत्वप्रसङ्गः, नैवं विरोधस्यापातप्रतिपन्नत्वबुद्ध्या न्यायेनाविरोधे निर्णीतेऽपि तस्यातिविरुद्धेषु कर्मसु प्रतीयमानेषु तत्स्वारस्यभञ्जके श्रुत्यन्तरे चानुपलभ्यमाने कथं बाधविकल्पसमुच्चयसङ्कोचैः प्रत्यक्षश्रुतयो नेतुं शक्यन्ते इति प्रतिपादनार्थत्वादस्य। ननु स्मृत्याऽपि श्रुतिसङ्कोचो दृश्यते न हिंस्यादिति निषेधो हि श्राद्धकल्पस्थमांसविधानेन संकुचति, नैवं मांसेनापि श्राद्धं कर्त्तव्यमित्यवश्यं श्राद्धकर्त्तव्यताविवादरूपत्वात्तादृशवचनानाम्, अत एव हि तथाऽननुष्ठानम्। यद्वा बह्वर्थविरोधः प्रधानप्रतिपाद्यविरोधो वा यासु न विद्यते ताः स्मृतयः श्रुतिं सङ्कोचयन्ति न तु वेदविरोधबहुलाः, प्रधानार्थविरुद्धाश्च विरोधबाहुल्यं तत्र तत्र द्रष्टव्यं दर्शितप्रायं च यद्यपीत्यविरोधमाशङ्क्य प्रधानप्रतिपाद्यविरोधं भाष्यकार एवाह "तथा-

Digitized by Google

पी"ति, न चाकाशप्राणेन्द्रियादिशब्दानामिव तन्त्रस्थशिवादिशब्दानां परमात्मपरताऽऽश्रयणेन परावरतत्त्वव्यत्यासः परिहर्तुं शक्यते प्रतर्दनविद्यादिषु नारायणादिशब्दवाच्यस्य परतत्त्वस्येन्द्रादिशब्दवाच्यापेक्षयाऽपकृष्टत्वेन व्यपदेशाभावात्, इन्द्रादिशब्दानामिन्द्राद्यर्थद्वारा कारणतत्तदन्तर्यामिभूतपरमात्मपरत्वाश्रयणं न पूर्वापरवाक्यश्रुत्यन्तरविरुद्धं न हीन्द्रस्य नारायणात्परत्वं क्वचिच्छ्रुतं पाशुपतादिषु परत्वेनोक्तं रुद्रं प्रत्यवरत्वेनोक्तस्य तत्त्वस्य कारणत्वान्तर्यामित्वव्याघातात् रुद्रशिवादिशब्दानां नारायणपरत्वेन निर्वाहोऽनुपपन्नः वेदान्तवाक्येषु द्वैताद्वैतयोरेव हि व्याख्यातॄणां विप्रतिपत्तिः नारायणस्य ब्रह्मशिवादीनां च द्वैतं वा अद्वैतं भवतु सर्वथाऽपि नारायणस्य परत्वं तस्मात्कस्यचित् तत्त्वस्य परत्वं मोक्षप्रदत्वं च श्रुतिविरुद्धमिति सर्वाविगीतं परमपुरुषादन्यस्य परत्वेनोपासनं च मोक्षहेतुरिति श्रुतिविरुद्धं, नान्यः पन्था इति परमपुरुषादन्यस्य मोक्षप्रदत्वनिषेधात् । ननु मोक्षप्रदजगत्कारणविषयास्तन्त्रेषु शिवादिशब्दा वस्तुमात्रविषयाः स्युः भगवद्विषया वा कार्य्यविषया नारायणादिशब्दा भगवतोऽर्थान्तरपराः स्युः अतो न विरोध इति चेन्न अतिप्रसङ्गात्, सर्वशब्दानाममुख्यार्थपरतया विरोधशमने सुगतागमादयोऽपि अविरोधेन नेतुं शक्यन्ते, क्षणिकशब्दः क्षणपरिणामित्वपरः चित्तसन्तति-शब्दोऽपि चित्तस्याविच्छेदपरः नित्यज्ञानरूप आत्मेत्यर्थः, वेदा न प्रमाणमिति उक्तप्रमाणविलक्षणा इत्यर्थः, तेषां पौरुषेयत्वं च पुरुषैरधीतत्वम् अर्थान्तराणि तु व्याख्यातृबुद्धिदोषमूलानि न तु सुगताभिमतानीति किमिति न व्याख्यायते, अतोऽनुष्ठानविरोधः तत्त्वविरोधश्च दुष्परिहरः । ननु कथं मोहनार्थत्वं पाशुपतस्य, उक्तं हि भगवत्प्रणीते तत्प्रतिपादकतया सात्त्विके श्रीमति वाराहे पुराणे पाशुपततन्त्रस्यानुग्रहमूलत्वेन वेदानुगुण्याच्च स्वर्गापवर्गार्थत्वं रुद्ररूपस्य भगवतस्तदुक्तमार्गेण पूजनीयत्वं तन्त्रान्तराणां विप्रपत्ति[1]मूलत्वेन नरकफलत्वं च तत्र यथा महेश्वरवचः 'एवमभ्यर्थितस्तैस्तु पुराऽहं द्विजसत्तमाः ! । वेदक्रिया-

१ विप्रलिप्सामूलत्वेनेति पा० ।

समायुक्तां कृतवानस्मि संहिताम् । निश्वासाख्यां ततस्तस्यां लोना वाभ्रव्यशाण्डिलाः । अल्पापराधा इत्येव शेषा वैलालिकाभवन् । मयैव मोहितास्ते हि भविष्यज्ज्ञानता द्विजाः । इति तत्र निश्वाससंहितायां हि लक्षमात्रप्रमाणतः । सैव पाशुपती दीक्षा योगः पाशुपतश्च सः । एतस्माद्वेदमार्गाद्धि यदन्यदिह जायते । तच्छूद्रकर्मं विज्ञेयं रौद्रं शौचविवर्जितम् । ये रुद्रमुपजीवन्ति कलौ वैलालिका नराः । उच्छिष्टरुद्रास्ते ज्ञेया नाहं तेषु व्यवस्थित इति तथा "तेषां गौतमशापाद्धि भविष्यन्त्यन्वये द्विजा इति प्रक्रम्य "तेषां मध्ये सदाचारा ये ते मच्छासने रताः । ते स्वर्गमपवर्गं च यान्त्येव खलु निश्चयः । वैलालिका ये यास्यन्ति मम सन्ततिदूषकाः । प्राग्गौतमाग्निनिर्दग्धाः पुनर्मद्वचना द्विजाः । नरकं तु गमिष्यन्ति नात्र कार्या विचारणेति, तत्राष्टषष्टितमे विष्णुरूपया यत्योऽहं सर्ववेदैर्द्विजोत्तम । सात्त्विकी सा समाख्याता वृत्तिर्मे मुनिपुङ्गव! जटामुकुटधारी च नागभूतैः समावृतः । सिद्धान्तनयमार्गस्थैरहं रुद्रेति पूजितः । राजसीं मे तु तां वृत्तिं जानीहि द्विजसत्तमेति सिद्धान्तनयमार्ग-शब्दश्च पाशुपतविषयः न तु शैवादितन्त्रान्तरविषयः । तथाऽर्हद्बुद्धभिक्षूणां वैलालव्रतिकैरहं तमोऽतिरिक्तैर्यष्टव्यस्तांस्तमस्येव पातये इत्यनन्तरं ग्रन्थे वैलालिव्रतिकशब्देन तन्त्रान्तरनिष्ठानां राजसेभ्यः सिद्धान्तनयमार्गस्थेभ्यस्तामसतया पृथगुक्तेः, न च वैलालिव्रतिकशब्दो बौद्धादिविषयः, अस्मिन्नेव ग्रन्थे ततः पृथगुक्तेः न चेतरदुष्टाशयमात्रविषयः वैलालिका ये यास्यन्ति मम सन्ततिदूषका इति रुद्रसम्बन्धित्वावगमात्, न च पाशुपतविषयः सैव पाशुपती दीक्षा योगः पाशुपतश्च सः । एतस्माद्वेदमार्गात्तु यदन्यदिह जायते । तच्छूद्रकर्मविज्ञेयं रौद्रं शौचविवर्जितं ये रुद्रमुपजीवन्ति कलौ वैलालिका नरा इति पाशुपतनिष्ठेभ्यः पृथग्व्यपदेशात्, अतः पाशुपतेतरतन्त्रनिष्ठानां वैलालिकशब्दोक्ततया परिशेषात्तामसेभ्यस्तन्त्रान्तरेभ्यः सिद्धान्तनयमार्गस्य राजसत्वरूपवैधर्म्ययोगाच्च सिद्धान्तनयशब्दः पाशुपतविषयः रौद्रत्वे तुल्ये सति वैलालिकेभ्यः पूर्वनिर्दिष्टतया स्थानप्रमाणाच्च सिद्धान्तनयशब्दः पाशुपतविषयः सैव पाशुपती दीक्षा योगः पाशुपतश्च स इत्युक्त्वा-

ये रुद्रमुपजीवन्ति कलौ वैतालिका नरा इत्यत्र वैतालिकेभ्यः पूर्वमेव हि पाशुपतमार्गः कीर्त्यते तथा वेदक्रियासमायुक्तां कृतवानस्मि संहितां निश्वासाख्यां ततस्तस्यां लीना वाभ्रव्यशाण्डिलाः । अल्पापराधा इत्येव शेषा वैतालिका भवन् इत्यत्रापि वैतालिकेभ्यः पूर्वमेव हि निश्वासाख्या पाशुपतदीक्षा संहिता व्यपदिश्यते निश्वासाख्यायाः पाशुपतगोचरत्वं तत्रैव स्पष्टं निश्वाससंहितायां हि लक्षमात्रप्रमाणतः सैव पाशुपती दीक्षेति अतः पृथग्व्यपदेशात् तन्त्रान्तरेभ्यो वैधर्म्यात् स्थानप्रमाणाच्च सिद्धान्तनयशब्दः पाशुपतविषयः अतः पाशुपतमार्गस्तमःपतनहेतुभ्यस्तन्त्रान्तरेभ्यो विलक्षणोभगवत्तोषकरः स्वर्गापवर्गहेतुश्चावगम्यते, अतोऽनुग्रहमूलत्ववेदानुसारित्वभगवत्प्रीणनत्वस्वर्गापवर्गार्थत्वा तामससंमोहनार्थदुर्गतिनिमित्ततामसतन्त्रान्तरेभ्यो विलक्षणस्य पाशुपतस्य कथमवैदिकत्वमिति नैवं तन्त्रान्तरेभ्यो विवक्षितस्य वैषम्यस्याल्पतरत्वात् पाशुपतस्य त्रयीबाह्याधिकारत्वमोहनार्थत्वतमोमिश्ररजोमूलत्वैस्तन्निष्ठानां भगवच्छासनपराङ्मुखत्वोक्त्या च पञ्चरात्रस्येव वेदतुल्यप्रमाण्यप्रतिपादनपरत्वं हि नात्रावगम्यते तथा ह्यष्टषष्ठितमे "पौरुषं सूक्तमास्थाय ये यजन्ति द्विजास्तु माम् । संहिताजपमास्थाय ते मां प्राप्स्यन्ति ब्राह्मणाः अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन हि । मार्गेण मां प्रपद्यन्ते ते मां प्राप्स्यन्ति मानवाः । ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते । शूद्रादीनां न तच्छ्रोत्रपदवीमुपयास्यति । एवं मयोक्तं विप्रेन्द्र ! पुरा कल्पे पुरातनं पञ्चरात्रं सहस्राणां यदि कश्चिद् ग्रहीष्यति । कर्मक्षये च मां कश्चिद्यदि भक्तो भविष्यति । तस्य वेदाः पञ्चरात्रं नित्यं हृदि वसिष्यति । वेदेन पञ्चरात्रेण भक्त्या यज्ञेन च द्विजाः । प्राप्योऽहं नान्यथा प्राप्यो वर्षलक्षैरपि द्विजे"ति पञ्चरात्रस्य वेदतुल्यविकल्पभाक्त्वानुगुणं प्रामाण्यमभिहितं, तथा पाशुपतनिष्ठानां रौद्रतन्त्रान्तरनिष्ठानामिव भगवच्छासनपराङ्मुखत्वं तामसयुगानुवर्तितत्वं च तत्रोक्तम् "इतरे राजसैर्भावैस्तामसैश्च समावृताः । भविष्यन्ति द्विजश्रेष्ठ ! मच्छासनपराङ्मुखाः । कृतं त्रेता द्वापरश्च युगानि त्रीणि नारद । सत्त्वस्था मां समेष्यन्ति कलौ रजस्तमोऽधिकाः, इति राज-

सैर्भावैरिति भावशब्दश्चेष्टापरः राजसी वृत्तिर्विवक्षिता, सा च पाशुपती राजसी मे तु तां वृत्तिं जानीहीति सिद्धान्तनयमार्गवृत्तेर्हि राजसत्वं पूर्वमुक्तं सिद्धान्तनय-शब्दस्य पाशुपतगोचरत्वं पृथग्व्यपदेशवैधर्म्यस्थानप्रमाणैः पूर्वमेवोपादितं तामसैर्भावैरिति रौद्रान्तसौगतादिवृत्तय उच्यन्ते तथार्हद्बुद्धभिक्षूणां वेतालव्रतिकैरहं तमोऽतिरिक्तैर्यष्टव्य इति ह्युक्तं भिक्षूणामिति तृतीयार्थे षष्ठी यष्टव्य इति यजमानरूपतोक्तिस्तदभिप्रायेण अन्यथा तांस्तमस्येव पातय इति विरोधात् अहं यष्टव्य इत्युक्तिर्वस्तुतः सर्वस्य स्वात्मकत्वात् न तु तदभिप्रायेण तामसशास्त्रे जगतो भगवदात्मकत्वानभ्युपगमात्, एवं राजसत्वतामसत्वयोः क्रमस्य च प्रत्यभिज्ञानात्, अनेन तामसतन्त्रान्तरनिष्ठानामिव राजसपाशुपतनिष्ठानां च भगवच्छासनातिलङ्घित्वमुच्यते । तथा च "ये वेदमार्गनिर्मुक्तास्तेषां मोहार्थमेव च नयसिद्धान्तसंज्ञं हि मया शास्त्रं तु दर्शितम् । पाशोऽयं पशुभावस्तु स यदा पतितो भवेत् तदा पाशुपतं शास्त्रं जायते वेदसंज्ञितमिति नयसिद्धान्तसंज्ञस्य पाशुपतस्य मोहनाय प्रवर्तितत्वं वेदानधिकारिणां तत्रैव वेदबुद्ध्या मोहितत्वं चोक्तं तथा राजसस्य पाशुपतस्य तामसानामितरतन्त्राणां चासात्त्विकत्वम् अविशिष्टं प्रतीयते, राजसीं वृत्तिं तमोऽतिरिक्तैरिति ह्युक्तं राजसीमित्यनेन तमोमिश्ररजोमूलत्वं विवक्षितं रजःप्राचुर्यात् पाशुपतस्य राजसत्वनिर्देशः तथा हि द्विसप्ततितमे "यत्सत्त्वं स हरिर्देवो योहरिस्तत्परं पदं ये सत्त्वरजसी सोऽपि ब्रह्मणः कामसम्भवः । यो ब्रह्मा सैव वेदस्तु यो वेदः स क्रतुर्बुधाः । यद्रजस्तमसोपेतं सोऽहं नास्त्यत्र संशयः । सत्त्वं रजस्तमश्चैव त्रितयं चैतदुच्यते । सत्त्वेन मुच्यते जन्तुः सत्त्वं नारायणात्मकम् । रजसा सत्त्वयुक्तेन भवेच्छ्रीमान् यशोऽधिकः । तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते । यद्वेदबाह्यं कर्म स्यान्यामुद्दिश्योपसेव्यते । तद्रौद्रमिति विख्यातं कनिष्ठगतिदं नृणां तद्वै पाशुपतन्नाम कनिष्ठं मोहनं नृणाम्, इति च पाठः यद्धीनं रजसा कर्म केवलं तामसं तु यत् तत्तद्दुर्गतिप्रदं नृणाम् । इह लोके परत्र चेति सात्त्विकराजसम्यैतामहं वृत्तमुक्तं केवलं तामसं दुर्गतिप्रदमुक्तं, तच्च बौद्धार्हतवेतालिकवृत्तं वैला-

Digitized by Google

लिकव्रतिकैस्तमोऽतिरिक्तैरिति ह्युक्तं तदुभयातिरिक्तमध्यमश्लोकोक्तं कर्म-राजसतामसमित्यवगम्यते केवलतामसमित्युत्तरत्र विशेषितत्वात्, यद्रज-स्तमसोपेतं सोऽहमित्युक्तत्वाच्च तमोमिश्ररजोमयत्वमवगम्यते । ननु च यद्वेदबाह्यमिति श्लोकः वैतालिकविषयः यद्धीनमिति बौद्धार्हतविषयं नैवं बौद्धार्हतवैतालिकानामेककोटिनिविष्टतयोक्तत्वात्पृथक्करणस्य अनु-चितत्वात् तमःपतनं तेषां तुल्यमवगतं तथाऽर्हद्बुद्धभिक्षूणां वैतालिव्रति-कैरिह तमोऽतिरिक्तैर्यष्टव्यस्तांस्तमस्येव पातय इति, अत इहान्तिम-श्लोके दुर्गतिरुच्यमाना बौद्धार्हतवैतालिकानां समाना भवितुमर्हति, अतो मध्यमगतश्लोकः पाशुपतविषयः, [१]यद्वै पाशुपतं नामेति पाठे पाशुपत विषयत्वं सिद्धं, ततश्च तस्य रजोमिश्रतमोमूलत्वं सात्त्विकराजसप्रबन्धात् कनिष्ठत्वं च स्थितं, वेदबाह्यत्वं च स्थितं मोहनाय प्रवृत्तत्वं च तत्रोक्तं पाशुपतस्य, यथा द्विसप्ततितमे मां विष्णोर्व्यतिरिक्तं ये ब्रह्माणं च द्वि-जोत्तमाः । यजन्ति पापकर्माणस्ते यान्ति नरकं नराः । ये वेदमार्गनिर्मुक्ता-स्तेषां मोहार्थमेव च नयसिद्धान्तसञ्ज्ञं हि मया शास्त्रं तु दर्शितं पाशो-ऽयं पशुभावस्तु स यदा पतितो भवेत् । तदा पाशुपतं शास्त्रं जायते वेद-संज्ञितमिति । न च नयसिद्धान्तमार्गो न पाशुपतः किंतु वैतालिकशब्द-वाच्यशैवादिमार्ग इति वाच्यम् अष्टषष्टितमे वैतालिकव्यतिरेकेण नय-सिद्धान्तमार्गस्योक्तत्वात्, तत्र हि सिद्धान्तनयमार्गस्य राजसत्वेन वैता-लिकमार्गस्य तामसत्वेन च भेदो दर्शितः । किञ्च तत्र रुद्रवचः 'देवदेव जनः सर्वो मुक्तिमार्गव्यवस्थितः । कथं सृष्टिः प्रभविता नरकेषु च को वसेत् ॥ एवमुक्तस्ततो देवो मामुवाच जनार्दनः । युगानि त्रीणि सहसा मा-मुपैष्यन्ति मानवाः ॥ अन्त्ये युगे प्रविरला भविष्यन्ति मदाश्रयाः । एष मोहं सृजाम्याशु यो जनं मोहयिष्यति ॥ त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय । अल्पायासं दर्शयित्वा फलं दीर्घं प्रदर्शय ॥ कुहकानीन्द्रजालानि विरुद्धाचरणानि च । दर्शयित्वा जनं सर्वं मोहयाशु महेश्वर ! ॥ एवमुक्त-स्तदा तेन देवेन परमेष्ठिना । आत्मा तु गोपितः सद्यः प्रकाशोऽहं

१ तद्वै इति पा० ।

कृतस्ततः ॥ तस्मादारभ्य कालात्तु मत्प्रणीतेषु सत्तम ! । शास्त्रेष्वभिरतो लोको बाहुल्येन न वेद तमि"ति, मोहनार्थत्वमसात्त्विकयुगप्रवृत्तत्वं तदा भगवतस्तिरोधानं रुद्रस्य प्रकाशितत्वं चोक्तं पाशुपते च भगवत्प्रकाशना-भावात् तस्याप्युक्तलक्षणमोहनार्थग्रन्थान्तर्भावस्सिद्धः सिद्धान्तनयसंज्ञस्य मोहनार्थत्वोक्तेस्तस्य च तन्त्रान्तरव्यतिरेकस्योपपादिततया पाशुपतत्व-सिद्धेश्च तथा गौतमशापोपहतत्रयीबाह्यजनाधिकारत्वं च पाशुपतस्य तन्त्रान्तराणामप्यविशेषेण प्रतीयते यथा त्रिसप्ततितमे मोहनार्थं तु लोकानां त्वया शास्त्रं पृथक् कृतं तत् कदा हेतुना केन कृतं देव ! वदस्व न इति पृष्टे "दुर्भिक्षाद् गौतमेन रक्षितैरनुमतैर्निगमिषुभिर्मुनिभिर्गौतमा-तिसन्धानमुक्त्वाऽभिहितम् "एवमुक्तस्तदा तैस्तु गौतमः किमिदं त्विति गोवध्याकारणं मुग्धं स्तावत्पश्यति योगवित् । ऋषीणां मायया सर्वमिदं जातं विचिन्त्य वै शशाप तां स्तदा भस्म मिथ्याभूतपरांस्तथा । भविष्यथ त्रयीबाह्या वेदकर्मबहिष्कृताः तच्छ्रुत्वा क्रूरवचनं गौतमस्य महामुनेः । ऊचुस्सप्तर्षयो मैवं सर्वकालं द्विजोत्तमाः । भवन्तु किं तु मे वाक्यममोघं नात्र संशयः । त्वद्वाक्यवह्निनिर्दग्धाः सदा कलियुगे द्विजाः । भविष्यन्ति क्रियाहीनाः सर्ववेदबहिष्कृता" इति गौतमशापं तल्लघूकरणाय कलौ जन्म-तदनुग्रहाय तद्गोत्रप्रवर्तकैः सप्तर्षिभिर्महेश्वरस्याभ्यर्थनं चोक्त्वा एवम-भ्यर्थितरूपैस्तु पुराऽहं द्विजसत्तमाः । वेदक्रियासमायुक्तां कृतवानस्मि संहितां निश्वासाख्यां । ततस्तस्यां लीना बाभ्रव्यशाण्डिलाः । अल्पापराधा इत्येव शेषा वैलालिका भवन् । मयैव मोहितास्ते तु भविष्यज्ज्ञानता-द्विजाः । तस्य निश्वासतायां हि लक्षमात्राप्रमाणतः । सैव पाशुपती दीक्षा योगः पाशुपतश्च सः । एतस्माद्वेदमार्गाद्धि यदन्यदित्यादि तेषां गौतम-शापात् धीत्यादि चोक्तं तस्यापराधतारतम्येऽपि शापोपहतत्रयीबाह्या-धिकारित्वं पाशुपतस्य तन्त्रान्तराणां चाविशिष्टम् । नन्वेवं तर्हि पाशुप-तस्य वेदक्रियासमायुक्तत्वस्वर्गापवर्गप्राप्तिहेतुत्वं कथं घटते उच्यते त्रयी-बाह्याधिकारत्वस्य व्यवस्थितत्वादल्पापराधत्वाच्च बाभ्रव्यादीनां साक्षादेव वैदिकधर्मान्वयेऽत्यन्तत्रयीविरुद्धाचारान्वये चानुपपन्ने सति वेदार्थव्या-

Digitized by Google

मिश्रा वैदिकार्थपरतया नातिविरुद्धं पाशुपततन्त्रं प्रणीतमित्येतावता वैषम्यमिति वेदक्रियासमायुक्तामिति निर्देशो हि वैदिकावैदिकार्थसंकरमवगमयति । ननु कथं तर्हि मोहनार्थत्वम् उच्यते मुनिभिरभ्यर्थितेन त्रयीबाह्यतानिमित्तशापाविरोधतस्त्रातुकामेन महेश्वरेणाथर्वशिरोऽभिहितं स्वोपासनतदङ्गभूतभस्मधारणादिपरं तन्त्रं प्रणीतम् अथर्वशिरश्च प्रतर्दनविद्यान्यायात् परमात्मकरुद्रोपासनपरमिति स्थितं तथा सति विपुलापराधानां तत्र श्रद्धायां सत्यामपि वेदरहस्याप्रकाशनार्थं पाशुपते रुद्रेण स्वस्य नारायणात्मकत्वं नाभिहितम्, अपि त्वर्थवादरूपेणास्य प्रकर्ष एवोक्तो बाभ्रव्यादयस्तु शापवशादव्यवधानेन श्रुतिसिद्धभगवदुपासनानर्हा अपि स्वल्पापराधितया वेदविरुद्धोक्तिमर्थवादं ज्ञात्वा ऽथर्वशिरोऽभिप्रायानुरोधेन पाशुपतावगतं रुद्रं नारायणात्मकमुपास्य निस्तीर्णाः । अन्ये तु पापप्राचुर्यादथर्वशिरोहृदयानभिज्ञतया भगवदात्मकत्वं रुद्रस्याजानन्तः पाशुपतानुप्रविष्टा अपि सम्यग्ज्ञानाभावात्तमसि भ्राम्यन्तीति तन्मोहनफलकत्वात्तेषां मोहार्थमेव चेति महेश्वरवचनं घटते । अत एव हि तत्रोच्यते स्पष्टतरं मां विष्णोर्व्यतिरिक्तं ये ब्रह्माणं च द्विजोत्तमाः । यजन्ते पापकर्माणस्ते यान्ति नरकं नराः । ये वेदमार्गनिर्मुक्तास्तेषां मोहार्थमेव च नयसिद्धान्तसंज्ञं हि मया शास्त्रं तु दर्शित"मिति च । नयसिद्धान्तशब्दश्च निश्वासाख्यपाशुपततन्त्रविषय इति दर्शितम् । एवमधिकारिभेदेन भ्रान्त्यभ्रान्तिजननाभिसन्धिमता तदर्थं पुष्कलोपदेशमकुर्वता महेश्वरेण प्रणीतत्वात्पाशुपतस्य मोहफलकत्वमनुग्रहनिबन्धनतया तन्त्रान्तरवैषम्यं च युक्तम् इतरे त्वयोऽप्यस्याधिकरणस्य पाशुपतपरीक्षार्थत्वमनभ्युपगच्छन्तो निमित्तमात्रेश्वरपक्षनिराकरणपरत्वं वर्णयन्ति तेषु परानपरांश्च प्रतिब्रूमः निमित्तमात्रेश्वरपक्षं निराचिकीर्षता न केवलमनुमानमेव किन्तु तन्मूलभूत आगमोऽपि निराकार्य्यः तत्प्रामाण्ये जीवति तस्य निरासायोगात्, एवं द्वयोरपि व्युदसनीयत्वे सत्यनुमानं शास्त्रोपक्रम एव निरसनीयं तन्निरासेन विना शास्त्रारम्भानुपपत्तेः, निमित्तमात्रेश्वरविषयागमो योगस्मृतिः पाशुपतागमश्च तत्र एतेन योगः प्रत्युक्त इत्यत्र योगस्मृतेः प्रत्युक्तत्वात्पाशुप-

तन्निरास एव परिशेषादत्र क्रियत इत्यभ्युपगन्तव्यम् एवं च सति शास्त्रोपक्रमेऽनुमानं निरस्तं न वा न चेदपेक्षिताकरणं स्यात् तत्र कृतं चेद्विहानपेक्षितकरणं स्यात् अत्रैव कृतं निमित्तेश्वरानुमाननिरसनं तत्रोपजीव्यमिति चेत्तर्हि निमित्तमात्रेश्वरागमप्रतिक्षेपस्य क्वचिदप्यकृतत्वात् पुनश्चापेक्षिताकरणं स्यात्, निमित्तमात्रेश्वरागमस्य श्रुतिविरुद्धत्वाद्विरोधाधिकरणन्यायेन तत्प्रतिक्षेपसिद्धिरिति चेत्तर्हि पञ्चरात्रस्याप्यपरीक्ष्यत्वं स्यात्, तत्रापि भवद्भिर्विरुद्धतयाऽभिमतांशस्य विरोधनयेनैव प्रतिक्षिप्तत्वात्, ततश्चोत्पत्त्यसम्भवादित्यादिसूत्रचतुष्टयवैयर्थ्यं स्यात्। तत्र विरोधसम्भवस्याविरोधनिर्वहणाशक्यतायाश्च ज्ञापनार्थं तन्निरूपणमिति चेत्तर्हि तदर्थमेव पाशुपतमपि परीक्ष्यमिति तदकरणे अपेक्षिताकरणमेव स्यात् यद्युच्येत पाशुपततन्त्रेऽप्याचारांशे वेदविरोधस्य स्फुटतरत्वात् सौगतमतादेरिव निराकरणं तुल्यन्यायतया सिद्धमिति तत्रांशे निमित्तेश्वरवादमात्रमनुमानमूलमिति तन्निरासेन पाशुपतनिरसनमेव फलतः कृतमिति नापेक्षिताकरणप्रसङ्ग इति, अस्त्वेवं तथाऽपि तत्र वेदप्रामाण्याद्यभ्युपगमेन सौगतादिवैलक्षण्यात्तत्र कार्यकारणतत्त्वविपर्यासस्यानुमाननिरसननिरस्तत्वायोगात्तन्निरासार्थमाचारांशे चोत्सर्गापवादाधिकारिविशेषादिना विषयव्यवस्थादिशङ्कापरिहारार्थं विरोधाधिकरणन्यायः स्थापनीय एव तच्चानुमाननिरासमात्राच्च सिध्यति तत्त्वानुष्ठानविपर्ययस्यानुमानमूलत्वाभावात्, अतोऽस्मन्मतेऽधिकरणस्य प्रयोजनवत्तरत्वं शास्त्रारम्भोपयोगिनोऽनुमाननिरासस्य स्थानपातित्वं चेति वैषम्यम्। ननु यादवप्रकाशमते त्वस्याधिकरणस्यानुमानमात्रनिरासपरत्वेन पाशुपतव्युदासफलकत्वाभावेऽपि नापेक्षिताकरणप्रसङ्गः चतुर्णामपि सांख्ययोगपाशुपतपञ्चरात्राणां परीक्षार्थमुत्तराधिकरणमिति व्याख्यातत्वादिति चेन्न उत्पत्त्यसम्भवादित्यादिसूत्राणां वक्ष्यमाणप्रकारेण चतुष्टयपरीक्षार्थत्वानुपपत्तेः,। ननु भवन्मतेऽप्यनुमानं पूर्वमेव निरस्तं चेदधिष्ठानानुपपत्तेरित्यादिसूत्रत्रयप्रणयनमनपेक्षितकरणं स्यान्न प्रयोजनभेदात्, तत्र शास्त्रस्य प्राप्तार्थत्वबाधितविषयत्वाभ्यामप्रामाण्यप्रसङ्गपरिहारार्थस्तन्निरासः। इह तु श्रुतिविरुद्धा-

गप्रामाण्यभङ्गार्थः । अनुमानतः सर्वज्ञे जगत्कारणे सिद्धे हि तद्विषया श्रुतिः प्राप्तार्था स्यात्, तदनुवादस्यानुमानमूलतया तद्विरुद्धाकारसमर्पिका श्रुतिः प्रतिरुद्धा बाधिता वा स्यान्नन्वेवं सति पूर्वोक्तमनुमानदूषणमिह तदुक्तमित्यतिदेष्टव्यम् उक्तार्थस्यान्यत्रोपजीव्यत्वेऽतिदेशदर्शनात् यथाऽल्पश्रुतेरिति चेत्तदुक्तं जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातमिति पूर्वभागविचारसिद्धन्यायो विप्रकृष्टोऽपि प्रधानवदेव तदुक्तमित्यादिनाऽतिदिश्यते किं पुनः सन्निकृष्टे शारीरकस्यैवारम्भेऽभिहितः । अतोऽधिष्ठानानुपपत्त्यादिसूत्रत्रयवैयर्थ्यमिति चेन्न कण्ठोक्तत्वाभावे दूषणस्यातिदेशाप्राप्तेः, वक्ष्यमाणदूषणानामुपजीव्यत्वमभिप्रेत्य शास्त्रैकप्रमाणकत्वं हि सूचितं न तु दूषणानां कण्ठोक्तिः, भाष्ये च वक्ष्यमाणं दूषणमनुकृष्य व्याख्यातम् अभौतिकत्वपरिहारादयश्च न निवार्यत्वादित्यादिभिः कण्ठोक्तत्वादुत्तरत्रातिदिष्टाः तत्र वक्तुमपेक्षितानामपि दूषणानां वक्ष्यमाणत्वबुद्ध्यैव पूर्वं कण्ठोक्त्यभावः, अत एवातिदेशाभाव उपपन्नः, यतो निमित्तमात्रकल्पनायाः तन्मते चोभयोः प्रतिक्षेप्यत्वम्, अत एव सूत्रयोजनायां च नैकस्मिन्निति सूत्रादनुषक्तस्य न-शब्दस्य निषेधस्याहर्तव्ये सति पत्युर्मतमादरणीयमित्याध्याहार उचितः । न तु प्रधानपुरुषाधिष्ठातृत्वेन कारणत्वमुपपद्यत इति वा कर्त्तुः कल्पनेति वा परिग्रह इति वा तथा सत्युभयोः प्रतिक्षेप्यत्वासिद्धेः, अन्तवत्त्वमसर्वज्ञता वेति सूत्रस्य परैरपरैश्चैवमर्थ उक्तः प्रधानपुरुषेश्वराः सर्वज्ञेनेश्वरेण इयत्तया परिच्छिन्नाश्चेदन्तवन्तः स्युः ततश्च शून्यवादप्रसङ्गः सर्वेषां संसारिणां क्रमेण मोक्षादन्तवत्त्वे पुरुषभोगार्थं प्रधानस्येश्वराधिष्ठेयत्वाभावादीश्वरस्य सार्वज्ञ्यमैश्वर्यं च निर्विषयतयाऽनुपपन्ने स्यातां, यदि नेश्वरज्ञानेन प्रधानादयः परिच्छिन्नास्तस्य सार्वज्ञ्यहानिरिति तदयुक्तं, तथा हि न तावच्छून्यवादप्रसङ्गः प्रधानादीनामन्तवत्त्वप्रसङ्गाभावात् अन्तवत्त्वस्य प्रसञ्जकः किं देशतः परिच्छेदः ? उत कालतः ? उत संख्यातः ? न प्रथमः, आराग्रमात्रो ह्यवरोऽपि दृष्टः, नित्यो नित्यानां न जायते म्रियत इत्यणूनामेव नित्यत्वश्रवणेन भगवद्व्याप्रिकत्वात्सांख्यादीनां पक्षे प्रधानस्य पुरुषाणां च कस्यचिदपि पक्षे ईश्वरस्य देशतः

॥ श्रीः ॥

श्रियै नमः ।

श्रीपतये नमः ।

श्रीमते रामानुजाय नमः ।

नमोनमो यामुनाय यामुनाय नमोनमः ।
नमोनमो यामुनाय यामुनाय नमोनमः ।



यस्मिंश्चिरन्तनगिरामिह तत्परत्व-
तत्तत्प्रलम्भनविमूर्छितशोकहानम् ।
आयत्तमस्ति भववारिधिपोतपादो
रामानुजार्यमुनिरेष जयत्यजस्रम् ॥

Digitized by Google

Digitized by Google

श्रियै नमः

श्रीपतये नमः ।

पूर्वाचार्येभ्योनमः ।

नमो वेदान्तविशदीकरणदीक्षाय परमगुरवे बोधायनमहर्षये ॥

श्रीमते रामानुजाय नमः ।

भगवद्भाष्यकारेण कृतोवेदार्थसंग्रहः । **वेदार्थसङ्ग्रहः ।** तात्पर्यदीपिकायुक्तो जीयात्सुमनसां मुदे ॥

—⋙⋘—

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ॥ १ ॥

श्रीमते रामानुजाय नमः । श्रीमते हयग्रीवाय नमः ।
श्रीश्रीनिवासमहागुरवे नमः । पूर्वाचार्येभ्यो नमः ।

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ॥ १ ॥

कृत्वा ऽनवद्यं निगमान्तभाष्यं निराकृतं येन भयं श्रुतीनाम् ।
प्रतारितानामबहुश्रुतैस्तं रामानुजं योगिनमाश्रयामः ॥ २ ॥

श्रीभाष्यकृदुपन्यस्तोयः श्रीशैलपतेः पुरः ।
वेदार्थसंग्रहस्यास्य कुर्मस्तात्पर्यदीपिकाम् ॥ ३ ॥

अशेषेत्यादिश्लोकद्वयेन प्रारिप्सितप्रकरण*विघ्नपरिसमाप्त्यर्थं श्रोतॄणां तत्प्रसिद्ध्यर्थं च स्मृत्याचारप्राप्तं श्रुत्या मङ्गलमाचरति श्रोतृबुद्धिसमाधानार्थमार्थः† प्रतिपाद्यसंक्षेपश्च क्रियते तत्रेष्टदेवतोपासनारूपम-

---

* शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥
इति पराशरोपपुराणोक्तलक्षणलक्षितः सन्दर्भविशेषः प्रकरणपदेनेह विवक्ष्यते ॥

† समाधानार्थमादौ इति पा॰ ।

ङ्गलाचारः स्वपक्षस्थापनरूपः प्रतिपाद्यसंक्षेपश्च श्रौत आर्थश्च क्रियते प्रथमश्लोकेन, स्वपक्षे च प्रतिपाद्यमुपायोपेयात्मकं तत्र सिद्धवस्तुस्वरूपमुपेयं चतुर्थ्यन्तैः पदैरुच्यते, नमः शब्देनोपायः सूच्यते तत्रोपेयस्य ब्रह्मण उभयविभूतिवैशिष्ट्यं पूर्वार्द्धेनोच्यते निर्मलेत्यादिपदेनोभयलिङ्गत्वमुच्यते तत्र विप्रतिपत्तिविषयस्य तत्त्वमसीति* वाक्यस्यार्थनिष्कर्षणमुखेन लीलाविभूतिविशिष्टत्वमुच्यते, अशेषचिदचिद्वस्तुशेषिणे इति प्रथमपदेन जगद्ब्रह्मणोः सामानाधिकरण्यं शरीरशरीरिभावनिबन्धनं, शरीरत्वं च चेतनं प्रत्यनन्यार्हशेषत्वम्, एवं सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वे सति हि भेदश्रुतिभिर्घटकश्रुतिभिश्चास्य वाक्यस्याविरोधः । अशेषपदं चेतनबहुत्वं दर्शयति कतिपयचेतननियन्तृताव्यावृत्तिश्चानेन सिद्ध्यति, वस्तु–शब्देन परमार्थत्वं विवक्षितम्, अशेषवस्तुशेषिण इत्येतावताऽलं किमर्थं चिदचिच्छब्दप्रयोग इति चेदुच्यते यादवप्रकाशमते सर्वमपि चेतनमेव तत्र घटादेश्चैतन्यानभिव्यक्तिमात्रमेवेति न चिदचिद्विभाग इति तद्व्यावृत्तिश्चिदचिच्छब्दाभ्यां । किञ्च मायिमते जीवब्रह्मणोस्सामानाधिकरण्यं स्वरूपैक्यनिबन्धनम्, अचिद्ब्रह्मणोस्तु बाधार्थमिति सामानाधिकरण्यस्य नैकरूपोऽर्थ इति तद्व्यावृत्तिश्चाभिप्रेता । किञ्च भास्करमते जीवब्रह्मणोर्भेदश्रुतय औपाधिकभेदविषयाः, अचिद्ब्रह्मणोर्भेदश्रुतयः स्वाभाविकभेदविषया इति भेदश्रुत्यर्थो नैकरूपोऽभ्युपगत इति तद्व्यावृत्तिश्चाभिप्रेता ॥

निःशेष इति वक्तव्ये अकारस्य मङ्गलार्थत्वादशेषेत्युक्तम्, एवं लीलाविभूतिविशिष्टत्वमुक्तं भवति, नित्यविभूतियोगमाह शेषशायिन इति, शेषशब्दः पत्नीपरिजनादेः प्रदर्शनार्थः ताच्छील्यार्थप्रत्ययान्तत्वात् भोगविभूतिसंबन्धस्य स्वाभाविकतया नित्यत्वमभिप्रेतम् । एवमुभयविभूतिविशिष्टत्वमुक्तम् । अथोभयलिङ्गत्वमाह निर्मलानन्तकल्याणनिधय इति, निर्मलश्चानन्तश्च कल्याणनिधिश्चेति निर्मलानन्तकल्याणनिधिः† निर्गुणं निरञ्जनं । निरवद्यम् अपहत‡ पाप्मा । समस्तहेयरहितं विष्ण्व§ वाख्यं परमं

* तत्त्वमस्यादिवाक्यस्येति पा· ।
† आत्मा· उ· २ ।
‡ वृह· उ· । ६२ । २१ ।
§ वि· पु· १ । २२ । ५३ ।

पदम् इत्यादिषु ब्रह्मविशेषणत्वेन निर्दोषत्वादिवाचिपदानां प्रयोगात् नैर्मल्यं हेयप्रत्यनीकत्वं निर्मलत्वमनुकूलत्वं च परिच्छिन्नेषु केषुचित्प्राकृतवस्तुष्वप्यस्तीति तद्व्यावृत्त्यर्थं सकलेतर*परित्यागपूर्व्वकप्राप्यत्वादिसिद्ध्यर्थं तदुपयोग्यानन्त्यमाह अनन्तशब्देन, अनेन वाङ्मनसनिवृत्तिरूपार्थगुणनिषेधपरिहारश्चाभिप्रेतः ॥

कल्याणशब्दोऽनुकूलवाचित्वादत्रानन्दाभिधायी, न हि प्रतिकूलोपेत्येषु कल्याणशब्दप्रयोगः। यद्वा अनुकूलवेदनीयत्वात्सर्वे गुणाः कल्याणशब्दवाच्याः निर्मलकल्याणशब्दाभ्यां सामान्यविशेषाभ्यां गोबलीवर्दन्यायेऽभिप्रेतः निधिशब्देन गुणगुणिभावो विवक्षितः, अनेना†नन्दो ब्रह्मेत्यादिष्वानन्दशब्दस्यानन्दिवाचित्वं सिद्धमित्यभिप्रेतम्। आनं‡न्दं ब्रह्मणो विद्वानिति व्यतिरेकनिर्देशात्, एवं हेयप्रत्यनीकत्वकल्याणगुणाकरत्वरूपोभयलिङ्गत्वं ब्रह्मण उक्तं, विष्णुशब्दो धर्मिनिर्देशकः अनेन शेषित्वमन्तर्यामित्वपर्यन्तमिति स्फोरितं रुद्रा देवताविशेषनिर्णयश्च। एवं चतुर्थ्यन्तैः पदैरुपेयवस्तु निरूपितम्। अथोपायं सूचयति नम इति मन्मना§ भव मद्भक्तो मद्याजी मां नमस्कुर्वित्यत्र मद्भक्तशब्दस्य प्रतिपदमन्वयेन नमस्याया भक्त्यन्तर्भावात् ध्यानार्चनप्रणामादिरिति हि वक्ष्यते। एवं देवतोपासनरूपमङ्गलाचारः श्रौतः कृतः प्रतिपाद्यस्वपक्षस्थापनसंक्षेपश्चार्थतः कृतः ॥ १ ॥

परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति
तत्परोपाध्यालीढं विवशमशुभस्यास्पदमिति।
श्रुतिन्यायापेतं जगति विततं मोहनमिदन्तमो
येनापास्तं स हि विजयते यामुनमुनिः ॥ २ ॥

अथ द्वितीयेन गुरूपासनरूपमङ्गलाचारः श्रौतः क्रियते, आर्थः प्रतिपाद्ये परपक्षनिरासस्संक्षेपश्च क्रियते, तत्र पूर्व्वार्द्धेन परपक्षोपन्याससंक्षेपः उत्तरार्द्धेन तन्निरासस्संक्षेपः परं ब्रह्मैवेत्यादि, परं हेयप्रत्यनीकत्वकल्याण-

* सकलचेतनाचेतनेति पा०। † तै० उ० भृ० ६२।
‡ तै० उ० आन० ४६। § अ० १८। ६५।

गुणाकरत्वाभ्यां सर्वविलक्षणम् एवकारोविरोधं स्फोरयति संश्रितदुरिताप-हरत्वेन तदिष्टफलप्रदत्वेन च यदाश्रयणीयं तदेवाज्ञानपरवशं चेत्को-ऽन्यो रक्षक इति भावः । अज्ञम्–अविद्यातिरोहितस्वरूपम्, अत एव भ्रम-परिगतं–विविधभेददर्शनशालि, संसरति–भेददर्शनकृतजन्मजरामरणादि-सांसारिकदुःखभागीत्यर्थः एवं शङ्करमतमुपन्यस्तम् । अथ भास्करमतमुप-न्यस्यते तत्परोपाध्यालीढमिति, परशब्देनोपाध्यन्तरनिरपेक्षं स्वत एव प्रस्तुतब्रह्मव्यतिरिक्तत्वमुच्यते पराभ्युपगतमिथ्याभूताविद्यान्यत्वं च विव-क्षितम्, आलीढं–संबद्धं, विवशं–कर्म्मपरवशम् । अथ यादवप्रकाशमतम् अशुभस्यास्पदमिति, अचिद्गतपरिणामार्हतारूपाशुभस्य चिद्ग*तापुरुषार्था-न्वयरूपाशुभस्य चास्पदमित्यर्थः । जीवब्रह्मणोर्भेदस्य स्वाभाविकत्वाभ्यु-पगमान्न ब्रह्मण्यपुरुषार्थान्वय इति वैषम्यं दुर्वचम् अभेदस्यापि स्वाभावि-कत्वाभ्युपगमेनापुरुषार्थान्वयादिति भावः । अचिद्ब्रह्मणोर्भेदाभेदौ स्वाभा-विकौ चिद्ब्रह्मणोस्त्वभेद एव स्वाभाविकः भेदस्त्वौपाधिकः मुक्तावभेद-वचनादिति भास्करमतं चिद्ब्रह्मणोरपि भेदाभेदौ स्वाभाविकौ मुक्तौ भेदस्यापि निर्देशादिति यादवप्रकाशमतं तस्मादुक्त एवार्थः, तत्राशु-भस्यास्पदमिति न यादवप्रकाशमतोपन्यासः । परं ब्रह्मेत्यादिपदेन शङ्क-रमतोपन्यासः तत्परोपाध्यालीढमित्यादिपदेन भास्करमतोपन्यासः, इत-रदर्थसिद्धमिति केचित् । तदानीमशुभस्यास्पदमित्यचिद्गताशुभास्पदत्व-मुच्यते । ततोऽपि पक्षत्रयोपन्यासः इति निर्वाहो वरं कस्यचिन्मतस्या-र्थसिद्धत्वादप्यवान्तरविभागस्य कल्प्यत्वोपपत्तेः । इति–शब्दः पक्षत्रयस्व-रूपपरः । अथ तन्निराससंक्षेपः–

श्रुतिन्यायापेतमिति श्रुतिः–प्रमाणं, तदनुग्राहकस्तर्कोन्यायः तन्म-तसाधकं तर्कानुगृहीतं प्रमाणं नास्तीत्यर्थः । यद्वा श्रुतिन्यायापेतं तन्मतं प्रमाणतर्कविरुद्धं बाधकतर्कानुगृहीतं प्रमाणमस्तीति भावः । तन्निरासे किङ्कारणमित्यत्राह जगति विततमिति श्रुतिन्यायापेतमिति प्रसिद्धत्वान्न तन्निरासे यत्नः कार्य इति चेत्तत्राह मोहनमिदं तम इति, तमोयथार्थ-ज्ञानावरणं, मोहनम् अपर†मार्थे सम्यगर्थधीहेतुः अपास्तं दूरत उत्सा-

* चिद्गतापुरुषार्थयोग्यतारूपाशुभस्येति पा० । † अपार्थे इति पा० ।

Digitized by Google

रितमित्यर्थः परमतनिरासः । स हीत्यादिना गुरूपासनमुक्तं जयत्यतिबलो*राम इतिवत् स हि विजयत इत्युक्तम् । अनेन प्राकरणिकार्थस्य साम्प्रदायिकत्वमुक्तं भवति । एवमार्थे स्वपक्षस्थापनं परपक्षप्रतिक्षेपसंक्षेपं कुर्वता देवतागुरूपासनरूपोभयविधं मङ्गलं श्रौतमाचरितं भवति तथा पूर्व्वैरनुष्ठितं नमस्कृत्य† हृषीकेशं नमो भगवते‡ तस्मै व्यासायेत्यादिषु तथा च श्रुतिः यस्य देव §इत्यादि । अथ प्रथमश्लोकार्थमीषद्विस्तरेण वदन् प्राकरणिकमर्थं सप्रमाणकं प्रतिजानीते अशेषजगदित्यादिना ॥ २ ॥

स्वपक्षसंक्षेपः । **अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोऽयमर्थः । जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्म्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थप्रियस्तत्प्राप्तिफलः ॥**

श्रूयते नित्यमिति व्युत्पत्तिसिद्धेन श्रुतिशब्देन वेदस्यापौरुषेयत्वानित्यनिर्दोषत्वमभिप्रेतं, निकर-शब्देनाभिधीयमानकृत्स्नशाखार्थपर्यालोचनं विवक्षितं, तत्राप्यनन्यपरपरभागसिद्ध इति दर्शयितुं शिरः शब्दः । वक्ष्यमाणाभिप्रायेणायमर्थ इत्युक्तं, समधिगतः-सम्यगधिगतः अनधीतशाखान्तरार्थप्रतिपादकेतिहासपुराणादिभिस्सहाधिगत इत्यर्थः । जगतो मिथ्यात्वान्न भवदभिमतोपायोपेयपराः श्रुतयः अपि तु निर्विशेषवस्तुज्ञानस्यैव मोक्षोपायत्वप्रतिपादनपरा इति शङ्कां व्युदस्यति अशेषजगद्धितानुशासनेति, जगद्धितानुशासनेति जगद्धितज्ञापनप्रवृत्तस्य वेदस्य पूर्वमेव भ्रान्ते जगति प्रत्यक्षाद्यनवगतप्रमान्तरोत्पादकत्वमनुपपन्नमित्यभिप्रायः । हितमुपायोपेयात्मकम् अनुशासनं विविच्य ज्ञापनम् अनुपूर्वः शासिर्विविच्य ज्ञापनार्थो दृष्ट इति हि शाब्दाः अशेषजगच्छब्देन सर्वाधिकारिण उच्यन्ते । हितानुशासनपरो वेदः कथं स्वर्गाद्यपुरुषार्थं पुरुषार्थं बोधयतीति चेत् तत्तदधिकारिविशेषापेक्षया पुरुषार्थत्वमस्तीति तद्बोधनं । तर्हि श्येनेना||भिचरन् यजेतेति कथं

* रामा· सु· स· ४२ । ३३ । † भार· १ । १ । २६ ।
‡ भार· १ । १ । ३ । § श्वेता· उ· ५ । ३३ ४ ।
|| छा· ३ । ६ । ६ ।

Digitized by Google

पापतममत्यन्ताहितं कर्म्म विदधातीति चेत् उच्यते तच्च भक्त्यविशेषैर्बालानिव शठान् वशीकर्त्तुं । यद्वा देवब्राह्मणहिंसकादिदुष्टनिग्रहार्थत्वेन तस्य हिततमत्वमिति । यद्वा अभिचारादिकर्म्माराध्यत्वतत्तत्फलप्रदत्वरूपभगवदैश्वर्यविशेषज्ञापनेन तदभिधायिशास्त्रस्य हितपरत्वमिति प्रथमश्लोके उपायस्यातिसंक्षेपेण सूचितत्वात्तं विस्तरेण वदन् प्रतिज्ञातस्यार्थस्य शरीरमाह जीवेत्यादिना, यद्वा याथात्म्यशब्देन तत्त्वमसीति वाक्ये त्वम्पदस्य चेतनद्वयगर्भत्वं सूचितम् । ऐतदात्म्यमिदं सर्वं तत्सत्यमिति परमात्मात्मकत्वं सत्यमुक्तं तस्माद्याथात्म्यशब्दस्यायमेवाभिप्रायः ज्ञानपूर्वकशब्देन वाक्यार्थज्ञानमात्रस्यानुपायत्वं सूचितं वर्णाश्रमधर्म्मेतिकर्त्तव्यताकशब्देन कर्म्मणो विविदिषासाधनत्वं समुच्चयवादश्च व्यावर्तितौ । परमपुरुषपदेन ध्येयस्य हेयप्रत्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणत्वं देवताविशेषत्वं चोक्तं तमेवं विद्वान् नान्यः पन्था इति श्रीपुरुषसूक्तानुरोधात् चरणयुगलशब्देन स्वामिनि दास्यानुगुणा स्थितिर्दर्शिता सर्वदा चरणद्वन्द्वं व्रजामीत्यादिवचनानुगुण्यात् ध्यानार्चनप्रणामादिरित्यत्रादि-शब्देन सततङ्कीर्तयन्तोमामित्याद्युक्तकीर्तनयतनादयो विवक्षिताः ध्यानार्चनप्रणामादयः सर्वे उपासनशरीरान्तर्गताः वर्णाश्रमधर्माः प्रयाजादिस्थानीयाः आग्नेयादिषट्कस्थाने ध्यानार्चनप्रणामादिः । ध्यानं मानसं नामसङ्कीर्तनं वाचिकम् । अर्चनादि कायिकं च कर्म्म यद्यपि तत्र ध्यानस्य प्राधान्यमितरापेक्षया तथाऽपि तद्विपाकरूपपरमभक्त्यपेक्षयाऽर्चनादितुल्यव्यवहारः एवं त्रिविधमुपासनं यथा मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु सततं कीर्तयन्तो मां यजन्तश्च दृढव्रताः श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणेत्यादि मद्याजी मदर्चनपरः वेदनध्यानादिशब्दैरन्यतमोक्तावप्यर्चनप्रणामादिसहितध्यानस्योपायत्वं न्यायस्मृत्यनुगृहीतश्रुतिसिद्धं तत्र सामान्यविशेषन्यायाद्वेदनादिशब्दानां ध्यानादिपरत्वसिद्धिवत् स्मृत्यनुगृहीतत्वात् अर्चनप्रणामादिसहितध्यानपरत्वसिद्धिरित्यर्थः । तस्माद् ध्यानार्चनप्रणामादिः सर्वोऽप्युपेयविरोधिनिरासकः । अत्यर्थप्रिय इति

ध्यानार्चनप्रणामादिः सर्वोऽपि अत्यर्थप्रीतिपूर्वकः कार्यः, मन्मना भवेत्यादिवचने मद्भक्तोमन्मना भव मद्भक्तोमद्याजी भवेति प्रतिपदं मद्भक्तपदान्वयादिति भावः । एवं प्रथमश्लोकसंक्षिप्तमुपायस्वरूपं विस्तृतम् ॥

अस्य जीवात्मनोऽनाद्यविद्यासंचितपुण्यपापरूपकर्म्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्तदात्माऽभिमानजनितावर्जनीयभवभयविध्वंसनाय देहातिरिक्तात्मस्वरूप–तत्स्वभाव–तदन्तर्यामिपरमात्मस्वरूप–तत्स्वभाव–तदुपासन–तत्फलभूतात्मस्वरूपाविर्भावपूर्व्वकानवधिकातिशयानन्दब्रह्मानुभवज्ञापने प्रवृत्तं हि वेदान्तवाक्यजातम् ।

उपेयमाह तत्प्राप्तिफल इति, अयमर्थ इत्यर्थ–शब्दस्य विशेषणत्वात्पुँल्लिङ्गता पूर्वमुपायस्यातिसंक्षिप्तत्वेन तद्विवरणपरत्वादस्मिन् ग्रन्थे उपायप्रधाननिर्द्देशः । उपेयं निर्विशेषज्ञप्तिमात्रं निवर्त्यं मिथ्यारूपमविद्यादिकम् । उपायो वाक्यार्थज्ञानमात्रं, न हि मिथ्यासर्पो गरुडध्याननिवर्त्यः अपि तु नायं सर्प इति ज्ञानमात्रनिवर्त्यस्तस्मात्र भवदुक्तस्योपायतेत्यत्राह अस्येति, परमात्मैक्यानुपपत्तये तद्विरुद्धस्वभावतया प्रत्यक्षसिद्धत्वमुच्यते अस्येति पदेन, अनादिशब्देनान्योन्याश्रयः परिहृतः, श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन । अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिरित्युक्तप्रकाराऽत्राविद्याऽभिप्रेता तया सञ्चितम् अविद्यासञ्चितं अविद्यासञ्चितं कर्म्मेति हि स्मृतिः उत्क्षेपणादिव्यावृत्त्यर्थं पुण्यपापशब्दः कथं पुण्यस्याविद्यासञ्चितत्वं तद्धि देहाद्यतिरिक्तात्मज्ञानवताऽनुष्ठीयते उच्यते यथाऽऽत्मनोदेहादिविलक्षणत्वाद्देहात्मज्ञानमविद्या तद्धता च पापं क्रियते एवमात्मनो भगवच्छेषत्वात्स्वतन्त्रात्मज्ञानमप्यविद्या तन्मूलं स्वर्गादिफलदकर्म्मानुष्ठानमिति पुण्यस्याविद्यासञ्चितत्वोपपत्तिरिति देहात्माभिमानिभिरजडत्वादिधर्म्मके आत्मनि जडत्वाध्यारोपवद् भगवदात्मक आत्मनि

Digitized by Google

स्वनिष्ठत्वारोपणं भ्रान्तिरेवेति अविद्यैव हि सा एवंविधकर्म्मप्रवाहहेतुक-श्चतुर्विधदेहप्रवेशः तत्कृतस्तत्तद्देहेष्वात्माभिमानः अनात्मन्यस्वे चात्मा-त्मीयधिया कर्म्म कर्म्मणा शरीरप्रवेशः तच्छरीरसम्बन्धेनाविद्येति प्रवाहो-ऽनादिः तेनावर्जनीयं भवभयं जन्मजरामरणादिभयं मिथ्येति सहस्रकृत्व-उद्घोषेणापि निवर्तयितुमशक्यमित्यभिप्रायेणावर्जनीयमित्युक्तम्, तद्विध्वं-सनायेति एवं निवर्त्यमुक्तम्, अत्र जन्यजनकभावोपपादनेन प्रतीतिमात्रसि-द्धत्वाभावाददृष्टद्वारा निवर्त्त्यमिति सिद्धं । देहातिरिक्तात्मस्वरूपतत्स्वभा-वेति स्वरूपं ज्ञानानन्दैकलक्षणं स्वभावो भगवच्छेषत्वम् उपासकत्वानुगुणौ स्वरूपस्वभावौ जीवस्योक्तौ । तदन्तर्यामिपरमात्मस्वरूपतत्स्वभावेति, तद-न्तर्यामि–शब्देन जीवस्य परमात्मपर्यन्तत्वेन तद्वाचिशब्दस्य परमात्मपर्य-न्तत्वमिति सिद्धं परमात्मस्वरूपम्–ईशितृत्वं स्वभावः–प्रणतसौलभ्यम् उ-पास्यत्वानुगुणौ स्वरूपस्वभावावीश्वरस्योक्तौ एवं सिद्धं रूपमुपेयमुक्तम् । तदु-पासनशब्देनोपाय उक्तः । स पूर्वं विस्तृत इति नात्र विस्तृत उपेयस्य प्राप्ति-प्रकार उच्यते तत्फलभूतेत्यादिना, ज्ञापन इति ज्ञापन–शब्देन पूर्वोक्तानुशा-सनशब्दस्य स्पष्टार्थः वेदान्तवाक्यजातशब्देनैकवाक्यमात्रपर्यालोचनं व्या-वृत्तं, ब्रह्मानुभवज्ञापन इति निर्देशेन वेदान्तवाक्यानामुपासनारूपकार्यप्र-धानत्वशङ्का व्यावृत्ता ।

तत्त्व*मसि । अय†मात्मा ब्रह्म । य आत्मनि तिष्ठ-न्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आ-त्मानमन्तरो यमयति स त‡आत्मान्तर्याम्यमृतः । एष सर्वभूतान्तरात्माऽपहृ§तपाप्मा दिव्यो देव एको नारा-यणः । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति य-ज्ञेन दानेन तप॥साऽनाशकेन । ब्रह्मविदाप्नोति¶ परम् ।

* छा॰ उ॰ ६ । ८ । ७ ।
† बृ॰ उ॰ ६ । ४ । ५ ।
‡ भा॰ ३२६ । माध्य॰ बृ॰ उ॰ ५ । ७ ।
§ सु॰ उ॰ ७ ।
॥ बृ॰ उ॰ ६ । ४ । २२ ।
¶ तै॰ उ॰ आना ।

तमेवं विद्वानमृत* इह भवति नान्यः पन्था अयनाय विद्यत इत्यादिकम् ।

उक्तार्थविषयाणि तानि वाक्यान्याह तत्त्वमसीति, षड्विधतात्पर्यलिङ्गोपेतत्वात् तत्प्रथममुक्तम् । तत्र जीवविशेषस्य ब्रह्मतादात्म्यं प्रतिपन्नमिति जीवमात्रस्य ब्रह्मात्मकत्वपरं वाक्यमाह अयमात्मा ब्रह्मेति, । अथ घटकश्रुतिमाह य आत्मनीति, देवताविशेषनिर्णयार्थमाह एष इति, उपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वे प्रमाणमाह तमेतमिति, उपासमेवोपाय इत्यत्र प्रमाणमाह ब्रह्मविदिति, ब्रह्मवित्–परमपुरुषोपासकः । उपायान्तरनिषेधमाह तमेवमिति, आदि–शब्देनोपासनशब्दान्वितवाक्यानि भेदश्रुतयश्च विवक्षिताः । एषु वाक्येषु जीवपरयोः स्वरूपं कथं प्रतिपन्नमित्याकाङ्क्षायामुपबृंहणानुगृहीतश्रुतिप्रतिपन्नं तयोः स्वरूपं विवृण्वन् प्रथमं जीवस्वरूपमाह–

जीवात्मनः स्वरूपं देवमनुष्यादिप्रकृतिपरिणामविशेषरूपनानाविधभेदरहितं ज्ञानानन्दैकगुणं तस्यैतस्य कर्म्मकृतदेवादिभेदे† विध्वस्ते स्वरूपभेदो वाचामगोचरः स्वसंवेद्यः ज्ञानस्वरूपमित्येतावदेव निर्देश्यम् । तच्च सर्वेषामात्मनां समानम् ।

जीवात्मेति, तथात्मा प्रकृतेस्सङ्गादहं मानादिदूषितः । भजते प्राकृतान्धर्मानन्यस्तेभ्योऽपि सो ऽव्ययः ॥ पुमान्न देवो न नरो न पशुर्न च पादपः । शरीराकृतिभेदास्तु भूपैते कर्मयोनय इत्यादिषु प्रकृतिसङ्गाद्देवादिशरीरसङ्गादप्यनेकरूपत्वदर्शनात् तदुभयवाक्यैककण्ठ्यं दर्शयन्नाह देवमनुष्यादिप्रकृतिपरिणामविशेषरूपेति, प्रकृतिपरिणामनिबन्धनो विशेषः प्रकृतिपरिणामविशेषरूपः तद्रूपः नानाविध–शब्देन बाह्यो देवमनुष्यादिष्ववान्तरभेदः आन्तरः सुखित्वदुःखित्वाद्यवान्तरभेदश्च विवक्षितः

* पु॰ सू॰ ७ । † भेदेऽपध्वस्ते इति पा॰ ।

Digitized by Google

ज्ञानानन्दैकगुणमित्यनेन निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः दुःखाज्ञानमला धर्म्माः प्रकृते*स्ते न चात्मन॥ इत्यस्यार्थो ऽभिप्रेतः ज्ञानानन्दविशेषगुणकं ज्ञानत्वानन्दत्वादिगुणकं वा न तु ज्ञानमात्रस्वरूपं ।न नु कथं देवादिभेदराहित्यं प्रत्यक्षानुमानागमैः तथाहि प्रतिपत्तिरिति शङ्कायां प्रत्यक्षादीनि शरीरविसृष्टात्मविषयाणि निष्कृष्टात्मविषयवाक्यानि तु भेदराहित्यं वदन्तीत्यादि वदन्नभेदशङ्कां च परिहरति तस्यैतस्येति, अत्राद्वैतभ्रमास्पदानि कानिचिद्वचांसि व्याख्यातानि भवन्ति तस्येति ज्ञानानन्दैकस्वरूपत्वं विविचितम् एतस्येति शरीरसंबन्धोऽभिप्रेतः कर्म्मकृतदेवादिभेदे विध्वस्त इत्यनेन एकस्वरूपभेदो हि बाह्यकर्मावृतिप्रजः। देवादिभेदे विध्वस्ते नास्त्येवावरणो हि स॥ इत्यस्यार्थो विवृतो भवति। स्वरूपभेदो वाचामगोचरः स्वसंवेद्य इत्यनेन प्रत्यस्तमितभेदमित्यादिवचनं व्याख्यातं भवति एकस्वरूपेति ग्रन्थस्यायमर्थः ज्ञानानन्दैकस्वरूपस्यात्मनो बुद्धिसुखाद्यान्तरभेदः संसारहेतुकर्म्मजन्यशरीराख्यावरणहेतुकः देवादिशरीरभेदे विनष्टे सति नात्मनो भेद आवरणो हि सः। स हि देवादिशरीरभेद आवरणः तस्मात्तन्नाशे तत्कृतभेदो नात्मनि विद्यत इत्यर्थः नात्मनावरण इति पाठान्तरेऽर्थः स्पष्टः प्रत्यस्तमितेत्यादिग्रन्थस्यायमेवार्थः प्रत्यस्तमितदेवमनुष्यादिभेदं सत्तामात्रं न तु जन्मादिविकारास्पदम् अत एवागोचरं वचसां देवादिभेदवचसां जायत इत्यादिवचसाम् अगोचरं तुच्छत्वव्यावृत्त्यर्थमाहात्मसंवेद्यमिति, तच्च स्वरूपतो धर्म्मतश्च ज्ञानं तच्च ब्रह्मशब्दाभिलप्यमित्यर्थः संसारदशायां योव्यवहारः तदगोचरं चेत् जानामीत्यपि तदानीं व्यवहारात् ज्ञानस्वरूपमित्यपि न वक्तुं शक्यं यदि शक्यं तर्हि देवादिव्यवहारश्च शक्य इत्यत्राह ज्ञानस्वरूपमित्येतावदेव निर्देश्यमिति, न ह्यौपाधिकाकारभेदे विध्वस्ते तद्वाचिशब्दागोचरत्वमिव स्वाभाविकरूपवाचिशब्दागोचरत्वमित्यर्थः सर्वशब्दागोचरं चेद्वचसामगोचरमित्यपि न शक्यते वक्तुमिति भावः। तच्च सर्वेषामात्मनां

* प्रकृतेस्ते तु नात्मन इति पा०।

समानमित्यनेन पुमानेको व्यवस्थित इत्यादिष्वेकशब्दो व्याख्यातो भवति तन्मनस्समतालम्बिकार्थे साम्यं हि मुक्तये निर्दोषं हि समं ब्रह्मेत्यादिवचनात् ॥

एवंविधचिदचिदात्मकप्रपञ्चस्योद्भवस्थितिप्रलयसंसारनिवर्त्तनैकहेतुभूतः समस्तहेयप्रत्यनीकतयाऽनन्तकल्याणैकतानतया च स्वेतरसमस्तवस्तुविलक्षणस्वरूपोऽनवधिकातिशयासंख्येयकल्याणगुणगणः सर्वात्मपरब्रह्मपरज्योतिःपरतत्त्वपरमात्मसदादिशब्दभेदैर्निखिलवेदान्तवेद्यो भगवान्नारायणः पुरुषोत्तम इत्यन्तर्यामिस्वरूपम् । अ*स्यैव च वैभवप्रतिपादनपराः श्रुतयः । स्वेतरसमस्तचिदचिद्वस्तुजातान्तरात्मतया निखिलनियमनं तच्छक्ति–तदंश–तद्विभूति–तद्रूप–तच्छरीर–तत्तनुप्रभृतिभिः शब्दैस्तत्सामानाधिकरण्येन च प्रतिपादयन्ति ।

अथान्तर्यामिस्वरूपमाह एवंविधेति, जीवस्वरूपस्य देवादिशरीरस्य च प्रस्तुतत्वादेवं विधेत्युक्तम् । यद्वा प्रत्यक्षादिप्रमाणप्रसिद्धतयोक्तम् उद्भवेत्यादिना जगत्कारणत्वमोक्षप्रदत्वे उक्ते, स्वेतरवैलक्षण्यं तृणादेरप्यस्तीति तद्व्यावृत्त्यर्थं शोधकवाक्योक्तोभयलिङ्गत्वेन वैलक्षण्यमुच्यते समस्तेत्यादिना, कल्याणशब्द आनन्दवाची समस्तवस्तुविलक्षणस्वरूप इत्यत्र स्वरूपशब्देन विशेष्यांशोऽभिप्रेतः उपास्यत्वप्राप्यत्वोपयोगिगुणजाताभिप्रायेणाह अनवधिकातिशयासङ्ख्येयकल्याणगुणगण इति, सद्ब्रह्मात्मादिसाधारणशब्दैर्भगवन्नारायणपुरुषोत्तमाद्यसाधारणशब्दैश्चैक एवाभिधीयते इत्याह सर्वात्मेत्यादिना, भगच्छब्देन हेयप्रत्यनीकत्वं कल्याणगुणास्पदत्वं

* तस्य चेति पा॰ ।

च विवक्षितं नारायणशब्देनोभयविभूतिमत्त्वं पुरुषोत्तमशब्देन विभूतिभूतचिदचिद्विलक्षण्यमित्यन्तर्यामिस्वरूपमित्युक्तं भवति इत्यर्थः । अयं भेदश्रुतेरर्थ उक्तः, अयं चाभेदश्रुतिविरुद्ध इति शङ्कायां तदैकार्थ्यमुच्यते अस्य चेत्यादिना अस्य—भेदश्रुतिप्रतिपन्नस्य वैभवप्रतिपादनपराः श्रुतय इति भेदश्रुत्यानुगुण्याद्घटकश्रुत्यैकार्थ्यात्सामानाधिकरण्यस्वाभाव्याच्चाभेदश्रुतयोऽपि तद्वैभवप्रतिपादिका इत्यभिप्रायः । सामानाधिकरण्यवाक्यस्य तद्वैभवप्रतिपादकत्वं कथमित्यत्राह स्वेतरेत्यादिना, अन्तर्यामिणः परमात्मनः तदेकनियाम्यत्वेन कृत्स्नस्य शरीरत्वात्तद्वाचिनः शब्दाः शरीरिपर्यन्तमभिदधतीति समानाधिकरणवाक्यैर्भिन्नप्रवृत्तिनिमित्तपदैर्व्यधिकरणवाक्यैश्च तद्वैभवमेव प्रतिपाद्यत इति सर्वश्रुतीनामैकार्थ्यमित्यर्थः तन्नियमनं प्रतिपादयन्तीत्यन्वयः परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगद्विष्णोरंशो द्विजोत्तम विष्णोरेता विभूतयः परस्य ब्रह्मणो रूपं जगत्सर्वं शरीरं ते तत्सर्वं वै हरेस्तनुः तानि सर्वाणि तद्वपुरित्यादिषु शक्त्यंशादिशब्दानां प्रयोगो द्रष्टव्यः तच्छक्तितदंश इत्यादिना प्रतिपदं तच्छब्दप्रयोगावृत्तिरेकैकस्य निरपेक्षहेतुत्वाभिप्रायेण । यद्वायं परमात्मानं प्रति यदेतज्जगच्छरीरमुच्यते तमेव प्रति तदेवेदं जगच्छक्तिरंश इति चोच्यते, अत एव पितृत्वपुत्रत्ववत्प्रतिसम्बन्धि भेदादविरोधो दुर्वचः । अत एव शरीरादिशब्दानामेकार्थपरत्वेनाविरोधे वाच्ये शरीरशब्दानुगुणं शक्त्यादिशब्दानां वर्णनीयः । अन्तरो यमयतीति लक्षणपूर्व्वकं शरीरशरीरिभावस्य मुख्यतयोक्तत्वात्कार्योपयोगिविशेषत्वाच्छक्तिः विशिष्टे ब्रह्मणि विशेषणतयैकदेशत्वादंशः नियाम्यतया विभूतिः व्याप्यत्वे सति नियाम्यत्वात् शरीरम् । अतस्सर्वेषामैकार्थमित्यभिप्रायः शरीरतनुशब्दोपादानं दृष्टान्ताभिप्रायेण कृतं, शरीरतनुशब्दयोरिव शक्त्यादिशब्दानामविरोधो वर्णनीय इति भावः । एवं प्रथमश्लोकार्थ ईषद्विवृतः ।

शाङ्करपक्षसंक्षेपः ॥ **तस्य वैभवप्रतिपादनपराणामेषां सामानाधिकरण्यादीनां विवरणे प्रवृत्ताः केचन निर्विशेष-**

ज्ञानमात्रमेव ब्रह्म तच्च नित्यमुक्तस्वप्रकाशस्वभावमपि तत्त्वमस्यादिसामानाधिकरण्यावगतजीवैक्यं ब्रह्मैवाज्ञं बध्यते मुच्यते च निर्विशेषचिन्मात्रातिरेकीशेशितव्याद्यनन्तविकल्पस्वरूपं कृत्स्नं जगन्मिथ्या, कश्चिद्बद्धः कश्चिन्मुक्त इतीयं व्यवस्था न विद्यते, इतः पूर्वं केचन मुक्ता इत्ययमर्थो मिथ्या, एकमेव शरीरं जीववत् निर्जीवानीतराणि शरीराणि, तच्छरीरं किमिति न व्यवस्थितम् । आचार्यो ज्ञानोपदेष्टा मिथ्या, शास्त्रं च मिथ्या, शास्त्रप्रमाता च मिथ्या, शास्त्रजन्यं ज्ञानं च मिथ्या, एतत्सर्वं मिथ्याभूतेनैव शास्त्रेणावगम्यत इति वर्णयन्ति ।

अथ द्वितीयश्लोकस्य पूर्वार्द्धस्य परपक्षत्रयोपन्यासपरस्यार्थं क्रमाद्विवरिष्यन्प्रथमं मायि*मतसंग्रहं विवृणोति तस्य वैभवेत्यादि तस्यैषामिति पदद्वयस्यायमभिप्रायः । तस्य भेदश्रुतिभिः समस्तचिदचिद्वस्तुविलक्षणतया प्रतिपन्नस्य ब्रह्मणः एषां भेदश्रुत्यानुगुण्यात्सामानाधिकरण्यस्वाभाव्यात् घटकश्रुत्यैकार्थ्याच्च तद्वैभवप्रतिपादनपराणामिति भावः । आदिशब्देन घटकश्रुतयो विवक्षिताः भेदनिषेधश्रुतयो वा एषां विवरणे प्रवृत्ताः केचनेत्यनेनविरोधः स्यादिति विरोधः स्फोरितः । केचन वर्णयन्ति इत्यन्वयः निर्विशेषज्ञानमात्रमेव ब्रह्मेति मात्रशब्देन क्वचिदंशे जडत्वव्यावृत्तिर्वा कार्त्स्न्येन ज्ञानमित्यर्थः । स यथा सैन्धवघन इति श्रुतिवाक्यार्थोऽत्राभिप्रेतः । यद्वा निर्विशेषशब्देन श्रौतनिषेधोऽभिप्रेतः तेन ज्ञातृज्ञेयस्वरूपविशेषगुणरूपविशेषाश्च निषिद्धा भवन्ति । ज्ञानशब्देन ज्ञानस्वरूपतोक्तिरूपार्थगुणनिषेधोऽभिप्रेतः ज्ञानरूपस्यैव ज्ञातृत्वं ज्ञेयत्वं च सिद्धान्तिनोऽभिमतम्

* शाङ्करमतेति पा॰ ।

अतस्तद्व्यावृत्त्यर्थं न दृष्टेर्द्रष्टारं यस्यामतमित्याद्युक्तज्ञातृत्वज्ञेयत्वनिषेधाभिप्रायो मात्रशब्दः एवकारेण सविशेषत्वप्रतिपादकवाक्यानामतत्त्वावेदकत्वमभिप्रेतं स्वयाथात्म्याज्ञानपूर्व्वको बन्धः स्वप्रकाशे वस्तुनि न सम्भवति इति ब्रह्म नित्यमुक्तमेवेत्यत्राह नित्येति, वस्तुतो नित्यमुक्तस्वप्रकाशमपि जीवैक्यस्य सामानाधिकरण्यवाक्यावगतत्वात् ब्रह्मैवाविद्यातिरोहितं भेदभ्रममनुभवतीति कल्प्यमत एव बन्धश्च मोक्षश्च उपपन्न इत्यर्थः । जीवैक्यं श्रुतिसिद्धमभ्युपगतं चेच्छ्रुतिसिद्ध ईश्वरेशितव्यादिभेदोऽभ्युपगन्तव्य इत्यत्राह निर्विशेषेति, अद्वैतवाक्यबलेन तेषां वाक्यानां मिथ्याविषयत्वमाश्रयणीयमित्यर्थः । बद्धमुक्तव्यवस्थासिद्ध्यर्थमात्मभेदोऽभ्युपगन्तव्य इत्यत्राह कश्चिदिति, बद्धमुक्तव्यवस्था श्रुतिसिद्धत्वादङ्गीकार्या शुकादयो हि मुक्ता इत्यत्राह इतः पूर्वमिति, चेष्टादिभिः सर्वशरीराणामात्मवत्त्वं सिद्धं तथा सति सुखदुःखादिव्यवस्थायां चात्मनि भेदेन मोक्षबन्धव्यवस्था स्यादित्यत्राह एकमेव शरीरमिति, जीवैक्ये सर्वशरीराणां सजीवत्वाभावात्सुखादिप्रतिसन्धानाभाव इत्यर्थः । एकस्य सजीवत्वं चैक्योपदेशबलात्स्वीकृतम् । एकमेव शरीरं सजीवं चेत्तच्छरीरको जीवः श्रवणमननादिभिर्बुद्धाद्वैतज्ञानः स्यादिति बन्धोन स्यादित्यत्राह तच्छरीरं किमिति न व्यवस्थितमिति, इदं शरीरं सजीवम् एतच्छरीरको जीवो ज्ञानवानिति निश्चेतुमशक्यमित्यर्थः । शिष्याचार्य्यव्यवस्थायामात्मबहुत्वं स्यात् शास्त्रस्य च प्रामाण्याद्ब्रह्मव्यतिरिक्तं सत्यं स्यादित्यत्राह आचार्य इति, प्रमाता श्रोता विवक्षितः एकैकमेव निरपेक्षं दूषणमिति ज्ञापनाय मिथ्याशब्दावृत्तिः । इति वर्णयन्ति इति वर्णनशब्देन ग्रन्थप्रपञ्चोऽर्थदोषश्चस्च विवक्षितम् ॥

भास्करपक्षसंक्षेपः । **अपरेऽपहतपाप्मत्वादिसमस्तकल्याणगुणोपेतमपि ब्रह्मैतेनैवैक्यावबोधेन केनचिदुपाधिविशेषेण संबद्धं बध्यते मुच्यते च नानाविधमलरूपपरिणामास्पदं चेति व्यवस्थिताः ॥**

Digitized by Google

अथ द्वितीयश्लोकपूर्व्वार्द्धस्थभास्करमतोपन्याससंग्रहं च विवृणोति अपर इत्यादिना, विवरणे प्रवृत्ता इत्यनुवर्तते अपरे व्यवस्थिता इत्यन्वयः प्रमाणसिद्धस्य बाधायोगात्सगुणत्वं तैरभ्युपगतमित्याह अपहतपाप्मत्वादीति, । स्वतोऽपहतपाप्मत्वादियुक्तमपि ऐक्योपदेशान्यथाऽनुपपत्त्या उपाधिसम्बन्धोऽभ्युपगत इत्याह तेनैवेति, ऐक्यावबोधेन व्यवस्थिता इत्यन्वयः केनचिद्देवमनुष्याद्युपाधिष्वन्यतमेन तथा सति बन्धमोक्षव्यवस्थाऽप्युपपद्यत इत्याह वध्यते मुच्यते चेति, बध्यते–संसरति, एवं जीवत्वं ब्रह्मण उक्तम्। अथाचिद्रूपपरिणाममाह नानाविधेति, मलरूपशब्दो दोषरूपत्वपरः ।

यादवपक्षसंक्षेपः । **अन्ये पुनरैक्यावबोधयाथात्म्यं वर्णयन्तः स्वाभाविकनिरतिशयापरिमितोदारगुणसागरं ब्रह्मैव सुरनरतिर्यक्स्थावरनारकिस्वर्ग्यपवर्गिचेतनैकस्वभावं स्वभावतोविलक्षणमविलक्षणं च वियदादिनानाविधमलरूपपरिणामास्पदं चेति प्रत्यवतिष्ठन्ते ।**

अथ यादवप्रकाशमतसंग्रहं विवृणोति अन्ये पुनरित्यादिना, ऐक्यावबोधेति याथात्म्यं वर्णयन्त इत्युपालम्भः । यथाऽचिद्ब्रह्मणोः जीवब्रह्मणोश्चैक्यमेकरूपं प्रतिपन्नं तथाभेदोऽप्येकरूपः प्रतिपन्न इति अचिद्ब्रह्मणोर्भेदस्य स्वाभाविकत्वं जीवब्रह्मणोर्भेदस्यौपाधिकत्वं च न वाच्यमुभयत्र भेदः स्वाभाविक इति वर्णयन्त इत्यभिप्रायः तत्रापि सगुणत्वाङ्गीकारमाह स्वाभाविकेति, अपरिमितत्वम् असंख्येयत्वम् उदार उत्कृष्टः प्रशस्यः तादृशो गुणसागरो गुणगणो यस्येति बहुव्रीहिः जीवगताचिद्गताशुभास्पदत्वमाह सुरनरेति, स्पष्टं तत्रेत्यादिना द्वितीयश्लोकोत्तरार्द्धोक्तपरपक्षप्रतिक्षेपसंक्षेपं विवृणोति श्रुत्यर्थपर्यालोचनपरा इति, पर्यालोचनं परित आलोचनम् अभेदभेदघटकसमानाधिकरणश्रुतितत्पौर्व्वापर्याद्यालोचनपराः । न त्वेकवाक्यमात्रतृप्ता इत्यर्थः । उदाहरन्ति भगव*द्यामुनाचार्या इति शेषः ॥

* सिद्धित्रये

Digitized by Google

तत्र प्रथमपक्षस्य श्रुत्यर्थपर्यालोचनपरा दुष्परिहरान् दोषान् उदाहरन्ति तथा हि प्रकृतपरामर्शितच्छब्दावगतस्य ब्रह्मणः स्वसंकल्पकृतजगदुदयविभवविलयादयः तदैक्षत बहु स्यां प्रजायेयेत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादिभिः पदैः प्रतिपादिताः तत्संबन्धितया प्रकरणान्तरनिर्दिष्टाः सर्वज्ञता–सर्वशक्तित्व–सर्वेश्वरत्व–सर्वप्रकारत्व–समाभ्यधिकनिवृत्ति–सत्यकामत्व–सत्यसंकल्पत्व–सर्वावभासकत्वाद्यनवधिकातिशयासंख्येयकल्याणगुणगणा अपहतपाप्मेत्याद्यनेकवाक्यावगतनिरस्तनिखिलदोषता च सर्वे तस्मिन् पक्षे विहन्यन्ते ।

तत्र प्रथमं तत्त्वमसीति वाक्यस्य निर्विशेषपरत्वे अनेकदूषणानि विवक्षन् पूर्वं तच्छब्दावगतगुणजा*तमाह प्रकृतेत्यादिना, प्रकृपरामर्शीति पदं हेतुगर्भं तच्छब्दो, गुणविशिष्टवाची प्रकृतपरामर्शित्वादित्यर्थः कथं गुणानां प्रकृतत्वमित्यत्राह स्वसंकल्पेति, आदिशब्देनानुप्रवेशनामरूपव्याकरणादयो गृह्यन्ते जगदुदयविभवविलयादय एव तत्तद्वाक्यप्रतिपन्नतया विशेष्यन्ते तदैक्षतेत्यादिभिः पदैः प्रतिपादिता इत्यन्तेनेन तत्प्रकरणाधीतगुणा उक्ताः सर्वशाखाप्रत्ययन्यायेन प्रकरणान्तराकृष्टान् गुणानाह तत्संबन्धितयेति, कारणवस्तुसंबन्धितया प्रकरणान्तरोक्तागुणा गण्यन्ते सर्वज्ञतेत्यादिना यस्स†र्वज्ञस्सर्ववित् पराऽस्य‡ शक्तिर्विविधैव श्रूयते ईशनाय स ईशो§ऽस्य

* गुणबाधमाहेति पा॰ । † यस्सर्वज्ञस्सर्ववित्–मु॰ उ॰ । १ । १ । १० ।

‡ श्वे॰ उ॰ ६ । ८ ।

§ श्वे॰ उ॰ ५ । ४

सामान्यान्तरस्य सद्भावो यथा गोत्वादौ सत्तासामान्यस्य, नह्यस्माकं वैशेषिकाणामिव निःसामान्यानि सामान्यानि, स्त्रीशब्दोयं शुक्लादिशब्दवद्गुणमात्रे गुणिनि च वर्त्तते, तत्र यदा गुणमात्रे स्त्रीशब्दो वर्त्तते तदा द्रव्यवाचिनः प्रातिपदिकात्स्त्रीत्वे ऽभिधेये टाबादयो भवन्तीति स्त्रीत्वं प्रत्ययार्थ इति पक्षो भवति, यदा तु स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते तदा परं पक्षद्वयं सम्भवति स्त्रीत्वमुपलक्षणं विशेषणं वेति, तत्राद्ये स्त्रीत्वोपलक्षितद्रव्यवाचिनः प्रातिपदिकाट्टाबादय इति, अयं स्त्रीसमानाधिकरणादिति पक्षो भवति, द्वितीये तु स्त्रीत्वयुक्तद्रव्यवाचिनोऽङ्गीकृतस्त्रीत्वात्प्रातिपदिकादिति प्रकृत्यर्थविशेषणं स्त्रीत्वमिति पक्षो भवति, तत्र स्त्रीसमानाधिकरणादिति चेद् भूतादिष्वतिप्रसङ्गः, भूतमियं ब्राह्मणी प्रधानमियं ब्राह्मणी आवपनमियमुष्ट्रिकेति, उभयोस्तु पक्षयोर्नैष दोषः, कथं, भूतादयः चैतन्यप्राधान्यसम्भवनवद्वृत्तयो न तु स्त्रीत्वाङ्गीकारेण वर्त्तन्ते, तदेवमत्र पक्षे दोषदर्शनादितरयोरन्यतरदाश्रयणीयमित्याह । 'स्त्रीत्वं चेति' । 'उभयथापि युज्यतइति' । ननु प्रत्ययार्थपक्षे द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः, कथ,मेकोयमर्थः स्त्रीत्वं नाम तदेव च प्रकृत्यर्थोपसर्जनं प्रत्ययेनाभिधीयते तस्यैकत्वादेकवचनमेव प्राप्नोति, अनेकश्च प्रत्ययो नोपपद्यते गार्ग्यायणी कारीषगन्ध्या कालितरेति, कथ,मेकोयमर्थः स्त्रीत्वं नाम तस्यैकेनोक्तत्वाद्द्वितीयः प्रत्ययो न प्राप्नोति उक्तार्थानामप्रयोग इति, स्त्रीशब्दे चेकारो न प्राप्नोति, संस्त्याने स्त्यायतेर्ड्रडिति ड्रट्प्रत्ययान्तेन स्त्रीशब्देनोक्तत्वात् संस्त्यानं स्त्रीत्वं, सामानाधिकरण्यं च न स्यात् कुमारी देवदत्तेति, स्वस्वप्रकृत्यर्थावच्छिन्नयोः स्त्रीत्वयोः प्राधान्येनाभिधानात् तत्र व्यतिरेकनिबन्धा षष्ठी प्राप्नोति, कुतः, न तावदन्योन्यतः, परस्परं गुणगुणिभावाभावात्, नापि स्त्रीप्रत्ययप्रकृते,: टाबादिभिर्बाधितत्वात्, यत्र तर्हि प्रतियोगिनि स्त्रीप्रत्ययः प्रतिषिध्यते तत्र षष्ठी प्राप्नोति पञ्च ब्राह्मण्यः स्वसाभिरूपेति,पक्षान्तरे तु द्वयोरपि द्रव्यनिष्ठत्वाद्व्यतिरेकाभावः सामानाधिकरण्यं च भवति, द्रव्यस्य चानेकत्वाद्द्विवचनबहुवचने अपि युक्ते, यथैव च प्रातिपदिकेनो-

त्तेऽपि स्त्रीत्वे टाबादयो भवन्ति, तथानेकोऽपि प्रत्ययो नानुपपन्नः, तद्द्योतको हि तदा नानाप्रत्ययः, प्रदीपादेश्चानेकस्यापि द्योतकत्वं दृष्टं, प्रत्ययार्थपक्षेऽपि न दोषः, यद्यपि स्त्रीत्वमात्रे वाच्ये प्रत्ययः क्रियते तथापि स्त्रीत्वतदाश्रययोरभेदविवक्षया स्वाभाविकत्वाद्वा गुणप्रधानभावस्य द्वयोरपि दृष्टत्वेन सामानाधिकरण्यं वचनभेदश्च भविष्यति, गार्ग्यायणीत्यादौ च द्वाभ्यामेव स्त्रीत्वमभिधातुं शक्यते नैकेन स्वभावात्। यद्वा ष्फस्य षित्करणसामर्थ्यान्ङीष् सिद्धः, ष्यङि यङश्चाबिति वचनसामर्थ्याच्चाप् भविष्यति, तथाहि। अत्र यङ्ष्यङोः सामान्यग्रहणाय तदविघाताय च ष्यङोऽनुबन्धद्वयं कृतं, कालितरेत्यत्रान्यः प्रकर्षयुक्तोऽन्यश्चाप्रकर्षयुक्तस्तत्रावस्थाभेदादेक एवार्थो भिन्नतइति प्रकर्षयुक्तस्यानभिहितं स्त्रीत्वमिति तदभिधानाय टाबपि भविष्यति, स्त्रीशब्देऽपि स्त्रियामित्यस्मादेव निपातनादीकारः सिद्ध इति सुष्ठूक्तमुभयथापि युज्यतइति ॥

"अजाद्यतष्टाप्" ॥ 'अदन्ताच्चेति'। अकारान्तादित्यर्थः। स्वरूपग्रहणं तु न भवति, अच्छब्दान्तात् नीतत् परीतत् कलिङ्गदित्यादेः स्त्रीलिङ्गादिति, तदाद्याचिख्यासायामित्यादेर्निर्देशात्। 'पकारः सामान्यग्रहणार्थ इति'। ङ्याप्प्रातिपदिकादित्यादौ, पकारानुरोधस्तु टाब्डापोः स्वरार्थः। 'टकारः सामान्यग्रहणविघातार्थ इति'। अन्यथैकानुबन्धत्वादस्यैव ग्रहणं स्यान्न तु डाप्चापोः। 'खट्वेति'। कथं पुनरत्राकारान्ता प्रकृतिरवधार्यते, यावता नित्यमेवायमाबन्तः स्त्रियां वर्त्तते शास्त्रात्प्रयोगाच्च, शाकटायनदर्शने हि सर्वेषामेव व्युत्पत्तिः, पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादौ स्त्रीप्रत्यये लुप्ते प्रयोगएवाकारान्तत्वं दृश्यते। 'शुभंयाः कीलालपा इति'। अन्येभ्योऽपि दृश्यन्तइति विच्, कः पुनरत्र टापि सति दोष इत्याह। 'हल्ङ्याब्भ्य इति'। 'सुलोपः स्यादिति'। 'क्वचिज्जातिलक्षण इति'। गणपाठावसरे विभागं दर्शयिष्यति हलन्तानां त्वित्यादिः। 'अजादिग्रहणमिति'। प्रकृतस्य प्रथमान्तस्यान्वयासम्भवात्तदर्थमजादिग्रहणमिति शेषः। 'अमहत्पूर्वेति'। महच्छब्दस्यानुकरणत्वाल्लौकिकार्थाभिधायित्वाभावादान्महत इत्यात्वं न भवति।

Digitized by Google

'पुंयोगे तु ङीषेवेति'। जातिग्रहणस्य प्रयोजनमाह। ननु पुंयोगे सोय-मित्यभिसंबन्धात्परशब्दः परत्र वर्त्ततइति गौणत्वादेव न भविष्यति, तस्मात्सुखप्रतिपत्त्यर्थं जातिग्रहणम्। अमहत्पूर्वेत्यस्यार्थमाह। 'महत्पूर्वस्येति'। अत्रापि जातिरिति संबध्यते, इह प्रतिषेधो माभूत् महती शूद्रा महाशूद्रेति, नह्यत्र महत्पूर्वः समुदायो जातिवचनः, क्व तर्हि प्रतिषेधः, यत्र समुदायो जातौ वर्त्तते, तदिदं दर्शितम्। 'महाशूद्रशब्दो ह्याभीरजातिवचन इति'। यद्येवं समुदाये जातिवचने गौरखरा-दिवदवयवार्थाभावाद्व्युत्पत्तिमात्रं क्रियते, तत्रावयवार्थस्य स्त्रीत्वस्याविव-क्षितत्वात् पुंसि समासे कृते टापः प्रसङ्ग इति तत्रामहत्पूर्वेति प्रति-षेधः सार्थकः, ततः किममहत्पूर्वेत्यत्र जातिरिति न संबन्धनीयं, कथं महती शूद्रा महाशूद्रेत्यत्रान्तरङ्गत्वाट्टापि कृते पश्चात्सुप्, सुबन्तस्य समासः, ततश्चाभिनिर्वृत्तत्वाट्टापः प्रतिषेधस्याप्रसङ्गः, सत्यं, विस्पष्टा-र्थमेवात्रापि जातिरिति सम्बध्यते। ननु च शूद्रशब्दः पठ्यते, कः प्रसङ्गो यन्महाशूद्रशब्दात्स्यादत आह। 'तदन्तविधिनेति'। 'अतिधीवरी अतिपीवरीति'। दधातेः पिबतेश्चातो मनिन्क्वनिब्वनिपश्चेति क्वनिपि कृते घुमास्थादिसूत्रेणेत्वं, धीवानमतिक्रान्ता पीवानमतिक्रान्तेति प्रादि-समासः, अत्र वनो र चेति ङीब्रौ भवतः, असति तु ज्ञापने वन इति प्रत्ययग्रहणमथापि कृद्ग्रहणं सर्वथातिक्रान्तप्रधाने समासे न स्यात्। 'अतिभवती अतिमहतीति'। उगितश्चेत्यत्रोगिदित्युगित्प्रातिपदिक-स्यैव ग्रहणमित्यङ्गीकृत्येदं प्रयोजनं दर्शितं, तत्र तु वक्ष्यति उगिदिति प्रातिपदिकाप्रातिपदिकग्रहणं तेन ग्रहणवता प्रातिपदिकेनेति निषे-धाभावात्तदन्तविधिरिति, यदाहोगिद्वस्य सम्भवति यथाकथं चिदिति तदन्तात्प्रातिपदिकादिति च। अतिमहतीत्यत्र शतृवद्भावाद्गौणादि-कादुगिल्लक्षणो ङीप्, के चिद्गौरादिपाठाद् ङीषं वर्णयन्ति, तदयुक्त-मनुपसर्जनाधिकारात्। किं च गौरादिपाठस्य प्रयोजनमपि न पश्याम:। ननु च महतीशब्दोन्तोदात्त इष्यते, सत्यं, शतुरनुम इत्यत्र नद्य-जाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमित्यनेनैव सिद्धं, विभक्त्युदात्तार्थं

Digitized by Google

तदिति चेत् तदेव ङीबुदात्तार्थमपि भविष्यति, अतिमहतीत्यादौ च ङीषभावस्योक्तत्वात् ङीबुदात्तार्थमप्युपसंख्यानमेष्टव्यं, यदि तदन्तविधिर्ज्ञाप्यते पञ्चानामजानां समाहारः पञ्चाजी द्विगोरपि टाप् प्राप्नोति । अत्राहुः । अजाद्यत इति षष्ठी अजादीनामजन्तानां च या स्त्री तद्वाच्येऽर्थे यत् स्त्रीत्वं समवेतं तत्र टाबिति, प्रत्यासत्त्या च स्त्रीत्वविशेषोपलक्षणानामेव प्रकृतित्वं विज्ञायतइति मत्वा वृत्तिकारेणोक्तम् अजादिभ्यः प्रातिपदिकेभ्योदन्ताच्चेति, न च पञ्चाजीत्यत्राजार्थे समवेतं स्त्रीत्वं किं तर्हि समाहारे, एवं चामहत्पूर्वेति प्रतिषेधः शक्योकर्त्तुं, नहि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वं, तदन्तविधिस्त्वनुपसर्जनादित्यत्र ज्ञापयिष्यते । 'सत्प्राक्काण्डेति' । पाककर्णेत्यत्र वार्त्तिकं सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्प्रतिषेध इति, तत्रैव भाष्यं प्राक्पुष्पा च प्रत्यक्पुष्पा चेति, तस्मादत्रापि प्राक्शब्दो न पठनीयः सदच्काण्डेत्येव पठनीयम् ॥

"ऋन्नेभ्यो ङीप्" ॥ 'ङकारः सामान्यग्रहणार्थ इति' । ङ्याप्प्रातिपदिकादित्यादौ, पकारः सामान्यग्रहणाविघातार्थ इति तु पूर्वानुसारेण गम्यमानत्वान्नोक्तम्, अत्रापि पकारानुरोधेनुदात्तार्थः ॥

"उगितश्च" ॥ 'यथाकथं चिदिति' । यदि वर्ण उगित् संभवति यदि वा प्रत्ययो ऽथापि प्रातिपदिकं सर्वथा यत्रैषामन्यतमः प्रकारः संभवतीत्येष यथाकथंचिदित्यस्यार्थः । एतदेव स्पष्टयति । 'तदुगिच्छब्दरूपमिति' । प्रत्ययाप्रत्यययोः प्रातिपदिकाप्रातिपदिकयोः शब्दरूपमन्यपदार्थः, न प्रातिपदिकमेव नापि प्रत्यय एवेत्यर्थः । तत्रोगिता प्रातिपदिकस्य विशेषणात्तदन्तविधिर्भवतीत्याह । 'तदन्तादिति' । 'पचन्तीति' । अत्र शतृप्रत्यय उगित् तदन्तं प्रातिपदिकम् अतिभवती अतिमहतीत्यत्रापि भवति, ग्रहणवता प्रातिपदिकेनेत्ययं तु प्रतिषेधो यत्र सूत्रोपात्तं प्रातिपदिकस्यासाधारणं रूपं तत्रैव भवतीत्यत्रापि व्यपदेशिवद्भावेन भवति, व्यपदेशिवद्भावो ऽप्रातिपदिकेनेत्ययं तु निषेधः प्रातिपदिकस्यैवासाधारणरूपग्रहणे, अतिगोमतीत्यत्रापि भवति, प्रत्ययग्रहणपरिभाषा तु प्रत्य-

Digitized by Google

यस्यैवासाधारणरूपग्रहणे भवति । 'धातोरुगितः प्रतिषेध इति' । वक्तव्य इति शेषः, स तर्हि वक्तव्यः, न वक्तव्यः । उगिद्चामित्यत्रोगित्त्वादेव सिद्धेऽञ्चतिग्रहणं नियमार्थमिह शास्त्रे उगिता यत्कार्यं विधीयते तद्धातोर्यदि भवति अञ्चतेरेवेति, कार्यमात्रं नियम्यते न नुमागम एव, अधातुग्रहणं चाधातुपूर्वस्यापि नुमर्थमिति तत्रैव वक्ष्यते । अपर आह, उगितश्चेति योऽयं चशब्दः सोऽञ्चतेर्लुप्तनकारस्यानुकरणं, विभक्तेश्च सुपां सुलुगिति लुक्, भाविनं चाकारलोपमाश्रित्य चेति निर्देशः कृतः, ततश्चाञ्चतिग्रहणं नियमार्थमकारनकारलोपयोश्चातन्त्रत्वात्राञ्चेः पूजायामिति लोपनिषेधविषयेपि ङीब् भवति, प्राञ्ची प्रत्यञ्ची ब्राह्मणीति । 'उखास्रत्पर्णध्वदिति' । क्विप् चेत्यत्रानयोर्व्युत्पत्तिः कृता ॥

"वनो र च" ॥ वन इति क्वनिब्वनिब्ङ्वनिपां प्रत्ययानां सामान्येन ग्रहणं, न वन षण संभक्तौ, वनु याचनइति धात्वोर्विजन्तयोः, कुतः, प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति, अत एव शुनो निष्क्रान्ता युवानमतिक्रान्ता निःशुनी अतियूनीत्यत्रापि न भवति, अनर्थकत्वाद्वा । 'शर्वरीति' । शॄ हिंसायाम्, अन्येभ्योपि दृश्यन्तइति वनिप् । 'परलोकदृश्वरीति' । दृशेः क्वनिप् । 'वनो न हश इति' । विहितविशेषणं हश्ग्रहणं हशन्ताद्धातोर्यो वन्विहितस्तदन्तात्प्रातिपदिकान् ङीब्रौ न भवत इत्यर्थः, तेन शर्वरीत्यत्र प्रतिषेधाभावः, तथा ओणृ अपनयने वनिपि विड्वनोरनुनासिकस्यादित्यात्वे अवादेशे अवावन्नित्यत्र संप्रति हशः परत्वाभावेपि हशन्ताद्विहितत्वात् प्रतिषेधो भवत्येव अवावा ब्राह्मणीति, एष एव स्थितः सिद्धान्तः । बहुलं छन्दसि ङीब्रौ वक्तव्यौ । यज्वरीरिषः । प्रईरिशवोस्तुट् च, प्रेत्वरी ॥

"पादोऽन्यतरस्याम्" ॥ 'पादिति कृतसमासान्तः पादशब्दो निर्दिश्यतइति' । उत्तरसूत्रे ऋच्यभिधेयायां तस्यैव संभवात्, तेन पादयतेः क्विबन्तस्य ग्रहणं न भवति । 'द्विपदीति' । द्वौ पादावस्या इति बहुव्रीहौ संख्यासुपूर्वस्येत्यकारलोपे पादः पदिति पद्भावः ॥

"टाबृचि" ॥ 'ऋचीत्यभिधेयनिर्देश इति' ॥ व्याप्तेः, विषयनिर्देशे हि ऋग्वेदविषयएव हि प्रयोगे स्यान्नान्यत्र ॥

"न षट्स्वस्रादिभ्यः" ॥ टाबृचीति पादन्ताद्विहितस्य टापोऽत्राप्रसङ्गात्तदनन्तरस्य ङीपोऽयं प्रतिषेध इत्याशङ्कामपनयति । 'यो यत इति' । तत्र सर्वेभ्य एव ङीप् प्राप्नोति, टाप्तु नलोपे सत्यकारान्ततायामुपजातायां षड्भ्य एव, यो यः प्राप्त इति तु युक्तः पाठः, अन्यथा स ततो न भवतीति वाच्यं स्यात्, व्याप्तिश्च न गम्येत । 'पञ्च ब्राह्मण्य इति' । ननु चात्र ब्राह्मणीशब्दसामानाधिकरण्यात् स्त्रीत्वावगतिः, संख्याशब्दस्तु स्वमहिम्ना भेदगणनमाह । तथाहि । पञ्चेत्युक्ते नानात्वमात्रं द्रव्यस्य गम्यते न लिङ्गविशेषः, तथा च लिङ्गानुशासनेषु ष्णान्ता संख्येत्यलिङ्गत्वमुक्तं, यद्येवमेको द्वौ बहव इत्यत्रापि प्रत्ययो न स्यात्, संख्याशब्दत्वेन भेदगणनामात्रस्य शब्दार्थत्वात् । अथ तत्र स्त्रीत्वमपि शब्दार्थः, पञ्चादिष्वपि स्यात्, वक्तव्यो वा विशेषः, सति तस्मिन् प्रतिषेधे नान्तरेणानुप्रयोगं पञ्चेत्यादौ स्त्रीत्वाद्यभिव्यक्तिरिति लिङ्गानुशासनेष्वलिङ्गत्वमुक्तमसति तु प्रतिषेधे पञ्चादिभ्यः स्त्रीप्रत्ययो न भवति, एकादिभ्यस्तु भवतीति न शास्त्रैकशरणः प्रतिपत्तुमर्हति । ननु विभक्तौ परतः त्रिचतुरोः स्त्रियां तिसृचतसृभावः, तत्र संनिपातपरिभाषयैव ङीबभावः सिद्धस्तत्किं तिसृचतसृशब्दयोः स्वस्रादिपाठेन । ज्ञापनार्थं तु । एतज्ज्ञापयति अनित्या संनिपातपरिभाषेति, तेन त्यदाद्यत्वे कृते टाब् भवति या सा इमे द्वे इति, ङीपोऽनन्तरस्यायं प्रतिषेधो युक्त इत्याश्रित्य चोदयति । 'षट्संज्ञानामिति' । 'कस्मान्न स्यादिति' । अत इति हि प्राप्नोति, असिद्धो नलोपस्तस्यासिद्धत्वान्नैतदन्तं, परिगणितेषु कार्येषु नलोपो ऽसिद्धो भवति, नलोपः सुप्स्वरेत्यस्य नियमार्थत्वात्, नेदं तत्र परिगण्यते, इदमपि तत्र परिगण्यते, कथं, सुबिति न सप्तमीबहुवचनेन प्रत्याहारः किं तर्हि यङश्चाबिति चापः पकारेण, ततश्च टापोऽपि प्रत्याहारेऽन्तर्भावात्तद्विधिरपि सुब्विधिरेवेति, तदेतदाह । 'प्रत्याहाराच्चापेति' । न स्यादित्यनुषङ्गः, कस्मान्न स्यादिति प्रश्नः । चापा

प्रत्याहाराच्च स्यादिति परिहारः। इदं चाचार्यदेशीयस्य वचनम्, आचार्यसिद्धान्तं दर्शयितुमेतद् दूषयति। 'सिद्धं दोषस्त्वित्त्वइति'। सत्यं सिद्धमिदं चापा प्रत्याहारे, इत्त्वे तु दोषो भवति, बहूनि चर्माण्यस्याः बहुचर्म्मिकेति, कथं तत्र सुब्विधिरिति सर्वविभक्त्यन्तावयवः समास आश्रितः, सुपो विधिः सुपि विधिरिति, ततश्च यथा राजभ्यामित्यत्र सुपि चेति दीर्घत्वं न भवति तथा टापि सुपि विधीयमानमित्त्वमपि सुब्विधिरिति तत्र कर्त्तव्ये नलोपस्यासिद्धत्वात्कात् पूर्वोऽकारो न भवतीतीत्वं न स्यादित्यर्थः। सिद्धान्तमाह। 'तस्मान्नोभाविति'। स्त्रियामित्यर्थमात्रमपेत्य तत्र यदुक्तं तन्न भवतीत्येवं ङीप्टापावुभावपि प्रतिषेध्याविन्यर्थः। ननु च सकृत्प्रतिषेधस्य प्रवृत्तिः, स च स्वप्रवृत्तिसमये यस्य प्रसङ्गस्तमेव प्रतिषेधति, ततश्च पूर्वं ङीपि प्रतिषिद्धे नलोपे च कृते पश्चात्प्राप्नुवतष्टापः कथं प्रतिषेधः, आत्माश्रयो हि स्यात् स्वप्रवृत्तिमपेत्य स्वप्रवृत्तिरिति, तस्मात्तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणेन द्विरस्य प्रवृत्तिः, तत्र द्वितीयया प्रवृत्त्या टापः प्रतिषेधः॥

"मनः"॥ 'अनिनस्मन् ग्रहणानीति'। अन् इन् अस् मन् इत्येतेषां ग्रहणे अर्थवत्परिभाषा न व्याप्रियते, तेनैषामनर्थकानामपि ग्रहणं भवति, एभिश्चार्थवद्भिरनर्थकैश्च तदन्तविधिर्भवतीत्यर्थः, सीमन्शब्दोऽव्युत्पन्नं प्रातिपदिकम्, अतिक्रान्ता महिमानमतिमहिमा अत्रापीमनिच एवार्थवत्त्वं न तु मनः॥

"अनो बहुव्रीहेः"॥ 'अनुपधालोपी बहुव्रीहिरिहोदाहरणमिति'। कुत एतदित्याह। 'उपधालोपिनो हीत्यादि' 'विभाषां वक्ष्यतीति'। अन उपधालोपिनोऽन्यतरस्यामित्यनेन। 'सुपर्वेत्यादि'। शोभनं पर्वास्याः शोभनं चर्मास्या इति बहुव्रीहिः, अयं च न संयोगाद्वमन्तादित्यल्लोपस्य प्रतिषेधादनुपधालोपी। 'बहुव्रीहेरिति किमिति'। समासादिति वाच्यमिति भावः। 'अतिराज्ञीति'। राजाहः सखिभ्य इति टज् न भवति समासान्तविधेरनित्यत्वात्॥

Digitized by Google

"डाबुभाभ्यामन्यतरस्याम् ॥ 'अन्यतरस्यांग्रहणं किमिति' । डापा मुक्ते प्रतिषेधो यथा स्यादित्येवमर्थं तावदेतन्न कर्त्तव्यं, कथं डाबप्युच्यते प्रतिषेधोऽपि तावुभौ वचनाद्भविष्यतः, यदि हि नकारान्तस्य श्रवणं न स्यात्तदा डापैवापवादेन ङीपो बाधात् प्रतिषेधोनर्थकः स्यात्, अथ डाप्प्रतिषेधाभ्यां मुक्ते ङीबपि यथा स्यादित्येवमर्थमन्यतरस्यांग्रहणं तदपि न, बहुराज्ञीत्यादावन उपधालोपिनोऽन्यतरस्यामित्यनेनैव ङीपः सिद्धत्वात्, यत्र तर्हि तेन न सिद्ध्यति अतिशर्मेत्यादौ तदर्थमेतत्स्यात्, यद्येवमनेनैवोपधालोपिनोपि सिद्धत्वादन उपधालोपिन इत्येतदनर्थकं स्यात्, एवं तर्हि तदन्यतरस्यांग्रहणं न करिष्यामीतीदमन्यतरस्यांग्रहणं क्रियते, कथमनेनैवान्यतरस्यांग्रहणेनोपधालोपिनोनुपधालोपिनश्च ङीपि प्रापिते सत्यन उपधालोपिन इत्येतावदपि क्रियमाणं नियमार्थं भविष्यति, अनो बहुव्रीहेर्यन् ङीब्विधानं तदुपधालोपिन एवेति, ततश्च तदन्यतरस्यांग्रहणं न कर्त्तव्यं भवति, तदवश्यं कर्त्तव्यम्, असति हि तस्मिन्ननेनान्यतरस्यांग्रहणेन बहुव्रीहिमात्राड्डाप्प्रतिषेधङीप्सु त्रिष्वपि प्राप्तेषूपधालोपिनो डाप्प्रतिषेधौ बाधित्वा नित्यं ङीबेव यथा स्यादित्येवमर्थं तत्स्यात्, अतस्तदवश्यं कर्त्तव्यम्, इदं तु न कर्त्तव्यमिति प्रश्नः, परिहरति । 'बहुव्रीहाविति' । अयमभिप्रायः, डाप्प्रतिषेधाभ्यां मुक्ते ङीबपि यथा स्यादित्येवमर्थमिदं तावदन्यतरस्यांग्रहणं, न चान उपधालोपिन इत्यस्य वैयर्थ्यं, नियमार्थत्वात्, अनो बहुव्रीहेर्यदन्यतरस्यां ङीब्विधानं तदुपधालोपिन एवेति, तेन सुपर्वा सुशर्मेत्यादावनेनान्यतरस्यांग्रहणेन प्रापितो ङीब् न भवति बहुराज्ञीत्यादावेव तु भवति, नन्वेवमिदमन्यतरस्यांग्रहणं मा भूत् अन उपधालोपिन इत्येतदेव विध्यर्थमस्तु के वा विशेषः, अनेनान्यतरस्यांग्रहणेन बहुव्रीहिमात्रान् ङीपि प्रापिते तन्नियमार्थं स्याद् असति वास्मिन् डाप्प्रतिषेधयोरेव प्राप्तयोरुपधालोपिनोऽप्राप्तो ङीप् पक्षे विधीयतइति । अयमस्ति विशेषः । अस्मिन्नन्यतरस्यांग्रहणे सति डाप्प्रतिषेधाभ्यां मुक्ते स्वेनस्वेन शास्त्रेण ङीब् भवन्वन्नन्तेषु वनो र चेत्यनेनैव भवतीति बहुधोवरीत्यादौ रेफोपि

भवति, एवमनेन वन्नन्तादुपधालोपिनोनुपधालोपिनश्च बहुव्रीहेर्बहुधीवन्सुपर्वन्नित्यादेर्ङीब्रेफयोः प्रापितयोरन्यत्र बहुराजन्सुशर्मन्नित्यादौ केवले ङीपि प्रापिते सत्यन उपधालोपिनोन्यतरस्यामित्येतन्नियमार्थं भवति, तेन च नियमेन सुशर्मेत्यादौ ङीब् व्यावर्त्यते, सुपर्वेत्यादौ ङीपि व्यावर्तिते तत्सन्नियोगशिष्टत्वाद्रेफोपि न भवति, बहुराज्ञीत्यादौ तु यथाप्राप्तो ङीबवस्थितः, बहुधीवरीत्यादौ च वनो र चेत्यनेन प्राप्तौ ङीब्रेफाववस्थिताविति सर्वमिष्टं सिद्ध्यति, असति त्वस्मिंस्तस्मिंश्च विध्यर्थे ऽपूर्व एव ङीप् तेन विधीयतइति वन्नन्ते बहुव्रीहावृन्नेभ्यो ङीबित्येतत्सन्नियुक्तं वनो र चेत्येतन्न प्रवर्ततेति केवले ङीपि सति बहुधीव्नीति स्यात्, अतो ऽन उपधालोपिन इत्येतन्नियमार्थं यथा स्यात्स्वतन्त्रो विधिर्मा भूदित्येवमर्थमिहान्यतरस्यांग्रहणं क्रियतइति तदिदमन उपधालोपिन इत्यत्र वृत्तिकारः स्पष्टयिष्यति । यद्यनेनान्यतरस्यांग्रहणेन पक्षे ङीबपि प्राप्यते दामेत्यादौ मन्नन्तादपि प्राप्नोति, नैष दोषः, योगविभागः क्रियते डाबुभाभ्यां भवति, ततो ऽन्यतरस्याम्, अनो बहुव्रीहेरित्येव वर्त्तते, मन इति निवृत्तम् ॥

"अनुपसर्जनात्" ॥ प्रसज्यप्रतिषेधोयमित्याह । 'उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोतीति'। पर्युदासे को दोषः, कुक्कुटीपाद इत्यत्र न स्यात् पूर्वपदस्योपसर्जनत्वात्, न । अन्तरङ्गत्वात्प्रागेव ङीपि कृते तदन्तस्य समासः, न चेदानीमुपसर्जनत्वे ङीषः पर्युदासः, पूर्वमेवाभिनिर्वृत्तत्वात् । किं च प्रसज्यप्रतिषेधेप्येष दोषः समानः, कुक्कुटीत्यत्रैव तर्हि न प्राप्नोति, किङ्कारणमन्वर्थमुपसर्जनमप्रधानमुपसर्जनमिति, अस्त्वेवमनुपसर्जनं तूपसर्जनादन्यत्सर्वं न तु प्रधानमेव, तेनापेक्षणीयस्याभावेप्यप्रधानादन्यत्वाद्भविष्यति,यदा तर्ह्यधर्मानृतादिवद्विरोधिवचनोनुपसर्जनशब्दस्तदा न प्राप्नोति, तस्मात्प्रसज्यप्रतिषेधः । 'अनुपसर्जनादित्येवं तदिति'। उपसर्जनाच्च भवतीत्येवमित्यर्थः । 'वक्ष्यति टिड्ढाणञिति ङीबिति'। कथं प्रथमान्तस्य वक्ष्यतीत्यनेन सम्बन्धः । अत्राहुः । वक्ष्यति टिड्ढाणञित्येतावान् ग्रन्थः, टिड्ढाणञिति वक्ष्यतीत्यर्थः । कः पुनरत्र प्रत्यय इत्यत्राह । 'ङीबिति'। एवं

Digitized by Google

जातेरिति ङीष् इत्यत्रापि ग्रन्थच्छेदः, तत्र च पूर्वस्मिन्वक्ष्यतीत्यनुषङ्गः। 'कुरुचरीति'। चरेष्टः। 'बहुकुरुचरेति'। बहुव्रीहिः सर्वोपसर्जनः। 'कथं पुनरित्यादिः'। प्रत्युदाहरणे यदुपसर्जनं न तत् स्त्रियां वर्त्तते, यदा च स्त्रियां वर्त्तते तदा भवत्येव प्रत्ययः, बह्व्यः कुरुचर्योऽस्यां बहुकुरुचरीका बहुकुक्कुटीका मथुरेति, यः स्त्रियां वर्त्तते बहुव्रीहिस्ततोऽटित्त्वादजातित्वाच्चाप्रसङ्गः। तथाहि। टित्प्रातिपदिकं गृह्यते तच्च किंचित्साक्षाट्टिद्भवति यथा नदट् चोरडिति, किं चित्त्ववयवटित्त्वद्वारेण, यत्र ह्यवयवटित्त्वमकिंचित्करं तत्र समुदायार्थं तद्विज्ञायते, स चावयवः क्वचिद्धातुः स्तनन्धयीति, क्वचित्कृल्ल्युडादिः, क्वचित्तद्धितष्ट्युट्युलादिः, तत्र यं समुदायं योऽवयवो न व्यभिचरति तदर्थं तस्य टित्त्वमिति कुरुचरशब्द एव टित् तत्कुतो बहुकुरुचरशब्दात्प्रसङ्ग इति प्रश्नः। परिहरति। 'तदन्तविधिनेति'। ननु ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते, ग्रहणं चोपादानमात्रं न तु स्वरूपेणोच्चारणमेव तत्कथं तदन्तविधिः। स्यादेतत्। यत्र गृह्यमाणं रूपं प्रातिपदिकस्यैवासाधारणं तत्र तदन्तविधिप्रतिषेधः, इह चोरडित्यादि प्रातिपदिकमपि टित् ल्युडादिप्रत्ययोऽपि धेडिति धातुरपि, ततश्च यथोगितश्चेत्यत्र वर्णाप्युगित्प्रत्ययोऽपि प्रातिपदिकमपीति तदन्तविधिर्भवति तथेहापि प्रसङ्ग इति, स्यादयं प्रसङ्गो यदि टिता प्रातिपदिकं विशेष्येत टिति च प्रातिपदिकेन विशेष्यमाणे नानेन विशेषेण तदन्तविधिः, प्रातिपदिकेन चासम्भवादिति नैव बहुकुरुचरशब्दात्प्रसङ्ग इत्यत आह। 'ज्ञापितं चैतदिति'। शूद्रा चामहत्पूर्वेत्यत्र ज्ञापितमेतत्। अवश्यञ्चैतज् ज्ञापितमुत्तरत्रापि परिपालनीयमित्याह। 'तथा चेति'। अनाश्रीयमाणे ज्ञापकेऽणन्ताद्विधीयमानो ङीप् प्रत्ययग्रहणपरिभाषया कारशब्दादेव स्याद् न त्वणन्तात्कुम्भकारशब्दात्, ज्ञापकात्तु ततोऽपि भवतीत्यर्थः। ननु च कृद्ग्रहणपरिभाषया कुम्भकारशब्दस्याणन्तत्वं, नेत्याह। 'न वाणीति'। 'कृद्ग्रहणमिति'। किं कारणमित्यत्राह। 'तद्धितोऽप्यणस्तीति'। यत्र तु गृह्यमाणं रूपं कृत एवासाधारणं तत्रैषा परिभाषा, इह त्वौपगवीति तद्धितस्यापि ग्रहणमिति

नायमस्या विषय इत्यर्थः। अथ कारशब्दादुत्पत्तौ सत्यां को दोषः, कौम्भकारेयो न सिद्ध्यति, प्रत्ययग्रहणपरिभाषया कारीशब्दात्स्त्रीभ्यो ढकि तस्यैव वृद्धिस्वरौ स्यातां, ष्यङः सम्प्रसारणन्तद्भविष्यति, तद्यथा, ष्यङन्तस्योच्यमानं सम्प्रसारणं परमकारीषगन्धीपुत्र इत्यत्रापि भवति स्त्रीप्रत्यये तदादिनियमाभावात् तथा कारशब्दादप्युत्पत्तौ कुम्भकारीशब्दस्यापि स्त्रीप्रत्ययान्तत्वाद्भविष्यति, एवमपि कारीशब्दादपि कदाचित्स्यात्, अथ ब्रूयाः, कारीशब्देन कुम्भशब्दः समसिष्यते, स्त्रीभ्यो ढगित्यत्र च ङ्याप्प्रातिपदिकादिति त्रितयाधिकारसामर्थ्यात्स्त्रीप्रत्ययान्तात्प्रातिपदिकादिति प्रत्ययो विधास्यते, स्त्रीप्रत्ययान्तस्य च प्रातिपदिकत्वं समासमन्तरेणानुपपन्नमिति कुम्भकारीशब्दादेव ढगुत्पत्स्यते, ङ्याब्ग्रहणानुवृत्त्या च सौपर्णेय इत्यत्रापि भविष्यतीति, एवमपि ङ्याबनुवृत्तेः सौपर्णेय इतिवत् कारीशब्दादपि स्यात्, गतिकारकोपपदानामिति वचनाच्च ङ्यन्तेन समासो दुर्लभः, ततः कुम्भकारशब्दादेव ङीब्यथा स्यादित्युत्तरत्रापि तदन्तविधिरभ्युपगन्तव्यः। न च कुम्भकारशब्दादप्युत्पत्तौ तदादिनियमाभावात्कारीशब्दादपि ढक्प्रत्ययप्रसङ्गः, किं कारणं स्त्रीप्रत्यये चानुपसर्जनेनेत्यनेन, प्रत्ययग्रहणे यस्मात्स तदादेरधिकस्य ग्रहणमभ्यनुज्ञायते न न्यूनस्यापि। ननु च सत्यप्युत्तरत्र तदन्तविधौ कुम्भकारीत्यत्र समुदायादपि भवतु, केवलात्कारशब्दादपि प्रसङ्गो यथोपगवीत्यादौ, ततश्च कौम्भकारेयः पक्षे दुष्यत्येव, एवं तर्हि कारशब्दादप्युत्पत्तौ कुम्भेनैकार्थीभूतस्य तावतो निष्कृष्यापत्येनायोगात्तदादिनियमाभावाच्च समुदायादेव ढग्भविष्यति। यद्वा कुम्भेनैकार्थीभूतस्य कारस्य स्त्रीत्वेनायोगात्स्त्रीप्रत्यय एव न भविष्यति, असति पुनरुत्तरत्र तदन्तविधौ स्त्रीप्रत्ययस्यात्राप्रसङ्गः, किं कारणं, यदणन्तं न तस्य निष्कृष्य स्त्रीत्वेन योगः, यस्य च स्त्रीत्वेन योगो न तदणन्तम्। अत उत्तरत्राप्यवश्यं प्रधानेन तदन्तविधिरभ्युपगन्तव्यस्तत्र यथा प्रधानेन भवति तथोपसर्जनेनापि स्यादिति प्रतिषेधोयमारभ्यते, तथा च पूर्वत्रोपसर्जनेनापि तदन्तविधिर्भवति, न षट्स्वस्रादिभ्यः प्रियपञ्चा द्रौपदीति, अतिक्रान्ता भवन्तमतिभवतीति। स्यादेतत्। पूर्व-

Digitized by Google

त्रोपात्तं तदन्तं वा स्त्रियामित्यनेन विशेष्यते, टिड्ढाणञित्यादिषूपात्तमेव टिदादिकं, तेन ज्ञापितेपि तदन्तविधौ बहुकुरुचरेत्यादौ टिदादेरस्त्रीत्वान्न भविष्यति, कुम्भकारीत्यत्र त्वणन्तस्य स्त्रियां वृत्तेस्तदन्तादपि भविष्यति नार्थ एतेनेति, तन्न। त्वदुक्तस्य विषयविभागस्य दुर्ज्ञानत्वात्, अतो विषयविभागज्ञापनार्थमिदमारभ्यते। नन्वारब्धेप्यस्मिन्नैष विषयविभागः शक्य आस्थातुं, पञ्चाजीत्यत्राजानामस्त्रीत्वेन तदन्तस्य स्त्रियां वृत्तेरजाद्यतष्टाबिति टाप् प्रसङ्गात्, अतो विशेषणविशेष्यभावं प्रति कामचारादजाद्यतष्टाबित्यत्र टिड्ढाणञित्यादौ चोपात्तं स्त्रीत्वेन विशेष्यते, वनो र चेत्यादावुपात्तं तदन्तस्य चेति नार्थ एतेन। एवं तर्हि तदन्तविधिज्ञापनार्थमिदमारभ्यते, अमहत्पूर्वेत्येतत्तु शक्यमकर्त्तुं, नहि महाशूद्रेत्यत्र समुदाये जातिवचने शूद्रशब्दः स्त्रियां वर्त्तते। अपर आह। लौकिकस्याप्रधानस्योपसर्जनस्येह ग्रहणं तेनापिशलिना प्रोक्तमिञश्चेत्यण्, ततोध्येत्र्यां तदधीतइत्यण्, तस्य प्रोक्ताल्लुगिति लुक्, आपिशला ब्राह्मणी, अत्र इञश्चेति विहितस्य प्रोक्तप्रत्ययस्याणो ऽप्रधानत्वात्तदन्तान्ङीब् न भवति, नन्विदानीमध्येतृप्रत्यये लुप्ते प्रकृतिरेव तदर्थमाहेति प्रधानस्त्रियामध्येत्र्यामणन्तस्य वृत्तेः स्यादेव ङीप् प्रत्ययः। स्यादेतदेवं यद्यणन्तादनुपसर्जनादित्युच्येत वयं त्वणमेवानुपसर्जनत्वेन विशेषयिष्यामः, अण्योनुपसर्जन इति, अर्थद्वारकं चाणः प्राधान्यमप्राधान्यं च, तदेतदुक्तं भवति, यस्मिन्नर्थेणुत्पन्नः स यदा प्राधान्येनोच्यते तदा तदन्तान्ङीब् भवति, यदा तु गुणभावेन तदा नेति, इह चाध्येत्र्यां सङ्क्रान्तत्वात्प्रथमस्याणोर्थो गुणभूत इति तदाश्रयस्तावन्ङीब् न भवति, यस्त्वध्येत्र्यामुत्पन्नस्तदाश्रयोपि न भवति तस्य लुप्तत्वात्। प्रत्ययलक्षणेनापि न भवति, अणाकारस्य विशेषणात्, टिड्ढाणञित्यत्र ह्यत इति वर्त्तते तत्राणन्तादकारान्तादिति विज्ञायमाने स्यात्प्रत्ययलक्षणमणा त्वकारे विशेष्यमाणे वर्णनिमित्तो ङीप् प्रत्ययः कथं प्रत्ययलक्षणेन स्यात्। ननु स्त्रियामित्यनुवृत्तेनाणं विशेषयिष्यामो योण् स्त्रियां विहित इति, एवमपि काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणीति द्वितीयेण

प्रोक्तात्लुगिति लुप्तेपि प्रथमोण्यण् स्त्रियामेवोत्पन्नस्तदन्ताद्धास्त्रण्यां वर्त्तमानान्ङीप्प्रसङ्गः, तस्मात्प्रधानाद्यथा स्यादप्रधानान्मा भूदित्येतत्प्रयोजनं सूत्रस्येति ॥

"टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम्" ॥ 'इह कस्मादिति'। लडादेशस्य स्थानिवद्भावेन टित्त्वमस्तीति प्रश्नः । 'पवमाना यजमानेति' । ननु शानजादिषु लट इत्यस्य निवृत्तत्वाद् अनादेशपक्षः स्थापितः, पवमानेत्यादिषु शानजुदाहर्त्तव्यः । 'ह्यनुबन्धकत्वाल्लट इति' । लडादिष्वकारादयोप्यनुबन्धा इति भावः । एतेन लिड्लृटौ व्याख्यातौ अनूचाना यक्ष्यमाणेति । 'ल्युडादिषु कथमिति' । ह्यनुबन्धकत्वात्तेषामपि ग्रहणेन न भाव्यमिति प्रश्नः । 'टित्करणसामर्थ्यादिति' । न च लडादिष्वपि टित्करणसामर्थ्यमित्याह । 'इतरत्रेति' । 'पठिता विद्येति' । कथमित्यनुषङ्गः । इटष्टित्त्वमुभयार्थं स्यादिति प्रश्नः । 'आगमटित्त्वमनिमित्तमिति' । आगमानां टित्त्वं ङीपो निमित्तं न भवतीत्यर्थः । कुत इत्यत आह । 'ट्युट्युलौ तुट् चेति लिङ्गादिति' । यद्यागमटित्त्वं ङीपो निमित्तं स्यात्ततः सायन्तनीत्यादौ तुट आगमस्य टित्त्वान्ङीप् सिद्ध इति ट्युट्युलोष्टित्करणमनर्थकं स्यादिति भावः । ननु च पुराणप्रोक्तेष्विति निर्द्देशेन यदा तुण् न भवति तदा ङीबर्थं तयोष्टित्त्वं स्यात्तत्र, पुराणशब्दाद्बह्वादिषु पाठान्ङीषा भवितव्यम्, अन्तोदात्तो हि पुराणीशब्दः पुनःपुनर्जायमाना पुराणीति यथा । एवमपि न ज्ञापकं बह्वादिभ्यश्चेत्यत्र वेति वर्त्तते, ततश्च ङीषा मुक्ते ङीब् यथा स्यादिति ट्युट्युलोष्टित्त्वं स्यादिति चिन्त्यमेतत् । 'सौपर्णेयीति,। सुपर्णशब्दात्पाककर्णादिङीषन्तात्स्त्रीभ्यो ढक्, ननु च सानुबन्धत्वादस्य ग्रहणेन न भवितव्यमत आह । 'निरनुबन्धक इति' । यद्यपि शिलाया ढ इति निरनुबन्धको ढशब्दोस्ति स इह स्वभावान्नपुंसकलिङ्ग इति स्त्रियां नास्तीत्युक्तं, योपि सभाया यः, ढश्छन्दसीति ढः सोपि स्त्रियां न वर्त्तते कथं, तत्र तत्र साधुरिति वर्त्तते कथं च स्त्री नाम सभायां साध्वी स्याद्यज्ञसभायां हि विदुषामधिकारः । ननु मा नाम भूद्यज्ञसभायां

Digitized by Google

साध्वी शालायां स्त्रीसभे च साध्वी भविष्यति, तत्रयज्ञसभायां साध्वी ब्राह्मणपरिषदित्यत्रापि प्रसङ्गः, एवं तर्ह्येवंविधे विषये छन्दसि सभेयीशब्दस्य प्रयोगाभावोत्र हेतुः । ‘ग्गोपि क्व चिदणकृतं कार्यं भवतीति’ । शीलं छत्रादिभ्यो ण इति यो णस्तत्राण् कृतं कार्यं भवतीति । कथं, ज्ञापकात्, यदयं कार्मस्ताच्छील्यइति टिलोपार्थं निपातनं करोति, यदि हि ताच्छीलिके णे ऽणकृतं कार्यं न स्यान्निपातनमनर्थकं स्यात्, कर्मशब्दाच्छत्रादिलक्षणे णे कृते नस्तद्धितइत्येव टिलोपस्य सिद्धत्वा,न्न चान्निति प्रकृतिभावः, अणि हि स प्रकृतिभावः, । ‘चौरी तापसीति” । चुरातपःशब्दौ छत्रादिषु पठितव्यौ । क्व चिदित्यस्य व्यावर्त्त्यं दर्शयति । ‘दाण्डा मौष्टेति’ । दण्डमुष्टिशब्दाभ्यां तदस्यां प्रहरणमिति णः । ‘औत्सी औदपानीति’ । उत्सोदपानशब्दाभ्यां भवार्थे उत्सादिभ्योऽञ्, अथ शार्ङ्गरवादिसूत्रे पुनरञ्ग्रहणं किमर्थं, यावता ऽनेनैव सिद्धं, न रूपभेदो न स्वरभेदस्तत्राह । ‘शार्ङ्गरवाद्यञ इत्यादि’ । बिदस्यापत्यं बैदी, अनृष्यानन्तर्ये बिदादिभ्योऽञ्, गोत्रं च चरणैः सहेति जातिः, तत्रौत्सीत्यादौ चरितार्थमिमं ङीपं बाधित्वा जातिलक्षणो ङीष् प्राप्नोति, यदि तर्हि तस्य निबन्धनमस्ति तदेवाञ्ग्रहणमस्तु किमत्राञ् ग्रहणेन, न वा जात्यधिकारात्, जातेरिति हि तत्र वर्त्तते, अनधिकारे हि पुंयोगादाख्यायां ङीन् प्रसङ्गः, बैदस्य स्त्री बैदी । ऊरुद्वयसीत्यादौ प्रमाणे द्वयसच्दघ्नञ्मात्रः । ‘पञ्चतयीति’ । संख्याया अवयवे तयप्. द्वयसजादिषु अनुबन्धोच्चारणं प्रातिपदिकानां ग्रहणं मा भूत् किमस्य द्वयसं किमस्य मात्रमिति । तयशब्दोपि तयतेः पचाद्यजन्तः सम्भवति । ‘ठनादिनिवृत्त्यर्थमिति’ । दण्डोस्या अस्ति, अत इनिठनौ,दण्डिका, काश्यादिभ्यष्ठञ्जिठौ काशिकेत्यादौ मा भूदित्येवमर्थम् । ‘तादृशीति’ । त्यदादिषु दृशोनालोचने कञ्च, आ सर्वनाम्नः, कञो ञकारोच्चारणमातोनुपसर्गे कः गोदेत्यादौ माभूत् । ‘इत्वरीति’ । इण्नशिजिसर्त्तिभ्यः क्वरप् । ‘आढ्यङ्करणीति’ । आढ्यसुभगेत्यादिना ख्युन् । ‘नञ्स्नञीकक्ख्युंस्तरुणतलुनानामिति’ । भाष्ये तु कञ्क्करब्इत्येतावत्सूत्रं ख्युनः पाठो नार्ष इति

तस्याप्युपसंख्यानमेव कृतम् । 'स्त्रैणी पौंस्नीति' । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । 'शाक्तिकी याष्टिकीति' । प्रहरणाधिकारे शक्तियष्ट्योरीकक् । 'तरुणी तलुनीति' । एतयोरवयोर्थे ग्रहणं तरुणी सुरेति, वयसि तु वयसि प्रथमइत्येव सिद्धं, न सिद्ध्यति, गौरादिपाठान्ङीष् प्राप्नोति, तस्माद्वयस्य-वयसि च ङीब्ङीषोर्विकल्पः, क्व चिद्गौरादिपाठात्सिद्धमिति पठ्यते तद्रू-पमात्रसिद्ध्यभिप्रायं द्रष्टव्यं, स्वरार्थं तूपसंख्यानं कर्त्तव्यमेव ॥

"यञश्च" ॥ 'आपत्यग्रहणमिति' । अपत्ये भव आपत्यः, यञ,आपत्यादितिसूत्रं कर्त्तव्यमित्यर्थः । 'द्वैप्येति' । भवादावर्थे यञ् । 'योगविभाग उत्तरार्थ इति' । उत्तरत्र यञ एवानुवृत्तिर्यथा स्याट्टिदा-दीनां मा भूदिति ॥

"प्राचां ष्फ तद्धितः" ॥ 'षकारो ङीषर्थ इति' । ननु च ष्फप्रत्ययेनैव स्त्रीत्वस्य द्योतितत्वान्ङीषा न भाव्यं तत्राह । 'प्रत्ययद्वयेनेति' । 'तद्धि-तग्रहणं प्रातिपदिकसंज्ञार्थमिति' । प्रातिपदिकसंज्ञा तु ङीषर्था । ननु च सिद्धोत्र ङीष् षित्करणसामर्थ्यात्, धातोस्तु त्रपादेः षित्त्वमङ्विधौ चरि-तार्थमिति त्रपा त्रमेत्यादौ ङीषभावः, तदेतत्साव्यासिकं तिष्ठतु तावत् । 'सर्वत्रग्रहणमित्यादि' । सर्वत्रग्रहणं तावद् उत्तरसूत्रे न कर्त्तव्यम्, आरम्भसामर्थ्यादेव प्राचामित्यस्य निवृत्तौ सर्वत्र सिद्धत्वादतस्तदिहाप-कृष्यते, तदयमर्थो भवति, सर्वत्र बाधकविषयेऽपि प्राचां मतेन यञ-न्तात्ष्फो भवतीति, एवं सप्तम्यर्थोऽपि समञ्जसो भवति । 'आवट्या-च्चापं वक्ष्यतीति' । असति पुनरपकर्षे आवट्याच्चाबुदीचां मते साव-काशः परत्वात्ष्फं बाधेत सर्वत्रग्रहणात्ष्फ एव भवति, एवं च षाच्च यञ इति चाब्विषयेऽपि प्राचां ष्फ एव भवति शार्कराक्ष्यायणी पौतिमा-ष्यायणी गौकक्ष्यायणीति ॥

"सर्वत्र लोहितादिकतन्तेभ्यः" ॥ लोहितादीति पृथक्पदं लुप्तवि-भक्तिकं, पूर्वत्र च प्राचां मते ष्फो विहित इह तु सर्वत्र मते, कोऽर्थः सर्वेषां मत-इत्यर्थः, तदाह । '[१]सर्वेषामाचार्याणां मतइति' । मतेनेति तृतीयान्तपाठे सूत्रे षष्ठ्यन्तान्त्रल्, । 'स्वतन्त्रमिति' । योऽन्यस्यावयवो न भवति तत्स्व-

१ मुद्रितमूलपुस्तके सर्वेषामाचार्याणां मतइति नास्ति ।

Digitized by Google

तन्त्रं प्रातिपदिकं, कः पुनरसावित्यत्राह । 'कपिशब्दात्पर इति' । लोहित्यायनीत्यादिर्गर्गाद्यन्तर्गणः, बभ्रुशब्दोऽपि तत्रैव पठ्यते यञ्, तु मधुबभ्र्वोर्ब्राह्मणकौशिकयोरित्यनेनैव भवति । 'कण्वात्त्वित्यादि' । कण्वशब्दात्पूर्वः कतशब्दात्तूत्तरः शकलशब्द इष्यते, कतशकलकण्वेत्ये-वमेषां संनिवेशः कार्य इत्यर्थः । किमेवं सति भवतीत्याह । 'पूर्वो-त्तराविति' । शकलशब्दोऽन्त आदिश्च यथाक्रमं ययोः पूर्वोत्तर-योर्गणयोस्तौ तथोक्तौ पूर्वो गणो लोहितादिः शकलशब्दान्तो भवति, उत्तरश्च गणः शकलशब्दादिर्भवतीत्यर्थः, सत्यमेवं भवति प्रयोजनं तु किमित्यत आह । 'ष्फाणाविति' । श्लोकं व्याचष्टे । 'प्रातिपदि-केष्वन्यथा पाठ इति' । कपिकत कुरुकत अनडुह कण्व शकलेत्येवं गर्गादिषु गणसन्निवेशः, । 'स एवं व्यवस्थापयितव्य इति' । 'एवमिति' श्लोको-क्तयानुपूर्व्येत्यर्थः । अनडुहकुरुकतशब्दावस्मात्स्थानादपकृष्यान्यत्र पाठ्यौ, शकलशब्दस्तु कतकण्वयोर्मध्ये पठितव्य इति यावत् । नन्वेवं गणद्वयादपि प्रच्युतः शकलशब्दः ष्फाणौ द्वावपि न प्रतिपद्येत, तत्राह । 'कतन्तेभ्य इति' । 'बहुव्रीहितत्पुरुषयोरेकशेष इति' । कतस्यान्तः समीपभूतः कतन्त इति तत्पुरुषेण शकलशब्द उच्यते, शकन्ध्वादि-त्वान्निपातनाद्वा पररूपं, तथा कतोऽन्तो येषां तानि कतन्तानीति बहुव्रीहिः, तत्र बहुव्रीहितत्पुरुषयोः सह विवक्षायां बहुव्रीहिः शिष्यते स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यतइति वचनात् । 'तथेत्यादि' । कण्वादिभ्य इत्यपि बहुव्रीहितत्पुरुषयोरेकशेष इत्यर्थः । कण्वस्यादिः समीपभूतः कण्वादिः शकलशब्दः, कण्व आदिर्येषां तानि कण्वादीनि ततः पूर्ववदेकशेषः, तत्र, बहुव्रीहितत्पुरुषयोर्मध्ये तत्पुरुषवृत्त्या, तत्पुरुषस-मासेन । 'मध्यवर्तीति' । गणद्वयस्य । 'प्रत्ययद्वयमपीति' । ष्फाणावि-त्यर्थः । 'शाकलाइति' । आपत्यस्येति यलोपः । अपर आह । पूर्वोत्तरौ तदन्तादी ग्राह्याविति शेषः, पूर्वो गणस्तदन्तोग्राह्यः, सर्वत्र लोहितादि-शकलान्तेभ्य इति, उत्तरो गणस्तदादिर्ग्राह्यः शकलादिभ्यो गोत्रइति । एवं ष्फाणौ प्रयोजनमिति ॥

जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय न तत्समश्चा*भ्यधिकश्च दृश्यते सत्यकामः† सत्यसंकल्पः तस्य भासा‡ सर्वमिदं विभाति इत्यादिवाक्येष्वमी सर्वज्ञतादि गुणा द्रष्टव्याः । एकैकमनवधिकातिशयाः कल्याणगुणा असंख्येया इत्याह अनवधिकेति, हेयप्रत्यनीकत्वमाह अपहतपाप्मेति, अमी गुणास्सर्वे सृष्ट्युपयोगित्वेन प्रकरणान्तरोक्ता आकृष्टा भवन्ति समाभ्यधिकनिवृत्तौ सत्यां तदेककारणत्वसिद्धिः सर्वावभासकत्वं च । सृष्टजगत्स्थित्युपयोगित्वेन कारणत्वापेक्षितं हेयप्रत्यनीकत्वं च सर्गाद्युपयोगिहेयास्पदत्वे कर्म्मवश्यत्वेन स्वातन्त्र्यादिभङ्गप्रसङ्गात् ते सर्वे तच्छब्दावगता विहन्यन्त इत्यर्थः ।

अथ स्यात् उपक्रमेऽप्येकविज्ञानेन सर्वविज्ञानमुखेन कारणस्यैव सत्यतां प्रतिज्ञाय तस्य कारणभूतस्यैव सत्यतां विकारजातस्य चासत्यतां मृद्दृष्टान्तेन दर्शयित्वा सत्यभूतस्यैव ब्रह्मणः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सजातीयविजातीयनिखिलभेदनिरसनेन निर्विशेषतैव प्रतिपादिता, एतच्छोधकानि प्रकरणान्तरगतवाक्यान्यपि सत्यं ज्ञानमनन्तं ब्रह्म निष्कलं निष्क्रियं निर्गुणं निरञ्जनं विज्ञानमानन्दमित्यादीनि सर्वविशेषप्रत्यनीकाकारतां बोधयन्ति,

अथ स्यादित्यादि, उपक्रमशब्देनोपक्रमोपक्रमो विवक्षितः तत्त्वमसीति वाक्यापेक्षया तदैक्षतेति वाक्यस्योपक्रमत्वेऽपि त्वेकविज्ञानेन सर्वविज्ञाप्रतिज्ञावाक्यं तस्याप्युपक्रमभूतमित्यभिप्रायः । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञामुखेन कारणस्यैव सत्यतां प्रतिज्ञायेति, एकविज्ञानेन सर्वविज्ञान-

* छ॰ उ॰ । ८ । ७ १ । † श्व॰ उ॰ ६ । ७ । ३ ।
‡ क॰ उ॰ । २ । ५ । १५ ।

द्वारा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञया कारणस्यैव सत्यत्वं फलितमित्यर्थः । कारणस्यैव सत्यत्वं दृष्टान्तवाक्ये कण्ठोक्तमित्याह तस्येति, । दार्ष्टान्तिकवाक्येऽपि निर्विशेषपरत्वमुक्तमित्याह सत्यभूतस्येति, । निखिलभेदशब्देन स्वगतभेदो ऽविवक्षितः विजातीयभेदान्तर्गतत्वात्स्वगतभेदस्य । शोधकवाक्यानामपि निर्विशेषपरत्वमाह एतदिति, एतच्छोधकानि कारणवाक्यावगतस्य शोधकत्वात् तदैकार्थ्येन निर्विशेषपराणीत्यर्थः । सामानाधिकरण्यस्वाभाव्यात् *निर्गुणमित्यादिशोधकवाक्यान्तरैकार्थ्याच्च सत्यं †ज्ञानं विज्ञानमानन्दमित्यादीनि शोधकवाक्यानि निर्विशेषपराणीत्यभिप्रायेणाह सत्यं ज्ञानमिति, । सत्यादिपदानां निर्विशेषपरत्वे प्रवृत्तिनिमित्तभेदाभावात् सामानाधिकरण्यलक्षणहानिरित्यत्राह सर्वविशेषप्रत्यनीकेति, ।

न चैकाकारताऽवबोधे पदानां पर्य्यायता एकत्वेऽपि वस्तुनः सर्वविशेषप्रत्यनीकाकारत्वोपस्थापनेन सर्वपदानामर्थवत्त्वादिति । नैतदेवम् एकविज्ञानेन सर्वविज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न सेत्स्यति सत्यमिथ्यात्वयोरेकताप्रसक्तिर्वा, अपि त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा सर्वस्य तदात्मकत्वेनैव सत्यत्वे सिद्ध्यति,

प्रतियोगिविशे‡षाः प्रवृत्तिनिमित्तानीत्यर्थः । तर्हि तद्व्यावृत्तिरूपधर्म्मः स्यादित्यत्राह एकाकारतामिति, आकारशब्दः स्वरूपवाची स्वरूपमेव व्यावृत्तिरिति भावः । निर्विशेषवस्तुपरत्वे पदानां पर्या§यता स्यादिति पर्यायत्वशङ्कां परिहरति न चेति, । कुत इत्यत्राह एकत्वेऽपीति, अर्थवत्त्वात्–प्रयोजनवत्त्वात् । अथ सिद्धान्त||माह नैतदे-

* छा· उ· । ६ । २ । १ । † तै· आ· । १ । ३ । ‡ प्रतियोगिभेदाइति पा· ।
§ समानशक्यतावच्छेदककत्वे सति विभिन्नशक्ततावच्छेदककत्वं पर्यायत्वम् ।
|| सिद्धान्त्याहेति पा· ।

वमिति, एकविज्ञानं सर्वविज्ञानं च किमेकं ज्ञानम्? उत ज्ञानद्वयम्? । एकत्वपक्षे किमेकविज्ञानेन सर्वविज्ञानं सर्वस्याभावादुच्यते, उतैकस्य सर्वस्य च तादात्म्यादिति विकल्पमभिप्रेत्य प्रथमं दूषयति एकेति, एकेत्यादि स्पष्टं न सेत्स्यति इति सर्व-शब्दस्य सर्वाभाववाचित्वाभावादिति भावः । द्वितीयं दूषयति सत्येति, सत्यमिथ्यात्वयोरेकताप्रसक्तिर्वेति जगतः सत्यत्वं ब्रह्मणो मिथ्यात्वं वेत्यर्थः । द्विती*यपक्षे च एकविज्ञानेन सर्वविज्ञानं स्थालीपुलाकन्यायेन सर्वस्यैकसाधर्म्याद्यदि स्यात् तत् त्वन्मते न युक्तं कार्यस्या†सत्यत्वात् एकवैधर्म्याद्वा स्यात् देवदत्तप्राधान्यज्ञानेनेतरेषामप्रधानतया ज्ञातत्ववत् तदानीं त्वन्मते मिथ्यात्वेनेत्याध्याहारः स्यात् । ज्ञातव्या‡भावेन निवृत्तिलक्षणा वा स्यात् ज्ञानद्वयवैरूप्यादस्वारस्यं चेत्यभिप्रायः । अपि त्विति । न हि घटपटयोः सत्यत्वेऽपि घटज्ञानेन पटो ज्ञातो भवतीति तद्व्यावृत्त्यर्थमाह सर्वस्य तदात्मकत्वेनैव सत्यत्व इति, ब्रह्मात्मककत्वेनैव सत्यत्व इत्यर्थः । न हि कारणावस्थे ब्रह्मणि ज्ञाते कार्य्यावस्था ज्ञाता भवतीति चेदुच्यते न हि विशेषणान्तरविशिष्टाकारेण विशेषणान्तरान्वयः अपि त्वेकस्मिन्धर्म्मिणि विशेषणद्वयान्वयो विवक्षितः, तस्माच्च ज्ञातत्वविशिष्टाकारेण सर्वत्वं सर्वत्वविशिष्टाकारेण ज्ञातता वा किंतु सर्वत्वं ज्ञातत्वं चैकाश्रयवर्त्तिनी इति, अवस्थानवगमेऽपि धर्म्मिण ऐक्येन ज्ञाततया प्रयोगो मुख्य एव दृष्टः सोऽयं देवदत्तः पूर्व्वमेव मया ऽयं ज्ञात इत्यादिषु, न हि तत्र वर्तमानकालविशिष्टत्वेन पूर्वं ज्ञातः तस्मात्परिषद्दर्शनेनामी पुरुषा दृष्टा इतिवदिदमुपपन्नम् । एकस्य सत्यत्वज्ञानेन व्यतिरिक्तं मिथ्यात्वेन ज्ञातं भवतीति चेन्न येनाश्रुतं§श्रुतं भवतीत्यादिषु वाक्येषु मिथ्यात्वेनेत्यध्याहारः एकविज्ञानस्य सर्वविज्ञानस्य च वैरूप्यम् अमुख्यत्वं च ज्ञात्रभावात्, न हि सर्वं मिथ्यात्वेन जानन् क्वचित् कश्चिज्ज्ञाताऽस्ति तस्मात्सर्वविज्ञानशब्देन सर्वज्ञाननिवृत्तिलक्षणा स्यादिति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं किं तदात्मकत्वेनैव सत्यत्वं कथं

* द्वित्वपक्षे चेति पा० । † कार्यस्यासामान्यादिति पा० ।
‡ ज्ञातृज्ञेयाभावेनेति पा० । § छा० उ० । ६ । १ । २ ।

तथा सति कथं प्रतिज्ञोपपत्तिः उपक्रमवाक्यं सत्यत्वपक्षानुगुणमपि तदु-पसंहारापेक्षया प्रबलं न तु महावाक्यस्वारस्यापेक्षया, महावाक्यं च मिथ्यात्वपक्षानुगुणं तत्त्वमसि मृत्तिकेत्येव सत्यं सदेवैकमेवेत्यादिषु तथा प्रतीतेरिति शङ्कायामाह अयमर्थ इति, प्रतिज्ञावाक्योपक्रमभूतं स्तब्धोऽसीति वाक्यमारभ्य व्याख्यातुं स्तब्धोऽसीति श्रूयमाणमध्यमपुरु-षार्थदा*र्थमाह श्वेतकेतुं प्रत्याहेति,

अयमर्थः श्वेतकेतुं प्रत्याह स्तब्धोऽस्युत तमादेश-मप्राक्ष्य इति परिपूर्ण इव लक्ष्यसे तानाचार्यान्प्रति तमप्यादेशं पृष्टवानसीति आदिश्यतेऽनेनेत्यादेशः आदेशः—प्रशासनम्, एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिभिरैकार्थ्यात्,

स्तब्धोऽसीत्यादिश्रुतिवाक्योपादानं तत्र वाक्ये स्तब्धोऽसीत्यस्यार्थ-माह परिपूर्ण इव लक्ष्यस इति, प्रच्छ इति धातुर्द्विकर्म्मकः वक्तृकर्म्मकः वाच्यकर्म्मकश्चेति तत्रादेशशब्दाभिहितं वाच्यं कर्म्मेति दर्शयितुं ताना-चार्यान् प्रतीति वक्तृकर्म्म व्याहृतं न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येत-दवेदिष्यन्कथं मे नावक्ष्यन्निति तच्छब्दनिर्दिष्टा आचार्या अत्र स्मारिताः, तानिति बहुवचनेन तमादेशमिति तच्छब्दस्याचार्यविषयत्वशङ्काव्युदासः। तमपीति श्रोतुर्दुर्ल्लभमित्यपि-शब्दाभिप्रायः । कर्म्मादि श्रोतव्यान्त-रसमुच्चयो वा ऽभिप्रेत इति श्वेतकेतुं प्रत्याहेत्यन्वयः । आदेशशब्दं व्याचष्टे आदिश्यत इत्यादिना, आदिश्यतेऽनेनेत्यादेश इति प्रत्ययार्थव्याख्यानम्। आदेशः प्रशासनमिति प्रकृत्यर्थव्याख्यानं, तत्र अकर्तरि च कारके संज्ञा-यामिति घञः कर्त्तृव्यतिरिक्तकारके विहितत्वाद्ब्रह्मणश्च प्रशासने कर्त्तृ-त्वादुपदेशकर्म्मत्वोपपत्तेश्च प्रकृत्यर्थः उपदेशः प्रत्ययार्थः कर्म्म चेति परै-र्व्याख्यातं तत्र प्रकृत्यर्थास्वारस्यं प्रत्ययार्थस्वारस्यम्, अस्मत्पक्षे प्रकृत्यर्थ-स्वारस्यं प्रत्ययार्थास्वारस्यं कर्त्तृव्यतिरिक्तकारकविषयस्य घञः कथं कर्त्र-

* स्याख्यार्थमाहेति पा॰ ।

Digitized by Google

र्थत्वं विवक्षातः कारकाणि भवन्तीति न्यायेन कर्तुरेव करणान्तरनिरपेक्षत्वलक्षणेन करणसाधर्म्यरूपेण साधकतमत्वेन करणत्वविवक्षया घञ्प्रत्यय उपपद्यते, एतदभिप्रायेण हि आदिश्यतेऽनेनेत्युक्तं न त्वादिशतीति, विवक्षया कारकप्रवृत्तिश्चेदकर्त्तरीति विधानस्य किं प्रयोजनं स्वतः-प्राप्त*स्य कर्तृव्यतिरिक्तकारकस्य कर्तरि करणत्वादिविवक्षया कर्त्रर्थत्वमस्वरसमिति विभागः प्रयोजनं सूत्रस्य प्रयोजनवत्त्वेऽपि स्वारस्यमस्वारस्यं च तुल्यं चेत् किमनेन योजनान्तरेणेति चेत् उच्यते परपक्षे प्रत्ययार्थस्यैव स्वारस्यमस्मत्पक्षे तु स्वारस्यद्वयमस्ति अर्थस्वारस्यं शब्दस्वारस्यं चेति प्रकृत्यर्थस्वारस्यं तावत् सिद्धं विवक्षितविशेषणस्यासाधारणाकाराभिधानं स्वतः प्राप्तं सर्वप्रशासितृत्वं ब्रह्मासाधारणधर्म्मः, उपदेश्यत्वं तु कर्म्मस्वरूपादेः साधारणं किंचापेक्षितविधेरनपेक्षितविधानं दुर्बलमिति न्यायादत्रावश्यापेक्षितप्रशासितृत्वज्ञापनमेव युक्तं नानपेक्षितोपदेश्यत्वज्ञापनं तस्माच्छब्दस्वारस्यमर्थस्वारस्यं चेति स्वारस्यद्वयविभवादयमेवार्थः । ब्रह्मणः कृत्स्नप्रशासितृत्वे सिद्धे हि तदत्रासाधारणाकारतया वक्तव्यं तत्र किं प्रमाणमित्यत्राह एतस्य वा इति, ।

तथा च मानवं वचः प्रशासितारं† सर्वेषामित्यादि, अत्राप्येकमेवेति जगदुपादानतां प्रतिपाद्य अद्वितीयपदेनाधिष्ठात्रन्तरनिवारणादस्यैवाधिष्ठातृत्वमपि प्रतिपाद्यते, अतस्तं प्रशासितारं जगदुपादानभूतमपि पृष्टवानसि येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवति इत्युक्तं स्यात्, निखिलजगदुदयविभवविलयादिकारणभूतं सर्वज्ञत्व–सत्यकामत्व-सत्यसंकल्पत्वाद्यपरिमितोदारगुणसागरं किं ब्रह्म त्वया श्रुतमिति हार्दो भावः,

* स्वतः प्राप्तत्वमिति पा॰ । † मनुस्मृ॰ । १२ । १२२ ।

Digitized by Google

स्मृतिमाह प्रशासितारमिति, न केवलं श्रुत्यन्तरेष्वेव प्रशासितृत्वप्रसिद्धिः अस्मिन्प्रकरणेऽपि सिद्धमित्याह अत्रापीति, अधिष्ठातृत्वं हि प्रेरकत्वं तच्च प्रशासितृत्वमिति तत्फलितमित्यर्थः, एवमादेशशब्दार्थ उक्तः । अथ तच्छब्दं च विवृण्वन्वाक्यार्थं च योजयति अत इति, येन विज्ञातं भवति तं पृष्टवानसीत्यन्वयः, येन श्रुतेन मतेन विज्ञातेनेत्यध्याहारेण योजनायाः को हेतुः । उच्यते न हि ब्रह्मणः सत्तया कृत्स्नं ज्ञातं भवति अपि तु तद्विज्ञानेनैव विज्ञातं भवतीति वस्तुसामर्थ्यात् । किंच दृष्टान्तेऽपि न हि मृत्पिण्डसत्तया घटादिर्विज्ञातो भवति अपि तु तद्विज्ञानेनेति दृष्टान्तसामर्थ्यात् । किंच आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं स्यात् कस्मिन् नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति इत्यादिश्रुत्या च, एवं दृष्टान्तसामर्थ्यात् दार्ष्टान्तिकसामर्थ्याच्च श्रुत्यन्तरकण्ठोक्त्या चैवं व्याख्यातमित्युक्तं स्यादिति कण्ठोक्त्या चाभिप्रेततया चायमेवास्याः श्रुतेरर्थ इत्यभिप्रायः । नन्वस्मिन्वाक्य उपादानत्वं हि न कण्ठोक्तं किं तु फलितं कारणत्वं ज्ञातत्वं च न कण्ठोक्तम् अत्र जगत्कारणत्वाद्यभिप्रायस्य किं प्रयोजनमित्यपेक्षायामाह निखिलजगदिति, श्रुत्यन्तरेषु यतो वा इमानि इत्यादिवाक्येषु जगत्कारणत्वलक्षणकं ब्रह्मावगतं तस्मादत्र जगत्कारणत्वगर्भं वदतः पितुस्त्वया किं ब्रह्म श्रुतमित्यभिप्राय इत्यर्थः ।

तस्य निखिलकारणतया कारणमेव नानासंस्थानविशेषसंस्थितं कार्य्यमित्युच्यत इति कारणभूतसूक्ष्मचिदचिद्वस्तुशरीरकब्रह्मविज्ञानेन कार्यभूतमखिलं जगद्विज्ञातं भवतीति हृदि निधाय येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यादिति पुत्रं प्रति पृष्टवान् पिता, तदेतत् सकलस्य वस्तुजातस्यैककारणत्वं पितृहृदि निहितमजानन्पुत्रः परस्परविलक्षणेषु वस्तुष्वन्यस्य विज्ञानेन तदन्यविज्ञानस्याघटमानतां बुद्ध्वा

अग्राह्य इति प्रश्नोक्तिः तत्पूर्व्वकश्रवणाभिप्रायेणेत्याशयेनाह त्वया श्रुतमिति, नात्र ब्रह्मेति कण्ठोक्तं, तस्मात् जगत्कारणत्वान्तर्भावप्रयोजन-ब्रह्मश्रवणप्रश्नः कृतोभवतीति सर्व्वज्ञत्वादिगुणाःकारणत्वोपयोगितयोक्ताः सृष्ट्यादयः परिपूर्णस्यैव लीलाः, अतस्सत्यकामत्वस्य कारणत्वोपयोगः। हार्दोभावः—हृदि निहितं तात्पर्यमित्यर्थः। कारणत्वे सत्यप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते कारणात्कार्यस्य द्रव्यान्तरत्वात्कारणत्वं च नोपपद्यते तथा सति ब्रह्मणोहेयास्पदत्वप्रसङ्गात्कारणत्वोपपत्तावप्येकविज्ञानेन सर्वविज्ञानं नोपद्यते नानाजातीयकार्याणां नानाजातीयकारणकत्वदर्शनादित्यत्राह तस्येति, तस्य निखिलकारणतया कार्यभूतमखिलं जगद्विज्ञातं भवतीत्यन्वयः। कारणात्कार्यस्यानन्यत्वमाह कारणमेवेति, नानासंस्थानविशेषसंस्थितं—संस्थानविशेषविशिष्टमित्यर्थः। सूक्ष्मचिदचिद्वस्तुशरीरशब्देन ब्रह्मणोहेयास्पदत्वप्रसङ्गः परिहृतः। निर्वेदादुपसत्ताय वक्तव्यमर्थं स्वयमेव कथं वदतीत्यत्राह पुत्रं प्रति पृष्टवान् पितेति, पुत्रव्यतिरिक्तानां शुश्रूषाद्यपेक्षा पुत्रस्य तु पुत्रत्वमेव ब्रह्मोपदेशहेतुरिति शास्त्रार्थः सूचितः। पुत्रपितृशब्दाभ्यामुद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच तं ह पितोवाचेति श्रुतिवाक्यं स्मारितम्, अनन्तरमिदं वाक्यं कथं नु भगवस्स आदेश इति इदं किं प्रश्नरूपम्? उत चोद्यरूपमिति संशये चोद्यपरमिति व्याचष्टे तदेतदित्यादिना, प्रतिवचनप्रकारेण प्रश्नार्थोविज्ञायते प्रतिवचने यथा सोम्यैकेनेत्यादिना दृष्टान्तैरुपपादनादिदं चोद्यरूपमित्यभिप्रायः। परिचोदयति इति—विवक्षितविशेषकण्ठोक्तिमकुर्वत् सामान्येन चोदयतीत्यर्थः।

परिचोदयति कथं नु भगवः स आदेश इति परिचोदितः पुनस्तदेव हृदि निहितं ज्ञानानन्दामलत्वैकस्वरूपम-परिच्छेद्यमाहात्म्यं सत्यसंकल्पत्वमिश्रैरनवधिकातिशयासंख्येयकल्याणगुणगणैर्जुष्टमविकारस्वरूपं परं ब्रह्मैव नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरं

Digitized by Google

स्वलीलयैव स्वसंकल्पेनानन्त-विचित्र-स्थिरत्र-चराचरस्वरूपजगत्संस्थानं स्वांशेनावस्थितमिति तज्ज्ञानेनास्य निखिलस्य ज्ञाततां ब्रुवन् लोकदृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाह

वाक्यमुपादत्ते कथं न्विति, अथ पिता ब्रह्मणो जगत्कारणत्वं तदुपयोगिगुणजातम् उपादानत्वनिमित्तत्वप्रयुक्तदोषशङ्कापरिहारं च विवक्षन्कारणज्ञानेन कार्यविज्ञानं लोकसिद्धं दर्शयतीत्याह परिचोदितः पुनरित्यादिना, ज्ञानानन्दामलत्वैकस्वरूपमिति विज्ञानमानन्दं ब्रह्मेत्यादिशोधकवाक्यार्थो विवक्षितः स्वरूपशब्दो धर्मिस्वरूपनिरूपकधर्मवाची अपरिच्छेद्यमाहात्म्यमित्यनेनानन्त-शब्दार्थो विवक्षितः स्वरूपमपरिच्छिन्नमित्यर्थः । गुणतोऽप्यानन्त्यमाह सत्यसङ्कल्पत्वमिश्रैरिति । सत्यशब्दार्थमाह अविकारस्वरूपमिति, अत्र स्वरूपशब्दोविशेष्यांशपरः । एवमविकारित्वादिश्रुतेर्विषयोदर्शितः । उपादानत्वादिप्रयुक्तविकारादिविषयं दर्शयति नामरूपेति, पूर्व्वं सूक्ष्मचिदचिद्वस्तुशरीरकमित्येतावदुक्तम् अत्र नामरूपविभागानर्हशब्देन सूक्ष्मशब्दो व्याख्यातः । अनेनोपादानत्वप्रयुक्तं चोद्यं परिहृतम् । अथ निमित्तत्वप्रयुक्तं चोद्यं परिहरति स्वलीलया इति, अवाप्तसमस्तकामस्यापि लीलार्थं जगद्व्यापार उपपद्यत इत्यर्थः । महायासरूपजगद्व्यापारस्य न लीलात्वमिति चेत्तत्राह स्वसङ्कल्पेनेति, सङ्कल्पमात्रसाध्यत्वाचायं महायास इत्यर्थः । स्वांशेन विशिष्टस्य स्वस्यांशेन ब्रुवन्वक्ष्यं लोकदृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाहेति कार्यकारणयोरनन्यत्वे दृष्टान्तमाहेत्यर्थः ।

यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति एकमेव मृद्द्रव्यं स्वैकदेशेन नानाव्यवहारास्पदत्वाद्यथा घटशरावादिनानासंस्थानावस्थारू-

Digitized by Google

पविकारापन्नं नानानामधेयमपि मृत्तिकासंस्थानविशेषत्वात् मृद्द्रव्यमेवेति व्यवस्थितं न वस्त्वन्तरमिति तथा मृत्पिण्डविज्ञानेन तत्संस्थानविशेषरूपं घटशरावादि सर्वं ज्ञातमेव भवतीत्यर्थः, ततः कृत्स्नस्य जगतो ब्रह्मैककारणतामजानन्पुत्रः पृच्छति भगवंस्त्वमेवैतद्ब्रवीत्विति,

अन्यत्वनिबन्धनचोद्यस्यानन्यत्वज्ञापनेन हि परिहार इति भावः। दृष्टान्तवाक्यमुपादत्ते यथा सोम्यैकेन मृत्पिण्डेनेति, तत्र कारणज्ञानेन कार्यविज्ञानस्य सिद्धये तयोरैक्योपपादकमुत्तरखण्डं प्रथमं व्याचष्टे एकमेवेति, तत्र वाचेति पदं व्याचष्टे नाना व्यवहारास्पदत्वायेति, वाक्शब्दोऽजहल्लक्षणया वाक्पूर्वकव्यवहारे वर्तते, वाक्पूर्वकव्यवहारश्च प्रयोजनतया हेतुरित्यर्थः। विकारशब्दार्थमाह घटशरावेत्यादिना, संस्थानमेवावस्था सैव विकारः षोडशकश्च विकार इत्यादिषु विकारशब्दस्यावस्थावद्द्रव्यपरत्वेन प्रयोगदर्शनात्तद्व्यावृत्त्यर्थमवस्थारूपविकार इत्युक्तं, नामधेयपदं व्याचष्टे नानानामधेयमिति। मृत्तिकेति पदं व्याचष्टे मृत्तिकासंस्थानविशेषत्वादित्यादिना, एवकारेण व्यावर्त्यमाह न वस्त्वन्तरमितीति, एवं कारणज्ञानेन कार्यज्ञानस्य उपपादकमुत्तरखण्डं व्याख्याय तदुपपाद्यं पूर्वखण्डं व्याचष्टे यथेति, लोके कारणज्ञानात्कार्यज्ञानं सम्भवतु तथाऽप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते विजातीयकार्याणामेककारणत्वायोगादिति बुद्ध्वा ब्रह्मैककारणत्वाज्ञानेन पुत्रः पृच्छतीत्याह तत इत्यादिना, विजातीयानामपि सर्वकार्याणां ब्रह्मैवोपादानं तदेव च निमित्तमित्युपदिदेशेत्याह ततः सर्वज्ञमिति,

ततः सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्वकारणमित्युपदिशन् स होवाच सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति, अत्रेदमिति जगन्निर्दिष्टम्। अग्र इति च

सृष्टेः पूर्वकालः, तस्मिन्काले जगतः सदात्मकतां सदेवेति प्रतिपाद्य तत्सृष्टिकालेऽप्यविशिष्टमिति कृत्वा एकमेवेति सदापन्नस्य जगतस्तदानीमविभक्तनामरूपतां प्रतिपाद्य तत्प्रतिपादनेनैव सतो जगदुपादानत्वं

उपदिशन् उपदेष्टुं सदेवेति वाक्योपादानम् इदमिति जगन्निर्दिष्टमिति प्रकृतमस्ति चेत् तत्परत्वमन्यथा प्रत्यक्षादिप्रमाणप्रसिद्धजगत्परत्वमेवेदं–शब्दस्योचितमिति भावः । अग्र इत्यादिना अनन्तरं सृष्टेर्वक्ष्यमाणत्वादग्रशब्दस्य प्रलयकालपरत्वमवगम्यत इति भावः, । तस्मिन्काले जगतः सदात्मकतां सदेवेति प्रतिपाद्येति सदात्मकतां–कारणात्मकतां सदेवेत्यनेन वैशेषिकोक्तं कदाचित्सत्त्वं कदाचिदसत्त्वं च व्यावृत्तं तेन प्रलयकालेऽपि सत्त्वं फलितमित्येवमुक्तं न तु वाचनिकोऽयमर्थः सदेवेदमग्र एकमेवासीदिति ह्यन्वयः । सच्छब्दः प्रमाणसंबन्धार्हत्वोपाधिना प्रकृतिपुरुषकालविशिष्टं ब्रह्माह कारणात्कार्यस्यान्यत्वेन जगतः कदाचित्सत्त्वं परेरुक्तं कारणभूतब्रह्मानन्यत्वेन जगतो नित्यसत्त्वमित्यर्थः । तत्सृष्टिकालेऽपीति जगत्सदेव चेत्प्रलये कोविशेष इत्यपेक्षायां द्रव्यं नित्यमेव तस्याविभक्तनामरूपावस्था प्रलयः विभक्तनामरूपावस्था कार्यता इति वैषम्यमेकमेवेति पदेनोक्तं भवतीत्यर्थः । अनेन ब्रह्मण उपादानत्वं फलितमित्याह तत्प्रतिपादनेनैवेति, भाव्यवस्थाविशेषवतः प्रागवस्थायोगो ह्युपादानत्वं, तस्माद्वक्ष्यमाणबहुत्वावस्थायाः पूर्व्वावस्थाकथनेनोपादानत्वमुक्तं भवतीत्यर्थः । कृत्स्नस्य कार्यस्य ब्रह्मैवोपादानमस्तु तथाऽप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते निमित्तान्तरसम्भवात् इति शङ्कायां तस्यैव निमित्तत्वेन निमित्तान्तरशङ्कामद्वितीयपदं व्यावर्तयतीत्याह स्वव्यतिरिक्तेति, ।

प्रतिपादितमिति स्वव्यतिरिक्तनिमित्तकारणमद्वितीयपदेन प्रतिषिद्धं तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं

Digitized by Google

भवतीत्यादावेव प्रशासितैव जगदुपादानमिति हृदि निहितम् इदानीं सुव्यक्तमेतदेवोपपादयति स्वयमेव जगदुपादानं जगन्निमित्तं च सत् तदैक्षत बहु स्यां प्रजायेयेति तदेतत्तच्छब्दवाच्यं परं ब्रह्मैव सर्वज्ञं सर्वशक्ति सत्यसंकल्पमवाप्तसमस्तकाममपि लीलार्थं विचित्रानन्तचिदचिन्मिश्रजगद्रूपेणाहमेव बहु स्यां तद-

कुलालस्य विविधपरिणामशक्तिवैकल्येनानुपादानत्वं मृत्पिण्डस्य ज्ञातृत्वविरहादनिमित्तत्वमत्र तूभयसद्भावाद्ब्रह्मैवोभयकारणमित्यर्थः । उक्तार्थस्योपक्रमसङ्गतत्वमाह तमादेशमिति, आदेशशब्देन प्रेरयितृत्वं कण्ठोक्तं येनाश्रुतं श्रुतम् इत्यादिप्रतिज्ञानेनोपादानत्वमभिप्रेतं तदुभयमत्र स्फुटमित्यर्थः । अत्रासत्कार्यवादोपन्यासनिरासवाक्यं द्वितीययोजनायां व्याख्यास्यत इति नात्रोदाहृतम् । अथ तदनन्तरवाक्यं पूरकपदान्तरैः सहोपादत्ते स्वयमेवेति,

र्थं प्रजायेयेति स्वयमेव संकल्प्य स्वांशैकदेशादेव वियदादिभूतानि सृष्ट्वा पुनरपि सैव सच्छब्दाभिहिता परा

सदेवेत्यादि, वाक्यं सजातीयविजातीयादिभेदनिषेधपरत्वेन परैर्व्याख्यातं तदुत्तरवाक्याननुगुणम् अस्मदुक्तार्थस्यैवोपपादकान्युत्तरवाक्यानीत्यभिप्रायेण जगदुपादानं जगन्निमित्तं सदिति विशेषणद्वयोपादानम् । एतद्व्याचष्टे तदेतदित्यादिना, वक्ष्यमाणसृष्ट्युपपादकविशेषणान्याह सर्वज्ञमित्यादिना, अवाप्तसमस्तकामस्य प्रवृत्त्यनुपपत्तिं परिहरति अवाप्तसमस्तकाममपि लीलार्थमिति, सङ्कल्पमात्रसाध्यत्वाच्च जगद्व्यापार आयासरूप इत्यभिप्रायेण सत्यसङ्कल्पमित्युक्तम्, अजायमानो बहुधा विजायते इत्युक्तावताररूपबहुत्वव्यावृत्त्यर्थं जगद्रूपेणेत्युक्तं, तत्र बहुशब्दार्थोऽस्तीति दर्शयितुं विचित्रानन्तेत्याद्युक्तं, बहु स्यां तदर्थं प्रजायेयेति जायतेऽस्तीत्याद्यवस्थासु जायमानाऽवस्था जातावस्था चेत्युत्पत्तावेवावस्थाद्वयमस्ति,

तत्रास्ति-शब्दवाच्योत्पन्नावस्था उत्पाद्यमानावस्था जायत इति शब्दवाच्या तत्र बहु स्यामिति वाक्ये स्यामिति पदेनोत्पन्नावस्था विवक्षिता,तत्पूर्व्वभाविन्युत्पाद्यमानावस्था तदर्थं प्रजायेयेत्युक्तेति विभागः। उत्पत्तौ साधनस्य पूर्व्वभावित्वं साध्यस्य पश्चाद्भावित्वं सङ्कल्पे तु साध्यं पूर्व्वभावि-साधनं पश्चाद्भावि तस्मात्स्यामिति पूर्व्वमुक्तं स्वयमेवोपादानभूतं तदेव सङ्कल्प्येत्यर्थः। स्वांशः प्रकृतिः तेजोऽबन्नसृष्टिवचनं वियदादेरपि प्रदर्शनार्थमिति वियदधिकरणसिद्धार्थाभिप्रायेणाह वियदादीति, श्रीभाष्ये महदादेरपि प्रदर्शनार्थमित्युक्तं, पुनरपीति व्यष्टिसृष्ट्यर्थमित्यर्थः। सैवेति सदेवेत्यादौ निर्विशेषं वस्तूक्तं सेयं देवतेति सगुणमुच्यते इति भ्रमापनयनार्थमेवमुक्तम्। उत्तरत्र तेजः परस्यां देवतायामिति हि वक्ष्यते तत्प्रत्यभिज्ञानाय परा देवतेत्युक्तम्। अत्र पूर्व्वापरेषु च सगुणं ब्रह्मैवोच्यते इत्यर्थः। इति व्यष्टिसृष्टिसङ्कल्पवाक्यमुपादत्ते हन्ताहमिति, अनुप्रविश्य नामरूपे व्याकरवाणीत्यत्रानुप्रवेशो न केवलं तत्तत्पदार्थमात्रपर्य्यन्तनामरूपव्याकरणार्थः अपि तु स्वपर्य्यन्तनामरूपव्याकरणार्थः अनुप्रवेशश्रवणेन मातापितृकुलालादिनिर्वर्त्यदेवदत्तघटादिनामरूपव्याकरणतो व्यावृत्तताऽवगमात् बहु स्यामित्युपक्रम एव स्वपर्यन्तनामरूपभाक्त्वसङ्कल्पात्तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत इति नामरूपयोर्द्वयोर्ब्रह्मपर्यन्तत्वश्रवणात् तदनुप्रविश्य सच्च त्यच्चाभवदिति च श्रवणात् व्यष्टिसृष्टिसङ्कल्पवाक्ये

देवतैक्षत हन्ताऽहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति, अनेन जीवेनात्मनेति। जीवस्य ब्रह्मात्मकत्वं प्रतिपाद्य ब्रह्मात्मकजीवानुप्रवेशादेव कृत्स्नस्याचिद्वस्तुनः पदार्थत्वम्। एवंभू*तस्यैव सर्वस्य वस्तुनो नामरूपभा-

अनुप्रवेशपूर्व्वकनामरूपव्याकरणोक्तिराद्यसृष्टेरप्युपलक्षणार्था महदहङ्कारादिनामरूपयोर्ब्रह्मत्वपर्यन्तत्वात् यस्य बुद्धिः शरीरं यस्याहङ्कारः शरीरमिति

* एवंभूतस्यैवाचिद्वस्तुन इति पा०।

हि श्रूयते अत एव हि । प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययाविति स्मृतम् । एवं व्यष्टिसृष्टिसङ्कल्पवाक्येऽपि नामरूपव्याकरणयोर्ब्रह्मपर्यन्तत्वस्य विवक्षितत्वमाद्यसृष्टिसङ्कल्पवाक्यानुरोधात् तद्धेदमिति श्रुत्यन्तरानुगुण्यात् तदनुप्रविश्य सच्च त्यच्चाभवदित्यनुप्रवेशपूर्वकब्रह्मपर्यन्तनामरूपव्याकरणोक्तेश्चावगम्यते बहु स्यामित्युक्तं नानानामरूपभाक्त्वं मृत्पिण्डस्य घटादिनामरूपभाक्त्ववत् किमद्वारकं जीवस्य देवादिनामरूपभाक्त्ववत् । किं सद्वारकमिति संशये अनेन जीवेनेत्यादिश्रुतिः सद्वारकमाह ब्रह्मणस्समष्टिनामरूपभाक्त्वमद्वारकं महदादेर्जीवम्प्रति शरीरत्वाभावात् व्यष्टिनामरूपभाक्त्वमद्वारकं सद्वारकं च तथा सति न द्विपर्यवसानहेतुता गोशब्दादिवत्, अनेन जीवेनात्मना जीवशरीरकेण मया सिंहेन भूत्वा बहवो मयाऽत्ताइतिवत् तदनुप्रविश्य सच्च त्यच्चाभवदिति जीवेऽप्यनुप्रवेशेन तन्नामभाक्त्वश्रवणात् जीवेनात्मनेति तृतीयायाः कोऽर्थः न तावत्सहयोगलक्षणेयं तृतीया कारकविभक्तौ सम्भवन्त्यामुपपदविभक्तेरन्याय्यत्वादिति न्यायेनोपपदविभक्तेरनुपपत्तेः । न च करणे तृतीया अनुप्रवेशं प्रति जीवस्य करणत्वाभावात् अनुप्रवेशस्य द्वारकर्ता हि सः जीवशब्दस्य परमात्मपर्यन्तत्वाच्च नेयं करणे तृतीया तस्मात्कर्त्तरि तृतीया । ननु तिङ्कृत्तद्धितसमासैरनभिहितं कारकं हि तृतीयाविभक्त्यभिधेयम् । अत्र तु व्याकरवाणीति तिङभिहितत्वान्न तृतीयाऽभिधेयः कर्ता तत्र प्रथमैव युक्तेति चेत् न व्याकरणकर्ता हि तिङभिहितः अनुप्रवेशकर्ता तु नाभिहित इति स तृतीयाभिधेयः नामरूपव्याकरणानुप्रवेशक्रिययोः समानकर्तृकत्वमनुप्रविश्येति क्त्वाप्रत्ययेनाभिहितमिति न तृतीयाभिधेयः कर्त्तेति चेन्न क्त्वोल्यप् कर्ता हि न क्त्वाभिधेयः अपि तु प्रत्ययान्तराभिधेयः प्रत्ययान्तरप्रतिपन्नयोः कर्त्रोरैक्यमेव क्त्वाप्रत्ययाभिधेयं यथा समानाधिकरणवाक्येषु प्रातिपदिकावगते विशिष्टार्थे विशेष्यांशैक्यमात्रं समानविभक्त्यभिधेयं न तु विशेषणान्वयोविशेष्यं वा एवमत्रापि क्त्वाप्रत्ययो न कर्त्रभिधायी अपि तु शब्दान्तरप्रतिपन्नक्रियाद्वयकर्त्रैक्यमात्राभिधायी । क्त्वाप्रत्यय एव

कर्त्त्रभिधायीति चेत् व्याकरवाणीति तिङ्प्रत्ययो निरर्थकः स्यात् तस्मा-च्छब्दान्तरप्रतिपन्नक्रियाश्रयकर्त्रैक्यमात्राभिधायी क्त्वाप्रत्यय इत्यनुप्रवेश-क्रियाकर्ता तृतीयाभिधेयः एव कर्त्तरि कृदिति कृत्प्रत्ययानां कर्त्तर्य्यभिहि-तत्वात् कृत्सञ्ज्ञकः क्त्वाप्रत्ययः कर्त्त्रभिधायीति चेन्न अर्थान्तरेष्वविहिता-नामेव कृत्प्रत्ययानां कर्त्त्रर्थत्वं न त्वर्थान्तरे विहितानां तव्यादीनां हि कर्म्माद्यर्थे विहितत्वात् । अयं तु क्त्वाप्रत्ययो भावे विहितः तथाऽधिका-रात् अत्र प्रातिपदिकार्थमात्रे यथा प्रथमा विभक्तिः तथा धात्वर्थमात्रे विहितो यः प्रत्ययः स भावार्थः अयं तु क्त्वाप्रत्ययो भावे विहित इति न कर्त्त्रभिधायी । तस्मात् तृतीयया कर्ताऽभिधीयत इति निरवद्यम् अनेनेत्यादिवाक्यं संक्षेपेण योजयति अनेनेत्यादिना, पदार्थत्वं तत्तद-वस्थावस्थितत्वं देवमनुष्याद्याकारविशिष्टत्वं न हि निराकारः पदार्थः पृथिवीत्वाकारविशिष्टो हि पृथिवीपदार्थः परमात्मपर्यन्तस्यैव वस्तु-नस्तत्तवस्थाविशिष्टत्वं न स्वतन्त्रस्येत्यर्थः । तत्पर्यन्तस्यैव देवादिनाम-भाक्त्वं चेत्याह एवं भूतस्यैवेति, मृदात्मको घट इतिचेत् ब्रह्मात्मकत्वं स्वरूपैक्येऽप्युपपद्यते शरीरशरीरिभावेन तादात्म्यमस्तु तथा सति किं प्रयोजनं सर्वशब्दानां परमात्मपर्यन्तत्वं चेत् परमात्मनि देवत्वमनुष्य-त्वादेः प्रकृत्यर्थस्य द्वित्वादेर्विभक्त्यर्थस्य चायोगात्र तत्पर्यन्तत्वमुपपद्यते इति शङ्कायां विस्तरेण वाक्यार्थमाह एतदुक्तं भवतीत्यादिना,

त्त्वमिति च दर्शयति, एतदुक्तं भवति जीवात्मा तु ब्रह्मणः शरीरतया प्रकारत्वात् ब्रह्मात्मकः यस्यात्मा शरीरमिति श्रुत्यन्तरात्, एवं भूतस्य जीवस्य शरीर-तया प्रकारभूतानि देवमनुष्यादिसंस्थानानि वस्तू-नीति ब्रह्मात्मकानि तानि सर्वाणि अतो देवो मनुष्यो यक्षो राक्षसः पशुर्मृगः पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पट इत्यादयः सर्वे प्रकृतिप्रत्यययोगेनाभि-

Digitized by Google

धायकतया प्रसिद्धाः शब्दाः लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन तदभिमानिजीवतदन्तर्यामिपरमात्मपर्यन्तस्य संघातस्यैव वाचका इति, एवं समस्तचिदचिदात्मकप्रपञ्चस्य सदुपादानता

शरीरत्वमस्तु ततः किं ब्रह्मपर्यन्ताभिधानस्येत्यत्राह प्रकारत्वात् इति, प्रकारत्वं दण्डकुण्डलादेरप्यस्तीति तद्व्यावृत्त्यर्थं शरीतया प्रकारत्वादित्युक्तम् एवं ब्रह्मात्मकत्वं शरीरशरीरिभावादित्युक्तम्। आत्मशब्दः स्वरूपैक्ये शरीरशरीरिभावे च साधारणः। अत्र शरीरशरीरिभाव एवेति किंनियामकमिति चेत्तत्राह यस्यात्मेति, जीवात्मा ब्रह्मणः शरीरमस्तु ततः किमित्यत्राह एवंभूतस्येति, देवत्वादिविशिष्टशरीराणि जीवद्वारा ब्रह्मात्मकानीत्यर्थः। ततः किमित्यत्राह अत इति, देवाद्यवान्तरजातीनामपि ब्रह्मपर्य्यन्तत्वं दर्शयितुं यक्षराक्षसादय उपात्ताः अप्राणिमत्सु स्वरूपाणां ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि भूतानां प्राणिनः श्रेष्ठा इत्यादिभिर्लोष्टकाष्ठादेर्जीवाधिष्ठितत्वश्रवणात्। काष्ठं शिलेत्याद्युक्तं छिन्नद्रुमोहि काष्ठं तत्र द्रुमावस्थाधिष्ठातृजीवापगमेऽपि काष्ठावस्थाभिमानी जीवो विद्यत एव नामरूपभाक्त्वादिति भावः। तत्तत्संस्थानवस्तुमुखेनेत्यनेन परमात्मनि देवत्वमनुष्यत्वाद्यनुपपत्तिः परिहृता भवति। देवत्वद्वित्वादीनां परमात्मस्वरूपे अव्यवधानेनान्वयाभावेऽपि देवत्वादीनां प्रकृत्यभिधेयानां प्रत्ययाभिधेयानां द्वित्वादीनां च परमात्मनि सद्वारकान्वयः संभवतीत्यर्थः। अतएव काठिन्यवान् योबिभर्तीत्यादिरुपपद्यत इत्येतदुक्तं भवतीत्यन्वयः। अथ त्रिवृत्करणादिवाक्यानां प्रस्तुतार्थानपेक्षितत्वेन तानि विहायापेक्षितवाक्यानामर्थं संग्रहेणाह एवमित्यादिना, नामरूपव्याकरणार्थं हि त्रिवृत्करणं तस्मात्त्रिवृत्करणसाध्यं नामरूपव्याकरणं सङ्कल्पवाक्ये पूर्वभाव्यभूत्उत्पत्तिवाक्ये तु त्रिवृत्करणस्य पूर्वभावित्वं युक्तं पाठक्रमेण त्रिवृत्करणस्य पश्चाद्भावित्वेऽप्यर्थक्रमेण पाठक्रमस्य बाध्यत्वात् त्रिवृत्करणं पूर्वभावि

Digitized by Google

यथाऽग्निहोत्रं जुहोति यवागूं पचतीत्यत्र हि यवाग्वाः पूर्व्वभावित्वं पाठक्रमबाधेनाङ्गीक्रियते यवाग्वा जुहोतीति यवाग्वा होमसाधनतया विहितत्वात् । तद्वदत्रापि क्रमोऽनुसन्धेयः । सन्मूलाः सोम्येमा इत्यादिवाक्यस्यार्थमाह एवमिति, सदुपादानतासन्निमित्तताशब्देन सन्मूला इत्यत्र मूलशब्दार्थः उक्तः । सदायतनशब्दार्थमाह सदाधारतेति, नियन्तृतया धारकत्वाद्धारकत्वाक्षिप्टमर्थमाह सन्नियाम्यतेति, अनेन शेषत्वमप्यर्थसिद्धं शरीरतया हि शरीरत्वं शेषत्वं धार्यत्वं नियाम्यत्वं च तदप्याह सच्छेषतादीति,

सन्निमित्तता सदाधारता सन्नियाम्यता सच्छेषतादि सर्वं च सन्मूलाः सोम्येमाः प्रजास्सदायतनास्सत्प्रतिष्ठा इत्यादिना विस्तरेण प्रतिपाद्य कार्यकारणभावादिमुखेनैतदात्म्यमिदं सर्वं तत्सत्यमिति कृत्स्नस्य जगतो ब्रह्मात्मकत्वमेव सत्यमिति प्रतिपाद्य कृत्स्नस्य जगतः स एवात्मा कृत्स्नं जगत्तस्य शरीरं तस्मात्त्वं–शब्दवाच्यमपि जीवप्रकारं ब्रह्मैवेति सर्वस्य ब्रह्मात्मकत्वं प्रतिज्ञातं तत्त्वमसीति जीवविशेषे उपसंहृतम् ।

आदिशब्देनानुक्तमविरुद्धमन्यतोग्राह्यमिति न्यायादन्यदपेक्षितं गृह्यते कार्य्यकारणभावादिमुखेनेत्यादिशब्देन सदाधारकत्वादिकं विवक्षितं तेन ब्रह्मात्मकत्वमेव सत्यमिति प्रतिपाद्यते धारकत्वादिभिस्तावच्छरीरात्मभावः सिद्धः कार्यकारणभावाच्च सिध्यति स्वरूपमात्रस्य कारणत्वायोगेन विशिष्टस्यैव कारणत्वात् ॥

ब्रह्मात्मकत्वमेवेत्येवकारेण स्वपर्यन्तत्वं प्रामाणिकमित्युक्तं भवति, एतदात्म्यमेव–एतदात्मकं स्वार्थे ष्यङ् । सम्बन्धार्थे वा एतदात्मसम्बन्धीत्यर्थः अस्यात्मनः शरीरतया सम्बन्धीत्युक्तं भवति, ऐतदात्म्यमिदं सर्वं स आत्मेति निर्देशो रामानुजं लक्ष्मणपूर्व्वजं चेति वन्मन्तव्यः । आत्मशब्देन फलि-

Digitized by Google

परिच्छिन्नत्वाभावाच्च, न द्वितीयः साध्याविशिष्टत्वप्रसङ्गात् । यद्यद्वादिमत्त्वं कालतः परिच्छिन्नत्वं तदन्तवत्त्वे प्रयोजकमिति विवक्षितं, तदपि न अविद्यानिवृत्तौ व्यभिचारात्, न तृतीयः, विकल्पासहत्वात्किं वास्तवसंख्यापरिच्छिन्नत्वं विवक्षितम्? उत व्यावहारिकसंख्यापरिच्छिन्नत्वम्? आद्ये घटादिष्वपि त्वन्मतेनासिद्धत्वाद्व्याप्तिशून्यता, द्वितीये त्वेकमेवाद्वितीयमित्येकत्वव्यवहारविषये नित्यतया स्वाभ्युपगते ब्रह्मणि व्यभिचारः, वैशेषिकैः संख्याशून्यत्वेनाभिमतेषु क्रियादिष्वनित्यत्वमस्तीति तद्वदेव संख्याशून्यत्वे स्वाभिमतब्रह्मणोऽप्यनित्यत्वप्रसङ्गः स्यात्तैर्नित्यतयाऽभिमतजातौ व्यभिचाराद्प्रसक्तिश्चेत्तैर्नित्यतयाऽभिमतदिक्कालादिषु व्यभिचारात् संख्यावत्त्वेऽप्यनित्यत्वाप्रसक्तिः, तेषामपि पक्षीकाराद्दोष इति चेन्नित्यतयाऽभिमतजातेरपि त्वया पक्षीकार्य्यत्वात् अव्यभिचरितं संख्याशून्यत्वे अनित्यत्वं क्रियादेरिव ब्रह्मणः प्रसज्येत, अतः प्रसञ्जकविपर्ययेऽपि प्रसञ्जनीयानिष्टधर्मापत्तिलक्षणप्रतितर्कपराहतत्वाच्च तर्काभासता, आत्मानन्त्यस्य पूर्वमुपपादितत्वादेकैकस्मिन् कल्पे एकैकमुक्तावपि सर्वमोक्षप्रसङ्गो न स्यादिति प्रधानपुरुषयोरीश्वराधिष्ठेयत्वसम्भवाच्च तज्ज्ञानशक्त्योर्विषयत्वं सर्वमोक्षाभ्युपगमेऽपि न निर्विषयत्वं प्रधानस्य ज्ञानबाध्यत्वाभावेन सर्वमुक्तदशायामप्यवस्थितिसंभवान्मुक्तानामपीश्वरसाक्षात्कार्य्यत्वनियम्यत्वोपपत्तेश्च । कदाचित्सर्वमोक्षमिच्छतां पक्षे तदानीमीश्वरेच्छाप्रयत्नादीनां निर्विषयत्वं च नानिष्टमिति न तत्प्रसञ्जनीयम् । अन्ये तु परमाणूनां पुरुषाणां च संख्याया अन्तमीश्वरो गच्छति चेत्सर्वपुरुषमोक्षादीश्वरस्येशनमविषयं स्यात्, अन्तं न गच्छति चेद् असर्वज्ञतेत्यस्य सूत्रस्यार्थमाहुः, तत्रापि वैशेषिकादिषु कदाचित्सर्वमोक्षमिच्छतां चायमनिष्टप्रसङ्गः स्यात् तदानीमपि सार्वज्ञ्यस्य नर्निर्विषयत्वं मुक्तानां परमाणूनां च नित्यतया साक्षात्कार्यत्वादतीतागामिनामपि साक्षात्कारसम्भवाच्च सर्वमुक्तिमनिच्छतां पक्षे त्वमुक्तात्मविषयमीशनं सम्भवतीति न तस्य निर्विषयत्वप्रसङ्गः सर्वमोक्षाभावश्चात्मानन्त्यादुपपद्यत इत्युक्तम् । नन्वेकोपाधिगृहीतानां भिन्नानां घटादीनां संख्येयत्वदर्शनात्त-

Digitized by Google

द्विपरीतमानन्त्यं श्रुतिमनपेक्ष्य तर्कमात्रेण कल्पयितुमशक्यमिति चेन्न अनादीनां निमेषकाष्ठाकलामुहूर्तोपाधीनामसंख्येयत्वस्य सर्वाभ्युपगन्तव्यत्वेन तेष्वेकोपाधिगृहीतत्वे सति भिन्नत्वस्य व्यभिचारादिति । पशुपत्यधिकरणं समाप्तम् ॥

उत्पत्त्यसंभवाधिकरणम् । **सू० उत्पत्त्यसम्भवात् ॥ ४० ॥**

भा० कपिलादितन्त्रसामान्यात् भगवदभिहितपरमनिःश्रेयससाधनावबोधिनि पञ्चरात्रतन्त्रेऽप्यप्रामाण्यमाशङ्क्य निराक्रियते तत्रैवमाशङ्क्यते परमकारणात्परब्रह्मभूताद्वासुदेवात्सङ्कर्षणो नाम जीवो जायते सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते, तस्मादनिरुद्धसंज्ञोऽहङ्कारो जायते इति हि भागवतप्रक्रिया, अत्र जीवस्योत्पत्तिः श्रुतिविरुद्धा प्रतीयते, श्रुतयो हि जीवस्यानादित्वं वदन्ति "न जायते म्रियते वा विपश्चिदित्याद्याः ॥

सू० न च कर्त्तुः करणम् ॥ ४१ ॥

भा० सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते इति कर्त्तुर्जीवात्करणस्य मनस उत्पत्तिर्न सम्भवति एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चेति परस्मादेव ब्रह्मणो मनसोऽप्युत्पत्तिश्रुतेः, अतः श्रुतिविरुद्धार्थप्रतिपादनादस्यापि तन्त्रस्य प्रामाण्यं प्रतिषिध्यत इत्येवं प्राप्ते प्रचक्ष्महे—

टी० सू० उत्पत्त्यसंभवात्, अवान्तरसङ्गतिमाह "कपिलादी"ति, आशङ्क्येति पूर्वपक्षसूत्रद्वयार्थः । निराक्रियत इति सिद्धान्तसूत्रद्वयार्थ इति विभागः। पञ्चरात्रं किं सांख्यादिवत् क्वचित् प्रमाणं? मुत कार्त्स्न्येन प्रमाणं? किमस्य क्वचिच्छ्रुतिविरोधोऽस्ति? उत क्वचिदपि नास्ती? ति किमत्र जीवे-

त्पत्त्यादिकं विवक्षित? मुत ने? ति, सङ्कर्षणप्रद्युम्नादिशब्दाः किं जीवादिशब्दविशेषणतया निर्दिष्टाः? उत जीवादिशब्दाः सङ्कर्षणादिशब्दविशेषणतया निर्दिष्टा? इति सङ्कर्षणादिशब्दानां जीवादिशब्दविशेषणत्वे जीवोत्पत्त्यादिकं विवक्षितमिति श्रुतिविरोधसद्भावादविरुद्धांशे प्रामाण्यात्तदेकदेशस्योपादेयत्वं, जीवादिशब्दानां सङ्कर्षणादिशब्दविशेषणत्वे जीवोत्पत्त्यादेरविवक्षितत्वेन क्वचिदपि श्रुतिविरोधो नास्तीति कार्त्स्न्येन प्रमाणत्वात् कार्त्स्न्येन निःश्रेयसार्थिभिरुपादेयत्वं सिद्ध्येत् । कथमाशङ्क्यत इत्यत्राह "तत्रैवमिति, परमकारणादित्यादिः पञ्चरात्रग्रन्थः सू· । न च कर्तुः करणम्, कर्ता जीवः ।

सू० विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४२ ॥

भा० वा–शब्दात्पक्षो विपरिवर्तते, विज्ञानं चादि चेति परं ब्रह्म-विज्ञानादि सङ्कर्षणप्रद्युम्नानिरुद्धानामपि परब्रह्मभावे सति तत्प्रतिपादनपरस्य शास्त्रस्य प्रामाण्यं न प्रतिषिध्यते ।

टी० सू· विज्ञानादिभावे वा तदप्रतिषेधः, सिद्धान्तसूत्रतां दर्शयति "वा–शब्दादि"ति, अपि वा कर्तृसामान्यात् । एकं वा संयोगरूपचोदनाख्याविशेषादितिवदिति भावः । विज्ञानं चादि चेतीति चैतन्यस्वरूपिण इति मन्त्रलिङ्गात् भगवान्वासुदेवः परा प्रकृतिरिति वचनाच्च वासुदेवस्य ज्ञानस्वरूपत्वपरमकारणत्वे प्रतिपादिते, तस्माद्विज्ञानादिशब्देन भगवान्वासुदेवः स्यादि[1]ति इति भावः विज्ञानैश्वर्य्यादिगुणसद्भाव इति योजनायां तेषां सङ्कर्षणादीनां वासुदेवत्वमार्थं स्यात्, ततोऽपि शाब्दत्वानुगुणयोजना वरं, सत्यं ज्ञानमनन्तं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः, संभूतः । यतो वा इमानि जायन्त इति ज्ञानस्वरूपस्य ब्रह्मणः परमकारणत्वप्रतिपादकवेदान्तैककण्ठ्यद्योतनार्थं च विज्ञानं चादि चेति व्याख्यातं, सङ्कर्षणेत्यादिना सूत्रस्य वाक्यार्थ उक्तः, । के पुनः सङ्क-

१ स्यादित इति भावः । इति पाठान्तरं युक्तं प्रतीमः ।

षेणादयः, तेषां परब्रह्मभावः कथं तथा ब्रह्मण उत्पत्तिर्वा कथं शास्त्रप्रामाण्यं वा कथमित्यत्राह—

भू० एतदुक्तं भवति भागवतप्रक्रियामजानतामिदं चोद्यं यज्जीवोत्पत्तिर्विरुद्धाऽभिहितेति वासुदेवाख्यं परं ब्रह्मैवाश्रितवत्सलं स्वाश्रितसमाश्रयणीयत्वाय स्वेच्छया चतुर्धाऽवतिष्ठत इति हि तत्प्रक्रिया, यथा पौष्करसंहितायां "कर्त्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते । क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तदित्यादि, तत्र चातुरात्म्योपासनं वासुदेवाख्यपरब्रह्मोपासनमिति सात्वतसंहितायामुक्तं, "ब्राह्मणानां हि सद्ब्रह्म वासुदेवाख्ययाजिनाम् । विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महदि"ति, तद्धि वासुदेवाख्यं परं ब्रह्म सम्पूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैर्ज्ञानपूर्वेण कर्मणाऽभ्यर्चितं सम्यक् प्राप्यते विभवार्चनाद्व्यूहं प्राप्य व्यूहार्चनात्परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यते इति वदन्ति। विभवो हि नाम रामकृष्णादिप्रादुर्भावगणः, व्यूहो नाम वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपश्चतुर्व्यूहः सूक्ष्मं तु केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परं ब्रह्म, यथा पौष्करे "यस्मात्सम्यक् परं ब्रह्म वासुदेवाख्यमव्ययम् । अस्मादवाप्यते शास्त्रात् ज्ञानपूर्वेण कर्मणे"त्यादि, अतः सङ्कर्षणादीनामपि परस्यैव ब्रह्मणः स्वेच्छाविग्रहरूपत्वात् ।

टी० "एतदुक्तं भवती"ति, भागवतेत्यादि कर्त्तव्यत्वेनेत्यादिवचनमागमशब्दनिर्वचनपरं स्वसंज्ञाभिः नमः शब्दाद्युपेतैस्तत्तद्व्यूहनामभि-

Digitized by Google

रित्यर्थः, क्रमागतैरुपास्यवस्तुप्रतिपादनाच्छास्त्रस्यागमत्वमिति श्लोकार्थः चातुरात्म्यमुपास्यत इत्यनेन संकर्षणादिचातुर्विध्यं समाश्रयणीयत्वायेति दर्शितं । संकर्षणादीनां परब्रह्मभावः कथमित्यत्राह "तच्चे,,ति, चातुरात्म्योपासनपरशास्त्रस्य वासुदेवाख्यपरब्रह्मोपासनपरत्वदर्शनाच्चातुर्विध्यं वासुदेवस्येति सिद्धं, सङ्कर्षणाद्यर्चनं किमर्थं वासुदेवार्चनं हि मोक्षप्रदं न केवलं चातुरात्म्योपासनमेव प्रतिपाद्यते विभवार्च्चनादिकमपि प्रतिपाद्यत इति शङ्कायामयोगव्यवच्छेदज्ञापनार्थं चातुरात्म्यविवरणार्थं चाह— "तद्धी"ति, सूक्ष्मं परमित्येकार्थं पदद्वयं विभवादयः क इत्यत्राह "विभवो ही"ति, चतुर्व्यूहश्चतुर्विभागः । उक्तार्थे प्रमाणमाह "यथा पौष्कर"इति, अस्मा[१]दित्यादिवचने परस्य ब्रह्मणो वासुदेवाख्यस्य प्राप्यत्वं दर्शितम्, आदि-शब्दोपात्तेषु तत्प्रकरणस्थवचनेषु व्यूहविभवार्च्चनतत्फलादि द्रष्टव्यमित्यर्थः । न केवलं श्रुतिविरोधाभावः तदानुगुण्यमेवास्तीति दर्शयितुम् अजायमान इत्यादिवाक्यमुपात्तम् ।

सू० अजायमानो बहुधा विजायत इति श्रुतिसिद्धस्याश्रितवात्सल्यनिमित्तस्वेच्छाविग्रहसंग्रहरूपजन्मनोऽभिधानात् तदभिधायिशास्त्रप्रामाण्यस्याप्रतिषेध इति, तच्च जीवमनोऽहङ्कारतत्त्वानामधिष्ठातारः संकर्षणप्रद्युम्नानिरुद्धा इति तेषामेव जीवादिशब्दैरभिधानमविरुद्धं यथाऽऽकाशप्राणादिशब्दैर्ब्रह्मणोऽभिधानम् ॥

सू० विप्रतिषेधाच्च ॥ ४३ ॥

सू० विप्रतिषिद्धा हि जीवोत्पत्तिस्तस्मिन्नपि तन्त्रे यथोक्तं परमसंहितायाम् । "अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणा कर्मिणां क्षेत्रं प्रकृतेरूपमुच्यते ।

१ यस्मादित्यादि इति पा० ।

व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः" इति, एवं सर्वास्वपि संहितासु जीवस्य नित्यत्ववचनाज्जीवस्वरूपोत्पत्तिः पञ्चरात्रतन्त्रे प्रतिषिद्धैव, जन्ममरणादिव्यवहारस्तु लोकवेदयोर्जीवस्य यथोपपद्यते तथा नात्मा श्रुतेरित्यत्र वक्ष्यते,

टी० जीवादिसामानाधिकरण्यनिर्वाहमाह "तत्रे"ति, जीवादिशब्दैः संकर्षणादीनां विशेष्यत्वेऽनुकूललिङ्गमुक्तं, संकर्षणादिशब्दैर्जीवादीनां विशेष्यत्वे प्रतिकूललिङ्गमुच्यते । सू॰ विप्रतिषेधाच्च,। विप्रतिषेधो विशेषेण प्रतिषेधो विविधप्रतिषेधो वा यथाश्रुतिविप्रतिपन्नेत्यत्रास्मत्तः श्रवणेन विशेषतः प्रतिपन्नेत्यर्थः तद्वत्, यथा बुद्धिक्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धमित्यत्र विप्रतिषेध-शब्दः तथाऽयमपि निषेधपर इति भावः । यद्वा विप्रतिषेधो व्याघातः, जीवोत्पत्तिप्रतिषेधप्रतिपादकशास्त्रेण जीवोत्पत्तिवचनस्य व्याघातमभिप्रेत्य व्याघातहेतुभूतजीवोत्पत्तिनिषेधमाह "प्रतिषिद्धा ही"ति, सर्वास्वपि संहितास्वित्यनेन विप्रतिषेधशब्दे विशब्दार्थो विवक्षितः जीवोत्पत्तिः कथ्यतां नाम तथाऽपि न श्रुतिविरोधः श्रुतावपि जीवोत्पत्तिदर्शनादित्याह "जन्मजरामरणादि" इति, तर्हि तस्य निर्वाहः कथमित्यत्राह—

मू० अतो जीवस्योत्पत्तिस्तत्रापि प्रतिषिद्धैवेति जीवोत्पत्तिवादनिमित्ताप्रामाण्यशङ्का दूरोत्सारिता, यस्त्वेष केषांचिदुद्घोषः, "साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवानिति साङ्गेषु वेदेषु पुरुषार्थनिष्ठा न लब्धे"ति वचनाद् वेदविरुद्धं तन्त्रमिति सोऽप्यनाघ्रातवेदवचसामनाकलिततदुपबृंहणन्यायकलापानां श्रद्धामात्रविजृम्भितः, यथा प्रातः प्रातरनृतं ते वदन्ति पुरो-

दयाज् जुहुति येऽग्निहोत्रमिति अनुदितहोमनिन्दोदित-होमप्रशंसार्थेत्युक्तं यथा च भूमविद्याप्रक्रमे नारदेन ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चममित्यारभ्य सर्वं विद्यास्थानमभिधाय सोऽहंभगवोमन्त्रविदेवास्मि नात्मविदिति भूमविद्यात्यतिरिक्तासु सर्वासु विद्यास्वात्मवेदनालाभवचनं वक्ष्यमाणभूमविद्याप्रशंसार्थं कृतम्, अथवा अस्य नारदस्य साङ्गेषु वेदेषु यत्परतत्त्वं प्रतिपाद्यते तद्लाभनिमित्तोऽयं वादः, एवमेव शाण्डिल्यस्येति पश्चाद्वेदान्तवेद्यवासुदेवाख्यपरब्रह्मतत्त्वाभिधानादवगम्यते, वेदार्थस्य दुर्ज्ञानतया सुखावबोधार्थः शास्त्रारम्भः परमसंहितायामुच्यते ।

टी० "वक्ष्यत" इति, करणाद्याश्रयणशरीरसंयोगकृतज्ञानविकाससंकोचलक्षणावुत्पत्तिविनाशाविति वक्ष्यत इत्यर्थः । उपसंहरति "अत" इति, यैर्जीवोत्पत्त्यादिप्रतिपादनेन शास्त्रस्याप्रामाण्यं सिद्धान्तितं तैरेतच्छास्त्राविवक्षितमर्थं विवक्षितत्वेनारोप्याप्रामाण्यमुक्तं स्यात्, अतोऽप्रामाण्यं पूर्वपक्षीकार्य्यं न सिद्धान्तीकर्त्तव्यं तस्मात्परैरुक्तं सूत्रानभिमताप्रामाण्यहेतुं दूषयितुमनुवदति "यच्चैष" इति, सोऽपीत्यादिना, निष्ठामलभमान इत्यस्य परोक्तार्थाभ्युपगमेन परिहार उक्तः । अथ अन्यथार्थं वक्ष्यंस्तमर्थं दृष्टान्ते शिक्षयति "अथवे"ति, तमेव दार्ष्टान्तिकेऽप्याह "एवमि"ति, कथमेवमवगम्यत इत्यत्राह "पश्चाद्वेदान्तवेद्ये"ति, श्रीपञ्चरात्रस्य वेदार्थविशदीकरणरूपतामाह "तथे"ति, तथा उक्तानुगुणमेवेत्यर्थः संशयेन विना क्वचिदिति संशयोऽनधीतशाखासु श्रुतार्थविरोधोऽस्ति नचैः त्येवं रूपः । यद्वा प्रतिपन्नेष्वर्थेषु यच्छ्रेयस्तन्न जानामीत्यर्थः ॥

सू० "अधीता भगवन्वेदाः साङ्गोपाङ्गाः सविस्तराः । श्रुतानि च मयाऽङ्गानि वाकोवाक्ययुतानि च । न चैतेषु समस्तेषु संशयेन विना क्वचित् । श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति इति, । वेदान्तेषु यथासारं संगृह्य भगवान्हरिः भक्तानुकम्पया विद्वान् । संचिक्षेप यथासुखम् इति च, अतः स भगवान्वे[1]दान्तवेद्यः परब्रह्माभिधानो वासुदेवो निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितोदारगुणसागरः सत्यसंकल्पश्चातुर्वर्ण्यं चातुराश्रम्यव्यवस्थयाऽवस्थितान्धर्मार्थकाममोक्षाख्यपुरुषार्थाभिमुखान् भक्तानवलोक्यापारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः स्वस्वरूपस्वविभूतिस्वाराधनतत्फलयाथात्म्यावबोधिनो वेदान् ।

टी० अधीता भगवन्वेदा इत्यादिश्लोकानामुत्तरश्लोकोऽयं वेदान्तेषु यथासारं संगृह्य भगवान् हरिः । भक्तानुकम्पया विद्वान् संचिक्षेप यथासुखमिति मोक्षधर्मे "यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च गृणन्ति सत्यधर्माणः सत्यं सत्येषु सामस्विति एकायनशाखाविषये पारमेश्वरं वचनं "महतो वेदवृक्षस्य मूलभूतो महानयं स्कन्धभूता ऋगाद्यास्ते शाखाभूतास्तथा मुने इत्यादि द्रष्टव्यं बौद्धाद्युपदेशवदिदमपि विप्रलम्भाय कृतं किं न स्यात् वेदार्थ उच्यते चेत् अत एव वेदा अध्यापयितव्याः किं ग्रन्थनिर्माणेनेत्याशङ्कां परिजिहीर्षुर्वेदान्तेषु यथासारमित्यादिवचनार्थमभिप्रयन्नाह "अतः स भगवानि"ति, अतो वेदार्थस्य दुरवबोधार्थत्वात् भगवानित्यादिविशेषणानि भ्रमविप्रलम्भादिसम्भवशङ्काव्यावृत्त्यर्थानि भगवच्छब्देन दो[2]षप्रत्यनीककल्याणैकतानत्वे विवक्षिते, किं प्रमाणमित्यत्राह

१ वेदैकवेद्य इति पा० ।

२ हेयप्रत्यनीकेति पा० ।

Digitized by Google

'वेदैकवेद्यमिति, पुरुषत्वात्स दोष इत्याद्यनुमानस्य धर्मिग्राहकप्रमाणबाधमभित्यैक-शब्दप्रयोगः, तद्धि ब्रह्म न वासुदेव इत्यत्राह "परब्रह्माभिधान" इति, भगवच्छब्दसमाख्याप्रमाणसिद्धमर्थमाह "निखिल हेये"ति, वक्ष्यमाणव्यवस्थानुगुणविशेषणमाह "सत्यसङ्कल्प" इति, भक्तान् शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनमिति वचनात् भक्तिः सम्यक्-शास्त्रज्ञानहेतुः सात्त्विकजनसंरक्षणाय वेदापाश्रयेण तदुपमर्दनकारिणामसुराणां निरसनाय कृतं बुद्धादिशास्त्रमिति तच्च न रक्षणोपयुक्तम् अतो भक्तरक्षणार्थं कृतेऽस्मिन् प्रबन्धे न दोषगन्ध इति भावः। विप्रलम्भासम्भवार्थमाह "अपारे"ति, वेदैरेवालं किं पञ्चरात्रेणेत्यत्राह-

सू० ऋग्यजुः सामाथर्वभेदभिन्नानपरिमितशाखान् विध्यर्थवादमन्त्ररूपान् स्वेतरसकलसुरनरदुरवगाहांश्चावधार्य तदर्थयाथात्म्यावबोधिपञ्चरात्रं शास्त्रं स्वयमेव निरममीतेति निरवद्यम्। यत्तु परैः सूत्रचतुष्टयं कस्यचिदिह ह्यांशस्य प्रामाण्यनिषेधपरं व्याख्यातं तत्सूत्राक्षराननुगुणं सूत्रकाराभिप्रायविरुद्धं च। तथा हि सूत्रकारेण वेदान्तन्यायाभिधायीनि सूत्राण्यभिधाय।

टी० "ऋग्यजुः सामाथर्वभेदभिन्नानपरमितशाखानि"ति, विध्यर्थवादमन्त्ररूपा"निति, तत्त्वविषयं यदत्रोच्यते तत्सर्वमर्थवादादिषु प्रतिपादितमिति भावः। विलक्षणज्ञानैर्ज्ञायत एव किमनेनेत्यत्राह "स्वेतरे"ति, निरवद्यं पाशुपतादिषु यदवद्यं तन्नास्त्यत्रेति भावः। ननु बौद्धार्हतादयो भगवत्प्रणीताः तद्वदिदं किं न स्यात्? उच्यते अवतारप्रयोजनं हि दुष्कृद्विनाशनं साधुपरित्राणं च तत्र दुष्कृद्विनाशाय बौद्धादिप्रणीतिः, इदं तु नारदशाण्डिल्यादिसाधुपरित्राणार्थेति वैषम्यमिति नारदादयो ह्यत्र श्रोतारः, नारदादिश्रोतृत्वकथनं विप्रलम्भार्थमिति चेन्न सर्वत्राविश्वासप्रसङ्गात्, सर्वशक्तिना भगवता वेदानामपौरुषेयत्वादिख्यापनं विप्र-

लिप्सया कृतमिति शङ्का कर्तुं हि शक्यते । किञ्च वेदोदिता एव अर्थाः सर्वत्र सहस्रशश्च पञ्चरात्रे श्रूयन्ते बौद्धादिषु हि वेदप्रामाण्यनिराकरणादिकं दृश्यते । किञ्च प्रमाणभूतेषु प्रबन्धेषु बुद्धागमादीनां श्रुतिविरोधात् परित्याज्यत्वं श्रूयते न तथा श्रीपञ्चरात्रस्य, प्रत्युत श्रुतिसारार्थविशदीकरणरूपत्वमेव दृश्यते, एवं नारदशाण्डिल्यादिसात्विकसंरक्षणाय प्रवृत्तत्वाद्वेदविहितानेकार्थप्रतिपादकत्वाद्वेदार्थावगमसौकर्याय प्रवृत्तत्वेन प्रमाणभूतप्रबन्धेषु श्रूयमाणत्वात् वेदार्थविशदीकरणरूपत्वानुगुणं वेदान्तार्थस्य प्रतिपादनदर्शनादतिशङ्कायां वेदेऽप्यनाश्वासप्रसङ्गाच्च दुष्कृद्विनाशार्थप्रवृत्तश्रुतिविरुद्धार्थप्रतिपादकप्रमाणभूतप्रबन्धान्तरनिन्दितबुद्धागमादिसाम्यबुद्धिः, श्रीपञ्चरात्रशास्त्रसमीपं नासादयतीत्यर्थः, एवं परोक्ताप्रामाण्यहेतुर्निराकृतः । अथ परोक्तं सूत्रार्थमनूद्य दूषयति "यस्त्वि"ति, सूत्रचतुष्टयमिति न सूत्रद्वयमित्यर्थः । सूत्राक्षराननुगुणं वा-शब्दतदप्रतिषेधादिसूत्रपदाननुगुणमित्यर्थः । अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्, एकं वा संयोगरूपचोदनाख्याविशेषादित्यादिषु वा-शब्दः पक्षविपरिवृत्तिपरो दृष्टः, विप्रतिषेध-शब्दोऽपि तदप्रतिषेधवाशब्दसाहचर्यान्निषेधार्थ एवेति भावः । सूत्राकाराभिप्रायविरोधमुपपादयति "तथाही"ति, सूत्रकारेण सूत्रेऽयमर्थ उक्तश्चेत् किमर्थं महाभारते कथनमिति शङ्कायां प्रयोजनभेदं दर्शयति "वेदान्तन्यायाभिधायीनी"ति-

मू० वेदोपबृंहणाय च भारतसंहितां शतसाहस्रिकां[1] कुर्वता मोक्षधर्मे ज्ञानकाण्डेऽभिहितं "गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत स" इत्यारभ्य महता प्रबन्धेन पञ्चरात्रशास्त्रप्रक्रियां प्रतिपाद्य "इदं शतसहस्राद्धि भारताख्यानविस्तरात् । आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम् । नवनीतो

१ शतसहस्रिकामिति ।

यथा दध्नो द्विपदां ब्राह्मणो यथा । आरण्यकं च वेदेभ्य ओषधिभ्यो यथाऽमृतम् । इदं महोपनिषदं चतुर्वेदसमन्वितं । साङ्ख्ययोगकृतां तेन पञ्चरात्रानुशब्दितम् । इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम् । ऋग्यजुःसामभिर्जुष्टमथर्वाङ्गिरसैस्तथा । भविष्यति प्रमाणं वा एतदेवानुशासन"मिति साङ्ख्ययोगशब्दाभ्यां ज्ञानयोगकर्मयोगावभिहितौ, यथोक्तं "ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना"मिति, भीष्मपर्वण्यपि "ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः । सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन य"इति कथमेवं ब्रुवाणो बादरायणो वेदविदग्रेसरो वेदान्तवेद्यपरब्रह्मभूतवासुदेवोपासनार्चनादिप्रतिपादनपरस्य सात्वतशास्त्रस्याप्रामाण्यं ब्रूयात् । ननु च "साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने" इत्यादिना साङ्ख्यादीनामप्यादरणीयतोच्यते शारीरकेऽपि साङ्ख्यादीनि प्रतिषिध्यन्ते अत इदमपि तन्त्रं तत्तुल्यं, नेत्युच्यते यतस्तत्रापीममेव शारीरकोक्तन्यायमवतारयति ।

टी० वेदोपबृंहणाय चेति अधीतशाखार्थस्य संशयविपर्यादिनिरासको न्यायः अनधीतशाखार्थैकरूपठेनाधीतशाखार्थज्ञानमुपबृंहणमित्यर्थः, गृहस्य इत्यादि महता प्रबन्धेन विस्तरेण इदं श्रेयः एतच्छास्त्रोक्तमेव सांसारिकफलसाधनम्, इदं ब्रह्म एतदुक्तमेव परं प्राप्यं ब्रह्म इदमनुत्तमं हितम् अपवर्गसाधनमित्यर्थः । अथर्वाङ्गिरसैः अथर्वणा अङ्गिरसा च दृष्टैरथर्ववेदप्रदेशैः ऋगादिशब्दैः तत्तदर्थोऽभिप्रेतः । साङ्ख्ययोग-

शब्दो व्याचष्टे "साङ्ख्ये"ति, कर्मज्ञानयोगोपेतमित्यर्थः, महाभारतप्रशस्तत्वहेतोरनैकान्त्यमाह "ननु चे"ति, परिहरति "नेती"ति, यतस्तत्रापीति साङ्ख्यादीनां वेदाविरुद्धांशे प्रामाण्यं कृत्वाविरोधस्य श्रीपञ्चरात्रस्य कार्त्स्न्येन प्रामाण्यमिति न्यायमवतारयतीत्यर्थः । तदुपपादयति—

भू० किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वेति प्रश्नस्यायमर्थः किं साङ्ख्ययोगपाशुपतवेदपञ्चरात्राणि एकतत्त्वप्रतिपादनपराणि पृथक्तत्त्वप्रतिपादनपराणि वा, यद्येकतत्त्वप्रतिपादनपराणि किं तदेकं तत्त्वं? यदा पृथक्तत्त्वप्रतिपादनपराणि तदैषां परस्परविरुद्धार्थप्रतिपादनपरत्वाद्वस्तुनि विकल्पासम्भवाच्चैकमेव प्रमाणमङ्गीकरणीयं, किं तदेकमित्यस्योत्तरं ब्रुवन् "ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै । साङ्ख्यस्य वक्ता कपिल इत्यारभ्य साङ्ख्ययोगपाशुपतानां कपिलहिरण्यगर्भपशुपतिकृतत्वेन पौरुषेयत्वं प्रतिपाद्य अवान्तरतपा नाम वेदाचार्य्यः स उच्यते इति वेदानामपौरुषेयत्वमभिधाय पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति पञ्चरात्रतन्त्रस्य वक्ता नारायणः स्वयमेवेत्युक्तवान्, एवं वदतश्चायमाशयः पौरुषेयाणां हि तन्त्राणां परस्परविरुद्धवस्तुवादितया अपौरुषेयत्वेन निरस्तप्रमादादिनिखिलदोषगन्धवेदवेद्यवस्तुविरुद्धाभिधायित्वाच्च यथावस्थितवस्तुनि प्रामाण्यं दुर्लभं वेदवेद्यश्च परब्रह्मभूतो नारायणः, अतस्तत्तन्त्राभिहितप्रधान पुरुषपशुपतिप्रभृतितत्त्वस्य वेदान्तवेद्यपरब्रह्मभूतनारायणात्मकतयैव वस्तुत्वमभ्युपगमनीयमिति तदिदमाह च

सर्वेषु च नृपश्रेष्ठ ! ज्ञानेष्वेतेषु दृश्यते । यथागमं यथान्यायं निष्ठा नारायणः प्रभुरि"ति यथागमं यथान्यायमिति न्यायानुगृहीतं तत्तदागमोक्तं वस्तु परामृशतो नारायण एव सर्वस्य वस्तुनो निष्ठेति दृश्यते ।

टी० "किमेतानी"ति, एकतत्त्वप्रतिपादनपरत्वे प्रमेयविशेषबुभुत्सा पृथक्तत्त्वप्रतिपादनपरत्वे प्रमाणविशेषबुभुत्सा अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति, उदिते जुहोति अनुदिते जुहोति व्रीहिभिर्यजेत यवैर्यजेत इत्यादिष्वधिकारिभेदेन कालभेदेन फलभेदेन विकल्पः सम्भवत्यनुष्ठाने, सिद्धवस्तुनि तु विकल्पासम्भवेन विरोधादेकमेव प्रमाणं स्यादित्यर्थः । अस्योत्तरमिति प्रष्टुरभिप्रायं विकल्प्योत्तरमाहेति भावः । ज्ञानान्येतानीति किं त्वया तत्तद्ग्रन्थकाराभिप्रायः पृष्टः? उतार्थस्थितिः पृष्टा? तत्तद्ग्रन्थकाराभिप्रायश्चेत् पृथङ् निष्ठान्येव मतानीत्याह- "ज्ञानान्येतानी"ति, "साङ्ख्यस्य वक्ता कपिलः परमर्षिस्स उच्यते। हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः। उमापतिः पशुपतिः श्रीकण्ठो ब्रह्मणः सुतः। उक्तवानिदमव्यग्रं ज्ञानं पाशुपतं शिव" इति एतानि वचनानि आरभ्य शब्दोपात्तानि पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति वक्तव्यवक्तृविशेषणाद्द्वयं श्रूयते । एभिः फलितमाह "एवं वदत" इति, न्यायानुगृहीतवस्तुपरामर्शस्वरूपमाह-

सू० अब्रह्मात्मकतया तत्तत्तन्त्राभिहितानां तत्त्वानां सर्वं खल्विदं ब्रह्म विश्वं नारायण इत्यादिना सर्वस्य ब्रह्मात्मकतामनुसन्दधानस्य च नारायण एव निष्ठेति प्रतीयत इत्यर्थः । अतो वेदान्तवेद्यः परब्रह्मभूतो नारायणः स्वयमेव पञ्चरात्रस्य कृत्स्नस्य वक्तेति तत्स्वरूपतदुपासनाभिधायितन्त्रमिति च तस्मिन्नितरतन्त्रसामान्यं न केनचिदुद्भावयितुं शक्यम्, अतस्तत्रैवेदमुच्यते एवमेकं साङ्ख्ययोगं

Digitized by Google

वेदारण्यकमेव च। परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यत इति साङ्ख्यश्च योगश्च साङ्ख्ययोगं वेदाश्च आरण्यकानि च वेदारण्यकं परस्पराङ्गान्येतान्येकतत्त्वप्रतिपादनपरतयैकीभूतान्येकं पञ्चरात्रमिति कथ्यते, एतदुक्तं भवति साङ्ख्योक्तानि पञ्चविंशतितत्त्वानि योगोक्तं च यमनियमाद्यात्मकं योगं वेदोदितकर्मस्वरूपाण्यङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वं, योगस्य च ब्रह्मोपासनप्रकारत्वं कर्मणां च तदाराधनरूपतामभिदधति ब्रह्मस्वरूपं प्रतिपादयन्त्यारण्यकानि, एतदेव परेण ब्रह्मणा नारायणेन स्वयमेव पञ्चरात्रतन्त्रे विशदीकृतमिति, शारीरके च साङ्ख्योक्ततत्त्वानामब्रह्मात्मकतामात्रं निराकृतं न स्वरूपं योगपाशुपतयोश्चेश्वरस्य केवलनिमित्तकारणतापरावरतत्त्वविपरीतकल्पना वेदवहिष्कृताऽऽचारो निराकृतो न योगस्वरूपं पाशुपतिस्वरूपं च, अतः साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिरिति तत्तदभिहिततत्स्वरूपमात्रमङ्गीकार्य्यं जिनसुगताभिहिततत्त्ववत्सर्वं न वहिष्कार्य्यमित्युच्यते यथाऽऽगमं यथान्यायं निष्ठा नारायणः प्रभुरित्यनेनैकार्थ्यात् ।

टी० "अब्रह्मात्मकतये"ति, वचनान्तरेण विशदयति "अत"इति, परस्पराङ्गानि एकमिति पदद्वयं व्याचष्टे एकीभूतानीत्येतदन्तेन, एकं पञ्चरात्रमित्यार्थमेकत्वमुक्तम् एकवचनान्तत्वात् । यद्वा एकीभूतानीत्यनेनाङ्गाङ्गिभावफलितार्थं उक्तः, एकं पञ्चरात्रमिति एकपदव्याख्यानम्, अत्र किमङ्गि तस्य किमपेक्षितं प्रतिपादयन्त्यङ्गानि भवन्ति तेषु कस्मिंश्चं-

Digitized by Google

शेऽपेता तत्सर्वं पञ्चरात्रमेकमेव कथमासीदित्यत्राह "एतदुक्तं भवती"ति, तर्हि शारीरके तन्निराकरणं कथमित्यत्राह "शारीरके चे"ति, सर्वेषां सांख्यादीनां प्रामाण्यं प्रतिपादयदिव किमपि वचनं दृश्यत इति तद्भ्रमनिवृत्त्यर्थं तस्यार्थमाह "अत"इति उक्तार्थे हेतुमाह–

सू० ॥ उत्पत्त्यसंभवाधिकरणं समाप्तम् ॥

इति श्रीभगवद्रामानुजाचार्य्यविरचिते शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य द्वितीयः पादः ॥

टी० "अनेनैकार्थ्यादि"ति, न केवलं तत्तदागममात्रपरामर्शः न्यायपरामर्शोऽपि ह्यत्रोक्तः यथान्यायमिति, साङ्ख्ययोग इत्यादिवचनस्यान्यथार्थश्चेद्वेदविरुद्धांऽशेपि प्रामाण्याभिधायीदं वचनं "विरोधे त्वनपेक्षं स्यादि"ति न्यायादप्रमाणं स्यात्, अग्नीषोमीयहिंसादीनामधर्मत्वस्य साङ्ख्ये प्रतिपादनादिति भावः । एवं वेदविरुद्धार्थप्रबन्धप्रामाण्यप्रतिपादकत्वे अस्यापि वचनस्याप्रामाण्यप्रसङ्गान्निष्ठा नारायण इत्यद्यैकार्थ्याच्च साङ्ख्ययोग इत्यादिवचनस्योक्त एवार्थः बौद्धादिग्रन्थेष्वप्यविरुद्धार्थसम्भवात् तत्स्वीकारप्रसङ्ग इति चेन्न तत्र वेदाप्रामाण्यतद्विरुद्धार्थप्रतिपादनं कृतं साङ्ख्यादिषु तु वेदाङ्गीकार एवास्तीति तेष्वस्तीति तेष्वविरुद्धांशस्वीकार इति यथोक्त एवार्थः । अत्र भाष्यकारैः सूत्रकाराभिप्रायानुगुण्यात् तु कार्त्स्न्येन वेदाविरोधात् सूत्रान्तरसामञ्जस्याच्च तन्त्रान्तरसाम्यं व्युदस्तम् । अत्र सूत्रकाराभिप्रायो मोक्षधर्मवचनैरवगम्यते हि तत्र श्रीपञ्चरात्रस्य बहुमुखं प्रामाण्यं प्रपञ्चितं तत्र "गूढं मां प्रश्नविद्राजन् पृच्छसे त्वमिहानघ । न ह्येष तर्कया शक्यं वक्तुं वर्षशतैरपि । ऋते देवप्रसादाद्वै राजन् ज्ञानागमेन वा । गहनं ह्येतदाख्यानमाख्यातव्यं तवारिहन्निति अवाच्यमेतदुक्तव्यमात्मगुह्यं सनातनमिति च पृष्टार्थस्य परमरहस्यत्वं दुरवबोधत्वमयोग्येष्ववक्तव्यत्वं च दर्शितं, तेनैव प्रथिता ब्रह्म-

मर्यादा लोकभाविनीति लोकहिताय प्रवृत्ततया बाह्यागमव्यावृत्तिर्द-र्शिता । तत्र प्रशासतो राज्यं धर्मेणामित्रघातिनः । नानृता वाक् समभवन् मनो दुष्टं च नाभवत् । संस्थिते तु नृपे तस्मिंश्छास्त्रमेतत् सनातनम् अन्तर्धास्यति तत्सत्यमेतद्वः कथितं मया इति योग्यजनभूयिष्ठकाले प्रवृत्तिः कालान्तरे तिरोधानं चेति वैलक्षण्यमुक्तं तत्राप्याविर्भावतिरोभा-वकथनादर्थशरीरस्य वेदार्थवदनादित्वं दर्शितं, ततश्च बाह्यागमव्यावृत्तिः उत्पद्यन्ते च्यवन्ते च यान्यतो यानि कानिचित् । तान्यर्वाक्कालिकतया निष्फलान्यनृतानि चेति बाह्यागमानामर्वाक्कालिकत्वस्मरणात्, वेदैश्च-तुर्भिः संमितं कृतं मेरौ महागिरौ इति सर्वमर्यादास्थापकमुनिजनभूयिष्ठे मेरौ प्रवृत्तया देशतोऽपि वैलक्षण्यमुक्तम् "एकाग्रमनसो दान्ता ऋषयः संयमे रता इति दिव्यं वर्षसहस्रं वै सर्वे ते मुनयः सममिति नारायणानुशिष्टा हि तदा देवी सरस्वी विवेश तानृषीन् सर्वान् लोकानां हितकाम्यया इति तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तममिति च प्रवर्तकानामृषीणा-मत्र गुणवत्त्वं तपोमहिमवत्त्वं भगवत्प्रसादलब्धसरस्वतीकत्वं बहूनामैक-मत्यं च दर्शितम् । उशना बृहस्पतिश्चैव यदोत्पन्नौ भविष्यतः । तदा प्रव-क्ष्यतः शास्त्रं युष्मन्मतिभिरुद्धृतमिति युष्मत्कृतमिदं शास्त्रं प्रजापालोब-सुस्ततः । बृहस्पतेः सकाशाद्वै प्राप्स्यते द्विजसत्तमा इति प्रकृष्टदेवर्षिप-रिग्रहः प्रकृष्टशिष्याधिगमश्च दर्शितः । वेदैश्चतुर्भिः संमितम् इदं महोपनि-षदम् अत्र धर्मार्थकामा हि मोक्षः पश्चाच्चिकीर्षित इति सर्ववेदवेदा-न्तसारत्वं गुडजिह्विकान्यायेन त्रिवर्गप्रतिपादकत्वमोक्षैकपरत्वमनुत्तमहि-तत्वं चोक्तं सर्वे प्रमाणं हि तथा यथैतच्छास्त्रमुत्तमं भविष्यति प्रमाणं वै एतन्मदनुशासनम् । अस्मात्प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवः स्वयमिति मन्वादिभिरप्युपजीव्यत्वमितरप्रबन्धप्रामाण्ये दृष्टान्तभूतत्वमव्यवधानेन भगवदनुशासनरूपत्वं भविष्यति प्रमाणमिति भगवता नियमितत्वं च दर्शितं, तस्य यज्ञोमहानासीदश्वमेधो महात्मनः । बृहस्पतिरुपाध्यायः । तस्य होता बभूव ह"ति पञ्चरात्रनिष्ठस्योपरिचरस्याश्वमेधकथनाद्वैदि-कपञ्चरात्रकर्मणां कर्तृसामान्यं दर्शितं प्रीतस्ततो ह भगवान् देवदेवः

Digitized by Google

पुरातनः । साक्षात्तं दर्शयामास अदृश्योऽन्येन केनचिदिति वेदपञ्चरात्रोक्तकर्मणामव्यवधानेनाराध्यपरदेवतासामान्यं च दर्शितम्, अदृश्येन हृतो-भागो देवेन हरिमेधसेति भगवतः सर्वदेवतासाक्षात्कारिवृहस्पत्यदृश्य-ताया उपरिचरेण दृष्टतायाश्चोक्तत्वात् अधिकारिवैलक्षण्यं दर्शिम्, एक-तद्वितत्रितवृत्तान्तमुखेनार्थवादरूपं तात्पर्य्यलिङ्गं दर्शितं "मेरोरुत्तरभागे तु क्षीरोदस्यानुकूलतः । स देशो यत्र नस्तप्तं तपः परमदारुणमिति एका-न्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः । गच्छध्वं तत्र मुनयस्तत्रात्मा मे प्रका-शित इति ततो नोदृष्टिविषयस्तदा प्रतिहतो भवदिति व्रतावसा-नेऽस्य शुभान् नरान् न ददृशिमो वयमिति वलिः क्रिलोपह्रियते तस्य देवस्य तैर्नरैः । वयं तु तेजसा तस्य सहसा नष्टचेतस इति पुरुषाणां सहस्रेषु तेषु वै शुद्धयोनिषु । अस्मान् न कश्चिन्मनसा चक्षुषा वाऽप्यपूजयदिति भगवद्धर्मनिष्ठपुरुषाध्युषितदेशस्य प्राप्यत्वं तस्य बहुतपोलभ्यत्वं धर्मान्तर-निष्ठैस्तद्धर्मनिष्ठानां दुर्दर्शत्वं तेषां बहुतपोदृश्यत्वं तेषामितराधिकारि-ष्वनादरत्वं तन्मुखेनेतराधिकारिणां निकृष्टत्वं च भगवद्धर्मनिष्ठानां प्रकृ-ष्टत्वं च भगवता स्वयमागत्य दर्शनप्रदानाच्च तेषां महत्त्वं दर्शितम् । एकश्च शब्दो विरतः श्रुतोऽस्माभिरुदीरितः । आकाशं पूरयन्सर्वं शिक्षाक्षरसम-न्वित इति भगवत्स्तोत्रश्रवणस्यापि तपःसाध्यतया भगवद्धर्मप्रकर्षो ज्ञापितः, "दृष्टा वः पुरुषाः श्वेताः पञ्चेन्द्रियविवर्जिताः । दृष्टो भवति देवेश एभिर्दृष्टैर्द्विजोत्तमा इति भगवद्दर्शनतुल्यत्वं तेषां दर्शनस्य प्रतिपादितं "प्राप्य श्वेतं महाद्वीपं नारदो भगवान् ऋषिः । ददर्श तानेव नरान् श्वेतांश्चन्द्रप्रभान् शुभान् । पूजयामास शिरसा मनसा तैः सुपूजित इति न ह्येतद् ब्रह्मणा प्राप्तमीदृशं मम दर्शनमिति च भगवद्धर्मनि-ष्ठानां देवर्षिवन्द्यत्वं ब्रह्मादिभ्योऽपि महत्त्वं च दर्शितम् । "उवाच मधुरं भूयो गच्छ नारद मा चिरम् । इमे ह्यनिन्द्रियाहारा मद्भक्ताश्चन्द्रवर्चसः । एकाग्राश्चिन्तयेयुर्मां तेषां विघ्नो भवेदिति चोक्तं नारदसम्भाषणस्यापि विघ्नरूपताकथनेन नारदादपि तेषामासन्नतरत्वं तर्शितम्, "अहो हि दुर-नुष्ठेयो मोक्षधर्मः सनातनः यं हित्वा देवताः सर्वा हव्यकव्यभुजो ऽभवन्

नूनमेकान्तिधर्मोऽयं श्रेष्ठो नारायणप्रियः । एकान्तिनो हि पुरुषा गच्छन्ति परमं पदम् । यद्येकान्तिभिराकीर्णं जगत् स्यात् कुरुनन्दन भवेत् कृतयुगप्राप्तिरिति एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमं ते सहस्रार्चिषं देवं प्रविशन्ति सनातनमिति च कृतयुगैकान्तस्य भगवद्धर्मस्य परममोक्षप्रदत्वं तन्मुखेनाधिकारिवैलक्षण्यं च दर्शितं तथा मया सृष्टः पुरा ब्रह्मा मद्यज्ञमयजत्स्वयम् ततस्तस्मै वरान् प्रीतो ददावहमनुत्तमान् । मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव च । एष माता पिता चैव युष्माकं च पितामहः । मयाऽनुशिष्टो भविता सर्वभूतवरप्रदः । अस्यैव चानुजो रुद्रो ललाटाद्यः समुत्थितः ब्रह्माऽनुशिष्टो भविता सोऽपि सर्ववरप्रद इति सब्रह्मकाः सरुद्राश्च सेन्द्रा देवाः सहर्षिभिः । अर्चयन्ति सुरश्रेष्ठं देवं नारायणं प्रभुमित्यादिभिर्वेदान्तवेद्यपरदेवताया एव सर्वस्मात्परत्वेनात्र प्रतिपाद्यत्वं दर्शितं "वेदैश्चतुर्भिः संमितमित्युपक्रमः इदं महोपनिषदम् इत्युपसंहारः, अभ्यासादिलिङ्गानि दर्शितानि एवमाशयदोषविरहदेशकालप्रवर्त्तकवक्तृश्रोत्रप्रबन्धतदुक्तधर्मतत्कर्तृतत्फलतत्प्रदायिदेवतावैलक्षण्यप्रतिपादनमुखेन भगवच्छास्त्रवैलक्षण्यस्य बहुमुखं प्रपञ्चमभिप्रेत्य महता प्रबन्धेनेत्युक्तिः, तथा भगवत्प्रणीते तत्प्रतिपादकतया सात्त्विके श्रीवाराहे च पुराणे मोक्षधर्मानुरोधेन पञ्चरात्रस्य वेदतुल्यप्रामाण्यप्रतिपादनमुखेन पाशुपतादेर्वैलक्षण्यं दृश्यते अष्टषष्टितमे "पौरुषं सूक्तमास्थाय ये यजन्ति द्विजास्तु माम् । संहिताजपमास्थाय ते मां पश्यन्ति ब्राह्मणाः । अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन हि मार्गेण मां प्रपद्यन्ते ते मां पश्यन्ति मानवाः । ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते । शूद्रादीनां न तच्छ्रोत्रपदवीमुपयास्यति । एवं मयोक्तं विप्रेन्द्र पुराकल्पे पुरातनं पञ्चरात्रं सहस्राणां यदि कश्चिद् ग्रहीष्यति । कर्मक्षये च मां कश्चिद् यदि भक्तो भविष्यति । तस्य वेदाः पञ्चरात्रं नित्यं हृदि वसिष्यति । वेदेन पञ्चरात्रेण भक्त्या यज्ञेन तु द्विजाः । प्राप्योऽहं नान्यथा प्राप्यो वर्षलक्षैरपि द्विजे"ति अत्र वेदपञ्चरात्रयोर्विकल्पाभिधानाद्वेदतुल्यत्वं वेदाधिकृतत्रैवर्णिकाधिकारत्वं वेदा इति इतरायोग्यत्वं पञ्चरात्रयोः समु-

च्चित्य मोक्षसाधनत्वं चोक्तं "त्वं च रुद्र महाबाहो मोहशास्त्राणि कारयेत्यादिभिरितरागमानां मोहनार्थत्वं चोक्तं तत्र चोद्यपरिहाराश्च पूर्वमेव प्रपञ्चेन कृताः, अतश्च पञ्चरात्रस्येतरागमवैलक्षण्यसिद्धिः, । ननु कथं कार्त्स्न्येन वेदाविरुद्धत्वं त्रयीधर्मपरित्यागस्य तत्रोक्तत्वात्, कथं मन्वादिस्मृतीनां वेदानुरोधित्वं तेषु त्रयीचोदिताग्निहोत्रपरित्यागमुखेन चतुर्थाश्रमधर्मस्यात्र प्रतिपाद्यमानत्वात् "यदहरेव विरजेत्तदहरेव प्रव्रजेदित्या"दिभिः प्रत्यक्षश्रुतिभिरेव चतुर्थाश्रमविधानात् तन्मूलानां स्मृतीनां न वेदविरुद्धत्वमिति चेन्न किं भोस्त्रयीधर्मेणासंयुक्त इदं धर्मं जिज्ञासिता ओं भोजिज्ञातेत्यादिप्रत्यक्षश्रुतिसिद्धत्वात् त्रयीचोदितधर्मविशेषत्यागस्य तन्मूलतया पञ्चरात्रवचसां न वेदविरुद्धत्वम् । ननु कथमुदाहृतवाक्यानां वेदत्वं कथं यदहरेवेत्यादिवाक्यानां वेदत्वं जाबालश्रुत्यादीनां देशान्तरेष्वधीयमानत्वादिति चेत् एवं तर्हि जाबालवाष्कलमाध्यन्दिनादिशाखानाम् इव देशान्तरे बहुभिरविच्छिन्नपारम्पर्यमधीयमानत्वादेव वेदत्वं सिद्धं स्मर्तव्यत्वे सत्यस्मर्य्यमाणकर्तृकत्वादिति हेतुनैव तद्वदेवापौरुषेयत्वं तैत्तिरीयादिश[1]ब्दानामिवैकायनशाखायाश्चासाधारणकल्पसूत्रवत्त्वादेव वेदत्वं दुरपह्नवं तथा भूमविद्यायामृग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवंनिधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्येमीति श्रवणाच्च ऋग्वेदादिवद्वेदत्वसिद्धिः, ऋग्वेदादेः पृथग्ग्रहणादवेदत्वमिति चेन्न ब्रह्मविद्याया इव ब्राह्मणपरिव्राजकन्यायेन श्रैष्ठ्यात् पृथगुपादानोपपत्तेः, ब्रह्मविद्याशब्दो ह्युपनिषद्भागपरः न तु ज्ञानपरः नात्मवदित्युक्तेः एकायनशब्दस्य प्रसिद्ध्यनादरेणार्थान्तरपरत्वकल्पनमयुक्तं प्रसिद्ध्यपवादकाभावात् यथा "यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । गृह्णन्ति सत्यधर्माणः सत्यं सत्येषु सामस्विति भारतवचनाच्च श्रुतित्वमवगम्यते । तथा भगवच्छास्त्रेषु चास्य वेदत्वं बहुशोऽवगम्यते

१ तैत्तिरीयादिशाखानामिवेति पा० ।

यथा श्रीकालोत्तरे ऋग्वेदं पूर्वदिग्भागे यजुर्वेदं तु दक्षिणे पश्चिमे सामवेदं स्यादथर्वं चोत्तरे भवेत् । एकानीयशाखोत्थमन्त्रान्सर्वासु दिक्षु च । पाठयेत् पावनात् पश्चादग्निसंस्कारमारभेदिति तथा तत्रैव ततः प्रीतमनानाथः साक्षात् स ब्रह्मसंज्ञितं वेदमेकायनं ब्रह्म व्याकर्तुमकुतोभयं व्याजहार स सद् ब्रह्मत्रयं प्रणवमादितः तत्कारणत्वाद्वेदानां मूलसंज्ञा सनातनी । ततोऽन्यान्यपि दिव्यानि व्यापकान्युपदिष्टवानिति, एवं हि संहितान्तरेष्वपि बहूनि वचनानि तानि विस्तरभयान्न लिख्यन्ते तथेतिहासपुराणवचनैरुपबृंहितप्रदेशविशेषता च श्रुतित्वे हेतुः, द्वे विद्ये वेदितव्ये यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्ममित्यादीनां श्रुतित्वेन सम्प्रतिपन्नानां द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति यत्तदव्यग्रमजरमचिन्त्यमजमव्ययम् । अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतं विभुं सर्वगतं नित्यं भूतयोनिमकारणं व्याप्तं व्याप्यं यतः सर्वं यद्वै पश्यन्ति सूरय इत्यादिभिरुपबृंहितत्वदर्शनात् उपबृंहितत्वं हि श्रुतित्वं स्थापयति, एकायनशाखावचनानि च यद्बहून्युपबृंह्यन्ते पुराणेतिहासवचनैः, सर्वज्ञः सर्वदर्शी सर्वेश्वरः सर्वशक्तिस्समृद्धिमानेव अवृद्धिरन्यून आद्योऽवशी स्वाधीनोऽनादिरनन्तोव्यपगतनिद्राभयक्रोधतन्द्रिव्यपगतेच्छातमःक्लमव्याधिर्निर्दोषो निरधिष्ठो निरवद्य इति श्रुतिर्भगवता पराशरेणोपबृंहिता सर्वज्ञः सर्वदृक् सर्वशक्तिज्ञानबलर्द्धिमान् । अन्यूनश्चाप्यवृद्धिश्च स्वाधीनोऽनादिमान् वशी । क्लमतन्द्रीभयक्रोध कामादिभिरसंयुतः निरवद्यः परः प्राप्तेर्निरधिष्ठोऽक्षरक्रम इति एवमेष महाशब्दो मैत्रेय भगवानिति परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिरित्यनेन सर्वज्ञः सर्वदर्शी सर्वेश्वरः सर्वशक्तिः समृद्धिमानेव निर्दोषो निरधिष्ठो निरवद्यः ये भगवन्तं वासुदेवमेवं विदुस्त एव तं विदुरिति वाक्यं ह्युपबृंहितं हि ज्ञायते हेयप्रत्यनीकत्वकल्याणगुणाकत्वनिमित्तस्य भगवच्छब्दस्य वासुदेवासाधारणत्वप्रतीतिर्ह्युभयत्र प्रतीयते, तथा नासितस्य कृतमस्तीह

Digitized by Google

किञ्चिन्नासंयतेष्विन्द्रियेष्वेव सिद्धिः । न संयमोऽस्त्यपरित्यज्य कामान् कामत्यागो नान्तरेणाप्रमादम् । अप्रमादो ज्ञानमयोऽज्ञानं प्रकृतिसंहितं प्रकृतौ कर्म संदध्यात्तथा नित्यं कृतं भवेदिति इयं च श्रुतिरुद्योगपर्वण्युपबृंहिता नाकृतात्मा कृतात्मानं जातु विद्याज्जनार्दनम् । आत्मनस्तु क्रियोपायो नान्यत्रेन्द्रियनिग्रहात् । इन्द्रियाणामुदीर्णानां कामत्यागोऽप्रमादतः अप्रमादो भीमसेन ज्ञानयोनिरसंशयमिति एवं विरुद्धतयाऽभिमतानामर्थानां प्रत्यक्षश्रुतिमूलत्वात् श्रीपञ्चरात्रस्य कार्त्स्न्येन श्रुत्यविरुद्धत्वरूपं साङ्ख्यागमादिभ्यो वैलक्षण्यं सिद्धम् । अत एव ग्रन्थनिर्माणानुप्रविष्टपुरुषाशयदोषनिबन्धनाविरुद्धार्थप्रतीतिरित्यप्ययुक्तम् अतो विरुद्धांशस्त्यज्यत इति सिद्धान्तोऽनुपपन्नः । साङ्ख्याद्यागमानां चावान्तरग्रन्थकर्तृबुद्धिदोषाद्विरुद्धार्थान्वयश्चतुर्णामप्यागमानामादिवक्तृप्रणीतानां न क्वचिदपि वेदविरोध इति साम्यं चानुपपन्नं प्रत्यक्षहेतवो योगाः साङ्ख्याः शास्त्रविनिश्चया इति तुल्यं शौचं तयोर्युक्तं दया भूतेषु चानघ? व्रतानां धारणं तुल्यं दर्शनं न समं तयोरिति च मोक्षोपाये । बहवः पुरुषा राजन् साङ्ख्ययोगविचारिणां नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वहेति तत्त्वे च परस्परवैषम्यस्य श्रुत्यर्थवैरूप्यस्य च भगवता व्यासेनोक्तत्वात्, अत्र हि साक्षात्कारान्मोक्षः शास्त्रजन्यविवेकान्मोक्षः, इत्युपायवैषम्यं दृश्यते परमात्मन उपादानत्वानभ्युपगमश्च वेदान्ताद्वैषम्यं प्रतीयते, न ह्यर्वाचीनग्रन्थकारमतं व्यासेनोच्यते । ननु मोक्षधर्मे "एवं तत्त्वमिदं कृत्स्नं साङ्ख्यानां विदितात्मनां यदुक्तं यतिभिर्मुख्यैः कपिलादिभिरीश्वरैः । यस्मिन् विभ्रमाः केचिद् दृश्यन्ते मनुजर्षभ । गुणाश्च यस्मिन् बहवो दोषहानिश्च केवलेति कपिलादिमतस्य विभ्रमादिदोषराहित्यं साद्गुण्यं चोक्तं तथा निष्ठा नारायण इत्युक्त्वा तमेवं शास्त्रकर्त्तारः प्रवदन्ति मनीषिण इति कपिलादिभिर्नारायणस्य प्रतिपादितत्वमुक्तम् । अतः श्रुत्यर्थवैरूप्यमवान्तरवक्तृदोषकृतमिति चेन्न तत्र तत्र भगवता व्यासेन भीष्मवाक्यमुखेन स्वमतेन सिद्धान्तस्योक्तत्वात्, विरोधस्यावान्तरवक्तृमूलकत्वे कपिलाद्यादिवक्तृमतेनैव सिद्धान्तो वाच्यः प्रत्यक्षहेतवो योगाः साङ्ख्याः शास्त्रविनिश्चयाः

Digitized by Google

इति तत्तदभिमतस्यैकैकस्योपायत्वमुक्त्वा उभे चैते मते ज्ञाने नृपते शिष्टसंमते । अनुष्ठिते यथाशास्त्रं नयेतां परमां गतिमिति, समुच्चित्यानुष्ठिताभ्यामुभाभ्यां पुरुषार्थ इति हि सिद्धान्तितं तथा नैते इच्छन्ति साङ्ख्यानां योगानां च परमात्मन उपादानत्वानभ्युपगममुक्त्वा बहूनां पुरुषाणां हि यथैका योनिरुच्यते तथा तं पुरुषं विश्वमाख्यास्यामि गुणातिगमित्यारभ्य समासतस्तु यद्व्यासः पुरुषैकात्म्यमुक्तवानिति स्वमतेन सिद्धान्त उक्तः, न तु कपिलहिरण्यगर्भादिमतेन पुरुषाणाम् ऐकात्म्यमेकेनात्मनात्मना युक्तत्वम् अनेन जगच्छरीरकः परमात्मा हि सर्वोपादानमित्युक्तं भवति, तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केन चित् क्वचिदिति पुरुषैकात्म्यशब्दविवक्षितस्य स्वेनैव व्याख्यातत्वात् बहूनां पुरुषाणामिति पूर्वमुक्तत्वाच्च एवं सिद्धान्तदशायां कपिलाद्यभिमतत्ववर्णनाभावात्तत्तदागमेष्वर्थवैरूप्यमवर्जनीयं तर्हि कपिलादीनां शास्त्रकर्तृणां भ्रमराहित्यवचनं नारायणप्रतिपादकत्ववचनं च कथं घटत इति चेत् उच्यते कथम् अवान्तरकर्तृणां भ्रमराहित्यवचनं घटते कपिलादिभिरित्यादि-शब्देन ह्यवान्तरवक्तार उच्यन्ते आदि-शब्दो हिरण्यगर्भादिपर इति चेन्न एवं तत्त्वमिदं कृत्स्नं साङ्ख्यानां विदितात्मनां यदुक्तं कपिलादिभिः यस्मिन् न विभ्रमाः केचिदिति यच्छब्दस्य प्रकृतसाङ्ख्यमतपरामर्शित्वात्, अत आसुरिपञ्चशिखादीनामपि भ्रमाभावस्योक्तत्वात् अवान्तरवक्तृष्वपि भ्रान्त्यारोपोऽनुपपन्नः नैत इच्छन्तीत्यद्यतनतार्किका विवक्षितार्थ इति चेन्न इच्छन्तीति वर्त्तमाननिर्देशविरोधात् तदात्वेऽपि कुतार्किकाः सन्तीति चेन्न साङ्ख्ययोगविचारिणामिति निर्देशस्य कुतार्किकविषयत्वानुपपत्तेः, एतच्छब्देन हि साङ्ख्ययोगविचारिणः परामृश्यन्ते यदि नेच्छन्तीत्युक्तिः कुतार्किकविषया तदा सिद्धान्ते निमित्तोपादनैक्यं कपिलहिरण्यगर्भोक्तमिति वक्तव्यं न च तथोक्तम्, अतोऽवान्तरवक्तृपरिकल्पनयाऽर्थभेदनिर्वाहोऽनुपपन्नः । ननु तमेव शास्त्रकर्त्तारः प्रवदन्ति इति यस्मिन् न विभ्रमाः केचिदिति शास्त्रेणादिवक्तृषु भ्रमे प्रतिषिद्धे मतभेदस्यावान्तरवक्तृमूलत्वे चानु-

पपन्नेऽर्थविरोधः सूत्रकारेण तन्निरसनं च कथं घटत इति चेद् वयमपि कथं घटत इति ब्रूमः उभयेषामप्यनुपपत्तेः परिहरणीयत्वाविशेषात् यद्युच्येत भ्रमादिदोषरहितानामपि वक्तृणां तदा स्वविवक्षितादधिकार्थान्तराकथनं विवक्षितेऽर्थे प्ररोचनार्थोऽतिवादश्च सम्भवतः यथा निर्दोषस्यापि वेदस्य हि वेदो दर्शपूर्णमासप्रकरणे वाजपेयं प्रशंसति, नापि कर्मप्रकरणे ब्रह्म प्रतिपादयति अतिवदति च प्रतिपिपादयिषितमर्थम् "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति न किरिन्द्र त्वदुत्तरोनज्यायान् अस्ति वृत्रहन्" इत्यादिना, न चैतावता वेदस्य कर्मान्तरं तत्त्वान्तरं चानभिमतमिष्यते अन्यत्र वेदेनैव कर्मान्तरतत्त्वान्तरप्रतिपादनात्, एवं कपिलादयोऽपि स्वविवक्षितादधिकं तदानीं न वदन्ति विवक्षितमतिवदन्ति च, साङ्ख्यशास्त्रे प्रकृतिप्राकृतपुरुषतत्त्वविवेकमात्रस्य विवक्षितत्वादधिकाप्रतिपादनं नास्मात्परं किञ्चिदित्यतिवादश्च भवति । योगे च यमनियमाद्यङ्गकस्य समाधिपर्यन्तस्य योगस्य तत्र ध्येयभूतस्येश्वरस्य क्लेशकर्मादिदोषास्पर्शस्य च प्रतिपिपादयिषितत्वादुपादानत्वानुक्तिः, न चैतावता तद्वक्तृणाम् ईश्वरस्तस्योपादानत्वं चानभिमतं भवति अन्यत्र कपिलासुरिसंवादब्रह्मरुद्रसंवादादिषु कपिलहिरण्यगर्भादिभिरेवेश्वरस्य तस्य जगदुपादानभावस्य च प्रतिपादितत्वात्, न च तदनुक्तिमात्रेणातिवाददर्शनाच्च साङ्ख्ययोगयोरनादरणीयता च भवति तयोरुपजीव्यभूयिष्ठत्वाद्वेदान्तार्थप्रतिपत्त्यनुष्ठानयोस्तदाकाङ्क्षासम्भवात् विप्रलिप्सादिदोषविरहदशायां प्रणीतत्वाच्च, न हि शब्दानुशासने कर्मकलापब्रह्मविद्ययोरप्रतिपादनात्तदनादरणीयत्वं, तद्वत् एवं बाहुश्रुत्येन तद्वक्तृणां हृदयमज्ञानन्तमापातप्रतिपन्नमर्थं तात्त्विकमुपपन्नंमन्यमानास्तार्किकंमन्या ये प्रत्यवतिष्ठन्ते तेषामुपदेशवशात्कार्य्यताभावात् साङ्ख्यागमानामापातप्रतिपन्नार्थमात्रपरत्वमन्वारुह्य सूत्रकारैस्तन्निरसनं युक्तं मीमांसाशास्त्रस्य न्यायनिबन्धनत्वादितिहासपुराणानां तूपदेशप्रधानत्वात्तर्ककार्कश्यं विहाय कपिलादीनां प्रबन्धान्तरेषु ब्रह्मजगदुपादानत्वादिप्रतिपादनाविरोधेन सांख्ययोगार्थप्रतिपादनमपि युक्तं तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिण इति

Digitized by Google

वचनं च प्रबन्धान्तरेषु कपिलादिभिः परमात्मसद्भावजगदुपादानत्वादिप्रतिपादनं निष्ठा निर्णयस्य हेतुत्वेन वदन्ति भ्रमाभावश्चातिवदनातिरिक्तत्वविषय इति सर्वं सङ्गतम् । एवं सांख्ययोगपाशुपतानामेकदेशप्रामाण्येनाविरुद्धांशे प्रमाणत्वं तुल्यमिति, एवं तर्हि अतिवदनस्य विवक्षामूलत्वाद्विवक्षाविशेषहेतुमनोवृत्तेश्च गुणत्रयमूलत्वादतिवदनस्योपेक्ष्यत्वाच्च कारणदोषबाधकप्रत्ययावुक्तौ स्यातां, वेदे तु वक्त्रभावात् प्रबलतदतिरिक्तवचनाभावाच्च तदुभयासम्भवः, पञ्चरात्रे तु नार्थवादरूपमपि वेदविरुद्धं वचनं दृश्यते, अतः सांख्ययोगपाशुपतपञ्चरात्राणां च वैषम्यं दुरपह्नवं तत्र मुमुक्षोरुपजीव्यभूयिष्ठत्वाभावात् परावरतत्त्वविपर्यासनिषिद्धानुष्ठानतदुभयासंभवनमिश्रिताल्पप्रधानप्रतिपाद्यविरोधस्य दुष्परिहरत्वाच्च पाशुपतमतस्य क्वचिदविरोधेऽपि नात्यन्तादरणीयत्वं, सांख्ययोगयोस्तु कतिपयार्थानुक्तेस्त्याज्यताहेतुत्वाभावादापाततो वेदविरोधभ्रमहेतुभूतांशपरित्यागेनादरणीयत्वादेकदेशाप्रामाण्येन प्रमाणत्वं पञ्चरात्रे त्वनुक्तांशाभावाद्वेदविरोधभ्रमहेतुभूतातिवादाभावाद्विरुद्धतया भावानामर्थानां चाधीयमानश्रुतिमूलत्वसमर्थनाच्च कार्त्स्न्येन वेदाविरोधात् साकल्येन वेदवत् प्रमाणत्वमिति, अतो भाष्यकारोक्त एवाधिकरणनिष्कर्ष उपपन्नतरः ॥

परे तु विज्ञानादीति विज्ञानैश्वर्यशक्त्यादिगुणसद्भावेन सर्वेऽपि वासुदेवा इति चेत् एवमप्युत्पत्त्यसंभवाप्रतिषेधः कथं वासुदेवादीनां चतुर्णां परस्परं भिन्नत्वमयुक्तम् अनेकेश्वरकल्पनानर्थक्यात् एकस्य चत्वारो व्यूहा इति चेत्तदुत्पत्त्यसम्भवः पूर्णषाड्गुण्यतया सर्वेषां तुल्यत्वाभ्युपगमात् असत्यतिशये कार्य्यकारणभावानवक्लृप्तेः चतुःसंख्यत्वनियमश्चानुपपन्नः ब्रह्मादिस्तम्बपर्यन्तस्य समस्तस्य जगतो भगवद्व्यूहत्वावगमाद्विप्रतिषेधाच्चेति ज्ञानबलैश्वर्य्यशक्तिवीर्य्यतेजांसि गुणाः आत्मान एवैते भगवन्तो वासुदेवा इति गुणगुणित्वकल्पनादिलक्षणविप्रतिषेधाच्छ्रुतिविप्रतिषेधाच्चासङ्गतैषा कल्पनेति आहुः तत्र विज्ञानादिशब्दस्य भाष्योक्तनिर्वाहौचित्यं पूर्वमेव दर्शितम् एकं वा संयोगरूपचोदनाख्याविशेषादित्यादिष्विव वा-शब्दस्य सिद्धान्तद्योतकत्वात्, तदप्रतिषेध-शब्दस्योत्पत्त्यसंभवाप्रति-

"कौरव्यमाण्डूकाभ्यां च" ॥ 'कौरव्यमाण्डूकयोरित्यादि'। अस्मिन्सूत्रे आसुरेरपि ग्रहणं कर्त्तव्यम् । आसुरिकौरव्यमाण्डूकेभ्यश्चेति वक्तव्यमित्यर्थः । 'आसुरायणीति'। ष्फस्य तद्धितत्वाद्यस्येति चेति इञो लोपः, तदिदं तद्धितग्रहणमेव लिङ्गं भवत्यासुरेरपि ष्फ इति, यञादिष्वकारान्तेषु सवर्णदीर्घत्वेनापि रूपं सिद्धम् । 'शैषिकेषु चार्थेष्विति'। आसुरीयसङ्गादिदमत्रोक्तम् । अन्यथा द्विरासुरिग्रहणं कर्त्तव्यं स्यात् । 'आसुरीय इति' । असुरस्यापत्यमासुरिः, तेन प्रोक्त आसुरीयः कल्प इति ॥

"वयसि प्रथमे" ॥ 'श्रुत्येति'। श्रवणमात्रेण प्रकरणाद्यनपेक्षयेत्यर्थः । 'कुमारीति' । प्रथमवयोवचन एवायं न पुंयोगाभावहेतुकः, पुंस्यपि प्रयोगात्, यस्तु वृद्धायां प्रयोगो वृद्धकुमारीति, स पुंयोगाभावात्साधर्म्याद्वेदितव्यः । 'वयस्यचरमइति' । चरममन्त्यमचरमे अनन्त्ये, इह केचिच्चत्वारि वयांसीच्छन्ति कौमारं यौवनं मध्यत्वं वृद्धत्वमिति, यथाहुः ॥

प्रथमे वयसि नाधीतं द्वितीये नार्जितं धनम् ।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ॥

इति । अन्ये तु त्रीणि ।

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥

इति । अन्ये तु बालत्वमध्यत्ववृद्धत्वानि त्रीणि ।

आषोडशाद्भवेद्बालो यावत् क्षीरान्नवर्त्तकः ।
मध्यमः सप्ततिर्यावत्परतो वृद्ध उच्यते ॥

एषु सर्वेषु दर्शनेषु यौवनं द्वितीयं वयो भवति, यौवनवचनौ च वधूटचिरण्टशब्दौ, अतो न प्राप्नोति तदाह । 'द्वितीयवयोवचनावेताविति' । यदा तु द्वे एव वयसी उपचयापचयलक्षणे तदैतन्न वक्तव्यं, यौवनस्यापि प्रथमवयोरूपत्वात् । 'श्रुत्या वर्त्ततइति' यदुक्तं तस्य व्याख्यां दर्शयति । 'उत्तानशया लोहितपार्ष्णिकेति नैता वयःश्रुतय इति' ।

श्रुत्या श्रवणमात्रेण नैते वयः प्रतिपादयन्तीत्यर्थः । इह तावदुत्तानशयेति, क्रियाकारकसम्बन्धमात्रं प्रतीयते, तदेव च प्रवृत्तिनिमित्तम् । उत्तानादिषु कर्तृष्विति शेतेश्च प्रत्ययः, सर्वैव च कदा चिदुत्ताना शेते उच्यते चेदमुत्तानशयेति तत्र नियमो गम्यते, अन्यथा स्वप्तुमसामर्थ्यादुत्तानैव शेतइति, एवमपि सन्देहः, बाला वृद्धेति, तस्मादुत्तानैवशेतइति नियमे वृद्धत्वाभावे च प्रकरणादिना ऽवसिते बाल्यं गम्यते, लोहितपादिकेत्यत्रापि अन्यपदार्थमात्रं श्रुत्या प्रतीयते । प्रकरणादिना स्वभावत एवास्या रक्तौ पादौ नालक्तकादिनेति प्रतीतौ सत्यां बालेति गम्यते, इतिशब्दः प्रकारे, एवंप्रकारा न वयःश्रुतय इत्यर्थः । अत एव बहुवचनं, तेन द्विवर्षेत्यादावपि न भवति, अत्रापि प्रकरणादिना वयो गम्यते, परिमाणमात्रं तुशब्दार्थः, शालादावपि प्रयोगात्, द्वे वर्षे भूता इति ठञो वर्षाल्लुक्च, चित्तवति नित्यमिति लुक् ॥

"अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि" ॥ 'तद्धितलुकि सतीति' । परसप्तमी त्वेषा नोपपद्यते, अभावरूपेण लुका पौर्वापर्यासम्भवात् । 'सर्वतो मानं परिमाणमिति' । परिमाणं तु सर्वत इत्यस्य ग्रहणं न परिच्छेदकमात्रस्येत्यर्थः । 'पञ्चभिरश्वैः क्रीतेति' । तद्धितार्थे द्विगुः, आर्हीयष्ठक् । 'कालः सङ्ख्या च न परिमाणमिति' । नहि ताभ्यां सर्वत आरोहतः परिणाहतश्च मीयते, एवं च कालः सङ्ख्या चेति प्रदर्शनार्थत्वात्प्रमाणमपि परिमाणं न भवति, तथा चोत्तरसूत्रे काण्डशब्दस्यापरिमाणवाचित्वादिति वक्ष्यति, प्रमाणविशेषः काण्डमिति च, तेन द्वौ शमौ प्रमाणमस्या इति मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुकि द्विशमा त्रिशमेति भवति, यद्येवमुन्मानमपि परिणं न स्यात्, कश्चिदाह, दृष्टमेवैतदुन्मानमपि नैवात्र परिमाणग्रहणेन गृह्यते द्वाभ्यां निष्काभ्यां क्रीता प्राग्वतीयस्य ठञो द्वित्रिपूर्वान्निष्कादिति लुक्, द्विनिष्का त्रिनिष्केति भवतीति । अपर आह, बिस्तकम्बल्यग्रहणं ज्ञापकमुन्मानमप्यत्र परिमाणग्रहणेन गृह्यतइति तयोरुन्मानविशेषत्वात्, सुवर्णबिस्तो हेम्नोऽते, कम्बलाच्च सञ्ज्ञायां कम्बल्यमूर्णापलशतमिति । न्यासकारस्तु द्वौ

बिस्तो परिमाणमस्येति विगृह्णन् बिस्तं परिपरिमाणं मन्यते । 'द्विवर्षेति' । कृतव्युत्पादनमेतत् । 'द्विशता त्रिशतेति' । द्वाभ्यां शताभ्यां क्रीतेति पणपादमाषशताद्यदिति नित्ये यति प्राप्ते शाणाद्वेत्यत्र शताच्चेति वक्तव्यमिति वचनात्पक्षे सङ्ख्याया अतिशदन्तायाः कन्निति कन्, तस्याध्यर्द्धपूर्वेति लुक् । 'द्विबिस्तेति' । परिमाणत्वे ठञो लुक्, उन्मानत्वे ठकः । 'द्व्याचितेति' । आचितो दशभाराः स्युः, द्वावाचितौ पचति, आढकाचितपात्रात्खोऽन्यतरस्यां, द्विगोष्ठंश्चेति पक्षे ठन्खौ, ताभ्यां मुक्ते प्राग्वतीयष्ठञ्, तस्य पूर्ववल्लुक् । 'द्विकम्बल्येति' । क्रीतार्थे ठञो लुक्, द्व्याढकी द्व्याचितेत्यनेन तुल्यम् । 'पञ्चाश्वीति' । समाहारे द्विगुः । इमौ द्वौ प्रतिषेधावुच्येते तत्रैकः शक्यो वक्तुं, कथम्, एवं वक्ष्यामि परिमाणात्तद्धितलुकीति, तन्नियमार्थं भविष्यति, परिमाणान्तादेव तद्धितलुकि ङीब् भवतीति, तेन द्व्याढकीत्यादौ च भविष्यति, पञ्चाश्वेत्यादौ च न भविष्यति, ततो बिस्ताचिकम्बल्येभ्यो नेति, नैवं शक्यं विपरीतोऽपि नियमः सम्भाव्येत परिमाणान्तात्तद्धितलुक्येवेति, तत्र को दोषः, परिमाणात्समाहारे न स्यात् द्विकुडुवी पञ्चाढकी, पञ्चाश्वेत्यादौ तु व्यावर्त्तकाभावात्स्यादेव ङीप्, तस्माद्यथान्यासमेवास्तु ॥

"काण्डान्तात्क्षेत्रे" ॥ मानदण्डः काण्डं, द्विगोरित्यधिकारादेव पूर्वसूत्रवत्तदन्तविधौ सिद्धे किमर्थमन्तग्रहणम्, अक्रियमाणेऽन्तग्रहणे क्षेत्रइत्येतत् काण्डस्यैव विशेषणं विज्ञायेत क्षेत्रे यः काण्डशब्दस्तदन्ताद्द्विगोरिति श्रुतत्वात् न तदन्तस्य, यथोत्तरसूत्रे प्रमाणे यः पुरुषशब्दस्तदन्तादिति, ततश्चेह प्रसज्येत द्वाभ्यां काण्डाभ्यां काण्डप्रमिताभ्यां क्षेत्राभ्यां क्रीता द्विकाण्डी वडवेति, इह तु न स्यात् द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभक्तिरिति, अन्तग्रहणे तु सति तदन्तस्यैव विशेषणं क्षेत्रं न काण्डस्य बहुव्रीहौ गुणभूतत्वात् ॥

"पुरुषात् प्रमाणेऽन्यतरस्याम्" ॥ 'प्रमाणे यः पुरुषशब्द इति' । पञ्चारत्निः पुरुष इति शुल्वविदः, तत्र द्वौ पुरुषौ प्रमाणमस्या इति

वाक्ये प्रमाणशब्देन सम्बन्धाज् जातिवचनोऽपि पुरुषशब्दः प्रमाणे वर्त्तते, वृत्तौ तु तत्स्वभावादेव प्रमाणे वृत्तिर्द्रष्टव्या ॥

"बहुव्रीहेरूधसो ङीष्" ॥ 'ऊधसो ऽनङिति समासान्ते कृत इति'। स[१]मासार्थादुत्तरपदाद्भवन्समासान्तः पूर्वं भवति ततः स्त्रीप्रत्ययः। 'अनो बहुव्रीहेरिति'। उपलक्षणमेतत्। अनो बहुव्रीहेः, डाबुभाभ्यामन्यतरस्यामिति चेत्यर्थः। 'कुण्डोध्नीति'। कुण्डमिव ऊधोऽस्या इति विग्रहः, ङीष्यल्लोपोऽन इत्यकारलोपः। 'प्राप्तोध्नी इति'। प्राप्तापन्ने च द्वितीययेति तत्पुरुषः, अत्वसन्तस्य चेति दीर्घः,। 'अन उपधालोपिन इत्यादि'। असत्यां पुनरनुवृत्तौ मध्येपवादन्यायेन डाप्प्रतिषेधयोरेवायं ङीष् बाधकः स्यात् नान उपधालोपिन इत्यस्य ङीपः। ननु च डाबुभाभ्यामित्यत्रानेनान्यतरस्यांग्रहणेन ङीबपि प्राप्यते, अन उपधालोपिन इत्ययं तु नियम इत्यवादीति कुतोऽयमनिष्टप्रसङ्गः। सत्यम्। अन उपधालोपिन इत्यस्य तु विधित्वाभ्युपगमेनैतदुक्तम्। इह बहुव्रीहेरूधसो ङीष् नश्चेति वक्तव्यम्, ऊधःशब्दान्ताद्बहुव्रीहेः स्त्रियां ङीष् भवति तत्संनियोगेन चान्त्यस्य नकारः, समासान्तप्रकरणे तु ऊधसोऽनङिति न वक्तव्यं, धनुषोऽनङित्येव पठितव्यं, कः पुनरेवं सति गुणो भवति, अन उपधालोपिन इत्यत्रास्यानुवृत्तिर्नाश्रयितव्या भवति, अपि च महोधाः पर्जन्यः कुण्डोधो धैनुकमिति सिद्धं भवति अन्यथा ऊधसोऽनङित्यत्र स्त्रियामिति वक्तव्यं स्यादत आह। 'समासान्तश्च स्त्रियामेवेति'। इष्यत इत्यनुषङ्गः, तत्रैव स्त्रियामिति वक्तव्यमित्यर्थः, इतरथा हि कब्विधिप्रसङ्गः, कपोऽवकाशः ऽन्यो बहुव्रीहिः, अयवकः, अव्रीहिकः, ङीषस्तु विभाषा कप् यदा न कप् सोऽवकाशः, कप्प्रसङ्गउभयं प्राप्नोति परत्वात्कप् स्यात् ॥

"संख्याव्ययादेर्ङीप्" ॥ 'पूर्वेण ङीषि प्राप्ते ङीब् विधीयत इति'। यत्र पूर्वपदप्रकृतिस्वरस्तत्र बहुव्रीहौ, अन्तोदात्ते तु बहुव्रीहौ ङीप्ङीषोर्नास्ति विशेषः, सूध्नी, नञ्सुभ्यामित्यन्तोदात्तत्वं तत्राल्लोपे ङीबप्यु-

१ सामर्थ्यादिति ३ पु॰ पाठः।

Digitized by Google

दात्तनिवृत्तिस्वरेणोदात्तो भवति । 'द्व्यूधीत्यादि' । द्वे ऊधसी यस्या अतिगतमूधोऽस्या निर्गतमूधोऽस्या इति विग्रहः । 'आदिग्रहणं किमिति' । संख्याव्ययाभ्यामुत्तरो य ऊधःशब्दस्तदन्ताद्बहुव्रीहेरिति विज्ञायमाने द्व्यूध्नीत्यादि सिद्धमिति प्रश्नः । 'द्विविधोध्नीति' । असत्यादिग्रहणे संख्याव्ययाभ्यामिति पञ्चमीनिर्द्देशात्ताभ्यामनन्तरो य ऊधःशब्दस्तदन्तादेव स्यात्पदान्तरव्यवाये तु न स्यादिति भावः ॥

"दामहायनान्ताच्च" ॥ स्वरितेनाधिकार इत्यत्र द्वौ पक्षौ शब्दाधिकारोऽर्थाधिकारश्चेति, तत्राद्ये पक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञातं स एवानुवर्त्तते, द्वितीये तु द्वन्द्वार्थस्यैकत्वात्तस्यैवानुवृत्तिः स्याद्वा न वा, तदिहाद्यं पक्षमाश्रित्याह । 'संख्याग्रहणमनुवर्त्तते नाव्ययग्रहणमिति' । 'हायनो वयसि स्मृत इति' । प्रकृतिरिति शेषः । हायनान्तो बहुव्रीहिर्वयसि गम्यमाने ङीपः प्रकृतिराचार्यैः स्मृत इत्यर्थः । 'त्रिहायना शालेति' । प्राणिधर्मो वयः शालाया न सम्भवति । अथ मूलोदाहरणवच्चिचतुर्भ्यां हायनस्येत्योपसंख्यानिकं णत्वं कस्मान्न भवतीत्यत आह । 'णत्वं चेत्यादि' । बहुव्रीह्यधिकारादेव तदन्तविधिसिद्धेरन्तग्रहणं विस्पष्टार्थम् ॥

"अन उपधालोपिनोऽन्यतरस्याम्" ॥ इति परत उपधालोपो यस्य सम्भवति स उपधालोपी । 'ननु सिद्धा एवेत्यादि' । एतच्च डाबुभाभ्यामित्यत्रैव व्याख्यातम् । 'अनुपधालोपिनो ङीप्प्रतिषेधार्थं वचनमिति' । अनो बहुव्रीहेर्यदन्यतरस्यां ङीब्विधानं तदुपधालोपिन एवेत्येवं नियमार्थमित्यर्थः । अस्य च नियमस्यानुपधालोपिनो ङीन्निवृत्तिः फलमिति फलतः प्रतिषेधवाचो युक्तिः । 'बहुराज्ञे इति' । औङ आप इति शी भावः, द्विवचननिर्द्देशो डापोभिव्यक्तये, एकवचने डाप्प्रतिषेधयो रूपस्य तुल्यत्वात् । 'बहुमत्स्येति' । सूर्यतिष्यागस्त्येत्यादिना उपधालोपविधानादुपधालोप्येष बहुव्रीहिः । 'सुपर्वेति' । न संयोगाद्वमन्तादिति निषेधान्नायमुपधालोपी ॥

"नित्यं संज्ञाछन्दसोः" ॥ ननु छन्दसि दृष्टमेवानुविधीयते नापूर्वमुत्प्रेक्ष्यते, तत्र च ङीबेव चेद्दृश्यते तस्य च लक्षणमस्ति क इदानीं तदभावं प्रयोक्तुं प्रभवति, संज्ञाशब्दा अप्यनादिप्रयुक्ता नियतानुपूर्वीकास्तत्रापि ङीबेव चायं दृश्यते न तदभावः शक्यते कर्त्तुं, किमर्थमिदं सूत्रं, संज्ञाछन्दसोरिति पदमुत्तरार्थं वक्तव्यं, नित्यग्रहणमुत्तरत्र विकल्पनिवृत्त्यर्थम् ॥

"केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च" ॥ 'केवलेति भाषायामिति' । असंज्ञाविषयइति भावः । 'मामकीति' । मयेयमिति युष्मदस्मदोरन्यतरस्यां खञ्चेत्यण्, तवकममकावेकवचनइति ममकादेशः, तत्राणन्तत्वाट्टिड्ढाणञित्येव सिद्धे नियमार्थं मामकग्रहणं संज्ञाछन्दसोरेव ङीम्नान्यत्रेति । 'मामिकेति' । टापि मामकनरकयोरुपसंख्यानमितीत्वम् । 'भागधेयीति' । भागशब्दात्पुल्लिङ्गात्स्वार्थे धेयप्रत्ययः, स्वार्थिकाश्च क्व चिदतिवर्त्तन्ते प्रकृतितो लिङ्गमिति स्त्रीलिङ्गता । 'पापेति' । अभेदोपचारात्तद्वति वर्त्तमानः पापशब्दोऽभिधेयवल्लिङ्गः, अवरीत्यत्र द्वितीयो वर्णो दन्त्योष्ठ्यो न पवर्ग्यः । 'आर्येण कृतेति' । प्राक् सुबुत्पत्तेः समासेऽकारान्तत्वम् । 'भेषजीति' । भिषज इयमित्यणि आदिवृद्धेरभावोऽस्मादेव निपातनादेकारः, एवं च भेषजग्रहणमपि नियमार्थम् ॥

"रात्रेश्चाजसौ" ॥ 'कथमित्यादि' । दीर्घान्ताज्जसि दीर्घाज्जसि चेति पूर्वसवर्णदीर्घप्रतिषेधाद्यणादेशे रात्र्य इति प्रयोग उपपद्यते, ह्रस्वान्तस्य तु जसि चेति गुणे रात्रय इति रूपं स्यात्, दीर्घान्तश्च रात्रिशब्दः संज्ञाछन्दसोरपि जसि न सम्भवति, अजसाविति प्रतिषेधात् किंपुनर्भाषायामिति प्रश्नः । 'ङीषयमित्यादि' । बह्वादिषु रात्रिशब्दो न पठ्यतइति चेत् तत्राह । 'तत्र हीति' । कृत इकारः कृदिकारः, तदन्तान्ङीष् भवति, दृजागृभ्यां विः, दर्विः, दर्वी, यस्तु क्तिन्संबन्धी तदन्ताच्च भवति कृतिः हृतिः । 'सर्वत इति' । कृदिकारादकृदिकाराच्चेत्यर्थः । यस्तु क्तिन्नर्थस्तस्माच्च भवति आक्रोशेनञ्यनिः, अकरणिरहरणिः । रात्रिशब्दोयं राशदिभ्यां त्रिबिति व्युत्पत्तिपक्षे कृदिकारान्तः, अव्युत्पत्तिपक्षे सर्वतोक्तिन्नर्था-

दिति ङीष्, सूत्रं तु ङीबर्थं रात्री इत्यत्, रात्रीभिरस्माग्रहभिर्देशस्येत्, अत्राद्युदात्तत्वं भवति ॥

"अन्तर्वत्पतिवतोर्नुक्" ॥ 'निपातनसामर्थ्याच्चेति'। कार्यान्तरवदर्थविशेषवृत्तिरपि लभ्यतइति भावः। कस्मिन्विशेषइत्यत्राह। 'अन्तर्वत्यतिवदिति गर्भभर्तृसंयोगइति'। अन्तर्वदिति गर्भसंयोगे गर्भिण्यामित्यर्थः। पतिवदिति भर्तृसंयोगे भर्तृमत्यामित्यर्थः, जीवपत्यामिति यावत्। 'इह न भवति अन्तरस्यां शालायां विद्यतइति'। अस्मिन्विषये एवं विधं वाक्यमेव भवति न तु मतुबादीत्यर्थः। क्वचिदन्तर्वती शालेति पठ्यते तदयुक्तम्, अत्र मतुबभावस्योक्तत्वात्। 'पतिमती पृथिवीति'। स्वामिपर्यायोत्र पतिशब्दः। 'मतुन्निपात्यतइति'। अधिकरणप्रधानस्यान्तःशब्दस्यास्तिना ऽसामानाधिकरण्याच्च प्राप्नोतीति कृत्वा। 'वत्वं तु सिद्धमिति'। मादुपधायाश्चेत्यनेनादुपधत्वात्। 'अन्तर्वत्पतिवतोरित्यादि'। एतयोः शब्दयोर्निपातनान्मतुब्वत्वे भवतः, नुक्तु विधीयते यथाक्रमं गर्भिण्यां जीवपत्यां चाभिधेयायां, जीवः पतिरस्याः जीवपतिः, विभाषा सपूर्वस्येति ङीन्नकारयोरभावपक्षे रूपं, तत्र ङिति ह्रस्वश्चेति नदीसंज्ञापक्षे इदुद्भ्यामिति ङेरामादेशः, जीवत्पत्यामिति भवति। वा तु छन्दसि नुग्विधिः, छन्दसि विषये तु विकल्पेन नुग्विधिर्भवति, अन्तर्वती अन्तर्वत्नी, पुंस्वपि दृश्यते सोन्तर्वानभवत् ॥

"पत्युर्नो यज्ञसंयोगे" ॥ यद्यत्र यज्ञशब्देन पतिशब्दस्य संबन्धो यज्ञसंयोग इत्यर्थः स्यात् यज्ञस्य पतिरियं ब्राह्मणीत्यत्रैव स्यात्, अस्ति ह्यत्रार्थद्वारकः संबन्धः स्वरूपेण चानन्तर्यलक्षणः, अथ यज्ञवाचिना संयोगो यज्ञसंयोगः तथापि पत्नीसंयाज इत्यादावेव स्याच्च त्वियमस्य पत्नीत्यादौ, तस्माद्यज्ञशब्दस्य योर्थस्तेन पतिशब्दार्थस्य संबन्धो यज्ञसंयोग इत्याह। 'यज्ञेन संयोगइति'। अन्यथा यज्ञशब्देनेत्यवक्ष्यत्। एवं च पतिशब्दार्थस्येत्यप्युक्तं भवति, नहि पतिशब्दस्य यज्ञेनार्थेन वाच्यवाचकभावः संबन्धान्तरं वा सम्भवति। 'तत्सा-

धनत्वादिति'। देवतोद्देशेन स्वद्रव्यत्यागो यागः, मध्यकं च दम्पत्योर्धनं कुटुम्बिनौ धनस्येशाते जायापत्योर्न विभागो विद्यतइति हि स्मर्यते, ततश्च त्यागे भार्याया अप्यनुमतिरपेत्यतइति, तत्रास्या अनुमत्या साधनत्वं, पत्न्यवेक्षितमाज्यं भवतीत्यादौ च साक्षादेव कर्तृत्वं मदभिलषितसाधनतया मदर्थं कर्मेत्येवं रूपोधिकारलक्षणसंबन्धोस्तीत्याह। 'फलग्रहीतृत्वादिति'। कर्तृत्वमात्रं विवक्षितं न स्त्रीत्वमिति ङीन्न कृतः, कर्त्तरि चेति समासप्रतिषेधः कर्मणि षष्ठ्या एव न शेषषष्ठ्या इति तस्यानेनोपपन्नः समासः, फलगृहीतत्वादिति पाठे गृहीतं फलं ययेति बहुव्रीहौ फलशब्दस्य जातिवचनत्वाद् निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनमिति गृहीतशब्दस्य परनिपातः। 'कथमित्यादि'। शूद्रस्यैव यज्ञे ऽनधिकृतत्वाद्यज्ञेनासंयोगात्कथं तद्भार्याया यज्ञसंयोग इति प्रश्नः। 'उपमानादिति'। अभिसाक्षिकं यत्पाणिग्रहणं तद्वृषलादीनामप्यस्ति तदाश्रयमुपमानम्॥

"विभाषा सपूर्वस्य"॥ सहशब्दोयमस्ति तुल्ययोगे यथा सशिष्यो गुरुरागत इति, अस्ति च विद्यमानवचनः, यथा सहैव दशभिः पुत्रैर्भारं वहति गर्द्दभीति, इत्थम्भूतलक्षणे तृतीया, विद्यमानेष्वेव पुत्रेष्वित्यर्थः, पूर्वशब्दोप्यस्ति व्यवस्थावचनः, पूर्वं मथुरायाः पाटलिपुत्रमिति, अस्ति चावयवशब्दः पूर्वं कायस्येति, तत्र तुल्ययोगे सहशब्दः पूर्वशब्दश्च व्यवस्थायामिति पक्षे ग्रामस्य पतिरियमिति वाक्ये प्राप्नोति, पूर्वस्य चापि प्राप्नोति, विद्यमानवचनसहशब्दः पूर्वशब्दश्च व्यवस्थावचन इति पक्षे पूर्वस्य माभूद्वाक्ये तु स्यादेव, अवयववचनः पूर्वशब्दः तुल्ययोगे सहशब्द इति पक्षे वाक्येपि स्यात्, तत्रापि पतिशब्दस्य पूर्वावयवः पकारस्तस्यापि स्यात्तस्माद्विद्यमानवचनः सहशब्दः पूर्वशब्दश्चावयववचन इति पक्ष आश्रीयते, तेन सहेत्यत्र तुल्ययोगइति विशेषणस्य प्रायिकत्वात्समासः, एवं च स्थिते सपूर्वस्येति पतिशब्दविशेषणं नोपपद्यते कथं पकारेण सपूर्वत्वमव्यभिचारादविशेषणं शब्दान्तरं तु पतिशब्दस्यावयवो न सम्भवति ततश्च सामर्थ्यात्प्रातिपदिकं पतिश-

Digitized by Google

ब्देन विशेष्यते न तु तेन । ‘पतिशब्द इति’ । पतिशब्देन तदन्तस्य ग्रहणम्, अनुपसर्जनग्रहणेनापि तदन्तं प्रातिपदिकमेव विशेष्यते न विशेषणभूतः पतिशब्दः, अन्यथा बहुव्रीहौ न स्यात् जीवः पतिरस्याः जीवपतिर्जीवपत्नीति, षष्ठीसमासएव तु स्यादाशापतिराशापत्नीति, तदेतत् सर्वमालोच्याह । ‘पतिशब्दान्तस्य सपूर्वस्यानुपसर्जनस्येति’ । ‘ग्रामस्य पतिरियमिति’ । असति सपूर्वग्रहणे तदन्तविधेरभावादत्रैव स्यात्, अथाप्यमहत्पूर्वेति ज्ञापकात्तदन्तेपि भवेत्केवलस्यापि स्यादेव तस्मात्सपूर्वस्येति वक्तव्यम् ॥

“नित्यं सपत्न्यादिषु” ॥ यानि समानादिपूर्वपदानि पत्यन्तानि प्रातिपदिकानि ते सपत्न्यादयः, कुत एतत्, समानादीनामेव गणे पाठात्, सपत्न्यादीनां चापाठात्, यद्येवं समानादिष्विति वक्तव्यं पूर्वग्रहणानुवृत्तेः, समादिषु पूर्वेष्ववयवेषु सत्स्वित्यर्थं, सत्यं, समानस्य सभावार्थं तु सपत्न्यादिष्वित्युक्तं, क्व चित्तूदाहरणानन्तरं समानादिष्विति वक्तव्यं सभावार्थमेवमुक्तमिति वृत्तावेव पठ्यते, अपर आह । समुदायोच्चारणसामर्थ्यात्सपत्नीभार्य इत्यत्र पुंवद्भावो न भवतीति नात्राप्तोक्तिरस्ति । किं च सभावार्थं समुदायोच्चारणमिदमिति सामर्थ्यमपि चिन्त्यं, तथा हे सपत्नि निःसपत्निः सपत्न्यृच्छति सपत्न्या सपत्न्यै इत्यादावपि ह्रस्वयणादेशौ न स्यातां तस्मात्सभावार्थमेव सपत्न्यादिष्वित्युक्तम् । ‘नित्यग्रहणं विस्पष्टार्थमिति’ । आरम्भसामर्थ्यादेव नित्यं भविष्यतीति भावः । ‘दासाच्छन्दसीति’ । दासपत्नीरहिगोपाः ।

“पूतक्रतोरै च” ॥ यद्ययमैकारः प्रत्ययः स्यादुत्तरसूत्रउदात्तवचनमनर्थकं स्यात् प्रत्ययत्वादेव सिद्धेः, तस्मादादेशोयं विज्ञायतइत्याह । ‘ऐकारश्चान्तादेश इति’ । ‘त्रय एते योगा इति’ । पुंयोगादाख्यायामित्यत्रानुवर्त्तयितव्या इत्यर्थः । इह करणसामर्थ्याच्च ङीप्सहिता एवानुवर्त्तन्ते, तेन यदा पुंयोगात्स्त्रियां पूतक्रत्वादयो वर्त्तन्ते तदा ङीषं बाधित्वा ऐकारादिसहितो ङीब् भवति ॥

"वृषाकप्यग्निकुसितकुसीदानामुदात्तः" ॥ 'वृषाकपिशब्दो मध्योदात्त इति'। लघावन्ते द्वयोश्च बह्वषो गुरुरिति वचनात्। अस्यार्थः। अन्ते एकस्मिन्लघौ द्वयोश्च लघ्वोः परतो बह्वषः शब्दस्य गुरुरुदात्तो भवतीति, बह्वष इति, बह्वच इत्यर्थः। योऽस्माकं चकारेण प्रत्याहारः सोऽन्येषां षकारेण। 'अग्न्यादिषु पुनरिति'। फिषित्यनेनाग्न्यादीनामन्तोदात्तत्वं, फिषिति प्रातिपदिकस्यान्याचार्यसञ्ज्ञा, ये तु कुसीदेति मध्ये गुरुमधीयते तेषां लघावन्तइति मध्योदात्तप्रसङ्गः॥

"मनोरौ वा" ॥ 'ऐकारश्चोदात्त इति'। औकारस्त्वनुदात्त एव। 'वाग्रहणेन द्वावपि विकल्प्येते इति'। यदा च द्वावपि न भवतस्तदा ङीबपि न भवति सन्नियोगशिष्टत्वात्। 'मनुशब्द आद्युदात्त इति'। मन ज्ञाने, भृमृशीतृचरित्सरितनिधनिमिमश्जिभ्य उरिति वर्त्तमाने धान्ये नित्दिति च, शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेति उप्रत्ययः, नित्वादाद्युदात्तत्वं, भरुः, मरुः, शयुः, तरुः, चरुः, त्सरुः, तनुः, धनुः, मयुः, मद्गुः, न्यङ्क्वादिपाठात्कुत्वं, प्रथमस्योदाहरणानि। शरुः, स्वरुः, स्नेहुः, त्रपु, असुः, वसुः, हनुः, क्लेदुः, बन्धुः, मनुरितिद्वितीयस्य॥

"वर्णादनुदात्तात्तोपधात्तो नः" ॥ 'वर्णानां तणतिनितन्तानामिति'। तशब्दान्तानामेतादीनां णशब्दान्तानां शोणादीनां तिशब्दान्तानां शितिप्रभृतीनां निशब्दान्तानां पृश्निप्रभृतीनां तकारान्तानां च पृषत्प्रभृतीनां वर्णवाचिनामादिरुदात्तो भवतीत्यर्थः। 'गतिस्वरेणेति'। गतिरनन्तर इत्यनेन। 'घृतादित्वादिति'। घृतादीनीति फिषि पठ्यते। 'पिशङ्गादिति'। लघावन्तइति मध्योदात्तत्वादुत्तरसूत्रेण ङीषि प्राप्ते ङीब्विधीयते। 'असितपलितयोरिति'। वर्णानां तणतिनितन्तानामित्याद्युदात्तावेतौ। 'छन्दसीत्यादि'। तौ न इति नकारे प्राप्ते क्नशब्दं ङीष्सहितमिच्छन्ति। 'भाषायामपीष्यतइति'। भाष्ये तु नैतत्प्रदर्शितम्, अवदातशब्दो न वर्णवाची किं तर्हि विशुद्धवाची, एवं ह्याह।

त्रीणि यस्यावदातानि विद्यायोनिश्च कर्म च।
एतत्त्रयं विजानीहि ब्राह्मणाग्र्यस्य लक्षणम्॥

इति। तेनावदातेत्यत्र ङीन्न भवति।

"अन्यतो ङीष्"॥ सारङ्गकल्माषशब्दौ लघावन्तइति मध्योदात्तौ, शप आक्रोशे, कल तृपः, शपेर्बश्चेति कलप्रत्ययः, पकारस्य बकारः प्रत्ययस्वरेण मध्योदात्तः शबलशब्दः, खट्वाशब्दो नित्स्वरेणाद्युदात्तः, खट्काङ्क्षे, अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्, कृष्णशब्दोन्तोदात्तः, कृषेर्वर्णइति नक् प्रत्ययः, इलचि प्रकृते कपेश्चेति उणादिषु सूत्रं, कपिः सौत्रो धातुः, कपिलशब्दोन्तोदात्तः॥

"षिद्गौरादिभ्यश्च"॥ 'षिद्भ्यः प्रातिपदिकेभ्य इति'। ष्वुनादेः प्रत्ययस्य षित्त्वमवयवे ऽचरितार्थं समुदायस्य विशेषकं भवतीति प्रातिपदिकानां षित्त्वं, धातोस्तु त्रपादेः षित्त्वमङ्विधौ चरितार्थमिति न तेन प्रातिपदिकं षिद्भवति। 'रजकीति'। शिल्पिनि ष्वुनित्यत्र ष्वुस्त्यादितं, गौरादिषु गौरशब्दस्य वर्णवाचिनोप्यन्तोदात्तत्वात्पाठः, मत्स्यादीनां योपधानामयोपधादिति जातिलक्षणस्य ङीषः प्रतिषेधात्पाठः, अन्येषां जातिशब्दानां स्त्रीविषयार्थः पाठः, श्वन्तत्तक्षित्येतयोर्ङापि प्राप्ते। 'अनडुही, अनड्वाहीति'। अनकारान्तत्वादप्राप्ते ङीषि सप्रत्यययोः पाठः, ङीषि परतो विकल्पेनान्यथा स्यात्। 'एषणकरण इति'। करणसाधन एषणशब्दो ङीषमुत्पादयति, इष्यतेनयेत्येषणी, अधिकरणे ल्युडिति टित्त्वान् ङीबेव भवति, अन्येषामपि ल्युडन्तानां ङीपि प्राप्ते पाठः, मेधशब्दस्याजातिवाचित्वाद् गौतमस्य शार्ङ्गरवादित्वान् ङीनि प्राप्ते वचनात्पक्षे सोपि भवति, आयस्थूणशब्दः शिवाद्यणन्तः, भौरिक्यादय इञन्तास्तेषामणिञोरिति ष्यङ्प्राप्तौ, आपिच्छिका नाम राजानः, जनपदशब्दात्क्षत्रियादञ्, तस्यातश्चेति लुकि कृते प्रत्ययलक्षणेन ङीप्प्राप्नोति, अग्रे हायनमस्य अग्रहायनः, प्रज्ञादित्वात्स्वार्थिकोण्, अस्मादेव निपातनाण्णत्वम्, आग्रहायणः, ङीपि प्राप्ते पाठः, के चिदाग्रहायणीतीकारान्तं पठन्ति, तस्य प्रयोजनमाग्रहायणीभार्य इत्यादौ पुंवद्भावो

Digitized by Google

मा भूदित्याहुः । एतेन प्रत्यवरोहणीति व्याख्यातम् । 'सुमङ्गलात्संज्ञायामिति' । केवलमामकेति ङीपि प्राप्ते पक्षे सोपि भवति स्वरे विशेषः, सुमङ्गलशब्दो बहुव्रीहिस्तत्र नञ्सुभ्यामित्यन्तोदात्तत्वान्ङीप्यपि सत्युदात्तनिवृत्तिस्वरेण भाव्यमिति नास्ति विशेषः, तथा च छन्दसि सुमङ्गलीरियं वधूरित्यन्तोदात्तत्वं दृश्यते, तस्माज्जातिवचनो ऽव्युत्पन्नः स्त्रीविषयः सुमङ्गलशब्दो लघावन्तइति मध्योदात्तो द्रष्टव्यः, तरुणतलुनयोर्नञ्स्नञीकक्ख्युंस्तरुणेति ङीपि प्राप्ते पक्षे सोपि भवति, बृहन्महच्छब्दयोरनर्थकः पाठ इति प्रागेवोक्तम्, ऋण्णन्तः सौधर्मशब्दः । 'रोहिणी नक्षत्रइति' । नक्षत्रादन्यत्र रोहिणी । 'रेवती नक्षत्रइति' । रयिरिति धननाम, रयिर्विद्यतेस्या इति मतुपि रयेर्मतौ बहुलमिति सम्प्रसारणं, निपातनादुत्वं, नक्षत्रादन्यत्र ङीब् भवति, विकलादीनां टापि प्राप्ते । कटाच्छ्रोणि वचने, कटी श्रोणिः, अन्यत्र कटा । 'पिप्पल्यादयश्चेति गणसूत्रं, पिप्पली हरीतकीत्यादिकं तु तस्योदाहरणप्रदर्शनम् । 'पृथिवीति' । प्रथेः षिवन्सम्प्रसारणं चेति षित्त्वादेव सिद्धे प्रत्ययान्तस्य पाठः पुंवद्भावनिवृत्त्यर्थः, पृथिवीभार्य इति । स्त्रीविषयस्यास्य पुंवद्भावप्राप्तिश्चिन्त्या, क्रोष्टुशब्दस्य स्त्रियां चेति तृज्वद्भावः । क्रोष्ट्रीत्यत्र निरूपणीयमस्ति स्त्रियां चेत्यत्र निरूपयिष्यामः । 'षित्त्वादेव सिद्धइति' । मातरि षिच्चेति वार्त्तिककारवचनात्षित्त्वं निपातनसामर्थ्याद्वा, उक्तं हि

धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च ।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम् ॥

इति । 'दंष्ट्रेति' । येप्यजादिषु दंष्ट्रेति पाठो नास्ति तेषामिदं प्रयोजनम् ॥

"जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु" ॥ वर्त्ततेनया सा वृत्तिः जीविका, । 'स्वरे विशेष इति' ।

तमेव दर्शयति । 'उत्सादिपाठादञि कृतइति' । अमत्रं भाजनम् । 'कुण्डान्येति' । क्रियाशब्दोयं, कुडि दाहे, गुरोश्च हल इत्यकारप्रत्ययः, अवटपर्यायस्तु कुण्डशब्दो नपुंसके नियतः, यस्तु पत्यौ जीवति कुण्डः स्यादिति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव कुण्डीयं न गोलीति । अमत्रवाचिनस्तु जातिशब्दादपि स्त्रीविषयत्वान्ङीष् विधीयते । 'आवपनञ्चेदिति' । यत्र धान्यादि प्रक्षिप्य नीयते सा गोणी यस्याः पुनर्यादृच्छिकं नाम सा गोणा । 'स्थलान्येति' । कृत्रिमा पुरुषव्यापारेण निष्पादिता, यथा स्थलयोदकं परिगृह्णन्तीति । 'भाजीति' । भज विश्राणने चुरादिः, णयासश्रन्थो युजिति युचि प्राप्ते इस्मादेव निपातनात् स्त्रियामप्येरच् । 'श्राणेति' । श्रा पाके, क्तः, संयोगादेरिति नत्वम् । 'स्थौल्यं चेदिति' । द्रव्ये वर्त्तमानस्य नागशब्दस्य स्थौल्यं चेत्प्रवृत्तिनिमित्तमित्यर्थः । 'नागशब्दो गुणवचन इति' । गजवाची नागशब्दस्तत्सहचरितं स्थौल्यमुपादाय स्त्र्यन्तरे प्रयुक्त उदाहरणं, सर्पे दृष्टस्तद्गतं दैर्घ्यमुपादाय स्त्र्यन्तरे प्रयुक्तः प्रत्युदाहरणमित्यर्थः । 'वर्णश्चेदिति' । प्रवृत्तिनिमित्तमित्यर्थः । 'कालान्येति' । यस्या यादृच्छिकीयं संज्ञा । 'नीलान्येति' । नील्या रक्ता शाटी, नील्या अन्वक्तव्य इत्यत् । 'अयोविकारश्चेदिति' । फाल इति यस्याभिधानम् । 'कुशान्येति' । छन्दोगाः स्तोत्रियागणनार्थानौदुम्बरान् शङ्कून् कुशा इति व्यवहरन्ति । 'कामुकान्येति' । यस्या मैथुनादन्यत्कामयितुं शीलम् । 'मैथुनेच्छावती भण्यतइति' । कामुकशब्दस्य लषपतेति कर्त्तरि व्युत्पादितत्वादिच्छामात्रे वृत्त्यभावात्सूत्रे तु प्रवृत्तिनिमित्तमात्रं निष्कृष्योक्तं, मैथुने इच्छा यस्याः सा मैथुनेच्छेति व्यधिकरणपदोबहुव्रीहिराश्रयणीय इति भावः । 'केशवेश इति' । केशसन्निवेशविशेष इत्यर्थः ॥

"शोणात् प्राचाम्" ॥ शोणशब्दोयं वर्णवाची वर्णानां तणतिनितन्तानामित्याद्युदात्तः, तत्रान्यतो ङीषित्येव सिद्धे नियमार्थं वचनं प्राचामेव नान्येषामिति ॥

Digitized by Google

"वोतो गुणवचनात्" ॥ 'गुणमुक्तवान्गुणवचन इति'। कृत्यल्युटो बहुलमिति भूते कर्त्तरि ल्युटं दर्शयति, स पुनर्यः प्राग्गुणमभिधाय पश्चान्मतुब्लोपादभेदोपचाराद्वा तद्वति वर्त्तते स वेदितव्यः। 'शुचिरिति'। उत इत्यस्मिन्नसत्त्वेपि पद्धीत्यादिसिद्ध्यर्थमेवात इत्यस्यासम्बन्धो व्याख्येयस्ततश्चेहापि प्रसङ्ग इति भावः। 'गुणवचनान्ङीबिति'। मनोरौ वेत्यस्यानन्तरमिदं पठितव्यमित्यर्थः। उत्तरसूत्रं बह्वादिभ्यो वेति पठितव्यम्। 'आद्युदात्तार्थमिति'। आद्युदात्तेषु गुणवचनस्य ङीब्विधानस्य प्रयोजनमित्यर्थः। अन्तोदात्तेषूदात्तयणो हल्पूर्वादिति ङीषप्युदात्त इति नास्ति विशेषः। आद्युदात्तेषु तु ङीबनुदात्त एवावतिष्ठते। 'वस्वीति'। शृस्वृस्निहीत्यादिना वसेरुप्रत्ययः, नित्त्वादाद्युदात्तो वसुशब्दः, गुणवचनश्चायं नैर्मल्यवचनः, प्रशस्तवचन इत्यन्ये, तथा चातिशयेन वसुर्वसिष्ठो भवति, पटुशब्दोप्याद्युदात्तः, धान्ये निदित्यधिकारे फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चेति उप्रत्ययः, फलेर्गुगागमः, पाटेश्च पटिरादेशः, फल्गुः, पटुः, नाकुः, मधुर्जतु इत्युदाहरणानि। मृदुशब्दस्त्वन्तोदात्तः, म्रद क्षोदे कुश्रेश्चेत्यधिकारे प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्चेति कुप्रत्ययः, पृथुः, मृदुः, भ्रस्जेः सलोपः सम्प्रसारणञ्च, न्यङ्क्वादित्वात्कुत्वम्, भृगुः,। 'खरुरिति'। खरुः कन्या पतिंवरेति निघण्टुः, तत्र पाणिग्रहणोत्कण्ठाभिधायित्वाद्गुणवचनत्वम्। तपरकरणं किम्। पटुमिच्छति पटूयति, पटूयतेः क्विप् पटूः स्त्री, अत्र मा भूत्, यद्यप्ययं सम्प्रति क्रियावचनस्तथापि पूर्वं गुणमुक्तवानिति कृत्वा स्यात्प्रसङ्गः, इहोत इति विशेषणाद्वचनग्रहणाच्च शास्त्रीयोदङ्गुणो न गृह्यते, लोके तूपसर्जनं गुण उच्यते शास्त्रेपि यस्य गुणस्य हि भावादिति विशेषणमात्रं गुणो गृह्यते, शुक्लादौ च प्रसिद्धतरो गुणशब्दः, वैशेषिकादयस्तु रूपरसादयश्चतुर्विंशतिर्गुणा इति प्रतिपन्नास्तदिह जिघृक्षितं गुणं लक्षयति। 'सत्त्वे निविशतइत्यादि'। सीदन्त्यस्मिञ्जातिगुणक्रिया इति सत्त्वं द्रव्यं तत्र यो निविशते समवैति स गुणः, यो निविशते स गुण इत्युच्यमाने गुणक्रियाजात्योर्गुणत्वप्रसङ्गात्सत्त्वइत्युक्तम्। एवमपि सत्ता जातिर्गुणः

स्यात्सा हि द्रव्यगुणकर्मसु त्रिष्वपि समवैति तदर्थं द्रव्यएवेत्यवधारणं द्रष्टव्यम्, एवमपि द्रव्यत्वजातिर्गुणः स्यात्सत्त्वे निवेशात्तत्रैव च निवेशादित्यत आह । 'अपैतीति' । ततः सत्त्वादपैति अपगच्छति क्व चिद्वा कदा चिद्वा न भवतीत्यर्थः । यथाम्रफले श्यामता पूर्वमुपैति रक्ततायां तत्र जातायामपैति च, द्रव्यत्वजातिस्तु सर्वदा द्रव्ये निविशते नापैति, यदि हि कदा चित्क्व चिद्वा न स्याद् द्रव्यमेवैतन्न स्यात्, एवमपि गोत्वादिजातिर्गुणः स्यात्सा हि सत्त्वे निविशते ऽपैति च, ततोऽश्वादिष्वभावादित्यत आह । 'पृथग् जातिष्विति' । पृथगिति पृथक्पदं, पृथग्भूतासु जातिष्वित्यर्थः, जात्याधारेषु द्रव्येषु दृश्यमानो जातिषु दृश्यतइत्युपचर्यते, समासे तु सति जात्यन्ताच्छ इति नित्याधिकारपरिगणितश्छः प्रसज्येत, तदेवमुक्तलक्षणोपेतो यः पृथग्जातीयेषु दृश्यते स गुणः, न चैवंरूपा गोत्वादिजातिः, यद्यपि खण्डमुण्डादिरूपेण खण्डमुण्डादयः पृथग्जातीयास्तथापि गोत्वेन तासामेकजातीयत्वमेव, ये त्वपैतीत्यस्य सत्येवाधारे तत्परित्यागमर्थमाहुस्तेषां पृथग्जातिष्वित्यनर्थकं गोत्वादिजातेरप्यपैतीत्यनेनैव व्यावृत्तिसिद्धेः । तस्मात्पूर्वोक्त एवार्थः, एवमपि हि क्रिया गुणः स्यात्सा हि द्रव्ये निविशते यदा सक्रियं तत्रैव च निविशते ऽपैति च ततो यदा निष्क्रियं द्रव्यं, पृथग्जातीयेषु गवाश्वादिषु दृश्यते ऽत आह । 'आधेयश्चेति' । आधेयो निष्पाद्यः । यथा पाकनिमित्तेषु घटादिषु रक्तता गुणः अक्रियाजः, अनुत्पाद्यो यथा तेजःपरमाणुषु स एव रक्तता गुणः, तदेवमाश्रयभेदेनोत्पाद्यानुत्पाद्यस्वभावो गुण इति नित्यो त्पाद्यस्य कर्मणो गुणत्वाभावः । एवमपि द्रव्यं गुणः प्राप्नोति तदपि शरीरादिकं पादादिषु द्रव्येष्वेव पृथग्जातीयेषु निविशते संयोगविनाशे च ततोऽपैति, आधेयं चाक्रियाजम्, अवयविद्रव्यस्योत्पाद्यत्वादाकाशादेश्चानुत्पाद्यत्वादित्यत आह । 'सोऽसत्त्वप्रकृतिर्गुण इति' । य उक्तलक्षणोपेतः सत्त्वप्रकृतिर्न भवति द्रव्यस्वभावको न भवति स गुण इत्यर्थः । अत्रोत्तरार्द्धेनैव सर्वजातीनां व्यावृत्तिसिद्धेः पूर्वार्द्धं व्यर्थं, जातीनां नित्यत्वेनोत्पाद्यत्वाभावात्, नैतदेवम्, असति पूर्वार्द्धे न जातिर्व्यावर्त्तते, यथा तैजसानां परमा

णूनां यद्रूपं यच्चेष्टकादिपाक्यद्रव्यगतं तदुभयं मिलितमुत्पाद्यानुत्पाद्यस्वभावमित्युभयोरपि गुणत्वं भवति न पुनः प्रत्येकमुभयस्वभावत्वात्, तथा पाक्यद्रव्यरूपं जातिश्चेत्युभयं मिलितमुत्पाद्यानुत्पाद्यस्वभावमिति जातिरपि गुणः स्यादेव, नहि सजातीयत्वे सतीति विशेषणमुपात्तमतः पूर्वार्द्धेन जातिव्यावृत्तिः। नन्वेवमपि पृथग्जातिषु दृश्यतइत्यनेनैव सर्वजातिव्यावृत्तिसिद्धेः पूर्वकं विशेषणद्वयं व्यर्थमेव, तस्मात्सत्वे निविशतइति स्वभावकथनं ततोपैति पृथग्जातिषु दृश्यतइति च विकल्पेन जातीर्व्यावर्त्तयतः, अपैतीत्यस्य च तत्रैव कियन्तं चित्कालं स्थित्वा तमाधारन्त्यजतीत्ययमर्थः। तदेवं सत्त्वे निविशते अपैति आधेयश्चाक्रियाजश्चेत्येकं लक्षणं, सत्त्वे निविशते पृथग्जातिषु इत्यादिकं चापरमिति लक्षणद्वयमनुसर्त्तव्यम् ॥

"बह्वादिभ्यश्च" ॥ 'शक्तिः शस्त्रइति'। शक्तिशब्दः शस्त्रेभिधेये ङीषमुत्पादयति शक्तिः शक्ती। शस्त्रइति किम्। शक्तिः सामर्थ्यम्। अन्ये शक्तिशस्त्री इति शब्दद्वयं पठन्ति, शस्त्रिः शस्त्री, इतः प्राण्यङ्गादीत्यादीनि त्रीणि वाक्यानि यथोत्तरमधिकविषयाणि, तत्रोत्तरं वाक्यद्वयं रात्रेश्चाजसावित्यत्रैव व्याख्यातम्। इकारान्तात्प्राण्यङ्गवाचिनो वा ङीष् भवति, धमनिः धमनी। सर्वतोऽक्तिन्नर्थादित्येव ङीषि सिद्धे शकट्यादीनामिकारान्तानां पाठः प्रपञ्चार्थः। पद्धतिशब्दः क्तिन्नन्तः, पादस्य हतिः पद्धतिः, हिमकाषिहतिषु चेति पद्भावः, अहन्विति पठ्यते न स केवलः स्त्रियां वर्त्तते, तस्मात्तदन्तो बहुव्रीहिरुदाहार्यः, दीर्घमहरस्याः दीर्घाह्नी शरत्, पाठसामर्थ्यादनुपसर्जनादिति न प्रवर्त्तते, अस्य ङीषो विकल्पितत्वाड्डाप्प्रतिषेधावपि भवतः, अन उपधालोपिन इति ङीप् च। 'बहुशब्दो गुणवचन इति'। अन्तोदात्तश्च लङ्घिबंह्योर्नलोपश्चेत्युप्रत्ययान्तः। किमर्थं तर्हि तस्येह पाठ इत्यत्राह। 'तस्येति' ॥

"नित्यं छन्दसि" ॥ 'नित्यग्रहणमुत्तरार्थमिति'। इह त्वारम्भसामर्थ्यादेव नित्यो विधिः सिद्धः, योगारम्भश्चिन्त्यप्रयोजनः ॥

तार्थमाह कृत्स्नं जगत्तस्य शरीरमिति, अस्यायं पितेत्युक्ते पितृत्वप्रतियोगिनः पुत्रत्वं ह्यर्थसिद्धं भवति, तस्मादित्यादि ऐतदात्म्यमिति सामान्येन वैयधिकरण्येन प्रतिज्ञातं ब्रह्मात्मकत्वं तत्त्वमसीति सामानाधिकरण्येन जीवविशेष उपसंहृतमित्यर्थः । अनेनोद्देश्योपादेयविभागनिमित्तचोद्यं परिहृतं भवति । उद्देश्योपादेयविभागे सति त्वं–शब्द उद्देश्यसमर्पको भवति तच्छब्दावगतकारणत्वस्य प्रमाणान्तरासिद्धत्वात्, त्वं–शब्दस्तु लोकप्रसिद्धप्रकारेणोद्देश्यसमर्पकः, जीवस्य ब्रह्मात्मकत्वं च न प्रत्यक्षादिप्रमाणप्रसिद्धं तस्माज्जीवमात्रपरस्त्वं–शब्दः, त्वं–शब्दाब्दावगतजीवस्य तच्छब्दावगतस्य ब्रह्मणश्च सामानाधिकरण्येन प्रतिपाद्यमानमैक्यं स्वरूपैक्यमेव भवतीति चोद्यम् । परिहारस्तु ऐतदात्म्यमिति सर्वस्य ब्रह्मात्मकत्वस्य यथाप्राप्तमुपसंहार्यत्वात्सामान्येनोक्तस्य विशेष उपसंहारस्यापेक्षितत्वाच्च जीवविशेषे पूर्वोक्तब्रह्मात्मकत्वं सामानाधिकरण्येनोपसंहृतमिति । ऐतदात्म्यमित्यत्राप्यात्मशब्दो मृदात्मको घट इतिवत् स्वरूपैपरः स्यात्, तेन तत्त्वमसीत्युपसंहारेऽपि स्वरूपैक्यमेवोक्तं भवति ऐतदात्म्यमिदं सर्वमित्यत्राचिद्ब्रह्मणोरैक्यं तत्त्वमसीति जीवब्रह्मणोरैक्यं चोक्तमिति नात्रानुवाद इति शङ्काद्वयमभिप्रेत्याह एतदुक्तं भवतीति,

एतदुक्तं भवति ऐतदात्म्यमिदं सर्वमिति चेतनाचेतनप्रपञ्चमिदं सर्वमिति निर्दिश्य तस्य प्रपञ्चस्यैष आत्मेति प्रतिपादितः प्रपञ्चोद्देशेन ब्रह्मात्मकत्वं प्रतिपादितमित्यर्थः । तदिदं ब्रह्मात्मकत्वं किमात्मशरीरभावेन? उत स्वरूपेणे? ति विवेचनीयं, स्वरूपेणेति चेद् ब्रह्मणः सत्यसंकल्पत्वादयः तदैक्षत बहु स्यां प्रजायेयेत्युपक्रमावगता बाधिता भवन्ति । शरीरात्मभावेन च तदात्मकत्वं श्रुत्यन्तराद्विशेषतोऽवगतम्

चेतनाचेतनप्रपञ्चमित्यनेनाचिद्ब्रह्मणोरैक्यं प्रतिपादितमित्येतत्प्रत्युक्तं

सर्वशब्दो हि असङ्कोचेन प्रमाणान्तरगम्यं सर्वं चेतनाचेतनात्मकं जगद्वदती-त्यचिन्मात्रपरत्वे सर्वशब्दस्वारस्यभङ्गात् । श्रुत्यन्तरे च इदं सर्वमसृजते-त्यारभ्य सच्च त्यच्चाभवत् विज्ञानं चाविज्ञानं चेतीदं सर्वमिति निर्दिष्टस्य जगतश्चेतनाचेतनात्मकत्वेन विवृतत्वाच्च ऐतदात्म्यमित्यत्र किमुद्देश्यं किमुपादेयमित्यत्राह प्रपञ्चोद्देशेनेति, एवमेका शङ्का परिहृता । अथात्म-शब्दस्य स्वरूपैक्यपरत्वं व्युदस्यति तदिदमित्यादिना, स्वरूपेणेति चेदिति, अचिद्ब्रह्मणोः स्वरूपैक्ये अचेतनत्वादेव सत्यसङ्कल्पत्वादिविरोधः । जीव-ब्रह्मणोरैक्ये तस्य कर्म्मवश्यत्वादेव सत्यसङ्कल्पत्वादिविरोध इत्यर्थः । एतद्विरोधपरिहाराय शरीरात्मभावः कल्प्यत इत्यभिप्रायः । न केवलम-नया श्रुत्यर्थापत्त्या कल्प्यः अपि तु ब्रह्मण आत्मत्वं जगतस्तच्छरीरत्वं च कण्ठोक्तमित्याह शरीरात्मभावेन चेति, का पुनः श्रुतिः तत्र विशे-षतोऽवगतिः कथमिति शङ्कायां श्रुतिवाक्यमाह अन्तरिति,

अन्तः प्रविष्टः शास्ता जनानां सर्वात्मेति प्रशासितृ-त्वरूपात्मत्वेन सर्वेषां जनानामन्तः प्रविष्टः, अतः सर्वात्मा सर्वेषां जनानामात्मा सर्वं चास्य शरीरमि-ति विशेषतो ज्ञायते ब्रह्मात्मकत्वं य आत्मनि* ति-ष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, इति च, अत्राप्यनेन जीवेनात्मनेति इहेदमेव ज्ञा-यत इति पूर्वमेवोक्तम् । अतः सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वात्सर्वशरीरं सर्वप्रकारं सर्वशब्दैर्ब्रह्मैवा-भिधीयत इति तत्त्वमिति सामानाधिकरण्येन जीव-शरीरतया जीवप्रकारं ब्रह्मैवाभिहितम्, एवमभिहिते

* माध्यन्दिनिश्रु०

सत्ययमर्थो ज्ञायते त्वमिति यः पूर्वं देहाधिष्ठातृतया

तत्र वाक्ये विशेषतोऽवगतिं दर्शयति प्रशासितृत्वेति, सर्वात्मेति उक्तमात्मत्वं प्रशासितृत्वलक्षणमिति दर्शयितुं प्रशासितृत्वरूपात्मत्वेनेत्युक्तम् । अन्तः प्रविष्ट-शब्देन राजादिव्यावृत्तिः, शास्तेति पदेन गगनादिव्यावृत्तिः । अतः-अन्तः प्रविश्य प्रशासितृत्वादित्यर्थः । कथं विशेषतोऽवगतमित्यपेक्षायामेवं विशेषतोऽज्ञायत इत्युक्तमिति न पुनरुक्तिः । अस्मिन्वाक्ये प्रशासितृत्वविशेषितात्मस्वरूपत्वस्य कण्ठोक्तिः । शरीरत्वं गम्यम् ॥

य आत्मनीति । अथात्मत्वशरीरत्वकण्ठोक्त्यन्वितं वाक्यमाह य आत्मनीति, यद्यपि शरीरशरीरिभावः श्रुत्यन्तरसिद्धः स्यात् तथाऽप्येतत्प्रकरणे स्वरूपैक्यं गम्यत इत्यत्राह अत्रापीति, ततः किं सामानाधिकरण्यसिद्धिरित्यत्राह अत इति, सामानाधिकरण्येनोपसंहारे किं प्रयोजनमित्यत्राह एवमभिहिते सतीति,

प्रतीतः स परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्तः पृथक्स्थितिप्रवृत्त्यनर्हः अतस्त्वमिति त्वत्प्रकारविशिष्टं त्वदन्तर्यामिणमेवाचष्ट इति, अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मात्मकतयैव जीवस्य शरीरिणः स्वनामभाक्त्वात् तत्त्वमिति सामानाधिकरण्यप्रवृत्तयोर्द्वयोरपि पदयोर्ब्रह्मैव वाच्यं, तत्र तत्पदं जगत्कारणभूतं सकलकल्याणगुणगणाकरं निरवद्यं निर्विकारमाचष्टे, त्वमिति च तदेव ब्रह्म जीवान्तर्यामिरूपेण स्व*शरीरजीवप्रकारविशिष्टमाचष्टे, तदेवं प्रवृत्तिनिमित्तभेदेनैकस्मिन् ब्रह्मण्येव तत्त्वमिति द्वयोः पदयोर्वृत्तिरुक्ता, ब्रह्मणो निरवद्यत्वं निर्विकारत्वं सर्वकल्याणगुणाकरत्वं

* सशरीरजीवेति पा० ।

Digitized by Google

जगत्कारणत्वं चाबाधितम्, अश्रुतवेदान्ताः पुरुषाः सर्वे पदार्थाः सर्वे जीवात्मानश्च ब्रह्मात्मका इति न पश्यन्ति सर्वशब्दानां च केवलेषु तत्तत्पदार्थेषु वाच्यैकदेशेषु वाच्यपर्यवसानं मन्यन्ते,

बुद्धिशब्दयोस्तत्पर्यन्तताज्ञापनं प्रयोजनमित्यर्थः परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्त इति शरीरतया प्रकारत्वेन पृथक्सिद्धिस्थितिप्रवृत्त्यनर्ह इत्यर्थः। बुद्धिशब्दयोस्तत्पर्यन्तत्वे हेतुमाह अनेनेति, स्वनामभाक्त्वादन्तर्यामिणमेवाचष्ट इति अयमर्थ इत्यन्वयः। परं प्रति वक्ष्यमाणदूषणानां स्वपक्षास्पर्शित्वं दर्शयितुं स्वपक्षे सामानाधिकरण्यसाद्गुण्यं विवक्षुस्तत्रैकार्थवृत्तित्वसिद्धिमाह तत्त्वमिति, सामानाधिकरण्यप्रवृत्तयोरिति तत्रेत्यादिना वाक्यद्वयेन तत्त्वमिति पदद्वयस्य प्रवृत्तिनिमित्तभेदसिद्धिमाह तत्त्वं–शब्दौ त्वदुक्तार्थपरौ स्यातां, ततः किमित्यत्राह तदेवमिति, प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वस्वरूपसामानाधिकरण्यं सिद्धमित्यर्थः। त्वन्मते सामानाधिकरण्यलक्षणासिद्धिर्वाक्यान्तरावगतसर्वज्ञतादिगुणविरुद्धमविद्याश्रयत्वादि कल्पनीयं चेत्यभिप्रायेणाह ब्रह्मण इति, सर्वे पदार्थाः शब्दाश्च ब्रह्मपर्यन्ताश्चेत् ब्रह्मपर्यन्ततया पदार्थाः प्रतीयेरन् शब्दाश्च तत्पर्यन्ततया व्युत्पद्येरन्। न च तथा क्रियते, तस्मात् नामरूपयोर्ब्रह्मपर्यन्तत्वमयुक्तमित्यत्राह अश्रुतेति, पदार्थानां ब्रह्मपर्यन्ततया ग्रहणाभावोवेदान्तश्रवणरूपसामग्रीवैकल्यात् न तदर्थाभावादित्यर्थः। सर्वशब्दानां चेति तस्मादेव सामग्रीवैकल्याच्च तत्तच्छब्दानां तत्पर्यन्तव्युत्पत्त्यभाव इत्यर्थः। न हि चक्षुषा गन्धग्रहणाभावे सति गन्धाभाव इत्यर्थः सामग्र्यां सत्यां तत्पर्यन्तत्वग्रहणात् पूर्वं तत्तत्पदार्थमात्रपर्यन्तत्वग्रहणं सामग्रीवैकल्यात् घ्राणेन गन्धग्रहणे सति चक्षुषा गन्धग्रहणाभावस्सामग्र्यभावात् न तु गन्धाभावादित्यवगम्यते हीत्याह इदानीमिति,

इदानीं वेदान्तवाक्यश्रवणेन ब्रह्मकार्य्यतया तदन्तर्यामितया च सर्वस्य ब्रह्मात्मकत्वं सर्वशब्दानां

तत्तत्प्रकारसंस्थितब्रह्मवाचित्वं च जानन्ति । नन्वेवं गवादिशब्दानां तत्तत्पदार्थवाचितया व्युत्पत्तिर्बाधिता स्यात्, नैवं सर्वे शब्दा अचिज्जीवविशिष्टस्य परमात्मनो वाचका इत्युक्तं नामरूपे व्याकरवा-

इदानीं वेदान्तश्रवणरूपसामग्रीसम्भवे सति वेदान्तवाक्यानि तत्तत्पदार्थतत्तच्छब्दानां सापेक्षतया ब्रह्मपर्यन्तत्वं बोधयितुं न शक्नुवन्ति इति चोदयति नन्विति, वेदान्तवाक्यानि किं व्युत्पत्तिनिरपेक्षाणि उत तत्सापेक्षाणि व्युत्पत्तिनिरपेक्षाणि चेत् अव्युत्पन्नस्यापि बोधजनकानि स्युः, सापेक्षाणीति चेत् अन्यपर्यन्ततया व्युत्पन्नस्य शब्दस्यान्यपर्यन्तत्वं व्युत्पत्तिविरुद्धं न बोधयन्ति, व्युत्पत्तेश्च प्रत्यक्षसापेक्षत्वात्तद्विरुद्धं सकलपदार्थानामन्यपर्यन्तत्वं च न बोधयन्ति यथा आदित्यो यूप इत्यादिवाक्यं तत्र व्युत्पत्त्यर्थं शब्दस्य प्रत्यक्षसापेक्षत्वात् प्रत्यक्षविरुद्धं यूपादित्यतादात्म्यं हि न बोधयितुमलं तद्वाक्यमत्रापि तद्वदित्यर्थः । परिहरति नैवमित्यादिना, यूपादित्यभेदविषयस्य प्रत्यक्षस्यानन्यथासिद्धत्वात्तद्यूपादित्यतादात्म्यवादिवाक्यस्वारस्यभञ्जकं न तु प्रत्यक्षत्वात् । अत एव हि प्रत्यक्षावगतज्वालैक्यस्यानन्यथासिद्धमनुमानं भञ्जकं देहातिरिक्तात्मवादिवाक्यं प्रत्यक्षसिद्धदेहात्माभिमानस्य भञ्जकं तत्र हि ज्वालैक्यप्रत्यक्षमेकवर्तिकावर्तित्वसादृश्यादन्यथासिद्धं देहात्माभिमानविषयं प्रत्यक्षं चोष्णं जलमितिवत् संसर्गादन्यथासिद्धं तस्माज्ज्वालैक्यविषयस्य देहात्माभिमानविषयस्य चान्यथासिद्धस्य प्रत्यक्षस्यानुमानागमौ भञ्जकौ भवतः । तत्राऽपि व्याप्तिलिङ्गधर्म्मिग्राहिप्रत्यक्षस्यानन्यथासिद्धत्वात्तदबाधितम् । एवमत्रापि तत्तत्पदार्थपर्यन्तत्वग्रहणमन्यथासिद्धं तत्तत्पर्यन्तत्वव्युत्पत्तिश्चान्यथासिद्धेति, अनन्यथासिद्धागमेनान्यथासिद्धांशबाधो युक्त एव । अत्राप्यनन्यथा सिद्धं तत्तत्पदार्थस्वरूपविषयं शब्दस्वरूपविषयं तत्सम्बन्धविषयं च प्रत्यक्षं न बाध्यते अन्यथासिद्धस्तत्तन्मात्रपर्यन्तत्वांश एव बाध्यत इति परिहारमभिप्रेत्याह सर्वे इत्यादिना, शब्दानां परमात्मपर्यन्तत्वं युक्तं बाधकस्यान्य-

Digitized by Google

थासिद्धत्वादित्यभिप्रायः । तत्र कथमन्यथासिद्धिरित्यत्राह तत्र लौकिका इति,

णीत्य त्र, तत्र लौकिकास्तु पुरुषाः शब्दं व्याहरन्तो शब्दवाच्ये प्रधानांशस्य परमात्मनः प्रत्यक्षाद्यपरिच्छेद्यत्वाद्वाच्यैकदेशभूते वाच्यसमाप्तिं मन्यन्ते । वेदान्तश्रवणेन च व्युत्पत्तिः पूर्यते । एवमेव वैदिकास्सर्वे शब्दाः परमात्मपर्यन्तान् स्वार्थान् बोधयन्ति वैदिका एव सर्वे शब्दा वेदादेवोद्धृत्योद्धृत्य परेणैव ब्रह्मणा सर्वपदार्थान्पूर्ववत्सृष्ट्वा तेषु परमात्मपर्यन्तेषु पूर्ववन्नामतया प्रयुक्ताः ।

तत्तत्पदार्थानां ब्रह्मपर्यन्तत्वग्रहणे तत्तत्पर्यन्तशब्दव्युत्पत्तौ च ब्रह्मस्वरूपग्रहणमवश्यापेक्षितं यथा नैल्यपीतिमादीनां द्रव्यपर्यन्तत्वग्रहणे नीलपीतादिशब्दव्युत्पत्तौ च तत्तद्वस्तुग्रहणमपेक्षितं तस्य च प्रत्यक्षाद्यगोचरत्वात्तत्तद्वस्तुमात्रपर्यन्तत्वग्रहणं तत्तत्पर्यन्तव्युत्पत्तिश्चोभयमन्यथासिद्धमित्यर्थः । तर्हि व्युत्पत्त्या वेदान्तश्रवणं वेदान्तश्रवणेन च व्युत्पत्तिरित्यत्राह वेदान्तेति, एकदेशव्युत्पत्त्या वेदान्तश्रवणमुपपद्यते वेदान्तश्रवणेन व्युत्पत्तिपूर्तिः, न च कार्त्स्न्येनादितः प्रभृति व्युत्पत्तिरिति नान्योन्याश्रय इत्यर्थः । एवं लौकिकशब्दानां तत्तद्वस्तुमात्रपर्यन्तत्वेन व्युत्पन्नानामपि परमात्मपर्यन्तत्वमुक्तं वैदिकशब्दानां परमात्मपर्यन्तत्वमाह एवमेवेति, वैदिका एव शब्दाः परमात्मपर्यन्ताः स्युर्लौकिकास्तत्तद्वस्तुमात्रपर्य्यन्ताः स्युः, व्युत्पत्तिस्वारस्यसिद्ध्यर्थमित्यत्राह वैदिका एवेति, लौकिकशब्दानामपि वेदशब्देभ्यः उद्धृत्य तत्तद्वस्तुषु प्रयुक्तत्वात्सर्वे शब्दा वैदिका एवेति सर्वे परमात्मपर्यन्ता एवेत्यर्थः । तत्र प्रमाणमाह तदाहेति,

तदाह मनुः सर्वेषां तु स नामानि कर्म्माणि विविधानि च । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च

नि*र्ममे इति, संस्थाः—संस्थानानि रूपाणि इति यावत् । आह च भगवान् पराशरः नामरूपं† च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ इति, श्रुतिश्च सूर्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति सूर्यादीन् पूर्व्ववत्परिकल्प्य नामानि च पूर्व्वञ्चकारेत्यर्थः । एवं जगद्ब्रह्मणोरनन्यत्वं प्रपञ्चितं, तेनैकेन ज्ञातेन सर्वस्य ज्ञाततोपपादिता भवति सर्वस्य ब्रह्मकार्यत्वप्रतिपादनेन तदात्मतयैव सत्यत्वं नान्यथेति तत्सत्यमित्युक्तम्,

संस्थाशब्दस्य स्थित्यर्थताव्यावृत्त्यर्थमाह संस्थाः—संस्थानीति, आह चेति, अत्र मनुपराशरयोरैककण्ठ्यं दर्शितं, श्रुतिश्चेति, सूर्याचन्द्रमसाविति निर्द्देशेन नामकल्पनं चार्थसिद्धमित्यभिप्रायात्पूर्व्वोक्तोपबृंहणवचनानुगुण्याच्च नामानि च पूर्ववच्चकारेति व्याख्यातं शब्दाः सर्वे वैदिका एव आनुपूर्व्वीभेदमात्रात् लौकिकत्वं तत एव लक्षणभेदश्च । तस्मात्सर्वशब्दा-ब्रह्मपर्यन्ता इति । ततः किमयमर्थः इत्यारभ्य प्रतिपिपादयिषितस्यार्थस्येत्यत्राह एवमिति, ब्रह्मण एवोपादानत्वनिमित्तत्वोपपादनेन जगद्ब्रह्मणोरनन्यत्वमुक्तमित्यर्थः । तेनेति जगतः सत्यत्वेन सत्यमिथ्यार्थयोरैकताप्रसङ्गाद्यभावादेकविज्ञानेन सर्वविज्ञानमुपपादितं भवतीत्यर्थः । सर्वस्येत्यादि तत्सत्यमिति वाक्ये ब्रह्मात्मकतयैव जगत् सत्यं स्वनिष्ठत्वमेवासत्यमिति जगतो ब्रह्मात्मकत्वेन सत्यत्वोपपादनान्महावाक्यस्वारस्यमपि जगत्सत्यत्वानुगुणमित्यर्थः ॥

यथा दृष्टान्ते सर्वस्य मृद्विकारस्य मृदात्मनैव सत्यत्वं, शोधकवाक्यान्यपि निरवद्यं सर्वकल्याणगुणाकरं परं ब्रह्म शोधयन्ति सर्वप्रत्यनीकाकारताबोधनेऽपि

* मनुस्मृ॰ १ । † वि॰ पु॰ १ । ५ । ६३ ।

Digitized by Google

यथेति लोकदृष्टप्रकारेण दृष्टान्तस्य कथनीयत्वाद् दृष्टान्तस्य च लोके सत्यत्वेन सम्प्रतिपन्नत्वाद्दार्ष्टान्तिकस्य च दृष्टान्तानुगुणत्वात्तत्सत्यमित्यादिवाक्यान्यपि जगत्सत्यत्वपराणीति महावाक्यस्वारस्यं जगत्सत्यत्वानुगुणमित्याशयः । किञ्च मृत्पिण्डादिदृष्टान्तत्रयमपि परिणामपक्षानुगुणमेव दार्ष्टान्तिकब्रह्मकारणत्वपराणि तत्तेजोऽसृजत तदात्मानं स्वयमकुरुतेत्यादिवाक्यान्यपि परिणामानुगुणान्येव । न हि रज्जुसर्पादिदृष्टान्तः श्रूयते व्यवर्तत अभ्रमदित्यादिकमपि पदं न श्रूयते । सूत्रं च परिणामात् । सू॰ आत्मकृतेः । सू॰ पटवच्चेत्यादि न तु विवर्तनादिति रज्जुसर्पवदिति च उपबृंहणवचनान्यपि परिणामानुगुणान्येव निस्सरन्ति यथा लोहपिण्डात् कटकमुकुटेत्यादीनि, एवं सकलश्रुतिस्मृतिसूत्रानुगुण्यात्परिणामपक्षे सुस्थे सति स च सद्वारकोऽद्वारकोवा परिणाम इति विवेके ब्रह्मणोनिर्दोषत्वाविकारत्वादिश्रुतिबाधप्रसङ्गात्सद्वारकत्वमेव युक्तं, यस्यात्मा शरीरमित्यादिश्रुतयश्च शरीरशरीरिभावं वदन्त्यः परिणामादिकं सद्वारकं ज्ञापयन्ति । उपबृंहणेष्वपि काठिन्यवान् यो बिभर्ति तस्मै भूम्यात्मने नम इति ब्रह्मणोनिर्देशात्सद्वारकत्वमेव स्पष्टं सद्वारकमुपादानत्वं ब्रह्मणो मुख्यमेव शरीरवाचिपदानां शरीरिपर्यन्तत्वात् । मीमांसकैरपि सद्वारकस्यापि मुख्यत्वमभ्युपगम्यते यथा परमापूर्वं प्रति प्रोक्षणादेः शेषत्वं तत्र हि यज्ञशेषत्वं व्रीह्यादिद्वारकम् । अपूर्वशेषत्वं व्रीहियागद्वारकम् । अरुणया क्रीणाति गवा यजेतेत्यादिषु गुणस्य जातेश्च क्रययजनसाधनत्वं सद्वारकमपि मुख्यमेवाभ्युपगतम् । एवं विशिष्टस्य ब्रह्मणः शरीरद्वारकमुपादानत्वं मुख्यमेव एवं विशिष्टस्यैवोपादानत्वं सर्ववेदान्तिभिरभ्युपगतम् । अविद्योपाधिशक्तिविशिष्टस्यैवोपादानत्वोपपादनात् । तस्माच्चिदचिद्विशिष्टमेव ब्रह्म कारणं परिणामित्वेन न तु विवर्त्ताधिष्ठातृत्वेन सद्विद्यायां षड्विधतात्पर्यलिङ्गं चास्मत्पक्ष एवास्ति । षड्विधतात्पर्यलिङ्गमद्वैतविषयमित्येतदभ्युपेतं तत्तु न निर्विशेषाद्वैतविषयम् । अपि तु विशिष्टाद्वैतविषयम् उपक्रमे सदेवेति वाक्यं च निमित्तत्वोपादानत्वतदुपयोगिसार्वज्ञ्यसर्वशक्तित्वादिपरत्वात्सविशेषविषयम् । उपसंहारगतं तत्त्वमसीति सामानाधिकरण्यं प्रवृत्तिनिमित्तभेदेनै-

Digitized by Google

कार्थविषयत्वाद् विशिष्टाद्वैतविषयं विशिष्टैकार्थपरस्य तत्त्वमसीति वाक्यस्यावृत्तत्वादभ्यासोऽस्ति चिदचिदात्मकप्रपञ्चस्य ब्रह्मविशेषणत्वं प्रमाणान्तरागोचरमित्यपूर्वता चास्ति । एतदर्थज्ञानवतस्तस्य तावदेव चिरमिति मोक्षोपदेशात्फलं चास्ति । एतद्विषयस्य पितापुत्रसंवादरूपत्वादर्थवादश्च अस्मिन्नेवार्थे मृत्कार्यदृष्टान्तोपन्यासादुपपत्तिश्चास्तीति षड्विधतात्पर्यलिङ्गं विशिष्टाद्वैतविषयमित्याशय इत्यन्वयः । एवं सद्विद्यायास्सविशेषपरत्वमुक्तम् । अथ शोधकवाक्यानां सविशेषपरत्वमुच्यते शोधकेत्यादिना,

तत्तत्प्रत्यनीकाकारतायां भेदस्यावर्जनीयत्वान्न निर्विशेषवस्तुसिद्धिः । ननु च ज्ञानमात्रं ब्रह्मेति प्रतिपादिते निर्विशेषज्ञानमात्रं ब्रह्मेति निश्चीयते नैवं स्वरूपनिरूपणधर्म्मशब्दा हि धर्म्ममुखेन स्वरूपमपि प्रतिपादयन्ति गवादिशब्दवत् तदाह सूत्रकारः तद्गुणसारत्वात् तद्व्यपदेशः प्राज्ञवदिति, ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः यथा प्राज्ञेन ब्रह्मणा विपश्चिता यः सर्वज्ञः सर्वविदिति सर्वज्ञ एव ज्ञानगुणसारत्वात्सत्यं ज्ञानमिति व्यपदिश्यते यावदात्मभावित्वाच्च न दोष इति ज्ञानेन धर्म्मेण स्वरूपमपि निरूपितं न तु ज्ञानमात्रं ब्रह्मेति । कथमिदमवगम्यत इति चेत् यः सर्वज्ञः सर्वविद् इत्यादिज्ञातृत्वश्रुतेः, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च विज्ञातारमरे केन विजानीयादित्यादिश्रुतिशतसमधि-

तत्र श्रौतगुणनिषेधं द्विधा परिहरति निरवद्यं सर्वकल्याणगुणाकरमिति पदद्वयेन सामान्यनिषेधो विशेषोपस्थापके सति तत्र पर्यव-

Digitized by Google

स्यति छागो वा मन्त्रवर्णादिति न्यायात् तस्मादपहतपाप्मेत्यादिभिः हेयगुणानां निषिध्यमानत्वात् गुणसामान्यनिषेधस्तत्पर्यवसायीति निरवद्यमिति पदस्याभिप्रायः । विशेषविधाने सति सामान्यनिषेधस्तद्व्यतिरिक्तविषय एव यथाऽग्निषोमीयहिंसाव्यतिरिक्तविषयो न हिंस्यात्सर्वा भूतानीति सामान्यनिषेधः । तस्मात्सत्यकामस्सत्यसङ्कल्प इत्यादिभिर्मङ्गलगुणविधाने सति गुणनिषेधस्तु तद्व्यतिरिक्तविषय इति सर्वकल्याणगुणाकरमिति पदस्याभिप्रायः । आर्थभेदनिषेधः परिहरिष्यते सामानाधिकरण्यान्यथानुपपत्त्या निर्विशेषवस्तुसिद्धिं दूषयति सर्वेत्यादिना, विशेषणभेदविवक्षायां विशेषणभेदेन विशेष्यभेदात् युगपदभिधाने विशेषणानामप्यैक्यप्रसङ्गात् क्रमेणाभिधाने विशेषणानामन्योन्यविशेषणविशेष्यभावप्रसङ्गाच्च वस्तुमात्रैक्यपरमेव सामानाधिकरण्यं तत्र प्रतियोगिरूपप्रवृत्तिनिमित्तभेदसम्भवाच्च सामानाधिकरण्यलक्षणहानिः । वाक्यतात्पर्यानुगुणा लक्षणा तद्विरुद्धमुख्यवृत्तेर्बलीयसी । सर्वपदलक्षणा च न दोषः विषं भुङ्क्ष्वेत्यादिषु दर्शनात्सर्वपदलक्षणायामपि समानविभक्त्या तात्पर्यनिश्चयः शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिवच्च न व्यावृत्तिर्धर्म्मः स्वरूपमेव व्यावृत्तिः । न च पर्यायता कार्ष्ण्यादिव्यावृत्तपीतिमव्यावृत्तादिशब्दवदिति हि पूर्व्वपक्षशरीरं विरुद्धविशेषणानामेव विशेष्यभेदापादकत्वाच्च विशेषणभेदे विशेष्यभेदः युगपदभिधानेऽपि समानविभक्त्या विशेष्यमात्रैक्यप्रतिपादनाच्च विशेषणैक्यप्रसङ्गः । पदजातं श्रुतं सर्वमित्यादिन्यायेन सर्वैः पदैर्युगपदेवानेकविशेषणविशिष्टैकार्थाभिधानाच्च विशेषणानामन्योन्यविशेषणविशेष्यभावप्रसङ्गः । उद्देश्योपादेयविभागस्तु परामर्शदशायामेवावगम्यते इति न विशेषणविवक्षायाः काचिदनुपपत्तिरित्येतावदभिप्रेतं श्रीभाष्यकारैः श्रीभाष्येऽभिहितत्वात् । अत्र शौक्ल्यादिदृष्टान्तव्यावृत्तिं द्विधाह सर्वेत्यादिना, सर्वप्रत्यनीकाकारताबोधनेऽपीति, कार्ष्ण्यव्यावृत्तमित्यादिषु प्रतियोगितद्व्यावृत्ती शब्दस्वारस्यादेव सम्प्रतिपन्ने अत्र त्वन्वयरूपार्थाभिधायिनः शब्दस्य व्यतिरेकमुस्वार्थपरत्वक*ल्पनमयुक्तमित्यपि-शब्दस्य भावः ।

* अर्थपरिकल्पनमयुक्तमिति पा॰ ।

गतमिदं ज्ञानस्य धर्म्ममात्रत्वाद्धर्म्ममात्रस्यैकस्य वस्तुत्वप्रतिपादनानुपपत्तेश्च, अतः सत्यज्ञानादिपदानि स्वार्थभूतज्ञानादिविशिष्टमेव ब्रह्म प्रतिपादयन्ति तत्त्वमिति द्वयोरपि पदयोः स्वार्थप्रहाणेन निर्विशेषवस्तुस्वरूपोपस्थापनपरत्वे मुख्यार्थपरित्यागश्च । ऐक्ये तात्पर्यनिश्चयान्न लक्षणा दोषः सोऽयं देवदत्त इतिवत् । यथा सोऽयमित्यत्र तच्छब्देन देशान्तरकालान्तरसंबन्धिपुरुषः प्रतीयते अयमिति च सन्निहितदेशवर्तमानकालसम्बन्धी तयोस्सामानाधिकरण्येनैक्यं प्रतीयते तत्रैकस्य युगपद् विरुद्धदेशकालसंबन्धितया प्रतीतिर्न घटत इति द्वयोरपि पदयोः स्वरूपमात्रोपस्थापनपरत्वं स्वरूपस्य चैक्यं प्रतिपाद्यत इति चेत्, नैतदेवं सोऽयं देवदत्त इत्यत्रापि लक्षणा गन्धो न विद्यते विरोधाभावात्, एकस्य भूतवर्तमान-

एवं शौक्ल्यादिदृष्टान्ताच्छब्दवैषम्यमुक्तम् । अथार्थवैषम्यमभिप्रेत्याह तत्तत्प्रत्यनीकता भेद*स्यावर्ज्जनीयत्वादिति शौक्ल्यस्य कस्यचिद्धर्मत्वात्स्वरूपमेव व्यावृत्तिः स्वरूपे प्रतिपन्ने अध्यासासहत्वाच्च, ब्रह्म तु न कस्यचिद्धर्म्मभूतं स्वरूपे प्रतिपन्ने ऽध्याससहं च तस्मात्स्वरूपातिरेकेण व्यावृत्तिरभ्युपगन्तव्येति भावः । अथार्थगुणनिषेधं परिचोदयति नन्विति, न हि ज्ञानं ज्ञानान्तराश्रयो भवति तस्मात् ज्ञानस्वरूपत्वप्रतिपादनेन गुणनिषेधः सिद्ध इत्यर्थः । परिहरति नैवमिति, । स्वरूपेत्यादि स्पष्टं, तथाहेति धर्मवाचिशब्दस्य धर्मिपर्यन्तत्वे लक्षणा स्यादिदि शङ्कापरिहाराय

* तत्तत्प्रत्यनीकाकारभेदस्येति पा॰ ।

यावदात्मेति सूत्रमुदाहृतम् । जातिगुणयोर्व्यक्तिगुणिपर्यन्तत्वस्य लोके प्रत्यक्षसिद्धत्वात्तद्वाचिशब्दानां तत्पर्यन्तत्वमाश्रितम् अत्र तु ज्ञानस्य धर्म्यन्तरनिष्ठत्वं कथमित्यभिप्रायेण चोदयति ज्ञानेनेति, तत्र प्रमाणं दर्शयति यः सर्वज्ञस्सर्ववित् इति, ज्ञानस्वरूपत्वश्रुत्यनुगुणं ज्ञातृत्वस्वरूपताश्रुतिर्नेया न तु ज्ञातृत्वश्रुत्यनुगुणं ज्ञानस्वरूपताश्रुतिर्नेयेत्यत्राह परास्य शक्तिरिति, ज्ञातृत्वश्रुतीनां भूयस्त्वात् बहुस्वारस्यानुगुणङ्कतिपयश्रुतिर्नेयेत्यर्थः । द्वैधे बहूनां वचनमिति हि स्मृतिः भूयसां स्याद्बलीयस्त्वमिति हि मीमांसकाः । स्वाभाविकीति श्रुत्या ज्ञातृत्वादेराविद्यकत्वं च परिहृतं भवति । ज्ञानशब्दस्य ज्ञातृत्वपर्यन्तत्वे तु न कस्यचिद्वैयर्थ्यं ज्ञातृशब्दस्य ज्ञानपरत्वे तृच्प्रत्ययोर्निरर्थकः स्यादिति अयमर्थोऽर्थसिद्ध इति न कण्ठोक्तः । ज्ञानस्य ज्ञानाश्रयत्वं व्याप्तिविरुद्धमित्यत्राह ज्ञानस्येति,

क्रियाद्वयसंबन्धो न विरुद्धः, देशान्तरस्थितिर्भूता, सन्निहितदेशस्थितिर्वर्त्तते, अतो भूतवर्त्तमानक्रियाद्वयसंबन्धितयैक्यप्रतिपादनमविरुद्धं, देशद्वयविरोधश्च कालभेदेन परिहृतः । लक्षणायामपि न द्वयोरपि पदयोर्लक्षणा समाश्रयणम्, एकेनैव लक्षितेन विरोधपरिहारात् लक्षणाभाव एवोक्तः देशान्तरसंबन्धितया भूतस्यैवान्यदेशसंबन्धितया वर्तमानत्वाविरोधात् । एवमत्रापि जगत्कारणभूतस्यैव परस्य ब्रह्मणो जीवान्तर्यामितया जीवात्मत्वमविरुद्धमिति प्रतिपादितं, यथाभूतयोरेव हि द्वयोरैक्यं सामानाधिकरण्येन प्रतीयते तत्परित्यागेन स्वरूपमात्रैक्यं न सामानाधिकरण्यार्थः, भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे

Digitized by Google

वृत्तिस्सामानाधिकरण्यमिति हि तद्विदः, तथा भूत-योरेवैक्यं *सम्पादितमस्माभिः,

एकस्य धर्मरहितस्य ज्ञानस्य ज्ञानान्तराश्रयत्वे तु न श्रुतिविरोधः उपपादितप्रकारात् व्याप्तिविरोधश्चेत् ज्ञानङ्कस्यचिद्धर्म्मत्वेन दृष्टमिति तवापि तुल्यं, श्रुतिबलात् स्वतन्त्रत्वं चेत् तत एव ज्ञानाद्याश्रयत्वसम्भव इति प्रतिबन्दिमुखेन व्याप्तिविरोधः परिहृतः । परपक्षस्य धर्म्मभूतस्य स्वतन्त्रवस्त्वन्तरत्वकल्पनानुपपत्तिर्दूषणं चोक्तं भवति । अत इत्यादि स्पष्टम् अथ प्रस्तुतेऽर्थे दूषणान्तरमाह तत्त्वमित्यादिना, लक्षणा स्यादित्यर्थः तात्पर्यविरुद्धमुख्यवृत्तेरपि तात्पर्यानुगुणा लक्षणा प्रबलेति चोदयति ऐक्येति, दृष्टान्तं विशदयति यथेति, परिहरति नैतदित्यादिना, अन्यतरपदस्यापि न लक्षणेत्यभिप्रायेण गन्धशब्दः । विरोधाभावं विवृणोति एकस्येति, क्रियाद्वयं किमित्यत्राह देशान्तरेति, तथाऽपि देशद्वयसम्बन्धो विरुद्ध इत्यत्राह देशद्वयेति, कालद्वयसम्बन्धविरोधे क्षणिकत्वप्रसङ्गाद्देशद्वयसम्बन्धाविरोध इत्यर्थः । देशद्वयसम्बन्धविरोधे तीर्थयात्रादिविधानानुपपत्तिश्चाभिप्रेता । अथ पदद्वयलक्षणायां दूषणमाह लक्षणायामपीति, लक्षणाभाव एवेत्यादि स्पष्टं सोऽयं देवदत्त इत्यादौ लक्षणा न स्यात् अत्र तु तत्त्वम्पदावगतार्थविरोधाल्लक्षणैव स्यादित्यत्राह एवमत्रापीति, जीवात्मत्वं जीवतादात्म्यं स्वरूपैक्ये शरीरशरीरीभावे च साधारणमिति तद्विशेषितं जीवान्तर्यामितयेति, यदुक्तं तात्पर्यविरुद्धमुख्यवृत्तेरपि तात्पर्यानुगुणा लक्षणा प्रबलेति तच्छ्रुत्या परिहरन्नर्थाद्दूषणान्तरं चाह यथाभूतयोरिति, यथा भूतयोर्यद्विशेषणविशिष्टयोः तत्परित्यागेन तद्विशेषणपरित्यागेन शब्दप्रतिपन्नविशेषणपरित्यागस्य सामानाधिकरण्यप्रतिपाद्यत्वे सति हि तदनुगुणलक्षणाया बलीयस्त्वं यद्विशेषणं प्रवृत्तिनिमित्ततयाऽपेक्षितं तद्विशेषणपरित्यागे सामानाधिकरण्यस्य तात्पर्यमेव नास्ति, प्रत्युत सामानाधिकरण्यापेक्षित एव विशेषणस्वीकारः । अतस्तात्पर्यानुगुण्याभा-

* रैक्यमुपपादितमिति पा० ।

वाल्लक्षणा न बलीयसीत्यर्थः । विशेषणान्वयापेक्षा कुत इत्यत्राह भिन्नेति, विशेषणपरित्यागरूपानुपपत्तिर्नास्मत्पक्ष इत्याह तथा भूतयोरिति, एवं शङ्कापरिहारः कृतः । प्रवृत्तिनिमित्तभेदाभावात्सामानाधिकरण्यलक्षणहानिरूपं दूषणमुक्तं च भवति ।

उपक्रमविरोध्युपसंहारवाक्यतात्पर्यनिश्चयश्च न घटते, उपक्रमे हि तदैक्षत बहु स्यामित्यादिना सत्यसङ्कल्पत्वं जगदेककारणत्वमप्युक्तं तद्विरोधि चाविद्याश्रयत्वादि ब्रह्मणः, अपि चार्थभेदतत्संसर्गविशेषबोधनकृतपदवाक्यस्वरूपतालब्धप्रमाणभावस्य शब्दस्य निर्विशेषवस्तुबोधनासामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणं, निर्विशेष इत्यादिशब्दास्तु केनचिद्विशेषेण विशिष्टतयाऽवगतस्य वस्तुनो वस्त्वन्तरावगतविशेषनिषेधकतया बोधकाः, इतरथा तेषामप्यनवबोधकत्वमेव प्रकृतिप्रत्ययरूपेण पदस्यैवानेकविशेषगर्भितत्वात्, अनेकपदार्थसंसर्गबोधकत्वाच्च वाक्यस्य ।

उपक्रमविरोधं दूषणमाह उपक्रमेति, तदेवोपपादयति उपक्रमे हीत्यादिना, ततः किमित्यत्राह तद्विरोधि चेति, एवं प्रकृतपरामर्शितच्छब्दावगतगुणगणबाधः, पदद्वयलक्षणा, सामानाधिकरण्यलक्षणहानिरुपक्रमविरोधश्चेति चत्वारि दूषणान्युक्तानि । अथ निर्विशेषवस्तुनि प्रमाणाभावो निरूप्यते अपि चेत्यादिना, अर्थभेदेति प्रकृतिप्रत्ययार्थभेदबोधनकृतं पदत्वम् अनेकपदार्थसंसर्गविशेषबोधनकृतं वाक्यत्वमित्यर्थः । न केवलं प्राबल्यदौर्बल्यनिरूपणेन सविशेषनिर्विशेषविषयत्वनिश्चयः स्वरूपसिद्धिरेव सविशेषविषयत्वेनेति स्वरूपशब्दस्य भावः । प्रमाणभावः प्रमितिजनकत्वं निर्विशेषवस्तुनि न शब्दः प्रमाणमिति न वाच्यं निर्विशेष-

Digitized by Google

शब्दो हि तत्प्रतिपादकः। निर्विशेषशब्देन निर्विशेषवस्तु प्रमितं चेत् तद्दूष्यम्। अप्रमितं चेत्तरां, तस्मान्निर्विशेषवस्तुनि शब्दः प्रमाणमेवेत्यत्राह निर्विशेष इत्यादि शब्दास्त्विति, न हि निर्विशेषशब्दो निर्विभक्तिकः पदान्तरानन्वितः प्रतिमिजनकः किं तु सविभक्तिकः पदान्तरान्वित एव प्रमितिजनकः। तस्माद्विभक्तिपदान्तरावगतविशेषा अपि न निर्विशेषशब्देन निषेध्यास्तस्मात् कतिपयविशेषनिषेधपरतया बोधका निर्विशेषादिशब्दा न कृत्स्नविशेषनिषेधपराः। तथा सति माता मे वन्ध्येतिवद् व्याहतिः स्यात् तस्मान्निर्विशेषशब्दो निर्विशेषवस्तुनि न प्रमितिजनक इत्यर्थः। बोधकत्वं प्रमितिजनकत्वम् अनवबोधकत्वमेवोपपादयति प्रकृतिप्रत्ययरूपेणेति, प्रमिताप्रमितविकल्पोऽतिदुःस्थः तथा सति सर्वदर्शनेषु पूर्वपक्षोपन्यासतन्निरसनानुपपत्तेः। पूर्वपक्षः प्रमितश्चेन्न दूष्य इति अप्रमितश्चेन्न दूष्य इति पूर्वपक्षस्तु प्रतीत एव न तु प्रमितः प्रतीतिसिद्धत्वाच्च दूषणमपि युक्तमिति चेत् तर्हि अङ्गुल्यग्र इत्यादिवाक्यवत् निर्विशेषशब्देन प्रतीतिर्जायते न तु प्रमितिः। तस्मान्निर्विशेषवस्तुप्रतीतं दूष्यमेवेत्यभिप्रायेण न निर्विशेषे वस्तुनि शब्दः प्रमाणमित्युक्तं, निर्विशेषवस्तुविषयप्रतीतिजनकत्वं नास्माभिर्निषिध्यते किं तु प्रमितिजनकत्वमेव निषिध्यते तस्मान्न प्रमिताप्रमितविकल्पावकाशः।

अथ स्यात् नास्माभिर्निर्विशेषे स्वयम्प्रकाशे वस्तुनि शब्दः प्रमाणमित्युच्यते स्वतः सिद्धस्य प्रमाणानपेक्षत्वात् सर्वैः शब्दैस्तदुपरागविशेषा ज्ञातृत्वादयः सर्वे निरस्यन्ते, सर्वेषु विशेषेषु निवृत्तेषु वस्तुमात्रमनवच्छिन्नं स्वयम्प्रकाशं स्वत एवावतिष्ठत इति, नैतदेवं केन शब्देन तद्वस्तु निर्दिश्य तद्गता विशेषा निरस्यन्ते ज्ञप्तिमात्रशब्देनेति चेन्न सोऽपि सविशेषमेव वस्त्ववलम्बते प्रकृतिप्रत्ययरूपेण विशेष*गर्भितत्वात्। ज्ञा

* विशेषगर्भत्वादिति पा॰।

अवबोधन इति सकर्म्मकः सकर्तृकः क्रियाविशेषः क्रियान्तरव्यावर्त्तकस्वभावविशेषश्च प्रकृत्याऽवगम्यते प्रत्ययेन लिङ्गसङ्ख्यादयः स्वतः सिद्धावप्येतत्स्वभावविशेषविरहे सिद्धिरेव न स्यात् । अनन्य*साधनस्वभावतया हि ज्ञप्तेः स्वतः सिद्धिरुच्यते ब्रह्मस्वरूपं कृत्स्नं सर्वदा स्वयमेव प्रकाशते चेत् न तस्मिन्नन्यधर्म्माध्यासः सम्भवति । न हि रज्जुस्वरूपे ऽवभासमाने सर्पत्वादिरध्यस्यते,

अतो निर्विशेषादिशब्दाः कतिपयविशेषनिषेधपराः कृत्स्ननिषेधपरत्वे व्याघातादेव न प्रमितिजनका इत्यर्थः । एवं निर्विशेषवस्तुनोऽनिष्प्रमाणकत्वमुक्तं स्वयम्प्रकाशस्य वस्तुनः प्रमाणानपेक्षत्वाच्छब्दो भेदनिषेधपर एवेति शङ्कते अथ स्यादित्यादिना, प्रमाणानपेक्षत्वे वेदान्तवैयर्थ्यमित्यत्राह सर्वैः शब्दैरिति, तदुपरागविशेषाः-तदारोपितविशेषा इत्यर्थः । अनवच्छिन्नम् अवच्छेदकज्ञातृज्ञेयादिनिवृत्त्या अनवच्छिन्नमित्यर्थः । स्वत एव प्रमाणान्तरनिरपेक्षम्परिहरति नैतदित्यादिना, केन शब्देनेति केनचित्पदेन ब्रह्म निर्दिश्य तद्विशेषा निरसनीयाः अनिर्दिश्य विशेषनिरसने ब्रह्मणोऽपि स्वेतरव्यावृत्तत्वेन विशेषत्वाद्विशेषनिषेधे ब्रह्मापि निषिद्धं स्यादिति तत्परिहाराय ब्रह्म केनचित्पदेन निर्देष्टव्यमेव वेदान्तेषु श्रूयमाणानां ब्रह्मवाचिपदानां निर्वाहार्थं च केनचित्पदेन ब्रह्मणो निर्देश्यत्वमभ्युपगन्तव्यमित्यभिप्रायेण केन शब्देनेत्युक्तं, ज्ञप्तिमात्रेत्यादि स्पष्टं कथं सविशेषवस्त्ववलम्बत इत्यत्राह प्रकृतिप्रत्यययोगेनेत्यादि, तदेव विवृणोति ज्ञा अवबोधन इति, ज्ञप्तिमात्रशब्दस्य प्रस्तुतत्वात् ज्ञा अवबोधन इति धातुरुक्तः । इदं ब्रह्मवाचिसर्वपदानां प्रकृतिप्रत्ययविभागस्य प्रदर्शनार्थं क्रियाविशेष इति धात्वर्थत्वाद्धर्म्यन्तरनिष्ठत्वाच्च क्रियाविशेष

* अन्यसाधनस्वभावतया हि इति पा॰ ।

षेधवाचित्वमयुक्तम् । ननु तच्छब्दो हि प्रकृतपरामर्शी उत्पत्त्यसंभवः प्रकृतः न तु प्रामाण्यमिति चेन्न आद्यसूत्रद्वयस्याप्रामाण्यपरत्वे पक्षविपर्यासद्योतकेन वा-शब्देन प्रामाण्यस्योपस्थापिततया धीस्थस्य तस्य तच्छब्देन परामर्शोपपत्तेः । यद्वा परीक्ष्यमाणं पञ्चरात्रशास्त्रं तावद् बुद्धिस्थम् अबुद्धिस्थस्य परीक्षणायोगात् अतो बुद्धिस्थं शास्त्रं तच्छब्देन परामृश्य तस्याप्रतिषेध इत्युक्ते प्रामाण्याप्रतिषेध इति फलितं स्यात्, अतः फलितार्थपरं भाष्यमिति न किञ्चिदप्यस्वारस्यं चतुर्णामत्यन्तभेदो नाभिमतः एकव्यूहत्वे कार्य्यकारणयोरतिशयाभावादुत्पत्त्यसंभव इति चायुक्तं तत्तद्विग्रहसंस्थानविशेषकार्य्यविशेषरूपातिशयसंभवात् । यदि त्वया कार्य्यकारणत्वतदसाधारणार्थक्रियारूपातिशयोऽवश्यंभावितयाऽभिमतः तर्हि सोऽस्त्येव, यदि तदतिरिक्तातिशयः स तु मृद्घटसुवर्णकुण्डलादिष्वपि नास्तीति व्याप्तिशून्यतया तर्काभासता सर्वेषां पूर्णषाड्गुण्यत्वे कार्य्यव्यवस्थायाः को हेतुरिति चेत् ईश्वरस्वातन्त्र्यमेवेति ब्रूमः । सदा सर्वज्ञस्य सर्वशक्तेरीश्वरस्य कालविशेषे सृष्टिसंहारादिव्यवस्थाभिः स्वातन्त्र्यकृता तद्वत् समस्तजगत ईश्वरव्यूहत्वावगमाच्चतुःसंख्यत्वनियमहानिरिति चासङ्गतं कर्मवश्यानां क्षेत्रज्ञानामकर्मवश्येश्वरव्यूहत्वानुपपत्तेः नृसिंहवामनादिभिः संख्यानियमभङ्ग इति चेन्न तेषां विभवकोट्यनुप्रवेशात् यदा भगवदंशत्वं व्यूह-शब्देन विवक्षितं तदा चतुःसंख्यानियमोऽप्यनभिमत इति नानिष्टापत्तिः यदा कार्य्यविशेषावच्छिन्नांशविशेषपरो व्यूहशब्दः तदा चतुःसंख्यानियम उपपद्यत इति तत्रानियमप्रसञ्जनमशास्त्रसिद्धव्यूहशब्दार्थानभिज्ञत्वकृतं गुणगुणित्वकल्पनानुपपत्तिविप्रतिषेधोऽपि स्वाज्ञानविजृम्भितः तत्र शास्त्रे गुणस्य गुणित्वानभ्युपगमात्, यदि क्वचित् ज्ञानादिशब्देन वासुदेवादिसामानाधिकरण्यं दृष्टं न तत्रापि दोषः श्रुतिषु परब्रह्मसमानाधिकरणज्ञानानन्दादिशब्दानामिव तद्गुणसारत्वात्तदुपपत्तेः, अन्यथा यः सर्वज्ञः सर्ववित् सत्यं ज्ञानमित्यादिश्रुतिष्वप्यप्रामाण्यं प्रसज्येत्, आपाततोविप्रतिषेधप्रतिपत्तिसामान्यात् वेदनिन्दादिशङ्कापरिहारस्तु दर्शितः, अतः श्रुतिविप्रतिषेधासिद्धिः, अतः परोक्तार्थोऽनुप-

Digitized by Google

पक्षः । अन्ये त्वेवं वर्णयन्ति पूर्वाधिकरणेषु वादिनां तर्कावष्टम्भाः शिष्टापरिगृहीतबाह्यागमाश्च निरस्ताः । अत्र शिष्टपरिगृहीताः साङ्ख्ययोगपाशुपतपञ्चरात्रागमाश्चत्वारः परीक्ष्यन्ते अभावे वेदमन्त्राणां पञ्चरात्रोदितेन हीत्यादिवचनान्महाभारते निष्ठानिर्णयाध्यायाच्च शिष्टपरिगृहीतत्वं चतुर्णां सिद्धं, तत्र स्वतः सर्वज्ञवैदिकेश्वरांशभूतत्वाद्धिरण्यगर्भादीनामीश्वरज्ञानमूलतया साङ्ख्ययोगाद्यागमा वेदविरोधेऽपि प्रमाणमिति पूर्वपक्षं कृत्वा तेषामीश्वराणां सर्वज्ञत्वेऽपि तेषां तत्त्वार्थोपदेष्टृत्वेऽपि ग्रन्थनिर्माणे पुरुषान्तराणाम् अप्यनुप्रवेशात्तेषामज्ञानरागद्वेषादिसम्भवेन सावकाशत्वाद्वेदाविरुद्धांशः प्रमाणं विरुद्धांशस्त्वप्रमाणमिति चाहुः । तत्र चतुर्णामपि वेदानुसारित्वनिर्णयस्य प्रदर्शनार्थं पञ्चरात्रमवलम्ब्य सूत्रकारेण चिन्तितमित्युक्तं, सूत्रयोजनायां च विज्ञानादिभावे वा तदप्रतिषेध इत्यत्र विज्ञानादिषाड्गुण्योद्भवानुद्भवभेदेन विभागमात्रं सङ्कर्षणादीनां न तु मुख्यं जन्म जीवमनोऽहङ्काराधिष्ठातारश्च इति चेत् उच्यते एवं तर्हि नैतन्मतं विप्रतिषिध्यते विरोधाभावात्, श्रुतिविरुद्धं तु विप्रतिषिध्यते विप्रतिषेधाच्चेति सर्वैसिद्धान्तैर्वेदोऽनुसरणीयः अन्यथा चतुर्णां परस्परविप्रतिषेधादित्युक्तम्, अत्रोच्यते विप्रतिषेधाच्चेति सूत्रस्य तदप्रतिषेधशब्दोक्तपञ्चरात्राप्रतिषेधोपपादकत्वे सत्येवान्वयस्वारस्यं सर्वैः सिद्धान्तैर्वेदोऽनुसरणीय इति स्वमतिपरिकल्पितप्रतिज्ञावाक्यान्तराध्याहारस्तु ग्रन्थशय्यामार्जवेनानुसंदधानानाव धियमधिरोहति अर्थशरीरं च निरूप्यं स्मृतिपाद एव नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति मन्वादिस्मृतिविरोधे सांख्यस्मृतिदौर्बल्ये प्रतिपादिते कथं साङ्ख्यादिस्मृतीनां श्रुतिविरोधेऽपि प्रामाण्यशङ्कोत्थातुमलं चतुर्णामागमानां प्रदर्शनार्थं पञ्चरात्रमधिकृत्य निरूपितमिति चानुपपन्नं साङ्ख्यवैशेषिकसुगतादिमतानामपि प्रदर्शनार्थं तेष्वन्यतमपक्षमात्रप्रतिक्षेपस्याकृतत्वात् तत्र हि निरसनीययुक्तिभेदान्निरासकभेदाच्चाधिकरणभेदः कृतः, एवं जीवाद्युत्पत्तेरागमान्तरेष्वनवगतत्वात् तदसम्भवेन तत्प्रामाण्यप्रतिक्षेपोऽपि न सम्भवति श्रुतिविप्रतिषेधयुक्त्या सर्वं प्रतिक्षिप्तं भवतीति

श्चेन्न विप्रतिषेधादिति पदस्य तदप्रतिषेध इत्यनेनान्वयात् सर्वागमप्राबल्यप्रतिक्षेपकत्वासिद्धेः । किञ्चाविरोधाधिकरणन्यायेन श्रुतिविरुद्धस्मृतिप्रामाण्यस्य विध्वस्तत्वादिह तन्निरासवैयर्थ्यं च असाधारणदूषणप्रदर्शनार्थोऽयमारम्भ इति चेन्न तर्हि पञ्चरात्रेतरागमानामप्यसाधारणदूषणज्ञापनाय किमित्यधिकरणान्तरत्रयञ्च निबद्धं तत्पक्षमूलयुक्तिनिरासादेव तन्मूलागमप्रतिक्षेपस्यापि सिद्धेरिति चेत् किं चत्वारोऽप्यागमाः एकयुक्तिमूलाः? उत भिन्नयुक्तिमूलाः? न प्रथमः, विरुद्धानां तुल्ययुक्तिमूलत्वानुपपत्तेः, अनेकयुक्तिमूलत्वे त्वधिकरणान्तरारम्भप्रसङ्गः एकनिरासात् सर्वनिरासः कुतः स्यादिति चेन्न जीवोत्पत्त्यादीनां तेष्वभावेनोत्पत्त्यसम्भवादिना निरासायोगात् अतः प्रदर्शनार्थत्वमयुक्तं, शिष्टपरिग्रहसाम्यं च न भवति अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन वेत्यत्र पाशुपततन्त्राप्रसक्तेः महाभारते मोक्षधर्मे पाशुपततन्त्रोक्ततत्त्वप्रक्रियायास्तन्निष्ठाप्रकारस्य च साक्षाद्वा प्रणाड्या वा तस्य मोक्षोपयोगस्य च संक्षेपेण विस्तरेण वाऽनुपन्यासादेव न तुल्यतया परिग्रहः वैराग्यजननद्वारा साक्षात्कारनिष्पादनद्वारा च साङ्ख्यायोगयोर्दर्शितः, इदं महोपनिषदं चतुर्वेदसमन्वितं साङ्ख्ययोगकृतान्तेन्येति कृत्स्नस्य पञ्चरात्रस्य वेदवेदान्तसारत्वं तदविरुद्धसाङ्ख्ययोगार्थान्वितत्वं चोक्तं साङ्ख्ययोगयोश्च तत्त्वान्तर्भावानन्तर्भावाभ्यामविरोधं नीत्वा प्रत्यक्षहेतवो योगसाङ्ख्याः शास्त्रविनिश्चया इत्युपायांशे वैषम्यं दर्शयित्व.न्तर्भावाभ्यां तत्त्वसङ्ख्यान्यूनाधिकभावविरोधमपि दर्शयित्वा बहवः पुरुषा राजन् साङ्ख्ययोगविचारिणां नैत इच्छन्ति पुरुषमेकं कुरुकुलोद्वह इति तयोरौपनिषदसिद्धान्ताद्वैषम्यं च दर्शयित्वा नारायणपरं साङ्ख्यं योगो नारायणात्मक इति तयोर्नारायणनिष्ठत्वं च वदता भगवता व्यासेन विरुद्धांशाननादृत्य तयोरौपनिषदमर्मनिष्ठैरुपजीव्यं च दर्शितमिति अविरुद्धांशे प्रामाण्यमुपजीव्यार्थभूयिष्ठं त्वयोक्तम् अतः पञ्चरात्रसाङ्ख्ययोगपाशुपतानां कार्त्स्न्येन प्रमाणत्वं विरुद्धांशप्रहाणेनोपजीव्यत्वमुपजीव्यार्थभूयिष्ठत्वाभावं च पश्यतां कथं च तुल्यतया परिग्रहशङ्का धियमधिरोहेत् निष्ठानिर्णयस्तु वस्तुस्थित्यभिप्रायेण कुतः ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै इति हि तत्रैवोक्तं, किं च तत्रापि

Digitized by Google

नारायणस्यैव नित्यत्व कथनं साङ्ख्ययोगपाशुपतेभ्यः पञ्चरात्रस्य वैलक्षण्यं द्योतयति तदनुरोधेन साङ्ख्याद्यागमानां निष्ठाया निर्णीततया पञ्चरात्रस्य साङ्ख्याद्यागमैरनुसरणीयत्वप्रतीतेस्तुल्यत्वेनैकार्थत्वे विवक्षिते सच्चिद्रूपवस्तुमात्रनिष्ठत्वं हि सर्वागमानां वक्तव्यं न च तथा कृतं यथा तन्त्रान्तरानुसारेण विषयनिर्णयाकरणात् न तन्त्रान्तरप्रधानताऽवगमः एवं च वस्तुमात्रनिष्ठत्वाप्रतिपादनात्तत्सत्त्वमपि दूरतो निरस्तम् अतः पञ्चरात्रस्य तन्त्रान्तरैरनुविधेयतया तेभ्यो वैलक्षण्यं वेदतुल्यत्वं च सिद्धमिति न परिग्रहतुल्यता न हन्तव्यानि हेतुभिरिति वचनं तु सुगतागमादिव्यावृत्तिपरं न तु परिगणितानामपि पञ्चानां साम्यपरं निरपेक्षस्यानुविधेयस्य वेदस्य सापेक्षाणामनुविधायिनामितरागमानां च साम्यानुपपत्तेः, प्रमाणतामात्रेण साम्यमिति चेन्न कार्त्स्न्येन प्रमाणस्य वेदस्याविरुद्धांशे प्रमाणानां साङ्ख्यागमादीनां च साम्यानुपपत्तेः क्वचित्प्रमितिजननायोगव्यवच्छेदेन साम्यमिति चेन्न सुगतागमादेरपि तुल्यत्वात् सुगतागमादिष्वविरुद्धांशो विप्रलिप्सानिवेशित इति करणदोषात्तत्रापि न मानत्वं साङ्ख्यागमादिषु विरुद्धांशस्य करणदोषाभावात् प्रामाण्यमभिहितमिति चेत्तर्ह्यनेनैव कारणेन सुगतागमादिव्यावृत्तिरूपं साम्यमेव त्वयाऽभिहितमित्यागतो ऽस्मदीयं मार्गमन्यथाऽनुविधेयानुविधायिनां तुल्यप्रामाण्यपरत्वे सति इदमेव वचनं भ्रान्तिमूलं स्यात् अतोऽस्य वाक्यस्य सुगतादिमतव्यावृत्तिपरत्वाच्च पञ्चरात्रवैलक्षण्यविरोधित्वं यतः पञ्चरात्रस्य वेदवेदान्ततदविरुद्धप्रबन्धान्तरार्थप्रतिपादकतया कार्त्स्न्येन प्रमाणत्वम् । अत एव पञ्चरात्रेऽपि विरुद्धांशस्त्याज्य इति सिद्धान्तोऽप्यनुपपन्नः ॥ उत्पत्त्यसंभवाधिकरणं समाप्तम् ॥

इति श्रुतप्रकाशिकायां द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ द्वितीयाध्यायस्य तृतीयः पादः आरभ्यते ॥

वियदधिकरणम् ।

सू० न वियदश्रुतेः ॥ १ ॥

भू० सांख्यादिवेदबाह्यतन्त्राणां न्यायाभासमूलतया विप्रतिषेधाच्च असामञ्जस्यमुक्तम्, इदानीं स्वपक्षस्य विप्रतिषे-

धादिदोषगन्धाभावख्यापनाय ब्रह्मकार्य्यतयाऽभिमतचि-
दचिदात्मकप्रपञ्चस्य कार्यताप्रकारो विशोध्यते ।

टी० सू० न वियदश्रुतेः, पादसङ्गतिमाह "साङ्ख्यादी"ति, अय-मर्थः—द्वितीयाध्यायस्य प्रथमे पादे कारणविषये परोक्तदोषाः परिहृताः अत्र तृतीये कार्य्यविषये परोक्तदोषाः परिह्रियन्ते तस्मात्तृतीयः पादः प्रथमेन सङ्गतः, द्वितीयस्तु परपक्षप्रतिक्षेपपरत्वाच्चरमभावीति चेत् कारणविषये परोक्तदोषपरिहारपक्षप्रतिक्षेपौ सङ्गतौ अनन्तरं कार्य्यविषय-परोक्तदोषपरिहारो युक्त इति सङ्गतिरितीममर्थमभिप्रेत्य ब्रह्मकार्य्यतया-भिमतेत्युक्तं, तत्र चिदचिद्वस्तुनोः कार्य्यत्वं किमेकरूप? मुत भिन्नरूप? मिति संशयिते सति एकरूपमिति पूर्वपक्षः, भिन्नरूपमिति सिद्धान्तश्च पाद-द्वयेन क्रियत इतीममर्थमभिप्रेत्य चिदचिदात्मकप्रपञ्चस्येत्युक्तं, तत्र प्रथमा-धिकरणस्य संशयमाह—

भा० तत्र वियदुत्पद्यते न वेति संशय्यते, किं युक्तं न वियदु-त्पद्यत इति, कुतः अश्रुतेः, सम्भावितस्य हि श्रवणसम्भवः, असम्भावितस्य तु गगनकुसुमवियदुत्पत्त्यादेः शब्दा-भिधेयत्वं न सम्भवति, न खलु निरवयवस्य सर्वगतस्याका-शस्यात्मन इव उत्पत्तिर्निरूपयितुं शक्यते, अत एव चो-त्पत्त्यसम्भवात् छान्दोग्ये सृष्टिप्रकरणे तेजःप्रभृतीनामेवो-त्पत्तिराम्नायते "तदैक्षत बहु स्यां प्रजायेये"ति "तत्तेजोऽ-सृजते"ति तैत्तिरीयिकाथर्वणादिषु, तस्माद्वा एतस्मादा-त्मनः आकाशः सम्भूतः एतस्माज्जायते प्राणो मनः सर्वे-न्द्रियाणि च खं वायुर्ज्योतिराप इत्यादिषु श्रूयमाणा वियदुत्पत्तिरर्थविरोधाद्बाध्यत इत्येवं प्राप्तेऽभिधीयते ॥

सू० अस्ति तु ॥ २ ॥

भू० अस्ति त्वाकाशस्योत्पत्तिः ।

टी० "तत्रे"ति, किं वियदुत्पद्यते ने? ति संशयः तदर्थमात्मन आकाशः सम्भूत इति वाक्यं वियदुत्पत्तिं प्रतिपादयति ने? ति सम्भूत-शब्दो मुख्योत्पत्तिपरः? उत गौण? इति अन्यत्र निरवयवद्रव्यस्योत्पत्तिदर्शनमाकाशस्योत्पत्त्यनर्हतामवगमयति ने? ति यदाऽवगमयति तदा सम्भूत-शब्दस्य गौणत्वाद्वाक्यस्योत्पत्तिप्रतिपादनासामर्थ्याच्च वियदुत्पद्यत इति भवति, यदोत्पत्त्यनर्हतां नावगमयति तदा सम्भूतशब्दस्य मुख्यवृत्तितया वाक्यस्योत्पत्तिप्रतिपादकत्वाद्वियदुत्पद्यत इति सिध्यति, श्रुतिः श्रवणं कथमश्रुतिः आत्मन आकाशः सम्भूत इति हि श्रुतिरिति शङ्कायामश्रुतेरसिद्धिपरिहाराय श्रुति-शब्दार्थमाह "श्रवणसम्भव"इति, श्रवणं शब्दजन्यप्रमितिः यथा श्रोतव्य इत्यादिषु शब्दजन्यप्रमितिविषयत्वासम्भवादित्यर्थः, न हि शब्दो योग्यार्थप्रमितिजननशक्तः आदित्यो यूप इत्यादिष्वदर्शनादिति भावः । यद्वोत्पत्तिप्रतिपादनसमर्थश्रुतिवाक्याभावो विवक्षितः अश्रुतेरिति सम्भावितस्य हि श्रवणसम्भव इति सूत्राभिप्रायविवरणम्, एवं सति गौणीत्यनन्तरं श्रुतिनिर्देशस्वारस्यं स्यात् गगनकुसुमोपादानं दृष्टान्तत्वेन कृतम् । असम्भावितत्वमुपपादयति "न खल्वि"ति, निरवयवद्रव्यत्वात् सर्वगतत्वाच्चेति हेतुद्वयं विवक्षितं केवलतर्कस्य कालात्ययापदेशसम्भवात् तद्व्यावृत्त्यर्थं श्रुत्यर्थापत्तिमाह "अत एव चे"ति, तेजःसृष्टिप्राथम्यं श्रुत्यर्थापत्तिः तैत्तिरीयकेति तर्कविरुद्धश्रुतेरपि तर्कानुगृहीतश्रुतिः प्रबलेति भावः । सू॰ अस्ति तु, तु-शब्दाभिप्रेतं हेतुमाह-

भू० अतीन्द्रियार्थविषया हि श्रुतिः प्रमाणान्तराप्राप्तामपि वियदुत्पत्तिं प्रतिपादयितुं समर्थैव, न च श्रुतिप्रतिपन्नेऽर्थे तद्विरोधिनिरवयवत्वादिहेतुत्पत्त्यनुमानमुदेतुमलम्

आत्मनोऽप्यनुत्पत्तिर्न निरवयवत्वप्रयुक्तेति वक्ष्यते ॥

पुनश्चोदयति—

सू० गौण्यसम्भवाच्छब्दाच्च ॥ ३ ॥

तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिवियदुत्पत्तिश्रुतिर्गौणीति कल्पयितुं युक्तं तत्तेजोऽसृजतेति सिसृक्षोर्ब्रह्मणः प्रथमं तेज उत्पद्यत इति तेजउत्पत्तिप्राथम्येन वियदुत्पत्तिप्रतिपादनासम्भवात् वायुश्चान्तरिक्षं चैतदमृतमिति वियतोऽमृतत्वशब्दाच्च ।

टी० "अतीन्द्रिये"ति, श्रुतिरिति एतत्सूत्रान्यथासिद्धिपरेऽनन्तरसूत्रे गौणीति स्त्रीलिङ्गनिर्देशेनास्तीति श्रुतिः साधकतया विवक्षितेति भावः । किं प्रमाणान्तरागोचरत्वमयोग्यत्वम् ? उत प्रमाणान्तरबाधितत्वं? प्रमाणान्तरागोचरत्वं चेत् तदुत्पत्तिप्रमितिजननहेतुरेव अतीन्द्रियार्थविषयत्वात् श्रुतेः, द्वितीये पक्षे बाधकप्रमाणं वक्तव्यं तच्च नास्ति धर्मिणः प्रत्यक्षसिद्धत्वमात्रेणागमावगतधर्मबाधश्चेद्यागादेः क्रियात्वात् स्वर्गसाधनत्वं न स्यात् यत्रानन्यथासिद्धप्रत्यक्षसिद्धधर्मविरुद्धधर्म आगमेन प्रतीतः तत्र यूपादित्यैक्यवच्छास्त्रं बाधितं स्यात् प्रत्यक्षस्य पूर्वभावित्वात् नात्र तथाधर्मविरुद्धोपलब्धिः धर्मिग्राहकं प्रमाणं प्रत्यक्षमनुमानं वा तदुभयमपि नित्यत्वानित्यत्वसाधारणमिति न तद्बाधः, अनुमानान्तरं चेत् कालात्ययापदिष्टत्वं कालविशेषावच्छिन्नस्यैव हि नभस उत्पत्तिरुच्यते नेदानीं कालविशेषावच्छिन्नं नभो नः प्रत्यक्षादिगोचरः किन्तु शास्त्रैकसमधिगम्यम् अतो धर्मिग्राहकमानबाधः निरवयवद्रव्यत्वहेतोर्महदादिष्वनैकान्त्यं विशेषणासिद्धिश्च वियदेकदेशोपादानेन पञ्चीकरणवचनात् "आकाशवायुतेजांसि सलिलं पृथिवी तथा । शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरोत्तरैरिति संयोगविशेषवचनाच्च सर्वगतद्रव्यत्वहेतोरपि विशेषणासिद्धिश्च स्यात् महदादीनां सद्भावः शास्त्रप्रामाण्यवादिभिरभ्युपगन्तव्य

Digitized by Google

इत्यर्थः न चेत्यत्र कालात्ययापदेशोऽभिप्रेतः किं तर्ह्यात्मनोऽप्युत्पत्तिमत्त्वं स्यात् निरवयवद्रव्यत्वस्यासाधकत्वादित्यत्राह "आत्मनोऽपी"ति उत्तरसूत्रमवतारयति "पुनरि"ति, सू॰ गौण्यसम्भवाच्छब्दाच्च, गौणवृत्तेः शब्दधर्मत्वात् तत्रापि स्त्रीलिङ्गान्तत्वाच्च श्रुतिर्विशेष्या प्रस्तुतार्थवशात् श्रुतिविशेषावगम इत्यभिप्रायेणाह "तस्मादि"ति, तेजःप्रभृतेः पश्चान्न वियदुत्पत्तिः सम्भवति पूर्वमपि न तेजःप्राथम्यादित्यर्थः आकाशवत्सर्वगतश्च नित्य इत्यत्र व्याप्तिमात्रेण साम्यविवक्षाया अपि सम्भवात् आकाशशरीरं ब्रह्मेत्यादेः सूक्ष्मनिर्मलस्वरूपत्वाभिप्रायेण निर्वाहसम्भवाच्च पूर्वपक्षसाधकत्वेनानुपन्यासः पूर्वपक्षेऽवान्तरसाध्यविषयहेतुद्वयरूपत्वादसम्भवशब्दयोरेकसूत्रप्रतिपाद्यता, अतो न सूत्रभेदो युक्तः । उत्तरसूत्रशङ्कामाह–

सू॰ कथमेकस्य संभूतशब्दस्याकाशापेक्षया गौणत्वमग्न्याद्यपेक्षया मुख्यत्वमिति चेत्तत्राह–

सू॰ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥

एकस्यैव तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्याकाशे मुख्यत्वासम्भवात् गौणतया प्रयुक्तस्य संभूत–शब्दस्य वायोरग्निरित्यादिषमुषक्तस्य मुख्यत्वं स्यादेव ब्रह्मशब्दवत्, यथा ब्रह्म–शब्दः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इत्यत्र प्रधाने गौणतया प्रयुक्तस्तस्मिन्नेव प्रकरणे तपसा चीयते ब्रह्म ततोऽन्नमभिजायत इति ब्रह्मणि मुख्यतया प्रयुज्यते तद्वत्, अनुषङ्गे च श्रवणादृत्ताविवाभिधानावृत्तिर्विद्यत एवेत्यर्थः ॥ परिहरति

सू॰ प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥

छान्दोग्यश्रुत्यनुसारेणान्यासां वियदुत्पत्तिवादिनीनां श्रुतीनां गौणत्वं कल्पयितुं न युज्यते, यतः छान्दोग्यश्रुत्यैव

वियदुत्पत्तिरङ्गीकृता येनाश्रुतं श्रुतमित्यादिना, ब्रह्मज्ञानेन सर्वज्ञानप्रतिज्ञानात्, तस्या हि प्रतिज्ञाया अहानिराकाशस्यापि ब्रह्मकार्य्यत्वेन तदव्यतिरेकादेव भवति ॥

टी० "कथ"मिति, सू· स्याच्चैकस्य ब्रह्मशब्दवत्, तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेत्यादिप्रयोगोऽनुसन्धेयः, अन्नं ब्रह्म आनन्दो ब्रह्मेति प्रयोगानुदाहरणं तस्य मुख्यामुख्यविषयत्वाभावात् अन्नादिष्वपि ब्रह्मबुद्ध्या हि ब्रह्मशब्दप्रयोगः ब्रह्म-शब्दोऽस्मिन् प्रकरणे द्विः प्रयुक्तः अत्र त्वनुषङ्गः तत्कथमेकस्य मुख्यत्वगौणत्वविभाग इत्यत्राह "अनुषङ्गे चे"ति, अनुषङ्गश्रवणावृत्त्योः फलमभिधानावृत्तिरेव अभिधानशब्देनात्र-मुख्यामुख्यसाधारणशब्दव्यापारमात्रं विवक्षितं बोधनार्थं ह्यनुषङ्गः, न ह्येकस्मिन् वाक्येऽनुषङ्गापेक्षाप्रयुक्तत्वात्, अतोऽनुषङ्गोवाक्यान्तरे वाक्यान्तरस्थस्य शब्दस्य गौणत्वं च युक्तं बोधनव्यापारभेदात्, सकृत्प्रयुक्तस्य हि मुख्यत्वगौणत्वविरोधः व्यापारैक्यात् न ह्येकबोधनव्यापारस्य मुख्यत्वगौणत्वे सम्भवतः, प्रयोगभेदेऽप्यविरोधोव्यापारभेदात् अतोऽनुषङ्गेऽपि व्यापारभेदात् मुख्यत्वगौणत्वाविरोधः, तस्मादर्थौचित्यायोभयत्रापि समाधिभङ्गः कार्य्य इति । राद्धान्तसूत्रमवतारयति 'परिहरती"ति, सू· प्रतिज्ञाहानिरव्यतिरेकात्, कार्य्यकारणभावाभावेऽपि नित्यसिद्धमुक्तात्मनामव्यतिरेकोब्रह्मशब्दशरीरत्वेन भवतीति तद्व्यावृत्त्यर्थं ब्रह्मकार्य्यत्वेन तदव्यतिरेकादित्युक्तं, मृत्पिण्डकार्य्यादिदृष्टान्तवशात् कार्य्यतयैवाव्यतिरेकोविवक्षित इति भावः ॥

सू० शब्देभ्यः ॥ ६ ॥

भा० इतश्च वियदुत्पत्तिश्छान्दोग्ये प्रतीयते "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्राक् सृष्टेरेकत्वावधारणशब्दात्, ऐतदात्म्यमिदं सर्वमित्येवमादि-शब्देभ्यश्च कार्य्यत्वेन ब्रह्मणोऽव्यतिरेकप्रतीतेः, न च तत्तेजोऽसृजतेति तेजस

Digitized by Google

उत्पत्तिश्रुतिर्वियदुत्पत्तिं वारयति वियदुत्पत्त्यवचनमात्रेण तेजसः प्रतीयमानं प्राथम्यं श्रुत्यन्तरप्रतिपन्नां वियदुत्पत्तिं न निवारयितुमलम् ॥

सू० यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

तु-शब्दश्चार्थे, ऐतदात्म्यमिदं सर्वमित्यादिभिराकाशस्य विकारत्ववचनेन तस्याकाशस्य ब्रह्मणोऽपि विभाग उत्पत्तिरप्युक्तैव लोकवत्-यथा लोके एते सर्वे देवदत्तपुत्रा इत्यभिधाय तेषु केषांचित् तत उत्पत्तिवचनेन सर्वेषामुत्पत्तिरुक्ता स्यात् तद्वत्, एवं च सति वायुश्चान्तरिक्षं चैतदमृतमिति सुराणामिव चिरकालस्थायित्वाभिप्रायम् ॥

सू० एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

अनेनैव हेतुना मातरिश्वनो वायोरप्युत्पत्तिर्व्याख्याता, वियन्मातरिश्वनोः पृथग्योगकरणं तेजोऽतस्तथा ह्याहेति मातरिश्वनः परामर्शार्थम् ।

टी० सू० शब्देभ्यः, ऐतदात्म्यमिति वाक्यं कार्य्यभूतं कृत्स्नं कारणभूतब्रह्मात्मकमित्येतदर्थपरत्वादुपात्तम्, आत्म-शब्दोऽन्तर्यामिणमाह एतच्छब्देन कारणत्वं पूर्वप्रस्तुतं विवक्षितं यः कारणात्मस्यात्मा स एव कार्य्यावस्थस्यापि जगत आत्मेत्यर्थः, आदि-शब्देन सन्मूलाः सोम्येमाः, सर्वं खल्विदं ब्रह्मेत्यादि विवक्षितं, न चेति, न हि घटोत्पत्तिवचनं पटोत्पत्तिं वारयतीत्यर्थः, प्राधान्यं वारयतीत्यत्राह "वियदुत्पत्ती,"ति, प्राधान्यं नाम किं स्वकार्यापेतया पूर्वत्वं? उत कार्य्यान्तरपूर्वकत्वाभावः? आद्ये वियदुत्पत्तिरबाधिता स्यात्, न द्वितीयः, पूर्वभाविकार्य्यान्तरनिषेधाश्रवणात् तेजस उत्पत्तिमात्रं श्रुतं नान्यानुत्पत्तिः, अतः प्राथम्यं न श्रुतम्, अतोऽश्रुतेन श्रुतप्रहाणमयुक्तं श्रुते-

नाश्रुतकल्पनं हि युक्तम्। किञ्चान्यानुत्पत्तिश्रवणेऽपि प्राथम्यं केनावगतम्? अन्योत्पत्तिवचनादिति चेत्तद्वार्थेन प्राधा[1]न्येन श्रुतोत्पत्तिबाधनमनुपपन्नम्। किञ्च कुत्र चित्कस्य चिदवचनमन्यत्रापि तत्प्रतिपत्तिं वारयति चेत् सर्वशाखाप्रत्ययनयोर्निर्विषयः स्यादिति भावः। सिद्धान्तेऽपि परमसाध्यहेतुत्वे सत्यसमस्तपदोपात्तत्वाच्छब्देभ्य इति सूत्रभेदः अवान्तरसाध्यविषयहेतुभेदानां परमसाध्येऽपि समस्तपदोपात्तहेतूनामपि ह्येकसूत्रप्रतिपाद्यं, दृष्टं, सू॰ यावद्विकारं तु विभागो लोकवत्, विकारत्वं कार्य्यत्वम्, ऐतदात्म्यमिदं सर्वमित्यादिभिरित्यत्रादि-शब्देन एकत्वावधारणादि विवक्षितम्। एवं च सतीति असंकुचितार्थत्वे वायोरप्यनुत्पत्तिप्रसङ्ग इति भावः। सू॰ एतेन मातरिश्वा व्याख्यातमिदमित्यति देशसूत्रम् अतो नाधिकाशङ्केत्यभिप्रायेणाह "पृथगि"ति वियन्मातरिश्वनोरुभयोरप्युत्पत्तिर्वक्तव्या तत्रैकसूत्रेण वक्तुं शक्येऽपि सूत्रपृथक्करणमुत्तरत्र परामर्शार्थमित्यर्थः। योगः सूत्रम्॥

सू० असम्भवस्तु सतोऽनुपपत्तेः॥ ९॥

भा० तु-शब्दोऽवधारणार्थः, असम्भवो ऽनुत्पत्तिः सतो ब्रह्मण एव तद्व्यतिरिक्तस्य कस्यचिदनुत्पत्तिर्न सम्भवति अनुपपत्तेः, एतदुक्तं भवति वियन्मातरिश्वनोरुत्पत्तिप्रतिपादनमुदाहरणार्थम् उत्पत्त्यसम्भवस्तु सतः परमकारणस्य परस्यैव ब्रह्मणः तद्व्यतिरिक्तस्य कृत्स्नस्याव्यक्तमहदहङ्कारतन्मात्रेन्द्रियवियत्पवनादिकस्य प्रपञ्चस्यैकविज्ञानेन सर्वविज्ञानप्रतिज्ञादिभिरवगतकार्य्यभावस्यानुपपत्तिर्नोपपद्यत इति। वियदधिकरणं समाप्तम्॥

टी० सू॰ असम्भवस्तु सतोऽनुपपत्तेः, ननु न ब्रह्मणोऽनुत्पत्तिर्वक्तव्या ब्रह्मव्यतिरिक्तवियदादेरुत्पत्तिरुक्ता पुनरनुत्पत्त्यसम्भवः कथ[2]मुच्यते

१ प्राथम्ये नेति पा॰।
२ केषुमुच्यते इति पा॰।

अनुपपत्तिश्च कस्येत्यत्राह "एतदुक्तं भवती"ति, महदादीनामनुत्पत्तिर्नि- षिध्यते अनुपपत्तिरेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहानेरित्यर्थः, आदि-श- ब्देनैकत्वावधारणादिर्विवक्षितः । परे तु वियदुत्पत्तेरनुत्पत्तेश्च श्रुतिसिद्ध- त्वाच्छ्रुतयो विप्रतिषिद्धा इति पूर्वः पक्षः, अनुत्पत्तिरेवेति न विप्रतिषेध इति सिद्धान्त्येकदेशी, उत्पत्तिरेवेति न विप्रतिषेध इति साक्षात्सिद्धान्तीन इत्य- धिकरणशरीरं वर्णयन्ति तत्र ब्रूमः विप्रतिषेधमात्रस्य पूर्वपक्षत्वमयुक्तं तस्य परमसाध्यत्वाभावात्, यथा कारणत्वेन आकाशादिष्विति अधिकरणस्य श्रुतिवैविध्यात् संशयमूलत्वेऽपि विप्रतिषेधेन हेतुना ब्रह्मकारणवादाना- दरेण प्रधानकारणवादस्य ज्यायस्त्वे पर्यवसितः पूर्वपक्षः, अतो विप्रति- षेधमात्रस्य पूर्वपक्षीकरणमयुक्तम्, अत एव हि नात्मा श्रुतेरित्यस्य च श्रुतिवैविध्यात् संशयमूलत्वेऽपि न विप्रतिषेधमात्रं पूर्वपक्षितम् अपि तूत्पत्तिं सिद्धान्त्येकदेशिमतं कृत्वा ऽनुत्पत्तिः सिद्धान्तिता, अतो विप्रतिषे- धस्य क्वचित्पर्यवसानमपेक्षितं तत्र किं सृष्टिश्रुतिविप्रतिषेधात् प्रधानका- रणत्रादरयाह्यस्व? मुत सृष्टिश्रुतीनामर्थान्तरपरत्व? मुताप्रामाण्यमेवे? ति न तावदाद्यः, प्रधानकारणवादपरत्वेऽपि श्रुतिविप्रतिषेधस्य स्थितत्वात् तत्र वक्तव्यस्य ब्रह्मकारणवादेऽपि तुल्यत्वात्, नाप्यन्यपरत्वम् अन्याभा- वात्, ब्रह्मविदाप्नोतीति प्रकृतं ब्रह्मवेदनं ब्रह्मणः सर्वकारणत्वोक्तिमुखेन सूयते अतोऽन्यपरत्वमिति चेन्न कारणं तु ध्येय इति वेद्यब्रह्मणः कार- णत्वलक्षणकत्वाल्लक्षणविप्रतिषेधे लक्ष्यब्रह्मवेदनस्यासम्भवात् स्तुत्यनुप- पत्तेः, नापि वेदाप्रामाण्यं, प्रथमे काण्डे तत्प्रामाण्यस्य समर्थितत्वात् अतः पर्यवसानस्थलाभावेन विप्रतिषेधमात्रस्य पूर्वपक्षीकरणायोगादनुत्पत्तिं पूर्वपक्षीकृत्योत्पत्तेः सिद्धान्तीकरणं युक्तं, सूत्रयोजना चानुपपन्ना, अश्रुतेः छान्दोग्ये वियदुत्पत्त्यश्रवणात् अस्ति तु तैत्तिरीयके वियदुत्पत्तिरस्तीति व्याख्यातं वियदुत्पत्तौ श्रूयमाणायामपि क्वचिच्छ्रवणाभावस्य हेतुतयो- पन्यासोऽनुपपन्नः अनधीतशाखान्तरपुरुषाभिप्रायेण हेतूक्तिरिति चेत्तर्ह्य- नधिगतषष्ठप्रपाठकपुरुषाभिप्रायेण पृथिव्याद्यनुत्पत्तेरप्युपन्यस्य सूत्रकारेण निरसनीयत्वं प्रसज्येत् महीमहीधरादीनां युगपत्सर्गप्रलयौ हि केषां-

षिद्धनभिमतौ अस्ति त्विति सूत्रस्य विप्रतिषेधसमर्थनाय उत्पत्तिसद्भाव-परतया पूर्वपक्षविषयत्वमप्ययुक्तं सिद्धान्तप्रतिज्ञाया अध्याहार्य्यत्वप्रसङ्गात्, अनध्याहारसम्भवे तदयोगाच्च गौणसम्भवादित्यादेश्च सूत्रस्य सिद्धान्त्येकदेशिमतविषयत्वं तु परोक्ताधिकरणशरीरप्रतिक्षेपेण व्युदस्तं भवति, यावद्विकारं त्विति सूत्रं विभक्तत्वहेतुना घटादिवन्नभसः कार्य्यत्वानुमानपरं वर्णितं तदयुक्तं हेत्वनुपपत्तेः, विभक्तत्वं नाम यद्येकस्मात् कार्य्यतया विभक्तत्वं तदा साध्याविशिष्टो हेतुः । यदि भिन्नत्वं प्रागभावे भावरूपाज्ञाने च व्यभिचारः, तदुभयव्यतिरिक्तत्वे सति भिन्नत्वमात्मनि व्यभिचरति, आत्मा ह्यविद्यातत्कार्य्येभ्यो भिन्नः प्रागभावाविद्याव्यतिरिक्तश्च, उक्तेभ्योऽतिरिक्तत्वे सति भिन्नत्वं व्यर्थविशेष्यं व्यवच्छेद्याभावात् प्रागभावाविद्या ब्रह्मान्यत्वं कार्य्यत्वे हेतुरिति चेत् सूत्रे विभागपदविरोधः स्यात्, विक्तत्वं हि सौत्रहेतुस्त्वद्योजनायां विभाग-शब्देनापि पूर्वोक्तात् त्रिकादन्यत्वं विवक्षितमिति चेन्न आकाशसहिताच्च चतुष्टयादन्यत्वम् उपाधिः स्यात्, न चैतावता पक्षेतरत्वोपाधिना सर्वानुमानोच्छेदः चतुष्टयस्यापि पक्षत्वाभावेन तदन्यत्वस्य पक्षेतरत्वाभावात्, एतेन मातरिश्वेति सूत्रमतिदेशाधिकरणमित्युक्तम्, तदयुक्तम् अधिकशङ्काया अभावात् सर्वगतद्रव्यत्वादिहेतुप्रसङ्गविरहाच्छङ्का न्यूनतैव सैषाऽनस्तमिता देवता यद्वायुरिति श्रुत्याधिकशङ्केति चेन्न वायुश्चान्तरिक्षं चैतदमृतमित्यमृतत्वश्रवणस्य वियन्मातरिश्वनोस्तुल्यार्थतया परिहारस्य तुल्यत्वात् अनस्तमितशब्दस्यामृत-शब्दार्थतुल्यतया पृथक्परिहरणीयत्वाभावात् च ब्रह्मणोऽपि कारणत्वादेव गगनादेरिव कार्य्यत्वमाशङ्क्य तन्निरासपरम् असम्भव इत्यादिसूत्रमधिकरणान्तरमाहुः । कार्य्यत्वशङ्कानिरासः किं युक्त्या? उत श्रुत्या? नाद्यः युक्तेरसम्भवात् । ननु कार्यत्वानुपपत्तिरेव युक्तिः, न ह्यसतः सदुत्पत्तिः कथमसतः सज्जायेति तस्या व्युदस्तत्वात्, न तावत् सद्विशेषात् सन्मात्रोत्पत्तिः विशेषेभ्यः सामान्योत्पत्त्यदर्शनात्, सामान्येभ्यो हि विशेषोत्पत्तिर्दृष्टा, नापि सन्मात्रात् सन्मात्रोत्पत्तिः, असत्यतिशये प्रकृतिविकारभावानुपपत्तेरिति चेन्न पूर्वकालात् सतः पाश्चात्यसदुत्पत्त्युपपत्तेः

पूर्वापरभावातिरिक्तविशेषो नावश्यापेक्षितः सदृशपरिणामपरम्परायाः शास्त्रप्रामाण्यवादिभिरभ्युपगतत्वात् पूर्वोत्तरज्वालासु सदृशीषु पौर्वापर्यातिरिक्तादर्शनाच्च, अतो युक्तिर्दुःस्थतरेति न तया शङ्कानिरासः, यदि श्रुत्या तर्हि कृतकरत्वप्रसङ्गः, अदृश्यत्वादिगुणको धर्मोक्तेरित्यादिषु नित्यं विभुं सर्वगतं सुसूक्ष्मं स बाह्याभ्यन्तरो ह्यज इति नित्यत्वाजत्वादिधर्मकस्यैव ब्रह्मणो भूतयोनि–शब्देन परमकारणतया निर्दिष्टस्य परमात्मत्वनिर्णयात्तद्विरुद्धाशङ्कोत्थानं हि नोपपद्यते । अपरेतु शब्दादिगुणानां च दिक्कालादीनां सृष्टिश्रवणान्नित्यत्वमाशङ्क्य अद्वितीयश्रुत्यनुपपत्त्या तन्निरासकमधिकरणान्तरं वर्णयन्ति तदप्ययुक्तं शब्दादीनां द्रव्यावस्थारूपाणामुत्पत्त्यन्तरनैरपेक्ष्यस्य सत्कार्य्यवादसमर्थनेनार्थसिद्धत्वात् । पद्भ्यां भूमिर्दिशः–श्रोत्रात् सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्त्ताः काष्ठाश्चाहोरात्राश्च सर्वशः अर्धमासा मासा ऋतवः संवत्सरस्य कल्पन्ताम् इति दिक्कालोत्पत्तिश्रवणेन च नित्यत्वशङ्कानुदयात्, तर्कमात्रावष्टम्भपरवादिप्रतिपत्तिनिरासार्थोऽयमारम्भ इति चेन्न तस्य तर्कपादसाध्यत्वेनेहासङ्गतत्वात्, न च नभोभागमात्रं दिशः, सूर्यादिगतिविशेषः काल इति च युक्तं नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौस्समवर्त्तत दिशः श्रोत्रादिति सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति पृथगुत्पत्तेः श्रवणात्, अतएवोत्पत्तिर्दिक्कालावच्छेदकविषयेति शङ्का च निरस्ता भवति ! नाप्युत्पत्तिश्रुतिर्दिक्कालादिदेवतामात्रविषयेति वाच्यम् अधिष्ठेयभेदाभावे अधिष्ठातृदेवताभेदानुपपत्तेः, आदित्यादिगतिविशेष एव कालश्चेदत्र इति सूर्यादिसृष्टेः प्रागेव कालदर्शनं रूपान्तरं तद् द्विज ! कालसंज्ञमिति प्रधानपुरुषातिरिक्तकालस्मरणं च विरुध्यते, अतस्तन्मतमप्यनुपपन्नं प्रथमाध्यायशेषः पादद्वयेनावसित इत्यन्ये । तदयुक्तं पादचतुष्टयस्यापि प्रथमाध्यायशेषत्वात् वेदान्तानां ब्रह्मैककारणतापरत्वं हि प्रथमाध्यायार्थः तत्र साक्षादुपयोगोऽनेकान्तवादिनिरासादीनामपि नास्ति प्राणाद्योपयोगस्तृतीयचतुर्थयोरप्यस्ति कार्य्यदौःस्थ्यस्य कारणदौस्थ्यापादकत्वात्तत्परिहारस्य तत्स्थिरीकारहेतुत्वाच्च, अन्त्येऽपि पक्षेऽप्याद्ययोः सूत्रयोर्मा-

न्तरिक्षविषयसूत्रस्य च योजनावैषम्यं पूर्ववदुक्तोत्तरं वेदितव्यं, गौण्यस-म्भवादिति श्रुत्यन्तरविरोधादसम्भवः श्रुत्यन्तरं च खं पुराणं वायुः खमिति ह स्माहेति त्रिरात्रं खमेतत् पुष्पान्तमिति च पुराणमेकं खम्- अपरं खपुष्पवद्विनाशीत्युच्यते एवं सति गगनद्वयासम्भवात् घटोत्पत्त्या घटा-काशस्येव ब्रह्माण्डोत्पत्त्या तदवच्छिन्नाकाशस्योत्पत्तिरुपचर्य्यते, अतो न व्योम्नो मुख्योत्पत्तिरित्याहुः । व्योम्न एकत्वे व्योमशब्दस्य कृत्स्नव्योम-विषयत्वात् पुराणमित्यादिविशेषणस्य व्यवच्छेद्यासम्भवः परिह्रियते स्याच्चैकस्येति ब्रह्मण एकत्वेऽप्येतद्वै सत्यकाम! परं चापरं चेति ब्रह्मश-ब्दस्य ब्रह्मैकदेशोपलक्षणतया एकदेशान्तरं यथा व्यवच्छेद्यं तद्वद्व्योम-शब्दस्याप्युपपत्तिरित्याहुः । प्रतिज्ञेति शब्देभ्य इत्यन्तमेकं सूत्रं गगनाका-र्य्यत्वे प्रतिज्ञाहानिमाशङ्क्य अकार्य्यत्वेऽपि भोक्तृवर्गस्येव नभसोऽपि ब्रह्म-व्यतिरिक्तत्वात् प्रतिज्ञाया अहानिरव्यतिरेकश्च आत्मैवेदं सर्वमित्यादि-शब्देभ्यः सिद्ध इत्याहुः । एवं गौणीत्यादिशब्देभ्य इत्यन्तं पूर्वपक्षवि-षयं यावदिति यावन्तो महदादयो विकारास्तावन्तो विभागाः सूक्ष्माः शक्तिरूपाः सवितुरिव प्रभा ब्रह्मणः सन्ति लौकिकपुरुषाणामिवेश्वर-स्यापि कार्य्यकारणवन्तो व्यवहाराः श्रूयन्ते, अतः सूक्ष्ममाकाशं परमं व्योम तस्मादस्य तु व्योम्न उत्पत्तिरस्तीत्याहुः । तत्र तावत् खं पुराण-मिति श्रुतिविरोधादुत्पत्त्यसम्भवाद् गौणीत्ययुक्तं शब्दाच्चेत्यनेन पुनरुक्ति-प्रसङ्गात् वायुश्चान्तरिक्षं चैतदमृतमित्यमृतत्वश्रुतेः पुराणत्वश्रुतेश्च को भेदः, यतः पुराणत्वश्रुतिविरोधादसम्भवो न विवक्षितः, अत एव पुराण-त्वादिविशेषणस्य व्यवच्छेद्यासम्भवपरिहारपरत्वं, स्याच्चैकस्येति सूत्रस्या-प्ययुक्तं प्रतिज्ञाहानिरिति सूत्रस्य च पूर्वपक्षविषयतयैव तत्र शङ्काविशेषप-रिहारपरत्वमुपयुक्तं तथा सत्यधिकरणसिद्धान्तसाधकयुक्तेरनुक्तिप्रसङ्गात् यावद्विकारमिति सूत्रं सिद्धान्तसाधकयुक्तिपरं तत्र हि तु-शब्दः श्रुत इति चेन्न तस्य परापरव्योमभेदेन पुराणत्वोत्पत्तिमत्त्वविरोधपरिहारपरत्वेन व्याख्यातत्वात्, परिहारश्च साधकयुक्त्यन्तरे उपन्यस्ते युज्यते अन्यथा व्योम्न एकत्वात् पुराणत्वश्रवणाच्च उत्पत्तिर्गौणीति वदता अन्योन्याश्र-

योद्घाटनस्य सुकरत्वादुत्पत्तेर्गौणत्वे ततः पुराणव्योम्नोऽन्यत्वं तस्यान्यत्वादुत्पत्तेर्गौणत्वमिति । ननु गगनभेदे प्रमाणोपस्थापकं सूत्रमिति चेत् यदि तयोर्व्योम्नोरुत्पत्त्यनुत्पत्तिभ्यां भेद उपस्थाप्यते तदानीमौपाधिकभेदमाश्रित्य गौणोत्पत्त्या प्रमाणनिर्वाह उपपद्यते, यद्याकारान्तरेण व्योम्नो-भेदः अतः तर्ह्युत्पत्तेर्गौणत्वेऽपि स उपपद्यते, उत्पत्तेर्गौणत्वे हेतोः सूचितत्वाभावात् । किञ्च अव्यक्तात्परमक्षरं परं व्योमेति भवतां मतं तस्य च पुराणत्वमयुक्तम् अक्षरं तमसि लीयत इति लयश्रवणात्, आपेक्षिकं पुराणत्वमस्तीति चेत्तर्हि व्योमभेदाभावेऽपि घटाकाशब्रह्माण्डावच्छिन्नाकाशयोरिव पुराणत्वापुराणत्वयोरविरोधः सुवच इत्युत्पत्तिर्गौणी स्यात्, अत एव प्रलयश्च तत्र गौणः स्यात्, यदा प्रतिज्ञाहानिरिति सूत्रं सिद्धान्तसाधकं तदानीं भवदुक्तशङ्का दूरोत्सारिता स्यात् । तच्च पूर्वं दर्शितं छान्दोग्ये गगनोत्पत्त्यवचनेऽपि तत्सिद्धप्रतिपादनं चापेक्षितमन्तिमसूत्रे कृतं स्यात् अत एव तु-शब्दोऽपि चार्थो द्रष्टव्यः, अन्यथाऽनुपपत्तेर्दर्शितत्वात् ॥ वियदधिकरणं समाप्तम् ॥

तेजोऽधिकरणम् । **सू० तेजोऽतस्तथा ह्याह ॥ १० ॥**

भू० ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य ब्रह्मकार्य्यत्वमुक्तमिदानीं व्यवहितकार्य्याणां किं केवलात्तत्तदनन्तरकारणभूताद्वस्तुन उत्पत्तिः? आहोस्वित् तत्तद्रूपाद्ब्रह्मण? इति चिन्त्यते किं युक्तं केवलात्तत्तद्वस्तुन इति, कुतस्तेजस्तावदतो मातरिश्वन एवोत्पद्यते वायोरग्निरिति ह्याह ॥

सू० आपः ॥ ११ ॥

आपोऽपि अतः—तेजस एवोत्पद्यन्ते अग्नेरापः तदपोऽसृजत इत्याह ॥

टी० सू० तेजोऽतस्तथा ह्याह । अवान्तरसङ्गतिमाह "ब्रह्मे"ति, महदादीनां तत्त्वानां किं केवलात् पूर्वपूर्वतत्त्वमात्रादुत्पत्ति? उत

तत्तद्रूपात् ब्रह्मण? इति किमाकाशाद्वायुरित्यादिषु आकाशादिशब्दा आकाशादिमात्रपराः? उत तदवस्थब्रह्मपरा? इति किं तेज ऐक्षतेत्यादिष्वभिध्यानलिङ्गं तेजःप्रभृतिशब्दानां तदवस्थब्रह्मपरताम् अवगमयति ने?ति किं तेजःप्रभृतिशब्दानां तदवस्थपरत्वेन लक्षणा स्याचे?ति किं तेजःप्रभृतिशब्दानां तदवस्थपरत्वेन लक्षणा स्याचे?ति किं तेजःप्रभृतिशब्दानामपर्यवसानवृत्त्या ब्रह्माभिधाने व्युत्पत्तिविरोधादिदोषो भवति ने?ति, यदा भवति तदानीमपर्यवसानेन ब्रह्माभिधानासम्भवेन लक्षणाप्रसङ्गादभिध्यानलिङ्गस्य तेजःप्रभृतिशब्दानां ब्रह्मपरतावगमकत्वाभावादाकाशादिशब्दानामाकाशादिमात्रपरत्वेन केवलाकाशादेरेव वाय्वाद्युत्पत्तिरिति भवति, यदा व्युत्पत्तिभङ्गादिदोषो न भवति तदानीमपर्यवसानेन ब्रह्माभिधानसम्भवेन लक्षणाप्रसङ्गाभावादभिध्यानलिङ्गस्य तेजःप्रभृतिशब्दानां ब्रह्मपरताऽवगमकत्वादाकाशादिशब्दास्तदवस्थाब्रह्मपरा इत्याकाशाद्यवस्थाद् ब्रह्मण एव वाय्वाद्युत्पत्तिरिति सिध्यति । ननु प्रकृत्यधिकरणे कृत्स्नस्य ब्रह्मोपादानकत्वनिश्चयादवस्थितेरित्यादिषु जगद्ब्रह्मणोः शरीरात्मभावसिद्धेस्तत्र चान्तर्यामिब्राह्मणे सर्वतत्त्वानां विशेषतः शरीरत्वावगमाच्च केवलात् तत्तद्वस्तुनो वाय्वाद्युत्पत्तिरिति पूर्वपक्षानुत्थानादरम्भणीयत्वं नैवमेकस्य कार्य्यस्य ब्रह्मप्रसूतत्वकथनात् पश्चात्तत्कारणव्यहिततत्त्वसृष्टिक्रमनिर्देशबलाच्च तेषां तत्त्वानां परमात्मशरीरत्वश्रवणं सृष्ट्यनन्तरानुप्रवेशकृतमौपचारिकं तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः, अभिध्यानं च गौणं सर्वस्य ब्रह्मजत्वश्रुतिश्च पारम्पर्याभिप्रायेति पूर्वपक्षोत्थानात्, सू॰ आपः, अतस्तथा ह्याहेत्यनुषङ्गः ॥

सू॰ पृथिवी ॥ १२ ॥

भ्र॰ पृथिव्यद्भ्य उत्पद्यते, अद्भ्यः पृथिवी ता अन्नमसृजन्तेत्याद्य । नन्वन्न-शब्देन कथं पृथिव्यभिधीयते तचाह-

सू० अधिकाररूपशब्दान्तरेभ्यः ॥ १३ ॥

महाभूतसृष्ट्यधिकारात्पृथिव्येवान्न-शब्देनोक्तेति प्रतीयते, अदनीयस्य सर्वस्य पृथिवीविकारत्वात्कारणे कार्य्यशब्दः तथा वाक्यशेषे भूतानां रूपसंशब्दने यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्येत्यप्तेजसोः सजातीयमेवान्न-शब्दवाच्यं प्रतीयते शब्दान्तरं च समानप्रकरणे अग्नेरापः अद्भ्यः पृथिवीति श्रूयते, अतः पृथिव्येवान्न-शब्देनोच्यत इत्यद्भ्य एव पृथिवी जायते उदाहृताः तेजःप्रभृतयः प्रदर्शनार्थाः महदादयोऽपि हि स्वानन्तरवस्तुन एवोत्पद्यन्ते यथाश्रुत्यभ्युपगमाविरोधात्, एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः तत्तेजोऽसृजतेत्यादयो ब्रह्मणः परम्परया कारणत्वेऽप्युपपद्यन्ते इत्येवं प्राप्ते प्रचक्ष्महे—

सू० तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १४ ॥

तु-शब्दात् पक्षो व्यावृत्तः, महदादिकार्याणामपि तत्तदनन्तरवस्तुशरीरकः स एव पुरुषोत्तमः कारणं, कुतः तदभिध्यानरूपात्तल्लिङ्गात् अभिध्यानं बहु स्यामिति सङ्कल्पस्तत्तेज ऐक्षत बहु स्यां प्रजायेयेति, ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीत्यात्मनो बहुभवनसङ्कल्परूपेक्षणश्रवणान्महदहङ्काराकाशादीनामपि कार-

णानां तथाविधेक्षणपूर्विकैव स्वकार्य्यसृष्टिरिति गम्यते तथाविधं चेक्षणं तत्तच्छरीरकस्य परस्यैव ब्रह्मण उपपद्यते ॥

टी० सू० पृथिवी, अत्राप्यनुषङ्गः उत्तरसूत्रशङ्कामाह "नन्वि"ति, अधिकाररूपशब्दान्तरेभ्यः, अधिकारः—प्रस्तावः अन्न—शब्दस्य पृथिवीवाचकत्वप्रकारमाह "अदनीयस्ये"ति, कारणे कार्य्योपचार इत्यर्थः । प्रकृतं पूर्वपक्षमाह "उदाहृता"इति, ब्रह्मणः साक्षादेव तेषामुत्पत्तिश्रवणं कथमित्यत्राह "एतस्मादि"ति, सू० तदभिधानादेव तु तल्लिङ्गात् सः, तदभिध्यानं—बहुभवनविषयाभिध्यानं, तल्लिङ्गं—परमात्मलिङ्गं तेजःप्रभृतिष्वीक्षणश्रवणात् सर्वशाखाप्रत्ययन्यायेन महदादीनामपि परमात्मशरीरतया तुल्यन्यायतया तेष्वपीक्षणपूर्विका सृष्टिरित्यर्थः । ततः किमित्यत्राह "तथाविधं चे"ति, न केवलमीक्षापूर्वकसृष्ट्या परमात्मनस्तच्छरीरकस्य कारणत्वं गम्यते अपि तु तत्तच्छरीरकत्व श्रौतमित्याह—

सू० श्रूयते च सर्वशरीरकत्वेन सर्वात्मकत्वं परस्य ब्रह्मणोऽन्तर्यामिब्राह्मणे "यः पृथिव्यां तिष्ठन् योऽप्सु तिष्ठन् यस्तेजसि तिष्ठन् यो वायौ तिष्ठन् य आकाशे तिष्ठन् इत्यादि, सुवालोपनिषदि च यस्य पृथिवी शरीरमित्यारभ्य यस्याहङ्कारः शरीरं यस्य बुद्धिः शरीरं यस्याव्यक्तं शरीरमित्यादि, यच्चोक्तम् एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादिषु श्रूयमाणा ब्रह्मणः प्राणादिसृष्टिः परम्परयाऽप्युपपद्यत इत्यत्रोच्यते—

सू० विपर्य्ययेण तु क्रमोऽत उपपद्यते च ॥ १५ ॥

तु—शब्दोऽवधारणार्थः अव्यक्तमहदहङ्काराकाशादिक्रमाद्विपर्य्ययेण यः सर्वेषां कार्य्याणां ब्रह्मानन्तर्यरूपः

Digitized by Google

क्रम एतस्माज्जायते प्राण इत्यादिषु प्रतीयते स च क्रमस्तत्तद्रूपाद्ब्रह्मणस्तत्तत्कार्य्योत्पत्तेरेवोपपद्यते परम्परया कारणत्वे ह्यानन्तर्य्यश्रवणमुपरुध्येत अत एतस्माज्जायते इत्यादिकमपि सर्वस्य ब्रह्मणः साक्षात्सम्भवोत्तम्भनम् ॥

सू० अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १६ ॥

विज्ञानसाधनत्वादिन्द्रियाणि विज्ञानमित्युच्यन्ते यदुक्रमेतस्माज्जायते इत्यादिना सर्वस्य ब्रह्मणोऽनन्तरकार्य्यत्वं श्राव्यते, अतस्तानेन वाक्येन सर्वस्य साक्षाद्ब्रह्मण उत्पत्तिरभिध्यानलिङ्गावगतोत्तभ्यत इति ।

टी० "श्रूयते चे"ति, ईक्षणश्रवणं हि तेजःप्रभृतीनां न तु महदादीनामतस्तेषामपीक्षापूर्वकसृष्टिसिद्धये तत्कारणानामपि परमपुरुषशरीरत्वमाह "सुबालोपनिषदी"ति, उत्तरसूत्रशङ्कामाह "यच्चोक्तमि"ति, सू० विपर्य्ययेण तु क्रमोऽत उपपद्यते च, तु-शब्दोऽवधारणार्थ इति "स्युरेव तु पुनर्वै चेत्यवधारणवाचिन" इति हि नैघण्टुकाः, विपर्य्ययेण क्रमं व्याचष्टे "अव्यक्ते"ति, परोक्तक्रमविपर्य्ययेणेत्यर्थः, अतः-शब्दं व्याचष्टे "स चे"ति, एतस्माज्जायत इत्यत्र ब्रह्मानन्तर्य्यप्रतीतिः स्वारस्यसिद्धा, एवं वाक्यस्वारस्येन ब्रह्मानन्तर्य्यरूपक्रमप्रतिपत्तेर्ब्रह्मण एव तत्तत्कार्य्योत्पत्तिरित्यर्थः । उत्तम्भनं-ज्ञापकम् एतस्मात्प्राणो जायते एतस्मान्मनो जायत इत्यस्याभिप्रायेण एवमुक्तम् । सू० अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्, व्याख्येयं पदं व्याचष्टे विज्ञानेति, अत्रापि न केवलं श्रुत्यन्तरेष्वेवेति भावः ॥ तैस्सह पाठलिङ्गादयुप्रायन्यायादित्यर्थः ॥

सू० तन्नोपपद्यते क्रमविशेषपरत्वादस्य वाक्यस्याचापि सर्वेषां

क्रमप्रतीतेः, खादिषु तावत् श्रुत्यन्तरसिद्धः क्रमोऽवगम्यते तैः सह पाठलिङ्गाद् भूतप्राणयोरन्तराले विज्ञानमनसी अपि क्रमेणोत्पद्येते इति प्रतीयते, अतः सर्वस्य साक्षाद्ब्रह्मण एव सम्भवस्योक्त भकमिदं वाक्यं न भवति इति चेन्न अविशेषात् एतस्माज्जायते प्राण इत्यनेनाविशेषात् विज्ञानमनसोः खादीनां चैतस्माज्जायते इत्यनेन साक्षात्सम्भवरूपसम्बन्धस्याभिधेयस्य सर्वेषां प्राणादिपृथिव्यन्तानामविशिष्टत्वात्स एव विधेयो न क्रमः श्रुत्यन्तरसिद्धक्रमविरोधाच्च नेदं क्रमपरं, पृथिव्यप्सु प्रलीयत इत्यारभ्य तम एकीभवतीत्यन्तेन क्रमान्तरप्रतीतेः, अतोऽव्यक्तादिशरीरकात् परस्माद्ब्रह्मण एव सर्वकार्याणामुत्पत्तिः तेजःप्रभृतयश्च शब्दास्तदात्मभूतं ब्रह्मैवाभिदधति। नन्वेवं सर्वशब्दानां ब्रह्मवाचित्वे सति तैस्तैश्शब्दैस्तत्तद्वस्तुव्यपदेशो व्युत्पत्तिसिद्ध उपरुध्यते तत्राह

सू० चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्॥ १७॥

तु-शब्दश्चोदिताशङ्कानिवृत्त्यर्थः निखिलजङ्गमस्थावरव्यपाश्रयस्तत्तच्छब्दव्यपदेशो भाक्तः वाच्यैकदेशे भज्यत इत्यर्थः॥

टी० तत्रेति, अविशेषादिति पदं व्याचष्टे "एतस्मादि"ति, अनेनाविशेषात्—एतस्माज्जायत इति वाक्यप्रतिपन्नान्वयाविशेषात्। तदेव विवृणोति "एतस्माज्जायते"इति, एतस्मादित्यादिवाक्याभिधेयस्य साक्षात्सम्भवरूपस्य सम्बन्धस्य प्राणादिपृथिव्यन्तानामविशिष्टत्वादित्यर्थः

Digitized by Google

दीपसारयोस्तु एतस्मादिति पञ्चम्यन्तपदान्वयाविशेषादिति शब्दपरं व्याख्यातम् इदं त्वर्थपरं, श्रुत्यन्तरसिद्धक्रमविरोधाच्चेति प्राणो हि वायुकार्य्यः, स हि खस्यानन्तरमुत्पन्नः न भूतेभ्यः प्रागुत्पन्न इत्यर्थः । क्रमविरोधे प्रमाणमाह "पृथिव्यप्सु प्रलीयत"इति, व्यवहितकार्याणामपि ब्रह्मण उत्पत्तिश्चेत् कथं तेजःप्रभृतिशब्दैरभिधानमित्यत्राह "तेजःप्रभृतयश्चे"ति, अनन्तरसूत्रं चोद्यपुरःसरमवतारयति "नन्वि"ति, यत्र शब्दस्य वाचकत्वशक्तिस्तत्र व्युत्पत्तिरस्ति, अतो ब्रह्मवाचकत्वेन व्युत्पत्त्यभावान्न शब्दस्य तद्वाचकत्वशक्तिरित्यर्थः सू॰ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्, हेतुखण्डं विवृण्वन्वाक्यार्थं योजयति–

भू॰ समस्तवस्तुप्रकारिणो ब्रह्मणः प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणविषयत्वादेदान्तश्रवणात्प्राक् प्रकार्य्यप्रतीतेः, प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्य्यवसानस्य लोके तत्तद्वस्तुमात्रे वाच्यैकदेशे ते ते शब्दा भङ्क्त्वा भङ्क्त्वा व्यपदिश्यन्ते, अथवा तेजःप्रभृतिभिः शब्दैस्तत्तद्वस्तुमात्रवाचितया व्युत्पन्नैर्ब्रह्मणो व्यपदेशो भाक्तः स्यात् अमुख्यः स्यादित्याशङ्क्य

टी॰ "समस्ते" ति, व्युत्पत्त्यभावो न वाचकत्वाभावप्रयुक्तः, अपि तु प्रमाणान्तरागोचरत्वप्रयुक्त इति व्युत्पत्त्यभावस्यान्यथासिद्धिरुक्ता भवति, अस्यां योजनायां द्वितीययोजनार्थे आर्थः सिध्यति सर्वशब्दानां ब्रह्मणि मुख्यत्वे प्रमाणस्यापेक्षितत्वात् । साक्षादर्थमाह "अथ वे"ति, तत्र शङ्कान्तरमाह "तेज"इति चराचरव्यपाश्रयस्तद्व्यपदेशश्चराचरमात्रविषयपर्यवसायित्वेन व्युत्पन्नस्तद्वाचिशब्द इत्यर्थः । ब्रह्मभाव–शब्देन ब्रह्मानुप्रवेश उच्यते ब्रह्मणस्तत्र भावो ह्यनुप्रवेशः अस्यां योजनायां सर्वशब्दानां ब्रह्मवाचित्वे प्रमाणोपन्यासः श्रौतः स्यात्, व्युत्पत्तिविरोधशङ्कापरिहारस्त्वार्थः सिध्यति, एवं विशेषणभूतपृथिव्यादिषु क्रमनिर्देशमुख्यः

ब्रह्मणस्तत्तद्वस्तुविशिष्टत्वात् सर्वस्य ब्रह्मप्रसूतत्वश्रवणं मुख्यं सर्वतत्त्वानां यावद्द्रव्यसत्ताकविशेषणतया ब्रह्मशरीरत्वं मुख्यम्, अभिध्यानं चात एव मुख्यम्, अतः सर्वश्रुतिमुख्यत्वं सिद्धान्त उक्तं भवति । परे त्वाकाशाद्वायुरित्याकाशादनन्तरं. वायुरुत्पन्नः वायोरनन्तरम् अग्निरुत्पन्न इति निर्वाहसम्भवात्तज्जलानिति एतस्माज्जायते प्राणः स तपस्तप्त्वेदं सर्वमसृजतेत्यादिश्रुतिभिरविशेषेण सर्वस्य ब्रह्मजत्वावगमाच्छान्दोग्यश्रुत्यनुसारेण तेजसो ब्रह्मयोनित्वं पूर्वपक्षीकृत्य आत्मनः सम्भूतः पृथिव्या ओषधय इति पूर्वापरपञ्चम्योरुपादानविषयत्वदर्शनान्मध्यपातिन्या अपि तथात्वाद्वायुयोनित्वं तेजसः, ब्रह्मजत्वं तु वायुभावापन्नब्रह्मणो जाततया पारम्पर्येणाप्युपपद्यत इति सिद्धान्तयन्ति तच्चिन्तनीयं सिद्धान्ते किं निरसनीयं, यदि ब्रह्मयोनित्वमात्रं तदा कृत्स्नस्य ब्रह्मोपादानकत्वानुपपत्तिः, यदि वाय्ववस्थानापन्नब्रह्मयोनित्वं निरसनीयं तदयुक्तं त्वन्मतेऽध्यासाधिष्ठानत्वस्योपादानलक्षणत्वात् घटः सन् मृदयं घट इति मृदवस्यसदात्मकतया घटप्रतीतिवत्तेजोऽस्ति आपस्सन्तीति सद्रूपेण प्रतीयमानस्य तेजसोऽपां च वायुस्तेजस्तेजोजलमिति वायोस्तेजोरूपतया प्रतीयमानत्वाभावात् अनवभातस्याधिष्ठानत्वायोगाच्च वायुभावापन्नापन्नस्यैव सन्मात्रस्य तेजःप्रभृत्युपादानत्वोपपत्तेः, न हि रज्जुः सर्पात्मना भूदलनादेरुपादानं, भूदलनाध्यासदशायां सर्पात्मनाऽवभातत्वात्, यद्यनवभातमप्यधिष्ठानं स्यात् सर्वं सर्वस्याधिष्ठानं स्यात् अनवभातत्वाविशेषात् गोमयत्वा[1]विशेषात् गोमयत्वानवभासेऽपि गोमयस्य वृश्चिकोपादानत्वमुपपन्नमिति चेन्न परिणामानभ्युपगमात् अनवभातस्य परिणाम उपपद्यते न त्वध्यासाश्रयत्वं दर्शनस्य नियामकत्वात्, न हि पुरोवर्त्तिनि भास्वरद्रव्येऽनवभाते रजताध्यासः अनवभातमपि बीजमङ्कुरादिपरिणामं भजते वाय्वादिकं तेजोऽध्यासे सत्तयोपकारकमिति चेन्न दिक्कालादृष्टेन्द्रियतद्दोषव्यतिरिक्तस्य भ्रान्तौ गुरुत्वादेरिव सत्तयोपकारकत्वाभावात् अतः सद्रूपेण प्रतीतेर्वाय्वादि रूपेणाप्रतीतेश्च सन्मात्रस्यैवोपादानत्वोप-

१ गोमयत्वाविशेषादिति पुस्तकान्तरे पाठान्तरं नास्ति ।

पत्तेः तर्कापेतश्रुतेरपि तर्कानुगृहीतश्रुतेः प्रबलत्वाच्छान्दोग्यश्रुत्यनुसारेण सद्योनित्यत्वमेव सिद्धान्तीकर्त्तव्यम् आकाशाद्वायुः वायोरग्निरित्यादिष्वाकाशादिशब्दानां लक्षणया सन्मात्रपरत्वं चाश्रयणीयं, लक्षणैव दोष इति चेत् अहो भवतां लक्षणाभीरुत्वं ये सत्यज्ञानानन्तत्त्वमादिपदानि व्याचक्षते अनन्तरशब्दाध्याहारेणात्मनोवायुः संभूत इति योजनाऽपि वरं तर्कानुगृहीतश्रुत्यन्तरैकार्थ्यात् उपक्रमावगतस्यात्ममात्रात् सम्भवस्य प्रबलत्वाच्च अध्याहारपञ्चमीवैरूप्ययोरनादरणीयत्वात् । किञ्च ब्रह्मयोनित्वाकाशयोनित्वचिन्ता कस्माद्वायौ न कृता सन्मूलत्वश्रवणरूपपूर्वपक्षलिङ्गस्य तत्राभावादिति चेन्न एतस्माज्जायते खं वायुर्ज्योतिराप इति परमात्ममूलत्वावगतेः, अतो न पूर्वपक्षलिङ्गं तेजसि चिन्तायां हेतुः किं तु तदैक्षतेत्यभिध्यानरूपसिद्धान्तलिङ्गवत्त्वमत एव तेजोऽत इत्यादिसूत्राणां पूर्वपक्षविषयत्वमवगम्यते, अत एव पृथिव्यधिकाररूपशब्दान्तरेभ्य इति नाधिकरणान्तरं किं तु पृथिवीति पृथक्सूत्रम्, अम्मात्रात् पृथिव्युत्पत्तिपरं पूर्वपक्षविषयत्वोपपादनात् सिद्धान्तं वक्तुं विषयशुद्धिपरमधिकाररूपशब्दान्तरेभ्य इति सूत्रान्तरम् अन्नस्य पृथिवीत्वे सिद्धे हि कारणविशेषचिन्ताप्राप्तिः सूत्रान्तरत्वं च हेतोः पूर्वसाध्येनान्वयादवगम्यते पूर्वपक्षसिद्धान्तसूत्रयोर्मध्यपातित्वाच्च पृथगधिकरणत्वं न्याय्यं तेजसि चिन्तनस्य सिद्धान्तयुक्तिनिबन्धत्वादेव अपरेषामपि पक्षे व्याख्यावैषम्यं प्रत्युक्तं वियदादिभूतानामाकाशाद्वायुः तदपोऽसृजतेति स्वातन्त्र्येण स्वकार्य्ये प्रवृत्तिप्रतिषेधक्रमधिकरणान्तरं तदभिध्यानादिति सूत्रमाहुः तदयुक्तं रचनानुपपत्तेरित्यत्र अचेतनस्य स्वातन्त्र्येण प्रवृत्तिप्रतिषेधात् तथाऽपि तत्तेज ऐक्षतेति चेतनत्वश्रवणात् संशय इति चेन्न अभिमानिव्यपदेशस्त्वित्यत्राचिद्गतेक्षणादीनामपि चेतनानुप्रवेशनिबन्धनत्वस्योक्तत्वात् तत्पूर्वपक्षसूत्रमिति चेत्तथाऽपि तस्य सूत्रकारेणाप्रत्याख्यातत्वात् कृतकरत्वम् अत एव भवद्भिरपि परमेश्वरावेशादीक्षणश्रवणमित्युक्तं, स्वातन्त्र्यप्रतीतिश्च चमसवदविशेषादित्यत्र दत्तोत्तरा, तत्र बह्वीः प्रजाः सृजमानामिति स्वातन्त्र्ये प्रतीतेऽपि प्रकरणादिना ब्रह्मात्मकत्वावगमेन हि स्वात-

Digitized by Google

"भुवश्च" ॥ 'विभ्वी प्रभ्वीति'। विप्रसंभ्यो ड्वसञ्ज्ञायामिति डुप्रत्ययान्तान्ङीष्। 'स्वयंभूरिति'। भवतेः क्विप्। 'ह्रस्वादेवेयमिति'। यद्येवं घेर्ङितीति गुणे कृते भोरिति निर्द्देशः प्राप्नोति तत्राह। 'सौत्रोयं निर्द्देश इति'। गुणस्यैव कृतस्य छान्दस उवङादेश इत्यर्थः ॥

"पुंयोगादाख्यायाम्" ॥ 'पुंसा योगः पुंयोग इति'। योगः सम्बन्धः। 'पुंयोगाद्धेतोरिति'। हेतौ पञ्चमीं दर्शयति। आख्याग्रहणं गुणभूतेनापि पुंसैव सम्बध्यते ऽन्येन सम्बन्धासम्भवात्। गणकादयो हि शब्दाः पुंयोगात्स्त्रियां वर्त्तमाना न पुंयोगस्याख्या भवन्ति,स्त्रियां च पुंयोगमन्तरेण न प्रवर्त्तन्तइति स्त्रिया अपि नाख्यास्तदाह। 'पुंस आख्याभूतमिति'। भूतग्रहणेनैतद्दर्शयति यत्प्रातिपदिकं प्राक् पुंसो वाचकमभूत्सम्प्रति तु पुंयोगाद्धेतोः स्त्रियां वर्त्तत इति। 'गणकीत्यादि'। गणयतीति गणकः, ण्वुल्,प्रतिष्ठते प्रष्ठः, प्रष्ठोग्रगामिनीति षत्वं, कथं पुनरेते पुंशब्दा इत्यत आह। 'पुंसि शब्दप्रवृत्तिनिमित्तस्य सम्भवादिति'। गणयति प्रतिष्ठतइति व्युत्पत्त्या पुंसि रूढा एते न स्त्री गणयति प्रतिष्ठते वा, महामात्रशब्दस्यापि प्रवृत्तिनिमित्तं हस्तिपकानामाज्ञापनं, हस्तिपकाधिपतिर्हि महामात्रः, या तु स्वयं गणयति प्रतिष्ठते वा न तस्यां पुंयोगाच्छब्दप्रवृत्तिः, अपि तर्हि स्वयमेव क्रियासम्बन्धादिति टापैव तत्र भाव्यं, कथं तर्हि स्त्रियां प्रवृत्तिरित्यत आह। 'तद्योगादिति'। कोर्थः ॥

तस्येदमिति सम्बन्धादिति चेत्तद्धितो भवेत्।
ङीषेत्र बाधकः स्याच्चेन्नित्यं बाधः प्रसज्यते ॥

गणकस्येयमिति भेदसम्बन्धे विवक्षिते तस्येदमिति तद्धितः प्राप्नोति, अथ नाप्राप्ते तद्धिते ङीषारभ्यमाणस्तस्य बाधक इत्युच्यते कदा चिदपि तद्धितो न स्यात्, उभयमपि त्विष्यते प्राष्ठी प्रष्ठीति। स्यान्मतमेतत्। एतदेव ङीष्विधानं ज्ञापकं भेदविवक्षायामपि तद्धितमन्तरेण प्रष्ठादयः स्त्रियां वर्त्तन्तइति, तेन न केवला प्रकृतिः प्रयोक्तव्येति निय-

मोत्र बाध्यते, सति हि तद्धिते प्राष्ठीत्यणि ङीबेव सिद्धः, तस्य चोदात्तनिवृत्तिस्वरेणोदात्तत्वमिति किं ङीष्विधानेनेति, तत्र । येनीकारान्तास्तद्धिताः भानोरियं भानवीयेति तदर्थमेतत्स्यात्, एवं तर्ह्याख्याग्रहणं ज्ञापकं नात्र तद्धितोत्पत्तिरिति, नहि तद्धितान्तः प्रकृत्यर्थे पुंसि वर्त्तते, एवमपि ज्ञापकेन तद्धितस्य नित्यं बाधात्प्राष्ठीति न स्यात्, तस्माद्दुष्ट एवायं पक्षः, एवं तर्हि यथा मञ्चाः क्रोशन्ति, गौर्वाहीकः, गङ्गायां घोषः, यष्टीः प्रवेशयेत्यादौ तात्स्थ्यात्ताद्धर्म्यात्तत्सामीप्यात्तत्साहचर्याच्चातस्मिन्नपि तत्त्वाध्यारोपेण तच्छब्दप्रवृत्तिस्तद्वदत्रापि प्रष्ठादिसाहचर्यात्तच्छब्दप्रवृत्तिर्भविष्यति, तत्राभेदेन भेदसम्बन्धस्य निवृत्तत्वाच्च तद्धितप्रसङ्गः, विवक्षिते च भेदे तद्धितोत्पत्त्या प्राष्ठीत्यादि भविष्यति । तत्राहुः । यस्त्वया धर्मश्चरितव्यः सोनया सहेति भार्यायाः शास्त्रसिद्धं साहचर्यमिति तस्यामेवैतन्ङीष्विधानमिति, भट्टिकाव्ये तु दुहितृष्वपि दृष्टः प्रयोगः । कौसल्यया ऽसावि सुखेन रामः प्राक्कैकयीतो भरतस्ततोभूदिति, केकयस्य दुहिता केकयी, जनपदशब्दादपत्यप्रत्यये तु कैकयीति प्राप्नोति, न च तस्यातश्चेति लुक्, न प्राच्यभर्गादीति प्रतिषेधात्तस्मात्सोयमित्यभिसम्बन्ध इत्ययमेव पक्षो ग्राह्यः । यद्वा यथा स्वामिदासौ पचत इति स्वामिनः संविधातृत्वात्पक्तृत्वं दासस्य तु साक्षात् तथा पुरुषः साक्षात्प्रतिष्ठते स्त्र्यपि संविधातृत्वात्पुरुषगतायाः प्रस्थानक्रियायास्तस्यामारोपात्प्रतिष्ठतइति, तस्यामेव प्रष्ठशब्दो व्युत्पाद्यते न तु पुरुषे व्युत्पादितः सन् तेन सहाभेदो पचारात्तस्यां वर्त्तते, न चैतावता पुंयोगादेव हेतोः स्त्रियां वर्त्ततइत्यस्य हानिः, साक्षात्स्वयमकर्तृत्वात् । अत्र पक्षे प्रस्थ इति स्थिते सुबन्तस्य समासः, सुप् च संख्यानिमित्तः, प्रातिपदिकं च पूर्वं लिङ्गमभिधत्ते पश्चात्सङ्ख्यामिति तन्निमित्तसुबपेक्षात्समासात्प्रागेवोत्तरपदात्स्थशब्दाट्टाप्प्रसङ्गः, न च स्थशब्दादप्यनेनैव ङीष् लभ्यते प्रष्ठशब्दो हि पुंस आख्या न तु स्थशब्दमात्रं, नैष दोषः । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति कृदन्तावस्थायामेव समासः, सा पुंस आख्येति ङीष् भविष्यति, परिभाषाप्रयो-

जनान्युपपदमतिङित्यत्र प्रतिपादितानि । 'देवदत्तेति' । स्त्रिया एव कस्याश्चिदेषा संज्ञा, 'परिसृष्टा प्रजातेति' । प्रसूतेत्यर्थः । 'पुंयोगादेते शब्दाः स्त्रियां वर्त्तन्तइति' । परिसर्गः प्रसवः, प्रजन इत्यनर्थान्तरं स च न पुंयोगमन्तरेण सम्भवति, तस्मात्पुंयोगाद्धेतोः स्त्रियां वर्त्तते । परिसृष्टा प्रजातेति द्वौ प्रकृतौ, एते शब्दा इति बहुवचनं तु य एवं जातीयकाः शब्दाः प्रसूतादयस्तदपेक्षं द्रष्टव्यम् । 'गोपालिकादीनामिति' । सिद्धयइति शेषः । 'सूर्याद्देवतायां चाब्वक्तव्य इति' । ङीष एव प्रतिषेधे वक्तव्ये चाब्विधानमन्तोदात्तार्थं, सूर्यशब्दोयमाद्युदात्तस्तत्र टापि सति आद्युदात्तत्वमेवावतिष्ठेत । 'सूरीति' । सूर्यस्य स्त्री मानुषी कुन्त्यादिः, सूर्यति यलोपः ॥

"इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्" ॥ 'येषामिति' । इन्द्रादीनामृडान्तानामातुलाचार्ययोश्च । 'अन्येषामिति' । हिमादीनाम् । 'हिमारण्ययोर्महत्वइति' । महत्वयोगेनानयोः स्त्रीत्वम्, अन्यत्र नपुंसकत्वम् । दुष्टो यव इति[1] पाठः । 'यवानीति' । जात्यन्तरमेवाभिधीयते, अयमेव च दोषो यदुत यवत्वजातेरभावे तदाकारानुकृतिः । 'यवनाल्लिप्यामिति' । केचिज्जनपदिनो यवनास्तेषां लिपिः, तस्येदमित्यणो बाधको ङीष्, लिपिशब्दः स्त्रीलिङ्गः । 'उपाध्यायमातुलाभ्यां वेति' । उपाध्यायमातुलाभ्यां यो ङीष् तत्सन्नियोगेनानयोर्वाऽऽनुगागमो भवतीति वक्तव्यमित्यर्थः, तत्रोपाध्यायस्याप्राप्तौ मातुलस्य तु नित्यं प्राप्त आनुग्विकल्प्यते । 'आचार्यादणत्वं चेति' । क्षुभ्नादिषु पठितव्यमित्युक्तं भवति । 'अर्यक्षत्रियाभ्यां वेति' । ङीषानुकौ द्वावप्यप्राप्तौ विकल्प्येते । 'स्वार्थएवायं विधिरिति' । यदि तु पुंयोगेऽयं विधिः स्याच्छूद्रापि क्षत्रियस्य भार्या क्षत्रियाणी स्यात् ब्राह्मणभार्या च क्षत्रियाणी न स्यात्, तस्मात्स्वार्थएव स्त्रीत्वविशिष्टेयं विधिः । 'मुद्गलादिति' । ङीषो लित्स्वादानुगाकारस्य लित्स्वरः । अथ किमर्थमानुग्विधीयते न अनुगेवोच्येत, अकारोच्चारणसामर्थ्यादतो

1 नेत्यधिकम् २ पुस्तके ।

Digitized by Google

गुणे पररूपं बाधित्वा सवर्णदीर्घत्वं भविष्यति, अन्यथा नुगेवोच्येत, यथैव तर्हि पररूपं न भवति तथैव सवर्णदीर्घत्वमपि न स्यात्, नैष दोषः। यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते, तस्मादनुगेव वक्तव्यः। अपर आह। इन्द्रमाचष्टे इन्द्रयति, इन्द्रयतेः क्विप्, णिलोपः, इन्द्रः स्त्री इन्द्राणी, अत्र दीर्घस्य श्रवणं, दीर्घोच्चारणसामर्थ्यादत इत्यधिकारो बाध्यते इति, एवमपि क्विबन्त पुंस आख्या न भवति॥

"क्रीतात्करणपूर्वात्"॥ पूर्वशब्दोवयववचन इत्याह। 'करणं पूर्वमस्मिन्नित्यादि'। व्यवस्थावाचिनि तु पूर्वशब्दे करणं पूर्वमस्मादिति वाच्यं स्यात्, एवं च क्रीतस्य करणवाचिशब्दान्तरमवयवो नोपपद्यतइति तद्व्यतिरिक्तमेव प्रातिपदिकं करणपूर्वत्वेन विशेष्यते, क्रीतशब्देनापि विशेषितस्यैव विशेषणात्तदन्तविधिरित्याह। 'क्रीतशब्दान्तात्प्रातिपदिकादिति'। यदि तु व्यवस्थावाचिनं पूर्वशब्दमाश्रित्य क्रीतशब्दो विशेष्यते करणं पूर्वमस्मादिति ततो वाक्येपि स्याद् अश्वेन क्रीतेति, तस्मादवयववाची पूर्वशब्दः प्रातिपदिकं च विशेष्यमिति सम्यगुक्तम्। 'वस्त्रक्रीतीति'। गतिकारकोपपदानामितिवचनात् प्रागेव सुबुत्पत्तेः क्रीतशब्देन सह समासः,। 'टाबन्तेन समास इति'। एकादेशस्य पूर्वं प्रत्यन्तवत्त्वा[1]त्क्तदन्तताया अविघातादविरुद्धष्टाबन्तेन समासः, अथ टाबन्तेनापि समासे कस्मादेवात्र न भवति तत्राह। 'अत इतीति'। ननूदाहरणवत्प्रागेव टाबुत्पत्तेरत्रापि समासः प्राप्नोति, वक्तव्यो वा विशेषो ऽत आह। 'गतिकारकोपपदानामित्यादि'। न तत्र बहुलग्रहणमस्तीति चेत्तत्राह। 'कर्तृकरणे कृता बहुलमिति'। कर्तृकरणे कृता बहुलमित्यनेन तावदत्र समासः, स च बहुलग्रहणात् प्राक् सुबुत्पत्तेः क्व चिद्भवति, क्व चिदुत्पन्ने सुपीति मन्यते, एतावतैव च बहुलं तदुच्यतइति सामान्येनोक्तं न पुनः कर्तृकरणे कृता बहुलमित्ययमेव समासः प्राक् सुबुत्पत्तेरिष्यते, यथा तु भाष्यं तथा नैतदिष्यते॥

१ अन्तवद्भावादिति २ पु॰ पाठः।

"क्तादल्पाख्यायाम्" ॥ 'अल्पाख्यायामिति समुदायोपाधिरिति'। ननु चाल्पैरभ्रैर्विलिप्तेति पूर्वपदार्थस्यैवाल्पता गम्यते न विलिप्तार्थस्य, एवं मन्यते, अभ्राणामल्पत्वे सति त[१]द्विलेपनस्याल्पत्वमवश्यम्भावीति । 'अभ्रविलिप्तीति' । वृत्तेश्च गतार्थत्वादल्पशब्दस्याप्रयोगः, । 'चन्दनानुलिप्तेति' । बहुलेन चन्दनेनानुलिप्तेत्यर्थः, कृद्ग्रहणपरिभाषया समुदायस्य क्तान्तत्वम् ॥

"बहुव्रीहेश्चान्तोदात्तात्" ॥ 'बहुव्रीहिर्योऽन्तोदात्त इति'। अत्र क्तादित्यनुवृत्तिसामर्थ्यात्प्रत्ययग्रहणपरिभाषा कृद्ग्रहणपरिभाषा च न प्रवर्त्ततइति बहुव्रीहेः क्तान्तत्वम् । 'शङ्खभिन्नीति'। निष्ठेति पूर्वनिपातो न भवति, जातिकालसुखादिभ्यः परवचनमिति वचनात्, शङ्खादयो हि जातिवचनाः, अत एव जातिकालसुखादिभ्य इत्यन्तोदात्तत्वं भवति । 'गलोत्कृत्तीति' । कृती छेदने, उत्पूर्वात् क्तः, गलमुत्कृत्तमस्या इति विग्रहः । 'पादपतितेति' । कर्तृकरणे कृता बहुमिति समासः, थाथादिस्वरेणान्तोदात्तत्वम् । 'अन्तोदात्ताज्जातप्रतिषेध इति'। अन्तोदात्ताद्बहुव्रीहेर्ङीष्विधाने जातशब्दान्तात्प्रतिषेधो वक्तव्यः, स त्वन्तग्रहणादेव सिद्धः, कथम्, इहान्तग्रहणं न कर्त्तव्यं वर्णादनुदात्तादितिवद् उदात्तान्तादिति विज्ञास्यते, तत् क्रियते नित्ययोगे यथा बहुव्रीहिर्विज्ञायेत, दन्तजातादौ तु वा जातइति विकल्पेनान्तोदात्तत्वम् । 'पाणिगृहीत्यादीनां विशेष इति' । सिद्धयइति शेषः । अग्निसाक्षिकं यस्याः पाणिर्गृह्यते सा पाणिगृहीतीति भवति । 'कथं चिदिति' । यथोक्तात्प्रकारादन्येन प्रकारेणेत्यर्थः । 'अबहुनञित्यादि'। बह्वादिपूर्वपदाद्बहुव्रीहेर्ङीष् न भवतीति वक्तव्यमित्यर्थः । 'बहुकृतेति'। बहूनि कृतान्यनयेति विग्रहः, बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वम् । 'अकृता सुकृतेति'। न विद्यते कृतमनया शोभनं कृतमनयेति विग्रहः, नञ्सुभ्यामित्यन्तोदात्तत्वम् । 'मासजातेति'। मासो जातोतीतोस्याः, सुखं जातं प्राप्तमनया, दुःखं जातमनयेति विग्रहः, सुखादयः सुखादिभ्यः कर्तृवेद-

१ धात्वर्थस्येति २ पु॰ पाठः ।

नायामित्यत्र पठिता गृह्यन्ते । अथ वा बहुव्रीहेश्च जातिपूर्वादिति वक्तव्यं, बहुव्रीहावन्तोदात्तनिमित्तेष्वन्येषु प्रतिषिद्धेषु जातिरेवान्तोदात्तनिमित्तं क्तान्तस्यावशिष्यतइति जातिग्रहणमेवात्र कर्त्तव्यमित्यर्थः ॥

"अस्वाङ्गपूर्वपदाद्वा" ॥ 'शार्ङ्गजग्धीत्यादि' । शार्ङ्गं जग्धमनया पलाण्डुर्भक्षितोऽनयेति विग्रहः, शार्ङ्गादिरभक्ष्यजातिः, सर्वत्र जातिकालसुखादिभ्य इत्यन्तोदात्तत्वम्, 'वस्त्रच्छन्नेति' । छद अपवारणे चुरादिः, वा दान्तशान्तेत्यादिना छन्नशब्दो निपातितः, अत्रानाच्छादनादिति प्रतिषेधात्पूर्वपदप्रकृतिस्वरत्वमेव भवति । प्रवृद्धा चेत्यादिना विग्रहविशेषेण तत्पुरुषं दर्शयति ॥

"स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" ॥ 'अतिकेशीति' । अतिक्रान्ता केशानिति तत्पुरुषः, एकविभक्ति चेति केशशब्दस्योपसर्जनत्वम् । 'अशिखेति' । असत्युपसर्जनग्रहणेऽत्रैव प्राप्नोति न मूलोदाहरणेष्वनुपसर्जनादित्यधिकारात् । अथ बहुव्रीह्यधिकारादत्र न भविष्यतीत्युच्येत, अतिकेशीत्यत्रापि तर्हि न स्यात्, अङ्गगात्रेत्यादिभाष्येनुक्तमप्येतत्प्रयोगबाहुल्याद्वृत्तिकारेणोक्तं, यद्यत्र स्वमङ्गं स्वाङ्गं गृह्येत श्लक्ष्णमुखा शाला, अत्रापि प्राप्नोति, मुखस्य शालाङ्गत्वात्, दीर्घकेशी रथ्येत्यत्र च न स्यात्, केशानां रथ्याङ्गत्वाभावात्, तदव्याप्त्यतिव्याप्तिपरिहारार्थं स्वाङ्गं परिभाष्यते । 'अद्रवमिति' । तत्र प्राणिस्थं स्वाङ्गमित्यनेन श्लक्ष्णमुखा शालेत्यत्र न भवति, एवमपि बहु[1]कफाऽत्र प्राप्नोति, तदर्थमाह । 'अद्रवमिति' । द्रवतीति द्रवं, ततोऽन्यदद्रवम् । एवमपि बहुज्ञानाऽत्रापि प्राप्नोत्यत आह । 'मूर्त्तिमदिति' । असर्वगतद्रव्यपरिमाणा मूर्तिः, असर्वगतानि यानि द्रव्याणि तेषां यत्परिमाणं ह्रस्वत्वादि सा मूर्त्तिः, स्पर्शवद्द्रव्यपरिमाणं मूर्त्तेरित्यन्ये, सा यस्यास्ति तन्मूर्तिमत्, एवमपि बहुशोफाऽत्र प्राप्नोत्यत आह । 'अविकारजमिति' । विकारो वातादिवैषम्यं ततो यज्जायते तन्न भवतीत्यविकारजं, शोफस्तु श्वयथुसंज्ञको विकारजः, यदि प्राणिस्थं स्वाङ्गं रथ्यादिपरिगतानां केशानां

१ बहुस्वेदेति २ पु॰ पा॰ ।

स्वाङ्गत्वं न स्यात्, सम्प्रत्यप्राणिस्थत्वात्, ततश्च दीर्घकेशी रथ्येति न सिद्ध्यत्यत आह । 'अतत्स्थमिति' । सम्प्रत्यप्राणिस्थमपि कदा चित्प्राणिनि दृष्टं चेत्तदपि स्वाङ्गं भवत्येवेत्यर्थः । एवमपि प्रतिमावयवानां मुखादीनां स्वाङ्गत्वं न प्राप्नोति, अप्राणिस्थत्वात्ततश्च दीर्घमुखी प्रतिमेत्यत्र न सिद्ध्यति तत्राह । 'तेन चेदिति' । अतत्स्थमित्यनुषङ्गः, अप्राणिस्थमपि मुखादि स्वाङ्गं तेन चेन्मुखादिना तदप्राणिद्रव्यं तथा युतं भवति यथा प्राणिद्रव्यमित्यर्थः । अन्येषां पाठस्तस्य चेत्तथा युतमिति, तत्रार्थः । अप्राणिस्थमपि मुखादि स्वाङ्गं तस्य चेदप्राणिनः तन्मुखादि तथा युतं भवति, तादृशसंस्थानं भवति यादृशं संस्थानं प्राणिन इत्यर्थः ॥

"नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च" ॥ 'सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येवेति' । कथं, नासिकोदरयोस्तावदयं योगः पुरस्तादपवादन्यायेनानन्तरं बह्वज्लक्षणमेव प्रतिषेधं बाधते, ओष्ठादिष्वपि मध्येपवादन्यायेन पूर्वं संयोगोपधलक्षणमेव प्रतिषेधं बाधते न सहादिलक्षणम्, अतोसौ भवत्येव सनासिका ऽनासिका विद्यमाननासिकेति । 'बिम्बोष्ठीति' । ओत्वोष्ठयोर्वा समासे पररूपं वक्तव्यमिति पररूपम् । 'कबरपुच्छीति' । कबरं नानावर्णं पुच्छमस्याः सा मयूरी, मणिः पुच्छमस्या, विषं पुच्छमस्याः मणिपुच्छी विषपुच्छी वृश्चिकी, उलूक इव पक्षोस्या उलूक इव पुच्छमस्या इति विग्रहः ॥

"न क्रोडादिबह्वचः" ॥ 'कल्याणक्रोडेति' । अश्वानामुरः क्रोडा, स्त्रीलिङ्गोयं, तत्र बहुव्रीहौ पूर्वपदस्य पुंवद्भावः, उत्तरपदस्योपसर्जनह्रस्वत्वम् । 'कल्याणखेति' । अयन्योयं, नखमुखात्सञ्ज्ञायामिति प्रतिषेधात्, असञ्ज्ञायां ङीष इष्टत्वात्, तस्मात्कल्याणोखेति पाठः । उखेति हि पठ्यते । क्रोडा बालखुरोखाः शफो गुदं भगगलौ चेति ॥

"सहनञ्विद्यमानपूर्वाच्च" ॥ पूर्वग्रहणमकृत्वा सहनञ्विद्यमानेभ्य इत्युच्यमाने सहादिभ्यः परं यत्स्वाङ्गन्तदन्तान्ङीष् न भवतीत्यर्थो भवति ततश्चेह प्रतिषेधः प्रसज्येत विद्यमानं मुखमस्य विद्यमानमुखः,

कल्याणो विद्यमानमुखोऽस्याः कल्याणविद्यमानमुखीति, भवति ह्येतद् यथोक्तविशेषणम्, इह च न स्याद् विद्यमानकल्याणमुखेति, नह्यत्र यथोक्तं विशेषणमस्ति तस्मात्पूर्वग्रहणम् ॥

"नखमुखात् संज्ञायाम्" ॥ 'शूर्पणखेति'। पूर्वपदात्संज्ञायामग इति णत्वम्, एवं च शूर्पणखा वा राक्षसी शूर्पनखी वा, यदि योगमात्रं न संज्ञा शूर्पनखी, संज्ञायां शूर्पणखा, न पुनः शूर्पणखीति णत्वङीषोः समावेशः साधुः ॥

"दीर्घजीह्वी चच्छन्दसि" ॥ 'निपातनं नित्यार्थमिति'। दीर्घजिह्वादित्युच्यमाने प्रकृतस्य ङीषो विकल्पितत्वादिहापि विकल्पो विज्ञायेत ॥

"दिक्पूर्वपदान् ङीप्" ॥ दिक्पूर्वपदान्ङीषोनुदात्तत्वं स्वाङ्गाच्चेत्यादिना विहितस्य ङीष एवास्मिन्विषयेनुदात्तत्वं वक्तव्यं, ङीब्विधाने ह्यन्यत्रापि ङीब्विषयान्ङीप्प्रसङ्गः, अपूर्वे हि ङीपि विधीयमाने प्राग्गुल्फा प्राग्जघनेति ङीब्विषयादन्यत्रापि ङीप्प्राप्नोति ङीपः प्रतिषेधाभावात्, इत्यस्मिन्पूर्वपक्षइदमाह। 'विधिप्रतिषेधविषयः सर्वोप्यपेक्ष्यतइति'। तत्र विधिविषयापेक्षायाः फलं दर्शयति। 'यत्र ङीब्विहित इति'। 'स्वरे विशेष इति'। ङीपः पित्त्वादनुदात्तत्वं भवति, ङीषस्तु प्रत्ययाद्युदात्तत्वप्रसङ्गः। 'प्राङ्मुखेति'। ङीपा मुक्ते स्वाङ्गाच्चोपसर्जनादिति ङीषपि न भवति, कथम्, उक्तमेतत्, यत्रोत्सर्गापवादौ द्वावपि विकल्पितौ तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्त्ततइति। प्रतिषेधापेक्षयाः फलं दर्शयति। 'इह न भवतीति'। एवं च कृत्वा वाक्यभेदः कर्त्तव्यः, दिक्पूर्वपदादसंयोगोपधस्वाङ्गान्ताच्चासिकाद्यन्तान्ङीष् भवति, क्रोडादिबह्वजन्तात्तु नेति अपरः कल्पः, अत्र ङीषनुवर्त्तते, तस्य दिक्पूर्वपदादिति पञ्चम्या षष्ठी प्रकल्प्यते, दिक्पूर्वपदादुत्तरस्य ङीषो ङीबादेशो भवतीत्यर्थः, तेन यत्र ङीष् तत्रैव ङीबिति सिद्धम्, एवं चोत्तरत्र ङीषेव स्वर्यतइत्युपपन्नं भवति ॥

"वाहः" ॥ 'सामर्थ्यादिति'। कर्मण्युपपदे वहेर्ण्विविधानात्केवलस्य वाहः सम्भवो नास्तीत्येतत्सामर्थ्यम्। 'दित्यौहीति'। छन्दसि सहः, वहश्चेति ण्विः, उपधावृद्धिः, ङीषि वाह ऊठ्, तत्र सम्प्रसारणमित्यनुवृत्तेः सम्प्रसारणाच्चेति पूर्वरूपत्वम्, एत्येधत्यूठ्स्विति वृद्धिः ॥

Digitized by Google

"सख्यशिश्वीति भाषायाम्" ॥ भाषायामित्युच्यते तत्रैतन्न सिध्यति सखी सप्तपदी भव, आ धेनवो धुनयन्तामशिश्वीरिति । नैष दोषः । इतिकरणोऽत्र क्रियते स भिन्नक्रमः, भाषायामित्यस्यानन्तरं द्रष्टव्यः, स च प्रकारे वर्त्तते, तेन छन्दस्यपि क्वचिद्भविष्यति, भाषाग्रहणं तु नित्यार्थम् ॥

"जातेरस्त्रीविषयादयोपधात्" ॥ अस्त्रीविषयादित्यनन्यभावे विषयशब्द इत्याह । 'न च स्त्रियामिति' । स्त्रियामेव यस्य नियमेन वृत्तिस्तत्स्त्रीविषयं ततोऽन्यदस्त्रीविषयमित्यर्थः । इह लौकिकजातिग्रहणे ब्राह्मणत्वादीनां गोत्रस्य च नाडायनादेर्जातित्वे वादिनां विप्रतिपत्तेः चरणशब्दानां च कठादीनामध्ययनक्रियासम्बन्धनिबन्धनत्वेन पाचकादिवत्क्रियाशब्दत्वेनाव्याप्तिरित्यभिमतां जातिं लक्षयति । 'आकृतिग्रहणा जातिरिति' । गृह्यतेऽनेनेति ग्रहणमिति करणसामान्ये पदं संस्क्रियते, पश्चादाकृतिशब्दसमवधाने स्त्रीत्वं प्रतीयमानं बहिरङ्गत्वात् प्रत्ययस्य निमित्तं न भवति, ग्रहणमाकृतिर्यस्या इति ग्रहणरूपोद्देशेनाकृतिरूपता विधीयते न त्वाकृतिरूपोद्देशेन ग्रहणरूपतेत्यर्थः । आकृतिः संस्थानं सा ग्रहणं यस्याः साऽऽकृतिग्रहणा, अवयवसन्निवेशविशेषव्यङ्ग्येत्यर्थः । अनेन गोत्वादिजातिर्लक्षिता, ब्राह्मणत्वादिजातिस्तु न संगृहीता भवति, ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वादिति तत्संग्रहायाह । 'लिङ्गानां चेति' । सर्वाणि लिङ्गानि न भजतीत्ययमर्थो विवक्षितः, तत्र सर्वशब्दस्य लिङ्गापेक्षत्वेपि गमकत्वाद्भजो ण्विप्रत्ययः समासश्च । लिङ्गानामिति कर्मणि षष्ठी । अप्राप्तप्रापणार्थं चेदं वचनं न त्वाकृतिग्रहणेत्यस्य सङ्कोचकं, तेन तटादेः सर्वलिङ्गत्वेपि आकृतिग्रहणत्वाज्जातित्वं भवत्येव, इह कस्मान्न भवति देवदत्तः देवदत्तेति, उपदेशापेक्षमिदं लक्षणं, कोर्थः, असर्वलिङ्गेषु येषु जातिवाचित्वमाचार्या उपदिशन्ति तेष्वेव भवतीत्यर्थः । आकृतिग्रहणाया जातेरेकत्वनित्यत्वप्रत्येकपरिसमाप्तत्वलक्षणान्धर्मानाह । 'सकृदिति' । एकस्मिन्पिण्डे सकृदुपदिष्टा ऽयं गौरिति पिण्डान्तरे निर्ग्राह्या निश्चेतुं शक्येत्यर्थः । यदि चैका न स्यान्नैव गृह्येत, तथा

नित्यत्वाभावेपि पिण्डेन सह विनाशात्पिण्डान्तरे न गृह्येत, यदि च प्रत्येकं सर्वात्मना परिसमाप्ता न स्यात् तस्मिन्नपि तावत्पिण्डे सर्वात्मना न गृह्येत यत्राख्याता किं पुनः पिण्डान्तरे, कथं पुनरेकमेव वस्तु बहुत्र युगपत्कार्त्स्न्येन वर्त्तते नहि देवदत्तस्तदानीमेव स्रुघ्ने भवति मथुरायां च, दृश्यते चेत्को दोषः, नहि दृष्टेनुपपन्नं नाम। 'गोत्रमिति'। अपत्यमित्यर्थः। चरणशब्देन शाखाध्यायिनो गृह्यन्ते, गोत्रस्यानाकृतिग्रहणत्वात् सर्वलिङ्गत्वाच्च पृथगुपादानं, नाडायनं नपुंसकमिति दर्शनात्, चरणशब्दस्त्वध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात्क्रियाशब्द एव न जातिशब्दः। 'कुक्कुटी सूकरीति'। आकृतिग्रहणाया जातेरुदाहरणं, ब्राह्मणी वृषलीत्यसर्वलिङ्गायाः, तत्र ब्राह्मणीति रूपोदाहरणं, शार्ङ्गरवादिष्वस्य पाठाद् वृषलीत्येतदेव ङीष उदाहरणम्। 'नाडायनी चारायणीति'। गोत्रलक्षणाया नडादिभ्यः फक्, अपत्यमात्रस्य ग्रहणादनन्तरापत्येपि भवति, अवन्ती कुन्तीति,इतो मनुष्यजातेरिति ङीष् भवति, इह तु कुलस्यापत्यं कुलीना ब्राह्मणीति ङीष् न भवत्यजादिषु दर्शनादित्याहुः। 'कठीति'। कठेन प्रोक्तं, वैशम्पायनान्तेवासित्वाण्णिनिः, तस्य कठचरकादिति लुक्, ततस्तदधीतइत्यण्, तस्य प्रोक्ताल्लुगिति लुक्। 'बह्वृचीति'। बह्व्य ऋचोस्या इति बहुव्रीहिः, बह्वृचश्चरणाख्यायामित्यकारः समासान्तः, कथं पुनः स्त्री नामाधीते, मा नामाधिगीष्ट तद्दृश्यत्वात्तु ताच्छब्द्यं भविष्यति यथानधीयाने माणवके। अत्रापरं जातिलक्षणमुक्तं भाष्ये॥

प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः॥

इति। सत्त्वस्य प्रादुर्भावविनाशाभ्यां या ऽऽविर्भावतिरोभावौ प्राप्नोति यावद्द्रव्यभाविनीत्यर्थः। गुणैश्च युगपद् द्रव्येण संबध्यते यथा निर्गुणं द्रव्यं न भवति तथा जातिरहितमपीत्यर्थः। बह्वर्थामिति, अर्थशब्दो विषयवाची बहुविषयां बहुव्यक्तिव्यापिनीमित्यर्थः। असर्वलिङ्गामिति, पूर्ववल्लक्षणान्तरं, तत्र यथा पूर्वलक्षणं तथा कुमारीभार्य इति

भवितव्यं, कथं, कौमारमयावद्द्रव्यभाव्यपि आकृतिग्रहणत्वाद्भवति जातिः, ततश्च जातेश्चेति पुंवद्भावप्रतिषेधः, वृद्धा स्थविरेत्यादौ च जातिलक्षणो ङीष्प्राप्नोति, यथा पुनरुत्तरं तथा कौमारादिकं जातिर्न भवति, अयावद्द्रव्यभावित्वात्, तत्र पूर्वकं लक्षणं भाष्यकारस्याभिमतं नोत्तरम्, अपर आहेत्यभिधानात् । तथा च ङ्याप्सूत्रे युवतितरेत्यत्र तसिलादिष्विति प्राप्तस्य पुंवद्भावस्य जातेश्चेति निषेध आश्रितः, अत एव वृत्तिकारेणाप्येतदेव लक्षणमुपन्यस्तमिति केचिदाहुः । एवमपि युवजानिरित्यत्र पुंवद्भावो न प्राप्नोति. तस्माद् द्वितीयमेव लक्षणं साधीयो मन्यामहे, अत एव वृद्धा स्थविरेति जातिलक्षणो ङीष्न भवति, युवतितरेत्यत्र तु भाष्यकारप्रयोगात्पुंवद्भावाभावः । 'मुण्डेति' । गुणशब्दोयम् । 'मक्षिकेति' । स्त्रियामेवायं नियतः । इह कस्मान्न भवति माला बलाकेति, मालाशब्दो मलनं माल इति घञन्तः पुंलिङ्गः, क्षेत्रविशेषे नपुंसकः, स्रजि स्त्रीलिङ्गः, बलाकाशब्दो हि बलं कायतीति यौगिकः सर्वलिङ्गः, बकजातिवचनः स्त्रीलिङ्गः, नात्र यथाकथञ्चिदस्त्रीलिङ्गविषयत्वं विवक्षितं किं तर्हि यस्मिन्प्रवृत्तिनिमित्ते स्त्रीलिङ्गस्तस्मिन्नेव निमित्ते यल्लिङ्गान्तरेपि वर्त्तते तदस्त्रीविषयं, यथा पुनरयं शब्दार्थस्तथा स्त्रियाः पुंवदित्यत्र वक्ष्यामः, तेन निमित्तभेदेन नानालिङ्गेषु नायं विधिर्भवति, यद्येवं द्रोणी कुटी पात्रीत्यत्र न प्राप्नोति, द्रोणशब्दः प्रमाणविशेषे पुलिङ्गः, गवादिन्यां तु स्त्रीलिङ्गः, कुटशब्दो घटे पुल्लिङ्गो गेहे तु स्त्रीलिङ्गः, पात्रशब्दो भाजनसामान्ये ऽर्द्धर्चादित्वादुभयलिङ्गः, भाजनविशेषे स्त्रीलिङ्गः, गौरादिपाठात्सिद्धम् । 'हयगवयेत्यादि' । गौरादिष्विदानींतनैर्हयादयः प्रक्षिप्ता इति वार्तिककारवचनाद्विज्ञायते ॥

"पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च" ॥ 'स्त्रीविषयत्वादेतेषामिति' । पूर्वत्र समानायामाकृतौ यदस्त्रीविषयमित्याश्रयणान्निमित्तभेदेन नानालिङ्गानामेषां न सिध्यतीति भावः । ओदनपाकादयः सञ्ज्ञाशब्दा यथाकथंचिद्व्युत्पाद्याः ॥

"इतो मनुष्यजातेः" ॥ 'अवन्ती कुन्तीति' । अवन्तिकुन्तिशब्दाभ्यामपत्येर्थे वृद्धेत्कोसलाजादाञ्ञ्यङ्, तस्य स्त्रियामवन्तिकुन्तिकुरुभ्यश्चेति

Digitized by Google

लुक्,। 'दाक्षी प्लाक्षीति'। अत इञ्,। 'विट् दरदिति'। विट्शब्दाज्जनपदशब्दात्क्षत्रियादञ्, दरच्छब्दाद् द्व्यञ्मगधेत्यादिनाण्, तयोरतश्चेति लुक्, उदाहरणसिध्यर्थमेवात इत्यस्यानुवृत्तिर्न शक्याऽऽश्रयितुमित्यत्रापि प्रसङ्गः। 'औदमेयीति'। उदकं मेयमस्य उदमेयः, उदकस्योदः सञ्ज्ञायामित्युदभावः, तस्यापत्यम्, अत इञ्,। 'सौतङ्गमी मौनिचित्तीति'। सुतङ्गममुनिचित्तशब्दाभ्यां तेन निर्वृत्तमित्यत्रार्थे इञ् प्रत्ययः॥

"ऊङुतः"॥ 'कुरूरिति'। कुर्वादिभ्यो ण्यः, तस्य स्त्रियामवन्तीत्यादिना लुक्। 'ब्रह्मबन्धूर्जीवबन्धूरिति'। वृत्तस्वाध्यायहीनायां ब्राह्मणजातावेतौ बहुव्रीही वर्त्तेते। 'ङकार इत्यादि'। नोधात्वोरित्युच्यमाने यवाग्वा यावाग्वै अत्राप्युदात्तयणो हल्पूर्वादिति प्राप्तस्य विभक्त्युदात्तस्य निषेधः स्यात्, वर्णग्रहणे ह्यर्थवद्ग्रहणपरिभाषा नोपतिष्ठते, अथ दीर्घोच्चारणं किमर्थं न उङुत इत्येवोच्येत, सवर्णदीर्घत्वेन सिद्धं, न सिध्यति सत्यपि सवर्णदीर्घत्वे गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्राप्नोति, न प्राप्नोति, किं कारणम्, उभयत आश्रयणे नान्तादिवत्, तथाहि। एकादेशस्यान्तवत्त्वेन प्रातिपदिकसञ्ज्ञा सम्पाद्या ऽप्रत्यय इति निषेधात्, आदिवत्त्वेन च स्त्रीप्रत्ययत्वं सम्पाद्यम्, इह तर्हि ब्रह्मबन्धूच्छत्रं षत्वतुकोरसिद्धत्वाद् ह्रस्वलक्षणो नित्यस्तुक् प्रसज्येत, दीर्घोच्चारणात्त्वेकादेशस्यासिद्धत्वेपि दीर्घ एवायमिति दीर्घात्पदान्ताद्वेति विकल्पः सिध्यति, एतदपि नास्ति प्रयोजनं, पदान्तपदाद्योरेकादेशोसिद्धः, न चैष पदान्तपदाद्योरेकादेशः, तस्मादनर्थकं दीर्घोच्चारणमित्याशङ्क्याह। 'दीर्घोच्चारणङ्कपो बाधनार्थमिति'। शेषाद्विभाषेति कपोवकाशो ऽयवको ऽव्रीहिकः, ऊङोवकाशः कुरूरिति, ब्रह्मबन्ध्वादेर्बहुव्रीहेरुभयप्रसङ्गे परत्वात्कप् प्राप्नोति, दीर्घोच्चारणाच्च भवति, कथम्, उकारद्वयं दीर्घेण निर्द्दिष्टं तत्र द्वितीय उकारः कपो बाधनार्थः। 'अध्वर्युरिति'। अध्वरं यातीति मृगय्वादयश्चेत्युणादिषु दर्शनात्कुप्रत्ययो ऽध्वरशब्दस्यान्तलोपश्च, चरणलक्षणेयं जातिः, अध्वर्युशाखाध्यायिनि वंशे भवेत्यर्थः। 'अप्राणिजातेश्चेति'। अत्रोत इति नापेक्ष्यते तेनालाबूकर्कन्धूशब्दाभ्यां दीर्घान्ताभ्यामपि भवति

Digitized by Google

कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरिति वर्त्तमाने णित्कशिपद्यर्त्तेरित्यतो णिदिति च, नञिलम्बेर्नलोपश्च, लबि अवस्रंसने, तस्मान्नञ्पूर्वादूप्रत्ययो भवति नलोपश्च, णित्त्वाद्वृद्धिः, अन्दूदृम्भूकर्कन्धूरिति निपातनादूकारान्तः कर्कन्धूशब्दः, एवमलाबूकर्कन्धूशब्दौ दीर्घान्तौ, ऊङ्विधानमलाब्वा कर्कन्ध्वा इत्यादौ नोङ्धात्वोरिति विभक्त्युदात्तत्वप्रतिषेधार्थम् । 'कृक-वाकुरिति' । कृके वचः कश्च, कृकशब्दउपपदे वचेर्धातोरुण् प्रत्ययो भवति कश्चान्तादेशः । 'रज्जुरिति' । सृजेरसुम् च, आदिलोपः प्रकृतः, सृजेरुप्रत्यय आदेश्च लोपोऽसुगागमश्च, ऋतो यणादेशः, सकारस्य जश्त्व-चर्त्वे, सृज्यतेसौ रज्जुरिति । 'हनुरिति' । युष्विहित्यादिना हन्तेरुप्रत्ययः ॥

"पङ्गोश्च" ॥ 'श्वशुरस्येति' । पुंयोगलक्षणस्य ङीषो ऽपवाद ऊङ् विधीयते, शावशेराप्तौ, शुशब्दे ऽश्नोतेरुरन् प्रत्ययो भवति, किमिदं शुरिति, आशुशब्दस्यायमादिलोपो निपातितः, आश्वाप्तव्यः श्वशुरः, तस्य स्त्री श्वश्रूः, श्वशुरः श्वश्चेत्यादिनिपातनाद्विभक्त्यादि प्रातिपदिक-कार्यं भवति ॥

"ऊरूत्तरपदादौपम्ये" ॥ उपमीयतेनयेत्युपमा तद्भाव औपम्यं, कथं विचक्रे च करेणुकरोरुभिरिति, निरङ्कुशाः कवयः, करेण वरोरुभिरिति पाठः । करेण विचक्रे वरोरुभिरिति ॥

"संहितशफलक्षणवामादेश्च" ॥ संहितशब्दः सहितपर्यायः लक्षणशब्दो ऽर्शआद्यच्प्रत्ययान्तः, वामशब्दः शोभनपर्यायः । 'सहित-सहाभ्यां चेति' । समो वा हिततयोरिति मलोपे सति यः सहित-शब्दस्तस्य संहितग्रहणेनैव सिद्धम्, एकदेशविकृतस्यानन्यत्वात्, यस्तु सह हितेन वर्त्ततइति व्युत्पन्नः सहितशब्दस्तस्येदं ग्रहणमित्याहुः । 'सहोरूरिति' । सहेते इति सहौ, तादृशावूरू यस्या इत्यर्थः । विद्यमा-नस्य वा सहशब्दस्य ऊर्वतिशयप्रतिपादनायप्रयोगः ॥

"कद्रुकमण्डल्वोश्छन्दसि" ॥ गुग्गुल्वादीनां छन्दसि, व्यत्य-येन स्त्रीत्वं, पतयालुशब्दः स्पृहिगृहीत्यादिना ऽऽलुजन्तः ॥

"शाङ्गरवाद्यञो ङीन्" ॥ 'एते णान्ता इति' । शङ्गरुकपटु-

गुग्गुलुब्रह्मद्वित्येभ्यः प्राग्दीव्यतोऽण्, गोतमशब्दादृष्यण्, गौरादिष्वप्ययं पठितः। 'एते ढगन्ता इति'। बाहुल्यादेवमुक्तं, कमण्डलुशब्दाच्चतुष्पाद्भ्यो ढञ्, इतरेभ्यस्तु शुभ्रादिलक्षणो ढक्। 'एतौ फगन्ताविति'। वात्स्यशब्दाद्गर्गादियञन्ताद्यूनि यञिञोश्चेति फक्। ननु न स्त्रियां युवसञ्ज्ञा गोत्राद्यून्यस्त्रियामिति वचनात्, गोत्रे चैको गोत्रइति नियमः, एवं तर्हि वात्स्यायनशब्दस्यास्मिन् गणे पाठसामर्थ्यात्स्त्रियां युवसञ्ज्ञा भविष्यति, गोत्रएव वा प्रत्ययद्वयं, मुञ्जशब्दो नडादिः। 'जातिरिति'। गोत्रलक्षणा। 'ढगन्त इति'। कीकसाशब्दः शुभ्रादिः,। '[1]ञ्यङन्ताविति'। वृद्धेत्कोसलाजादाञ्ञ्यङिति कविशिविभ्यां ञ्यङ्, यङश्चाबत्र प्राप्नोति। 'एहि पर्येहीति'। इह चेष्टायां आङ्पूर्वात्पर्याङ्पूर्वाच्च सर्वधातुभ्य इनितीन् प्रत्ययः, अश्मरथशब्दो गर्गादिः, उदपानशब्दः शुण्डिकादिरुत्सादिश्च, तत्राह। 'शुण्डिकाद्यणन्तः प्रयोजयतीति'। अन्ते तु ङीपो ङीनो वा नास्ति विशेषः। 'जातिरिति'। अरालचण्डालयोरसर्वलिङ्गत्वाज्जातित्वं, वतण्डशब्दस्य गोत्रत्वात्, वतण्डस्यापत्यं स्त्री वतण्डाच्चेति यञ्, लुक् स्त्रियामिति तस्य लुक्। 'भोगवद्गौरिमतोरिति'। मत्वन्तत्वादुगितश्चेति ङीपि प्राप्ते वचनं, ननु भोगशब्दो घञन्तः, गौरिशब्दोत इञितीञन्तः, तौ ञित्स्वरेणाद्युदात्तौ, ताभ्यां मतुप्, पित्त्वादनुदात्तः, ततश्च न ङीम्ङीनोरत्रास्ति विशेषस्तत्राह। 'घादिषु नित्यमिति'। उगिल्लक्षणे ङीपि सति नद्याः शेषस्यान्यतरस्याम्, उगितश्चेति विकल्पेन ह्रस्वत्वं स्यात्,ङीनि तु सति घरूपकल्पेति नित्यं सम्भवति, कथं भवति, यावता उगितः परा या नदी तस्या विकल्पो विहितः, ङीनपि चोगितः परा नदी, भोगवद्गौरिमतोरुगित्त्वात्। नैष दोषः। उगितश्चेतीत्यर्थेयं चशब्दः, उगित इत्येवमुगित्संशब्दनेन या नदी विहिता न चानेन विहिता ङीनेव विहिता नदी भवति, यथा तु युवोरनाकावित्यत्र भाष्यं तथोगितः परा या नदीत्येतदेव स्थितं, सञ्ज्ञाया अन्यत्र ङीबेव भवति ह्रस्वश्च विकल्पितः। 'नृनरयोर्वृद्धिश्चेति'।

[1] यञञाविति मुद्रितमूलपुस्तके उपलभ्यमानः पाठः पदमञ्जर्यसंमतः।

Digitized by Google

नृशब्दादृवेभ्यो ङीपि नरशब्दाज्जातिलक्षणे ङीपि प्राप्ते वचनम् । 'वृद्धिश्चेति' । वक्ष्यामीति च अन्यतरस्यग्रहणेपि नारीतीष्टं सिद्धमन्यतरस्यानिष्टनिवृत्त्यर्थं तु द्वयोरुपादानं, तत्र नरशब्दे ऽन्त्यस्य वृद्धौ सत्यां यस्येतिलोपादानर्थक्यमिति, यस्येति लोपस्तावद्भवति तत्र कृते रेफस्य वृद्धिः प्राप्नोति, का, ऽविशेषात्पर्यायेण सर्वैव, नैष दोषः । स्थानेन्तरतम इत्यत्रान्तरतमे स्थाने षष्ठीत्यपि पक्षो व्याख्यातः, ततो नृनरयोरिति येयं षष्ठी सा वृद्धेरन्तरतमे नृनरावयवे स्थानिन्यनुसंह्रियते, यत्र च षष्ठी तत्रादेश इत्यकारस्यैव भविष्यति, अत्र पुत्रशब्दं केचित्पठन्ति न स केवलः स्त्रियां वर्त्तत इति तदन्तस्य समासस्य ग्रहणं, तत्रापि बहुपुत्रा ऽतिपुत्रेत्यादावनुपसर्जनाधिकाराद्व भवति, क्क तर्हि भवति, पुत्रप्रधाने, ननु पुत्रप्रधाने समासे सैव पुंल्लिङ्गता, सत्यं,सूतोग्रराजभोजमेरुभ्यो दुहितुः पुत्रड्ति वार्त्तिककारेण यत्र पुत्रडादेशो विहितस्तान्युदाहरणानि, सूतपुत्री, राजपुत्रीति, अत्र स्वभात्पुत्रशब्दो दुहितृशब्देन समानार्थो न पुत्रडादेश इति पठतामभिप्रायः । अन्ये तु प्रद्योतपुत्री शैलपुत्रीति वार्त्तिकविषयादन्यदेव ङीन उदाहरणं, पुत्रडादेशस्तु ङीपि स्वरार्थ इति मन्यन्ते, नात्राप्तभाषितमस्ति ॥

"यङश्चाप्" ॥ यकारो ङ्याप्प्रातिपदिकादित्यत्र सामान्यग्रहणार्थः, स्वरस्तु परत्वाच्चित्स्वर एव भवति । 'ष्यङः ष्यङश्च सामान्यग्रहणमिति' । यद्यपि ष्यङ् स्त्रियामेव विधीयते तथापि ङित्करणसामर्थ्यात्तस्याप्यत्र ग्रहणमिति भावः । 'आम्बष्ठ्येत्यादि' । आम्बष्ठादिभ्योपत्ये वृद्धेत्कोसलाजादाञ्ञ्यङ् । 'कारीषगन्ध्येति' । स्वादिसूत्रे व्युत्पादितम् । वराहशब्दादत इञ्,शर्करात्तपूतिमाषगोकक्षशब्दा गर्गादयः । ननु च गौकाक्ष्यशब्दः क्रौड्यादिषु पठ्यते, ततः ष्यङि यङ इत्येव चाप् सिद्धः, मा पाठि तत्र षाच्च यञ इत्यनेनैव शर्कराक्ष्यादिवद् गौकाक्ष्येति सिद्धं, यद्येवं गौकाक्षीपुत्रः ष्यङः सम्प्रसारणं न प्राप्नोति, नात्र सम्प्रसारणमिष्यते, गौकाक्ष्यापुत्र इत्येव भवति, एवं हि सौनागाः पठन्ति ष्यङः सम्प्रसारणे गौकाक्षायाः प्रतिषेधः ॥

Digitized by Google

"तद्धिताः" ॥ 'युवतिरिति'। तद्धितसञ्ज्ञायां सत्यां कृत्तद्धितसमासाश्चेति प्रातिपदिकसञ्ज्ञा भवति। 'बहुवचनमित्यादि'। प्रत्यय इत्यादिवदेकवचनएव कर्त्तव्ये बहुवचनेन सञ्ज्ञिनां बहुत्वसूचनादनुक्तोपि तद्धितः परिगृह्यतइति मन्यते, स्त्रीप्रत्ययानामादितस्तद्धिताधिकारे क्रियमाणे प्राचां ष्फ तद्धित इत्यत्र तद्धितग्रहणं न कर्त्तव्यं यस्येति चेत्यत्र चकारग्रहणं ङ्याप्प्रातिपदिकादित्यत्र तु तदन्तात्तद्धितविधानार्थं ङ्याब्ग्रहणं कर्त्तव्यमेव, सत्य,ङीबादीनां ङकारस्येत्सञ्ज्ञा न स्यादतद्धितइति प्रतिषेधात्, सत्यामपि वा पट्वीत्यादावोर्गुणः स्यात्तस्माद्यथान्यासमेवास्तु ॥

"यूनस्तिः" ॥ 'युवतिरिति'। त्यन्तादितो मनुष्यजातेरिति ङीष्न भवति तिप्रत्ययेनैव स्त्रीत्वस्योक्तत्वात्, यौवनस्य वा ऽजातित्वात् ॥

"अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे" ॥ इह सम्भवे व्यभिचारे च सति विशेषणविशेष्यभावो भवति, तेन गोत्रे ऽनार्षयोरिति चाणिञ्मात्रस्य विशेषणं गुरूपोत्तमयोरित्येतत्तदन्तस्य, तदाह। 'गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोरिति'। यद्यप्यपत्याधिकारादन्यत्र लौकिकस्य गोत्रस्य ग्रहणं तथाप्यत्र पारिभाषिकस्य ग्रहणं, लौकिकग्रहणस्यानार्षयोरिति पर्युदासाश्रयणेनैव सिद्धत्वात्, इहायं ष्यङ् प्रत्ययो वा स्यादादेशो वा, प्रत्ययविधावपि हि गापोष्टगित्यादौ षष्ठीदर्शनात्, उत्तरत्र क्रौड्यादिभ्यश्चेति पञ्चमीनिर्द्देशाच्च प्रत्ययपक्षोपि सम्भवत्येव, तत्राद्यपक्षे उदमेघस्यापत्यं स्त्री, अत इञ्, औदमेघि इति स्थिते तदन्तात् ष्यङि विहिते औदमेघ्यायाश्छात्रा औदमेघाश्छात्राः, औदमेघ्यानां सङ्घ औदमेघः सङ्घः, इञश्च सङ्घाङ्कलक्षणइति च इञन्ताद्विधीयमानोण् न स्यात्, अथापि लिङ्गविशिष्टपरिभाषया इञन्ताद्विधीयमानोण् ष्यङन्तादपि स्यात्, एवमप्यापत्यस्य च तद्धितेनातीति यलोपो न स्यात्, ष्यङोनापत्यत्वात्, नैष दोषः। भस्याढे तद्धितइति पुंवद्भावात्प्रागेवाण उत्पत्तेः ष्यङ्निवर्त्तते, तस्मिन्निवृत्ते इञ इत्यण् भविष्यति, यकारस्य च श्रवणं न भविष्यति, इह तर्ह्यौदमे-

Digitized by Google

इत्युक्तं न तु स्पन्दनात्मकत्वात् क्रियान्तरव्यावर्तकस्वभावविशेषश्चेति व्यावर्तकस्वभावः स्वयम्प्रकाशत्वं क्रियान्तराणि हि जडरूपाणि लिङ्गसङ्ख्यादय इति ज्ञानज्ञप्त्यादिशब्दानां लिङ्गस्य शब्दसाधुत्वमात्रार्थत्वेऽपि देवेश्वरपुरुषोत्तमादिशब्दानां लिङ्गस्यार्थवत्त्वात् लिङ्गसंख्यादय इत्युक्तं, स्वयंप्रकाशत्वसिद्धिरपि सविशेषत्वादेवेत्याह स्वतः सिद्धावपीति, एतत्स्वभावविशेषविरहे–सकर्म्मकत्वसकर्तृकत्वविरहे, सिद्धिरेव–प्रमाणमेव न स्यादित्यर्थः कुत इत्यत्राह अन्यसाधनस्वभावतयेति, ज्ञातुर्विषयव्यवहारहेतुतया हि स्वयंप्रकाशत्वं त्वया साधितमित्यर्थः। स्वसम्बन्धादर्थान्तरे तद्व्यवहारहेतुत्वं हि स्वयं प्रकाशत्वानुमानहेतुः। एवं निर्विशेषत्वे स्वयंप्रकाशत्वानुपपत्तिरुक्ता। निर्विशेषत्वे आच्छादिकाऽविद्यानिवृत्त्यनुपपत्तिमाह ब्रह्मस्वरूपमित्यादिना, कृत्स्नं–ज्ञात*व्यविशेषरहितम्। असम्भवः कथमित्यत्राह न हीति, कृत्स्नावभासेऽध्यासायोगात् अनवभासमानांशः स्वीकार्य इत्यर्थः।

अत एव हि भवद्भिराच्छादिकाऽविद्याभ्युपगम्यते ततश्च शास्त्रीयनिवर्तकज्ञानस्य ब्रह्मणि तिरोहितांशो विषयः। अन्यथा तस्य निवर्त्तकत्वं च न स्यात्। अधिष्ठानातिरेकिरज्जुत्वप्रकाशनेन हि सर्पत्वं बाध्यते। एकश्चेद्विशेषो ज्ञानमात्रे वस्तुनि शब्देनाभिधीयते स च ब्रह्मविशेषणं भवतीति सर्वश्रुतिप्रतिपादितसर्वविशेषणविशिष्टं ब्रह्म भवति, अतः प्रामाणिकानां न केनापि प्रकारेण निर्विशेषवस्तुसिद्धिः। निर्विकल्पकप्रत्यक्षेऽपि सविशेषमेव वस्तु प्रतीयते, अन्यथा सविकल्पके सोऽयमिति पूर्व्वावगतप्रकारविशिष्टप्रत्ययानुपपत्तेः, वस्तुसंस्थानविशेषरूपत्वाद्गोत्वादेर्निर्विकल्प-

* ज्ञातव्यावशेषरहितमिति पा०।

कदशायामपि ससंस्थानमेव वस्त्वित्यमिति प्रतीयते । द्वितीयादिप्रत्ययेषु तस्यैव संस्थानविशेषस्यानेकवस्तुनिष्ठतामात्रं प्रतीयते संस्थानरूपप्रकाराख्यस्य पदार्थस्यानेकवस्तुनिष्ठतयाऽनेकवस्तुविशेषणत्वं द्वितीयादिप्रत्ययावगम्यमिति द्वितीयादिप्रत्ययास्सविकल्पका इत्युच्यन्ते । अत एवैकस्य पदार्थस्य भिन्नाभिन्नरूपेण द्व्यात्मकत्वं विरुद्धं प्रत्युक्तं, संस्थानस्य संस्थानिनः प्रकारतया पदार्थान्तरत्वं प्रकारत्वादेव पृथक्सिद्ध्यनर्हत्वं पृथगनुपलम्भश्चेति न द्व्यात्मकत्वसिद्धिः ।

अत एवेति अत एव—अज्ञातांशसम्भवादेव, न ह्याच्छाद्याभावे आच्छादनमुपपद्यते, तस्मादज्ञातांशो ऽभ्युगन्तव्य इत्यर्थः । ततश्चेति, न हि पुरोवर्तिमात्रविषयमिदमिति ज्ञानं भ्रमनिवर्तकम् अपि त्वज्ञातशुक्त्यंशविषयज्ञानमेव भ्रमनिवर्तकं, तस्माद्ब्रह्मणि पूर्वमज्ञातांशसम्भव एव निवर्तकज्ञानस्य निवर्तकत्वमित्यर्थः । तिरोधाननिवृत्तिसिद्ध्यर्थमेकविशेषाभ्युपगतिं शङ्कते एकश्चेदिति, स च ब्रह्मविशेषणं भवति इति,उपलक्षणत्वव्यावृत्त्यर्थं विशेषण—शब्दः, ज्ञाप्यत्वसिद्ध्ये ब्रह्मगताध्यासनिवर्तकत्वसिद्ध्ये च विशेषणमित्युक्तं, न ह्यन्यगतधर्मज्ञानेनान्यविषयभ्रमनिवृत्तिः पुरोवर्तिगतशुक्तित्वधर्मज्ञानेनैव हि तद्गतरूप्यत्वभ्रमनिवृत्तिरित्यभिप्रायः । अत इति स्पष्टम् । अथ निर्विकल्पकप्रत्यक्षस्य निर्विशेषविषयत्वमाशङ्क्य व्युदस्यति निर्विकल्पप्रत्यक्षेऽपीत्यादिना, बौद्धादयःसर्वविशेषशून्यविषयं निर्विकल्पकमाचक्षते तदयुक्तं योग्यानुपलम्भनिरस्तत्वात् यत्किञ्चिदपि वस्तु कतिपयव्यावृत्तं प्रतीयते, सर्वस्माद् व्यावृत्तं वा प्रतीयते इति तेनाकारेण सविशेषत्वान्न सर्वविशेषशून्यत्वं जातिगुणद्रव्यादीनामन्योन्यसम्बन्धं विना पृथक्पृथगुपलम्भो निर्विकल्पकप्रत्यक्षमिति केचिदाचक्षते तच्च योग्यानुपलम्भनिरस्तं, कल्प्यते चेत् तत्र कोहेतुः दण्डदेवदत्तादिषु

विशेषणविशेष्ययोः पृथगुपलम्भपूर्वकसहोपलम्भदर्शनादिति चेत् तत्किं सम्बन्धवेलायामुतासम्बन्धवेलायाम्, असम्बन्धवेलायां पृथग्ग्रहणमसम्बन्धप्रयुक्तं न विशेषणविशेष्यभावप्रयुक्तं, सम्बन्धवेलायां तु विशेषणविशेष्यभावेनैव ग्रहणं,-तस्मान्नियमेन सम्बन्धिनां जातिव्यक्त्यादीनामसम्बन्धप्रयुक्तं पृथग् ग्रहणं नास्ति। नियमेन सम्बन्धेऽपि गन्धस्य पृथिव्यादिषु पृथगुपलम्भ इति चेत् तद्भिन्नसामग्रीवेद्यत्वान्न तु विशेषणविशेष्यभावात्, तस्माज्जातिव्यक्त्यादेरेकसामग्रीवेद्यत्वे सति सम्बन्धनियमान्न पृथग् ग्रहणमुपपद्यत इति विशिष्टविषयमेव प्रत्यक्षं, तस्मात्प्रथमपिण्डग्रहणं निर्विकल्पकं द्वितीयादिपिण्डग्रहणं सविकल्पकमित्यस्यार्थस्य सिद्धवत्कारेण निर्विकल्पकस्य सविशेषविषयतां दर्शयति निर्विकल्पकेत्यादिना, कुतः सविशेषविषयत्वमित्यत्राह अन्ययेति, प्रथमपिण्डग्रहणेऽनुवृत्त्यग्रहणाद्गोत्वादिग्रहणं नोपपद्यत इत्यत्राह वस्तुसंस्थानेति, न ह्यनुवृत्तिर्जातिरपि तु अनुवृत्तैव जातिरनुवृत्ता जातिर्नानुवृत्तिरिति हि पञ्चिकाकारः, तस्मादनुवृत्त्यग्रहणेऽपि इदमित्थमिति ग्रहणे इत्थमंशो गोत्वादिर्गृहीत एव। अनेकव्यक्तिसम्बन्धरूपानुवृत्त्यग्रहणमनेकव्यक्तिग्रहणरूपसामग्र्यभावात्। तस्मान्निर्विकल्पकं सविशेषविषयमित्यर्थः। निर्विकल्पकेऽपि गोत्वादिर्गृह्यते चेत् निर्विकल्पकसविकल्पकयोः को विशेषः कतिपयविशेषग्रहणं कतिपयविशेषाग्रहणं च उभयत्र तुल्यमित्यत्राह द्वितीयादिप्रत्ययेष्विति, अनेकवस्तुनिष्ठता नाम तत्तद्वस्तुसंस्थानसादृश्यं प्रथमपिण्डग्रहणस्य द्वितीयादिपिण्डग्रहणस्य च निर्विकल्पसविकल्पशब्दौ कथं वाचकावित्यत्राह संस्थानरूपेति, संस्कारप्रमोषवता पुरुषेण द्वितीयादिग्रहणेऽपि नानुवृत्तिग्रहणमिति चेन्न द्वितीयादित्वेन ग्रहणं द्वितीयादिग्रहणं विवक्षितं तस्मान्न दोषः संस्कारसचिवत्वतद्रहितत्वसामग्रीभेदेनानुवृत्तिधर्म्मविशिष्टत्वतद्रहितत्वग्राह्यभेदेन च सविकल्पकनिर्विकल्पयोर्वैषम्यमित्यभिप्रायः। प्रसङ्गाद्भेदाभेदं व्युदस्यति अत एवेत्यादिना,एकस्य द्व्यात्मकत्वं चेन्न विरुद्धम् अपि तु भिन्नाभिन्नरूपेण द्व्यात्मकत्वं विरुद्धमित्यर्थः। अत एवेत्यत्र गर्भितमर्थं विवृणोति संस्थानस्येति, भेदाभेदे चत्वारो हेतवः सहोपलम्भ-

Digitized by Google

नियमः, सामानाधिकरण्यप्रत्ययः, एकशब्दानुविद्धप्रत्ययः, प्रथमपिण्डग्रहणे भेदकाकाराग्रहणादभेदप्रतिपत्तिश्चेति, एते परिह्रियन्ते संस्थानस्येत्यादिना, प्रकारत्वादेव—नियतप्रकारत्वादित्यर्थः । अपृथक्सिद्धधर्म्मत्वात्पृथक्प्रतिपत्त्यनर्हत्वमिति यावत् तत्कृतः पृथगनुपलम्भः, सहोपलम्भनियमस्तावत्संप्रतिपन्नैक्येषु भिन्नेषु च न दृष्टः, तत्र सहभावो भेदसाधकः द्वयोरेव हि सहभावः नियमांशस्तु नोभयत्र । किञ्च भेदसाधकसहभावस्य नियमो भेदनियमसाधकः एकसामग्रीवेद्यत्वे सति पृथक्स्थितेः अपृथक्स्थितत्वे सति भिन्नसामग्रीवेद्यत्वाद्वा सहोपलम्भनियमाभावः । अत्र त्वपृथक्स्थितत्वे सत्येकसामग्रीवेद्यत्वात्सहोपलम्भनियमः न त्वभेदात्, मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यमप्यपृथक्सिद्धप्रकारत्वादेवोपपद्यते, एकशब्दानुविद्धप्रत्ययोऽपि धर्म्यैकत्वान्न तु धर्म्मधर्म्मिणोरैक्यात् इति हेतुत्रयपरिहारः । प्रकारत्वादेवेत्यादिनाऽभिप्रेतः प्रथमपिण्डग्रहणे भेदाग्रहः संस्थानस्येत्यादिना परिहृतः । कथमुच्यते व्यावृत्त्यनुवृत्त्यग्रहेण हि भेदाग्रह उच्यते न केवलं व्यावृत्त्यनुवृत्ती एव भेदकधर्म्मौ विशेषणविशेष्यभावोऽपि भेदकः प्रथमपिण्डग्रहणेऽपीदमित्थमिति विशेषणविशेष्यभावेनैव ग्रहणाद्भेदोऽपि गृहीत एवेति ।

अपि च निर्विशेषवस्तुवादिना स्वयम्प्रकाशे वस्तुनि तदुपरागविशेषाः शब्दैः सर्वैर्निरस्यन्त इति वदता के ते शब्दा निषेधका इति वक्तव्यं, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति विकारनामधेययोर्वाचारम्भणमात्रत्वात् यत्तत्र कारणतयोपलक्ष्यते वस्तुमात्रं तदेव सत्यमन्यदसत्यमितीयं श्रुतिर्वदतीति चेत् नैतदुपपद्यते एकस्मिन् विज्ञाते सर्वं विज्ञातं भवतीति प्रतिज्ञाते अन्यज्ञानेनान्यज्ञानासम्भवं मन्वानस्यैकमेव वस्तु विकारा-

द्व्यवस्थाविशेषेण पारमार्थिकेनैव नानारूपमवस्थितं चेत् तत्रैकस्मिन् विज्ञाते तस्माद्विलक्षणसंस्थानान्तरमपि तदेव वस्त्विति तत्र दृष्टान्तोऽयं निदर्शितः नात्र कस्यचिद्विशेषस्य निषेधकः कोऽपि शब्दो दृश्यते वाचारम्भणमिति वाचा व्यवहारेण आरभ्यत इति आरम्भणं पिण्डरूपेणावस्थिताया मृत्तिकाया नाम चान्यत् व्यवहारश्चान्यः घटशरावादिरूपेणावस्थितायास्तस्या एव मृत्तिकाया अन्यानि नामधेयानि व्यवहाराश्चान्यादृशाः तथाऽपि सर्वत्र मृत्तिकाद्रव्यमेकमेव नानासंस्थाननानानामधेयाभ्यां नानाव्यवहारेणारभ्यत इत्येतदेव सत्यमित्यनेनान्यज्ञानेनान्यज्ञानसम्भवो निदर्शितः । नात्र किञ्चिद्वस्तु निषिध्यत इति पूर्व्वमेवायमर्थः प्रपञ्चितः ।

एवं प्रसङ्गाद्भेदाभेदनिरासः कृतः । पूर्वप्रस्तुतं हि वेदान्तवाक्यानां भेदनिरासपरत्वं तत्र वेदान्तवाक्यानां भेदनिरासपरत्वेऽपि केनचिच्छब्देन ब्रह्मणो निर्देश्यत्वात्स्वयंप्रकाशत्वात्तिरोधानादध्यासतन्निवृत्तिभ्यां च सविशेषत्वमुक्तमत्र वेदान्तवाक्यानां भेदनिरासपरत्वमेवानुपपन्नमित्युच्यते अपि चेत्यादिना, तदुपरागविशेषाः—तदारोपितविशेषाः । के ते शब्दा निषेधका इति चोद्ये उत्तरं वक्तव्यं तत्त्वशक्यमेवेत्यर्थः । पूर्वं निर्विशेषपरत्वनिरासाय सद्विद्या व्याख्याता इदानीं तस्या भेदनिरासपरत्वमाशङ्क्य निराक्रियते वाचेत्यादिना, वाचारम्भणमात्रत्वात्—वागालम्बनमात्रत्वात्, व्यावहारिकत्वादपारमार्थिकत्वादित्यर्थः । यत्तत्र कारणतयोपलक्ष्यते वस्तुमात्रमिति कार्येष्वनुवर्तमानं कारणं सन्मात्रं यद्वस्तु तदेवेत्यर्थः । शङ्कितमर्थं दूषयति नैतदित्यादिना, वाचारम्भणमिति वा-

क्यस्यार्थः पूर्वापरसङ्गतो वाच्यः स च त्वन्मते नोपपद्यत इति वक्तुं पूर्वोक्तां शङ्कामनुवदति एकस्मिन्नित्यादिना, विकाराद्यवस्थाविशेषेणेति विकारः कार्य्यावस्था आदिशब्देन कारणावस्था विवक्षिता नानारूपं नानावस्थं वाचारम्भणमिति पदस्यास्पष्टार्थत्वात्तद्व्याचष्टे वाचेति, कर्म्मणि ल्युडित्यर्थः व्यवहारेणेति प्रयोजनतया हेतुत्वमित्यर्थः। नामभेदात्कार्यभेदाच्च वैशेषिकोक्तं द्रव्यान्तरत्वमाशङ्क्य तच्च परिहरन् वाक्यार्थं योजयति पिण्डरूपेणेत्यादिना, पूर्वं हि फलितार्थ उक्तः। अत्रान्वयार्थ उच्यते नानासंस्थाननानानामधेयाभ्यामिति अन्वितमित्यर्थः । इत्थम्भावे तृतीया कर्तरि वा ताभ्यामारभ्यते आलभ्यते सम्बध्यत इत्यर्थः रलयोरविशेषः प्रसिद्धः आलम्भःस्पर्शहिंसयोरिति नैघण्टुकाः। व्यवहारेण चेति पाठे नानासंस्थाननामधेयव्यवहारैरित्थंभूतमिति वा तैः सम्बध्यत इति वार्थः । भेदनिरासपरत्वे दूषणान्तरमाह–

अपि च येनाश्रुतं श्रुतमित्यादिना ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वं प्रतिज्ञातं चेद्यथा सोम्यैकेन मृत्पिण्डेनेत्यादिदृष्टान्तः साध्यविकलः स्यात्। रज्जुसर्पादिवन्मृत्तिकाविकारस्य घटशरावादेरसत्यत्वं श्वेतकेतोः शुश्रूषोः प्रमाणान्तरेण युक्त्या चासिद्धमिति एतदपिसिषाधयिषितमिति चेत् यथेति दृष्टान्ततयोपादानं न घटते, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यत्र सदेवैकमेवेत्यवधारणद्वयेनाद्वितीयमित्यनेन च सन्मात्रातिरेकिसजातीयविजातीयसर्वे विशेषा निषिद्धा इति प्रतीयते इति चेत् नैतदेवं कार्यकारणभावावस्थाद्वयावस्थितस्यैकस्य वस्तुनः एकावस्थावस्थितस्य ज्ञानेनावस्थान्तरावस्थितस्यापि वस्त्वै-

Digitized by Google

क्येन ज्ञाततां दृष्टान्तेन दर्शयित्वा श्वेतकेतोरप्रज्ञातं सर्वस्य ब्रह्मकारणत्वं च वक्तुं सदेव सोम्येदमित्यारब्धम्, इदमग्रे सदेवासीदिति अग्र इति कालविशेषः इदं-शब्दवाच्यस्य प्रपञ्चस्य सदापत्तिरूपां क्रियां सद्द्रव्यतां च वदति, एकमेवेति चास्य नानानामरूपविकारप्रहाणम् ।

अपि चेति, प्रमाणान्तरेण युक्त्या चेति प्रत्यक्षेण बाधादर्शनान्मिथ्यात्वासिद्धिः । व्यावर्तमानत्वादियुक्तेराभासत्वाच्च न मिथ्यात्वसिद्धिरिति भावः । एतदित्यादिस्पष्टं सदेवेत्यादिवाक्यस्य भेदनिरासपरत्वमाशङ्क्य दूषयति सदेवेत्यादिना, सर्व इत्यनेन स्वगतभेदा विवक्षिताः तेषामपि विजातीयभेदान्तर्गतत्वात् नैतदिति दृष्टान्तवाक्यानुगुण एव दार्ष्टान्तिकवाक्यस्यार्थो वर्णनीय इत्यभिप्रायेण दृष्टान्तवाक्यस्यार्थमनुवदति कार्यकारणेत्यादिना, सदेवेत्यादिवाक्ये तत्तत्पदोपस्थापितानेकविशेषान् दर्शयितुं विशेषोपस्थापकपदान्युपादत्ते इदमग्रे सदेवासीदिति, नायमन्वयक्रमः सदेवेदमग्रएकमेवासीदिति समन्वयः तस्मात्फलितान्विशेषान् वक्तुं तदुपस्थापकपदान्युपात्तानि । उपस्थापितविशेषानाह अग्र इतीति, सदापत्तिरूपां क्रियामित्यनेनासीदिति पदस्यार्थ उक्तः । सच्छब्दार्थमाह सद्द्रव्यतां चेति, सदेव चेत्तदानीं कोविशेष इत्यत्राह–

एतस्मिन्नपपादिते अस्य जगतस्सदुपादानता प्रतिपादिता भवति । अन्यत्रोपादानकारणस्य स्वव्यतिरिक्ताधिष्ठात्रपेक्षादर्शनेऽपि सर्वविलक्षणत्वादस्य सर्वज्ञस्य ब्रह्मणः सर्वशक्तियोगो न विरुद्ध इति अद्वितीयपदमधिष्ठात्रन्तरं वारयति सर्वशक्तियुक्तत्वादेव ब्रह्मणः काश्चन श्रुतयः प्रथममुपादा-

Digitized by Google

नकारणत्वं प्रतिपाद्य निमित्तकारणमपि तदेवेति प्रतिपादयन्ति यथेयं श्रुतिः अन्याश्च श्रुतयो ब्रह्मणो निमित्तकारणत्वमनुज्ञाय अस्यैवोपादानतादि कथमिति परिचोद्य सर्वशक्तियुक्तत्वादुपादानकारणं तदितराशेषोपकरणं च ब्रह्मैवेति परिहरन्ति किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारयन् ब्रह्मवनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा विब्रवीमि वः ब्रह्माध्यतिष्ठद् भुवनानि धारयन्निति सामान्यतो दृष्टेन विरोधमाशङ्क्य ब्रह्मणः सर्वविलक्षणत्वेन परिहार उक्तः ।

एकमेवेति, एतस्मिन् प्रतिपादिते विभक्तनामरूपत्वेन भविष्यतोऽविभक्तनामरूपत्वे प्रतिपादिते भाव्यवस्थाविशेषवतः प्रागवस्थायोग उपादानत्वमिति लक्षणादुपादानत्वं प्रतिपादितं भवतीत्यर्थः । अद्वितीयपदं व्याचष्टे अन्यत्रेति, सर्वविलक्षणत्वादिति विलक्षणधर्मित्वाद्विलक्षणधर्मयोग उपपन्नः, यथा जलादिविलक्षणधर्मित्वादग्नेरुष्णत्वधर्मयोग इत्यर्थः । ब्रह्मणश्चेतनत्वात्प्रथमं निमित्ततां प्रतिपाद्य पश्चादुपादानान्तरनिषेधः कार्यः तस्मात्प्रथममेवोपादानत्वप्रतिपादनमनन्तरं निमित्तान्तरनिषेधश्च नोपपद्यते तस्मादस्य वाक्यस्य नायमर्थ इति शङ्कायामाह सर्वशक्तीति, असद्वा इदमग्र आसीत्ततो वै सदजायत तदात्मानं स्वयमकुरुतेति वाक्यं सर्वशक्तियुक्तत्वादेवेत्यादिग्रन्थे हृदि निहितं किं स्विद्वनमित्यादिवाक्यकटाक्षेणाह निमित्तकारणतामनुज्ञायेति, अन्याश्चेति, अध्यतिष्ठद् भुवनानि धारयन्नित्यस्यार्थोऽभिप्रेतः अयमर्थः जगदुपक्रमेण ब्रह्मप्रतिपादयन्त्यः श्रुतय उपा-

दानत्वपूर्वकं निमित्ततां वदन्तीति ब्रह्मोपक्रमेण तत्प्रतिपादयन्त्यः श्रुतयो ब्रह्मणश्चेतनत्वेन निमित्तत्वपूर्वकमुपादानतां वदन्तीति किंस्विद्वनमित्यादि वनशब्देनाधिकरणकारकं विवक्षितं वृक्षशब्देनोपादानत्वं निष्टतक्षुरिति बहुवचने न तात्पर्यम् अदितिः पाशानितिवत् हे मनीषिणः किं यूयमेवं पृच्छतेत्यर्थः । यदध्यतिष्ठदिति निमित्तत्वस्य संप्रतिपन्नत्वात्तदनुवादः अधिकरणमुपादानं तद्व्यतिरिक्तसकलकारकवर्गश्च ब्रह्मैवेत्युत्तरमाह ब्रह्मवनमिति, अधिकरणकारकं सर्वकारकोपलक्षणार्थं चोद्यपरिहाररूपेण ब्रह्मण एव सर्वविधकारणतोपपादने किं प्रयोजनमित्यत्राह सामान्यतोदृष्टेनेति, तस्मात्सदेवेत्यादिवाक्यस्यास्मदुक्त एव वाक्यार्थ इत्याह अत इति, निषेधार्थं विशेषणानामनुवादः ।

अतस्सदेव सोम्येदमग्र आसीदित्यत्राप्यग्र इत्याद्यनेकविशेषा ब्रह्मणः प्रतिपादिता भवदभिमतविशेषनिषेधवाची कोऽपि शब्दो न दृश्यते प्रत्युत जगद्ब्रह्मणोः कार्य्यकारणभावज्ञापनाय अग्र इति कालविशेषसद्भावः आसीदिति च क्रियाविशेषः जगदुपादानता जगन्निमित्तता च निमित्तोपादानयोर्भेदनिरसनेन तस्यैव ब्रह्मणस्सर्वशक्तियोगश्चेत्यप्रज्ञातास्सहस्रशो विशेषा एव प्रतिपादिताः, यतो वास्तवकार्य्यकारणभावादिज्ञापने प्रवृत्तमिदमत एवासदेवेदमग्र आसीदित्यारभ्यासत्कार्य्यवादनिषेधश्च क्रियते कुतस्तु खलु सोम्यैवं स्यादिति ।

स्यादिति शङ्कायामादिशब्दोपात्तविशेषान् वदन् परिहरति प्रत्युतेत्यादिना, अप्रज्ञाता इत्यनेन निषेधार्थमनुवाद इत्येतत्परिहृतं पूर्वयोजनायामसत्कार्यवादोपन्यासनिरासवाक्यस्याव्याख्यातत्वात्तदिदानीं

Digitized by Google

व्याचष्टे यत इत्यादिना, आदिशब्दादनुप्रवेशादयः कार्यकारणभावादेः परमार्थस्यैव ज्ञापने प्रवृत्तमिदं सद्विद्याप्रकरणं कार्य्यकारणभावस्यापारमार्थ्ये असत्कार्यवादनिषेधोऽनुपपन्नः सत्त्वं हि पारमार्थ्यं कार्यमपरमार्थभूतं चेत्तस्य सत्त्वप्रतिपादनं विरुद्धं तस्मादसत्कार्यवादनिरासः सत्यत्वपत एवोपपन्न इत्यर्थः । असदेवेत्यादिकं वाक्यं माध्यमिकपक्षप्रतिक्षेपपरं शङ्करेण व्याख्यातं तदनुपपन्नम् असदेवेदमग्र आसीदित्यग्रशब्दाभिधेये कालविशेषे असत्त्वप्रतीतेः, न हि शून्यवादी कालविशेषे शून्यत्वं ब्रवीति शून्यवादनिरासमात्रेणैकविज्ञाने सर्वविज्ञानं च प्रतिज्ञातं नोपपादितं भवति । अपि तु वैशेषिकमतनिरासादेवोपपादितं भवति कार्यस्य कारणस्य चासत्त्वं हि माध्यमिकाभिमतम् । इह तु कथमसतः सज्जायतेति कारणासत्त्वं कार्यसत्त्वं च प्रतीयत इति न शून्यवादिनिरासपरमिदं वाक्यम् । अतः क्षणिकवादनिरासपरमिति भास्करेण व्याख्यातं, तच्चानुपपन्नं कालविशेषे असत्त्वप्रतीतेः । न हि महाप्रलयसमये क्षणिकत्वमुच्यते क्षणिकत्ववादिभिः तन्निरासेपि वैशेषिकमतनिरासः प्रतिज्ञातस्यार्थस्यापेक्षित एव तन्निरासेन क्षणिकशून्यवादादिनिरासश्चार्थतः कृतः स्यात्कथमसतः सज्जायेतेति वाक्यं कारणासत्त्वपरं प्रतीयत इति क्षणिकवादनिरासानुगुणमिति चेत् न तस्याप्युपक्रमभूतकार्यासत्त्वपरमतोपन्यासवाक्यस्वारस्यानुगुणार्थत्वेन वर्णनीयत्वात्तस्य, एवमुपक्रमानुगुण्यमभिप्रेत्य असदेवेदमग्रआसीदित्यारभ्येत्युक्तमेकविज्ञानेन सर्वविज्ञानस्यान्तरङ्गतयाऽपेक्षितावैशेषिकमतनिरासः एतन्निरासे शून्यवादादिनिरासोऽर्थसिद्धः । एवमुपक्रमवाक्यस्वारस्यानुगुण्यात् प्रतिज्ञातार्थोपपादनस्यान्तरङ्गत्वेनापेक्षितत्वाच्च वैशेषिकमतमेवात्र निरसनीयं कुतस्त्वति व्याख्येयोपादानम् । अस्यार्थमाह—

प्रागसत उत्पत्तिरहेतुकेत्यर्थः । तदेवोपपादयति कथमसतस्सज्जायेतेति असत उत्पन्नमसदात्मकमेव भवतीत्यर्थः । यथा मृद उत्पन्नं घटादिकं मृदात्मकं,

Digitized by Google

सत उत्पत्तिर्नाम व्यवहारविशेषहेतुभूतोऽवस्थाविशेषयोगः ।

प्रागसत उत्पत्तिरहेतुकेत्यर्थ इति हेतुशब्दः आश्रये पर्यवस्यति आश्रयस्यापि हेतुत्वात् उत्पत्तिर्नाम सतो द्रव्यस्यावस्थान्तरयोग इति, वाचारम्भणमित्यादिवाक्येन ह्युपपादितमिति तदुपजीव्य कुतस्त्वित्यादिवाक्येनासत्कार्यवादो निरस्यते, उत्पत्तिर्नाम ह्यवस्थाविशेषः तदाश्रयभूतं द्रव्यं पूर्वमसच्चेदुत्पत्त्याख्यावस्था निराश्रया कथं भवतीत्यर्थः । कुतः आश्रयरूपाद्धेतोः एवं स्यात् उत्पत्त्यवस्था स्यादिति श्रुत्युत्तरार्थः । उत्तरवाक्यसङ्गतिमाह तदेवेति, निराश्रयावस्थास्वीकारे बाधकं दर्शयतीत्यर्थः । कथमसत इत्यादिवाक्यं व्याचष्टे असत उत्पन्नमिति, असतः सज्जायेत असत् कथं सज्जायेतेत्यर्थः । मृदेव घटो जायत इत्यर्थे सत्यपि मृत्तिकाया घटो जात इतिवदयं निर्देशः कार्यकारणयोरनन्यत्वं प्रागुपपादितं मन्वानेनैवं निर्दिष्टम् । इह सच्छब्दोजगदवस्थाविशिष्टपरः विशेष्यं वस्तुपूर्वमसच्चेद्विशेषणभूतजगत्त्वावस्थाया अप्यसत्त्वाद्विशिष्टमप्यसत्स्यादित्यर्थः सच्चेत्कथमुत्पत्तिरुपपद्यत इत्यत्राह सत इति, अत्र वैशेषिकमतनिरासः किमर्थं क्रियते क्षणिकवादनिरास एवात्र स्यादिति शङ्कायां हेत्वन्तरमाह

एतदुक्तं भवति एकमेव कारणभूतं द्रव्यमवस्थान्तरयोगेन कार्यमित्युच्यत इति एकविज्ञानेन सर्वविज्ञानं प्रतिपिपादयिषितं तदसत्कार्यवादे न सेत्स्यति तथा हि निमित्तसमवाय्यसमवायिप्रभृतिभिः कारणैरवयव्याख्यं कार्यं द्रव्यान्तरमेवो*त्पाद्यत इति कारणभूताद्वस्तुनः कार्यस्य वस्त्वन्तरत्वात् तज्ज्ञानेनास्य ज्ञातता कथमपि न सम्भवतीति कथमवयवि द्रव्यान्तरं निरस्यत इति चेत् कारणगतावस्थान्तर-

* द्रव्यान्तरमेवारभ्यते इति पा० ।

Digitized by Google

योगस्य द्रव्यान्तरोत्पत्तिवादिनः सम्प्रतिपन्नस्यैवैकत्वनामान्तरव्यवहारान्तरादेरुपपादकत्वात् द्रव्यान्तरादर्शनाच्चेति कारणमेवावस्थान्तरापन्नं कार्य्यमित्युच्यत इत्युक्तम् ।

एतदुक्तं भवति इति, असत्कार्यवादः कीदृशः तस्मिन्सति प्रतिज्ञातार्थासिद्धिः कथमित्यत्राह तथा हीति, दण्डचक्रादेरपि निमित्तत्वेऽपि निमित्तशब्दस्याधिष्ठातरि प्रसिद्धिप्राचुर्य्यात्तद्व्यतिरिक्तं कारणं प्रभृतिशब्देनोच्यते अवयव्याख्यमिति अवयवा बहवोऽल्पपरिमाणाः अवयव्येकं वृहत्परिमाणमित्यनेन सङ्ख्याभेदपरिमाणभेदादिद्रव्यान्तरत्वसाधका हेतवो विवक्षिताः, अन्यस्य कार्यस्य कथमप्यवस्थातोद्रव्यतश्च ज्ञातता न सम्भवतीत्यर्थः । द्रव्यभेदहेतवः कथं निरस्यन्त इति चोदयति कथमिति, परिहरति कारणेति, संप्रतिपन्नस्यैवेति, असमवायिकारणत्वेन सम्प्रतिपन्नस्येत्यर्थः । द्रव्यान्तराभ्युपगतिः किं दर्शनादुत कल्पनेन न तावद्दर्शनं कल्पका बुद्धिशब्दकार्यान्तरादयोऽवस्थाविशेषेणान्यथा सिद्धाः । आस्ते शेते गच्छति तिष्ठत्येकोऽयं समाज इत्यादिषु बुद्धिशब्दान्तरादेरवस्थाविशेषहेतुकत्वदर्शनात् घटपटादिषु द्रव्यभेदहेतुकत्वं च दृष्टम् । आस्ते शेत इत्यादिष्ववस्थाभेदहेतुकत्वं च दृष्टमित्यत्र किं नियामकमिति चेत् आस्ते शेत इत्यादिषु हि द्रव्यप्रत्यभिज्ञया अवस्थाभेदहेतुकत्वं ज्ञायते एवं मृद्घटादिष्वपि द्रव्यप्रत्यभिज्ञया अवस्थाभेदहेतुकत्वं बुद्धिशब्दान्तरादेर्ज्ञायत इत्यर्थः । कथं निरस्यत इति शङ्कायां द्रव्यान्तरादर्शनाच्च निरस्यत इत्यन्वयः । इति कारणमेवेति, इति—तस्मादित्यर्थः, एवं नात्र क्षणिकमतनिरासः क्रियते अपि तु वैशेषिकमतनिरास इत्युक्तम् ।

ननु निरधिष्ठानभ्रमासम्भवज्ञापनायासत्कार्य्यवादनिरासः क्रियते । तथा हि एकं चिद्रूपं सत्यमेवावि*द्याऽऽच्छादितं जगद्रूपेण विवर्तत इति अविद्या-

* अविद्याशबलमिति पा० ।

श्रयत्वाय मूलकारणं सत्यमित्यभ्युपगन्तव्यमित्यसत्कार्यवादनिरासः। नैतदेवम् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्तमुखेन सत्कार्यवादस्यैव प्रसक्तत्वादित्युक्तं, भवत्पक्षे निरधिष्ठानभ्रमासंभवस्य दुरुपपादत्वाच्च यस्य हि चेतनगतदोषः पारमार्थिकः दोषाश्रयत्वं च पारमार्थिकं तस्य पारमार्थिकदोषेण युक्तस्यापारमार्थिकगन्धर्वनगरादिदर्शनमुपपन्नं, यस्य तु दोषश्चापारमार्थिकः दोषाश्रयत्वं चापारमार्थिकं तस्यापारमार्थिकेनाप्याश्रयेण तदुपपन्नमिति।

अथ माध्यमिकमतनिरासपरत्वमाशङ्क्य निराक्रियते नन्वित्यादिना, निरधिष्ठानेति स्पष्टं। कथं निरधिष्ठानभ्रमासम्भवः अधिष्ठानं च किन्तस्य पारमार्थ्यं कथं भ्रमसम्भव इत्यत्राह तथा हीति, एक-शब्देन सजातीयादिभेदनिषेधः सत्यमेवेत्येवकारेणाधिष्ठानापारमार्थ्यव्यावृत्तिः। अधिष्ठानापारमार्थ्ये तस्याप्यपरमार्थत्वादधिष्ठानान्तरापेक्षेत्यनवस्था स्यात्तस्मात्सत्यमधिष्ठानमित्यभिप्रायः। परिहरति नैतदित्यादिना, प्रसक्तत्वादसत्कार्यवादनिरासः क्रियत इत्युक्तमित्यन्वयः। प्रतिज्ञादृष्टान्ताभ्यां सत्कार्यवादस्य प्रस्तुतत्वात्तदुपयोगित्वेनासत्कार्यवादनिरासः क्रियते न तु निरधिष्ठानभ्रमासम्भवज्ञापनायासत्कार्यवादनिरासः क्रियत इत्यर्थः। हेत्वन्तरं चाह भवत्पक्ष इति, तदेवोपपादयति यस्य ही ति, यस्य मते इत्यर्थः। दोषाश्रयत्वं च दोषसम्बन्धश्चेत्यर्थः। तस्य-तस्य मते इत्यर्थः अधिष्ठानापारमार्थ्ये भ्रमासम्भवः किं दर्शनादुच्यते उत युक्तिभिस्तथा कल्प्यते दर्शनाच्चेत् दोषदोषाश्रयत्वादेरप्यपारमार्थिकत्वेऽपि न क्वचिद्भ्रमो दृष्ट इति दोषादेरपि पारमार्थ्यमभ्युपगन्तव्यं स्यात्, युक्त्या पारमार्थ्यं कल्प्यते चेत् तर्हि दोषस्यापारमार्थ्ये दोषान्तरापेक्षित्वेनानवस्थाप्रसङ्गात्तस्यापि पारमार्थ्यं स्यात्। तत्रानवस्थादोषपरिहाराय स्वरूपाना-

Digitized by Google

दित्वं प्रवाहानादित्वं दुर्घटत्वं स्वपरनिर्वाहकत्वं वा यदुच्यते तदधिष्ठानेऽपि तुल्यमिति न तत्पारमार्थ्यसिद्धिः अनादित्वेऽप्यनवस्था दुष्परिहरा । अनादेरेव जीवभेदस्यापरमार्थस्य दोषमूलत्वाभ्युपगमात् ।

भवत्पक्षे न निरधिष्ठानभ्रमासम्भवः एतच्छोधकवाक्येष्वपि सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेत्यादिषु सामानाधिकरण्यव्युत्पत्तिसिद्धानेकगुणविशिष्टैका*र्थावबोधनमविरुद्धमिति सर्वगुणविशिष्टं ब्रह्माभिधीयते इति पूर्वमेवोक्तम्

एवं भवत्पक्षे निरधिष्ठानभ्रमासम्भवस्य दुरुपपादत्वात्तदुपपादनाया-सत्कार्यवादनिरासोऽनुपपन्न इत्यर्थः । यानि श्रुतिवाक्यानि निर्विशेषपरत्वेन परैरुक्तानि तेषां सर्वेषां भेदनिषेधपरत्वमपि निरसनीयमतः सद्विद्यानन्तरं शोधकवाक्यानां भेदनिषेधपरत्वं व्युदस्यते शोधकवाक्येष्वपि इत्यादिना, स्पष्टं सद्विद्यादिषु भेदनिषेधपरत्वमाशङ्क्यमिति निषेधकण्ठोक्तिमद्वाक्यमथात आदेश इत्यादिकं, भेदनिषेधपरत्वं शङ्कते अथात इत्यादिना, किमत्रेति किं-शब्द आक्षेपार्थः प्रमाणान्तरागोचरस्य विहितस्य निषेधायोगान्न किञ्चिदपि निषेद्धुं शक्यमिति भावः । निषेध्यं शङ्कते द्वे वावेति, पूर्वाभिप्रेतमर्थं वदन् परिहरति ब्रह्मण इति, ब्रह्मणोरूपत्वेनाप्रज्ञातत्वान्निषेधार्थमनुवाद इति वक्तुं न शक्यते तस्माद्विधीयत एवेति विहितस्य निषेधो नोपपद्यते तथा सति वेदस्य विप्रलम्भकत्वेन निषेधवाक्यमप्यप्रमाणं भवेदित्यर्थः । एतदनुगुणन्यायप्रतिपादकं पुराणवचनमाह प्रक्षालनाद्वीति, यथा पङ्कोपलेपतत्क्षालनादपि तदस्पर्शो वरं तथा अपूर्वभ्रमान्तरारोपेण† तन्निषेधादवेदनमेव वरं, न हि पङ्कोपलेपतत्क्षालनायासस्य प्रयोजनं विद्यते । एवमपूर्व्वभ्रमारोपणतन्निषेधायासस्याप्रयोजनत्वाच्छा-

* कार्याभिधानं पा० ।

† अपूर्वभ्रमान्तरारोपणतन्निषेधादपि मौनमेव वरमिति पा० ।

स्वस्य प्रयोजनपर्य्यवसायित्वं न स्यादिति बुभुत्सितग्राह्यं शास्त्रमनारम्भणीयं स्यादिति भावः ॥

अथात आदेशो नेति नेतीति बहुधा निषेधो दृश्यत इति चेत्, किमत्र निषिध्यत इति वक्तव्यं द्वे वाव ब्रह्मणो रूपे मूर्त्तं चा*मूर्तमेव चेति मूर्तामूर्तात्मकः प्रपञ्चः सर्वोऽपि निषिध्यत इति चेत् ब्रह्मणो रूपतया अप्रज्ञातं सर्वं रूपतयोपदिश्य पुनस्तदेव निषेमद्धुमयुक्तं प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् कस्तर्हि निषेधवाक्यार्थस्सूत्रकारः स्वयमेव वदति—

एवं स्वोक्तार्थे निरस्ते राद्धान्तिनं पृच्छति क इति, निषेधवाक्यार्थः—निषेधवाक्यस्यार्थः । आह सिद्धान्ती सूत्रकार इति, उदाहृतं सूत्रं व्याचष्टे उत्तरत्रेत्यादिना, उत्तरत्र—शब्दे न सौत्रं तत इति पदं व्याख्यातं, भूयो—बहुतरमित्यर्थः । तदभिप्रेत्योक्तं गुणगणस्येति, स्वरूपान्यथा भावरूपविकारास्पदाचिद्व्यावृत्त्या सत्यशब्दवाच्यो जीवः तस्य धर्म्मान्यथाभावरूपविकारोऽस्ति स्वरूपतो धर्म्मतश्चाविकारः परमात्मेति तदुभयव्यावृत्त्या परमात्मा सत्यस्य सत्यमित्युच्यत इत्यर्थः । एतावन्मात्रं न सम्भवति ब्रह्मेति इति गुणविशिष्टं ब्रह्मैतावन्न भवति एतावद्गुणकं ब्रह्म न भवतीत्यर्थः ।

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति, उत्तरत्र अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति सत्यादिगुणगणस्य प्रतिपादित-त्वात्, पूर्व्वप्रकृतैतावन्मात्रं न भवति ब्रह्मेति

* मूर्तं चैवामूर्तं चेति पा० ।

Digitized by Google

ब्रह्मणस्तावन्मात्रता प्रतिषिध्यत इति सूत्रार्थः । नेह नानास्ति किञ्चनेत्यादिना नानात्वप्रतिषेध एव दृश्यत इति चेत्

नेह नानास्तीत्यादिष्वियत्तानिषेधपरत्वं दुर्वचमिति कृत्स्नभेदनिषेधपरत्वं शङ्कते नेहेत्यादिना, परिहरति अत्रापीति, वशित्वं गुणेन वशीकारः ईशानः नियन्ता वशित्वादीनां सत्यसङ्कल्पत्वविशेषरूपत्वात्सत्यसङ्कल्पत्वमत्रोक्तं सर्वस्याधिपतिरिति वाक्योक्तं स्वामित्वं सर्वेश्वरत्वशब्देनोच्यते अस्य प्रदर्शनार्थत्वात्प्रकरणोक्तस्य सर्वमिदं प्रशास्ति इत्युक्तं नियमनं भवति एष सेतुर्विधरण इत्युक्तं धारकत्वं चोक्तं भवति । एवं पतित्व-नियन्तृत्व-धारकत्वैरीश्वरस्य तं प्रत्यशेषनियाम्यधार्यभूतस्य जगतः शरीरत्वाच्चेतनाचेतनवस्तुशरीर इत्युक्तं सर्वप्रकारसंस्थितः सर्वप्रकारविशिष्टः । एवं प्रकार्यैकत्वस्य विहितत्वान्निषेधस्य विहितव्यतिरिक्तविषयकत्वाच्च प्रकारिनानात्वनिषेधपरमिदं वाक्यमित्यर्थः । न भवदभिमतमिति सजातीयविजातीयस्वगतरूपकृत्स्ननानात्वं न प्रतिषिध्यत इत्यर्थः । उक्तन्यायकलापेन सर्वाः श्रुतयो निर्वाह्या इत्याह सर्वास्विति, निषेधवाचकः कोऽपि शब्दो न दृश्यत इति के ते शब्दा इति हि प्रक्रान्तम्, अतस्तदेवोपसंहृतम् । एवं ब्रह्माज्ञानपक्षस्य श्रुत्यपेतत्वं दर्शितम् ॥

अत्राप्युत्तरत्र सर्वस्य वशी सर्वस्येशान इति सत्यसङ्कल्पत्व—सर्वेश्वरत्वप्रतिपादनाच्चेतनाचेतनसर्ववस्तुशरीर ईश्वर इति सर्वप्रकारसंस्थितः सर्वेश्वरः स एक एवेति तत्प्रत्यनीकाब्रह्मात्मकनानात्वं प्रतिषिद्धं न भवदभिमतं, सर्वास्वेवम्प्रकारासु श्रुतिष्वियमेव स्थितिरिति न क्वचिदपि ब्रह्मणः सविशेषत्वनिषेधकः को ऽपि शब्दो दृश्यते ।

Digitized by Google

न्त्यं निवारितं न स्वतन्त्रा काचित् प्रकृतिः प्रधानं नामाजामन्त्रेणाम्ना-यत इति शक्यते वक्तुं, प्रकरणात्तु सा दैवी शक्तिरिति ह्युक्तं भवद्भिः, इहापि तिस्रो देवता अनुप्रविश्येति प्रकरणेऽनुप्रवेशो ज्ञायते, अतः कृत-करत्वं विपर्ययेण त्विति प्रलयक्रमनिरूपणपरमधिकरणान्तरं परैरुक्तम् अनियतक्रमत्वं सर्गक्रमतुल्यत्वं च पूर्वपक्षीकृत्य प्रलयस्य सर्गप्रतिलोमक्र-मत्वं सिद्धान्तितं स्वकारणव्यतिक्रमेण कार्याप्ययायोगः कार्ये ध्रियमाणे कारणाप्ययायोगश्च हेतुरुक्तः, तत्र तावदधिकरणान्तरारम्भोऽनुपपन्नः प्रलये क्रमद्वैविध्याश्रवणेन संशयानुपपत्तेः, पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयन्ते इत्येकरूप एव हि प्रलयः श्रूयते सदेव सोम्येदमग्र आसीदिदं वा अग्रे नैव किञ्चनासीत् द्यौरासीत् पृथिवी नान्तरिक्षम् इति क्रमानुक्त्या द्युपृथिव्यादिक्रमान्तरोक्त्या च संशय इति चेन्नानुक्तस्यान्यतो ग्राह्यतया ऽनुक्तेः संशयहेतुत्वायोगात्, इदं वा अग्रे इत्यत्र श्रौतक्रमाभावात् पाठ-क्रमस्य श्रौतक्रमविरोधे दुर्बलत्वाच्च अयमर्थोऽप्यधिकरणे व्युत्पाद्य इति चेन्न भवद्भिर्न द्यौरासीदित्यादिपाठक्रमस्य पूर्वपक्षितत्वाभावात् क्रमा-नियमसर्गक्रमौ हि पूर्वपक्षितौ। न द्यौरित्यादि श्रुतिस्त्वण्डान्तर्वर्त्यूर्ध्वाधर-मध्यमरूपसर्वलोकप्रलयपरा, न त्वण्डारम्भकतत्त्वप्रलयपरेत्यवगम्यते दिवो-ऽन्तरिक्षस्य च पृथगुपादानात्, अतो न क्रमान्तरप्रतीतिरतो ऽनारम्भणी-यतैव स्यात्, न च कार्यस्थितिदशायां कारणप्रलयानुपपत्तिः भस्मवृश्चि-कस्थितिदशायां तन्तुगोमयविनाशदर्शनात् न च स्वकारणमतिक्रम्य का-रणकारणे प्रलयश्चानुपपन्नः भस्मवृश्चिकयोस्तन्तुगोमयातिक्रमेण पृथिव्यां प्रलयात् पृथिव्येव भस्मवृश्चिकयोरुपादानं न तन्तुगोमया इति चेत् न विलक्षणादुपादानाद्विलक्षणकार्योत्पत्तौ भवद्भिरेव स्मृतिपादे "दृश्यते त्वि"ति सूत्रव्याख्याने गोमयवृश्चिकादिदृष्टान्तोपन्यासात्, इष्टकादि-दाहे भस्मोत्पत्त्यदर्शनेन पृथिवीमात्रस्य भस्मविशेषत्वोपादानत्वायोगेन तन्तूनामेव भस्मविशेषोपादानत्वस्याभ्युपगतत्वाच्च अन्तरा विज्ञानेति सूत्रमप्यात्मन आकाश इति श्रौतक्रमभङ्गपरिहारपरम् एतस्माज्जायत इत्यादिमन्त्रस्य उत्पत्तिक्रमे विवक्षाराहित्यप्रतिपादकं व्याख्यातं तद-

युक्तं पृथिव्यप्सु प्रलीयत इत्याकाशादूर्ध्वं तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति लीयते महानव्यक्ते लीयत इत्यादि श्रुत्यैव सिद्धस्य क्रमभङ्गस्य दुष्परिहरत्वात्, भूतानामात्मनश्चान्तराल इति व्याख्यानमप्ययुक्तं विज्ञानमनसी इत्यन्तरालावस्थितवस्तुद्वित्वानुपपत्तेर्विज्ञान–शब्दो हि विज्ञायतेऽनेनेति व्युत्पत्त्या इन्द्रियवर्गपरः प्राणमनइन्द्रियवर्गाणां निर्देशेऽपि प्राणमनादृत्य विज्ञानमनसी इति व्यपदेशः कथमुपपद्यते प्राणोऽपि यथाकथञ्चिदवयवशक्त्या विज्ञानशब्देन विवक्षित इति चेन्न मनसि चावयवार्थे सम्भवति मध्यगतं मनोवहिष्कृत्य व्यवहितयोः प्राणेन्द्रियवर्गयोरेकशब्देन विवक्षितत्वे कारणाभावात्, अतो विज्ञानमनसी इति व्यपदेशो भूतप्राणयोरन्तराल इति व्याख्यानस्य युक्ततां सूचयति–

सू० चराचरव्यपाश्रय इत्याद्युच्यते चराचरव्यपाश्रयस्तुव्यपदेशस्तद्भाविशब्दः, चराचरवाचिशब्दो ब्रह्मण्यभाक्तो मुख्य एव, कुतः ब्रह्मभावभावित्वात् सर्वशब्दानां वाचकभावस्य, नामरूपव्याकरणश्रुत्या हि तथाऽवगतम् ॥ तेजोऽधिकरणं समाप्तम् ॥

टी० सू॰ चराचरव्यपाश्रयस्त्विति सूत्रमपि देवदत्तो जातो मृत इति लौकिकानां जन्ममरणव्यपदेशाच्चेतनस्य जातकर्मादिविधानाच्च जीवस्य जन्मप्रलयावाशङ्क्य शास्त्रीयकर्मफलभोगानुपपत्त्या "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत" इति श्रुत्या च तौ न वस्तुतः स्तः शरीरप्रादुर्भावतिरोभावयोर्जन्ममरणशब्दसद्भावात्, स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ जीवात्मन्युपचरितौ जातकर्मादिकं च देहप्रादुर्भावाद्यपेक्षमित्येवमर्थपरं व्याख्यातं तदयुक्तं किमिदमधिकरणं जीवस्य स्वरूपेणोत्पत्तिनिवारकम्? उत देहोत्पत्त्यादेरात्मनि निवारकं? नाद्यः जीवस्योत्पत्तिप्रलयनिषेधस्य नात्मा श्रुतेरित्यनन्तराधिकरणसाध्यतया पूर्वोत्तरयोरधिकरणयोरन्यतरस्य पुनरुक्तिप्रसङ्गात्, अत्र देहाश्रयौ जन्मप्रलयौ जीवे निषिद्धौ तत्र वियदादिवत् परस्मादात्मनस्तस्योत्पत्तिर्नात्मा श्रुतेरिति निषिध्यत

Digitized by Google

इति चेन्न देहात्मभेदासिद्धौ तयोस्तत्र प्रतिषेधाभावात् तद्भेदसिद्धौ यहोत्पत्तिविनाशयोर्देवदत्त इव शरीरजन्ममरणयोर्जीवगतत्वशङ्कानुदया-दारम्भानुपपत्तेः, देहगतोत्पत्त्यादेरात्मनि प्रतिषेधाय देहात्मभेद इह सि-षाधयिषित इति चेन्नास्मत्पक्षे प्रथमकाण्ड एव देहात्मभेदस्य सिद्धत्वात्तस्य यावत्फलस्थायित्वशङ्कानिवृत्तये नित्यत्वमात्रस्य समर्थनीयत्वात्, त्वत्पक्षे-चैक आत्मनः शरीरे भावादित्यधिकरणस्य देहात्मभेदसाधकतया व्याख्या-तत्वाच्च पुनरुक्तेरवर्जनीयत्वात् । ननु तत्र लोकायतिकनिरसने तात्पर्य-मिह तु शास्त्रीयकर्मवैयर्थ्यानुपपत्त्या देहातिरिक्तत्वं सिषाधयिषितमिति चेन्न वैषम्यनैर्घृण्याधिकरण एवाकृताभ्यागमकृतविप्रणाशप्रसङ्गमुखेन जीव-तत्तत्कर्मप्रवाहानादित्व[1]समर्थनेन देहातिरेकसिद्धेः कृतकरत्वप्रसङ्गात्, कृतविप्रणाशपरिहारो हि शास्त्रवैफल्यपरिहारः । ननु तवापि नात्मा श्रुते-रित्यधिकरणवैफल्यं स्यात् तत एव जीवानादित्वप्रसिद्धेरिति चेन्न एकत्वा-वधारणप्रतिज्ञादृष्टान्तादिभिः प्राप्ताया जीवोत्पत्तेस्तत्र परिहृतत्वात्, श्रुतिमूलाया उत्पत्तिशङ्कायास्तत्रापरिहृतत्वेन तदर्थमारम्भणीयत्वात् । किञ्च जन्ममरणशब्दयोर्देहप्रादुर्भावतिरोभावानुविधायित्वेऽपि देहात्मभे-दासिद्धौ भाक्तत्वासिद्धिः, घटविषययोरुत्पत्तिविनाशशब्दयोरभाक्तत्वं हि तत्रार्थभेदाभावात्, देहात्मभेदे सिद्धे विरुद्धस्वभावतयाऽवगतार्थद्वयविषयै-क्यव्यपदेशस्याग्निर्माणवक इत्यादिव्यपदेशस्येव भाक्तत्वं सिध्यतीति न पृथक्समर्थनीयत्वम्, अतस्सूत्रवैयर्थ्ये जातकर्मादिविधिपरिहारपरत्वमप्य-युक्तं शङ्कायाः परिहारस्य वा कण्ठोक्त्यभावे तयोरभिप्रेतत्वकल्पनायो-गात् कण्ठोक्तार्थोपयुक्ततया तदभिप्रेतत्वकल्पनमिति चेत् कण्ठोक्ततया भवदभिमतार्थस्य साध्यत्वानुपपत्तेर्दर्शितत्वात्तदुपयोगितयाऽभिप्रेतत्व-कल्पनानुपपत्तेः, । अन्ये तु तेजोऽत इत्यादिसूत्रजातमेवं व्याचक्षते—तेजो-ऽतः ब्रह्मण एवोत्पद्यते न वायोः छान्दोग्ये वायोस्तदुत्पत्त्यश्रवणात् वायोरग्निरिति श्रुतेर्मुखाध्मानजन्यवायुनाऽग्न्युत्पत्त्यनुवादकतयोपपत्तेरिति पूर्वपक्षं कृत्वा एकस्य सम्भूत-शब्दस्य क्वचित्प्रतिपादकस्य क्वचिदनुवाद-

[1] अनादित्वसाधनेनेति पा० ।

कत्वायोगात्, परम्परया ब्रह्मजत्वोपपत्तेश्च वायोरपि तेज उत्पद्यत इति सिद्धान्तितं क्वचिदवचननिमित्तशङ्काया आद्याधिकरणे भवद्भिः परिहृतत्वात्तत्राप्यवचनमात्रस्य हेतुत्वानुपपत्तेरस्माभिर्दर्शितत्वाच्च पूर्वपक्षोत्थानं न घटते श्रुतेर्मुखवायुना ज्वलनोत्पत्त्यनुवादकतयाऽधिकशङ्कास्पदमिति चेन्न आकाशाद्वायुरिति श्रुतेरपि मुखावच्छिन्नाकाशाद्वायूत्पत्तेरनुवादकत्वस्य शङ्कास्पदत्वाभावात् तत्रापि शङ्कापरिहारावभिप्रेताविति चेन्न कारणभूते वायौ कण्ठोक्तयोः कार्य्यभूते तेजस्यभिप्रेततायां एवोचितत्वात् क्वचिदवचनस्य हेतुत्वानुपपत्तेर्दर्शितत्वादेव तदप्यनपेक्षितं छान्दोग्ये वायोस्तेज-उत्पत्त्यकथनमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानानुपयोगादित्यप्ययुक्तं, तेजसोऽपाम् उत्पत्तेरप्यकथनीयत्वप्रसङ्गात् तेजोरूपस्य ब्रह्मण एव कारणत्वात् प्रतिज्ञोपयोग इति चेत् तर्हि वायुरूपस्य ब्रह्मणः कारणत्वात्तत उत्पत्तिकथनस्यापि नानुपयोगः । आप इति आप एवेदमग्र आसीदिति प्रलये व्यवस्थानश्रवणादापो नोत्पद्यन्ते । यद्वा ब्रह्मण एवोत्पद्यन्ते न तेजसः तस्मादापोऽसृज्यन्त अप एव ससर्जादाविति वचनात् अग्नेराप इति तूष्मणा-स्वेदोत्पत्तिं किरणेभ्यो वृष्टिं वा वदतीति अग्नेरनन्तरं ब्रह्मण आप उत्पद्यन्त इति वार्थ इति द्विविधं पूर्वपक्षं कृत्वा अग्नेराप इति श्रुतावध्याहारायोगात् संभूत–शब्दार्थैकरूप्याच्चाग्र आसीदिति श्रुतेः प्रकृत्यन्तर्गतसूक्ष्माम्बुविषयत्वावान्तरप्रलयविषयत्वयोरन्यतरसंभवाच्च तेजसोऽम्बूत्पत्तिरिति सिद्धान्तितम् आप एवेदमग्र आसीदिति वाक्यस्य पार्थिवस्य जगतोऽप्सु प्रलयपरत्वेनापामनुत्पत्तिपरत्वाप्रतीतेः पूर्वपक्षानुदयादिदमयुक्तम् उत्पत्त्यवचनात् पूर्वपक्षश्चेत् पूर्वमेव परिहृतमिति न शङ्कोत्थानम् अपां ब्रह्मण एवोत्पत्तिर्न तेजस इति च न शङ्कोत्तिष्ठति अवचनस्य पूर्वमेव परिहृतत्वात् अनन्तरशब्दाध्याहारस्य वायोरग्निरित्यत्राप्यनाशङ्कितस्य शङ्कार्हत्वे वा तत्रैव परिहर्त्तव्यतया पुनःशङ्कानुपपत्तेः, सूक्ष्माणामपां प्रकृतौ स्थितिश्च चिन्त्या किमप्त्वप्रहाणेनावस्थितिः? उताप्रहाणेन प्रथमेऽनवस्थितिरेवोक्ता स्यात् घटत्वप्रहाणे तदनवस्थितिवत्, द्वितीये आपस्तेजसि लीयन्त इति श्रुतिविरोधः पृथिव्यधिकारेति अन्न–शब्दस्य प्रसि-

द्वाचपरत्वेन छान्दोग्ये पृथिव्युत्पत्त्यवचनादनुत्पत्तिं पूर्वपक्षीकृत्य पृथिव्युत्पत्तिसाधकमधिकरणान्तरं वर्णितं तदप्यवचनस्य भ्रष्टबीजवदङ्कुराङ्कुरजननासामर्थ्यादेवायुक्तं तदभिध्यानादिति इदं सर्वमसृजत तस्मादग्निः समिधो यस्य सूर्यः तत्तेजोऽसृजत आत्मन आकाश इत्यादिषु तत्त्वान्तरव्यवहितात् ब्रह्मणस्तदुत्तरतत्त्वसृष्टिरुच्यते तत्त्वानामपि कारणत्वश्रवणात् नियतक्रमाणां तेषामुत्तरोत्तरव्यवधायकत्वाच्चेति पूर्वपक्षं कृत्वा तदैक्षतेत्याद्युक्ताभिध्यानस्य तत्तत्कार्य्येषु तत्सृष्ट्वा तदेवानुप्राविशदित्यनुप्रविष्टतया श्रुतपरमात्मलिङ्गत्वात् स एव सर्वत्रोपादानं तत्त्वान्तराणि तु देवदत्तस्य तु गृहवदुपादानानि उपादानत्वेऽप्यात्मनश्च तत्त्वान्तराणां च सहकारणत्वसंभवादुभयेषामप्युपादानतया न व्यवधानमिति सिद्धान्तितं तत्र ब्रूमः वाय्वादेरुपादानाकाशाद्विभज्यमानोऽशः किं वाय्वादिरूपेण परिणमते न वा? न चेत् पूर्वाधिकरणविरोधः, वायोस्तेजस उत्पत्तिः आपस्तेजसोऽप्युत्पद्यन्त इति हि सिद्धान्तितं परिणमते चेत्तेन परिणामांशेन कस्य व्यवहितकारणत्वमाशङ्क्याव्यवधानेन कारणत्वं समर्थ्यते? किं निमित्तस्य? उतोपादानस्य? न प्रथमः, ईश्वरेण विना तद्व्यवधानस्य निमित्तान्तरस्य जगत्सृष्टिवेलायामसंभवात्, कर्मणामपि सुखदुःखान्वयरूपवैषम्यमात्र एव हि निमित्तत्वं न तु सृष्टिमात्रे, द्वितीये किमीश्वरस्य व्यवधानमाशङ्क्य परिह्रियते? उताव्यक्तस्य? उत सन्मात्रस्य? प्रथमे तत्तत्कार्य्यं प्रति ईश्वरांशस्याव्यवहितोपादानत्वे निर्विकारत्वश्रुतयो निर्विषयाः स्युः, द्वितीयतृतीययोरभिध्यानलिङ्गस्यापक्षधर्मता स्यात्, तृतीयेऽपि किं द्रव्यान्तरव्यवधानं निवार्यते? उतावस्थान्तरव्यवधानं? न प्रथमः, तदनन्यत्वमित्यत्र कृतत्वेनारम्भवैयर्थ्यात्, न द्वितीयः आकाशाद्वायुरिति अवस्थान्तरव्यवधानस्य श्रौततया दुर्निवारत्वात्, आकाशाद्यवस्थं तत्तदवस्थानापन्नं च सन्मात्रमुपादानमिति चेन्न युगपदेकस्य द्रव्यस्याकाशाद्यवस्थापत्त्यनापत्त्योर्विरुद्धत्वात् आकाशाद्यवस्थापन्नेन तदवस्थानापन्नेनांशान्तरेण च सन्मात्रं वाय्वाद्युपादानमिति चेत्तदंशान्तरं किं नियन्त्रंशाव्यतिरिक्तं? मुत व्यतिरिक्तं? प्रथमे निर्विकारत्वश्रुतिकोपः, द्वितीयेऽभिध्यानलिङ्गस्यापक्षधर्मता, प्रकृतेः प्रलया-

वस्थपुरुषस्य च सदसम्भवात् अत आत्मनश्च तत्त्वान्तराणां च सहोपादानत्वम् इत्यनुपपन्नम् । अत एव पूर्वाधिकरणेष्वपि वायोश्च तेजस उत्पत्तिः आपस्तेजसोऽप्युत्पद्यन्त इति सिद्धान्तश्चानुपपन्नः वाय्वाद्यवस्थापन्नतत्तद्रहिततदंशद्वयस्य प्रमाणाभावादुक्तोपपत्तिविरोधाच्च तदभिध्यानादिति सूत्रानन्तरमसम्भवस्त्विति सूत्रं निवेश्याधिकरणान्तरं वर्णितम् अस्य पाठक्रमस्य प्रसिद्धिप्राचुर्य्यविरोधात् प्रसिद्धपाठानुरोधे सङ्गतिसद्भावाच्च नात्र निवेशनीयं चिन्तितेभ्य आकाशादिभ्योऽतिरिक्तानीन्द्रियमहदहङ्काराव्यक्तपुरुषपरमात्मतत्त्वानि षोडश तेषां सर्वेषां छान्दोग्यतैत्तिरीययोरश्रवणादनुत्पत्तिं वस्तुत्वात् पृथिव्यादिवत्सर्वेषामुत्पत्तिं च पूर्वपक्षीकृत्य सन्मात्रस्य सन्मात्रात् सद्विशेषाच्चोत्पत्त्यसम्भवेनानुत्पत्तिमेकत्वावधारणप्रतिज्ञानाभ्यामन्येषां सर्वेषाम् उत्पत्तिं च सिद्धान्तयन्ति तत्राश्रवणात् पूर्वपक्षोदयः पूर्वमेव निरस्तः । नित्यं विभुं सर्वगतं सुसूक्ष्मं दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यज इति परस्यात्मनो नित्यत्वाजत्वयोर्धर्मयोः पूर्वनिरूपितवाक्यैरवगतत्वात् सर्वं कार्यमिति शङ्का नोदेति, न हि वस्तुत्वेन[illegible]विभुत्वानुमानमाशङ्क्य क्वचिदधिकरणे निराकृतं निरूपितवाक्येषु विभुत्वश्रवणात्, अतःपूर्वपक्षानुत्थितेरधिकरणान्तरत्वम[illegible]प्ययुक्तं विपर्ययेण त्वित्यादि सूत्रद्वयं भूतव्यतिरिक्ततत्त्[illegible]नां सर्गक्रमविषयाधिकरणान्तरं वर्णितं तत्रैतस्माज्जायते प्राणः इन्द्रियेभ्यः परा ह्यर्था इति वाक्यद्वयं विषयः, अत्र प्राण[illegible]शब्दो महद्वाची ज्ञानक्रियाशक्त्यवच्छिन्नस्य महतो बुद्धिप्राणशब्दवाच्यत्वात्, मनःशब्दोऽहङ्कारपरः सर्वेन्द्रियशब्देन मनसोऽप्युपात्तत्वादितिहासपुराणेषु खे वायुः प्रलयं याति मनस्याकाशमेव चेति प्रयोगाच्च, एवं चात्मनो महान् जायते महतोऽहङ्कारोऽहङ्कारादिन्द्रियाणि इन्द्रियेभ्यो भूतानीति क्रमः स्यात्, अयमेव क्रमो ग्राह्यः आकाशादिषु क्रमविवक्षादिषु क्रमविवक्षादर्शनादिति पूर्वपक्षे प्राप्ते एतच्छ्रुत्युक्तविपर्ययक्रमेणेन्द्रियेभ्यः परा इत्यादिश्रुत्यन्तरोक्तक्रमो ग्राह्यः एतस्मादित्यत्र पदार्थनिर्देशमात्रावगमात् तत्र तु कारणतया परत्वेन क्रमविवक्षाप्रतीतेरिति सिद्धान्त उक्तः। तन्मात्रावस्थानि भूतान्यर्थाः शब्दतन्मात्रादिष्वेकैकेन युक्तादहङ्कारात्क्षोत्राद्युत्प-

Digitized by Google

त्तिर्व्वागाद्युत्पत्तिश्च, अत इन्द्रियेभ्योऽर्थानां परत्वम् एतस्मादिति श्रुतिश्चाविरोधेन नेया प्राणात् पूर्व्वमव्यक्तमुपसंहार्य्यं, न चेन्द्रियकार्य्यत्वं खादीनां सर्व्वेन्द्रियाणि चेति च-शब्दो भिन्नक्रमः सर्व्वेन्द्रियाणि खादीनि च मनसोऽहङ्काराज्जातानीत्यर्थः अन्तरेति। ननु प्राण-शब्दवाच्यस्य महतां खाद्यर्थानां चान्तराले सेन्द्रियवर्गं मन एकत्र श्रूयते अन्यत्र मनश्च बुद्धिश्च अतो विरोधः, न च मनःशब्दवाच्याहङ्कार एव बुद्धि-शब्दाभिधेयः "बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव च । विज्ञानसारथिर्यस्तु मनःप्रग्रहवानिति क्रमेण तद्व्यपदेशलिङ्गात् ततश्चाव्यक्तमहद्विज्ञानाहङ्कारतन्मात्राणीति अचित्तत्त्वेष्वेव नव प्रकृतयः स्युरिति चेन्न अविशेषात् बुद्धिमहतोरविशेषात् बुद्धिरेव महान् ज्ञानक्रियाशक्तिभेदेन द्विधा व्यपदेशः परत्वं च न कारणत्वेन आकारान्तरेण परत्वस्यापि साधारणत्वात् पर-शब्दस्य बुद्धिमनसोरविशेषो वा भूतादित्वेनेन्द्रियादित्वेन चावस्थिताहङ्कारविषयत्वसम्भवान्मनोबुद्धिशब्दयोः। यद्वा इन्द्रियमेव मनः विज्ञानमहङ्कारस्स्थानप्रमाणात् महान्महानेव । यद्वा महानात्मेति प्राणशरीरोहिरण्यगर्भ उच्यते प्रजापतिः संवत्सरो महानिति प्रसिद्धेः, अतस्तत्त्वसर्गक्रम उपपन्न इति, तदिदमनुपपन्नम् इन्द्रियेभ्यः परा इत्यादिवाक्यस्य कारणक्रमपरत्वे आनुमानिकमप्येकेषामित्यधिकरणविरोधात्, न च तत्र वैभववादः अन्यत्रापि वैभववादः किं न स्यादिति पर्य्यनुयोगानतिवृत्तेः, कारणवाक्येषु सर्व्वेषु सूत्रकारनिष्कर्षेऽनाश्वासप्रसङ्गात् बुद्धेरात्मा महान् पर इत्यत्रौचित्यभङ्गप्रसङ्गात् तद्रहितनिर्व्वाहे सम्भवति तदयोगाच्च अर्थविरोधात्प्रकरणबाधोयुक्त इति चेन्न औचित्यभङ्गेन त्वदुक्तार्थपरत्वमिति चक्रकप्रसङ्गात् मनःशब्दस्य स्वरसनिर्व्वाहे सम्भवति अहङ्कारपरत्वं चायुक्तं मनस इन्द्रियत्वमाश्रित्य विज्ञानशब्दस्याहङ्कारपरत्वमत एव नोपपद्यते विज्ञानशब्दस्याहङ्कारे स्वारस्याभावात् तत्स्थानस्यस्य बुद्धिशब्दस्यापि तत्तुल्यार्थत्वे क्लिष्टत्वादक्लिष्टार्थत्वे स्थानप्रमाणाविरोधाच्च । किञ्च विज्ञानशब्दस्य वा मनःशब्दस्य वाहङ्कारपरत्वे विज्ञानसारथिर्यस्तु बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव चेति वाक्यविरोधश्च, न हि हयत्वेन रूपितेन्द्रियसंयमनस्याहङ्कारो हेतुः, महच्छ-

ब्दस्य हिरण्यगर्भपरत्वमप्ययुक्तं हिरण्यगर्भस्य बुद्धिसंज्ञमहत्तत्त्वोपादानत्वाभावात् अव्यक्तमेव हि तदुपादानं कारणतया परत्वस्याविवक्षितत्वे प्रकरणस्वारस्यभङ्गः, एतदुक्तं भवति प्राचीनाधिकरणनिष्कर्षविरोधान्मनःप्राणशब्दयोरमुख्यत्वाच्चक्रकापत्तेश्च मनोबुद्धिविज्ञानशब्दानामस्वारस्यात् बुद्धिविज्ञानशब्दयोरर्थभेदे स्थानविरोधादहङ्कारस्येन्द्रियविजयोपायत्वानुपपत्तेश्च तयोर्वाक्ययोः कार्य्यकारणक्रमपरत्वायोगात् सुबालोपनिषत्प्रतिपन्नाप्ययक्रमस्य विरोधाभावेन संशयानुत्थानाच्च अस्य सूत्रद्वयस्यान्यैरुक्तप्रकारेणाधिकरणान्तरत्वमुक्तमयुक्तं चराचरेति स चायं पुरुषो जायमानः शरीरमभिसम्पद्यमान इति स उत्क्रामन् म्रियमाण इति देहसंयोगवियोगातिरेकेणात्मनो जन्ममरणश्रवणादुत्पत्तिविनाशौ स्त इति पूर्वपक्षं कृत्वा न जीवो म्रियत इत्यादिश्रुतेरभिसम्पद्यमान इत्यस्य जन्मविवरणरूपत्वसम्भवात् जन्ममरणयोः शरीरगतयोरात्मन्युपचरितत्वाच्च नोत्पत्तिविनाशाविति सिद्धान्तितं, तदयुक्तं पूर्वमनादित्वस्योक्तत्वात् नित्यत्वश्रुत्यादिना जन्ममरणविरहस्यानन्तरमेव वक्ष्यमाणत्वात् सिद्धे देहात्मभेदे तद्धर्मव्यपदेशस्यात्मनि माणवकेऽग्निभावस्येव उपचरितत्वसिद्धेश्च ॥ तेजोऽधिकरणं समाप्तम् ॥

आत्माधिकरणम् ।

सू० नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १८ ॥

सू० वियदादेः कृत्स्नस्य परस्माद्ब्रह्मण उत्पत्तिरुक्ता, इदानीं जीवस्याप्युत्पत्तिरस्ति नेति संशय्यते किं युक्तमस्तीति, कुतः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः, प्राक्सृष्टेरेकत्वावधारणाच्च वियदादेरिव जीवस्याप्युत्पत्तिवादिन्यः श्रुतयश्च सन्ति “यतः प्रसूता जगतः प्रसूतिः । तोयेन जीवान् विससर्ज भूम्याम् । प्रजापतिः प्रजा असृजत सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्र-

तिष्ठाः यतो वा इमानि भूतानि जायन्त इति, एवं सचेतनस्य जगत उत्पत्तिवचनाज्जीवस्याप्युत्पत्तिः प्रतीयते, न च वाच्यं ब्रह्मणोनित्यत्वात्तत्त्वमस्यादिभिर्जीवस्य ब्रह्मत्वावगमात् जीवस्य नित्यत्वमिति ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्मेत्येवमादिभिर्वियदादेरपि ब्रह्मत्वावगमात्तस्यापि नित्यत्वप्रसक्तेः, अतो जीवोऽपि वियदादिवदुत्पद्यत इत्येवं प्राप्तेऽभिधीयते नात्मा श्रुतेरिति, नात्मोत्पद्यते कुतः श्रुतेः, न जायते म्रियते वा विपश्चित् ज्ञाज्ञौ द्वावजावीशनीशावित्यादिभिर्जीवस्योत्पत्तिप्रतिषेधो हि श्रूयते

टी० सू० नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः, अवान्तरसङ्गतिमाह "वियदादे"रिति उत्पत्तिरस्ति नेतीति वियदादिवदुत्पत्तिरस्ति नास्तीति संशय्यत इत्यर्थः । किं जीव उत्पद्यते ने? ति तोयेन जीवा निति श्रुतिः किमुत्पत्तिं प्रतिपादयति? उत भोक्तृत्वानुगुणज्ञानसंकोचविकासमिति न जायते म्रियते इत्यादिकं जीवोत्पत्तिवचनस्य ज्ञानसंकोचविकासपरतामवगयति? ने? ति किमत्र नित्यत्ववचनमाकाशामृतत्ववचनवत् गौण? मुत मुख्य? मिति मुख्यत्वानङ्गीकारेऽकृताभ्यागमादिकं प्रसज्यते नेति,यदा न प्रसज्यते तदा नित्यत्ववचनस्य गौणतया न जायत इत्यादेश्च जीवोत्पत्तेर्ज्ञानविकासरूपतानवगमकत्वात्तोयेन जीवानित्यादिश्रुतेश्च जीवोत्पत्तिप्रतिपादकत्वाज्जीव उत्पद्यत इति भवति, यदा तु अकृताभ्यागमादि प्रसज्यते तदा नित्यत्ववचनस्य मुख्यत्वान्न जायत इत्यादि श्रुतेश्च जीवोत्पत्तेर्ज्ञानसङ्कोचविकासरूपत्वावगमकत्वात्तोयेन जीवानित्यादिश्रुतिरपि तादृगुत्पत्तिपरेति जीवो वियदादिवन्नोत्पद्यत इति सिध्यति । श्रुत्यर्थापत्तिमाह "एकविज्ञानेने"ति, श्रुतिमाह "वियदादे"रिति, । राद्धान्तमाह "एवं प्राप्त"इति । श्रुतिमाह "न जायत" इति, । श्रुत्यर्थापत्तिमाह–

सू० आत्मनो नित्यत्वं च ताभ्यः श्रुतिभ्य एवावगम्यते नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां योविदधाति कामान् अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे इत्यादिभ्यः, अतश्च नात्मोत्पद्यते, कथं तर्हि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपद्यते इत्यमुपपद्यते जीवस्यापि कार्य्यत्वात्कारणकार्य्ययोरनन्यत्वाच्च, एवं तर्हि वियदादिवदुत्पत्तिमत्त्वमङ्गीकृतं स्यात्, नेत्युच्यते कार्य्यत्वं हि नामैकस्य द्रव्यस्यावस्थान्तरापत्तिः तज्जीवस्याप्यस्त्येव, इयांस्तु विशेषः वियदादेरचेतनस्य यादृशोऽन्यथाभावो न तादृशो जीवस्य, ज्ञानसङ्कोचविकासलक्षणो जीवस्यान्यथाभावः, वियदादेस्तु स्वरूपान्यथाभावलक्षणः सेयं स्वरूपान्यथाभावलक्षणोत्पत्तिर्जीवे प्रतिषिध्यते, एतदुक्तं भवति भोग्यभोक्तृनियन्तॄन् विविक्तस्वभावान् प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्य तस्य नित्यतां च प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तृगतं चापुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्य तस्य नित्यत्वं निरवद्यत्वं सर्वदा सर्वज्ञत्वं सत्यसङ्कल्पत्वं करणाधिपाधिपत्वं विश्वस्य पतित्वं च प्रतिपाद्य सर्वावस्थयोश्चिदचितोस्तं प्रति शरीरत्वं तस्य चात्मत्वं प्रतिपादितम्, अतस्सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म

टी० "आत्मनो नित्यत्वं चे"ति, ताभ्यः श्रुतिभ्योऽवगम्यमानात् नित्याच्चेति सूत्रार्थः । चोदयति "कथ" मिति, परिहरति "इत्थ" मिति, पुनश्चोदयति "एवं तर्ही"ति, परिहरति "नेत्युच्यते" इति, जीवस्य कार्य्यत्वं

वियदादिवदुत्पत्त्यनङ्गीकारश्च व्याहताविति शङ्कायां चिदचितोरनुयायि-कार्य्यलक्षणमाह "कार्य्यत्वं ही"ति तर्हि कोविशेष? इत्यत्राह "इयां-स्त्वि"ति, वियदादेः स्वरूपान्यथाभावलक्षणः जीवस्य ज्ञानसङ्कोचविकासलक्षण इति विभागे किं प्रमाणं? जीवस्यापि स्वरूपान्यथाभावलक्षणं कार्य्यत्वं किं न स्यात् ब्रह्मणोऽपि कार्य्यत्वाभ्युपगमात् स्वरूपान्यथाभावाभ्युपगमे निर्विकारत्वहानिः । धर्मान्यथाभावाभ्युपगमे ज्ञानसंकोचस्य कर्मनिमित्तत्वात् कर्मवश्यत्वप्रसङ्ग इत्यत्राह "एतदुक्त"मिति, भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्यते न तु स्वासाधारणमित्यर्थः । करणाधिपाधिपादिशब्दैः श्रुतयः स्मारिताः, । घटकश्रुत्यर्थमाह "सर्वावस्थयो"रिति, आकृत्यधिकरणन्यायं स्मारयति "अतः सर्वदे"ति, सर्वदा चिदचिद्वस्तुशरीरं चेत् कार्य्यकारणभावभेदः कथमित्यत्राह–

सू॰ कदाचित्स्वस्मादविभक्तव्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति तत्कारणावस्थं ब्रह्म कदाचिच्च विभक्तनामरूपस्थूलचिदचिद्वस्तु शरीरं, तच्च कार्य्यावस्थं, तच्च कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति, चिदंशस्य च कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानविकासरूपविकारो भवति, उभयप्रकारविशिष्टे नियन्त्रंशे तदवस्थतदुभयविशिष्टतारूपविकारो भवति कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वये प्रकारिणि च समानः, अत एवैकस्यावस्थान्तरापत्तिरूपविकारापेक्षया येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तः यथा सोम्यैकेनेत्यादिना दर्शितः, ईदृशज्ञानसङ्कोचवि-

कासकरतत्तद्देहसम्बन्धवियोगाभिप्राया जीवस्योत्पत्तिमरणवादिन्यः "प्रजापतिः प्रजा असृजत इत्याद्याः श्रुतयोऽचिद्वस्तुवत्स्वरूपान्यथात्वाभावाभिप्राया उत्पत्तिप्रतिषेधवादिन्यो नित्यत्ववादिन्यश्च, न जायते म्रियते इत्याद्या नित्यो नित्यानामित्याद्याश्च श्रुतयः स्वरूपान्यथात्वज्ञानसङ्कोचविकासरूपोभयविधानिष्टविकाराभावाभिप्रायाः, स वा एष महानज आत्माऽजरोऽमरोऽमृतो ब्रह्म नित्यो नित्यानामित्याद्याः परविषयाः श्रुतयः ॥

टी० "तत्कदाचि"दिति, नामरूपविभागानर्हसूक्ष्मदशापत्तिरूपं कारणत्वं तदर्हस्थूलदशापत्तिरूपं कार्य्यत्वं च तुल्यं चेत्, कथमत्र वक्ष्यमाणविधिनिषेधविषयभूतमवान्तरवैषम्यमुच्यत इत्यत्राह "तत्रे"ति, अचितः स्वरूपान्यथाभावरूपपरिणामित्वे हेतुमाह "भोग्यत्वाये"ति, चितो ज्ञानसङ्कोचविकासरूपकार्य्यत्वे हेतुमाह "भोक्तृत्वाये"ति, परमात्मनस्तत्तदवस्थचिदचिन्नियमनरूपविकारास्पदत्वमाह उभयेत्यादिना, कार्य्यत्वं ब्रह्मणः कथमित्यत्राह "कारणावस्थाया"इति, विशिष्टं कारणं चेन्मृत्पिण्डदृष्टान्तः कथं घटत इत्याह "अत एवे"ति, यथा मृत्पिण्डदृष्टान्ते पार्थिवत्वाचेतनत्वादिकं नापेक्षितं तथा चिदचिद्विशिष्टत्वं स्वरूपान्यथाभावलक्षणविकाराभावं च ब्रह्मणि न बाधते मृत्पिण्डलोहमण्यादिदृष्टान्तः अपि त्वनेकविशेषणविशिष्टैकद्रव्यावस्थान्तरयोगमात्रे स दृष्टान्तः रूपादिमत्त्वान्मृत्पिण्डादेरित्यर्थः उत्पत्त्यनुत्पत्त्यादिपराणां श्रुतीनां विषयविभागमाह "ईदृशे"ति, अनिष्टविकाराभावाभिप्राया इत्यनिष्ट–शब्देन सोऽकामयत बहु स्यामित्याद्युक्तेष्टविकारा व्यावृत्ताः । सर्वदा चिदचिद्विशिष्टं ब्रह्म चेदेकत्वावधारणं कथमित्यत्राह–

सू० एवं सर्वदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः प्राक्सृष्टेरेकत्वावधारणं च नामरूपविभागाभावादुपपद्यते, तद्धेदं

Digitized by Google

तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते इति हि नामरूपविभागभावाभावाभ्यां नानात्वैकत्वे च वदन्तीति,। ये त्वविद्योपाधिकं जीवत्वं वदन्ति, ये च पारमार्थिकोपाधिकृतं, ये च सन्मात्रस्वरूपं ब्रह्म स्वयमेव भोक्तृभोग्यनियन्तृरूपेण त्रिधा ऽवस्थितं वदन्ति सर्वेऽप्येते अविद्याशक्तेरुपाधिशक्तेर्भोक्तृभोग्यनियन्तृशक्तीनां च प्रलयकालेऽवस्थानेऽपि तदानीमेकत्वावधारणं नाम रूपविभागाभावादेवोपपादयन्ति । वैषम्यनैर्घृण्ये न सापेक्षत्वात्, न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति सूत्राभ्यां जीवभेदस्य तत्कर्मप्रवाहस्य चानादित्वाभ्युपगमाच्च । इयान् विशेषः, एकस्यानाद्यविद्यया ब्रह्म स्वयमेव मुह्यति, अन्यस्य पारमार्थिकानाद्युपाधिना ब्रह्म स्वय[1]मेव बध्यते उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावादपरस्य ब्रह्मैव विचित्राकारेण परिणमते, कर्मफलानि चानिष्टानि भुङ्क्ते नियन्तृशस्य भोक्तृत्वाभावेऽपि सर्वज्ञत्वात्स्वस्मादभिन्नं भोक्तारमनुसन्दधातीति स्वयमेव भुङ्क्ते, अस्माकं तु स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म कार्यकारणोभयाऽवस्थावस्थितमपि सर्वदा निरस्तनिखिलदोषगन्धं सत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरमवतिष्ठते प्रकारभूतचिदचिद्वस्तुगता अपुरुषार्थाः स्वरूपान्यथाभावाश्चेति सर्वं समञ्जसम् ॥ आत्माऽधिकरणं समाप्तम् ॥

[1] ब्रह्मस्वरूपमेव बध्यते इति ता

Digitized by Google

टी० "एव"मिति, श्रुत्या नामविभागतदभावाभ्यां नानात्वैकत्ववचनादित्यर्थः, ये त्विति सूत्रोक्तत्वात् परैरपि तदभ्युपगमादिति हेतुद्वयमुक्तं भवति तर्हि परेषां पक्ष एव स्वीकार्य्य इत्यत्राह "इया"निति, नियन्त्रंशस्य न भोक्तृत्वमित्यत्राह "नियन्त्रंशस्ये"ति, सर्वेऽपि परे त्वश्रुतेरिति पदं छिन्दन्ति तदयुक्तं यथा सुदीप्तात् तोयेन जीवानित्यादिश्रुतिमूले पूर्वपक्षे प्राप्ते सत्यश्रुतेरिति हेतोरसिद्धत्वात् क्वचिदश्रवणस्य पूर्वपक्षहेतुताया व्युदस्तत्वाच्च श्रुतेरिति पदस्योत्तरत्रानुषङ्गदर्शनाच्च उत्क्रान्तिगत्यागतीनामित्यत्र श्रुतेरिति ह्यनुषज्यते श्रवणादित्यध्याहारेण योजनेति चेन्न अनुषङ्गसम्भवेऽध्याहारानुपपत्तेः । किञ्च ब्रह्मण एवाविकृतस्य जीवात्मनाऽवस्थितत्वात् ब्रह्मणश्चानुत्पत्तिमत्त्वादभिन्नस्य जीवस्यानुत्पत्तिरिति चानुपपन्नं सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वं पुरुष एवेदं सर्वमिति तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिरिति ज्योतींषि विष्णुर्भुवनानि विष्णुरित्यादिभिः पृथिव्यबादीनामपि ब्रह्मानन्यत्वेन हेतोर्व्यभिचारात्, नन्वचित्सामानाधिकरण्यं बाधार्थमिति चेत् जीवसामानाधिकरण्यमपि तथा किन्न स्यात्, तथा सति जीवस्वरूपनिवृत्त्या शास्त्रस्य प्रयोजनपर्यवसानं न स्यादिति सामानाधिकरण्यस्य वस्तुमात्रोपलक्षणत्वेऽप्यहमर्थनिवृत्त्या तस्यापुरुषार्थविश्रान्तिर्दुष्परिहरा, अतः पृथिव्यादिव्यावर्त्तकं ब्रह्मानन्यत्वं जीवस्यासिद्धम् । ब्रह्मैवाविकृतं जीवात्मनाऽवतिष्ठते विकृतं पृथीव्याद्यात्मनाऽवतिष्ठत इति चेन्न जीवस्य ज्ञातृत्वात्, तच्च ज्ञातृत्वं विक्रियात्मकमिति भवदभ्युपगमाच्च विकृतत्वाविकृतत्वरूपवैषम्याभावात् स विकारोऽपरमार्थ इति चेत् पृथिव्यादिविकारोऽप्यपरमार्थ इति पृथिव्यादेरप्यनुत्पत्तिर्जीवोत्पत्तिर्वा स्यात् । ननु पृथिव्यादिर्धर्मिण एव बाध्या जीवत्वमात्रमिह बाध्यम् अतः स्वरूपनित्यत्वमिति चेन्न पृथिव्यस्तीत्यादिततत्पृथिव्यादिसमानाधिकरणत्वात् सन्मात्रस्य पृथिवीत्वादिधर्ममात्रस्यैवापारमार्थ्यान्न पृथिवीस्वरूपबाध इति वक्तुं शक्यत्वात् अहमस्मि घटोऽस्तीति जीवस्य घटादेश्च सदव्यतिरेको ह्यविशेषेण प्रतीयते । किञ्च न तावत्परिशुद्धं जीवसंज्ञम् अनभ्युपगमात् तत्र

किमन्तःकरणविशिष्टं चैतन्यं जीवः ? उत तदुपलक्षितं ? प्रथमेऽन्तःकरणस्य सृष्टिसंहारविषयत्वेन तद्विशिष्टरूपस्याप्यादिमत्तया जीवस्योत्पत्तिप्रतिषेधोऽनुपपन्नः, द्वितीये शाखायसारसाभ्यां सह चन्द्रकेदारयोरिवोत्पत्तिप्रसङ्गाभावात्, ब्रह्मणो नित्यत्वस्यान्यत्र सिद्धत्वाच्चाधिकरणोत्थानं न स्यात् श्रुतिवैविध्यार्थपरिहारार्थमारम्भ इति चेत् कथं परिहारः उपाध्युत्पत्तिप्रलयावात्मन्युपचर्येते इतीति चेत् उपाधि-शब्दो यदि देहपरः तदा देहोत्पत्तिप्रलययोरात्मन्युपचरितत्वं चराचरव्यपाश्रय इत्यत्रोक्तमिति कृतकरत्वं स्यात्, अन्तःकरणपरश्चेदन्तःकरणस्याद्यन्तवत्त्वात् कर्त्तृभोक्तृत्वयोरन्तःकरणधर्मत्वाभ्युपगमादन्तःकरणप्रलये ब्रह्मणोऽनुपहितत्वात्तत्र वासनासम्बन्धायोगात् पुनरकृताभ्यागमादिप्रसङ्गो दुर्वारः अनुपहितस्वरूपे सर्ववासनासम्बन्धे भोगसङ्करश्च स्यात्, कर्मभोक्तुर्जीवस्यादिमत्त्वं सर्वथा दुष्परिहरं च स्यात्, अनुपहितस्वरूपे कर्तृत्वभोक्तृत्वाभावादुपाध्युपहितस्वरूपस्यादिमत्त्वाच्च औपाधिकभेदाभेदवादेऽप्यन्तःकरणोपहितब्रह्मण एव कर्तृतया भोक्तृतया जीवरूपेण स्थितत्वादुपहिताकारस्यादिमत्त्वाच्च कर्त्तुर्भोक्तुरादिमत्त्वमवर्जनीयम् । उपाधीनां गत्वरतया क्षणे क्षणे बन्धमोक्षणे प्रतिसन्धानानियमकर्मसङ्करादयश्च स्युः । अन्येषां पक्षेऽप्यश्रुतेरिति पदकल्पनम् पूर्ववदुदस्तं सर्गाधिकारेषु जीवस्य सृष्टिप्रलयाम्नानाभावपरम् अश्रुतिपदं व्याख्यातं तच्चायुक्तं यस्मिन्निदं सञ्च विचैमीत्युपक्रम्य सर्वे निमेषा जज्ञिरे इत्यतः प्रसूता जगतः प्रसूतिस्तोयेन जीवान् तिससर्ज भूम्यामिति स्मृतेः उत्पत्तिप्रलयनिषेधश्रुतीनां विषयविभागश्चानुपपन्नः हिमकरकसैन्धवादीनां जलत्वप्रत्यभिज्ञानायोग्यावस्थान्तरापत्तिः तरङ्गबुद्बुदादीनां जलत्वप्रत्यभिज्ञानयोग्यत्वेऽपि संस्थान्तरापत्तिः विभक्तजस्य विभाग एव न त्वभूयिष्ठो विकारः नात्र करकादिस्थानीया महदादयः ब्रह्मधर्मविज्ञानाद्यन्वृत्तेः तरङ्गस्थानीया जीवाः ज्ञानानन्दादीनाम् अल्पानुवृत्तेः विभक्तजलस्थानीया ईश्वरव्यूहाः ज्ञानाद्यनुवृत्तेः पूर्णत्वात् प्रलयेऽपि पृथिव्यादीनां न विभागशक्तिस्तिष्ठति किन्तु परिणामशक्तिरेव जीवानान्तु विभागशक्तिरवतिष्ठते ईदृशविशेषेण जीवस्य नित्यत्वाविना-

शित्वाजत्ववादा इति ह्युक्तं तत्र ब्रूमः किं विभागशब्देन नामरूपविभागं विवक्षित्वा नामरूपविभागाभिमानार्हता विभागशक्तिरित्युच्यते? उत जीवानां स्वरूपभेदप्रहाणेन पश्चाद्भेदप्राप्त्यर्हता विवक्षिता? आद्यः पक्षः साधिष्ठतमः । द्वितीये कटकमुकुटादीनामिव जीवानामादिमत्त्वं स्यात् कटकमुकुटादीनां प्रध्वंसे विभागशक्तिर्नास्ति जीवानां तु सा प्रलयेऽस्तीति चेन्न कटकादीनामपि विभागशक्तिमत्त्वेनावैषम्यात् अत एव हि हेमपिण्डात्पुनर्विभागः कटकादीनां भवति । ननु पूर्वं कटकोपयुक्तांशः पश्चादपि कटक एवोपयुज्यते न मुकुट इति नियमानर्हत्वाद्विभागशक्त्यभावः, जीवानां तु प्रतिनियतकर्मभोगानुगुणनियमवत्त्वाद्विभागशक्तिरवतिष्ठत इति चेत् समस्तभेदशून्यानां पुनर्भेदापत्तौ स एवायं पुण्यकृचान्य इति नियमानुपपत्तेः स्वेतरसमस्तव्यावर्त्तकाकारानन्तुगतौ देवदत्ते यज्ञदत्तप्रत्यभिज्ञानवत् स एवायमिति प्रत्ययस्य भ्रान्तिरूपता स्यात् कर्मशक्तय एव भेद इति चेन्न सर्वासां कर्मशक्तीनां सन्मात्रवृत्तित्वे-स्येयं कर्मशक्तिर्नान्यस्येति नियमानुपपत्तेः, अतः स्वाभाविकस्वरूपभेदे स्थित एवाविभागापत्तिर्वर्णनीया अन्यथा अकृताभ्यागमादिप्रसङ्गात्, अतो विभागशक्तिरवतिष्ठते न स्वरूपभेद इत्यनुपपन्नं अतस्स्वरूपभेदे नित्ये सत्युत्पत्त्यनुत्पत्तिश्रुत्योर्विषयव्यवस्था कार्या ॥ आत्माधिकरणं समाप्तम् ॥

ज्ञाधिकरणम् । **सू० ज्ञोऽत एव ॥ १९ ॥**

स्रु० वियदादिवज्जीवो नोत्पद्यत इत्युक्तं, तत्प्रसङ्गेन जीवस्वरूपं निरूप्यते किं सुगतकपिलाभिमतचिन्मात्रमेवात्मनः स्वरूप? मुत कणभुगभिमतपाषाणकल्पस्वरूपमचित्स्वरूपमेवागन्तुकचैतन्यगुणकम्? अथ ज्ञातृत्वमेवास्य स्वरूप? मिति, किं युक्तं चिन्मात्रमिति कुतः, तथा श्रुतेः, अन्तर्यामिब्राह्मणे हि य आत्मनि तिष्ठन्निति माध्यन्दिनीयपर्यायस्य स्थाने यो विज्ञाने तिष्ठन्निति काण्वा

Digitized by Google

अधीयते तथा—"विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चे"ति कर्तुरात्मनो विज्ञानमेव स्वरूपं श्रूयते, स्मृतिषु च "ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः" इत्यादिष्वात्मनो ज्ञानस्वरूपत्वं प्रतीयते। अपरस्तु जीवात्मनो ज्ञानत्वे ज्ञातृत्वे च स्वाभाविकेऽभ्युपगम्यमाने तस्य सर्वगतस्य सर्वदा सर्वत्रोपलब्धिप्रसङ्गात्करणानां च वैयर्थ्यात्सुषुप्तिमूर्च्छादिषु सतोऽप्यात्मनश्चैतन्यानुपलब्धेर्जाग्रत्सामग्र्यां सत्यां ज्ञानोत्पत्तिदर्शनादस्य न ज्ञानं स्वरूपं, नापि ज्ञातृत्वमागन्तुकमेव चैतन्यं सर्वगतत्वं चात्मनोऽवश्याभ्युपेत्यं सर्वत्र कार्य्योपलब्धेः सर्वत्रात्मनः सन्निधानाभ्युमाच्छरीरगमनेनैव कार्य्यसम्भवे सति गतिकल्पनायां प्रमाणाभावाच्च

टी० सू· ज्ञोऽत एव, अवान्तरसङ्गतिमाह "वियदादिवदि"ति, जीवस्वरूपस्य निरूपणीयत्वमस्त्येव तथाऽपि कार्य्यताप्रकारनिरूपणत्वाभावात् न पादेन साक्षात्सङ्गतिः, अतो वक्ष्यमाणाधिकरणचतुष्टयस्य प्रसङ्गात् सङ्गतिरित्यर्थः, तत्रास्याधिकरणस्य मुखान्तरेणापि सङ्गतिरप्यस्ति जीवस्य धर्मान्यथाभावलक्षणो विकारो न सम्भवति स्वरूपातिरेकेण ज्ञानाख्यधर्माभावात्, ज्ञानमेव हि स्वरूपमित्युक्ताक्षेपेणोत्थानात्, सेयं सङ्गतिरर्थसिद्धेत्यभिप्रेत्य न कण्ठोक्ता, किमित्यादि, किं जीवश्चैतन्यमात्रवपुः? उत जडस्वरूप एवागन्तुकचैतन्यः? उत स्वतो ज्ञाते? ति किं ज्ञानमात्रवपुष्ट्वे ज्ञानस्वरूपत्वतद्धर्मकत्वपरसर्वश्रुतिसामञ्जस्यम्? उतागन्तुकचैतन्यजडस्वरूपैकत्वे? उत स्वतो ज्ञातृत्वैकरूपत्व? इति ज्ञातृत्वस्य स्वरूपत्वे सर्वत्रोपलब्धिः प्रसज्यते ने? ति, तदर्थं किं जीवः सर्वगतः? उताणु? रिति अणुत्वे विप्रकृष्टार्थग्रहणाग्रहणे सम्भवतो ने? ति, एकजातीयद्रव्ययोर्नियतधर्मधर्मिभाव उपपद्यते ने? ति यदा नोपपद्यते तदा विप्रकृष्टार्थग्रहणाग्रहणासम्भवेन सर्वगतत्वात् सर्वत्रोपलब्धिप्रसङ्गेन ज्ञातृत्वस्य स्वरूपत्वे

सर्वश्रुतिसामञ्जस्याभावात् पक्षान्तरयोरन्यतरत् स्वीकार्य्यं स्यात्, यद् धर्मधर्मिभाव उपपद्यते तदा विप्रकृष्टार्थग्रहणाग्रहणासम्भवेनाणुत्वे सिद्धे सर्वत्रोपलम्भाप्रसङ्गात् सर्वश्रुतिसामञ्जस्येन ज्ञातृत्वस्वरूप आत्मेति सिद्ध्यति, चिन्मात्रमिति मात्रचा ज्ञातृतादिव्यावृत्तिः, चिन्मात्रमिति भावप्रधाननिर्देशः ज्ञातृत्वमित्यर्थः, ज्ञातृत्वमेवास्य स्वरूपमिति ज्ञातृत्वं स्वस्य परस्य चावभासप्रतिसम्बन्धित्वं, भासमानं वस्तु यस्मै भाति स हि ज्ञाता, तथात्वं ज्ञातृत्वमहंत्वमित्यर्थः, स्वरूपं स्वाभाविकाकारः, ज्ञानं यथा सत्यमित्यादि च पूर्वपक्षेऽनुसन्धेयम् । अपरस्तु—कणादमतानुसारीत्यर्थः । सर्वत्र कार्योपलब्धेः बुद्धिसुखदुःखाद्युपलब्धेर्देशान्तरे भोग्यवस्तूत्पत्तिश्च विभुत्वहेतुः तदुत्पत्तिरदृष्टसम्बन्धादेव भवति निराश्रयस्य धर्मादेस्तत्र सम्बन्धोऽनुपपन्न इति विभुत्वमभ्युपेत्यं, गतिकल्पनायां प्रमाणाभावाच्चेति गतिकल्पनपक्षे [1]गुणत्वं गतिश्चोभयं कल्प्यमितरपक्षे विभुत्वमेव कल्प्यमिति कल्पनालाघवाद्विभुत्वमेवोपपन्नमिति विभुत्वसम्भवादनन्यथासिद्धं गतेः कल्पकं नास्तीति भावः ॥

सू० श्रुतिरपि सुषुप्तिवेलायां ज्ञानाभावं दर्शयति "नाहं खल्वयमेवं संप्रत्यात्मानं जाना[2]त्ययमहमस्मीति नो एव इमानि भूतानी"ति, तथा मोक्षदशायां ज्ञानाभावं दर्शयति "न प्रेत्य संज्ञाऽस्ती"ति ज्ञानस्वरूपमित्यादिप्रयोगस्तु ज्ञानस्य तदसाधारणगुणत्वेन लाक्षणिक इत्येवं प्राप्ते प्रचक्ष्महे ज्ञोऽत एव, ज्ञ एव अयमात्मा ज्ञातृस्वरूप एव न ज्ञानमात्रं, नापि जडस्वरूपः कुतः अत एव—श्रुतेरेवेत्यर्थः नात्मा श्रुतेरिति प्रकृता श्रुतिरतः—शब्देन परामृश्यते तथा छान्दोग्ये प्रजापतिवाक्ये मुक्तामुक्तात्मस्वरूपकथने

१ अणुत्वमिति ।
२ जानात्ययमहमस्मीति पा० ।

“अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैवैतान्कामा-न्पश्यन् रमते य एते ब्रह्मलोके सत्यकामः सत्यसङ्कल्पः नोपजनं स्मरन्निदं शरीरम्” अन्यत्रापि “न पश्यो मृत्युं पश्यति”। तथा वाजसनेयके कतम आत्मेति पृष्ट्वा “योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः” इति “तथा विज्ञातारमरे केन विजानीयात् जानात्येवायं पुरुषः तथा एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः” “एवमेवास्य परिद्रष्टुरिमाः षोडश-कलाः” इति, यत्तूक्तं ज्ञातृत्वे स्वाभाविके सति सर्वगतस्य तस्य सर्वदा सर्वोपलब्धिः प्रसज्येत इति अत्रोच्यते ॥

सू० उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥

नायं सर्वगतः, अपि त्वणुरेवायमात्मा, कुतः उत्क्रान्तिग-त्यागतीनां श्रुतेः उत्क्रान्तिस्तावच्छ्रूयते “तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्य” इति, गतिरपि “ये वै केचास्माल्लोका-त्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ती”ति, आगतिरपि “तस्माल्लोकात्पुनरेत्यास्मै लोकाय कर्मणे” इति, विभुत्वे ह्येता उत्क्रान्त्यादयो नोपपद्येरन् ॥

सू० स्वात्मना चोत्तरयोः ॥ २१ ॥

च-शब्दोऽवधारणे, यद्यपि शरीरवियोगरूपत्वेन उत्क्रान्तिः स्थिरस्यात्मनः कथंचिदुपपद्यते गत्यागती तु न कथं चिदुपपद्येते अतस्ते स्वात्मनैव संपाद्ये ॥

Digitized by Google

सू० नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥

"योऽयं विज्ञानमयः प्राणेष्वि"ति जीवं प्रस्तुत्य स वा एष महानज आत्मेति महत्त्वश्रुतेर्नाणुर्जीव इति चेन्नेतराधिकाराज्जीवादितरस्य प्राज्ञस्य तत्राधिकारात्, यद्यप्युपक्रमे जीवः प्रस्तुतः तथाऽपि यस्यानुवित्तः प्रतिबुद्ध आत्मेति मध्ये परः प्रतिपाद्यत इति तत्सम्बन्धीदं महत्त्वं न जीवस्य ॥

सू० स्वशब्दोन्मानाभ्यां च ॥ २३ ॥

साक्षादणु–शब्द एव श्रूयते "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेशे"ति उद्धृत्य मानमुन्मानम् अणुसदृशं वस्तूद्धृत्य तन्मानत्वं जीवस्य श्रूयते "बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः" इति, "स चानन्त्याय कल्पत" इति "आराग्रमात्रो ह्यवरोऽपि दृष्ट" इति च अतोऽणुरेवायमात्मा ॥

टी० ॥ श्रुतिमाह "श्रुतिरपी' ति, राद्धान्तमाह "एवं प्राप्त"इति, ज्ञ एवेत्यादि, अत इति श्रुतिव्यक्तिभेदेऽप्यतः–शब्दोऽर्थवशादपेक्षितं वाक्यविशेषमुपस्थापयति, एतच्छब्दः प्रकृतजातीयपरामर्शीत्यर्थः। मनसैतान् कामान् पश्यन् रमते न पश्यो मृत्युं पश्यतीत्यादयो मुक्तात्मविषयाः अन्योऽन्तर आत्मा विज्ञानमयः, न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्याद्यनुसंधेयम्। अनन्तरसूत्रशङ्कामाह "यत्तूक्तमि"ति,। सू· उत्क्रान्तिगत्यागतीनाम्, ये वैके चेति उत्क्रान्तिशब्दानन्तरगतिशब्द उत्क्रान्त्यनन्तरभाविगतिपर इति भावः,। अस्मिन् सूत्रे श्रुत्यर्थापत्तिर्दर्शिता॥ सू·स्वात्मना चोत्तरयोः, कथं चिच्छब्देन तत्राप्यस्वारस्यं सूचितम् अणुत्वगत्योरुभयोरपि कल्प्यत्वात् परेण कल्पनागौरवमुक्तं तत्र गमनस्य श्रुतिसिद्धत्वेन कल्प्यत्वं ना·

स्ति अतो ऽणुत्वमेव कल्प्यमिति न गौरवं तत्र विभुत्वकल्पनं श्रुतिविरुद्धम् अणुत्वकल्पनं त्वविरुद्धम् इति भिदेत्यर्थः । सू॰ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्, अधिकारः प्रस्तावः यस्यानुवित्तः यस्य जीवस्यानुवित्तः विद ज्ञाने उपास्यः इत्यर्थः । यद्वा विदिर्लाभे प्राप्यः प्रतिबुद्ध आत्मा प्राज्ञ आत्मा । सू॰ स्वशब्दोन्मानाभ्यां च, स्व-शब्दः-अणु-शब्दः, नत्वणुत्वाक्षेपकशब्द इति भावः । अणुत्वं गतिश्चोभयं श्रौतमतो न कल्पनागौरवम्, अन्यतरश्रौतत्वे च न कल्पनागौरवमित्युक्तम् उत्क्रान्तिगत्यागतीनामित्यादिभिः श्रुत्यर्थापत्तिर्दर्शिता स्वशब्दोन्मानाभ्यां चेति श्रुतिर्दर्शिता बुद्धरात्मा महान् पर इत्यत्र बहुश्रुत्यर्थापत्तिविरोधात् पूजावाचित्वाच्च महच्छब्दः प्राधान्यपरः । अनन्तरसूत्रशङ्कामाह-

सू॰ अथ स्यादात्मनोऽणुत्वे सकलशरीरव्यापिनी वेदना नोपपद्यत इति तच्च मतान्तरेण परिहारमाह-

सू॰ अविरोधश्चन्दनवत् ॥ २४ ॥

यथा हरिचन्दनविन्दुर्देहैकदेशवर्त्यपि सकलदेहव्यापिनमाह्लादं जनयति तद्वदात्माऽपि देहैकदेशवर्ती सकलदेशवर्तिनीं वेदनामनुभवति, ॥

सू॰ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥

हरिचन्दनविन्द्वादेर्देहदेशे विशेषावस्थितिविशेषात्तथा भावः आत्मनस्तु तन्न विद्यत इति चेन्नात्मनोऽपि देहदेशविशेषे स्थित्यभ्युपगमात् हृदयदेशे ह्यात्मनः स्थितिः श्रूयते, "हृदि ह्ययमात्मा तत्रैकशतं नाड़ीना"मिति, तथा कतम आत्मेति प्रकृत्य "योऽयं विज्ञानमयः प्राणेषु हृद्य-

न्तर्ज्योति"रिति, आत्मनो हि देहदेशविशेषस्थितिख्यापनाय चन्दनदृष्टान्तः प्रदर्शितः । न तु चन्दनस्य देशविशेषापेक्षा, एकदेशवर्त्तिनः सकलदेहव्यापिकार्य्यकरत्वप्रकारं स्वमतेनाह—

सू० गुणाद्वाऽऽलोकवत् ॥ २६ ॥

वा-शब्दो मतान्तरव्यावृत्त्यर्थः, आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यावस्थितः आलोकवद्यथा मणिद्युमणिप्रभृतीनामेकदेशवर्त्तिनामालोकोऽनेकदेशव्यापी दृश्यते तद्वद्धृदयस्थस्यात्मनो ज्ञानं सकलदेहं व्याप्य वर्त्तते ज्ञातुः प्रभास्थानीयस्य ज्ञानस्य स्वाश्रयादन्यत्र वृत्तिर्मणिप्रभावदुपपद्यत इति प्रथमसूत्रे स्थापितम् । ननूक्तं विज्ञान[१]मात्रमेवात्मेति तत्कथं ज्ञानस्य स्वरूपव्यतिरिक्तगुणत्वमुच्यते तत्राह—

टी० "अथ स्या"दिति, वेदना—दुःखानुभवः सुखानुभवस्याप्युपलक्षणमिदम् । सू· अविरोधश्चन्दनवत्, वेदनामनुभवतीति ओदनपाकं पचतीतिवत् । यद्वा दुःखमनुभवतीत्यर्थः । सू· अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि, तत्रैकशतं नाड़ीनामित्यनेन एकदेशस्थस्य सकलशरीरव्यापिकर्मकरत्वप्रकारो दर्शितः न त्विति हरिचन्दनस्य हृन्नासिकानयनश्रोत्रादिमर्मप्रदेशेषु स्थित्या कार्य्यकरत्वं न तु हृन्मात्र इत्यभिप्रायेण न तु चन्दनस्येत्युक्तम् । अनन्तरसूत्रावतारायाह "स्वमतेने"ति, यद्यप्येकस्मिन्नवयविनि देशविशेषस्थित्या सर्वत्र कार्य्यकरत्वं तथा च सौभर्यादीनां बहुषु देहावयवेष्वणोरात्मनो देशविशेषस्थित्या कार्य्यकरत्वं न सिद्ध्यतीत्यभिप्रायेण निर्वाहान्तरोक्तिरिति भावः । सू· गुणाद्वाऽऽलोकवत्, अयुत-

१ ज्ञानमात्रमेवात्मेति तु पा· ।

सिद्धविशेषणस्य कथं देशान्तरे वृत्तिरित्यत्राह "ज्ञातुरि"ति,। अनन्तरसूत्रमवतारयति "नन्वि"ति,

सू० व्यतिरेको गन्धवत्तथा च दर्शयति ॥ २७ ॥

भू० यथा पृथिव्या गन्धस्य गुणत्वेनोपलभ्यमानस्य ततो व्यतिरेकः तथा जानामीति ज्ञातुर्गुणत्वेन प्रतीयमानस्य ज्ञानस्यात्मनो[१] व्यतिरेकसिद्धिं दर्शयति च श्रुतिः जानात्येवायं पुरुष इति, ॥

सू० पृथगुपदेशात् ॥ २८ ॥

स्व-शब्देनैव ज्ञानं विज्ञातुः पृथगुपदिश्यते "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत" इति, ॥

यत्तूक्तं यो विज्ञानो तिष्ठन् विज्ञानं यज्ञं तनुते ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थत इत्यादिषु ज्ञानमेवात्मेति व्यपदिश्यत इति तत्राह-

सू० तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

तु-शब्दश्चोद्यं व्यावर्तयति तद्गुणसारत्वात् विज्ञानगुणसारत्वादात्मनो विज्ञानमिति व्यपदेशः विज्ञानमेवास्य सारभूतो गुणः यथा प्राज्ञस्यानन्दः सारभूतो गुण इति प्राज्ञ आनन्द-शब्देन व्यपदिश्यते यदेष आकाश आनन्दो न स्यात् आनन्दो ब्रह्मेति व्यजानादिति प्राज्ञस्य ह्यानन्दस्सारभूतो गुणः स एको ब्रह्मण आनन्दः आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने"ति यथा वा "सत्यं ज्ञानमनन्तं ब्रह्म"ति विपश्चितः प्राज्ञस्य ज्ञान-शब्देन व्यपदेशः "सह ब्रह्मणा विपश्चिता यस्सर्वज्ञ इत्यादिषु प्राज्ञस्य ज्ञानं सारभूतो गुण इति विज्ञायते ॥

१ प्रतीयमानस्य ज्ञानस्यात्मनोऽव्यतिरेकः सिद्धः, दर्शयति च श्रुतिरिति पा० ।

Digitized by Google

सू० यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

विज्ञानस्य यावदात्मभाविधर्मत्वेन तद्व्यपदेशो न दोषः तथा च खण्डादयो यावत्स्वरूपभाविगोत्वादिधर्मशब्देन गौरिति व्यपदिश्यमाना दृश्यन्ते-

टी० सू० व्यतिरेको गन्धवत्तथा च दर्शयति, जानामीति धर्मधर्मिणोः प्रकृतिप्रत्ययवाच्ययोर्भेदानुभवो दर्शितः तथा चेति सूत्रखण्डं व्याचष्टे 'दर्शयति च''ति, सू० पृथगुपदेशात्, सर्वसूत्रे सुरभिकुसुममितिवद्विशिष्टवाचिनः शब्देन विशेष्याद्विशेषणतया व्यतिरेक उक्तः, अत्र तु विशेषणविशेष्ययोः पृथक्शब्देनाभिधानमिति भिदा । अनन्तरसूत्रशङ्कामाह "यत्त्वि"ति, सू० तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्, सार-शब्देन प्रधानत्वं विवक्षितं तच्च यावदात्मभावित्वम्, आनन्दज्ञानयोर्गुणत्वप्रदर्शनार्थं स एको ब्रह्मण आनन्दः यः सर्वज्ञो विपश्चितेत्यादि श्रुतिरुदाहृता, गुणवाचिशब्देन गुण्यभिधानं लाक्षणिकमित्यत्राह सू० "यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्, न हि गोत्वादयो यादात्मभाविन इत्यत्राह-

भू० स्वरूपनिरूपणधर्मत्वादित्यर्थः च-कारो ज्ञानवदात्मनोऽपि स्वप्रकाशत्वेन ज्ञानमिति व्यपदेशे न दोष इति समुच्चिनोति, ॥ यच्चोक्तं सुषुप्त्यादिषु ज्ञानाभावान्न ज्ञानस्य स्वरूपानुबन्धिधर्मत्वमिति तदाह-

सू० पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

तु-शब्दश्चोदिताशङ्कानिवृत्त्यर्थः, अस्य ज्ञानस्य सुषुप्त्यादिष्वपि विद्यमानस्य जागर्य्यादिष्वभिव्यक्तिसम्भ-

Digitized by Google

COPPER-PLATE GRANT

OF

VAIDYADEVA

KING OF KÂMARÛPA

ONCE MINISTER OF

KUMÂRAPÂLA

KING OF GAUḌA

OF THE

PÂLA SÛRYAVAṂṢA

DATE CIRC 1142 A. D.

BENARES:
PRINTED AT THE MEDICAL HALL, PRESS.

1893.

Digitized by Google

Digitized by Google

GRANT OF VAIDYADEVA.

Twenty-five copper-plate inscriptions were found last October in the village of Kamauli near the confluence of the Barna and the Ganges at Benares. The story at the time was that a villager while ploughing a field had turned up one of the plates with his plough and so discovered the others; but I do not know whether this simple and (in India) not unusual story has been subsequently confirmed by official inquiry into the locality and circumstances of the find. Mr. R. H. Brereton, Magistrate of Benares, sent me the two plates, which are the subject of this and the following paper, viz., the grant of Vaidyadeva and another of Govindachandra of Kanauj, for immediate examination and report. On receiving from me (10. Oct. 1892) a few rough notes as to their general contents and approximate dates, he kindly permitted a more careful and leisurely revision of these grants.*

The Vaidyadeva Grant is engraved on three plates. A spoon-like arrangement loosely holds the plates together, its narrower, hooked end being passed through a hole in the middle of their right hand margins. The broader, hollow end of the spoon contains a figure of Gaṇeṣa. The plates measure $9\frac{3}{4}''$ broad by $7''$ high, and weigh together 2lbs. 13oz.; their margins are slightly thickened outwards. The first plate is inscribed on the inner side only. Each side contains sixteen lines, except the outer side of the third plate on which there are nine

* The remaining plates were placed in the Treasury, pending the final orders of Government as to their disposal.

Digitized by Google

lines only. The size of the letters is about $\frac{1}{4}''$. On the whole the writing is well preserved, being nowhere completely obliterated.

The characters resemble those of the Deopara inscription of Vijayasena (Kielhorn: Epig. Indic. Vol. I. p. 305) but approach more closely to the modern Bengali character. They may also be compared, in some respects, with the characters of the Kṛishṇadvârikâ Temple inscription at Gayâ (Arch. Survey. Vol. III. plate xxxvii), which Kielhorn describes as "a kind of Devanâgarî which appears to have been current in the 12th Century A. D." (Ind. Antiq: Vol. xvi p. 63.).

Peculiarities, epigraphical and orthographical, are always better seen than described; but the purpose of this notice will have been sufficiently served, it is hoped, by the corrigenda in the foot-notes to the printed text. Lines 6-13 of Plate III. a. have not been corrected, because they are mostly filled with names of villages, tanks, their exact boundaries &c. in prakrit forms. It may be remarked in passing that the engraver of the plates (or his prompter) has fallen an easy victim to the shibboleth of श, ष, स. The language is Sanskrit, prose and verse.

The inscription records the grant of two villages named Baḍâ and Mandarâ situated in the *vishaya* of Bâḍâ, in the *bhukti* of Prâgjyotisha, in the *maṇḍala* of Kâmarûpa. The donee is a brahman named Ṣrîdhara, the son of Yudhishṭhira and Pâî his wife, and the grandson of Bharata who was born of the gotra of Viṣvâmitra, in the village of Bhâva in Vârendrî. Vaidyadeva, the donor, is the son of Bodhideva and Pratâpadevî his wife, and the grandson of Yogadeva.

Digitized by Google

His caste is not mentioned; but there can be little doubt that he was a Brahman. He was a devotee of both Ṣiva and Vishṇu. His father and grandfather, in their time, had been the ministers of Râmapâla and Vigrahapâla, who were the father and grandfather respectively of Kumârapâla. The royal and the ministerial lines are tabulated side by side, thus :—

Sûryavaṃsî Pâlas.	*Mantrins.*
I. Vigrahapâla.	1. Yogadeva.
II. Râmapâla (son of I).	2. Bodhideva (son of 1).
III. Kumârapâla (son of II).	3. Vaidyadeva (son of 2).

From the inscription we directly learn but little more about the Pâlas than is given in the above table. Vigrahapâla is dismissed in a single verse as "perfect in every accomplishment"—a brief but appropriate intimation, perhaps, that his reign was brief. Râmapâla, a warrior, is compared to his great namesake. If the dark conceit of verse 4 has not escaped me, it means in bald prose that Râmapâla conquered (or regained?) Mithilâ, and killed a certain raja Bhîma, whom I am unable to identify. Kumârapâla is styled Lord of Gauḍa. He loved Vaidyadeva "dearer even than life" to whose generalship he entrusted the fortunes of the empire. Vaidyadeva was a stern minister and a victorious general. If verse 11 and verses 13-17 do not refer to the same event, he won two glorious victories for his master; the one in the southern part of Vaṅga (but see note 86) ; the other "in the East" when he killed a rebellious vassal * whose name I read hesitatingly as Timgyadeva.

* Can सत्कृतस्य नृपतेर्वैकृति: mean anything else than the disaffection of a vassal?

Digitized by Google

It might be read, as in this cutting †, तिङ्गयं, तिग्म्य, तिक्श्य, or even तिग्य, or तिश्य if the diagonal continuation to the right be the sign of elision found elsewhere in these plates. In the kingdom "in the East" was included Kâmarûpa; for it was here that the two villages conveyed by Vaidyadeva as Mahârâjâdhirâja &c. were situated. He dates the charter from his victorious camp at Haṃsâkonchî, which again I cannot identify. His younger brother (? nephew), Budhadeva, is introduced without any apparent reason, unless indeed it be to mark him as the heir. The praṣasti was written by Manoratha, the son of the râjaguru Murâri and Padmâ his wife. The Ṣâsana was delivered by Gonandana, Vaidyadeva's dharmâdhikârin. It was engraved by Karṇabhadra.

The date of the Vaidyadeva Grant remains to be discussed. I have failed to work it out directly from the text. The statement in Plate III. a. l. 5 appears to be only a prose repetition of the statement in verse 28, with the addition of the word *Sam* and a numerical sign which might be read *6* instead of *9*; and this I take as the regnal year of Kumârapâla. The syllable *ni*, with which it concludes, I take as a contraction of *nibaddham* (to qualify ṣâsanaṃ). Verse 28 will be considered below. The other statement in ll. 3, 4 of Plate III. a. baffles me. The letters are sketched thus :



† The metal of the plate is injured. The श्रीति * * देव is clear. A word of apology for the wood-cuts inserted above. They are not likely to do any harm. And until the Government has issued final orders as to the disposal of these inscriptions, a more accurate process of reproducing them on an extensive scale cannot be undertaken.

Digitized by Google

The last word *Guggulî* is very doubtful. Read thus, it may be explained as an upanâman of Ṣrîdhara, the donee, in reference to the story of the *Guggulu* in verse 26. But the forms of conjunct *gga* are entirely different in the two words. I am still inclined to think that the letters read *Guggulî* are somehow connected with the date indication.

Failing to fix Vaidyadeva's date from the inscription itself, I have been forced to enter on the much debated chronology of the Pâla and Sena Dynasties. Now in regard to the Pâla Dynasty, the reign of Mahîpâla from 1006 A. D. to 1060 A. D., and the accession of Govindapâla in 1161 A. D., are practically the only dates unanimously accepted by the latest modern authorities. The intervening names, the order of their succession, and their dates are still disputed. Kielhorn (Epig. Indic. Vol. II. p. 161), differing from Hörnle, hopes "to prove before long that the successors of Nârâyanpâla were: his son Râjyapâla; his son Gopâla II; his son Vigrahapâla II; his son Mahîpâla; his son Nayapâla; and his son Vigrahapâla III." The grounds on which Kielhorn's view is based, if already published, have not yet come under my notice. I may therefore be allowed the parenthetical remark, that his view is, in part at least, supported by the Vaidyadeva Grant. For if this Grant be historically trustworthy, the kings Vigrahapâla, Râmapâla and Kumârapâla must be placed together in this unbroken order. But no place in the Pâla line can be found for this trio previous to Mahîpâla. Nayapâla's position is not so easy to decide. Hörnle identifies him with Devapâla, 956—991 A. D., (Ind. Antiq. Vol.

XIV. p. 164). Of course there may have been two or more of his name in the Pâla Dynasty. But I may observe that the exact position of Nayapâla is not material to the present inquiry.

I return to verse 28, and premising the succession given by Kielhorn, I would thus state the problem widely: Between the years 1060 A. D. and 1161 A. D., to find the year in which the Meshasaṃkrânti fell i) on ekâdaṣî and ii) on dvâdaṣî in Vaiṣâkha (kṛishṇapaksha)? Pandit Sudhâkara Dvivedin very kindly provided the following answer:—i) ekâdaṣî: 1077, 1096, 1123, 1142, 1161 A. D. ii) dvâdaṣî: 1115, 1134 A. D. Now the years 1077, 1096, 1115 and 1123 may at once be rejected as altogether too early for Kumârapâla by whom Vaidyadeva was made a king. The year 1134 may also be rejected. For since we do not know whether Kumârapâla was the immediate predecessor of Govindapâla or not, we are not at liberty to count the years of Kumârapâla backwards directly from 1161 A. D. Then turning to the other end of the line, even if Nayapâla's name be omitted from that part of the royal succession which is now under review, it is safer to place Kumârapâla nearer the end than the beginning of the period 1060 A. D.—1161 A. D. Thus 1142 and 1161 remain. And of the two 1142 A. D. seems the more probable date for the Grant of Vaidyadeva. Saṃ 6 (or 9) in Plate III. a. l. 5 I have taken doubtfully as a regnal year of Kumârapâla, whose accession would thus date from 1133 A. D. or 1136 A. D. The 4th year mentioned in ll. 3, 4 may be the regnal year of Vaidyadeva, whose rule in Assam would then date from 1138 A. D.

Digitized by Google

Next as to the history of the Sena Dynasty, it is generally acknowledged that sometime during the second half of the XI Century A. D. the Pâlas lost Eastern and Northern Bengal (including Assam) to the Senas under Vijayasena. "Vijayasena's reign (Kielhorn writes, Epig. Indic. Vol. I. 307.) may therefore be reasonably supposed to have begun about the beginning of the last quarter of the eleventh Century." I have no wish to indulge in further speculation. Briefly, this is what I imagine the drift of events to have been. At first, i. e. roughly from 1060—1130 A. D. the Pâlas were driven westwards by the Senas. Then the Senas began to lose ground rapidly and were driven back by the Pâlas into a small corner of Bengal, where they were finally demolished by the Muhamadans at the beginning of the XIII Century A. D. Thus the conquest of Janakabhûmi (Mithilâ) by Râmapâla, recounted in verse 4 of the Vaidyadeva Grant, may have been an historical fact, marking the return of power to the Pâla line. And thus too the Pâla culmination under Kumârapâla about 1142 A. D. would synchronise with the Sena decadence under Keṣavasena or his successor.

To recapitulate: Vaidyadeva's Grant furnishes some new historical material, viz., a trio of the royal line of Pâlas arranged in order of descent; it throws some more light on the relations existing between the rival Pâla and Sena Dynasties in Bengal during the XII Century A. D.; and its data, as confirmed by the history of the period, seem to point to 1142 A. D. as its probable date.

Digitized by Google

I cannot conclude this notice without expressing my obligations to Pandits Ṣîtalâprasâda Tripâṭhin and Vindhyeṣvarîprasâda Dvivedin of the Government Sanskrit College for their valuable assistance in the preparation of the accompanying text.

A. V.

Digitized by Google

TEXT.

PLATE I. (Inner side only.)

Line 1. ॐ नमो भगवते वासुदेवाय ॥ स्वस्ति ॥ अम्बरमान-
„ „ स्तम्भ: कुम्भ: संसारबीजरक्षाया: । हरिदन्तर-
„ 2. मितमूत्ति: क्रीडापोत्री हरिज्जयति[1] ॥[2] (Verse 1). एतस्य
„ „ दक्षिणदृशो वंशे मिहिरस्य जातवान पूव्वं[3] । विग्रहपा-
„ 3. लो नृपति: सव्वाकारर्द्धिसंसिद्ध:[4] ॥ (2). यस्य वंश-
„ „ क्रमेणाभूत्सचिव: शास्त्रवित्तम: । योगदेव इति
„ „ ख्यात:
„ 4. स्फुरट्टोट्टगण्डविक्रम: ॥[5] (3). तस्योज्जस्वलपौरुषस्य[6] नृप-
„ „ ते: श्रीरामपालोऽभवत्पुत्र: पालकुलाब्धिशी-
„ 5. तकिरण: साम्राज्यविख्यातिभाक । तेने येन जगत्त्रये
„ „ जनकभूलाभाद्यथाँवद्यश: क्षोणीनायकभीम-
„ 6. रावणवधाद्युद्दार्णवोल्लंघनात्[7] ॥[8] (4). यस्य शुद्धस-
„ „ चिव: पुराभवद्बोधिदेव इति तत्वबोधभू: । विश्वगेव
„ „ वि-
„ 7. दितोऽद्भुतैर्गुणैरुज्भितात्मसदृश: क्षितावयं[9] ॥[10] (5).
„ „ अस्य प्रतापदेवी पत्नी धर्म्मर्द्धिकीर्त्तिविश्रान्ति:

---

1. read मूर्त्ति:. and हरिर्ज्जयति 2. Metre of verses 1 and 2: Pathyâ-ryâ. 3. read जातवान् पूर्व्वम्. 4. read सर्व्वाकारर्द्धि° 5. Metre: Ṣloka. (Pathyâvaktra). 6. read तस्योर्ज्जस्वल°. 7. read° भाक्. °ल्लङ्घनात् 8. Metre: Ṣârdûlavikrîḍita. 9. read तत्व° विष्वगेव °तावयम् 10. Metre: Rathoddhatâ

Digitized by Google

Line. 8. विश्रान्तिः[11] । आसीदसीमकान्तिः सन्तोषस्याकृतिः
,, ,, पत्युः ॥[12] (6). अभूदमुष्यान्तनयोऽस्य विश्रुतः श्रीवे-
,, 9. श्रीवैद्यदेवः[13] परया श्रिया युतः । यदुच्छलत्कीर्त्तिश-
,, ,, रोवरोद[14] पद्माङ्कुराभः शिवभूधरो–
,, 10. भवत् ॥[15] (7). दैवज्ञेषु च तर्क्कुकेषु च जनुर्द्दिष्टस्य दि-
,, ,, ष्टिश्रुतेरन्नस्वप्रधृतीर्भ्भटित्यरिभटैरुन्मु–
,, 11. च्य संमूर्च्छितं । किञ्चैतन्निजबन्धुवृन्दनयनप्राद्भूतहर्षा-
,, ,, म्बुभिः पारक्यप्रसरप्रतापदहनस्याभूद्विनि–
,, 12. र्व्वापणं[16] ॥[17] (8). सोऽयं रामनरेन्द्रजस्य सचिवः सा-
,, ,, म्राज्यलक्ष्मीजुषः प्रख्यातस्य **कुमारपाल**नृपते–
,, 13. श्चित्तानुरूपोऽभवत् । यस्यारातिकिरीटहाटककृतप्रा-
,, ,, सादकण्ठीरवग्रासत्रासवशादपैष्यति
,, 14. विधोब्बिम्बाङ्करूपी[18] मृगः ॥ (9). सचिवसमाजशरोज[19]-
,, ,, तिग्मभानुः प्रसरयशोऽम्बुधिरेष **वैद्यदेवः** । स–
,, 15. हजवदान्यतयैव चम्पकेशः सुजनमनःकुमुदेषु शीतर-
,, ,, स्मिः[20] ॥[21] (10). यस्यानुत्तरवङ्गसङ्गरजये नौवाट–
,, 16. हीहीरवत्रस्तैर्द्दिक्करिभिश्च[22] यन्न चलितं चेन्नास्ति तद्ग-
,, ,, म्यभूः । किञ्चोत्पातुककेनिपातपतनप्रोत्सर्पितैः

11. read धर्म्मर्द्धिकीर्त्तिविश्रान्तिः. 12. Metre Pathyâryâ. 13. read श्रीवैद्यदेवः 14 read °सरोवरोदरे. The रे is supplied from a *truṭi*, which is found at the bottom of the plate and is prefixed by the numeral sign 8 or 9. 15. Metre: Upajâti of Vaṃśastha and Indravaṃśa. 16. read जनुर्द्दिष्टस्य, i. e. "of the birth time (of Vaidydeva)." संमूर्च्छितम् °निर्व्वापणम् 17. Metre of verses 8 and 9: Śârdûlavikrîḍita. 18. read विधोर्ब्बिम्बा°. 19. read °सरोज° 20. read शीतरश्मिः 21. Metre: ? 22. read °त्रस्तैर्द्दि°

PLATE II. a.

Line. 1. शीकरैराकाशे स्थिरता कृता यदि भवेत्स्यान्निष्कलङ्कः
» » शशी ॥[23] (11). **गौडेशस्य कुमारपाल**नृपते-
» 2. र्दोर्व्वीर्य्यतेजस्पतेः[24] त्रैलोक्योदरपूरिभूरियशसः प्रज्ञा-
» » नवाचस्पतेः । सप्ताङ्गक्षितिपाधिपत्वमभितः
» 3. संचिन्तयन्नग्रधीः प्राणेभ्योप्यतिबन्धुरस्य सचिवः सोऽभू-
» » द्गुणिग्रामणीः ॥ (12). एतादृशे[25] हरिहरिद्भुवि स-
» 4. त्कृतस्य श्री**तिम्मयदेव**[26]नृपतेर्व्विकृतिं निशम्य । **गौ-**
» » **डेश्वरेण** भुवि तस्य नरेश्वरत्वे श्री**वैद्यदेव** उरु-
» » कीर्त्ति-
» 5. रयं नियुक्तः ॥[27] (13). स्रजमिव शिरस्यादायाज्ञां प्रभो-
» » रुरतेजसः । कतिपयदिनैट्टूत्वा[28] जिष्णुः प्रयाणमसौ
» 6. द्रुतं । तमवनिपतिं जित्वा युद्धे बभूव महीपतिन्नि-
» » जभुजपरिष्पन्दैः[29] साक्षाद्दिवस्पतिविक्रमः ॥[30] (14). ए-
» 7. तस्य प्रवरप्रयाणसमये पांशूत्करैः स्थण्डिलप्राये व्योम-
» » तले क्कैसप्तिकगणै[31]-
» 8. लेभ्योऽङ्घ्रियानश्रमः । किञ्चाचिद्द्वयगोपनेन करयोरन्य-
» » क्रियास्वक्षमः सुक्षामा नय-

---

23. Metre of verses 11 and 12: Ṣârdûlavikrîḍita 24. read °नृपते. र्दोर्व्वीर्य्य° 25. read एतादृशो. 26. see Introduction: pp. III. IV. 27. Metre: Vasantatilakâ. 28. read °दिनैर्द्धत्वा. and द्रुतम् One would expect प्रयाणं कृत्वा 29. read महीपतिर्न्निज°. 30. Metre: Hariṇî.

Digitized by Google

Line. 9. नानिमीलनकरं कर्म्म स्वकं निन्दति ॥[32] (15). दोर्द्द-
" " ग्डारणिजे[33] हविर्भुजि भटव्रातेन्धनैरेधिते
" 10. संग्रामाध्वरपूजिते रिपुशिरःश्रेणीलसत्श्रीफलैः[34] । कृत्वा
" " होमविधिं परर्द्धितिभु-
" 11. जा दत्वाथ[35] पूर्णाहुतिं लब्धोदग्रयशो[36] महत्फलमसौ
" " श्रीवैद्यदेवो बभौ ॥ (16). यदुरुसमरमध्यात[37]
" " खड्गघाता-
" 12. त्पतद्भिः परसुभटशिरोभिव्योम कीर्णं निरीक्ष्य । झटि-
" " ति विसरराहुव्यूहधीबिभ्यदर्कः स्व-
" 13. रुचमपि रजोभिः प्रोंच्छयन्[38] स्वं जुगोप ॥[39] (17). चन्द्र-
" " स्योद्भवभूर्महीध्रसरणं सत्वप्रधानाशयः पा-
" 14. त्रश्रीमहितः स्फुरद्रसमयः सोयं गभीरः परः । रत्नानां
" " निलयः श्रियः कुलगृहं स्वान्तस्थित-
" 15. श्रीपतिः स्यादेवं सदृशोऽम्बुधेर्य्यदि जलाधारोऽथवा लं
" " घितः[40] ॥[41] (18). ज्ञानैर्गीष्पतिरूर्जितैर्द्विनपतिः
" 16. सत्पौरुषैः श्रीपतिर्द्धैर्य्यैरम्बुपतिर्द्धनैर्द्धनपतिर्द्दानैः[42] स च-
" " म्पापतिः । किञ्चैतेपि गिरोपमानविषयाः

PLATE II. b.

" 1. प्रायः प्रसिद्धैर्ब्बलाद्भ्रम किन्तु वयं स्वयं स्वसदृशः सर्व्वैर्गु-
" " णानां[43] गणैः ॥०॥ (19). यस्य श्रीबुधदेव इत्यनुजभूः

32. Metre of verses 15 and 16: Ṣârdulavikriḍita 33. read दोर्द्दण्डा°. 34. read °लसच्छ्रीफलैः 35. read दत्त्वाथ 36. read लब्धोदग्रयशा. 37. read °मध्यात् 38. read °शिरोभिर्व्योम °प्रोञ्छयन्. 39. Metre: Mâlinî. 40. read महीध्रशरणं सत्त्व° लङ्घितः 41. Metre of verses 18,19,and 20: Ṣârdûlavikriḍita. 42. read °रूर्जितैर्द्विन° श्रीपतिर्द्धैर्य्यैरम्बुपतिर्द्धनैर्द्धनपतिर्द्दानैः. 43. read भ्रमः and सर्वैर्गुं°.

Digitized by Google

Line. 2. श्रीरामभद्रानुजप्रायस्ततदसीमनिर्म्मलगुणैर्द्रुम्मैर्द्विशील-
,, ,, द्विभूः[44] । दानैः शोभनपल्लवैर्द्विज[45]—
,, 3. कुलप्रीतिप्रदानैरपि । ख्यातः कल्पमहूहप्रतिकृतिर्ट्टोर्व्वी-
,, ,, र्य्यंजृम्भायसाः[46] ॥ (20). अथाभ—
,, 4. वत कौषिकसञ्ज्ञको मुनिमुनीन्द्रमुख्यो[47] निजगोचपू-
,, ,, रुषः । पयोजजन्मास्यचयभमशमात्
,, 5. यद्रास्यपद्मे तु सुखं गिरा स्थितं[48] ॥[49] (21). एतद्वंशे महति
,, ,, भरतः प्रादुरासीतद्विजातिर्भावग्रामे
,, 6. प्रविसरयसाः शासनोग्रे वरेन्द्र्यां अस्तामन्यद्गुणगण-
,, ,, समाख्यानमाख्यानमाचाद्यन्नाम्नोऽ—
,, 7. पि स्फुटति निखिलः क्षिणिषानां प्रपञ्चः[50]॥[51] (22). अस्य
,, ,, विप्रतिलको युधिष्ठिरः पुत्र इ-
,, 8. त्यभवत्सुधीश्वरः[52] । शास्त्रवेदपरिशुद्धबोधभूः श्रोचिय-
,, ,, त्वविलसद्यशोनिधिः ।[53] (23). पाई-
,, 9. तिधर्म्मपत्नी धीरवरस्यास्य चित्तविश्रान्तिः । असीदसी-
,, ,, मकान्तिः शीलौदायश्रीयां[54]

44. read °स्ततदसीम° °धर्म्मैर्द्विशीलर्द्धिं° 45. The var. lect. सत्फलपल्लवैः (with the numerical sign 2 affixed) is given in the upper margin of the plate; and शोभन° is cut out in the text. 46. Read कल्पमहीरुहप्रतिकृतिर्द्धोर्व्वीर्य्यचञ्चद्यशाः । जृम्भा° is cut out in the body of the plate, and चञ्चद्य (with the sign 3 affixed) is supplied in the lower margin. 47. read °भवत् कौशिक° °मुनिर्मु° 48. read °भमश्रमात्. and स्थितम्. 49. Metre: Vaṃṣastha. 50. read एतद्वंशे * * प्रादुरासीद् * * प्रविसरयशाः * * * वरेन्द्र्याम् । आस्तामन्य°. °क्लिल्विषाणां. 51 Metre: Mandâkrântâ. 52. °भवत्सुधीश्वरः faulty metre. 53 Metre: Rathoddhatâ. 54. read आसीद° * * शीलौदार्यश्रियां.

Line. 10. वसति: ॥[55] (24). पूव्वपूव्वजनुज्जन्मकम्मपाकदभूत्सुत-

„ „ स्तस्यैतस्यां द्विजाधीसपूज्य:[56] श्रीश्रीध-

„ 11. र: पर: ॥[57] (25). तीर्थेषु भ्रमणात् श्रुताध्ययनतो दाना-

„ „ त्तथाध्यापनाप्यज्ञानां[58] करणाद्व्रतैकचरणात् सव्वो-

„ 12. त्तर: शोचिय: ॥ प्रातन्नक्तमयाचितोपवसनैर्य्यैन स्वयं गुग्गु-

„ „ ल्लोराकर्षाद्वुरद: कृतोच हि कलौ शी-

„ 13. सोमनाथ:[59] प्रभु:[60] ॥ (26). कर्म्मब्रह्मविदां मुख्य: स-

„ „ र्व्वाकारतपोनिधि: श्रौतस्मात्तरहस्येषु[61] वागीश इव वि-

„ 14. श्रुत:॥[62](27). एतस्मै शासनं प्रादाद्वैद्यदेवक्षीतीश्वर: ।

„ „ **वैशाखे विशुत्याञ्च**[63] स्वर्गार्थं **हरिवासरे**॥०॥(28).

„ 15. स्वस्ति **हंसाकोञ्ची**समावासितश्रीम**ज्जयकन्धावा-**

„ „ **रात**[64] । परममाहेश्वर: परमवैष्णव: महाराजाधि-

„ 16. राज: । परमेश्वर: परमभट्टारक: । श्रीमान[65] **वैद्यदेव-**

„ „ देव: कुशली । श्री**प्राग्ज्योतिषभुक्तौ** । **कामरू-**

---o---

PLATE III. a.

„ 1. **पमण्डले । वाडाविसये** भट्टगङ्गाधरभुक्तक । शान्ति-

„ „ वडामन्दराग्रामीय । यथाप्रधानप्रतिवासि । चट्टभट्टविस-

„ 2. यिल्लकादिजनपदान कर्षकाश्च यथात्यागं मानयति ।

---

55 Metre: Pathyâryâ, 56. read पूर्व्वपूर्व्वजनुर्ज्जन्मकर्म्मपाकादभूत्सुतः । तस्यैत° द्विजाधीशपूज्यः 57. Metre: Pathyâvaktra 58. read तथाध्यापनाद्यज्ञानां 59. read सर्व्वोत्तरः * प्रातर्न्न° * * श्रीसोमनाथः 60. Metre: Ṣârdûlavikrîḍita 61. read निधिः। श्रौतस्मार्त्त°. 62. Metre of verses 27. 28, 29, 30: Pathyâvaktra. 63. read क्षिती° विषुवत्याञ्च. 64. read °श्रीमज्जयस्कन्धावारात्. 65. read श्रीमान्.

Digitized by Google

Line. 2. बोधयति समादिशति वः मतमस्तु भवतां ।
,, ,, एतत द्वयं
,, 3. चतुःशीमावच्छिन्नं । परिबोधशुद्धं अचट्टभट्टप्रवेसं सजल-
,, ,, स्थलं । भूच्छिद्रञ्च अकिञ्चितकरग्राह्यं[66]। चतुर्थाब्द
,, 4. सं वैशाखप्रथमादिना गुग्गुलीश्रीशृधरशर्म्मणे[67]
,, ,, चतुःशतिकं शासनीकृत्य प्रदत्तमस्माभिः तदेतस्मिन[68]
,, 5. विधेया भवेन्नेति । सं ६ सूर्य्यगत्या वैशाखदिने
,, ,, १ नि ॥ ० ॥ सन्तिवडामन्दराग्रामयोरेकीभूय
,, ,, अष्टसीमा
,, 6. न्निनयकृतः ॥ पूर्व्वदिशस्तावत दिग्दाखिडधरमादाय
,, ,, यावत पश्चिमकूलशीमा ॥ ऐशानदिशः शिङ्गिआध-
,, 7. रशीमालेङ्गवडाभोग्ये कंसपलभू १ ॥ उत्तरदिशः को-
,, ,, गटुवाडोङ्गीनडजोलीनवधराशीमा ॥
,, 8. शिरवडाशिलगुडिभोग्यं किञ्चिदतिक्रम्य जयरातिपोला
,, ,, उणेषेलाविरामादाय वाय-
,, 9. व्यदिस पिपामुण्डा अश्वत्थशीमा अम्फडाचोवोल । वुढि-
,, ,, पोखिरिपूर्व्वधरकुलाचापडि अ-
,, 10. ष्टवलपुराणधर्म्मालि पश्चिमायावत पश्चिमदिशः शीमा
,, ,, किञ्चिद्दुरक्रित्वा नैर्ऋत्यदिशो ध-
,, 11. म्मालिमादाय नैपोशृङ्गारयो विवादभूमेर्वाट्यद्रुमादाय
,, ,, लच्छुवडास्थितैकवाटीसमेतघाटचम्पकः शीमा वे-

66. read thus, omitting the unnecessary pauses in the plate:— वाडाविषये भट्टगङ्गाधरभुक्तकशान्तिवडामन्दराग्रामीययथाप्रधानप्रतिवासिचट्टभट्टविस-यिल्लकादिजनपदान् कर्षकांश्च यथात्यागं मानयति बोधयति समादिशति वः मत-मस्तु भवताम् । एतदद्वयं चतुस्सीमावच्छिन्नं परिरोधशुद्धम् अचट्टभट्टप्रवेशं सजलस्थलं भूच्छिद्रञ्च अकिञ्चत्करग्राह्यं. 67. read श्रीश्रीधर° 68. read तदेतस्मिन्

Digitized by Google

Line. 12. लवणोपटानवपल । दक्षिणदिशः कुम्भकारभोग्यवहिः
„ „ शीमा कोष्टोहाडाद्ध्रवोलयावत हेलावणामुण्डमा-
„ 13. दाय दिग्घदाण्डियावत । अग्निदिशः सीमा । एवं अष्टसीमा
